
सौर मार्गशीर्षः, [धनमासः] १९८४

चतुर्थवर्षं] [अष्टमी संख्या

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मासिकं मुखपत्रम् ।

जाड्यं निर्दलयत्, भ्रमं कवलयत्, प्रोन्मूलयन्मूर्खताम्,
चित्तं निर्मलयत्, रुचिं प्रबलयत्, धीरोगमुत्सादयत् ।
निःशेषञ्च रजस्तमः प्रशमयत्, सत्वं समुत्साहयत्,
काश्यां सिद्धरसायनं विजयते श्रीसुप्रभातं सदा ॥

त्रिताप-पूर्णा विगता त्रियामा,
तिरोदधे पापचयोऽन्धकारः ।
सुखैकहेतुः समुदेति सूर्य्यः
समागते सम्प्रति सुप्रभाते ॥

—श्रीकिशोरीलाल गोस्वामी (काशी)
(हिन्दी-साहित्य-सम्राट्)

सम्पादकः—
श्रीकेदारनाथशर्म्मा, सारस्वतः

वार्षिकम्मूल्यम् ३)
छात्रेभ्यः १॥)

माननीयेभ्यः १२)
वैदेशिकेभ्यः ६)

व्यवस्थापकः—
श्रीगिरीशशर्म्मा, शुक्लः, न्यायाचार्यः

प्राप्तिस्थानम्—
सुप्रभातकार्यालयः, काशी ।

लेख-सूची

सुप्रभातम् ।

विविध-विषय-विभूषितम्, अद्वितीयम्, संस्कृत-मासिक-पत्रम् ।

चतुर्थ-वर्षे | वाराणसी, सौर मार्गशीर्षः, (धनमासः), १९८४ वैक्रमाब्दाः | अष्टमी संख्या

विज्ञप्तिसारः ।

महाकवि श्रीगुमानीपन्त-विरचितः

सम्पादकः—श्रीतारादत्त पन्तः, साहित्याचार्यः ।

स्वधर्ममवगच्छतो हितमपि प्रवृत्तिर्न मे,
विधर्ममपि चाहितं नहि निवृत्तिरस्वैरिणः ।
निदानमिह हृद्गतान्यभवतोऽपरं भाति मे
समं कुहकवाञ्छया कपट-नर्तकी चेष्टते ॥ १ ॥
न भोगकरणादृते भवति संक्षयः कर्मणा-
मिति श्रुतय ऊचिरे न वितथं तदुद्घोषितम् ।
प्रपन्नदुरितापहस्त्वमपि सत्यमित्यद्भुतम्
भवन्ति हि महाशयाः परदुरापगूढाशयाः ॥ १२ ॥
अमुं भव-सवासनं वितत-कर्मणामाशयम्
विधास्यति न भस्मसात्त्वदनुवृत्तिरेकैव किम् ।
नमद्विषयमस्तु तच्छ्रुतिवचस्त्वदादेशतो
निदेशमवमन्यते क इव नाम ते जीयताम् ॥ १३ ॥
तवोज्ज्वलितवैभवां भुवनधाममूर्तिं विशत्
वपुः शुचि न केवलं परमयोगसिद्धात्मनाम् ।
गुहाद्यधमजन्मनामपि जगाम तद्रूपतां
मिलत्सपदि गङ्गया सकलमेव गाङ्गं जलम् ॥ १५ ॥
अनागसमपास्यतः कपिपतेर्मुदे वालिनम्
व्यलोकि भवतो मया परमभक्तवश्यात्मता ।
इह ध्रुवमनौचितीं त्वयि वदन्ति दुर्बुद्धयः
करः खलु निवार्यते प्रहरतो न वक्तुर्मुखम् ॥ १५ ॥
जगत्त्रयविभावनः श्रुतनिजप्रभावो भवान्
अनाकलयतो जनान् कृतधियोऽप्यनुध्यायतः ।
समं समनुकम्पते स्वहृदि निर्विशेषं दधत्
पुरेऽपि विपिनेऽपि वा भवति तुल्यवर्षी घनः ॥ १६ ॥

इमं जितभवश्रमं त्रिभुवनैकनाकद्रुमम्
त्वदङ्घ्रिमनुकम्पिता अपि न संश्रयन्ते खलाः ।
अतः सततवेदनं भवममुत्र विन्दन्ति ते
तरोरनुपसर्पणात्कथमपैति चण्डातपः ॥ १७ ॥
अहो भगवता त्वया निजभुजिष्यकोटिष्वहम्
विभाव्य इति दीनधीर्व्यवसितोऽपि वक्तुं त्रपे ।
क नूनमिह मादृशोऽधिकृतिमीदृशीमाप्नुया-
न्नशुलवमुदधेः स्फुरन्मणिगणेषु रत्नायते ॥ १८ ॥
धियं प्रणयशालिनीं प्रणयता किमाकस्मिकीं
जगेऽयमनतोऽपि सन्ननु गृहीत एव त्वया ॥
रिरंसति यतस्त्वयि प्रहितवृत्तिमन्मानसं
निगूढमपि कारणं सदनुमीयते कार्य्यतः ॥ १९ ॥
इदं हि महदद्भुतं त्वयि कृपाकरेऽपि स्थिते
दुनोति विषवन्मनो विषयभोगचिन्ताभरः ॥
न किन्तु तदसम्भवादिति वचोऽपि सङ्गच्छते
क चण्डकिरणो रविः क च मृदुस्तुषारोच्चयः ॥ २० ॥

(क्रमशः)

—:*:—

श्रीविश्वेश्वर-वन्दनम् ।

श्रीविश्वनाथ ! भवदीय-पदारविन्दे
येषां रतिर्न समुदेति मुदेऽातकाम्या ।
तेषामहो तनुभृतां दुरितान्वितानां
का दुर्गति र्भवति सत्यमहं न जाने ॥ १ ॥
त्वामेव देव मुनयोऽनुनयोपपन्नाः
सन्नारदप्रभृतयो भृतयोग-योगाः ।
रागादिरोग-रहिता महिता महान्तः
स्वान्तस्थितं समभजन्त मुदाऽयजन्त ॥ २ ॥
स त्वं शिवोऽप्यशिवभावमभिप्रयातः
सर्वेश्वरोऽपि भगवन्भूतभिक्षुभूयः ।
दोषाकरेण सहितोऽपि न दोषयुक्तो
नीलोऽपि लोहित इति प्रथिलक्षणोऽसि ॥ ३ ॥
गामुच्चशृङ्गमचलं च समाश्रितस्त्वं
गङ्गां सुधाकर-कलाञ्चलादुदञ्चन् ।
शल्योज्झितान्ननु शरांश्च सुरांश्च बिभ्र-
द्विज्यं पिनाकमपि नाकमहो पिपर्षि ॥ ४ ॥
भास्वद्भोग-भुजङ्ग-भूषणविभा-सम्भार-सम्भावित-
भ्राम्यद्भानुभृतप्रभूतभसित-प्रोद्भासित-श्रीभरम् ॥
भङ्गोपद्रवभीत-भक्त-भयभिद्दूरिप्रभावप्रभुवम् ।
भालभ्राजि-भराज-भासुरमहं वन्दे भवन्तं विभो ! ॥ ५ ॥

—श्रीदेवीप्रसाद शुक्लः, कविः,
(महामहोपाध्यायः)

———

'पुराणतत्त्वम्'

(समीक्षा)

लेo—श्रीमान् श्रद्धेय—पंo चण्डीप्रसाद-शुक्लः
प्रधानाध्यापकः, गोयनका-महाविद्यालयस्य ।

सुप्रभाते संस्कृते काशिके मासिक-पत्रेऽत्रभवतां रामावतारशर्म्मणामेको लेखः 'पुराणतत्त्व' शीर्षणयो लोकोपकारिबुद्ध्या प्रकाशितः, यदि अस्य लेखस्य शीर्षण्यं पुराणतत्त्वन्न भवेत्; किन्तु प्राचीनधर्म्मतत्त्वं वा

प्रतीच्यदार्शनिकविज्ञानम् वा अधुनातनधर्म्मविज्ञानं भवेत्, तदा कथमपि सुलेखिन्यास्समुद्गारोयमिति मन्येत हृदयम् ।

"यदा समस्ते जगति वा, महापरिमाणे आकाशे वा, पुरुषं शुक्तौ रजतवज्जना अध्यस्यन्ति, तदा ईश्वर इति पूजयन्ति कथयन्ति च" "ज्ञाने (क्षणिकविज्ञाने) इन्द्रियाध्यक्षं शिवं विष्णुमेकरूपमनेकरूपस्वाऽध्यस्यन्ति" इत्यादिशर्म्मीयलेखांशस्यायमेवाशयो यद्, मूढ़ा मनुष्यास्सृष्ट्यारम्भकाले, आकाशे ज्ञाने वा ईश्वरं जीवस्वाऽऽरोपयन् । किन्तु विद्वद्दृष्ट्या एव नरोवर्त्तते जीवो वा देहादिसंघात् पृथङ् नास्तीति ।

अधुना भवन्तो विचारयन्तु, यद्, इदमाक्रमणं सनातनधर्म्मस्य ईसाई-महम्मदादिधर्म्मस्य सर्वस्योपरि, अथवा केवल पुराणस्योपरीति; ततः शीर्षण्यस्य युक्तता, अस्य लेखस्योपकारिता च स्फुटीभविष्यति। इतिहासदर्शनेनानुमीयते, यद्, ईश्वरोस्तीति ! शरीरात्पृथक् स्थिरो जीवो वर्त्तते इति विदुषां धारणाऽनादिरिति । पश्चात् चार्वाक-बौद्धादिभिर्धार्मिकाक्रमणे धर्म्माचार्य्यैरेतानि तत्त्वानि युक्त्या स्थापितानि । अस्मिन्नेवावसरे कुसुमाञ्जलिबौद्धधिक्कारादयो ग्रन्थाः प्राणायिषतेति ।

अत्रभवतो रामावतारशर्म्मणो दृष्ट्या जगति आकाशे वा ईश्वरः, तथा क्षणिकविज्ञाने नित्यो जीवश्च शुक्तौ रजतवदध्यस्तो वस्तुभूतं जगत् आकाशमेवेत्युक्तिः स्वभावोक्तिः । तथा "आत्मा वा इदमग्र आसीत्" इत्यौपनिषदुक्तौ रूपकरूपा । तथा सूक्ष्मस्यास्यैवरूपकस्य पुराणेषु सृष्टिस्थितिसंहाररूपातिशयोक्तिः कृतेति ।

"इदानीमज्ञानां हस्ते पातेन पुराणस्य महती दुर्दशेति शर्म्मीयलेखेनेदं ज्ञायते, यत्, पुराणप्रणेतारो मुनयस्ताः स्वाभावोक्तीरज्ञासिषुः । या सुलेखकमनोमोदकभूतासु अतिशयोक्तीरकार्षुः । याम् अधुनातनाः पण्डिता अजानन्तः पुराणानि गर्हितानि कुर्वन्ति । अतएव शर्म्मा-महोदयो व्यासं देवं भगवानिति कथयति ।

अत्रायं प्रश्नस्स्वभावादुदेति, यत् मुनयः स्वभावोक्तीरतिशयोक्तितमसा केन प्रयोजनेनच्छादयामासुः । किं सत्यतिरोधानकरणे पुण्यम्भवति, अथवा स्वभवोक्तिर्भयावहाऽथाऽतिशयोक्तिः सुखावहा । परन्तु सत्ये कुतो भयम्, असत्ये कुतः सुखम् । अयि शर्म्ममहोदय ! यथा भवान् अधुनातनान् पण्डितान अज्ञानिनो ब्रवीति, तथैव व्यासदेवमप्यज्ञानिनं ब्रवीतु, तेषां सत्यस्यासत्येनाच्छादने वा कारणं ब्रवीतु ।

भवादृशां पण्डितप्रकाण्डानां मुखादीदृशी निर्मूलादुरुक्तिर्न शोभते ।

नृसिंहोपाख्यानं केवलं भागवत एव न वर्त्तते, किन्तु विष्णुपुराणादिषु प्रायः सर्वत्रैव वर्त्तते । तत् अतिशयोक्तिरत्र किं प्रमाणम् ? स्तम्भम्विदार्य्य नृसिंहाकार-दिव्यशक्तिप्रादुर्भावासम्भव एव प्रमाणमिति चेत्तर्हीदं विचारयतु भवान्, यत्, यदि बीजात् वृक्षः, स्त्रीगर्भस्थितरजोवीर्य्यात् जीवशरीरञ्चभवेदधुना, तदा पूर्वमेवमासीदितिवादिनोऽपि परिहासमवश्यं कुर्य्यात् भवान् । एवं धूमयान-धूमपोत तड़ित्संवादादिविषयेऽपि । अमोघशक्तिरीश्वरो जगन्निर्माति चेत्तर्हि तस्य जगत्पालनया पूर्वरूपेण

प्रादुर्भावः कथङ्कारमसम्भवभूमिर्भवेत् । भागवते पुरञ्जनोपाख्यानं रूपकरूपं वर्णितम्, परन्तु अग्रिमाध्याय एव तस्य मूलमपि स्पष्टीकृतम्, यदि हि नृसिंहोपाख्यानं रूपकम्भवेत्तदाग्रिमाध्यायेऽवश्यमेवस्पष्टीकुर्य्यात् ।

अधुनेदं ब्रवीतु भवान्, यद्, नृसिंहोपाख्यानरूपाया अतिशयोक्तेर्मूलं का रूपकोक्तिः, या भवद्दृष्ट्या वेदोक्तिः । यत्प्रमाणाल्लोको नृसिंहोपाख्यानमतिशयोक्तिं भवद्दृष्ट्यात्वप्रमाणं मन्येत । यद्धि अस्या मूलं भवान् ब्रवीति, तद् न वेदे क्वचिदप्युक्तम्, भवद्बुद्धिकल्पितं तु मूलं मन्तुं कथं कोऽपि समर्थः स्यात् ।

अधुना तु भवता नृसिंहोपाख्यान-मूलतयोक्तस्वभावोक्तिर्विचार्य्यते भवद्दृष्ट्या विषयी धनी लोक एक हिरण्यकशिपुः आनन्द एव, तस्य प्रियः पुत्रः उपदंश-प्रमेहादिरेव नृसिंहस्स आनन्दरिरक्षया धनिविषयिणं हिरण्यकशिपुं मारयतीति । न चेयं कल्पना विचारपद्धतिमवतरति ।

'यदा तमेवाकाशं स्त्रियं मन्यते लोकस्तदा चन्द्र-सूर्य्य-कुण्डलां कालीं कल्पयतीति; लिखित्वाऽग्र वर्षाकालिकनीलमेघाच्छन्ननभस्थलीं कालीं कथयतीति लिखित्वा राज्यशक्तिरेव भगवती दुर्गेति त्रिचतरासु पङ्क्तिषु परस्परविरुद्धोक्तिः कथन्नाश्चर्य्यसमुद्रे निपातयेत्पुरुषम् । इयमपि कल्पना कथन्न मृषेति ।

भगवती दुर्गा न राज्यशक्तिरपितु प्रजोत्पीड़िनीं पापमयीं राज्यशक्तिं नाशयितुमवतीर्णा भगवच्छक्तिरेव । महिषो हि पुराकालिकः पापीयान् राजा-प्रजोत्पीडकः । इत्येव देवीभागवतादि पुराणतत्त्वम् । विन्ध्याचलस्य पशुकीटसरीसृपा एव महिषासुरादयः । आर्य्यजाति शक्तिरेव दुर्गा । दुर्गा सप्तशती, कल्पितोपन्यास इत्याद्यनर्गलप्रलापो विदुषो न शोभाप्रदः ।

"अथाधरारणिं निदधाति, उर्वश्यसीत्यथोत्तरारण्याज्यविलापिनीमुपस्पृशत्यायुरसीति तामभिति दधाति पुरूरवा असीति" "उर्वशी अप्सराः पुरूरवाः पति" रित्यादिशतपथ वचनात् । तथा निरुक्ते उर्वशीपदनिर्वचनकाले तस्यादर्शनान् "मित्रावरुणयोरेतश्च स्कन्दे" त्यादिवचनाच्च उर्वशी नामाप्सराः पुरुरवा राजा तस्याः पतिरिति प्रतीयते । तथा "इन्द्र आगच्छ हरिव आगच्छ मेधातिथेर्मेषवृषणश्वमेने गौरावरस्कन्दिन् अहल्यायै जार इत्यादि शतपथादहल्यामुनिपत्नीति प्रतीयते । उषा काल एव उर्वशी अहल्या च । सूर्य्य एव पुरुरवा इन्द्रश्चेति निर्मूलैवोक्तिः । मध्यस्थानीयः इन्द्रः कथङ्कारमुत्तमस्थानीयस्सूर्य्यस्स्यादित्यपि विचारणीयम् ।

अचिन्त्यैश्वर्य्यं परमेश्वरं यो न स्वीकरोति, तस्य बुद्धौ "क्षुवतश्चमनोरिदव्राकुरिति "कथमवभासेत । ते यदि क्षुवत इत्यादि वाक्यमुपहसेयुः किमत्र-चित्रम् । इदन्तु चित्रं यत्, शर्म्मामहोदयः, पुराणोक्तिमतिशयोक्तिं जानन्नप्युपहसति, न च तन्मूलभूतां स्वभावोक्तिमुन्नीयप्रशंसतीति । स्वाभिमतपुराणादि कर्तुःपाण्डित्यम् विस्मृतवान् इति च महच्चित्रम् ।

ये हि सृष्टिं परमेश्वरनिर्मितां मन्यन्ते, तैस्तु अवश्यमेवादौ मानसीसृष्टिरभूत्, पश्चाच्छनैर्योनौ सम्पन्नेतिमन्तव्यम्, नैवं सति उक्तवचनं बुद्धौ झटिति नावरोहति ।

स्थालीपुलाकन्यायेनास्य लेखस्य समीक्षा कृता यदि शर्म्मा महोदयोऽन्यो वावसरं दद्यात्तदा महतीमपि समीक्षां कुर्य्यामिति ।

सम्पलब्धाः कोषग्रन्थाः ।

विदितमेव स्यात् संस्कृतविदुषाम, यत् १५ वर्षेभ्यः श्रद्धेयाः श्रीरामावतारशर्म्ममहोदयाः, नवीन संस्कृत-बृहत्कोषनिर्माणे बद्धपरिकराः सन्ति । स च कोषः साम्प्रतं विनिर्मित प्राय एव तेषां सङ्ग्रहे त्रिशतकोषानां नामानि सन्ति । तेषु च साम्प्रतं यावत् समुपलब्धानां मुद्रितप्रायाणां कोषाणां नामानि प्रकाश्यन्ते । यदि तत्र विषये केषाञ्चन विदुषामधिकं ज्ञानं स्यात्, जिज्ञासितव्यं वा भवेत्ते सुप्रभात-कार्यालयतो विज्ञापयितुं ज्ञातुं च शक्नुवन्ति ।

सम्पादकः,

१.	अनेकार्थध्वनिमञ्जरी	गदसिंहकृता
२	अभिधानचिन्तामणिः	हेमचन्द्र कृता
३.	अभिधान चिन्तामणिः	शिलोञ्छ कृता
४.	अभिधान रत्नमाला	हलायुधकृता
५.	अमर-कोषः	
६.	आख्यातचन्द्रिका	भट्टमल्लरचिता
७.	एकाक्षरकोषः	
८.	कल्पद्रुकोषः (केशवः)	केशव-प्रणीतः
९.	कविकल्पद्रुमः	वोपदेव-रचितः
१०.	कविरहस्यम्	हलायुधप्रणीतम्
११.	तन्त्राभिधानम्	
१२.	त्रिकाण्डशेषः	पुरुषोत्तमदेवस्य
१३.	दशललकारिका	
१४.	देशीयनाममाला	हेमचन्द्रप्रणीता
१५.	द्विरूपकोषः	
१६.	धनञ्जयनाममाला	
१७.	धन्वन्तरिनिघण्टू	
१८.	धातुपाठः	
१९.	नक्षत्रकोषः	
२०.	नानार्थार्णवसङ्क्षेपः	
२१.	पर्यायमुक्तावलिः	
२२.	पर्यायरत्नमाला	माधवकर-कृता
२३.	पैयालच्छीनाममाला	धनपालः
२४.	मङ्खकोषः	
२५.	मदनपालनिघण्टू	
२६.	मेदिनी कोषः	
२७.	मातृका कोषः	
२८.	राजनिघण्टू	
२९.	राजवल्लभ निघण्टू	
३०.	राशीकोषः	
३१.	लिङ्गानुशासनम्	
३२.	विश्वप्रकाशः	
३३.	वैजयन्ती	
३४.	विश्वलोचनकोषः	
३५.	वैदिककोषः	
३६.	शाश्वतकोषः	
३७.	शारदीनाममाला	
३८.	श्रीशब्दरत्नमाला	
३९.	साङ्ख्यकोषः	
४०.	हारावलिः	पुरुषोत्तमकृता
४१.	हैमानेकार्थसङ्ग्रहः	हेमचन्द्रप्रणीतः
४२.	हैमनिघण्टूशेषः	
४३.	निघण्टू	

रघुवंशमहाकाव्यम् ।

चोरपक्षीया टीका ।

स्वर्गीय-महाकवि-श्रीदुःखभञ्जन-कवीन्द्रकृता ।

स्थितः स्थितामुच्चलितः प्रयातां
निषेदुषीमासनबन्धधीरः ॥
जलाभिलाषी जलमाददानां
छायेऽवतां भूपतिरन्वगच्छत् ॥ ६ ॥

अनु यथातथा स चैारः तां अगच्छत्, कीदृशः जलाभिलाषी, अतएव स्थितः, अतएवस्थितामुत्विद्यमानहर्षाभावः, अतएव चलितः चलीकृतः, पिपासयेति यावत् । अतएव इमासनबन्धधीरः, एः कामस्य मां लक्ष्मीं अस्यतिकर्त्तरिल्युः, तादृशश्चासौ बन्धश्च तस्य तत्र वा धियं राति ईरयति वा तादृशः अतएव भूपतिः भवत्पतिः, भवतीतिशत्रर्थेक्विप्, कसति, प्रयातां प्रगच्छतां आददानां परेषां भोजनहराणां स्वकीयानां भोजनप्रदानां जलमवतां वारिरक्षतां छाये छायावाहुल्ये, अथ प्रतिविम्बे, अथ साहाय्ये निषेदुषि स्थितवति सति, प्रतिविम्बे च साहाय्ये छायंछाया-कदम्बके इति कोषः ॥ ६ ॥

संन्यस्तचिह्नामपि राजलक्ष्मीं
तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृत-दानराजि-
रन्तर्मदावस्थ इव द्विपेन्द्रः ॥ ७ ॥

स चैारः अनाविष्कृत-दानराजिः आसीत, दानानां खण्डनानां राजिः परम्परा आविष्कृता येन तथा विधो न भवति तादृशः, अथ आविष्कृतं यति तादृक् अनराजिः अमनुष्य संग्रामः तादृकू न भवति, अथ अनराजस्य अपत्यं आनराजिः अनाविष्कृतदश्चाऽसावानराजिश्च सः, अथ आनं अननं रातितादृश आजिः अनाविष्कृतं गुप्तं यति तादृकू आनराजिर्यस्य सः, कीदृशः अपिराजलक्ष्मीं दधानः, अपिराति इति अपिरम् अल्लोपे पिरं न पिरं अपिरं वा, आजं अजमांसं अजसमूहो वा यस्यां तां लक्ष्मीं विभ्रत्, कीदृशीं, संन्यस्तचिह्नां त्यक्तचैारलक्षणां, तथा तेजसः अविशेषेण साधारण्येन अनुमितां, क इव; द्विपेन्द्र इव, कीदृशः द्विपेन्द्रः, अन्तर्मदावस्थः, मदं आप्नोति क्विप् मदाप् सा चासौ अस्था अनास्था च अन्तः मदावस्था यस्य सः, द्वे मूत्रजले पिवति द्विपः, छागप्रभृतिः, तेषामिन्द्र इतिवा ॥ ७ ॥

लताप्रतानोद्ग्रथितैः सकेशै
रधिज्यधन्वा विचचार दावम् ॥
रक्षापदेशान्मुनिहोमधनो
र्वन्यान्विनेष्यन्निव दुष्टसत्त्वान् ॥८॥

स दावं विचचार कीदृशः, लताप्रतानोद्ग्रथितैः केशैः उपलक्षितः, तथा अधिज्यधन्वा, तथा मुनिहोमधेनोः रक्षापदेशात् रक्षापदेशं अत्ति तादृशः, किं कुर्वन् इव, वन्यान् दुष्टसत्वान् विना इष्यन् आत्मनः ई कामं इच्छन् इव, अथ दुष्टसत्वान् विनेष्यन्, अथ वन्यान् वन्यां वन संहतौ, आसमन्तात् अनिति क्विप्, तादृशः, अथ वन्यैः जन्तुभिः, अथ फलादिभिः, अनिति तादृशो वा ॥ ८ ॥

विसृष्टपार्श्वानुचरस्य तस्य
पार्श्वद्रुमाः पाशभृता समस्य ॥
उदीरयामासुरिवोन्मदाना
मालोकशब्दं वयसां विरावैः ॥ ६ ॥

उन्मदाः उन्मत्ताः, वयसां विरावैः, पक्षिणां कलकलैः, सह तस्य चौरस्य नामालोकशब्दं नाम-संभावनायां दर्शनशब्दं उदीरयामासुरिव । कीदृशाः उन्मदाः, पार्श्वद्रुमाः पार्श्वद्रून् मान्ति, आतोनुपसर्गे कः, तथाविधाः, कीदृशस्य चौरस्य, विसृष्टपार्श्वानुचरस्य पार्श्वयोः अनु यथातथा चरन्ति, तादृशास्ते विसृष्टाः येन तस्य, तथा पाशभृतासमस्य श्वपचेन-तुल्यस्य, अथ पाशेनभृतः पुष्टः, अतएव असमः विषमः तस्य ॥ ६ ॥

परमेश्वरस्तवः ।

लेखकः—महामहोपाध्यायः गणपतिशास्त्री वेदान्तकेसरी ।

(१)

भूतादिनाथ ! परिणूतावतीव
तव भीतानि यस्य निगम
व्रातानि चापि गिरिजातापते !
सपदि यातानि खेदमतुलं ।
एतादृशन्नवितुमाताम्रपादयुग !
का तावदस्य मम गीः !
पोतायितस्य तव पूता भवे
दिति शिवैतावदेव हृदयम् ॥

(२)

श्रीकामुक-द्रुहिण-पाकाहित-
प्रभृतिनाकालयौघविनत !
स्तोकायितप्रभवराका-निशा—
दयित-भा कान्त दिव्यवदन !
कोकारिभूष शुभपाकावनम्रतर
लोकार्तिकारि भवभी-
मोकातुर स्वहृद्रुमाकान्त मां
कलय शोकात् वहिर्नटपते ! ॥

(३)

यत्तावकं गिरिश ! चित्ताम्बुजे
विमलवृत्ताश्रयो विरचयन्,
वित्ताधिपो जगति मत्तान् गजा-
नपि च सत्तां पराञ्च लभते ।
मत्ताभ, देव, हर, मत्तात !
देववर ! धत्तां पदाब्ज युगले
नृत्ताधिनाथ ! तव तत्तादृशे
झटिति कृत्ता शुभव्यति करे ॥

(४)

नालीक-तुल्य-पद-धूली-लवं
यमधि मौलीश संकलयितुम्
नालीकजादिसुरपाली सदा
विनति-केलीं नितान्तमयते ।
स्वालीकजाग्निकण-केली-प्रदग्ध-
शठ नालीकरोप ! भगवन् !
काली-सनाथ ! विधुहेलीक्षणैष
मम चूलीं कदा नु पविता ? ॥

सामुद्रिक-विज्ञानम् ।

श्रीकालिकाप्रसाद शर्म्मा, काशीराज-ज्योतिषी

परम-पित्रा परमेश्वरेण संसारं विरच्याखिल प्राणिनां हितार्थमावश्यकीया समग्रा सामग्री तच्छरीरेष्वेव विनिर्मिता । यथा पञ्च-ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च यैर्लौकिकं पारलौकिकं च कार्य्यं सम्यक् संसाध्यत इति ।

भगवता येषां नख-शिरा-रोम-रेखाणां लघुदीर्घता, उन्नतावनताऽवयवानाम्, रक्तपीतवर्णाद्यनेकरूपविविधाकृतिः शरीराणाम्, इति यन्निर्माणं कृतम् तत् सर्वं विज्ञानपरिपूर्णमित्येतत्प्रत्येक विषयपर्य्यालोचनया भगवतोऽनिर्वचनीयाद्भुतशक्तेर्दृश्यं दृष्टिगोचरं भवति ।

अवयवानां निम्नोन्नतत्वादिना मानव-जीवन-चरित्राणां तत्सुखदुःखादीनाञ्च यथा ज्ञानं भवति, शास्त्रोक्तं तत्प्रकारं प्रदर्शयामि । यथा—

"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मषडुन्नतम् ।
सप्त रक्तं त्रिगम्भीरं त्रिविस्तीर्णं प्रशस्यते ॥

पञ्चदीर्घंयथा—हनु-लोचन-बाहु-नासिका-स्तनयोरत्र सुदीर्घं पंचकम् । इतिदीर्घमितं तु पञ्चकं न भवत्येव नृणामभूभृताम् ।

चतुर्ह्रस्वं—ह्रस्वानि चत्वार्यथलिङ्गपृष्ठे ग्रीवा च जंघे च हितप्रदानि ।

पञ्चसूक्ष्मम्—सूक्ष्मानि पञ्च दशनाङ्गुलिपर्वकेशाः, साकं त्वचाकररुहैश्च न दुखितानाम् ।

षडुन्नतं—वक्षोऽथ कुक्षिद्वयनासिकास्यकृकाटिका चेति षडुन्नतानि ।

सप्तरक्तं—नेत्रान्त-पाद-करताल्वधरोष्ठ-जिह्वा-रक्ता-न खाश्च खलु सर्वसुखप्रदानि ।

त्रिगम्भीरं—नाभि स्वरं सत्वमिति प्रशस्यं गम्भीरमेतत्त्रितयं नराणाम् ।

त्रिविस्तीर्णम्—उरो ललाटो वदनं नराणां विस्तीर्णमेतत्त्रितयं प्रशस्तम् ।

प्रशस्तान्येतानि शुभफलप्रदानीत्येतद्विपरीतान्यशुभफलावबोधकानीति ।

यदि कतिपयान्यङ्गानि शुभलक्षणैः शेषाण्यशुभलक्षणैर्युक्तानि स्युस्तर्हि मनुजजीवनस्य शुभाशुभफलान्येवं ज्ञातव्यानि ।

प्रथमत आयुष्यनिर्णयन्तत्पूर्णपरिज्ञानं च कृत्वा, वर्षाणि निश्चेतव्यानि (एतन्निर्णय-प्रकारस्तु मदीयाभिनवविरचिते सचित्र-सामुद्रिक-रहस्याख्ये ग्रन्थे सुस्पष्टं वर्तते) तानि वर्षाण्यधोङ्कित दशभागेषु विभाजितव्यानि । यथा—

"पादे सगुल्फौ प्रथमं प्रदिष्टौ
जङ्घे द्वितीयं च सजानुचक्रं ।
मेढ्रोरुमुष्कं च ततस्तृतीयं-
नाभिः कटिश्चेति चतुर्थमाहुः" ।

उदरं कथयन्ति पञ्चमं हृदयं षष्ठमथस्तनान्वितम् ।
अथ सप्तमं सजत्रुणी कथयन्त्यष्टममोष्ठकन्धरे ॥
नवमं नयने च सभ्रुवौ स ललाटं दशमं शिरस्तथा ।

अशुभेष्वशुभं दशाफलं चरणादेषु शुभेषु शोभन मिति

सजत्रुणीति—अंसकक्षयोः सन्धिसहितौ बाहु सप्तममित्यर्थः । शेषं सुस्पष्टमेवेति चरणादारभ्य शिरः पर्यन्तेषु दश भागेषु विभज्य, परस्मिन्भागे दशायाः शुभाशुभानि लक्षणानि दृष्टानि स्युस्तस्मिन्वर्षप्रमाणे तदङ्गस्य शुभाशुभं फलं ज्ञातव्यम् ।

यान्यङ्गान्युक्तशुभाशुभफलेष्वत्रानुक्तानि तेषां ज्ञानमप्युक्तग्रन्थेन कर्तव्यमित्यादि केवलावयवानां निम्नोन्नतत्वेन वर्णेन च शुभाशुभविचारोभवति ।

एभिरेवाङ्गैर्जन्ममासपक्षतिथ्यादीनामपि विचारो भवतीति यथावकाशं पाठकमहोदयानां सेवासु नख-शिरा-रोम-रेखादीनामपि दिग्दर्शनं भविष्यतीति ।

पण्डितेभ्यो निवेदनम् ।

अयि ! संस्कृत-साहित्य-समाज सदस्याः ! तथा काशी-पण्डित-सभा-नायकाः ! एवं काशी विद्वत्परिषत्प्रवर्तकास्तथान्ये काशीस्थाः, बहिस्थाश्च विद्वांसः !

वयमान्ध्राः । भागवतेऽस्मद्विषये एवं श्रूयते, यत्—

"किरात-हूणान्ध्र-पुलिन्द-पुल्कसा,
आभीर-कङ्का यवनाः खसादयः ।
येऽन्ये च पापा यदुपाश्रयाश्रया—
च्छुद्ध्यन्ति तस्मै प्रभविष्णवे नमः ॥"

अपि च,—

"ते वै विदन्त्यतितरन्ति च देवमायाम्
स्त्रीशूद्रहूणशबरा अपि पाप-जीवाः ।
यद्यद्भुत-क्रम-परायण-शील-शिक्षा-
स्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥"

इत्यादिवचनैः, आन्ध्र-हूणादयः पापयोनय इति कथितम् । यदि एवं आन्ध्रादयः पापाः, तेषां शुद्धिः कथमभूत् । अस्माकं तु हिन्दूनां श्रुतिस्मृतिपुराणानि प्रमाणम् । तेषु कुत्रचिदपि अनेन अवश्यमेव भवितव्यम्, यद् पापा अपि शुद्ध्यनन्तरं हिन्दवो भवितुमर्हन्ति इति । श्रूयते खलु ऐतरेय ब्राह्मणे—

"तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत् कनीयांसस्तद्ये ज्यायांसो न ते कुशलं मेनिरे ताननुव्याजहारान् तान्वः प्रजा भक्षीष्टेति त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः"

(सप्तपञ्चमिका, अध्याय ३, खण्ड ६, मंत्र १०)

२

एवं विश्वामित्रस्य एकशत-संख्याकाः पुत्रा आसन् । तेष्वेकशतपुत्रेषु मध्ये ये मधुच्छन्दसादयो ज्येष्ठाः, विश्वामित्रेण कृतं शुनःशेफस्य पुत्रस्वीकरणं समीचीनमिति न स्वीचक्रुः, ते विश्वामित्रेण, "हे ज्येष्ठ पुत्राः, यूयं अस्मन्मतं नाङ्गीकृतवन्तः इति युष्माकं प्रजाः,चाण्डालादि-नीचजाति विशेषत्वं प्राप्नुयुः" इति शप्ताः, एवं ते मधुच्छन्दसादयो ऽभिशप्ताः सन्तः, आन्ध्र पुण्ड्र-शबर-पुलिन्द-मूतिबेत्यादिनीचजातिविशेषाः सञ्जाताः । श्रीमत्सायणाचार्य-विरचित-भाष्ये एतदपि उक्तं यत्ते अनेक विधा विश्वामित्र संततिजाः दस्यूनां मध्ये अधिका बभूवुः इति ।

अधुना तु दक्षिणापथे आंध्र द्रविडादिषु वर्णाश्रम विभागो विद्यते । तेऽपि हिन्दव इति सर्वैरपि अङ्गीकृतम् । कथं तर्हि तेषां शुद्धिः समजनि । यदि केनचिदपि प्रकारेण तेषां शुद्धिर्निर्वर्तिता, कः पुनः स प्रकारः, येन ते पापयोनय आंध्र-द्रविड-हूणादयः शुद्धा हिन्दवः संवृत्ताः । तद्विधानं श्रुतिचोदितम्, स्मृतिसमर्थितं च किम् ? यदि श्रुति स्मृत्यनुकूलैव तेषां शुद्धिरभूत्, तदा इदानीमपि ये विधर्मा स्तेषां शुद्धिः केन कारणेन पापमिति ब्रुवन्ति विद्वांसः ।

सर्वं प्रथमम् मनुष्योत्पत्तिर्भरतखंडे हि अभूत् । तदा सर्वं जगत् ब्राह्ममेव प्रादुर्भूतं । तदनन्तरमपि ये ये पापयोनयः, ते आर्येभ्य एव प्रवृत्ताः । मनुनाप्युक्तं,

"शनकैस्तु क्रिया लोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । ४३-१० अ.
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ’
मुख बाहूरुपाज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥

४५ श्लो १० अ. मनुः

अपरं च

"वैदेहिकादान्ध्रमेदौ बहिर्ग्राम प्रतिश्रयौ" ३६-१०अ. इति च ।

यदि एतत्सत्यमेव तर्हि संसारेऽस्मिन् अधुना ये ये जात्युपजाति-भेदाः, यावन्तो अनार्यधर्मास्सन्ति, ते सर्वे ब्राह्मणाऽदर्शनादेव आर्येभ्यो हि संभूताः। अद्य ये अनार्यास्तेऽप्येकदा सनातनधर्मानुसारेण आर्या एव आसन्। तर्हि तेषां शुद्धिरधुना आंध्र-द्रविडशकादिशुद्धिरीत्या किमिति न भवितु मर्हति।

अयि पण्डितप्रवराः! ममेयं शंका समुत्पन्ना। एवं शिष्यमनुग्रहबुद्ध्या यूयं विशंकं कुरुध्वमिति प्रार्थयमानः।

—वेंकटेश्वरः।

काशीविद्यापीठच्छात्रः।

कल्यं कल्याणभाजां प्रकृतिपरिचयैर्लोचनोन्मीलनस्य
ज्ञानाम्भोधे रियत्तानियमननिपुणा शारदाऽऽधारभूमिः
आनासाग्रं निमग्नो व्यसनजलनिधावस्मि, आत्मैकताना
सानन्दं चक्रपाणे श्चरणकमलयोस्त्वं च, नो मे विषादः॥
वीणायां कुञ्चितभ्रूः, सदसि दिविषदां चेदभिप्रायशून्या,
जङ्घाला ते जनेऽस्मिञ्जननि जयकरी जायतामाशु दृष्टिः॥

श्रीकाशीनाथ शर्मा द्विवेदः।

सारस्वतम्—(शारदालहरी)।

कल्याणं त्वत्पराणां किमपि, गणपतिर्मङ्गलानां विधाता,
दूरे दैन्यानि, लक्ष्मीः कनक कमलिनीवल्लभा सन्निधत्ते।
तस्मादभ्यर्थनेयं भगवति भवती सावधाना मयि स्या-
न्नो किञ्चित्काङ्क्षणीयं स्फुटतर कवितालोचनं मोचनं नः॥
उद्भूतं भूतलेऽस्मिन् प्रसृमरममरद्रुमाशु, दिक्षु प्रकीर्णं
शाखाभिः, सिद्धिभाजां कुसुमितमसकृत्सर्वथासाधुवादैः
पान्थैरास्वादयद्भिः फलित मथ घनच्छायया सेव्यमानं
सानन्दं ते दयातः कमपि किल यशःपादपं कल्पयन्ति॥
भूयांसः सन्ति देवा विहित परिकराःकाङ्क्षणीय प्रदानेऽ-
सामञ्जस्यादमीषां मयि जननि परं त्वन्मयी भावना मे
सेवाभिः सावधाने प्रभवति, सहसाऽऽकूतविज्ञानपूर्वं-
गीर्णैः संपादनीयं स्वयमनुचरणं पादपङ्केरुहस्य॥
विद्वांसः संश्रयन्तां मुररिपुगृहिणीपादपाथोजरेणून्—
सेवन्तां शैलकन्यामपि च कतिपये नस्तु मातस्त्वमेव।

लावण्यमयी।

(आख्यायिका)

[ले०—हिन्दीसाहित्य सम्राट् श्रीकिशोरीलाल गोस्वामी]

एकादशः परिच्छेदः।

सुन्दरी-संलापः।

एकान्त-सुन्दर-विधान-जडः क्व वेधाः?
सर्वाङ्गकान्तिरुचिरं क्व च रूपमस्याः?
मन्ये, महेश्वरभयान्मकरध्वजेन,
प्राणार्थिना युवतिरूपमिदं गृहीतम्॥

—सुन्दरदेवः

प्रातरेव कृत-नित्यक्रियः कुमारः सुधाकरो लावण्यमयीमन्वेष्टुं तस्याः सुसज्जिते प्रकोष्ठे प्रविष्टः। तस्मिन् मन्दिरे नासील्लावण्यमयी, किन्तु, तस्याः सहचरी सुन्दरी रजनी, तत्र गृह-साहित्य-संस्कारे संलग्नाऽऽसीत्। तामेकाकिनीमवलोक्य, सहासमुवाच सुधाकरः—'ज्येष्ठे! क्वास्ते साम्प्रतं ते कनिष्ठा'।

सुधाकरमवलोक्य, स्वगात्रवस्त्राणि यथास्थानं संस्थाप्य, लज्जानम्रमुखी भूत्वा च समन्दस्मितमुवाच सा रजनी—"प्रभो! नास्त्यत्र सा मे मान्या प्रियसखी लावण्यमयी। तदत्रासने तिष्ठतु भवान्, अहमधुनैव तामत्रैवानेष्यामि।"

सुधाकरः—ननु सुन्दरि! स्वक्रीतदासं त्वमिदानीं 'प्रभु' रिति वदसि। विगतरात्रौ यं त्वं 'क्रीतदास' इत्यवादीः, तमेव प्रातः प्रभुरिति वदसि। इत्यवसरे क्वान्तर्हिता सा ते स्वाभाविकी मुखरता?

रजनी—(लज्जां विधाय) प्रभो! क्षन्तव्यो मेऽपराधः, अहं तु ते क्रीता किङ्करीव कर्मकरी संवृत्ता। (इत्युक्त्वा सा गन्तुमुद्यता)

सुधाकरः—(प्रतिवार्य) तिष्ठ क्षणम्। श्रृणु सुन्दरि, मे वार्त्ताः। रात्रौ स्वसखी-सम्मुखं त्वया यद् यद् प्रोक्तम्; तत्सर्वमेव मया स्वकर्णाभ्यां श्रुतम्, इदानीं त्वमेव वद! ते तादृश्या मुखरतायाः कीदृशो दण्डो विधेयः?

रजनी—स त्वधुना दण्डयितुरिच्छाधीन एव वर्तते। अतो येन भवतो मनस्तुष्टिर्भवेत् स एव दण्डः सहर्षं प्रदेयः। नतमस्तकया मया स एव सबहुमानं ग्रहीष्यते।

सुधाकरः—सत्यमुक्तम्। अतः श्रृणु। पूर्वं तु त्वामहं बाहुपाशाभ्यां बध्नामि। ततः परं सुविचार्य, अपराधानुरूपं दण्डं दास्यामि।

रजनी—ननु देव! सावधानतया तिष्ठतु भवान्। अत्र-बीजमस्ति।

सुधाकरः—किं रूपमत्र कारणम्?

रजनी—नन्वहं कुमारी, अतः पर-पुरुष-स्पर्श-पराङ्मुखी।

सुधाकरः—अतो वद, कौमारे गते किं त्वं मदिच्छित-दण्डग्रहणे समर्था भविष्यसि?

इति श्रुत्वा सा रजनी यावदेव तस्मात् स्थानात् पलायितुमुद्यता, तावदेव स्मेरानना लावण्यमयी तत्रैवागत्य, प्रोवाच, अहो! अत्र एकान्ते प्रकोष्ठे युवयोरेकत्रावस्थितिर्मया न ज्ञाता, ज्ञाते सति अत्रागमने विरक्ता भूत्वाऽन्यस्मिन्नेव स्थाने गत्वा स्वपिमि।

सुधाकरः—ननु प्रिये! दिवाऽपि स्वापो विधेयः?

लावण्यमयी—किं करोमि? रात्रिजागरणवशादिदानीं नावस्थातुं शक्नोमि। (रजनीमवलोक्य) त्वमत्र स्थिता एकान्ते मत्प्रियपतिमादाय, किङ्करोषि, ज्येष्ठे!

रजनी—विश्रम्भालापं करोमि। श्रृणु सखि। तवाऽयं प्रियः प्राणनाथो मां स्वभुजाभ्यां सुदृढं बद्ध्वा, किमप्यनिर्वचनीयं दण्डं दातुमुद्युक्तः। (इत्युक्त्वा, सुधाकर-कथितामखिलां वार्तां पुनरुवाच) इदानीं प्रियसखि, देह्यनुज्ञाम्, नाहमत्रावस्थातुं शक्नोमि।

लावण्यमयी—ननु मा भैषीः। मत्सम्मुखे किमपि भयं न कार्यं त्वया। (सुधाकरं प्रति) ननु लम्पट! मत्प्रियसखीं कामयसे?

सुधाकरः—अत्र कोऽपराधो मम?

लावण्यमयी—इति कथम्?

सुधाकरः—इयम् रजनी, अहन्तु सुधाकरः। तस्मादावयो विद्यते स्वाभाविकः सम्बन्धः।

लावण्यमयी—आदर्शे तावत् स्वमुखं पश्य।

सुधाकरः—कस्मै प्रयोजनाय?

लावण्यमयी—रजनी-समागमाय!

सुधाकरः—दृष्टं तावत् स्वमुखम्, अधुना वद, कीदृङ् मम मुखम्? प्रिये!

रजनी—इदानीं सुधाकरो दिवसधूसरः सम्वृत्तः।

सुधाकरः—ननु मुखरे! साम्प्रतं दिवसभिया रजन्यपि कोणकुहरे लुक्कायिता। तामुद्धर्तुंकाम एव सुधाकरोऽत्र समायातः।

रजनी—त्वन्तु, 'प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः' एव। (इत्युक्त्वा सा तस्मात् स्थानात् पलायिता)।

ततो लावण्यमयी तं दान्तासने निवेश्य, स्वयमपि तस्य वामपार्श्वे स्थित्वा, गृहीत्वा च तस्य दक्षिणं करम् स्वकरेण, समन्दस्मितमुवाच-जीवितेश! इदानीं नाहं विस्मर्त्तव्या।

सुधाकरः—(तस्याश्चिबुकं विधृत्य सहासम्) इति किं वदसि प्राणेश्वरि !

लावण्यमयी—नन्विदानीं रजन्यामासक्तः ।

सुधाकरः—तस्यास्तु सुधाकरेण नित्यसम्बन्धः ।

लावण्यमयी—तर्हि मे का दशा भविष्यति ?

सुधाकरः—लावण्यमयीं विना क्व सुधाकरस्य सुधा-सम्पत्तिः ? क्व च रजन्या रमणीयता-सम्भारः ।

लावण्यमयी—ननु रे धृष्ट ! नाऽहं सपत्नीज्वालां सोढुं समर्था ।

सुधाकरः——मानिनि, मानं मा कुरु । त्वां विहाय सुधाकरः कस्या अपि क्रीतदासो न भविष्यति ।

लावण्यमयी—(स-हर्षम्) त्वन्तु मम प्राणेश्वरः, प्रियात् प्रियतमः, जीवननाथः, जीवितेशश्च ।

सुधाकरः—इदानीं क्व मे माता ?

लावण्यमयी—सा देवी, श्रीहरिमन्दिरे स्व-स्वामिना साकं श्रीमद्भगवदर्चनं करोति ।

सुधाकरः—अधुना ते धात्र्याः कीदृशी अवस्था ? ।

लावण्यमयी—सा तु हतचेतना एवाऽस्ति । अधुनैव वैद्यराजेनागत्य, यथायोग्यं दृष्टम्, उक्तञ्च 'दोषदुष्टोज्वरः सञ्जातः, तेन प्राणहानिरपि भविष्यति आरोग्यलाभोऽपि च । सिद्धान्ततया रोगस्तु कष्टसाध्यः संवृत्तः । यदि कतिपयैरहोभिरसाध्यो भवेत्तर्हि मृत्युञ्जय एव प्रमाणम् ।' इत्युक्त्वा राजतीं मुद्रां च गृहीत्वा वैद्यराजः प्रयातः । ततः औषधिव्यवस्थां विधायाहमत्र समायातः ।

सुधाकरः—ननु प्रिये ! अपराह्णे पूर्ववदेव उद्याने त्वया गन्तव्यम् । तत्र लतामन्दिरे स्थित्वाऽहं तवागमनचिन्तां करिष्यामि ।

लावण्यमयी—श्रृणु प्रियतम ! इदानीं माता तवात्रैव-समागता । एतावता अधुना उद्यान-विहारः कथं कर्तव्यः ।

सुधाकरः—स्वातन्त्र्येणैव कर्तव्यः । मन्मातुरियमेवाऽज्ञा । सा तु त्वामेव एवमेव वदिष्यति, पुष्पोद्याने प्रेषयिष्यति च ।

इत्यवसर एव किमपि भोज्यं पानीयञ्च आदाय, रजनी तत्रैव समागता । ततस्ते त्रय एव मिलित्वा भोजन-पान व्यापारं ससंलापं चक्रुः । तदनन्तरं सुधाकरः स्वपितुः समीपं जगाम । लावण्यमयी शयनीयञ्चाभजत् ।

इत्येकादशः परिच्छेदः ।

सुप्रभातोत्सवः ।

(ले०—चक्रधरशर्मा शास्त्री, बहुगुणः)

उदयति महिमानं, मानसे मुद्विलासम्,
दिशति तिमिरनाशं, ज्ञानभानोः प्रकाशम् ।
सकल-नव-कलाभिः सर्वतन्त्रस्वतन्त्रम्
जयति किमपि भव्यं, भारते 'सुप्रभातम्' ॥१॥

नान्द्यन्ते—

सूत्रधारः—अहह ! चिराय सफलितं जन्म, आमन्दानन्द पूरितमिवान्तःकरणम्, सुधासार-शिशिरीकृत मिव शरीरम्, यदद्य यवन-दुर्नीतिदुर्विदग्धे, सकल-विज्ञान-विनाश-विचेतन इवास्मिन् भारते वर्षे, पूर्ववत्सुरभारत्या विलासमयं हासमिव विविधभाव-भासुरं 'सुप्रभातं' पश्यामि ।

यस्मिन्नेकतः कविकादम्बानां काकली, अपरतो विद्वज्जन मधुकराणां गुञ्जितम्, अन्यतश्च छात्रचटकानां कूजितम्, इतश्च कर्मकाण्ड-पण्डित-प्रकाण्डानां शास्त्रवाद-भेरीनादः, सर्वतश्च "जय जय, जीव जीवे" ति जनताया माङ्गलिकं गीतम् (कर्णंदत्वा) आर्ये । किमेषः श्रूयते घरघरेति शब्दः । यः—

"प्रकम्पयति भूधरान्, धरणिमण्डलम् दिग्गजम्,
विभीषयति मानसम्, बधिरयत्यसौ मे श्रुतिम् ।
घरड्डरटघर्घरध्वनिगभीर-चण्डः क्वचित्,
डमड्डुमरुडिण्डिम प्रतिरवानुकारी रवः ॥ २ ॥
(इति भयं नाटयति)

नटी—आर्यपुत्र ! न भेतव्यम्, न भेतव्यम् । 'सुरभारती' भारत—भाग्येन सह स्वर्गाद्भुमावबततारे' ति यः स्वप्नो भवता गतरजन्यां दृष्ट आसीत्स सफलीभूत 'इवानुमीयते यतः किमप्येकं देवयानमित एवायाति, तत्पश्य इति–दर्शयति ।

सूत्रधारः—सत्यमभिहितं भवत्या । तथापि—
संघर्षैश्चल-पत्र-पद्धतिभवैरुत्पाटयन् वारिदान्,
झांकारै रतिखेचरान् विधुरयन्वाचालयन् दिङ्मुखान्
चञ्चच्चङ्क्रमणैः, समेति नभसः पातप्रपातैः क्वचित्,
झंझावात इव प्रकम्प-बहुलो मूर्तो विमानः क्षणात् ॥३॥

नटी—आर्य । 'तत्सत्यमिति' ज्ञातमस्तु ।

सूत्रधारः—हन्त ! ज्ञातम् । 'प्राभातिकःस्वप्नः सत्यो भवतीति' सम्पन्नम् । आर्ये ! तदत्रावस्थानमसाम्प्रतं साम्प्रतम् । एहि । अतोन्यत्र गच्छावः (इति निष्क्रान्तौ)

॥ इति प्रस्तावना ॥

(ततोऽवतरतः सुरभारती भारतभाग्यश्च)

भारत-भाग्यम्—अम्ब ! सुरभारति ! सत्यमद्य मे पुनर्जन्म । धन्यासि भवती । धन्यस्ते महिमा । धन्यो विधिः । यज्जीवन-संज्ञा-शून्य-प्रायेऽत्रार्यावर्ते पुनरपि विविध-विद्या-वाटिकासु दृश्यते विचित्रभावाङ्कुराणामुद्भेदकरं 'सुप्रभातम्' । तथाहि—

"नभसि जयति जातं 'सुप्रभातं' चिरेण, *
यदनु झटिति यातं तेन 'सूर्योदयेण' ॥
तदुपरि विषमासिः प्रोच्छलद्दीप्तिभाभि-
'र्दशशतकर' भाभी राजते तद्विचित्रम् ॥ ४ ॥

सुरभारती—पुत्रका ! भारत भागधेय ! सुचिरेणाद्य भगवता वेदपुरुषेणानुगृहीतास्मि । मया तु दुर्यवनराज्यसमयादेव स्वावमाने दृष्ट्वा, निजभाग्यस्यावलानञ्चाकलय्य, इतोगत्वा सुरलोक एव सशोकमुषितं, परित्यक्तञ्च भारतीयानां प्रेम । परमिदानीं भारतवालानां "अम्ब ! आयाहि-आयाहि, पाहि-पाहि, पायय-पायय चास्मानमृतसोदर्यं स्तन्यम्" इत्यार्तनादं श्रुत्वा, पुत्रवात्सल्येन भृशद्रवित मानसाऽत्र समागतास्मि ॥

भारतभाग्यम्—आम् धन्यं भवत्या वात्सल्यम् ।

सुरभारती—(सहर्षम्) हन्त भोः । दृश्यते किमपि विलक्षणं परिवर्तनं भारते । अपि च—
"उत्साहः सर्वकार्येष्वहमहमिकया-
देशसेवानुरागः
शास्त्राणां स्वात्मवादो ह्यभिरुचिरुचिर-
श्चानुरम्भः कलानाम् ।
श्रद्धाभावाभिवृद्धो नियतिनयविदा-
मादरः पूर्वजानाम्,
दीने सद्भ्रातृभावो निवलसमुदये
वीरदीक्षा—प्रचारः ॥ ५ ॥
अहो प्रीतास्मि संवृत्ता । प्रफुल्लितं मेऽन्तःकरणम् । (शयानं भारतं प्रति) वत्स !

टिप्पणी—*वाराणस्यां प्रथमं 'सुप्रभातं' ततः 'सूर्योदयः', ततश्च सहस्रांशुरिति विचित्रमेव पत्राणां नामकरणमुदयश्च । एतदपि चोक्तश्लोके दर्शितम् । —लेखकः

भारत ! उत्तिष्ठ, उत्तिष्ठ ! विषादं मागाः । त्वामधुनैव भारतीयाः स्वपुरुषकारेणावश्य-मुद्धरिष्यन्ति । एषाऽऽयातीव ते सम्पत् । भविता च ते समुन्नतिः । (श्रुत्वा) किं किं, कस्यचिदार्तनादः श्रूयते (भारत भाग्यं प्रति) वत्स ! शृणोषि ?

भारत भाग्यम्—अम्ब ! न जाने कस्यायं रोदन-शब्दः । परं यस्य कस्यापि भवतु, गच्छामि गवेषणार्थं पृच्छामि च तत्कारणम् ।

(इति गन्तुं व्यवस्यति)

—— :※: ——

विरामचिह्नानि ।

(ले०—अध्यापकः—श्रीबालमुकुन्द शर्म्मा, सारस्वतः)

चतुर्थवर्षस्य प्रथमाङ्के विरामचिह्नाना-मावश्यकता, नामानि च प्रकाशिता-न्यासन् । साम्प्रतं तेषां कुत्र, कथ-ञ्चोपयोगः कर्तव्य इति निर्दिश्यते ।

अत्र प्रथममयं प्रश्नः समुपतिष्ठते, यत्, कस्य कस्य विरामचिह्नस्य प्रयोगो लाभजनकः, कस्य कस्य च निरर्थक इति, द्वितीयोऽयं प्रश्नो यत्, कस्य कस्य विरामचिह्नस्य प्रयोगो भविष्यत्काले समुचित —इति, तृतीयश्चाप्ययं प्रश्नो यद्विरामचिह्नानां प्रयोग-नियम आँग्लभाषा (English) नियमानु-सारं कर्तव्यः, स्वयं वा नियमानां सङ्ग्रन्थनं विधेयमिति ।

प्रथमद्वितीययोः प्रश्नयोरुत्तरदानात् प्राक् तृतीयप्रश्नस्योत्तरे केवलमिदमेव वक्तव्यं वर्तते, यत् आँग्लभाषायाः संस्कृतभाषायाश्च रचना-प्रणाल्यां महदन्तरं विद्यते । अत आँग्लभाषानियमा अक्षरशो न संस्कृतभाषायामुपयुक्ता भविष्यन्ति । अतोऽस्माभिः स्वयमेव नियमानां सङ्ग्रन्थनं विधेयम् । अवशिष्टयोः प्रश्नयोरुत्तरं प्रत्येकचिह्नस्य विवरणे स्पष्टी भविष्यति ।

(१) अल्प विरामः (Comma) (,)—भाषायामेतस्य चिह्नस्यप्रयोगो नितरामावश्यकः, समुपयुक्तश्च । आँग्लभाषायामल्पविरामयोजनाया नियमाः सर्वतः कठिना वर्तन्ते तथा तस्या भाषाया ईदृशी समुन्नतिः सञ्जाता, यत् ,अल्पविरामस्य स्थानान्तर-करणेऽर्थेऽपि वैशिष्ट्यमुत्पद्यते । अस्य चिह्नस्य प्रयोगे प्रधानतस्त्रीणि कारणानि सन्ति । (१) अभेदान्वितशब्दानां योजनाय, (२) भेदान्वितशब्दानां पृथक्करणाय, (३) शीघ्रतया पठने यस्य शब्दस्य वाक्यांशस्य वा अर्थः, भावः, शक्तिर्वा न्यूना, नष्टा वा भवेत् , तेषां स्पष्टीकरणाय । एतदतिरिक्तम्—

(क) यस्मिन् स्थाने एकस्योच्चारणसमयं यावत् विरामस्यावश्यकता स्यात्, तत्रास्य चिह्नस्य योजना कर्तव्या । यथा—गङ्गा, यमुना तथा सिन्धु रिति भारतस्य महानद्यः सन्ति ।

(ख) यदा साधारणवाक्ये, संक्षिप्तवाक्यमागच्छेत्, येन साधारणवाक्यस्यार्थः स्पष्टः स्यात्, तदा तस्य सङ्क्षिप्तवाक्यस्य पूर्वं पश्चाद्वा, अल्पवि-

रामयोजना कर्त्तव्या । यथा-वार्तालापसमये सर्व-दाध्येयम्, यत् कोऽयम्, केनसह, कुत्र, कदा, किमर्थम्, कथञ्च वार्ता करोमीति ।

(ग) यदा कस्मिन्नपि वाक्ये एकस्यैव वाक्यस्य बहवः शब्दाः स्युः, येषां मध्ये उभयान्वयिनोऽव्यया न समागताः स्युः, तदा प्रत्येकस्य शब्दस्य पश्चात् अल्पविरामयोजना विधेया । यथा-देवदत्तः, कृष्णदत्तः, यज्ञदत्तस्तथा वासुदेवः ।

(घ) यदा वाक्ये द्वौ शब्दौ, अथवा वाक्य संयोजकैरव्ययैस्तौ युक्तौ भवेताम्, तदा तत्र नास्त्य-ल्पविरामस्यावश्यकता ; किन्तु यदि ते वाक्यांशाः दीर्घाः स्युस्तदाऽल्पविरामयोजना कर्तव्या । यथा-अस्माभिर्यदि संस्कृत भाषा शिक्षणीया चेत् प्रथमं कस्यभाषा शिक्षणीया ? ऋग्वेदस्य बुद्धस्य वा, पतञ्जले र्बाणभट्टस्य वा, वाचस्पतिमिश्रस्य गदा-धरस्य वा पञ्चतन्त्रस्य पण्डिताभिमानिनां वा ।

(ङ) प्रधानवाक्याद्गौणवाक्यस्य पृथक्करणेऽस्य चिह्नस्यावश्यकता वर्तते । यथा-यदि किञ्चित् वर्तते चेत्, स, अक्षराणामभावः, वर्णविन्यासव्यति क्रमस्तथा उच्चारणस्य विशृङ्खलता ।

(च) यदा कस्मिन्नपि सामान्यविषये विशेषतो ध्यानमाकर्षणीयञ्चेत्, तदा तस्य वाक्या-त्पृथक्करणाय, अल्पविरामस्य योजना विधेया । यथा पश्य, सावधानो भव,

(छ) येषामव्ययानां पश्चादपूर्णा क्रिया भवति, तेषामन्तेऽस्य चिह्नस्य योजना भवति । एतेष्वव्ययेषु प्राय इमे भवन्ति । परन्तु, अवश्यम्, तदा, तर्हि, परम्,अस्तु, अन्यथा, यत्, न्यूनतः, यतः, इत्यादि ।

छात्रनियमाः ।

(ले०—बी० जोशी, चूरू)

भो प्रियच्छात्राः, सम्प्रति भवल्लाभायाहं छात्रनियमान् लिखामि, आशास्यते, यदेभिर्युष्माकम्महांल्लाभो भविष्यति ।

(१) सर्वदा सत्यं वक्तव्यम् । सत्यं वीरस्य लक्षणम्—अनृतञ्च नपुंसकस्य । न काचिदपि वार्तेदृशी वक्तव्या, यया लोके सन्देहो भवेत । मिथ्याभाषिणो नरस्य, लोकः कदापि नो विश्वासं विदधति, यदा च स सत्यमपि सम्भाषते । सत्याश्रयो मानवं विजयिनं विदधाति ।

(२) मा शपथं कदापि ब्रूयुः। एतादृशैर्मनुष्यैः सह कदापि न वक्तव्यम्, ये परुषवादिनो दुष्टाश्च सन्ति । विद्यालये वा पाठा लयान्निवर्तनसमेय वर्त्मनि कदापि न योद्धव्यम् ।

(३) कदाचिदपि असभ्या वार्ता, क्रिया च न विधेया । शिष्टाचारो गृहे पाठालये तथा अन्यत्रान्यत्रापि सदा सर्वैः सह सर्वथा कुर्युर्भवन्तः । अतिशीघ्रचलनम्, कपाटत्रोटनम्, निर्ल-ज-गानम्, बहुसम्भाषणम् मूर्खतालक्षणानि सन्ति ।

(४) मातृ-स्वसृ-पितृ-भ्रातृ-गुरु-सहपाठिभिस्तथाऽपरि-चितैः साकं विनम्रतया सरलतया च भाषणं कर्तव्यम् । निजशि-क्षकेषु तथा महत्सु पूज्येषु च प्रणामा विधेयाः । यदा भवन्तः कस्मिंश्चित् कार्ये सहायतेच्छुकाः स्युस्तदा सविनयेन कथनीयं यत्—"कृपयेदं कार्यं मम श्रीमन्तो विधास्यन्ति तर्हि महानुग्र-हीतो भविष्यामि भवताम् ।" कार्यसिद्धौ च तस्मै धन्यवादा दातव्याः । एवं विधानेन भवद्वाण्यां अति मधुरता सरलता च समागमिष्यति ।

(५) कस्यचिदपि-आज्ञानोल्लङ्घनीया । कदापि द्विधा कथनस्यावसरो न विधेयः । दीन वृद्धेभ्यो मार्गनिर्देशोऽपि कर्त-व्यः, सत्वरं चलित्वा तेषु च दया विधेया, यूयं सम्प्रति बाल-का एव, अतः कांश्चिन्महतीं सहायतां नो कर्तुं शक्नुथ । परन्तु

युष्मासु प्रत्येकञ्छात्रो दयाकार्य्यं कर्तुं शक्नोति । इदमेव च कृपाकार्य्यं युष्मज्जीवनस्योन्नतिरेखा भविष्यति ।

(६) अपरैः सार्द्धं तादृगेव व्यवहारो विधातव्यो यथा यूयमिच्छथ, यल्लोका युष्माभिः सह कुर्युः ।

(७) अन्येषां हृदयानि मा सीदत । सत्पुरुषः स एवास्ति योऽपरेषामानन्दे स्वयमेव हर्षवान् भवति, तथा, दयालु स्वार्थहीनश्चास्ति ।

(८) यदि यूयमिच्छथ यल्लोको युष्माभिः सार्कं सत्यव्यवहारं समाचरेत्तर्हि भवन्तोऽपि सत्यवक्तारो भवन्तु । अनेन सह च सत्यव्यवहारं विदधतु ।

(९) सर्वदा सर्वथा च साधारणं भोक्तव्यम् । सर्वमादक द्रव्येभ्यो दूरे स्थातव्यम् । न कदापि सेवितव्यं मादक-द्रव्यम् ।

(१०) यदि कोऽपि युष्मभ्यं कथयेत, यत् "ममेदं कार्य्यं कुर्वन्तु भवन्त" स्तदा च नावकाशो लभ्यते भवद्भिस्तु सरलतया सम्यक्-अवबोधनीयः स जनः । संसारेऽतिकठोरमपि मनुष्यं मधुरशब्दाः प्रेम्णि द्रावयन्ति । विनम्रउत्तरः क्रोधं दूरीकरोति ।

(११) यदा द्वौ मानवौ परस्परं वार्तालापं कुरुतस्तदा युष्माभिस्तन्मध्ये कदापि नो गन्तव्यम् । यत एष एको महान् दोषोऽस्ति ।

पाटलिपुत्रमण्डले संस्कृत कालेजोद्घाटनम्

प्रागयं महाविद्यालयश्चिरकालात् पाटलिपुत्रमण्डलान्तर्गते धानामठे श्रीकृष्णानन्द-संस्कृत-विद्यालयेति नाम्ना प्रख्यात आसीत् । अत्रस्थेभ्यश्छात्रेभ्यो वृत्तिप्रदानं श्रीगोस्वामि माधवानन्द-महोदयः करोतिस्म । अत्र प्रधानाध्यापकस्थानं, १९११ वर्षे जनवरीमासस्य प्रथमदिने, लब्ध-व्याकरण-साहित्याचार्य्य-पदवीकेन श्री परमेश्वरशर्मत्रिपाठिना समलङ्कृतमभूत् । तदारभ्य समुन्नतिमेवायं विद्यालयोऽहरहो विदधातिस्म । अद्य ६।११।२७ दिने श्रीमन्तो मण्डलेश्वराः-(कलक्टर), विहारोत्कल-संस्कृत-समिति-प्रधान-कार्य-सम्पादकाः (सुपरिन्टेन्ट), श्रीमन्तोमान्यवराः सुरेन्द्रनाथ मजुमदार शास्त्रिणः, तत्सहायकाः (असिस्टेन्ट सुपरिन्टेन्डेन्ट) श्रीमन्तो हरिशङ्करशर्मपाण्डेयाः, तथा श्रद्धेय-श्रीपं० रामावतार शर्माणः, श्री पं० धर्मराज ओझाः, आयुर्वेद-कुशलाः, भिषगाचार्य्याः, श्रीव्रजविहारी चतुर्वेदाः, श्री पं० देवदत्तत्रिपाठिनः, श्रीपं० रङ्गनाथशर्म-पाठकाः, इत्येतत्प्रभृतयो विद्वांसोऽन्ये च पिश्चित्प्रवराः श्रीगोस्वामिनः समुत्साहेन समुपागत्य, विद्यालय-विषये श्रीगोस्वामिन उदारतामध्यापकाध्यापनशैलीम्, छात्राध्ययनक्रमञ्चावलोक्य महाविद्यालयं चक्रुः । नाम चास्य महाविद्यालयस्य "श्रीकृष्णमाधवानन्द संस्कृतमहाविद्यालयः" इति स्थापितवन्तः । स्थानञ्चास्य तदेवास्ते । साम्प्रतमत्र चत्वारोऽध्यापकाश्छात्रपाठे नियुक्ताः वर्तन्ते । ज्यौतिषदर्शनाध्यापकावपि त्वरितमेव नियुक्तौ भविष्येतः । प्रधानाध्यापकास्त एव समस्तविद्वद्वृन्दशिरोमौलीभूताः श्री पं० परमेश्वरशर्म त्रिपाठिनो विद्यन्ते । इदानीं प्रायः शतसंख्यकेभ्यो विद्यार्थिभ्यो भोजनसामग्रीम् प्रतिवर्षं परीक्षोत्तीर्णेभ्यश्छात्रेभ्योऽग्रिमपाठ्यपुस्तकानि च प्रयच्छता श्रीमता मठाधीशेन राजकीय-नियमा (रजिष्ट्री)-नुसारतो निजवित्तेभ्यः प्रतिवर्षं षट्सहस्र (६०००) काणि रौप्यकाणि प्रदाय चाचलास्थितिरस्य महाविद्यालयस्य विहिता । येन भाविनोपि गोस्वामिनो नास्य स्थितिं विचालयितुं शक्नुयुः । किं बहुना, प्रतिवर्षं पाटलिपुत्रकेन्द्रे परीक्षां दातुं समागतेभ्योऽखिलेभ्यो विद्यार्थिभ्यो जलपानभोजननिमित्तो व्ययश्चानेनैव गोस्वामिना क्रियते । अतोऽत्रसमागतैः सभ्यैः, कुलपतीत्युपाधिना भूषितोऽयमभूत् । तदस्य श्री गोस्वामिनो माधवानन्द-महोदयस्य शरत्कालीन पूर्णविधुमरीचिरिव जगतिप्रसृतं शुभ्रं यशो न वयं वर्णितुं पारयामः, अशासे, यदेनं दानदत्तमनस्कं श्रीमन्तं मठाधीशमन्येपि गोस्वामिनोऽनुकुर्युस्तदात्वरितमेव भूयोऽपि मृतकल्पेयं सुरभारती युवावस्थां लभेतेति समालोचयन्तु पाठकाः ।

श्रीविद्याधर त्रिपाठी, छात्रः ।



संस्कृत-समाचाराः ।

गोस्वामि-सम्मेलनम् ।

आश्विनमासस्य सिते सप्तम्यामष्टम्याञ्च तिथौ [३, ४-१०२७ ६] वाराणस्या नेदीयसि श्रीमार्कण्डेयस्थाने गोस्वामि-सम्मेलनं समभूत् । विहार-प्रदेशात् संयुक्तप्रान्ताच्च सहस्रं गोस्वामिप्रतिनिधयः समवेताः । विपक्षिभिः शास्त्रार्थ विचारं प्रतिश्रुत्यापि पराङ्मुखतया स्वीयः पराजयः प्रकटितः । सम्मेलनाध्यक्षेण सर्वतन्त्रस्वतन्त्रेण श्रीयुत गोस्वामि दामोदर शास्त्रिणा स्वाक्षराङ्कितं मुद्रितमधोविन्यस्तं श्रीकाशीस्थ-धर्म्मसभायाः व्यवस्थापत्रं वितीर्णम् । गोस्वामि सूरिभिरितरैर्विद्भिरुपदेशकैः परिषत्पतिमहोदयैश्च गोस्वामिनामुपनयनसंस्कारस्य वैधता, नितान्तमावश्यकता च मुक्तकण्ठमुद्घोषिता । प्रातःस्मरणीयानां श्रीयुत मदनमोहन मालवीयानाम् , विद्वद्धुरीणानां श्रीयुक्त भगवानदास-श्रीमन्महाराजाधिराज-काशी (रामनगर) नरेश-महानुभावानाञ्च मध्यस्थतायै गोस्वामिभिर्भूरिशः प्रार्थिता अपि विपक्षिविद्वांसस्तेषां मध्यस्थतामस्वीकृत्य संकुचन्नासिका जोषमवतस्थिरे ।

व्यवस्थापत्रम् ।

धर्मो जयति नाधर्मः सत्यं जयति नानृतम् ॥
शिवदेव्यास्तपोमूर्त्तेर्मातुः पादाब्जजन्मनः
पितुः श्री१०८ विश्वनाथस्य कणांल्लेह्यादरान्मुहुः ॥

सम्प्रति काषायवस्त्रधारिणो गोस्वामिनः श्रीशङ्कराचार्य्य प्रचारित-(तीर्थाश्रमवनारण्य-गिरिपर्वत-सागराः । सरस्वती भारती च पुरी नामानि वै दश ।) इत्यादिमठाम्नाय-यतिधर्म्मसमुच्चयाद्युक्ताभियुक्तवाक्यस्थगिरिपुर्य्यादिपदव्यवह्रियमाणाः केचन चिरादुपवीतधारिणः, केचनोपवीतधारणं श्रेयस्करं धर्म्मशास्त्रसम्मतञ्च मन्यमानाः कामयन्त उपवीतादिधारणं तदेतदेतेषामुपवीतधारणं धर्म्मशास्त्रसम्मतिमावहति नवेति प्रश्ने, काशीस्थधर्मसभासदां विदुषामुत्तरम्—

(अत्रेयं व्यवस्था—यस्योपनेत्राद्यभावेन तत्कालातिक्रमस्तस्य याज्ञवल्कीयव्रतान्तमन्यतमं शक्त्यपेक्षया भवति । अनापद्यतिक्रमे तु मानवं त्रैमासिकम् । तत्रैव पञ्चदशवर्षादूर्ध्वमपि कियत्कालातिक्रमे तूद्दालकव्रतं व्रात्यस्तोमो वेति । येषां तु पित्रादयोऽप्यनुपनीतास्तेषामापस्तम्बोक्तम् । यस्य पितृपितामहावनुपनीतौ स्यातां तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्य्यम् । यस्य प्रपितामहादेर्नानुस्मर्य्यत उपनयनं तस्य द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्य्यमिति)-इत्यादि मिताक्षरा दिव्यवस्थानुसारेण पूर्वोक्तप्रायश्चित्तं विधायोपयमादिसंस्कार-पुरस्सरमुपवीतादिधारणं धर्म्मशास्त्रादिसम्मतमेवेति ॥

योगाश्रमः, रिविलगंज, सारन, (बिहार) } —गोस्वामी शिवदयालुगिरिः
सम्मेलनकार्य-सम्पादकः

* * * *

सूर्यपुरे संस्कृत-व्याख्यानम् ।

अस्मिन् सूर्यपुरे (सुरत) अचिरात् "संस्कृत विनोद मंडल" मिति नामकं मंडलं प्रतिष्ठितमास्ते । वटोदर-पुर-(वडोदरा) वास्तव्य-तर्क-वेदान्त-वाचस्पतिश्रीछोटु महाराजशास्त्रिषु प्रयोजनवशादिह समायातेपूक्तमंडलेन संस्कृतव्याख्यानाय प्रार्थित मासीत् । ततश्चाश्विन-कृष्ण-चतुर्थ्यां भृगौ संमीलिताभूत् सभा । तद्दिने नातिचिरात् ब्रह्मभूयं गतानां श्रीमदात्मानंद सरस्वती-स्वामिपादानां पुण्यतिथिरपि सभाया निमित्ततामधिकृतवती । सभायामनेके संस्कृतानुरागिणो नागरिकाः समुपस्थिता आसन् ।

आरम्भे ज्योतिर्विद्भिः कृष्णशङ्करशर्मभिः कृते श्री स्वामिपादानां माहात्म्यनिरूपणे, श्रीछोटु महाराजशास्त्रिभि"र्भगवद्गीतासिद्धान्तान् " अधिकृत्य संस्कृतेन रमणीयं व्याख्यानं व्यधायि । तदनु श्री निगमशङ्कर-शास्त्रिभिः कृते वक्तुः कृतज्ञताऽऽवेदनप्रस्तावे जाते च श्रीमनःसुखरामशास्त्रिणां विवेचने स्वामिपादानां शास्त्रिपादानां च पुष्पमाल्यसमर्पणानन्तरं समाप्तिमगात् सभाकार्यम् ।

सुरत (गुजरात) } रैक्वकुलोत्पन्नः
श्रीगङ्गाशङ्कर शास्त्री
संस्कृत-विनोद-मंडलस्य मंत्री

* * * *

शोक–सभा।

पेटलाद-राजकीय-संस्कृतपाठशाला-प्रधानाध्यापक-मणिशङ्करशास्त्रिणां योजनया अस्यामेव पाठशालायां वर्तमानमार्गशीर्ष-शुक्लपूर्णिमायां वटोदर (वड़ोदा) राजपंडित वे० शा० सं० महामहोपाध्याय–तर्कवाचस्पति–वद्रीनाथशास्त्रिणामवसाननिमित्तं शोकप्रदर्शनार्थं रा०रा० जयशंकर-प्रेमानन्द-महाशयानां सभापतित्वेऽत्रत्यविद्वन्मण्डलस्याधिवेशनं जातम्। यत्र मङ्गलरामशास्त्रिणः, गिरिजाशङ्करसोमयाजिनः, भद्रशङ्कर ज्योतिषाचार्याः, जीवणरामशास्त्रिणः, गङ्गाधरशास्त्रिणः, मगनलाल शास्त्रिणो वैद्यभूषणानि, केशवलालपण्डिताः, झवेरीलाल वैद्य-चुन्नीलाल वैद्य-प्रभृतयश्चान्ये च भूयांसो विद्वांसो वद्रीनाथशास्त्रिणां गुणकथनमचीकथन्। तदनन्तरं प्रस्तुत-प्रासङ्गिकप्रस्तावा समाप्तिमयासीत्परिषदिति शम्।

—पुरुषोत्तमशर्म्मा।
पाठशालीयश्छात्रः।

* * * *

सरवार-पाठशाला-ब्रह्मचर्य्याश्रमोत्सवः।

गोरखपुर–मण्डलान्तर्गत–सलेमपुर–समीपवर्ति "किशोरगञ्ज" नाम्नि स्थाने श्रीसरवार-संस्कृत-पाठशाला-ब्रह्मचर्य्याश्रमो द्वादशवर्षात् संस्कृत सेवां कुर्वन्नाऽऽस्ते। साम्प्रतमत्र संस्कृत-विभागः, हिन्दीविभागश्चेति, विभाग-द्वयं विद्यते। प्रथम विभागे शिक्षकद्वयम्, हिन्दीविभागे च शिक्षक पञ्चकं वर्तते। वहुभिः संस्कृतप्रेमिभिरत्र विद्यालयः, छात्रावासः, कूपः, शिवालयश्च निर्म्मिताः सन्ति। तमकुहीनरेशेन सार्धद्विसहस्रमुद्राभिरेका यज्ञशालाऽपि निर्मापिता विद्यते।

तस्य च द्वादशतमो वार्षिकोत्सवः कार्तिक-शुक्ल-पञ्चम्यां रवौ श्रीमतां स्वामि-पूर्णानन्द-महोदयानां सभापतित्वे महता समारम्भेण सम्पन्नः। आश्रमीयब्रह्मचारिभिर्विहिते मङ्गलाचरणे वहूनां व्याख्यातॄणां व्याख्यानानि समभूवन्। अन्ते च सभापतिमहोदयानां सुरसरस्वतीमुद्दिश्य, मर्मस्पर्शि भाषणं समभूत्। ततश्च पण्डित कुञ्जविहारि-पण्डित कमलाकरचतुर्वेदिमहोदयैः वाकीलैः, तमकुहीनरेश-निर्म्मितयज्ञशालाऽवशिष्टांशं पूरयितुम्प्रतिज्ञातम्।

श्रीनिरीक्षणपति मिश्रः।

* * *

शोकसभा

वीकानेर-राज्यान्तर्गत-रत्नदुर्गस्थ "श्रीमङ्गलदत्त-विद्यालय-रतनगढ (वीकानेर)—संस्थापकानां तत्र भवतां रुंथलोपाह्व पं० जयदेव शर्मणां कार्तिक शुक्ले चतुर्थ्याममरलोकावाप्तिरभूदिति महानेव शोक-संवादविषयः। पं० जयदेव शर्माणो महान्त एव देशोपकारकर्तारो जात्युपकृतिवन्तश्चासन्। तेषु स्वर्गतेषु स्थानीयजनतायाः "शोकसभा" समजनि। तत्र पं० कृष्णचन्द्र व्याकरणाचार्य-राजपण्डित–केशरीचन्द्रशास्त्रि––पं० शिवकुमार साहित्योपाध्याय-प्रभृतिभिर्व्याख्यानदातृभिर्व्याख्यातम्। जयदेवशर्मणां कुटुम्बैः सह सहानुभूति प्रकटिता—

—"सूर्यः" माठोलिया
रतनगढ (B.S.H.)

श्रीसनातन-धर्म-सभा, चूरू ।

चूरू-नगरस्थ-श्रीसनातनधर्म-सभायाः सप्तदश वार्षिकोत्सवो भाद्रशुक्ल १०-११-१२ तिथिषु महता समारोहेण समभूत्। प्रथमदिने विद्यावाचस्पति पं० देवीप्रसादशास्त्रिमहोदयाः सभापतिपदमलं चक्रुः। काशीस्थ-पं० तपेश्वरीप्रसादस्य च सनातनधर्म-महत्वे ललितं भाषणमभूत्। द्वितीये दिने पं० पूर्णानन्दाग्निहोत्रिमहोदयाः सभापति पदमलं कृतवन्तः। तथा विद्वद्वराणां देवीप्रसादशास्त्रिमहाशयानां विधवाविवाहविषये वक्तृता सुमधुराऽभूत्। तृतीये दिने काशीस्थ—पं० कुञ्जविहारीलाल वाजपेयिमहोदयः सभापति पदं लेभे, तथा कतिपयविद्वत्तल्लजानामनेकविषयेषु ललितानि व्याख्यानानि समभूवन्।

स० मंत्री, सनातनधर्म-सभा, चूरू (बीकानेर) } बी० जोशी

विहार-परीक्षाः ।

विहारोत्कल-प्रान्तीयाः सर्वाः परीक्षाः, मार्च मासस्य द्वितीय-दिवसादारब्धाः भविष्यन्ति।

मन्त्री, परीक्षासमितेः।

* * * *

अध्यापकावश्यकता ।

मुजफ्फरपुरीय-धर्मसमाज-संस्कृत-कालेजे वेदान्ताध्यापकः समपेक्ष्यते। मासिकं प्रारम्भिकं वेतनं ४०) मुद्राः, प्रतिवर्षं वृद्धिः ४), अन्तिमं वेतनम् ११०)।

प्रार्थनापत्रम्—'प्रिन्सिपल, धर्म-समाज-संस्कृत कालेज, मुजफ्फरपुर' इतिसङ्केतेन प्रेषणीयम्। अध्यापको विहार-प्रान्तीयः, वेदान्ते निष्णातः, अध्यापनदक्षः, कृतानुभवश्च स्यादिति। प्रार्थनापत्रेण सह अवस्था, अध्ययनकालः, अध्यापनकालश्चेत्यादिकं सुस्पष्टं लिखेलिमम्।

एस० एन० मजुमदार, शास्त्री
मन्त्री, विहारोत्कल-संस्कृत-परीक्षा-समितेः

* * * *

अध्यापकावश्यकता ।

सुयोग्यस्यैकस्य विदुषो वेदपाठिन आवश्यकताऽस्ति, यो हि सस्वरं यजुर्वेदमध्यापयितुं समर्थः स्यात्। धर्मशास्त्र-कर्मकाण्डयोरपि ज्ञानमपेक्षितम्। व्याकरण-मध्यमोत्तीर्णश्चेत्समीचीनं भवेत्, किन्तु वेदमध्यमाया योग्यता नितरामपेक्षिता। योग्यतानुरूपं वेतनम्।

हिराजपट्टी, पो० मधुवन, जि० आजमगढ } *श्रीवीरबहादुर साहिः,* प्रवन्धकः, संस्कृत-पाठशालायाः

* * * *

प्रश्नः ।

विदाङ्कुर्वन्तु विमत्सरा विद्वान्सः, यत्खलु समस्तनिगमागमेषु निखिल-पद-पदार्थानां परमकारणत्वेनाभिधीयमानं वाच्यवाचकत्व-बोध्य-बोधकत्वादिसम्बन्धेन व्यवह्रियमाणमोङ्काराख्यपदमिति, तन्नजाने किमर्थं मनसि निधाय ब्रह्मर्षिव रिष्ठेन श्रीवाल्मीकिनाऽदिकविनेदम्पद्यं व्यरचि—"वेदाब्राह्मणरूपेण गायत्री सर्वरक्षणी। ओङ्कारोऽथ वषट्कारः सर्वे राम मनुव्रताः"॥ वा०, उ०, १०६ स०,

८ श्लो० ॥ कोऽयं रामः, यस्यानुव्रजनम् पद्योक्तैः सर्वैः पदपदार्थैः कृतमिति जिज्ञासया बाध्यमानेन विदुषां दयां काङ्क्षमाणेन मया गयाप्रसादशर्मणोत्तरयितुं विद्वान्सः प्रार्थ्यन्ते ।

[२]

'मुद्राराक्षस' नाटके प्रधानामात्यस्य, प्रथितराक्षसेतिनामकस्य, भूसुरोचितं प्राक्तनं सुबुद्धिशर्मेति नाम अपहाय, क्रूरकर्म निरतार्हराक्षसेत्यभिधया किं हेतुका व्याहृतिः कवेः ।

रणचातुरीधुरीणत्वादसौ तदभिधामभजत्, इति केषाञ्चनोक्त्या तु नायाति तुष्टिं हृदयम् । यतो वीराग्रेसरद्रोणादनामपि तथात्वापातात् । इति सन्देहं दूरीकर्तुं सुप्रभात-पत्रे समुचितोत्तरं प्रकाशयन्तु भवन्तः ।

—ब्रह्मदत्त शर्मा (छात्रः)

रामनिरञ्जनदास-मुरारका- विद्यालय, चौक, पटना ।

* * * *

शारदीसुषमा ।

समुपैत्यहो ! शरच्छ्री हंसालिमालिकायाः ।
मन्येऽवधूतवर्षा वरिवस्यतीय मार्या ॥ १ ॥
अतएव पुष्पमाला नवयौवनेव वाला ।
बहुदीप-मालिकाला समुदेति दिव्यकाला ॥ २ ॥
सुसमीरनीरभङ्ग्या पाद्या माह्वयन्ती ।
मकरन्दवृन्दवृद्धा मधुपर्कमाचरन्ती ॥ ३ ॥
फलमूलसत्समृद्ध्या सम्भोगमर्पयन्ती ।
'देवीप्रसाद' सिद्धीः सम्यक् प्रदर्शयन्ती ॥ ४ ॥
नवशालिशालिनीया कमलालिमालिनी वा ।
जयतीय मत्रभवती देवी शरत् सुसिद्धिः ॥ ५ ॥

—श्रीचन्द्रः,
प्रिन्सिपल, संस्कृतकालेज,
वडवानी (C. I.)

बहिर्लापिका ।

(ले० नारायण शङ्कर शर्मा हेब्बालकरः सुरपुरम्, निजामराज्यम्)

कः श्रीकण्ठसुहृत्किमिच्छति नरः, कः सेव्यते सेवकैः ?
कस्तिग्मांशुरनल्प कृत्यकरणात्कां धीः समालम्बते ?
किं देयं तृषितस्य, किं नुतिकरं किं नाम धान्यत्वचो,?
मत्पृच्छोत्तरपूर्ववर्णमिलितं वाक्यं बुधैः पठ्यताम् ।

सूक्तिः ।

साम्राज्य-भानावथ भारतीये, दिशं प्रतीचीमवलम्बमाने ॥
युगे कलावृद्धिमति प्रदोषे, गाढं तमोऽधर्म इहाभ्युपैति ॥

—श्रीकृष्ण शर्म्मा, आहिताग्निः

कुङ्कुमतिलक वर्णनम् ।

इयं हरे पश्य परम्परा परा
न कस्य चित्तं वितनोति विस्मितम् ॥
महीसुतः कुङ्कमविन्दुकैतवा-
न्निशापतेर्हन्त ! तनौ निषीदति ॥ १ ॥

—गणेशीलाल सारस्वतः, साहित्योपाध्यायः ।

विनोदतरङ्गः ।

(ले०—श्रीनिवासकेदुलायः, रम्भापुरमठः)

उपाध्यायः—बालक ! किमालोच्यते भवता ?

बालकः—गृहं गन्तु कियान् समयो वर्तत इति ।

योधः—अहमद्य रणाङ्गणे सर्वेषां करचरणानि छित्वाऽऽगमम् ।

अन्यः—ततः शिरः कृन्तनमेव वरं खलु ।

योधः—एवमेव । मत्छेदनात्प्रागेव विहितं केनाऽपि शिरः कृन्तनम् । अतो मया कर्तितं करचरणादिकम् ।

अशिक्षितः—प्रौढविवाहेन किं भवति ?

सुधारकः—अचिराद्भविष्यति पञ्चमः संवत्सरः

लंबोदराऽचार्यः—किं भवद्भिरपि सेव्यते नस्यम्?

कामानन्दस्वामी—किमाचार्याः ! वेदविहितं धर्मं तिरस्कुरुथ ? अस्माकंतु श्रुतिप्रामाण्यत्वादिदमभ्यस्तम्, यतः पुरुषसूक्तेऽपि ए तावान्नस्यमहिमा, इत्यस्ति ।

कश्चित्—मम गृहनिर्माणसमये वहवस्तन्त्र्यः समुपलब्धाः, तस्मात् बहोः कालात्प्रागेवाऽऽसीदस्मिन् देशे तन्त्री प्रचार इति ज्ञातुं शक्यते ।

अन्यः—मम निलयनिर्माणावसरे न किमप्युपलब्धम् । अतः न किमप्यासीत्पूर्वकाले इति वक्तुं पार्यते ।

सखी—(विधवां स्वसखीमुद्दिश्य) सखि किं कथ्यते मुधा भवत्या? विद्यमाने पतौ नार्पितं प्रेम !

स्वामिनी—(सास्रम्) किं कर्तव्यं सखि ! पतौ सति नास्ति बुद्धिः, बुद्धौ सत्यां नास्ति पतिः ।

(पुनः)

सूक्ती ।

(१)

कृष्णो वर्णे कृष्णः
सुदाम्ने ददाति सर्वस्वम् ।
अत्र विलोकय मित्र,
कृष्णा वर्णे भवन्त्यकृष्णहृदः ।

(२)

वंशी छिद्रैः पूर्णा
तथापि मधुरं रवं कुरुते ।
किं जानासि न बन्धो,
छिद्रेषु गुणा वसन्त्यमिताः ।

—*सोहनलाल द्विवेदिनः*

क्रान्तिकारिणे शुभाशिषः ।

अयिवत्स क्रान्तिकारिन् ! चिरंजीव । पण्डितानामस्माकमुपरि क्रान्तिं कुर्वता त्वया स्वनाम सार्थकं कृतम् । महान्पराक्रमः प्रकटीकृतः । दृढा निर्भीकताऽऽविष्कृता च । अतस्तुभ्यमहमिदं मधुरमन्नं पारितोषिकं वितरामि । गृहाण । भुक्त्वैतत् सुप्रसन्नो भव, बालचापलं जहीहि—

—देवीप्रसाद शर्मा शुक्लः, कविः,
[महामहोपाध्यायः]

सम्पादकीयम् ।

विगते सुप्रभाताङ्केऽस्माकमनौचित्यद्वयं समजनीति चेखिद्यतेतराम् चञ्चलं चेतः । प्रथमन्त्विदमनौचित्यम्, यत्, क्रान्तिकारि लेखे श्रीमतां नारायणशास्त्रिणां विषये कश्चन शब्दो नितरां लज्जां जनयत्यस्माकम् । यद्यपि-'श्लिष्टैः पदैः पिशुनयेच्च रहस्यवस्तु' इति विद्यते, तथाप्यावेशविलसितमिति स्फुटमेव प्रतीयते । कर्णमर्दनेनोष्णयं गतः क्रान्तिकारी सर्वथाऽनुचितमाचचारेति वयं भृशं निन्दामः, निन्दन्ति च सर्वे । सुप्रभातप्रचाराय बहिर्गतेन मया कश्चन नियुक्त आसीत् छात्रः सहायकत्वेन, तेन च मदनुमत्या प्रकाशिते क्रान्तिकारिलेखे श्रीमतां शास्त्रिमहोदयानामुपरि ध्यानं न दत्तम् । मदागमनानन्तरं मुद्रितप्रायमेवासीत् सुप्रभातम् । श्रीमन्तः शास्त्रिमहोदया अस्माकं परमहितचिन्तकाः, श्रद्धास्पदाः, प्रणयिनश्च सन्ति । ते प्रौढाः सुपरिस्कृताः कविवराः, सहृदयधुरीणाश्च सन्ति । संस्कृत-वाङ्मय-गवेषका अपि सन्ति । तेषामिममपराधमगत्या शिरसावहन्नहं कैः शब्दैः क्षमाप्रार्थनं कुर्यामिति न जानामि । सुप्रभातेन शास्त्रिमहोदयानां घनिष्ठः सम्बन्धः, स्नेहश्चास्ते । तद्वयं चिरमनुग्रहीताः स्मः ।

अपरमिदं यत्, सूर्योदय-विषये निवेदनं कृतवता मया विन्ध्येश्वरीप्रसादशास्त्रिणां सम्बन्धे विलिखितमासीत् "यत्तैः सुप्रभातस्य शतशो ग्राहकाणां हानिः सम्पादिता" इति । तत्तेषां जाते सम्मेलने ज्ञातम्, यदयं समाचारो भ्रममूलक एव । तेषांमपि सुप्रभातेन स एव सम्बन्धः, यो मम । समाजिकत्वेन, व्यक्तित्वेन च तेषामस्माभिः सह शाश्वतः सम्बन्धः । स च न कदाचिदपि व्यपगमिष्यतीति निश्चितमेव । कैरपि धूर्तैश्चाटुकृद्भिः प्रचारकैर्बहिर्लोकानां मनसि वैमत्यं व्यवस्थापितमासीत् । अतएव तेषां समाचाराणामाधारत्वेन मया लिखितमासीत् । तत्सम्मतमवगत्य, वयं तान् शब्दान् सखेदं परावर्तयामः । नीतिविषये, लक्ष्यविषये भवतु वैमत्यम्, परमान्तरिकः स्नेहोऽस्माकं न केनापि विचलयितुं शक्यः ।

*　　*　　*　　*

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौर पौषः [धनुर्मासः] १९८४

चतुर्थवर्षं] [नवमी सङ्ख्या

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मासिकं मुखपत्रम् ।

तिमिरततिमुदस्यद्,
भेदतारा विलुम्पन्,
नयदधि सुरभाषाभाषि-
जागर्तिभावम् ।
विबुध-विहग-वादै-
राह्वयद् भाग्य-भानुम्,
विलसतु भुवनेऽस्मिन्
सर्वतः 'सुप्रभातम्'

सम्पादकः—

श्रीकेदारनाथशर्म्मा, सारस्वतः

वार्षिकम्मूल्यम् ३) मानानीयेभ्यः १२)
छात्रेभ्यः १॥) वैदेशिकेभ्यः ६)

व्यवस्थापकः—

श्रीगिरीशशर्म्मा, शुक्लः, न्यायाचार्यः

प्राप्तिस्थानम्—

सुप्रभातकार्यालयः, काशी ।

लेख-सूची ।

सुप्रभातम् ।

विविध-विषय-विभूषितम्, अद्वितीयम्, संस्कृत-मासिक-पत्रम् ।

चतुर्थ-वर्षे	वाराणसी, सौर पौषः (धनमासः), १९८४ वैक्रमाब्दाः	नवमी संख्या

विज्ञप्तिसारः ।

महाकवि-श्रीगुमानीपन्त-प्रणीतः ।

सम्पादकः—श्रीतारादत्तपन्तः, साहित्याचार्यः

त्वदेकशरणं गताश्रममसौ विमोहश्चिरा-
न्मुहुर्मुहुरपह्नुतस्तुदति मामकीनं मनः ॥
अवेक्ष्य तदुपेक्षसे तव किमेतदात्मोचितं
कथं हि पुरतोरवेर्मुकुलयेद्विधुर्वारिजम् ॥ २१ ॥
चिराय विहितास्पदैः स्वहृदि कामशेषादिभि-
र्हृतस्मृतिरयञ्जनोऽनवहितत्वमाप्नोति यत् ॥
तदेव तवसेवनस्तवनिवृत्तिवीजध्रुवम्
विना निशित-धारया दलयितुं न खड्गः क्षमः ॥ २२ ॥
नितान्तमविवेकिनी समधिरूढदोषोत्करा
न बुद्धिरनधिष्ठित-प्रचुर-शुद्धिरुज्जृम्भते ॥
अतो वत न भूयते खलु तयोदितज्ञानया
रजश्चयमलीमसे न मुकुरे मुखम्भासते ॥ २३ ॥
कथञ्चन कुतश्चन क्वचन किञ्चनाहं यदि,
स्मरामि करणैर्भवच्चरणपद्ममाभ्यन्तरैः ॥
जनुर्मम न किन्तदा भवति तावतैवोर्जितं,
मनागपि सुधाशिता दिशति निर्जरत्वं क्षणात् ॥२४॥
अनेन विषयैषिणा हृदि जनेन चिन्ताकुले
स्मृतं किमपि नाम ते यदि घुणाक्षरन्यायतः ॥
तदेव महतोऽखिलानलमपासितुं पाप्मनो
वनानि खलु बर्हिषस्तनुरपि स्फुलिङ्गो दहेत् ॥ २५ ॥

स को नु भविता क्षणः क्षणकृतानुकम्पस्त्वयां
जनोऽयमुपनेष्यते सपदि यत्र धन्यात्सताम् ॥
इति प्रणयता मया हृदि समाकलय्य स्थितं
मनोरथ-पथं गतः किमिव नेहते दुर्गतः ॥ २६ ॥
विभाव्य सदयं मनस्तव वृतोऽस्मि भव्याशया
स्वयं प्रभुरपावृतस्त्वमसि किन्तु भीतं मुदा ॥
अकृत्यमपि कर्म ते जगति नापवादाय य-
न्न वह्निरिव शर्वभुग् विपथगो महान्दुष्यति ॥ २७ ॥
त्वमात्मशरणात्मने सकरुणत्व-सार्द्रात्मना
प्रसीदसि मनोगतं स्वयमनोदितोऽर्थं दिशन् ॥
तदेव रसमग्रतस्तव मदीय-विज्ञापनै-
र्विकाशयति केन वा कुमुदमिन्दुरभ्यर्थितः ॥ २८ ॥
नमो जनकनन्दिनी-परमवल्लभाय स्वयम्-
प्रभाय रमित-प्रभाकर-कुलाय रामाय ते ॥
गृणन्तमिति मामहर्दिवमुपासता सिद्धयो
जनाय कृतभक्तये किमिव न प्रदद्यात्प्रभुः ॥ २९ ॥
भवतु भवभयघ्नो वाचमाकर्ण्य दीनां
रघुपतिरति तुष्टः सर्वदः सर्वदेति ॥
सुचिरमनु विविच्य त्रिंशता पद्यराजै
रिममकृत गुमानी नाम विज्ञप्तिसारम् ॥ ३० ॥

समाप्तम् ।

—:*:—

मंगलम् ।

विनाशाय त्रिलोकानाम्
यो ह्यभूद्वै त्रिलोचनः ।
त्राणाय त्रय तापात्तम्,
त्रिपुरारिं नमाम्यहम् ॥

—सोहनलाल द्विवेदी ।

कम्बोजीयः ।

(अनुवादकः—श्रीबहादुरचन्द्र गुप्तः, शास्त्री)

श्रीरवीन्द्रनाथ ठाकुरस्यैकतमायाः कथाया अनुवादः

मम पञ्चहायनी तनया मिनी अजल्पित्वाऽऽसितुं न शक्नोति । आजन्मनस्तया क्षणमपि तूष्णीं न स्थितमिति दृढं विश्वसिमि । तस्या माता प्रायोऽनेन खिद्यते, जल्पनाच्च तां वारयितुमिच्छति, परन्त्वहं नेच्छामि। मौनं मिनीकृते नितान्तमस्वाभाविकम्, अहं स्वयमाप्येतच्चिरं सोढुं न शक्नोमि । तस्मादेव च तया सह मदीयः स्वकीयः संलापः सदा स्फूर्जितो भवति ।

उदाहरणतया, एकदा प्रातः स्वस्य नूतनस्योपन्यासस्य सप्तदशं परिच्छेदं लिखतो मम सहसा वत्सा मिनी निभृतं मन्निकेतनं प्राविशत्, स्वकीयं हस्तं च मदीये निधायाशंसीत्—'तात ! द्वाःस्थो रामदयालुः काकं कागं कथयति ! मन्येऽसौ न किमपि जानाति, जानाति किमु ? इति ।

अथो तस्यै 'भाषां भाषामन्तरा लोके को विशेषः' इति विशदीकर्तुकामस्य मे साऽकस्माद्विषयान्तरकल्लोलमभ्यप्लवत—'तात ! तव कस्तर्कः ? भोलस्तु कथयति यज्जीमूतेषु हस्ती वसति, स स्वशुण्डातो जलानि मुञ्चति, तदियं वर्षा भवतीति'।

अथ यावत्किञ्चिदुत्तरं चिन्तयन्नहं जोषमासे, तावत्क्षिप्रं सा भूयः परिप्रष्टुमुपाक्रमत—'तात! कस्तेऽनया संबन्धः ?' इति ।

ततोऽहं गम्भीरवक्रेण कथमप्यवोचम्—'याहि मिनि! भोलेन सह खेल च, अहं व्यापृतोऽस्मि ।' इति ।

मम निकेतनस्य गवाक्षो रथ्याभिमुखमासीत् बालिका चोपचतुष्किकं मम चरणयोरासीना स्वे जानुनी ताडं ताडं मधुरं क्रीडति स्म । अहञ्च तत्सप्तदश-परिच्छेद-लेखने मग्न आसम् । तत्र खलु नायकः प्रतापसिंहः काञ्चनलतां नायिकां स्व-बाहो-रादाय दुर्गहर्म्यतृतीयप्रकोष्ठाद् गवाक्षमार्गेण सद्यः पलायितुमना आसीत् । तावदेव मिनी सहसा खेलामहासीत्, 'हे कम्बोजीय! हे कम्बोजीय!' इति क्रन्दन्ती च वातायनाभिमुखमधावीत् । वस्तुत एवाधस्तात्प्रतोल्या[1] मलसं परिभ्रमन्नेकः कम्बोज वासी पुमानासीत् । स स्वदेशवेशानुरूपं शिथिलं मलीमसं निचोलं[2] तुङ्गमुष्णीषं च पर्यधत्त; किञ्च पृष्ठदेशेनैकं प्रसेवं[3] पाणिना च मृद्वीकापिटकानवोढ ।

नास्मि शक्नोमि कथयितुं के नाम भावा आविरासन्ममदुहितुः स्वान्ते यदा सेमं पुरुषमालोकतेति, परं सा तं तारस्वरं क्रन्दितुमारभत । अथाहं व्यचिन्तयम् हन्त! स चेदन्तरेष्यति, मम सप्तदशः परिच्छेदः समाप्तिं नैष्यति' इति । तत्क्षणमेव स कम्बोजीयः परावर्तत, बालिकाञ्चाभ्यपश्यत् । अथैतदवलोक्य स साध्वसाभिभूता मातरं शरणमुपधावन्ती क्वापि न्यलीयत । तस्या ह्यन्धविश्वास आसीद् यन्नूनं तस्मिंस्तेन भीमेन पुंसोह्यमाने प्रसेवे मत्तुल्या द्वित्रा इतरेऽपि बालाः सन्तीति । एतस्मिन्नन्तरे स पण्याजीवः प्रतीहारभूमिं प्राविशत्, मां च सस्मितमनंसीत् ।

टि०—१ रथ्या-गली, २ चोला, ३ झोला ।

इतस्तावन्मम नायकयोः स्थितिस्तथा दोलायमानाऽऽसीत्, यथा विवशं मया तत्रैव विरमणीयं किमपि क्रयणीयञ्चाभवत् । मिन्या हि स पुरुषो गृहं प्रतिसमाहूयत । अथाहं क्रयं स्तोकमकरम्, ततश्च तेन साकमब्दुर्रहमान-रशियन- इङ्गलिश-सीमान्त-राष्ट्रनीतिसम्बन्धिनं वाकोवाकमारभे ।

अथ प्रस्थातुमुद्यतः स पर्यपृच्छत्-'नन्वार्य! क्वास्ति सा बालिका ?' इति अथाहं तदानीं मिनीमानोनयमियमियमलीकभयं मुञ्चेदिति ।

यावत्सा [4]मदासन्दीसन्निधौ स्थिता तं कम्बोजीयं तदीयं स्यूतं च न्यरूपयत्, तावत्स तस्यै सशुष्कमृद्वीकान् कन्दरा[5]लानुपाहरत्, परं सा नासीदुपच्छन्दिता, केवलमुपचीयमान-संशय-सङ्कुला भूयोऽपि मामुपाश्लिष्यत् ।

इदं तयोः प्रथमं सम्मेलनमासीत् ॥

परन्तु कतिपयदिवसानन्तरं गृहान्निष्क्रामन्नहं मिनीं द्वारोपकण्ठे मञ्चमध्यासितां पादयोरुपविष्टेन विशालकायेन तेन कम्बोजीयेन सार्धमालपन्तीं हसन्तीञ्च लोचित्वा भृशमचित्रीये । एवं किल प्रत्यभासीत्, यद् आजन्म मे वत्सा स्वपितुःपृथक् तादृशं सहिष्णुं श्रोतारं नासीसददिति । तदानीं च तस्याः शाटिकाञ्चलं तदागन्तुकार्पितेन वाताद (वादाम) शुष्कद्राक्षामयेनोपायनेन संपूरितमासीत् । अथाहं कम्बोजीयं किमिति त्वं तस्यै तान्यदा? इति ब्रुवन्नेकामष्टाणकीं निष्कास्य तस्य पाणौ न्य-

दधाम् । स च विप्रतिपत्तिमन्तरेणैव तद्धनं प्रतिपद्य निचोलविले न्यधत्त ।

हन्त ! द्विगुणीकृतनिजायासामपश्यं तां वराकीं मुद्रां मुहूर्तात्पश्चात्प्रतिनिवृत्तोऽहम् ! कम्बोजीयो हि तां मिन्यै प्रादात् । तस्या माता च भास्वति गोलाकृतौ पदार्थदृष्टिं क्षिपन्ती ।‘ कुतस्त्वमेतामष्टाणकीमलभथाः ? ’ इत्युदीरयन्ती च श्येनपातं कन्यकामभ्यपप्तत् ।

मिनी सोल्लासमाचष्ट—‘ कम्बोजीय इदम्मेऽदत्त ’ इति

अथ भृशं द्रुता तदम्बाऽदात् ! अये मिनि ! कथं नु त्वं तस्मादेनत्प्रतिग्रहीतुमार्हीः ?’ इति

तत्क्षणमेवाहं प्राविशम्, आपिपतिषन्त्या विपदश्च तां परिरक्षन्निजानेव संप्रश्नन् कर्तुमुपाक्रमे नाहं सकृद् द्विर्वा द्वौ मिलितावपश्यम् । कम्बोजीयो हि समञ्जसेनाल्लोटवातादमयेनोत्कोचेन कन्यकाया आदिमं साध्वसं परास्यत्; साम्प्रतं च द्वौ परमे मित्रे अभूताम् ।

विचित्रैः परिहासै स्तावन्योऽन्यमरञ्जयताम् । मिनी तस्याभिमुखं वीक्षत्, स्वबालगौरवं च साधु विवृण्वती तदीयमायतं कलेवरं निरवर्णयत्, हासोल्लसद्वलिवन्धुरेण वदनेन च व्याहर्तुमुपाक्रमत—‘अयि कम्बोजीय ! कम्बोजीय ! किमिदं नूह्यते त्वयाऽस्मिन्स्यूते ?’ इति

अथ स नासिकोनपर्वतीयस्वरेण प्रत्यवोचत—‘कुञ्जरः’ इति । नासीदयं मोदाय-अलंहेतुः; किन्त्वहो ! कथं स्वादुङ्कारं तावुभौ हास्यानन्दमन्वभूताम् ! बालिकाया अस्मिन् प्रवयसा पुरुषेण संलापे मत्कृते तु सदैव किमप्यपूर्वमाकर्षणमविद्यत ।

अथ कम्बोजीयस्तदानीं ‘माऽघरी भूवम्’ इति स्वं वारं प्रत्यपादि—‘साधु ! अथ वत्से ! त्वं कदा स्वं श्वशुरालयं गन्तासि ?’ इति

अद्यत्वे प्रायः प्रत्येकं वङ्गीया कुमारी बहोः कालात्प्राङ्निजश्वशुरालयोदन्तं श्रुतवती विद्यते, परं वयं किञ्चिन्नवयुगीना आस्म, तादृशानि वस्तूनि च स्वस्याः कन्यकाया नित्यमगोपस्म; अतस्तेन प्रश्नेन मिनी नूनं किञ्चिदिवोदभ्रमीत् । किन्तु न सा तत्प्राचीकटत्, प्रत्युत्पन्नमत्या तु प्रत्यवादीत्—‘अपि त्वं जिगमिषसि तत्र ?’ इति

कम्बोजीयपुरुषाणां मध्ये तु ‘श्वशुरालयः’ इत्ययं शब्दोऽर्थद्वयं वक्तीति प्रथितमस्ति । एष श्रुतिमधुरं संज्ञान्तरमस्ति कारावासस्य, यत्र निजव्ययेन विनैवास्माकं सम्यक्प्रतिपालनं भवति । एनमेवार्थं मनसिकृत्याऽसौ पीवरः पण्याजीवो मम सुतायाः प्रश्नमग्रहीत् । ततश्च हुं कृत्वा परोक्षं राजपुरुषं प्रति मुष्टिं धुन्वन्नवादीत्—‘अहं स्वं श्वशुरं कुट्टयिष्यामि !’ इति । एतदाकर्णयन्ती, धर्षितं वराकं सम्बन्धिनं च ध्यायन्ती मिनी अट्टहासपुरःसरं दूरं पलायिष्ट; स प्रचण्डस्तत्सखा चापि तामनुग्राहसीत् ।

(क्रमशः)

‘सुलभ-व्याख्यान-माला’

श्रीप्रकाशमहोदयानां राजशास्त्रविषयकं व्याख्यानद्वयं समासतोऽत्र लिख्यते । सुप्रभात-पाठकवृन्दास्तत्पठनेनानुगृह्णन्तु ।

'प्रथमे व्याख्यानेऽस्माभि र्दृष्टं यत् समाजोत्पत्तिः कथमभवत्; कथं च तस्य सुसंघटित-व्यवस्थापने नियमानामावश्यकता बभूव; कथं च नियमकर्तारो नियमद्रष्टारो नियमोल्लङ्घयितृदण्डदातारश्च भिन्नाः स्युरिति।

इदानीं तावत् राजसंघटनं कथमभूदिति प्रथमं विचारणीयम्। तद्विषये तु सन्ति त्रयः पक्षाः। केचित् मन्यन्ते, यत्, ब्रह्मा स्वयमेव स्वप्रजारक्षणाय भूम्यामवततार; तेन च राजसंघटनं कृतमिति। अन्येच, केचित् जना एकत्रीभूय कांश्चित् नियमान् कृतवन्तः; तान्नुसृत्येतरे जना वर्तन्ते स्म; अनेन राजसंघटनमभूदिति। अपरे च केचित् वदन्ति, यत् यो ह्यस्माकं शक्तिमानासीत, स एव राजा भूत्वा राजसंघटनं चकारेति।

एतेषु द्वितीयः पक्षः श्रेष्ठतमः। तमेवानुसृत्येदानीं सर्वा राज्यव्यवस्था क्रियते। प्रान्तप्रतिनिधयः एकत्रीभूय नियमान् कुर्वन्ति; जनैश्च तान् परिपालयन्ति; नियमोल्लङ्घयितॄन् दण्डंच दापयन्ति। राज्यस्यैतदेव मुख्यं स्थानम्, यत्रैते प्रतिनिधयः सम्मिलिताः सन्ति। कौन्सिलादिसंस्था स्तान्येव स्थानानि सन्ति। अत एव राजकार्यधुरंधराणां कौन्सिलादिप्रवेशेऽतीव यत्नः। किन्तु नास्ति तत्र सर्वेषामधिकारः। ये धनवन्तो विद्यावन्तश्च तेषामेव प्रवेशाधिकारः। मतप्रदानेऽपि सन्ति न सर्वेऽधिकारिणः। तेषामेव मतप्रदानाधिकारो ये धनवन्तः। बालवृद्धवनितानां नास्ति मतदाने प्रवेशे चाधिकारः। एतदयुक्तम्। यदि सर्वेषां नियमपालनमावश्यकं तदस्तु सकलानामपि मताधिकारः। विदुषीणां स्त्रीणां कौन्सिलादिप्रवेशेऽप्यस्त्वधिकारः। अनेन, सर्वेषामपि जनानां नियमपालनं सुकरं भवेद्यतस्ते तानेव नियमान् संघटेयुः, यान् ते सुलभतया परिपालयितुं शक्नुवन्ति; अन्यच्चाधुना दृश्यमानः प्रकारः कौन्सिलादिषु न भवेत्।

इदानीं कौन्सिलादिषु सन्ति सर्वे धनवन्तः। प्राकृतिकनियमानुरूपं हि तत्, यत् ते न जानन्ति धनहीनदुःखानि, । ते स्वीयान्येव दुःखानि बहुमन्यन्ते, अर्थात् ते नियमकरणसमये नास्माकं दुःखानि संकटानि च विस्तृततया विचिन्तयन्ति। तस्मान्न तत्र सर्वे धनवन्तः स्युः। तथैव स्त्रीणां विषयेऽपि। न वयं पुरुषास्तासां दुःखानि यथा तथा ज्ञातुं प्रभवामः।

अस्मिन् समये ये नियमाः सन्ति तत्राल्पा एव स्त्रीविषयकाः। एतदपि न युक्तम्। अस्तु।

तदेतत्सिद्धमेव यदस्तु सर्वेषां विदुषां धनवतां धनरहितानां च मतप्रदाने, कौन्सिलादिप्रवेशे चाधिकारः, राज्यकार्ये चास्तु तेषां हस्तक्षेपः। किन्तु नास्त्येवम्; एतत्तु दुःखस्थानम्। पाश्चात्यदेशविशिष्टेषु चास्ति स्त्रीणां मतदाने; कौन्सिलादिप्रवेशे चाधिकारः। अस्तु। जगति सन्ति सर्वे भिन्नप्रकृतयः। केचित् परिवर्तनवादिनः, केचिदपरिवर्तनवादिनः, अन्ये च केचिदतीतवादिनः, भारतेऽस्मिन्नपि सन्ति बाहुल्येन पक्षविपक्षाः। केचित् स्वराज्यवादिनः, केचित् स्वान्यवादिनः, केचित साम्राज्यान्तर्गतस्वराज्यवादिनः, केचित् सहकारिणः, केचिदसहकारिणश्च। एतेषां प्रतिनिधयः कौन्सिलादिप्रविष्टाः स्वमतानुरूपान् नियमान् घटयन्ति, परमतानुरूपान् नियमान् विघटयन्ति च। अल्पाःसन्त्येतादृशा नियमाः ये सर्वैर्मतैर्नियमत्वं गताः, किन्तु विपुलाः सन्त्येतादृशा येऽधिकैर्मतैर्नियमत्वं प्राप्ताः।

एतैर्नियमैर्वयं बद्धाः स्मः। अस्माकमेतेषां नियमानां पालनं सर्वथाऽऽवश्यकम्। तस्मान्मतदातृभिरस्माभिस्तेभ्यः पुरुषश्रेष्ठेभ्यो मतानि दातव्यानि, ये खल्वस्माकं दुःखानि संकटानि च जानन्ति, ये च खलु तत्र गत्वास्माकं श्रेयस्करानेव नियमान् संघटयन्ति; अन्यांश्च विघटयन्ति; ये च न केवलं स्वमतानुरूपनियम-संघटनाय तत्र गच्छन्ति, किन्तु स्वबान्धवनियमसम्बन्धि-दुःखदूरीकरणाय।

यदि सर्वे मतदातार एतादृग्भ्यो मतानि वितरेयुः, यदि तेषामेव तत्र प्रवेशो भवेत्, तर्हि ये नियमाः संघटिता भवेयुस्ते कदापि दुःखदायका न स्युः।' इति॥

श्री त्र्यं० वि० मोहरीर.

उमारमयोः श्लेषेण वर्णनम्।

अब्जाऽऽयतेक्षणलसद्वदनापिनाक—
भृन्मौलिना मिलितपादसरोरुहश्रीः।
गोत्रेश्वरादरनिदानमसौ विदध्या—
द्वामा मनोभवकृतः शमुमारमा वा॥१॥

—भूपनारायणझा, शर्मा।

सत्कवि-विठोबा-अण्णानां जीवनचरितम् ।

लेखकः—श्रीहरि-गोविन्द-बोरवणकरः छात्रः, श्रीकाशी-विद्यापीठस्य ।

अस्माकमुत्तरापथनिवासिनां जनानां नास्ति दक्षिणभारतीयगीर्वाणवाणीप्रवीणानां चरितैः सह सुपरिचयः । इदं हि महद्दुःखस्थानम् । अतो वयं सुप्रभातपाठकानां कृते, ये दाक्षिणात्यपण्डितप्रवराणां चरितानि न जानन्ति, निम्नलिखितं जीवनचरितं प्रेषयामः । तत्पठनेन केनापि वाचकेनान्यदेकमप्यप्रकाशितपूर्वचरितं सुप्रभाते प्रकाशनार्थं प्रेषितं भविष्यति चेद्वयं कृतार्था भविष्यामः । तदेवास्मल्लेखनस्य महत्पारितोषिकम् ।

अस्ति च दक्षिणेषु विषयेषु 'निजाम' नाम प्रसिद्धमेकं संस्थानम् (Nizam State) । तस्मिन् 'करहाटक' नामकमेकं सुविख्यातं तीर्थस्थानं कृष्णा-कोयन्नानद्योः सङ्गमे वर्तते । तत्रैको ब्राह्मणः 'पन्तमहादेव' आसीत् । स च स्नानसन्ध्यादिब्रह्मकर्मनिरतः सत्त्वशीलश्च । 'रामचन्द्र' नाम्नस्तस्यपुत्रस्य पञ्चदशवर्षदर्शनात्प्रागेव मृत्युः समजनि । प्राणप्रियपुत्रनिधनेन व्याकुलः स यथा कथंचित् कालं यापयितुं निश्चिकाय । तस्यासन्बहवस्तनयाः किन्तु नैकोऽपि तेष्वेवम्भूतो यो कालान्तकयमेन नापहृतो भवेत् । इदमेव सर्वसुखसम्पन्नस्य तस्य ब्राह्मणस्य दुःखस्थानम् । रात्रिंदिवं सोऽखिलभुवनदुःखदातृदैत्यदानवेन्द्रपौलस्त्यविदारकस्य दाशरथेराराधने निमग्नोऽभूत् । स्वदासवशमानसः स करुणावरुणालयो भगवान्कथं न स्वाश्रितजनमनोरथान् पूरयेत् । वदान्यजनसद्गुरुणा तेन भगवता रामचन्द्रेण स्वसेवानिरताय तस्मै पन्तमहादेवाय १७३५ तमे शाकाब्दे (तदनुसारेण १८७० तमे वैक्रमीये) पौषकृष्णामावास्यायामेकं पुत्ररत्नं प्रदत्तम् । मृतबहुपुत्रकस्य तस्य प्रभूत आनन्दः, प्रभूतं दुःखं च समभवताम् । आनन्दो बहुकालानन्तरपुत्रप्राप्तौ दुःखं च स्वाभाविकपूर्वक्रमानुवर्तिबालकस्याल्पायुषः तर्कितनिधने । तत्रापि चामावास्यासदृशमभद्रं जन्मस्थानमिति तद्दुःखस्य कारणविशेषम् । किन्तु तर्कातीता भगवल्लीला केन ज्ञायते ? अमावास्यायां जातेन तेनैव बालकेन स्वकीर्तिश्चिरस्थायिनी कृताऽस्मिन्भूतले । तस्य 'विठ्ठल' इति नामाकारि जनकेन पन्तमहादेवेन ।

वर्द्धमानस्य तस्य बालकस्य हृष्टा पुष्टा चाङ्गयष्टिर्दिने दिने सुदृढा बभूव । न कोऽपि तस्मै कुप्यति यद्यपि किञ्चिदपि श्रोतव्यं स न शृणोति

बहवो भिन्नभिन्नोपायाः कृतास्तं पाठशालायां प्रहेतुं, किन्तु न ते सफलीभूताः । 'बाल एवायमद्यापि' इति विचिन्त्य जनकस्यापि तत्र उपेक्षाभावोऽभवत्। प्राप्तदशवर्षस्यास्य बालकस्य नाद्याप्यक्षरसंस्कारोऽभूत् । विजयादशम्यांतिथौ पन्तमहादेवेन सहाक्षरसंस्कारविहीनोऽयं विठ्ठलः कस्यचिच्छ्रीमतो मण्डपं गत आसीत् । मनोमोहकमस्य वदनं दृष्ट्वाऽऽकृष्टहृदयेन धनिना पृष्टानां केषाञ्चित्प्रश्नानां चातुर्यपूर्णानि प्रत्युत्तराणि विठ्ठलेन दत्तानि । तानि श्रुत्वा श्रीमता स पृष्टो यत् 'कस्यां पाठशालायां पठसि त्वं' इति । विठ्ठलेन न किमप्युत्तरं दत्तं परञ्च लज्जया मुखमधः कृतम् । मनसि च तेन स्वमूढता सहस्रशो धिक्कृता निश्चितं च विद्याभ्यासपारङ्गततां प्राप्तुम्। अयमेव परिवर्तनकालस्तस्य चरितस्य । षण्मासाभ्यन्तर एव तेनेदृश्युन्नतिः कृता यां दृष्ट्वा सर्वे गुरुजना आश्चर्यचकिता बभूवुस्तस्य चातीव प्रशंसां चक्रुः । यदा तेन श्रीमता महाशयेन पारितोषिकप्रदानेन तस्य कौशल्यमभिनन्दितं तदैव तस्य समाधानमभवत् ।

द्वादशतमे वर्षे तस्य विवाहः सञ्जातः । अस्मिन्नेव वयसि व्यायामविषये तस्य रतिरुद्भूता । यद्यपि व्यायामविषयेषु तेनातिकौशलं प्राप्तं तथापि तरणकलायां तु तस्य वैशिष्ट्यमेव । मित्रवृन्देन सह कृष्णां तीर्त्वा तेषां साहाय्येन प्रतिसमयं स पञ्चपाषान् ग्राव्ण आनीतवान् । तेषां संगृहीतग्राव्णामेकं हनुमन्मन्दिरं तेन रचितमद्यापि कृष्णातटे दृश्यते ।

'आप्पा पुराणिका' नाम्नां विदुषां समीपे विठ्ठलेन गीर्वाणवाणीविज्ञानं प्राप्तम् रघु-किरात-कुमार-माघ-नैषधानां प्रख्यातपञ्चकाव्यानामध्ययन विषयक श्च पाटवम् । एकस्मिन्दिवस आप्पाशास्त्रिणः पुराणं वाचयितुं पन्तमहादेवस्य गृहं गताः । असमापित एव पुराणे ते व्यासपीठादवातरन्नकथयंश्च यदवशिष्टान्दशद्वादशश्लोकानयं विठ्ठलः श्रावयिष्यतीति । न स्वसुतस्य संस्कृतभाषापाटवं पन्तमहादेवस्य ज्ञातपूर्वम्, अतः स पुराणश्रावणे विठ्ठलस्यस्खलितवाग्धाराप्रवाहं दृष्ट्वाऽऽश्चर्ययुक्तो बभूव । अनन्तरं तेन स्वगृहे आप्पाशास्त्रिभ्यो वसितुं स्थानं दत्तं तेषां चोचितादरातिथ्यं कृतम् । विठ्ठलस्यागाधं बुद्धिसामर्थ्यं दृष्ट्वाऽऽप्पाशास्त्रिणोऽपर्याप्तमतयोऽभवन् । स्वशिष्यशङ्कानिरसनमशक्यमिति बुद्ध्वैकस्यां रात्रौ त एकाकिनेऽकथयित्वैव कुत्रचिदपि गताः । न चापि तेषां शोधने कश्चित् प्राप्तयशा बभूव । सर्व एव तेषां गमनेन परमदुःखिता बभूवुः । विठ्ठलस्य तु शोकस्य पारो नाभूत् । आप्पाशास्त्रिभिर्विठ्ठलो 'अण्णा' इति नाम्नाऽऽकारितस्तस्मात्तस्य 'विठोबा अण्णा' इति नाम प्रसिद्धम् । अतो वयमपि तमनादरसूचकैरेकवचनशब्दै प्रतिपाद्य आदरवाचकैर्बहुवचन-शब्दैः प्रतिपादयिष्यामः ।

यद्यपि तैः (विठोबा अण्णाभिः) आप्पाशास्त्रिसकाशे व्युत्पत्तिज्ञानं सम्यगधीतं तथापि व्याकरण-न्याय-वैद्यक-सङ्गीतादिविषयाणां तेषामध्ययनं तत्तद्विशिष्टगुरुसमीपे समाप्य तेषु तेषु विषयेषु तैः प्रावीण्यं सम्पादितम् । सर्वमिदं विंशवयसः पूर्वमेवाधीतमिति खलु महदाश्चर्यकारणम् ।

अष्टवर्षानन्तरं दुःखराशयस्तेषामुपर्यपतन् । तेषां वयसोऽष्टाविंशतितमे वर्षे जनकस्य पन्तमहादेवस्य निधनमभवत् । वर्षद्वयाभ्यन्तरे तेषां पत्नी

'गयाबाई' नाम्नी पार्थिवं शरीरं त्यक्त्वा सुरलोकं गतवती। पत्न्या निधनस्थानतीते संवत्सरयुगल एव तेषां सदया जननी स्वपतिनिधनदुःखमसह्यं ज्ञात्वा तत्समीपे चिरं निवसितुं जगाम ! संसृतिशीलं संसारमसारं विज्ञायाण्णाशास्त्रिभिः स्वचित्तौघेोऽनश्वरं परिपूर्णं च श्रीरामचन्द्रपदकमलं गन्तुं भक्तिमार्गेण नियोजितः। साग्रहेण वारं वारं द्वितीयं विवाहं कर्तुं विज्ञापितानां तेषां मतिर्न निश्चितमार्गतः किञ्चिदपि विचलिता बभूव। जननीनिधनकालतस्तैरुष्णीषधारणं त्यक्तम्। आमरणान्तं तैर्न कदापि पुनः शिरस्युष्णीषं धृतम्। मातृमरणसमय एव तेषां वेदाभ्यासप्रारम्भकालः। आपाशास्त्रिणां समीपे तेषां वेदाध्ययनमभवत्।

अर्धाङ्गवायुविकारेणाण्णाशास्त्रिणोऽत्यन्तं पीडिता आसन्। यथानियमं तै रामनवम्युत्सवो महता समारोहेण पारं नीतः। न कस्यापि कल्पना लेशो यदयमेवाण्णानामन्तिम उत्सवो भवेदिति। शकीयसम्वत्सरे १७८५ तमे (तदनुसारेण १९३० तमे विक्रमीयवत्सरे) चैत्रमासि कृष्णपक्षस्य या दशमी तिथिः तस्या मध्यरात्रावेषां सत्पुरुषाणां पृष्ठेऽतीव पीडोदभवत्। तथा पीडितैस्तैः कथञ्चिदपि सा रात्रिरतिक्रामिता। अन्यस्मिन्प्रभाते पिपासया तेषां कण्ठावशोषः समभवत्। परन्तु नित्यविधिसमाप्तिं विना कदाचिदपि कर्हिचिदपि यैर्जलमपि न पीतं, कथं तैर्हरिदिन (एकादशी) सदृशशुभ्रावसरे नित्यविधिपरिसमाप्तेः प्राग्जलसेवनं कर्तुम् शक्यम्? असह्यकष्टान्यप्यगणयित्वा तैः स्नानध्यानादिनित्यकार्याणि समाप्य दाशरथिरामचन्द्राय [1]राजादन-क्षीरनैवेद्यमर्पयित्वापराधस्तोत्रं पठितं तुलसीपत्रं च स्वीकृतम्। अनन्तरं क्षीरप्रसादं भक्षयित्वा पिपासा-शामक-जल-प्राशनार्थे हस्ते पात्रमादाय नित्यनियममनुसृत्य 'श्रीराम' इति घोषेण मुखे जलं गृहीतम्। तदेव तेषामन्तिमकृत्यम्। तेषां पञ्चप्राणाश्चित्स्वरूपे विलीना देहस्त्वचेतनो भूमाववशिष्टः। इत्थं कलेशैस्तेषां निधनमभवत्॥

तेषामपत्यानि त्रीणि द्वौ पुत्रौ कन्या च। तेषु द्वितीयेन रघुवीरेण स्वजनकक्कृतगजेन्द्रचम्प्वादि ग्रन्थानामुपरि संस्कृतटीका रचिताः।

'विठोबा अण्णा' कृतानि पद्यानि दक्षिणेषु विषयेषु विशेषरूपेण प्रख्यातानि।

शुद्धब्रह्मपरात्परराम। कालात्मकपरमेश्वरराम
लीलाकल्पित जगदभिराम। शेषतल्पसुख-निद्रित राम
ब्रह्माद्यमरप्रार्थित राम। शिष्टाश्रितजनरक्षित राम
चण्डकिरण-कुलमण्डनराम। श्रीमद्दशरथनन्दनराम
* ४ * (नामरामायणम्)

इयं सुमधुर पदलालित्ययुक्ता रचनैतेषामेव! एतेषां 'आनन्दाचा कन्द हरि हा देवकिनन्दन पाहिला' इदं सुमधुरं भक्तियुक्तान्तः करणेन कृतं पद्यं मराठीभाषाभिज्ञानां विदितचरमेव। कीर्तनकारिहरिदासानांत्विदं, विशेषतः प्रियं भवति। निम्नलिखिताः प्रबन्धास्तै रचिताः—'सुश्लोकलाघवम्', 'हेतुरामायणम्', 'प्रबोधोत्सवलाघवम्', 'प्रयोगलाघवम्', 'नित्यक्रमलाघवम्', 'सङ्कल्प', 'रामतापिनी', 'विवाहतत्त्वम्', 'साधुपार्षदलाघवम्'. 'एकादशी विचारः', 'गजेन्द्रचम्पूः', आदयः।

[1] 'चिरौंजी' इतिभाषायां प्रसिद्धम्

एतेषां काव्येषु मुख्यतया श्रेष्ठौ गुणौ भक्ति प्रसादौ वर्तेते । 'सुश्लोकलाघवे' ग्रन्थे काव्य-पाटवं रचना-चातुर्यं कल्पना-कौशलं च प्रति-पदं दृश्यन्ते । सुश्लोक-लाघवरचनाहेतुस्तेषामेव शब्दैर्दीयतेऽस्माभिः—

सुविचित्र वाक्यरचनं सुजनाः सुश्लोकलाघवं शृणुत ।
स्पष्टं नृणां प्रतिष्ठा दृष्टा नूनं यतो जनस्थाने ॥

अस्य ग्रन्थस्य माहात्म्यमपि तेषामेव शब्दैः शृणुत-

सुश्लोकलाघवश्लोकं विचित्रानन्ददायकम् ।
सकलाः स्पृहयन्त्येव हरिदासा विशेषतः ॥ १ ॥
सुश्लोकलाघवश्लोकः प्रस्तुतो जनसंसदि ।
न कस्मै रोचतां नूनमेकां खरचमूं विना ॥ २ ॥

सुश्लोकलाघवस्य श्लोकाः सकलानां स्पृहणीया विशेषतस्तु स-कलानाम् । हरिदासानां कृते भगव-द्गुणवर्णनेन ते प्रसन्ना भवन्ति रचना कौशलेन ते हरिदासानां (कीर्तनकीर्तृन् महाराष्ट्रदेशेषु 'हरि-दास' इति संज्ञया जानन्ति जनाः । भगवत्कथाकी-र्तनमेव तेषां वृत्तिसाधनम्) प्रियतरा भवन्ति । सुश्लोकलाघवश्लोक एकां खरचमूं खलचमूं वा विना कस्मै न रोचते । सर्वेभ्य एव ।

ग्रन्थस्यास्यान्तिमभागे कविवरेणानेन स्वयमेव लिखितम् यद्यथा मे कुलदैवतं श्रीरामचन्द्रः प्रेरये-त्तथैवाहं समग्रमवोचम् इति । स्वनामपि तेनैव लिखितं—

यस्य श्रीकरहाटकाभिधमहाक्षेत्रे निवासो महा-
देवो यस्य पिताऽच्युताङ्घ्रिनिरतो माता च गीताह्वया
सर्वस्वं रघुनन्दनाङ्घ्रियुगलं यस्यैहिकामुष्मिकं-
ग्रन्थेऽस्मिन्स निमित्तमात्रमभवत्पन्तादिमो विठ्ठलः

ग्रन्थग्रथनकालोऽपि दत्तः पण्डितप्रवरेणानेन यथा-
शालिवाहन भूपालशकेऽक्षाश्वाश्वभूमिते [१७७५]
ग्रन्थोऽयं ग्रथितः सन्तः पन्तविठ्ठल शर्मणा ॥

सुप्रभातोत्सवः ।

(ले० —श्रीचक्रधरशास्त्री, बहुगुणाः)

[अवशिष्टांशः]

(ततः प्रविशति ज्ञान-विज्ञानाभ्यां निगड़बद्धमज्ञानम्)

*अज्ञानम्—त्राहि! त्राहि! रक्ष! रक्ष! नास्ति मे शरणम् । किं करोमि? क्व गच्छामि? एताभ्यां दृढं निग-ड़बद्धोऽहं स्वेच्छया विचरितुं न शक्नोमि । हा दैव! दुर्विदग्ध! नष्टं मे स्वातन्त्र्यम्, नयनविहीनस्येव न किमपि मे भाति । यवनसमयान्मे निरर्गलमासीत् राज्यम् । तन्मध्य एव सहसा भग्नम् । (इति बहुलं विलपति)

भारतभाग्यम्—को भवान्? किं निमित्तं रोदिसि? किं कष्टं वर्त्तते?

अज्ञानम्—अहमस्मि, हतभाग्यधेयमहमस्मि । (पुन-र्विलपति)

भारतभाग्यम्—वद-वद! स्वदुःखस्य, रोदनस्य कार-णम् । विश्रब्धम् कथय स्वकीयोदन्तजातम् । कोऽस्ति भवान्?

अज्ञानम्—अरे अहमस्मि । यस्य भारते निष्कण्टकं राज्यमासीत् । यस्माद्भारतभाग्यमपि पलायिता । यस्य समये मुसलमानानां मुसलस्येवाधिपत्यमासीत् । सोहं सकल चराचर विदितोऽज्ञानोऽस्मि । अद्य दौर्भाग्यादेतयोर्महाधूर्तयो-र्हस्ते पतितोऽस्मि । अतएव विलपामि ।

* अज्ञानत्वादशुद्धि बहुलं वक्ति ।

भारतभाग्यम्—(सभ्रूक्षेपम्) तिष्ठ धूर्त ! तिष्ठ । त्वमेवासि भारतदैन्यस्य निदानम्, दुर्विदग्धतायाः कारणम् ! तिष्ठ ! करोमि ते चिकित्साम् । (भारतीमवलोक्य) एतच्चिरायाद्य मे भुजपञ्जरे पतितं, तत्करोम्यस्य शल्यम् । (इतिकरेणदृढं गृह्णाति) वद रे वद !, किन्ते करोमि ? (दृष्ट्वा) अहो ! एतत्तु 'सुप्रभातालोके' ऽन्धं जातम्, न जाने सूर्योदये काऽस्य-गतिर्भविता । तन्मुञ्चामि । परं नहि, दुष्टस्य वधोऽवधः । ताड़नमेव हितम् । (इति ताड़यितुमिच्छति) ।

अज्ञानम्—कोर्भवान् ! मा मा मारय । दयनीयोस्मि-सोयम् । यतः 'सुप्रभात' स्यालोकेन मे हृदयं नितरां कम्पते । नयने च क्षीणक्षीणे । परन्तत्प्रभातं सूर्योदयेनानुगतमिति, श्रावं श्रावं मृतप्रायोऽस्मिसंवृत्तः । एताभ्याञ्च दुष्टाभ्यामहं-निगड़े पातितः । तत्प्रणतोऽस्मि शरणाय । प्रार्थयामि चाभयम् ।

भारत भाग्यम्—(भारती मुद्दिश्य) अस्ति कृपा-पात्रं यदेतदन्धम् । अन्धस्य वधाय नास्ति शास्त्रानुज्ञा । न चायं ममात्मा प्रभवति । (अज्ञानं प्रति) तन्मुञ्चामि गच्छ ! मूर्ख ! गच्छान्यत्र !

सुरभारती—तात ! भारतभाग्यधेयम् ! प्रीतास्मि तवात्मन औदार्येण धर्मपरायणतया च ।

अज्ञानम्—भगवन् ! भवतां सङ्गमात्रेणैव मे चेतसि प्रकाशं जातम् । तत्क्षमस्व मां । प्रसीद ! मयि प्रसीद ! परमानुकम्पयोपदिश यां स्वनामधेयपुरःसरम् ।

भारतभाग्यम्—आः ! ते भाषणेनैव ज्ञायते यदीश्वर स्त्वयि प्रसन्नो जातः । तच्छृणु 'भारतभाग्य' मिति जना मे नाम कथयन्ति । सम्प्रति तुभ्यसुपदिशामि यत्त्वमितो भारतात् स्वकुटुम्बीयैः कुटिलता-जड़ता-दुर्जनता-आदिभिः सह ताम्रकूटगुहासु गत्वा स्वदुराचारस्य पश्चात्तापं कुरु, स्फटिकाच्छहिमराशौ स्वात्म-विसर्जनं विधेहि । येन ते भावि जन्म उज्वलं विशुद्धञ्च भवेत् ।

अज्ञानम्—क्षम्यतां भगवन् ! ममापराधान् । मया तु दुर्विनीतेनाखर्वगर्ववशादनेकदुराचारैर्भवतामन्तःकरणमतीव क्लेशितम् । तस्मात्ते शतशः क्षमामभ्यर्थयामि । (इति पादयोः पतति)

भारतभाग्यम्—सर्वं मया विस्मृतम् । त्वं गच्छ धर्मपरो भूत्वा दिवसान् यापय ।

अज्ञानम्—यथोपदिशति भवान् । (इति निष्क्रान्तम्)

सुरभारती—(ज्ञानविज्ञाने प्रति) पुत्रके ! युवां भारतं निबोधयतम् । तस्य साहाय्यं कुरुतम् । अद्य तस्य पुनस्तिलकोत्सवायोपस्करणं आनयतम् ।

उभे—यथाज्ञापयति भवती । (इति निष्क्रान्ते ।)

(ततः प्रविशति भारतं, सोपस्करणे ज्ञान विज्ञाने च)

भारतम्—सुरभारत्याः पादयोः प्रणिपत्य) अम्ब ! चिरस्यानुगृहीतोऽस्मि ।

सुरभारती—पुत्र ! उत्तिष्ठ ! अवलोकयस्वाग्रजं भारतभाग्यम् । (परस्परं मिलित्वोभे परिष्वजतः ।

(सर्वाणि सुरभारतीञ्च स्तुवन्ति)

"सद्भावा, शुचि रुज्वलामितरसा, सद्ग्रन्थ-सन्मात्रिका,
सद्वर्णा मृदुरीतिमोहनरता, स्वच्छावगाहा स्थिरा ।
जाड्यध्वान्त-निरास-रास-रसिका यालंकृता सर्वदा
सा पायात्परदेवतेव भवती श्रीभारती नः सदा ॥ ६ ॥

सुरभारती—अये ! सुतरां प्रसन्नाऽस्मि । भारतस्य चेच्छामि पुना राजतिलकं स्वहस्तेन कर्तुम् ।

भारतम्—यथाभिमतं भवत्यै ।

सुरभारती—(स्वहस्तेन भारतभाले तिलकं विधाय) वत्स ! सम्प्रति कृतयुगसमयवद्यापि प्रजानुरञ्जनं विधेहि । भारतभाग्यञ्च स्वेच्छया विहरतु । ज्ञानविज्ञाने च चिरं विजृम्भेताम् ।

सर्वाणि—यथाभवत्या आशिषस्तथैव भविष्यति ।

सुरभारती—किं ते भूयः प्रियमुपकरोमि ।

भारतम्—अतः परमपि प्रियमस्ति ? यदि विशेषं प्रियं कर्तुमिच्छसि तर्हीदमस्तु—

"प्रजा हृष्टापुष्टाः किमुत शरदां नन्दतु शतम्
प्रवर्तन्तां विश्वे प्रकृतिछहिताय क्षितिभुजः ।

नृणां भक्तिर्भूयाद्भगवति भवे द्वैतगलिता
ममान्तस्तापं ते शमयतु च मन्दस्मितमदः ॥ ७ ॥

सुरभारती—तथास्तु ।

(इति निष्क्रान्ताः सर्वे ।)

॥ *समाप्तश्चायमुत्सवः* ॥

सिंहदिलीपयोः सम्वादः ।

छात्राणां कृते

गुरोराज्ञां स्वीकृत्य, सम्राट् दिलीपः, प्रातःकाले समुत्थाय, जायाप्रतिग्राहितगन्धमाल्याम्, पीतप्रतिबद्धवत्साम्, वशिष्ठधेनुं नन्दिनीं वनाय मुमोच । स च—'स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः । जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्' ।

एवं आस्वादवद्भिः तृणानां कवलैः, कण्डूयनैः, वनमक्षिकापसारणैः, निःशङ्क—स्वच्छन्दगमनैश्च एकविंशतिदिनानि यावत समाराधयामास ।

अन्येद्युः—आत्मानुचरस्य भावं जिज्ञासमाना नन्दिनी, गङ्गाप्रपातान्तविरूढशष्पां हिमालयस्य गुहां प्रविवेश । सा हिंस्रैर्मनसाऽपि दुष्प्रधर्षा—इति नृपः पर्वतस्य प्राकृत-सुषमायाः विलोकने संलीनोऽभवत् । अपरतश्च गुहाशयः सिंहो हठात नन्दिनीमाक्रमत् । ततश्च धेन्वाः कातरं दीन-दीनमाक्रन्दनमाकर्ण्य, राजा तत्र दृष्टिं निचिक्षेप । नन्दिन्या उपरि स्थितं सिंहमालोक्य विस्मय-क्रोधाविष्टो राजा सत्वरं तूणीरात् शरं निष्कासयितुं प्रायतत्, परं तस्य दक्षिणो हस्तः सायक-पुङ्ख एव चित्र-लिखित इव तस्थे ।

ततो हस्तावरोधेन क्रोधाभिभूतं चकित-चकितं राजानमत्यन्तं विस्मापयन् सिंहो मनुष्यभाषायां तमुवाच—

"हे राजन्! परिश्रमं मा कुरु । मयि तव बाणप्रक्षेपण-प्रयासो व्यर्थ एव । अहं खलु कुम्भोदरनामा शिवस्य गणोऽस्मि । शिवो मत्पृष्ठे पादन्यासं कृत्वा वृषभमारोहात । यं खलु पुरस्तात् देवदारुवृक्षमवलोकयसि, असौ शिवेन पुत्र इव स्वीकृतः, पार्वत्या स्वयं जलसेकेनाऽयं संवर्धितः । एकदा कटं कण्डूयमानेन वन्येन गजेन अस्य त्वक् समुत्पाटिता । तदा पार्वती नितरामेनं स्वपुत्रमिव शुशोच । तत एव कालादारभ्य शिवेन सिंहत्वं विधाय, अहमस्य रक्षायै पर्वत-गुहायां नियुक्तः । अहमङ्कागतसत्ववृत्तिरस्मि । तदियं धेनुर्बहुकालानन्तरमत्र समागता मम पारणा भविष्यति । अतस्त्वं लज्जां विहाय निवर्तस्व ! नात्र ते परिवादः । अत्र दैवकार्ये शस्त्राणां पौरुषस्य च प्रभावो नास्ति ।"

इति सिंहस्य वचनं श्रुत्वा राजा लज्जां तत्याज । जगाद च हे सिंह! यद्यपि मदुक्तं हास्यं भवेत् तथापि वाच्यम् । यतो भवान् सर्वेषां हृदयस्याभिप्रायं जानासि, अतो वदामि । सः खलु शिवो मे मान्यः, इदमपि च गुरोर्धनं नेत्राणां समक्षं विनश्यन्नोपेक्षणीयं भवति, अतस्त्वमिमां वराकीं त्यज ! मम शरीरेण स्व-शरीरवृत्तिं निर्वर्तयस्व । तत्स्थाने मां मेव भुङ्क्ष्व ।"

ततःसिंहः प्रत्युवाच—

"हेनृप! एकातपत्रं जगतः प्रभुत्वम्, नवं वयः, इदं सुन्दरं शरीरञ्चेति, एकस्या धेनोः कृते एतत्सर्वं त्यक्तुमिच्छन् भवान् विवेक-विकलोऽसीति प्रतीयते। त्वं हि कोटिशः घटोध्नीः गाः दत्वा अस्याः क्षतिं पूरयिष्यसि। परन्तु त्वन्तु जगतामधीश्वरः, तव विनाशे जगतः सर्वस्वं विनष्टं स्यात्। तत्स्वदेहं रक्ष। इमां जहीहि।"

ततो नन्दिन्या कातरतया निरीक्ष्यमाणो दिलीपः पुनरुवाच—

"अयि मृगाधिराज! क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः। राज्येन किं तद्विपरीतवृत्तेः प्राणरुपक्रोशमलीमसैर्वा। इयं खलु न सामान्या गौः। इयं कामधेनोः सुता कामधेनुरेव। न साधारणा हिंस्रा एनामाक्रमितुं शक्नुवन्ति। त्वया तु शिवप्रभावेणास्यां प्रहृतम्। तदहमस्या निष्क्रयेण स्वदेहं ददामि। एवं तव पारणा विहता न स्यात्, मुनेश्च क्रियार्थो न लुप्तः स्यात्। परवान् भवानपि जानाति यत् रक्षकः स्वयमक्षतो नियोक्तुरग्रे रक्ष्यं विनाश्य न स्थातुमर्हति। एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु-इति त्वं मे प्रणयं स्वीकुरु।"

इत्युक्त्वा दिलीप आमिषस्य पिण्डमिव स्वदेहं हरये समुपानयत्। ततश्च तस्य अवाङ्मुखस्योपरि विद्याधर-हस्तमुक्ता पुष्प-वृष्टिः पपात।

ततश्च—

"उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्। ददर्श राजा जननी मिव स्वां गामग्रतः प्रस्रविणीं न सिंहम्।"

तदनन्तरं प्रीता नन्दिनी तस्मै वरप्रदानमकरोत्। कृतार्थो राजा तया सह वनान्तादाश्रममागत्य गुरवे सुदक्षिणायै च वरप्रदानवृत्तान्तं निवेद्यामन्दानन्दमविन्दत।

—:०:—

श्रीभारतगुणसंवर्द्धना।

'ग़ज़ल' गीतिः [रेख़्ता]

अहो श्रीभारताभिख्योऽतिमुख्यो दिव्यदेशोऽयम।
अपि ध्यायेत्सुरेशो यं स भूमेः संनिवेशोऽयम्॥
जगज्जीवातवे जाताऽनुयाता जाह्नवी यस्मिन्।
प्रसर्पत्पुण्यपीयूष-प्रवेशो भू-प्रदेशोऽयम्॥ १॥
त्रिलोकाधीश्वरो यस्मिन् हरो वाराणसी-वासी।
प्रहासी स्वर्गसौख्यानां विभासी भूनिवेशोऽयम्॥२॥
हरिर्यस्मिन् बहून् वारान्समादध्रेऽवतारांस्तान्।
ध्रुवं मन्ये महिम्ना नाकलोकस्यापदेशोऽयम्॥ ३॥
अमुष्मिन्वर्द्धितानन्दो मुकुन्दो मोदमातेने।
तदीयाऽलङ्घ्यलीलाभिर्विलीनाऽलीक-लेशोऽयम्॥४॥
हिमाद्रिः प्रोन्नते मौलौ चकासच्चामरं धत्ते।
उदन्वद्धौतपादाग्रो नरेशानां नरेशोऽयम्॥ ५॥
विराजत्कुङ्कुमक्षेत्रे विजैत्रोऽशेषदेशानाम्।
स वै काश्मीरदेशोऽस्मिन् समिन्धे स्वर्गशेषोऽयम॥६॥

महिमद्वारा स्वर्गलोकस्य व्यपदेश इत्यर्थः॥३ अलीकम् पातकम्॥४ अस्य देशस्य उन्नते मस्तके। हिमाद्रिः चामरं धत्ते। राजचिह्नमेतेन॥५ विराजन्ति कुङ्कुमक्षेत्राणि ('केसरके खेत') यस्मिन्। शोभया सर्वदेशानां विजेता। समिन्धे दीप्यते कद्॥६

कला-विद्या-गृहं यस्मिन् जयाद्यं तत्पुरं रम्यम् ।
स धीमान्मानसिंहाख्योऽधितिष्ठत्यम्बरेशोऽयम् ॥७॥
ध्रियन्तेऽस्मिन्निधिप्रख्याः सुविख्याता अमी वेदाः ।
भृशं भूमण्डले ख्यातोऽवदातो यन्निदेशोऽयम् ॥८॥
अमुष्मिन्नुष्णशीताद्याः प्रतीताः स्युर्यथाकालम् ।
अहो क्रीडास्थलं देव्याः प्रकृत्याः पुण्यवेषोऽयम् ॥९॥
भृतो नानाविधैर्धान्यैः किलान्यैर्यानि नीयन्ते ।
अहो सर्वानुजीव्यानन्तसंपत्संप्रवेशोऽयम् ॥ १० ॥
रसालाद्योटनारङ्गाऽम्बुजद्राक्षेक्षुजम्बीरम् ।
फलं यस्मिन्नलं सिध्येत्स कश्चिद्भूविशेषोऽयम् ॥११॥
खनिभ्यो हीरकं सूते, प्रभूतेलासनाथोऽयम् ।
ध्रुवं नानाऽऽकराधीशो धनेशानां धनेशोऽयम् ॥१२॥
अमुष्मिन्नेव सर्वादौ दिदीपे ज्ञानदीपोऽयम् ।
सदा ह्यध्यात्मविद्यायां बुधानां श्मश्रुकेशोऽयम् ॥१३॥
हिमाद्रिर्मस्तकम्, बाहू इमौ पूर्वापरौ देशौ ।
हृदा ध्येयाङ्गसंस्थानं दधानोऽस्मत्परेशोऽयम् ॥१४॥
हिमाद्रौ मस्तके गङ्गा, भुजङ्गा भूरि जृम्भन्ते ।
सदा धर्मानुयातोऽवदातो व्योमकेशोऽयम् ॥१५॥

जयाद्यं पुरं जयपुरम् । आम्बेर राजधान्याः ईशः ॥७ अवदातः पवित्रः । येषां वेदानां निदेशः (आज्ञा)॥८ सर्वैर्वेदैः अनुजीव्यः अनन्तः संपत्प्रवेशो यस्य ॥९॥ अन्नादिकं फलं यस्मिन् पर्याप्तम् उत्पद्येत, सोऽनिर्वचनीयो भूविशेषः ॥११ प्रभूता या इला (पृथिवी) तत्सनाथः । विस्तृत इत्यर्थः । नानाविधानाम् लोह-भौमाङ्गारसर्मराद्याकराणाम् (खनीनाम्) अधीशः ॥१२ श्मश्रुकेशः ('मूछों का बाल') । लोकोक्त्य-लङ्कारः ॥१३ वङ्गादिः पूर्वदेशः, सिन्ध्वादिः पश्चिमदेशश्चेति द्वाविमौ बाहू परेशः परमेश्वरः ॥१४

हिमाद्रिरूपे मस्तके गङ्गा भातीति व्यस्तरूपकम् भुजङ्गा देशोत्सादकाः सर्पाः धर्मानुगामी, व्योमकेशस्तु धर्मेण वृषेण अनुयातः । शुद्धाङ्गः, श्वेताङ्गश्च । व्योमकेशः शिवः ॥१९

कियद्व गीतानि गायामो न तृप्यामो गुणैः, किन्तु ।
करेणाऽऽपाद्यतेदानीं स्वदेशो हा विदेशोऽयम् ॥१६॥
सखे ! हे मञ्जुनाथालं मुधा मा यापयेः कालम् ।
अहो ते संस्कृतोपेनो न रोचेतोपदेशोऽयम् ॥ १७ ॥

—भट्ट श्रीमथुरानाथ शास्त्री [*साहित्याचार्यः*]

['संस्कृतरत्नाकरस्य भूतपूर्वः संयुक्त-सम्पादकः]

जयपुरम् ।

समस्यापूर्त्तिः ।

त्वमधुनाऽसि कथं मलिनानना ।
कथय मानमदोन्नतमानसे !
नयन-गोचरतां क्वचिदञ्चिता ।
"कमलिनी मलिनी कमलाकरे" ॥१॥
सरसि लोलमरालकुले भ्रमद्—
भ्रमर-पुञ्ज-सुगुञ्जन-मञ्जुले ॥
विधिवशादहहाऽस्तमुपागते
"कमलिनी मलिनी कमलाकरे" ॥२॥

—श्रीभूपनारायण झा ।

जनैः करेण स्वहस्तेन, स्वदेशोऽप्ययं विदेशः आपाद्यत (लङ्) विहितः । तथात्रष्टीयते सर्वैः यथा विदेशवदस्माकं स्थितिः स्यादित्याशयः । करेण राजदेयद्रव्येण प्रियोऽस्माकं स्वदेशोऽपि विदेश इदानीं जात इति त्वर्थो नास्ति । ॥१६

सुप्रभात-ग्राहकैः पत्रलेखनावसरे ग्राहकसङ्ख्या नूनं लेखनीया । सम्पादकीयपत्रेषु च पूर्णः स्व-सङ्केतो लेख्यः । —व्यवस्थापकः ।

मद्रास–भारतीयमहासभा ।

हिन्दूयवनैक्यस्य अपूर्व दृश्यम् ।

श्रीमालवीयचरणेषु अलीमहम्मदस्य मस्तकम् ।

महादेव शास्त्री, पाण्डेय ।

मद्रासे भारतमहासभा-साफल्ये गान्धीमहात्मनो विचाराः ।

गान्धीमहोदयोऽद्य सायंकालेऽत्र समागतः । मद्रासे भारतमहासमायाः सम्बन्धे "डेलीमेल" पत्रप्रतिनिधेः प्रश्ने महात्मना उक्तं यत्, मद्रासमहासभया हिन्दूयवनैक्यस्य शिलान्यासः कृतः । अतएव वक्तुं शक्यते, यत्, भारतमहासमितेरिदमधिवेशनमपूर्वं साफल्यमलभत । प्रस्तावदृष्ट्या मया नेदमुच्यते किन्तु प्रस्तावा येन प्रकारेण उपस्थाप्य स्वीकृताः तद्बुद्ध्वा इदमुच्यते । हिन्दूयवनैक्यसम्बन्धिनि प्रस्तावे भाषमाणेन पण्डितमदनमोहनमालवीयेन ये भावाः प्रकटितः, तत्र च अलीबन्धुभ्यां यथा आदरः प्रदर्शितः तत्सर्वं भाविशुभलक्षणम् । मालवीयमहोदयैर्भाषणे परिसमापिते मान्यालीमहम्मदो हर्षातिरेकेण तदीयचरणयोः पपात—मौ० अलीशौकतश्च तालवृन्तं चालयामास । तदानीं सभायामनुपस्थानात् तदपूर्वदृश्यावलोकनस्य मम सौभाग्यं नाभूत् । परन्तु राष्ट्रपतिः डा० अन्सारी तद्दृश्यवर्णनं माम् अश्रावयद् । यतो मम महान्प्रमोदो जातः, मन्मनसि च बृहती बृहती आशा समुद्भवत् । अहं सम्भावयामि यद् परस्परस्नेहस्य सद्भावाः समस्ते भारतवर्षे प्रसरेयुः, सर्वेषु दलेषु च आदरपात्रं भवेयुः । एतदपूर्वभावोत्पत्तिहेतोः डा० अन्सारी श्री श्रीनिवास ऐयंगरश्च भारतस्य कृतज्ञताभाजने स्तः ।

पूर्णस्वतन्त्रतायाः प्रस्तावः ।

प्रतिनिधेः प्रश्ने यत् पूर्णस्वतन्त्रताप्रस्तावे विचारस्य समये महासभायां भवान् किमिति नोपातिष्ठत ? महात्मना उक्तं यत् स्वास्थ्यस्य असौष्ठवात् कस्यांचिदपि सभायां ममोपस्थानं न सम्भूतमासीत् । चिकित्सकैर्मित्रैश्च मद्रासमहासभायां मम गमनं निषिद्धं [illegible] । परन्तु [illegible] अहं तदभिप्रायेणैव महासभामागतो यत् महासभाया यथाशक्ति साहाय्यमाचरेयम् ।

अस्मिन्प्रश्ने यत् पूर्णस्वाधीनताप्रस्तावं भवान् न समर्थयते ? महात्मा अवोचत्, यत् अहं न समर्थये परन्तु एवमाचरणस्य नायं हेतुर्यत्तत्प्रस्तावविरोधिनः कथयन्ति । गतवर्षे पूर्णस्वाधीनतायाः प्रस्तावः उपस्थापितः, तदानीमेव मया तत्समर्थनाभावस्य कारणमुक्तम् । मद्वचनस्य अर्थो नायं बोध्यः, यदहं भारतवर्षं पूर्णस्वाधीनतायोग्यं न मानयामि । 'भारतवर्षं पूर्णस्वाधीनतायोग्यम् अद्यापि नास्ति' अयं विचारो मे मनसि कदापि उत्पन्न एव न भवति ।

* * * *

हिन्दूयवनानामेकता ।

मालवीयमहोदयस्य गौरवपूर्णं भाषणम् ।

साधारणतया जनताधारणा इयमेव वर्तते यन्महासभायां पण्डित मदनमोहन मालवीय-भाषणेनैव हिन्दूयवनैकताप्रस्तावस्य विरोधा अवरुद्धाः । पण्डितवर्यस्य भाषणप्रभाव इयान् मौ० अलीमहम्मदस्योपरि पतितः । यतः तत्रभवता इदं भाषणमद्भुतमभिहितं गौराङ्गेभ्यश्चैतद्वक्तुमारब्धं यद्भारते अल्पसंख्यकानां रक्षकः पण्डित मदनमोहनमालवीयोऽस्ति ।

पण्डितवर्यः स्वभाषणे उक्तवान्—भवद्भिः एतत्प्रस्तावसम्बन्धे बहु श्रुतम् । अहमपि एकं द्वे वा वचः भवद्भ्यः कथयिष्यामि । अस्य प्रस्तावस्य उद्देश्यं मतभेदनिवर्त्तनम्, विरोधप्रशमनम् सम्भूय स्वराज्यपथप्रवर्त्तनं चास्ति । पृथग्निर्वाचनस्य वार्त्ता परित्यक्ता । अहं श्रीगौरीशङ्करमिश्रेण एकमतोऽस्मि

इच्छामि च विशेषप्रतिनिधित्वपरित्यागम् । वयं सर्वप्रयत्नेन सहयोगं करिष्यामः, अन्ततश्च मतविभेदे उपस्थिते तं निवारयिष्यामः । हिन्दुयवनैक्यव्यवस्थापक सभाया एकप्रतिनिधिनिर्वाचने उत्सुकता प्रकटनीया । स प्रतिनिधिः हिन्दुः, यवनः, पारसीकः ईसवीयभारतीयो एव वा किं न भवतु स इदमेव विचारयतु, यद्, अहं भारतीयोऽस्मि, मया भारतस्य आवश्यकता पूरणीया । इति

प्रस्तावे उक्तमस्ति यदुत्तरपश्चिमसीमाप्रान्ते न्यायकार्यं तथैव भवतु, यथा अन्यप्रान्तेषु भवति । भाषाभेदमाश्रित्य प्रान्तसंघटनविषये केवलमेतदेव कथितं यत् प्रान्तस्तदैव पृथक क्रियेत; यदा प्रान्तनिवासिनस्तथा अभिलषन्ति । देशस्य आर्थिकदृष्ट्यैव प्रान्तस्य विभागो भवितुमर्हति । ईदृगवस्थायां महासभा प्रान्त-विभागे न विरुद्धा भविष्यन्ति ।

हिन्दूयवनैकतासम्बन्धे महात्मना कथितं यत्, हिन्दवो यवनमन्दिरसमक्षं वाद्यानि न वादयन्तु, यवनाश्च गोवधं मा कुर्वन्तु । यवनाः कथयन्ति अस्माकं गोवधे अधिकारोऽस्ति । गतसहस्रवर्षस्य इतिहासः कथयति यत्, गोवधेन हिन्दूहृदयानि प्राणान्तपीडामनुभवन्ति । कश्मीरस्य एकनरेशः गोवधमन्याय्यमकथयत् । बाबरेण वसीयतनामपत्रे एवमेव लिखितम् । सा नीतिः यावद् अकबरराज्यसमयं कार्ये परिणता, परन्तु यदाप्रभृति लण्डननिवासिनाम् आगमनं तदाप्रभृति भारते प्रचुर गोवधप्रचार अवर्द्धत । गोवधविषये यवनैर्हिन्दुभावानाम्, यवनमन्दिरेषु वाद्यविषये हिन्दुभिः यवनभावानाम्, समादरः कर्त्तव्यः । एवमनुष्ठिते गोवधस्तत्फलीभूतो हिन्दूयवनविरोधश्च ध्रुवम् उन्मूलितौ भवेताम् ।

यवना वाञ्छन्ति यत्तेषां जमायतीनमाजसमये विघ्नो माभूत् । हिन्दुभिस्तदिच्छाया आदरः करणीयः । गोवधस्य यवनमन्दिरसमक्षं वाद्यवादनस्य च निरोधाय न्यायालयशरणाश्रयणं लोष्ठलगुडादिप्रहारो वा निषेध्य एव भवतु । अयं प्रस्तावः अस्मान् एकपदमग्रे वर्द्धयति । न्यायालया अस्माकं वास्तविकीं सहायतां नाचरन्ति, किन्तु ते पर्यायेण जातिद्वयस्य साहायकं कृत्वा केवलं विभेदं जनयन्ति ।

यदा प्रभृति शासनसुधारः समारब्धः तदाप्रभृति केचन लोका इमान् विरोधान् महतीं काष्ठामारोप्य वर्णयन्ति । ते इदं वक्तुमिच्छन्ति यद् वयं परस्परमेव कलहायामहे स्वराज्ययोग्या न स्मः । अस्माभिरल्पाल्पमतभेदा नैव कर्त्तव्याः । अस्माभिः स समयो ध्येयः, यदा आस्माकीनाः पोताः, आस्माकैरेव लोकैः संचाल्यमानाः, अस्मदीयाः पताकाः स्फारयन्तः, भारतमहासागरे विचरिष्यन्ति । वयमिच्छामो यत् अस्माकं स्वकीया सेना भवतु, यत्र अस्मदीया एव मनुष्याः सेनापतयः सेनाधिपतयश्च भवन्तु । वयमिच्छामः, यत् अस्मद्देशविभागे पारेसप्तसमुद्रं पारेत्रयोदशसरिच्च मनुष्या न प्रविशन्तु । वयमिच्छामः, यत् व्यापारेषु, राजनीतिषु, जलसेनासु, स्थलसेनासु प्रत्येकं कार्येषु च भारतीया एव भवन्तु । इदं सर्वम् एकेन सम्प्रदायेन साधयितुं दुःशकम् इति सम्भूय सर्वैः सम्प्रदायैः साधयितव्यम् । डा० अनसारी सेनापतिर्भवितुं शक्नोति, मदनमोहनमालवीयश्च शिक्षासचिवो भवितुं शक्नोति । देशे प्रेम शान्तिश्च भविष्यति, हिन्दवो यवनाश्च एकस्यैव ईश्वरस्य उपासकाः । ते एकस्या एव भारतमातुः सन्ततयः । मुष्टिपरिमाणा गौराङ्गाः क्रोशत्रिसहस्राद् दूराद् आगत्य अस्मान् शासति । भवद्भिरेष कलङ्कः प्रक्षाल्य प्रोन्मूलनीयः । यदि हिन्दवो, यवना ईसवीयभारतीयाश्च सर्वे सम्भूय एकमतीभवन्तु यत् सर्वेषाम् एक एवेश्वरः अस्ति, सर्वेषाम् एकैव माता भरतमाता तर्हि लण्डनसमाजे एतावती शक्तिर्नास्ति यद् एकमासमपि अस्माकमुपरि शासनं कुर्यात् ।

*　　*　　*　　*

भारतमहासभायाः सफलता ।

डा० अनसारिणो विचाराः ।

देशदुर्लभदृश्यदर्शनम् ।

डा० अनसारिणा भारतमहासभाकार्यसम्बन्धे असोसिएटेड-मुद्रणालय प्रतिनिधिप्रश्ने राष्ट्रपतित्वेन स्वीया विचाराः प्रकटिताः । यद्यपि तेषां वदने कार्याधिक्यश्रान्तिसूचकानि चिह्नानि दृश्यन्तेस्म, तथापि ते प्रसन्नचेतस आसन् । तैः स्वप्रकाशमानमुखेन कथितम्—

अस्माभिस्तत्प्राप्तं यत्, सन्देहवादिनः असम्भवं वर्णयन्तिस्म । मया तदभूतपूर्वं दृश्यं कदापि न विस्मर्येत, यत्र सर्वसम्प्रदायानां विंशतिः सहस्रामिताः सत्या भारतीया एकीभूय

सम्प्रदायकलहं प्रशमयितुं स्वीयं निर्णयं घोषितवन्तः, येन अद्यत्वेऽपि अस्माकं मातृभूमिर्मलिनीकृता। एकतायाः प्रस्ताव इतरप्रस्तावानुसारं न केवलं स्वीकृतः, किन्तु यदा स स्वीकृतः, तद् वातावरणम् अदृश्यत तदा यद् अद्यत्वे दुर्लभो बोभूयते। इदं विलोक्य अस्माकं बहवो निराशावादिनो विश्वस्युर्यत्, साइमनकमीशननियुक्तिद्वारा भारतस्य योऽपमानः कृतः, तद्विरोधे अयं प्रस्तावः वस्तुतो राष्ट्रनिश्चय आसीत्। सम्राड्-अमानुल्लाखानस्य अस्मद्देशे आगमनसमयस्य हार्दिकं क्षोभकं च भाषणं, साधुचरितस्य गान्धीमहात्मनः प्रभावः, श्रीश्रीनिवासैयंगरस्य स्फूर्त्तिः, भारतीयस्वाधीनतायै महद् युद्धं कुर्वाणस्य पण्डित मदनमोहनमालवीयस्य देशभक्तिः, तथा तेषामेकतासम्बन्धिनी गौरवपूर्णा वक्तृता च सर्वमिदं सहनशीलतायाः सद्भावस्य च सत्यं वातावरणमुत्पादयितुं संजघटे।

अस्माभिः साधु सम्यक्प्रकारेण आरम्भः कृतः, परन्तु विगताभिः कियतीभिर्दुर्घटनाभिर्जनितं विभेदं पूर्णतः प्रशमयितुं बहुकर्त्तुमवशिष्टम्। महासभया शान्त्यर्थं अमूल्योऽयमवसरः प्रदत्तः। ततोऽस्माभिर्लाभो ग्रहीतव्यः। अहं प्रत्येकं भारतीयं प्रार्थये, यत् स समस्तसाम्प्रदायिकेषु एकतां जनयितुं स्वकर्त्तव्यं जानातु, देशस्य सर्वस्मिन् राजनीतिककार्ये एकताया इदमपूर्वमुदाहरणं समक्षमादधातु। अहमाशासे, यद् वयं साइमनकमीशनबहिष्कारसफलतायै देशार्थम् पृथक्शासनयोजनायै च समर्थयामहे; या सर्वस्य देशवासिनः प्रार्थनां पूरयिष्यति। अहं पूर्णाशया उत्साहेन परावर्त्ते अहं विश्वसिमि, यत्, अग्रिमं वर्षं अस्माकं देशस्य इतिहासदृष्ट्या महत्वपूर्णं भविष्यति, महासभा चेदं स्मरणीयं विधास्यति।

—:०:—

सुप्रभातस्य विशिष्टाङ्कः।

सुप्रभातस्य चतुर्थवर्षीया प्रथमसंख्या विशिष्टाङ्क रूपेण प्रकाशिता भविष्यति। एतस्मिन् विशेषाङ्के त्रिवर्णचित्राणि, साधारणचित्राणि, प्रचुराणि पत्राणि च भविष्यन्ति। लेखाश्च महतां विदुषां स्थास्यन्ति। एष समारम्भो सर्वथा-नवीन एव। एतस्य व्ययो न्यूनतः २५०) मुद्रामितः स्यात्। एतदायोजनस्य भारः सुप्रभात-पाठकानां सहृदयतामेवावलम्बते। तैर्यथाशक्ति प्रत्येकं सर्वविधं साहाय्यं प्रेषणीयम्।

—व्यवस्थापकः

सम्पादकीयम्।

वाद्य-प्रश्नः।

मद्रासनगरे राष्ट्रिय-महासभाया वार्षिकमहोत्सवे हिन्दूनां यवनानाञ्च स्नेह-सम्बन्धस्य सुदृढीकरणाय माननीयैर्गान्धि-मालवीय प्रभृतिभिर्निश्चितं यत्, यवना गोवधं त्यजन्तु, हिन्दवश्च तन्मन्दिराणामग्रे वाद्य-वादनं माकुर्युरिति। सर्वैरप्येष प्रस्तावो मालवीय-महोदयानामाग्रहेण स्वीकृतः। माननीयैर्मालवीय-महोदयैश्च गान्धिवत् चतुर्विंशतिमासाभ्यन्तरे स्वराज्यप्राप्तिरुद्घोषिता। अत्रास्माकमल्पज्ञानां संस्कृतज्ञानां विचार-प्रहसनं न शोभते, तथापि वयमनुमिनुमः, यत्, राजकीय-सङ्घस्य (रायलकमीशन) महति विप्लवे देशकार्यसम्पादनाय नेतारः कुर्वन्तु नाम सभा-मञ्चे प्रेमाभिनयम्; परं 'प्राप्ते वसन्तसमये काकः काकः, पिकः पिक' एव भविष्यति। नाद्यावधि यवनमन्दिराणां सविधे वाद्यवादनस्य प्रतिबन्धः कदापि समाकर्णित आसीत्। तच्च हिन्दूनां देशे हिन्दूनां कर्तव्यमेव। तत्र यदि विधर्माणः कामप्यापत्तिमाचरेयुस्तदा सुखमाचरन्तु। हन्त! किमल्पसङ्ख्यकानाम्, स्वं विदेशीयं मन्यमानानाम्, दरिद्राणां यवनानां भिया वयं स्वदेशेऽपि स्वीयान् महोत्सवानवरोत्स्यामः? अन्येषु देशेषु स्वल्पसङ्ख्यका वैदेशिका यथा निवसन्ति, तथैव निव-

सन्तु नाम मोहम्मदा अस्माकं देशे । अस्माकं देशे, अस्माकं रक्तैः पुष्टानां दरिद्राणां दासानां वर्वराणामस्माकमुपरि निर्भयं मूर्खताप्रयुक्तश्च शासनं स्याच्चेदस्माकं हिन्दूनां जनिरेव व्यर्था । यदा वयं सर्वतः सर्वथा च समुन्नतिमारूढाना आङ्ग्लानां हस्तात् स्वं देशमाक्रष्टुमीहामहे, तदा के नाम मुष्टिमेया दासप्राया यवनाः ! अस्माभिस्तु भारते सर्वेषां भारत-प्रवासिनां विधर्मिणामुपरि आश्रयत्वेन पोषकत्वेन च स्थातव्यम् । वयम्; अस्माकं देशः, अस्माकं धनम्, सर्वं हिन्दूनां विद्यते। ये तावदस्माकं छत्रच्छायायां निवसन्ति ते मोहम्मद-पारसीक-ईसवीय-धर्मावलम्बिनोऽस्माकमुपजीव्याः । त एव यदि हिन्दूनामुपरि शासनं कुर्वन्ति चेत् कृतं स्वाराज्य-योग्यतया । मोहम्मदीयैरीशवीयैः पारसीकै भारतीयैर्हिन्दूभिः सह तथा स्थातव्यम्; यथा अन्येषूपनिवेशेषु वैदेशिका स्तिष्ठन्ति । हिन्दवस्तु स्वोपजीविनां सर्वासां स्वल्पसंख्यकानां जातीनां प्रेम्णा, धनेन, अन्यैश्च प्रकारैः पोषणं कुर्वन्ति, ते तु दुष्टाः विषमुद्गिरन्तीति राजनीतिकदृष्ट्या, नैतिकदृष्ट्या, सामाजिकदृष्ट्या च हिन्दूनां कृते नितरां हानिजनकम् । अस्माभिस्तु सर्वेषामेव स्वतन्त्रदेशानां पुरः सर्वेषां विधर्मिणां स्वाङ्गेषु निवेशनं कृत्वा, केवलं हिन्दुत्वेनावस्थातव्यम् । तदा हिन्दूनां नैतिकी योग्यता समस्तेऽपि भूमण्डले प्रत्यक्षं प्रतीयेत । अत्रतु वयं स्वजन्मसिद्धमधिकारं त्यक्त्वा सहजशत्रूणां यवनानां चाटुकारा भवामः इति न कदापि कल्याणकरमस्माकमिति सुधीरं विवेचनीयोऽयं प्रश्नः ।

* * * *

गोवध-निषेधः ।

गोवध-निषेध विषये माननीयैर्मालवीयमहोदयैर्यवनाः प्रार्थिताः, यत्ते 'गोवधं मा कुर्वन्तु' । एकतः ख्वाजाहसननिजामी प्रभृतयो बहवो गोवधप्रचाराय सततं प्रयतन्ते,अन्यतो मालवीय-महोदयाः पञ्चष-यवनानां विश्वासेन गोवधनिषेधं कुर्वन्ति । हिन्दवस्तु पूज्यपादानां मालवीय-महोदयानामाज्ञया वाद्यं न वादयिष्यन्ति, परन्तु यवनाः मोहम्मद-अली प्रभृतिनां कथनेन न गोवधं रोत्स्यन्ति । प्रत्युत ख्वाजाप्रभृतीनां कथनेन विशिष्टतया करिष्यन्ति । एतेनास्माकं हानिरेव भविष्यति । गोवधस्य निषेधोऽपि न भविष्यति । यवनास्तु निभृतं शून्यमन्दिरेषु सुखं स्वच्छन्दं गोवधं करिष्यन्त्येव, परन्तु वराका हिन्दव एव वाद्यं वादयितुं न प्रभविष्यन्तीति प्रत्यक्षं प्रतीयते । दैववशात् यदि यवनाः गोवधं त्यक्ष्यन्त्यपि, तदापि आङ्ग्लास्तु करिष्यन्त्येव । यवनास्तु स्वल्पमेव गोवधं कुर्वन्ति, आधिक्येन तु आँग्ला एव । एवं स्थिते नैतावता कार्यं सेत्स्यति । गोवधविषये प्रान्तीयासु व्यवस्थासभासु, प्रधान-व्यवस्थासभायाञ्च हिन्दुभिर्यवनैश्च मिलित्वा प्रस्तावाः स्वीकारयितव्याः, यत्, "दुग्धेन घृतेन च विना भारतीयानां पुंस्त्वमेव शनैः शनैर्व्यपगच्छति । बालाः, युवानश्च प्रत्यहं क्षीणतां भजन्ते । भारतीयं सर्वस्वं कृषि र्हि नाम गवां विना न भविष्यति चेद्, वयं बुभुक्षिता एव मरिष्याम इति भारते स्वास्थ्यदृष्ट्या, आर्थिकया च दृष्ट्या सर्वथा गवां संरक्षणं विधेयम् ।" भारते गोवध एव न स्यादितिराजकीयनियम एव भवेत् । भारतीयं स्वास्थ्यं गवां संरक्षणेन,

सम्बर्द्धनेन च स्यादिति गोचिकित्सा-शास्त्रस्य गोपालन-पद्धतेश्च प्रचाराय महानारम्भो विधेय इति । यदि सर्वेऽपि भारतीया व्यवस्थासभासु ऐकमत्येन प्रस्तावमिमं सन्निवेशयेयुः, सर्वत्र भारते सर्वधर्मिणाञ्च महदान्दोलनं कुर्युश्चेत् गोरक्षा भवितुमर्हन्ति । नो चेत् प्रस्तावैर्भाषणैर्वा गोवध-निषेधो दुर्वार एव ।

*　　*　　*　　*

हिन्दू सम्मेलनम् ।

तत्रैव कांग्रेसनगरे हिन्दूमहासभाया हिन्दूसम्मेलनं माननीयानां श्रीमतां मालवीय-महोदयानां सभापतित्वे सम्पन्नम् । तत्र च महामान्यानां मालवीयानामयं निदेशो नितरां स्पृहणीयः, समादरणीयः, समाचरणीयश्चासीत्, यत्, हिन्दुभि र्हिन्दूधर्म प्रचाराय ईशवीय-प्रचारकाणां (पादरी) नीतिरवलम्बनीया । धार्मिक-प्रचाराय यादृशी नीतिः साम्प्रतमीशवीयानां विद्यते, तादृशी न कुत्रापि । ईशवीयैः प्रचारकैः शतवर्षाभ्यन्तरे शान्त्या धर्म-प्रचारः कृतः, तथा च साफल्यमनुभूतं यथा नान्येन केनापि । आर्यसमाजस्य संस्थापनमेतेषामेव निरोधायाभूत्, परन्तु नाद्यावधि यत्रकुत्राऽपीशवीयधर्मप्रचारकाणामन्यधर्मिभिः सह विवादोऽपि श्रुतः । तैः शतवर्षाभ्यन्तरे निभृतं शनैश्च यावत् साफल्यं लब्धम्, तावत्सप्तशतवर्षाभ्यन्तरे यवननृपतिभिरत्याचारेण, भयानकैश्चोपायैर्न प्राप्तमासीदिति प्रत्यक्षमेव । परमेतस्य कृते तादृशा एव ब्राह्मणाः, सन्यासिनश्चापेक्ष्यन्ते ये खिष्टधर्मप्रचारकाणामिव, सहनशीलाः, सदाचाराः, स्वधर्म-दृढव्रताः, स्निग्धहृदयाः, तितीक्षवश्च स्युः । नोचेदनर्थ एव । एतादृशस्य हिन्दूसङ्घस्य (हिन्दू-मिशन) संस्थापनाय सुधीरमालोचनीयम् । तस्य नियमाश्च पालनीयाः, सुदृढाः, सत्याश्च स्युः । धर्म-प्रचाराय व्ययश्च प्रचुरः स्यात् । यत्रतत्रत्यानां शुद्धिसभा-हिन्दूसभाप्रभृतीनां विविधानां सभानामेकीकरणं विधाय प्रतिनगरं प्रति ग्रामं हिन्दूसङ्घस्यैव (Hindu Mission) संस्थापनं स्यात् । सर्वेषां सङ्घानां सञ्चालन-प्रचारण-नियमनादिप्रकारः समान एव स्यात् । एकैव कार्यप्रणाली सर्वत्र समानं व्यवहृता भवेत्तदाकार्यमिदं सम्यक् प्रचलिष्यतीति सम्भाव्यते । अत्र सर्वैरपि प्रचारकैरवधेयम् ।

*　　*　　*　　*

यवन-सम्मेलनम् ।

दिसम्बरमासस्यान्तिमे सप्ताहे लवपुरे कालिकान्तानगर्याञ्च यवन-सम्मेलन-द्वयमभूत् । यवनेषु दलद्वयमभूत् । एके ते वर्तन्ते, ये खलु सर्वथा धर्मान्धाः साम्प्रदायिकता-पिशाचिनीग्रस्ताः, भारते यवनशासनं पुनरप्यानयितुमीहमानाः, चाटुकाराः शफी-मोहानी-प्रभृतयो यवननेतारः । अपरतश्च राष्ट्रवादिनो यवना अन्सारी-जिन्ना-मोहम्मदअलीप्रभृतयः । कलिकातायामस्य नवीनदलस्य सम्मेलनम्, लवपुरे च प्राचीनदलस्य जातम् । द्वयोरपि प्रस्तावास्तत्तद्भावानुरूपा एवासन् । यद्यपि यवनसमाजस्य कृते मतभेदोऽयं भयजनकस्तथापि हिन्दूनां कृते राष्ट्रिय-हितदृष्ट्याऽपि दलद्वयमिदं भयजनकम् । एवं द्वैधे संस्थापिते कांग्रेस-महासभायाः साफल्यं वैफल्ये परिणतं न स्यादिति विभीमः ।

*　　*　　*　　*

माघमासस्याङ्कोऽपि मुद्रितप्रायएव, सच यथासमयात् प्रागेव ग्राहकाणां सविधे प्रहीयेत । होलिकाङ्क कृते लेखकैः शिवरात्रितः प्रागेव लेखाः प्रेषणीयाः ।

सनातनधर्म महासभा ।

श्रीमतां माननीयानां मालवीय-महोदयानां प्रयत्नेन माघ-शुक्लैकादशीमारभ्य सप्तदिवसानि-यावत् प्रयागक्षेत्रे त्रिवेणीतटे सनातनधर्म-महासभायाः, सम्मेलनस्य च पुनः सङ्घटनाय, प्रतिनगरम्, प्रतिग्रामम् च सनातनधर्मसभा-शाखा-संस्थापनाय, सनातनधर्मिषु विलुप्तप्रायाणां धार्मिकभावनां पुनः समुद्बोधनाय महान् सभारम्भो भविष्यतीति विदितचरमेव स्यात् प्रायःपत्रपाठकानाम्।

एतस्य विशिष्टान् समाचारान् पुनः प्रकाशयिष्यामः। साम्प्रतमिदमेव वक्तव्यमस्ति यत्, ये सनातनधर्मानुयायिनां नेतारः सन्ति ब्राह्मणाः विद्वांसस्ते समुचित-साहाय्याभावेन चिरं भाग्यमाक्रोशमानाः सन्ति। साम्प्रतं ते सोत्साहं सभायां समेत्य सनातनधर्म-प्रचारे प्रवलं प्रयत्नं विधातुं बद्धपरिकरा भवन्तु।

अस्माकमालस्येनैवैतत्सर्वमधःपतनमभूत्। वयमभिलषामो यत् कश्चिदागत्यास्मान् प्रार्थयेत्, दद्यात्, दापयेत्, प्रशंसां कुर्यात्, कार्य्यञ्च कुर्य्यादिति। एतस्मादेव कारणात् पण्डितानां कार्यं न प्रचलति। साम्प्रतं कर्मयुगे स्व-हस्तेनैव सर्वं सम्पादनीयम्। अतएवाऽस्मिन्नवसरे सर्वैः संस्कृतज्ञैः सनातनधर्मावलम्बिभिः पक्षपातं मात्सर्यं च विहाय विशुद्धहृदयेन सनातनधर्मप्रचारोपायाश्चिन्तनीयाः, समाचरणीयाः प्रचारणीयाश्च। एतदेव ज्ञानस्य फलं यत्तस्य सर्वत्र वितरणम्, प्रचारश्च। अस्मिन् महति कार्ये सहस्रशः संस्कृतज्ञाः प्रचारकाः, कार्यकर्तारश्चापेक्ष्यन्ते। एतेन जीविका राहित्यं हि नाम महान् दोषोऽस्माकमपनीयेत। परस्परं प्रेम-सम्बन्धश्च सुदृढो भवेत्। हार्दिकी सङ्कीर्णता च दूरीभवेत्।

स्यादिति। मन्ये सुधा-सम्पादकाः समुचितं सूचयिष्यन्तीति।

सुधा ।

श्रावणमासात् 'नखलऊ'-नगरतः 'सुधा' नाम्नी सुन्दरी, सुवेषा, सुमनोहरा, सुरुचिपूर्णा, सुव्यवस्थिता, सु-वर्ण-सन्निहिता, सुप्रकाशिता हिन्दी मासिकी पत्रिका प्रकाश्यते। तस्याः प्रथमां विहाय, पञ्च सङ्ख्याः सादरं सस्पृहं सामोदं समवलोकिता सत्यं सुधा-स्वादमासदयन्तीति वक्तुं सर्वथा-समुत्सहामहे। एतस्याः सञ्चालकः स एव कर्मवीरः सुशिक्षितः श्रीदुलारेलालभार्गवमहाशयो वर्तते, यः पूर्वं माधुरीं सञ्चालयाञ्चकार। अस्याः सम्पादकौ-श्रीभार्गवमहाशयः श्रीरूपनारायण पाण्डेय महोदयश्च, इमावाश्विनेयौ हिन्दीसाहित्य-संसारं सुधां पाययितुं प्रवृत्तौ महतीं समाज-सेवां साहित्य-सेवाञ्च सम्पादयत इति परं प्रमोदमश्नुतेऽन्तरात्मा। यद्यपि व्यापारप्रचाराय महानारम्भोऽयमिति केचन महात्मानः प्रलपन्ति, परन्तु भोजनं विना न कोऽपि किमपि कर्तुं क्षमी! व्यापारस्य फलं समाज-सेवा, साहित्य-सेवा च। धनं विना कः किमपि कर्तुं प्रभविष्यति ?। अतोऽयं सर्वथा सभाजनीयः, समादरणीयश्च समारम्भः।

अस्या मुद्रणम्, प्रकाशनम्, लेख-सौष्ठवम्, चित्र-चातुर्यम् चेत्यादिकं सर्वं सुधा सममेव। श्रद्धेयानां आचार्य-श्रीरामावतारशर्म्ममहोदयानाम्, श्रीमतां सहृदय-धुरन्धराणां श्रीशालग्राम शास्त्रिमहोदयानाम्, श्रीरामदास गौड़ एम० ए० महोदयानां लेखाः विज्ञान-साहित्य-दर्शन-विषये परं महत्वमावहन्ति। अन्ये च लेखाः पठनीया भवन्ति, माधुरी-समुन्नतौ कृत-शक्तिव्ययानां सञ्चालकानां सत्वरमियती समुन्नतिः सभाजनीया वर्तते। अस्या मेकः "सुर-भारती" अथवा "संस्कृत-सुधा" नामकः कश्चन स्तम्भो नूनं भवेदिति सम्पादकान् प्रार्थयामः। यस्मिन् स्तम्भे संस्कृतकवीनां चरित्र-चित्रणम्, पुस्तकानां काव्यानामालोचनम्, अन्येषाञ्च संस्कृतसम्बन्धिविषयानां प्रकाशनमावश्यकं

कामनापञ्चकम् ।

१

मिलिन्द-महिला मदीय-हृदयाम्बुजस्यासि चेत्
सदा च रसना-सुधा-सरसिकारसा सारसी ।
विलोचन-चकोरयो र्विबुधवाणि ! वा चन्द्रिका
सुरेश-विभवे भवेऽपि मम नैव भावो भवेत् ॥

२

श्रुतौ तव मम श्रुतिर्यदि महोत्सवं मन्यते
तवैव वदनं मदीयवदनं ब्रूतं वेद वा ।
तवैव परिचर्यया भवति धर्मचर्याऽथवा
धनाधिप-धनाधिपत्यमपि धन्यतायै न मे ॥

३

त्वयव रमणीमुखेन्दु रमणीयता तन्यते
त्वया यदि कलीकृता सकलकालिका काकली ।
त्वया भुवि कुमारका अमरवाक् ! कुमारन्ति वा
न कश्चिदपि किञ्चन क्वचिदकिञ्चनोऽप्यर्थये ॥

४

त्वयीह कलयन्ति मे बहु कुतूहलं किङ्कराः
त्वदीय पद सेविकाऽस्त्यशिव-शारिका शारिका ।
तवाऽभ्यसनतः सुखी शुकति गामको वा शुकः
शिवाय न शिवं शिवां च मनसापि सम्मानये ॥

५

त्वमेव परिपठ्यसे निखिल-पाठशालासु चेत्
सभासु च मनीषिणामुत सभासु सम्भाष्यसे ।
त्वमेव यदि भारती भवसि भारती भारति !
स्वराज्यमपि सार्वभौम मयि ! नैव सम्भावये ॥

—श्रीईश्वरीदत्तः दौर्गादत्तिः

संस्कृत-समाचाराः ।

श्रीगीता जयन्ती ।

राजस्थानप्रान्तस्य प्रसिद्धे चूरू नगरे श्रीगीताजयन्ती महोत्सवो मार्गशीर्ष-शुक्लैकादश्यां विशाले श्रीगङ्गा मन्दिरे महता समारम्भेण सुसम्पन्नः समभूत् । उपस्थितिः प्राय एकसहस्रान्विताऽऽसीत् । सर्व प्रथमं चूरू नगरस्थ विद्याभास्कर–श्री पं० कन्हैयालाल शर्मढण्ढोपाह्वाः श्रीगीतापूजनमर्चनञ्च विदधुः । तत एतेषामेवविद्याव ा-वृद्धविद्धद्धुरीणानां गीताविषये निगूढं भाषणं समभवत् । पुनः जयपुरस्थसुप्रसिद्धवक्तृनेतृस्वामिनृसिंहदेवसरस्वती महोदयानाम् प्रभावशालि व्याख्यानं सिंहगर्जनमिव गातायाः कर्मयोग-विषये—एक वादनतश्चतुर्वादनपर्य्यन्तम् समजनि । पश्चात् प्रसाद वितरणानन्तरं महोत्सवो विसर्जितोऽभूत् ।

स० मंत्री, सनातन धर्म सभा, चूरू (बीकानेर) } श्रीवासुदेवजोशी

श्रीराजस्थान ऋषिकुल ब्रह्मचर्य्याश्रमः ।

श्रीराजस्थान-ऋषिकुल-ब्रह्मचर्य्याश्रमस्य नवमो वार्षिकोत्सवः आगामिन्याश्विनमासे शुक्लपक्ष ९-१०-११ तिथिषु भविष्यति । चैत्रे वैशाखे चात्रोष्मण आधिक्यात् वाह्यसज्जनानामुपस्थितिर्न सम्यग्भविष्यतीति परिवर्तनमिदमनुष्ठितम् । नूतनाः ब्रह्मचारिणस्तु चैत्र शु० १ ता० चैत्र शु० १५ पर्यन्तमेव प्रविष्टाः भविष्यन्ति । नूतनपाठ्यस्यारम्भोऽपि तदैव भविष्यति । ५ ब्राह्मणबालकाः, ५

श्री घनश्यामदास-विडला-महोदयस्य,

[एम० एल० ए०]

द्वीपान्तरात्परावृत्तौ-

अभिनन्दनम् ।

यत्कीर्तिं विशदां जगत्सु ललितां लोका विलोक्यातुलाम्,
चन्द्रालीमथवा मृणालपटलीं लोके स्थितां मन्वते ।
सध्ये भारत सर्थचिन्तनचणो हिन्दुत्व-संरक्षकः,
धर्म-ज्ञान-विशारदो विजयते सौभाग्यभूतो भुवः ॥
सुप्रातं नोऽजनि जनिमतां दर्शनीयो महीया-
नायातोऽयं नयनपदवीं मद्य पुण्यैः सुदीर्घैः ।
कीर्तिस्तम्भं सुदृढमतुलं तत्र देशे निखनन्
हिन्दूवीरः सुविदितयशाः श्रीघनश्यामदासः ।

श्री गोपिकाजनवृतो मुरमर्दनोऽसौ,
मान् यस्य सर्वजगतां तव शं विदध्यात् ।
घ स्यैव साम्यमधुना विकिरन् धनानि,
न श्याममेघसमतां लभतां कथञ्चित् ॥
श्या मोऽप्ययादवकुलोद्भव एष धीरो
म आपि दिग्वसनतामुपलभ्यते नो ।
दा सोऽपि भारतभुवोऽखिल-भारहर्ता
स न्तानवर्गसहितो भवताच्चिरायुः ॥
वि द्युन्निभो हि जडता भवतः शरीरे,
ड आप्यडो रिपुगणस्य च डो जयस्य ।
ला मार्थिनां भुवन-भूषण-कल्पवृक्षः
लोकत्रये विजयतां सह पुत्र-पौत्रैः ॥

दानापुर-संस्कृत-विद्यालयः,
दानापुर, (पटना) } —श्रीगिरिजानन्दमिश्रः

क्षत्रियबालकाः, ५ वैश्यबालकाश्च प्रवेद्यन्ते । मासिकं शुल्कं ८) रूप्यकाः भविष्यन्ति । त्वरितमेव प्रार्थना-पत्राणि प्रहीयन्ताम् स्वबालकान् प्रविवेशयिषुभिः ।

रतनगढ़ } अधिष्ठाता क्षेमचन्द्रः
बीकानेर } ऋषिकुल

अलवरनगरे सुप्रभातम् ।

शीतावकाशे दिसम्बरमासस्य २८ तमे दिवसे रणवीर-पाठशाला (हिन्दूविश्वविद्यालय) अध्यापकाः सुप्रभात-सम्पादकाः श्री केदारनाथशर्म्माणः सारस्वत-महोदयाः संस्कृत-महत्त्व-प्रचाराय सुप्रभात-प्रचाराय च अलवरनगरे समागमन् । तत्र च पूज्यपादानां योगिवर्य्याणां महात्मनां श्रीमथुरानाथ-महोदयानां प्रशान्त-पावने आश्रमे स्थितिमकुर्वन् । २६ तमे दिवसे श्रीजगन्नाथमन्दिरे सनातन-धर्म-सभाद्वारा तेषां भाषणमभूत् ।

सभायाञ्च सर्वेषामेव शिक्षितानामलवर निवासिनां स्थितिरासीत् । प्रधानराज-कर्मचारिणश्च समागता आसन् । प्रधानन्यायाध्यक्षाः (अपीलाएट) माननीय रामभद्रओझा एम० ए०, एल्० एल्० बी० महोदयानामुपस्थितिर्विशेषत आसीत् ।

प्रारम्भे राजपण्डितैः श्रीचन्द्रदत्तशास्त्रि-महानुभावैः प्रदत्ते सभापरिचये प्रधान व्याख्यातॄणां भाषणं ६ वादनतः ७½ वादनं यावत् समभूत् । व्याख्याने च सुप्रभात-सम्पादकेन संस्कृत भाषाया महत्वम्, तस्या आवश्यकता,

प्रचारोपायाश्च प्रदर्शिताः । काश्यां संस्थापितस्य संस्कृत-साहित्य-समाजस्य, संस्कृतच्छात्रस... संस्कृत-साहित्य-विद्यालयस्य, सुप्रभातस्य च ...त्रा उद्देशाश्च वर्णिताः । संस्कृत-महत्व-विषये ...चार-विषये च अलवरराज्ये भाषणमिदं प्रथम सुस्पष्टम्, सरलम्, हृदयङ्गमञ्चासीत् । ग्राम-पण्डितेषु विशुद्ध-संस्कृतोच्चारणकृते, संस्कारशुद्धौ च विशेषतस्तैर्ध्यानमाकृष्टम् ।

अन्ते च माननीयै राजपण्डितमहोदयै स्तेषां भाषणस्य सारांशः, सरल-सङ्क्षिप्ततया प्रदर्शितः । सभाविसर्जनञ्चाभूत् ।

व्याख्यान-प्रबन्धे मानन यानां न्यायाधीशानां रामभद्र-महोदयानां, पुलिस सुपरिन्टेण्डेन्ट-महोदयस्य, श्री रामचन्द्रशर्म्ममहोदयस्य च समुत्साहः प्रशंसनीय आसीत् । अतस्ते धन्यवादार्हाः ।

निवेदकः—

श्री दुर्गादत्तशर्म्मा, (अलवरस्टेट)

———

आरा-विद्वत-समिति-परीक्षाः ।

वर्षेऽस्मिन् आरा-विद्वत्समितिसंस्कृतोपाधि-परीक्षा आगामिवैशाखमासस्य कृष्णद्वितीया शनिवारतः- (ता० ७—१० अप्रिल १९२८ ई०) कृष्ण-पञ्चमी भौमवारं यावद् गृहीता भविष्यन्ति । तत्र परीक्षार्थिभिर्माघमासस्य पूर्णिमातिथेरर्वागेवावेद-नीयम् । मुद्रितान्यावेदनपत्राणि जिज्ञासया त्वरितं कार्यालयतः प्रहितानि भविष्यन्ति । तानि च यथा-स्थानम्प्रपूर्य परीक्षानियमानुसारतः शीघ्रं कार्यालये प्रेषणीयानीति—

आरा ५।१।८२	*श्रीयुगलकिशोर झा शर्मणः* उपमन्त्रिणः विद्वत्समितः

र...ष्ट्रभाषाभूषणम् ।

...गल शास्त्री, दर्शनकेशरी, साहित्याचार्यः

...ष्ट्रभाषायां विद्यते । संस्कृत-ज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दी भाषायां निबन्धलेखन-अनुवादादिज्ञाने महत्सौकर्यं स्यात् । मूल्यम् आणकचतुष्टम् । मार्गव्ययः—=)

सूर्यचरितम् वा ऋतुचरितम् ।

नूतनं महाकाव्यम् ।

ले०—श्रीमान् तारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः

गोलविद्या-विषयकं नूतनं महाकाव्यम् ।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः । गोलविषये नूतनं संस्कृत-महाकाव्यम् । सर्वथा द्रष्टव्यम् । सुप्रभात-ग्राहकानां कृते मूल्यम्—॥।) मार्गव्ययः पृथक् ।

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-तीर्थः

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया बालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृत काव्येषु नाटकेषु पुराण-पुस्तकेषु च समागतानां देशानां नदीनां स्थानानां पर्वतानाञ्चाधुनिकीस्थितिस्तेषां नामानि च सन्ति । सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् सुप्रभात ग्राहकेभ्यः—।-) आनकाः

C/o. सुप्रभातम्, काशी ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

माघ-फाल्गुनौ १९८४

चतुर्थवर्षे] [दशमी, एकादशी च सङ्ख्या

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मासिकं मुखपत्रम् ।

तिमिरततिमुदस्यद्,
मदनाग विलुम्पन्,
नयदधि सुरभाषाभाषि-
जागर्तिभावम् ।
विबुध-विहग-वादै-
राह्वयद् भाग्य-भानुम्,
विलसतु भुवनेऽस्मिन्
सर्वतः 'सुप्रभातम्'

सम्पादकः—

श्रीकेदारनाथशर्म्मा, सारस्वतः

वार्षिकम्मूल्यम् ३) मानुनीयेभ्यः १२)
छात्रेभ्यः १॥) वैदेशिकेभ्यः ६)

व्यवस्थापकः—

श्रीगिरीशशर्म्मा, शुक्लः, न्यायाचार्यः

प्राप्तिस्थानम्—

सुप्रभातकार्यालयः, काशी ।

लेख-सूची।

—:०:—

सुप्रभातम् ।

विविध विषय-विभूषितम्, अद्वितीयम्, संस्कृत-मासिक-पत्रम् ।

चतुर्थ-वर्षे | माघः, फाल्गुनश्च । १९८४ वैक्रमाब्दाः | १०-११-संख्ये

आशंसा ।

कियच्चिरं भारति ! भारतं तव प्रसादमासादयितुं प्रतीक्षताम् ।
पुना रसज्ञासु निषिच्यतां सुधा यया बुधाः स्युर्विविधाऽबुधा अपि ॥ १ ॥

भवन्तु वल्मीकभवा भवान्तरे गिरश्च कल्याणकरीः किरन्तु ते ।
यथा शरै रामधनुर्विनिर्गतैः शिरांसि भूमौ विलुठन्तु रक्षसाम् ॥ २ ॥

पुनश्च पुत्राः पितृशासने स्थितास्तृणाय मत्वा निजसौख्यसंपदः ।
जिगीषया यान्तु विदेशमम्भसां निधिं च मथ्नन्तु बलैर्महार्जितैः ॥ ३ ॥

पुनः शवर्यस्तु जनेन मानिता लभेत गृध्रोऽपि निवापसत्क्रियाम् ।
न ना निषादोऽपि विषादमुद्वहेत्तिरस्कृतः किन्तु पुरस्कृतो भवेत् ॥ ४ ॥

भवन्तु मित्राणि न केवलं नराः स्ववानरा अप्यनुकूलचारिणः ।
यथा जयः स्यात् सकले महीतले पुनः पुनर्भारतभूमिजन्मनाम् ॥ ५ ॥

सहस्रशः सन्तु विशालबुद्धयो विवेकिनः सत्यवतीसुताः पुनः ।
यदीयवाग्वीर्यनवीकृता जना भवन्तु सर्वे दृढकर्मयोगिनः ॥ ६ ॥

पुनः कलं कूजतु कालिदासवाग् वदावदानानि च वाणवाणि ! नः ।
दलन्तु भूयो भवभूतिभावितानुभावभूम्ना हृदयानि भूभृताम् ॥ ७ ॥

पुनर्गृहं स्वर्ग-समानतां व्रजेत् प्रवर्धतां वन्धुषु हार्दमच्छलम् ।
समादरः स्यादुचितः कुलस्त्रिया विनाशमभ्येतु कलेर्विडम्बनम् ॥ ८ ॥

न मानभङ्गः पुरुषस्य जातुचिन्न धर्षणं स्यान्महिलाकुलस्य नः ।
न कोऽपि निक्षेप्तुमलं बलाधिकः प्रसह्य रूरोषकषायितां दृशम् ॥ ९ ॥

भवन्तु भूयो वृषभा धुरन्धराः प्रमोदमेदस्वि च दोग्धृधेनुकम् ।
निकामवृष्टिः फलिना कृषिस्तथा समृध्यतात्तत्फलभोगयोग्यता ॥ १० ॥

न धर्मभीरुत्व मपेतसाहसं विवेक-विश्रान्त मर्म प्सितं भवेत ।
जना पुनर्धर्मविधानकोविदा भजन्तु लोकद्वयसिद्धिहेतुताम् ॥ ११ ॥

तपस्विता तिष्ठतु सिद्धिकामुके सुशिष्यवर्गे विनयादिभूषिता ।
यथा विहायानुकृतिं परस्य स प्रवर्त्तयेदुन्नतिनूत्नपद्धतिम् ॥ १२ ॥

स्वयं प्रदुग्ध्रां गुरुमण्डली धियं स्वशिष्यवत्सोत्सुकता मुपागता ।
न बुद्धिपण्या वणिजो भवन्तु ते न चेतरो वृत्तिमिमां कदर्थयेत ॥ १३ ॥

अधीत्य विद्यामिह शिक्षिता जनाः समस्तबुद्धीन्द्रियकर्मपेशलाः ।
श्ववृत्तिमुत्सृज्य नितान्तगर्हितां स्ववृत्तिमालम्ब्य विहर्त्तुमीशताम् ॥ १४ ॥

परोपकारैकपरायणाः परात्परं निमग्नाश्च भवन्तु लिङ्गिनः ।
न पूपसंयावपयस्यभक्षणात् पिचण्डिला दारधनापहारकाः ॥ १५ ॥

मधु क्षरन्त्यः प्रवहन्तु सिन्धवः प्रजायतां नो मधुमान् वनस्पतिः ।
पुरेव भूयान्मधुमच्च पार्थिवं रजः परानन्दरसज्ञताऽस्तु नः ॥ १६ ॥

—श्रीकेशवप्रसाद मिश्रस्य ।

सम्पादकीयम्।

विलम्ब-विनिवेदनम्।

सुप्रभातस्य माघाङ्को न निःसृतः। एतस्य प्रधानं कारणमस्माकं समयाभाव एवासीत्, माघमासस्य वा कथा? फाल्गुनेऽपि नासीत् समयः। यन्त्रालयाध्यक्षाणामुत्साह प्रदर्शनेन केवलमेकस्मिन्नेव सप्ताहे यथाकथमपि मुद्रापितमिदम्। बहवः प्रार्थिता अपि होलिका लेखा न प्रकाशिताः। तत्तैः क्षन्तव्यम्। अन्यच्चापि-अस्य युग्माङ्कस्य सम्पादनं प्रकाशनं वा न जातम्। केवलं मुद्रापणमेवेति यद्यत्र काश्चनाशुद्धयस्युश्चेत्तदा क्षन्तव्यम्, संशोधनीयञ्च। नात्र वयं प्रतिभुवः। चैत्राङ्कोऽपि शीघ्रमेव प्रकाशितः स्यात्। वयमपि छात्रा एव। पठने, पाठने, जीविकार्जने, परीक्षायाम्, गृहकृत्येषु संलीनानामस्माकं कियान् समयोऽवशिष्येत इति जानन्त्येव भुक्तभोगिनः।

* * * *

संस्कृत-परीक्षाः।

जानन्त्येव विद्वांसो यत्, मार्चमासस्य १२ दिवसादारभ्य काशीस्था राजकीयाः परीक्षाः प्रारब्धाः भविष्यन्तीति। समयविषये तु परीक्षाध्यक्षैर्नितरां सहृदयता सम्पादिता। अस्माकं प्रार्थनं स्वीकृत्य तैरेकमासात्मकः समयः परिवर्द्धितः। तदर्थं तेभ्यो धन्यवादान् वितरामः।

परमिदानीं प्रश्नविषयेऽपि वर्तते वक्तव्यमस्माकम्, यत्, साम्प्रतं नूतना आँग्लशिक्षादीक्षिताः परीक्षका भवन्ति। ते च प्रथमायां मध्यमायाञ्च कविसमयम्, अलङ्कारान्, समालोचनम् अन्यांश्च विविधान् विषयान् पृच्छन्ति। यद्यपि कलिकातादि परीक्षासु प्रथमत एवैवंविधाः प्रश्नाः समायान्ति, अत्र तु ग्रन्थज्ञान-विषयज्ञान विषयेष्वेव प्रश्नाः समागच्छन्ति स्म। अत्रत्याश्छात्रा अपि न तेषु व्यापकविषयेष्वभ्यासमाचरन्ति। छात्राणां का कथा? तेषां गुरवोऽपि नैतस्मिन् विषये श्वेतं कृष्णं वा किमपि जानन्ति। प्रथमं सहृदयैः परीक्षाध्यक्षमहोदयैरेतेषां विषयाणां पुस्तकप्रबन्धः, पाठनप्रबन्धश्च विधेयः। गतवत्सरे प्रथमायाम्—रामगिरेः परिचयः, मध्यमायाः प्रथमखण्डे—भट्टिकवेः परिचयः, एवं विधाः प्रश्ना आसन्। रामगिरिनिर्णयः, भट्टिकवेः कालनिर्णयश्च परीक्षक-महोदयेनापि कर्तुं दुःशक एव। जानन्त्येव सर्वे शिक्षामर्मविदो यत्, कथं पाठनं भवति छात्राणाम्। प्रथमपरीक्ष्याश्छात्रास्तु नितरामल्पज्ञा भवन्ति। अस्यामवस्थायामेवंविधाः प्रश्नाः कथं परीक्षाध्यक्षाणां मनोमोद मावहन्तीति परमाश्चर्यम्।

साम्प्रतं परीक्षाध्यक्षैरेतस्मिन् विषये दीयमानमवधानमपेक्ष्यते। छात्राश्चैवंविधानां प्रश्नानां विरोधं बहिष्कारञ्च महता बलेन कुर्युरिति।

* * * *

सुप्रभातस्य विशिष्टाङ्कः ।

सुप्रभातस्य विशिष्टाङ्को वैशाखमासस्यान्तिमे सप्ताहे मुद्रितो भविष्यति । तदर्थं चैत्राङ्कः स्वसमयात् प्रागेव प्रकाशितो भविष्यति । विशिष्टाङ्कस्कृते याचितं साहाय्यं सर्वैरपि ग्राहकैरवश्यं प्रेषणीयम् । सुप्रभातस्यार्थव्यवस्था विदितैव ग्राहकानाम् । तथाप्येष समारम्भ एतदर्थमेव क्रियतेऽस्माभिर्येन सुप्रभातस्य सम्पादनत्रुटयो दूरीभवन्तु । एतस्मिन्नुत्साहे सुप्रभातस्यावरणपृष्ठं चिराय पञ्चवर्ण-चित्रशोभितं भविष्यति । बहवश्च स्तम्भाः सुप्रभाते स्थायिरूपेण प्रकाशिता भविष्यन्ति । संस्कृतसमाजे समुत्साहश्च जागृतो भविष्यतीति बहूनि कारणानि सन्ति । तद्ग्राहक-महोदयैः स्व-वार्षिक मूल्यप्रेषणावसरे, सुप्रभातस्य वी० पी० ग्रहणावसरे वा यथाकथमपि यथेप्सितं साहाय्यं प्रदेयम् । अस्मिन्नङ्के विशेषतः प्राचीनानां संस्कृतविदुषां परिचयः, चित्राणि च स्थास्यन्तीति ग्राहकैः स्व-स्व-परिचितानां सुप्रसिद्धानां विदुषां चरित्राणि चित्राणि च प्रेषणीयानि । एतस्य साफल्यविषयेऽपि वयं प्रबोधनीयाः । के के स्तम्भाः स्थास्यन्तीत्यपि लेख्यम् ।

*　　*　　*　　*

विषादः ।

साम्प्रतमेव समागतेन पत्रेण विज्ञातम्, यत्, वङ्गीय-संस्कृत-साहित्य-परिषदः प्रधानस्तम्भरूपो महान् कार्यकर्ता पण्डितवरेण्यः श्रीमान् पशुपतिनाथशास्त्री एम० ए०, पी-एच्० डी० महोदय अकाल एव कालकवलितोऽभूदिति । यद्यपि वयं तेषां न परिचिताः स्मः, तथापि सुरभारती सेवकत्वेनास्माकं तैः सहासीत् महीयान् सम्बन्धः, संस्कृत-साहित्य-परिषदः कार्यं जातमवलोक्य वयं प्रसन्नचेतसः परिषत्सञ्चालकेभ्यः स्पृहयामः । तेष्वेको महारथः साम्प्रतं कथा शेषतामगमदितिपरं शोकस्थानमस्माकं संस्कृत प्रणयिनाम् । अद्यत्वे द्वित्रा एव कार्यकर्तारः संस्कृतक्षेत्रे कार्यं कुर्वन्ति । तेष्वपि ह्रास इति सर्वथा दुर्दैवविलसितं संस्कृत साहित्यस्येति नात्रसन्देहः । वयं परिषद्भ्यः समवेदनां सहानुभूतिञ्च प्रकटयन्तो नितरां विषीदामः । प्रार्थयामश्च तस्य सुरभारती प्रणयिनः प्रियवरस्य सद्गतिम् ।

*　　*　　*　　*

भ्रम संशोधनम् ।

विगताङ्के विहारपरीक्षासूचनावसरे मुद्रितमासीत्, यत्, संस्कृतपरीक्षा मार्च मासस्य द्वितीय दिवसादारभ्य भविष्यन्ति । परमिदानीं परीक्षाध्यक्षैः सूचितम्, यत् मार्च मासस्य १५ दिवसादारभ्य क्रमशः प्रथमादिपरीक्षा भविष्यन्तीति सुप्रभात-पाठकै रेषभ्रमः संशोधनीयः ।

हिन्दू-विश्वविद्यालयस्य शिक्षणम् ।

हिन्दू-विश्वविद्यालयस्य वार्षिक महोत्सवावसरे तत्रैव मण्डपे हिन्दी कविसम्मेलनभूत । तत्र चास्माकं पूज्यपादैर्गुरुवरैर्महामहोपाध्याय-श्री देवीप्रसादकविचक्रवर्तिमहोदयैः सभापति पदमलङ्कृतमासीत् । तत्र कैश्चन आँग्ल शिक्षितैः सभ्यप्रवरैराङ्ग्ल छात्रैर्भूयानसभ्यः कोलाहलः कृतः । एका महिला यदा कवितां श्रावयितुमुत्थिता तदा तैर्नितरां घृणार्हो व्यवहारः समाचरितः ।

[यद्यपि तेषामध्यापकैरयोध्यासिंहमहोदयैः सभापति महोदयैश्च वारं वारं प्रार्थितास्ते दुष्टा श्छात्रास्तथापि ते न लज्जिताः । आचार्यध्रुवमहोदयाः अन्ये चाचार्याः समुपस्थिता आसन् । तेषां समक्षमपि छात्राणां प्रचण्डामुद्दण्डतां दृष्ट्वा नितरां खिन्नं चेतसा । एवमेव तस्मिन्दिने वेणीसंहारनाटकस्य संस्कृताभिनयेऽपि छात्रैरेवमेव महान् कोलाहलः कृतः ।

एतदवलोक्य वयं निर्धारयामो यत् वयमेव संस्कृतज्ञास्तेषामपेक्षया नितरां सभ्या मनुष्याश्च स्मः । ते खलु राजभाषामधीत्य केवलं प्रभावबलेन बाह्यचाकचिक्येन च प्रभावं पातयन्ति । वस्तुस्ते तमसावृताः, आर्य सभ्यताशून्याः प्रोद्दण्डा दुराचारिणश्च भवन्ति ।

आँग्लाः शिक्षकाः सर्वानपि दुराचारान् कुर्वन्ति, येन छात्रा अपि तादृशा एव भवन्ति । आँग्लाः सभ्यास्तेषां दोषान्निगूहन्ति, प्रत्युत तेषां दोषानपि गुणत्वेन प्रख्यापयन्ति । अस्माकं संस्कृतज्ञानां तमालभक्षणमपि निन्दन्ति, सडिण्डिमघोषं प्रख्यापयन्ति च । जीविकादिदाने महान्तं संशोधनञ्च कुर्वन्ति । मालवीय महोदयानामादर्श हिन्दूविश्वविद्यालयेऽपि पिशाचिन्या आँग्लसभ्यताया नग्नं ताण्डवं नितरां दुनोति ।

—:०:—

नतिः

वृन्दावने शाद्वलरम्यभूमौ
गाश्चारयन्तं बहु गोपबालैः ।
वंशी निनादैर्मधुवर्षयन्तम्
राधाप्रियं माधवमानतोऽस्मि ॥

—सोहन लाल द्विवेदिनः ।

पुस्तकपरिचयः ।

रस-कामधेनु-संहिता ।

चूडामणि विरचिता । तस्य चतुर्थोभागश्चिकित्सा पादः श्रीमद्भिर्वैद्यप्रवरैः श्रीजीवरामकालिदासशास्त्रिभिः, आयुर्वेदाचार्यैः सम्पादितः, संशोधितः, प्रकाशितः, मुद्रितश्च । प्राप्तिस्थानम् रसशाला औषधाश्रमः, गोंडल, काठियावाड़ । मूल्यम्- चत्वारो रूप्यकाः ।

एतस्य प्रथम उपकरणपादः, द्वितीयो धातु संग्रहपादः, तृतीयो रसकर्मपादश्चेति खण्डत्रयं यादवजी श्रीकमजीमहोदयैः सम्पाद्य, प्रकाशितमासीत् । चतुर्थोयं चिकित्सापादः श्रीमद्भिर्जीवराम महोदयैः प्रकाशितः । अस्मिन् ग्रन्थे ६० अधिकाराः सन्ति । विविध रोगाणामुपरि सहस्रशो रसानां निर्माणविधिश्च वर्तते । ग्रन्थोऽयं रसनिर्मातॄणां वैद्यानां कृते वस्तुतः कामधेनुरेव । वैद्यैरवश्यं संग्राह्योऽयं प्रबन्धः ।

मन्त्रखण्डः—

पार्वतीपुत्र-नित्यसिद्धनाथ-विरचित- रसरत्नाकरान्तर्गतः पञ्चमो मन्त्रखण्डः । सम्पादकः-रसशास्त्री जीवरामकालिदास शास्त्री, आयुर्वेदाचार्यः । स एव प्रकाशको मुद्रकश्च । मूल्यम्- मुद्राद्वयम् ।

अस्मिन् ग्रन्थे विविधा मारण-मोहन-वशीकरण स्तम्भनादिमन्त्राः वज्रास्त्र-वरुणास्त्र-ब्रह्मास्त्रादीनाञ्चमन्त्राः संग्रहीताः सन्ति । विचित्रोऽयं मन्त्रात्मको ग्रन्थः । मान्त्रिकैस्तान्त्रिकैश्च नूनमयं स्व-पार्श्वे स्थापनीयः ।

द्रौपदीवस्त्राहरणम्।

शास्त्री मणिशंकर भाई शंकर शर्मा, प्रधानाध्यापकः—राजकीय संस्कृत पाठशाला, पेटलाद। मूल्यम्--आनकद्वयम्। प्राप्तिस्थानं तदेव।

कौरवसभायां दुःशासन कृतं द्रौपदी-वस्त्राहरणमुद्दिश्य विरचितमिदं लघुकाव्यम् समीचीनं सहृदयानां कृते मनोरञ्जकम् वर्वर्ति। कविता सरला सुबोधा च।

श्रुतबोधः—

काव्यतीर्थ--विशारद-सरयूप्रसाद-पाण्डेय-विरचिताभ्यां टिप्पणी-सान्वयभाषाटीकाभ्यां संवलितः। प्रश्न-परिशिष्टादि सहितः। मूल्य मानकत्रयम्।

प्रथम परीक्षार्थिनां छात्राणां कृते नूनमियं साहाय्यप्रदा टीका। सरला स्वल्पमूल्या च। यद्यपि श्रुतबोधस्य विविधानि संस्करणान्यभूवन, तथपीदं संस्करणं संक्षिप्तं समुचितञ्च।

आत्रेयवचनामृतम्।

महर्षिणा अत्रिणा प्रणीतम्। प्रकाशकः—श्रीविश्वेश्वर दयालुः वैद्यराजः। प्राप्तिस्थानम्—मेनेजर- अनुभूतयोगमाला कार्यालय, वरालोकपुर, इटावा। मूल्यं नास्ति।

अत्रिमहर्षेर्वचनान्यत्र हिन्दीभाषाद्वारा सर्वेषामुपकारकाणि कृतानि वैद्यराजेन। अत्र पुरुष-पुनर्जन्मप्रमाणादीनां विषये संक्षिप्तनिरूपणं दृश्यते। पुस्तकमिदं समीचीनम्।

शङ्कराचार्यचरित्रम्।

मधुरानगरस्य-आङ्गल-महाकला-शाला-संस्कृताध्यापकेन के० वै० सुब्रह्मण्य शास्त्रिणा विरचितम्। प्रकाशकः—प्राप्तिस्थानञ्च—ई० एम० गोपालकृष्ण कोने, बुकसेलर, Padumadapam, Madura. मूल्यमष्टौ आनकाः।

गद्यपद्यमयं श्रीमच्छङ्करपादाचार्याणां क्रमबद्धं जीवनचरित्रम्, तच्छिष्याणाञ्च सम्यक् परिचयोऽत्र मधुरललितया संस्कृतभाषया लेखकेन निबद्धम् स्पृहणीयम् विद्यते।

पत्राणि।

उद्यान पत्रिका।

संस्कृत-मासिक-पत्रिका। सम्पादिका-समितिः। प्राप्तिस्थानम् - डी० टी० ताताचार्यः शिरोमणिः, तन्त्रोदयम्, तिरुवादी, तञ्जौर,(मद्रास)। वार्षिकं मूल्यमेका मुद्रा।

पत्रिकेयं स्वल्पकाया छात्राणां कृते नितरामुपकारकारिणी। छात्रानुद्दिश्य प्रायोऽत्र बहवो लेखाः प्रकाशमायान्ति। वस्तुस्ते छात्रोपयोगिन एव भवन्ति। अस्याः संस्कृतम् सरलं मञ्जुलं प्राञ्जलञ्च भवति। एतस्मिन् विषये तु मद्रमण्डलीयाः सिद्धहस्ता एव सन्ति। साम्प्रतमेतेषां दृष्टिः सारल्यसम्पादने समागतेति सुप्रभातं मन्यामहे। साम्प्रतं सरल-संक्षिप्त-संस्कृतमयानां पत्राणां वर्वर्ति नितरामावश्यकता, येन प्राथमिकाश्छात्रास्तत्र सविशेषं पुष्टा भवेयुः। संस्कृत लेखन—भाषणादिषु संस्कृतछात्राणां महान्तं दौर्बल्यमपसारयितुमेष एव सरल उपायो यत् हि सरल-संस्कृत-पत्रिका प्रचारः, सैषा महती त्रुटिरनया पत्रिका पूर्णाति वयं सादरमस्याः सख्याः स्वागतमाहरामः, अस्या श्चिरजीवित्वञ्च कामयामः।

संस्कृत-महापाठशाला-पत्रिका।

श्रीमन्महामहिम-महिसूर-महाराज-संस्थापित-संस्कृत-महाविद्यालयस्य त्रैमासिकी मुखपत्रिका। सम्पादकः—महामहोपाध्यायः, पण्डितरत्नम्, लक्ष्मीपुरम्, श्रीश्रीनिवासाचार्यः। राजकीय यन्त्रालयात् प्रकाशिता मुद्रिता च।

प्राप्तिस्थानम् श्रीरामानुजजय्यङ्गरः, श्रीमन्महाराजाधिराज-संस्कृत-महाविद्यालयाध्यक्षः, मैसूर, वार्षिकम्मूल्यम्—सार्द्ध मुद्रा । छात्रेभ्य एकामुद्रा ।

पत्रिकेयं प्रतितृतीयमासं प्रकाशिता भवति । ४ सम्पुटस्य, प्रथमा संञ्चिका प्राप्तास्माभिः । अत्र लेखत्रयं विद्यते (१) कविकाव्यविचारः, (२) कालिदासोपज्ञरसज्ञता (२) मीमांसाभाष्य-भूषण मिति त्रयोऽपि लेखा विचार्य्यमाणा नितरां गौरवमुत्पादयन्ति पत्रिकायाः । भाषा सरणिः, लेख प्रौढ़िः, विद्वत्वम् सम्पादन-सौन्दर्यम् , प्रकाशनपरिस्कृतिः सर्वमपि हृदयग्राहि विद्यते ।

गोलसूत्रम्-गोलविद्या च ।

प्रणेता-श्रीतारादत्तपन्तः, साहित्याचार्यः, व्याकरणतीर्थः प्राप्तिस्थानम्-सुप्रभात-कार्यालयः, काशी । मूल्यमष्टावाणकाः। सुप्रभात-ग्राहकेभ्यो मासपर्यन्तं ।-) दीयेत ।

पुस्तकमिदं गोलविद्याविषयकं विद्यते । प्रथमं गोलविद्यायां गोलशास्त्रस्य परिभाषा, ज्ञातव्याश्च विषयाः प्रतिपादिताः सन्ति ।

ततश्च गोलसूत्रेषु सकलोऽपि भूगोलः सरलतया प्रतिपादितः । एतस्मिन् प्राच्य-पाश्चात्ययोर्गोलशास्त्रयोस्तथा पुराणानाञ्च मतानि संकलय्य साररूपेणायं प्रबन्धो विरचित इति परं महत्वमादधाति पुस्तकमिदम् । संस्कृत-वाङ्मये गोलविद्या विषयकोऽयं नूतन आरम्भः । राजकीय परीक्षासु सामाजिकीय-परीक्षासु चायं ग्रन्थोऽवश्यमेव स्थापनीयः । भूगोल-शिक्षायाः संस्कृतज्ञेषु नितरामावश्यकता वर्तते । यदि संस्कृतज्ञाः सहृदयतां व्ययीकृत्यामुं नवीनं ग्रन्थमालोक्य स्वसम्मतिप्रदानं कृत्वा लेखकमुत्साहयिष्यन्ति चेत्तदपि सुरभारत्याः सौभाग्यमाकलयिष्यामः ।

श्वासरोग-चिकित्सा—

स्वर्गीय मनोहर दास—राजवैद्य-विरचिता । प्रकाशकः-पं० विश्वेश्वर दयालु शर्म्मा वैद्यराजः । हरिहर औषधालयः, बरालोकपुर, इटावा ।

पुस्तकेऽस्मिन् श्वास रोगस्य पूर्णः परिचयः, तस्य चिकित्सा, चिकित्साविधिश्चेति वैद्यानां बहवो ज्ञातव्याः विषयाः सन्ति । वैद्यानामुपकारकोऽयं ग्रन्थः । मूल्यमाणकचतुष्टयम् ।

व्रणोपचारपद्धतिः ।

लेखकः—महावीरप्रसादः, मालवीयः । प्रकाशकः—भूतपूर्वः, प्राप्तिस्थानमपि तदेव । मूल्यमानक षट्कम् ।

अत्र सर्वेषां व्रणरोगानां परिचयः, तेषां चिकित्सा, चिकित्सा विधिः, औषधिप्रयोग इत्यादिकं सर्वं समीचीनया सुबोधिन्या सरण्या प्रतिपादिताः । पुस्तकं वैद्यानाम् , अन्येषाञ्च कृते नितरामुपकारजनकम् , संग्राह्यञ्च ।

गीर्वाणभाषा द्वितीयपाठः ।

सम्पादकः—को० वै० सुब्रह्मण्य शास्त्रियर महोदयः । संस्कृताध्यापकः-मदुरा कालेजस्य । प्रकाशकः- ३० एम० गोपालकृष्ण कोने । प्राप्तिस्थानम्-३० एम० गोपालकृष्णकोने, बुक्सेलर एण्ड एजेण्ट्स-गवर्नमेन्ट पब्लिकेशन्स पुदुमण्डपम् (Pudumandapam) मदुरा । मूल्यम् षडनकाः ।

पुस्तकमिदं संस्कृत-लेखन शिक्षार्थिनामनुवाद शिक्षार्थिनाञ्च छात्राणां कृते नितरामुपयोगप्रदम् । अस्य प्रणेता श्रीमान् श्रीमतामप्पय्यदीक्षितानां श्रीमतां नीलकण्ठदीक्षितानाञ्च वंशज इति पठित्वा वयं परं प्रमुदितमानसाः स्मः । पुस्तकमिदमतिसरलम् ।

भङ्गातरङ्गाः ।

महामण्डलमठेशो बाबा ज्ञानानन्दो महामण्डलीयं सर्वस्वमुदरे कृत्वा शेते स्म । मध्ये मालवीय-महोदयैः सनातनधर्म-सभा-घोषेण तस्य निद्रा निर्वर्तिता । साम्प्रतं भाग्यमाक्रोशन् वराक इतस्ततः प्रोच्छलति । साम्प्रतं तेन हस्त-क्रिया-कुशलस्य जरद्गवस्य जीर्णवैद्यस्य दीनदयालु महाशयस्य कश्चनानुभूतो योगः सेवितव्यः । नो चेत् विद्या-वैधव्य-योगः सत्वरं समीयात् ।

* * *

काश्यां रघुवीरमिश्र महोदयस्यौषधालये बहूनां पण्डितानां प्रत्यहं सम्मेलनं भवति । तत्र तैर्मनोरञ्जनाय विविधाः सामग्रीरुपस्थापिता विद्यते । श्रूयते होलिकावसरे सर्वेषां विनोदाय ते कमपि विशिष्टं प्रबन्धं विधास्यन्ति । तदा तु सुप्रभातम् भङ्गाभट्टस्य । कदाचिदस्यापि महा-ब्राह्मणस्य चिरलालसा पूर्णा भवेत् ।

* * *

श्रूयते “ साम्प्रतं सनातनधर्म धुरन्धराः बहवः काशीस्था विद्वांसो जराजर्जरिता अपि काम-मर्मरिता पौत्री-समवयस्काभिः कन्यका पाणिपीडनं विधाय वृद्धस्य सनातनधर्मस्य शिरसि नग्नताण्डवं कुर्वते इति । अत्र का हानिः ? यदि ते एव न करिष्यन्ति चेत्, तेषां शिष्याः कथं मार्गमिमं ज्ञास्यन्ति ।

* * *

श्रूयते कश्चन क्रान्तिकारी नामा लेखकः काशीस्थ विदुषां रहस्यपिटकमफोस्टयत् । ततश्च प्रसृतो भूयान् विकारः । ज्ञानानन्दस्य प्रपौत्रास्तमेवालिङ्ग्य वारं वार मास्वादयन्ति । भवतु ! एका क्रिया द्व्यर्थकरीप्रसिद्धा' इतः पण्डितानां पीड़ा न्यूनता गता, ततश्च ज्ञानानन्दीयानां भोजनं जातम् । 'आम्रश्च सिक्तः पितरश्च तृप्ताः' ।

* * *

सुरभारती पत्रिका सञ्चालकस्य वराकस्य श्रीगुरुप्रसाद शास्त्रिणस्तु भ्रूणहत्यैव समजनि । यद्यप्यासन् चिकित्सकाः सुप्रसिद्धाः श्रीगोपीनाथ कविराज-महोदयाः, प्राच्य-पाश्चात्योभय विधानविदस्तथापि किंकर्तव्यम् ? ईश्वरेच्छा गरीयसी ।

* * *

साम्प्रतं पुनरपि तेन प्रसवलालसेन शास्त्रिणा शुभदिने गर्भाधानं कारयितव्यम् । एतस्मिन् कार्ये तु चिरविरहितो भङ्गाभट्ट एव समुपयुक्तः स्यात् । कुमारभृत्यायां च कुशला मनीषानन्द स्वामिनः सिद्धहस्ताः सन्ति ।

* * *

'सूर्योदय' सम्पादकेन विन्ध्येश्वरीप्रसादशास्त्रिणा विधुराणामुपरि महती दया दृष्टिः प्रदर्शिता । साम्प्रतमेव 'मतवाला'-विविध-पत्र-सम्पादकस्य शिवपूजन सहायस्य विधुरस्य पाणिपीडन-व्यवस्था स्वग्राम एव सम्पादिता । साम्प्रतं भगवान् सूर्योदयसम्पादकश्चिरविरहिणो भङ्गाभट्टस्यापि चिर-कौमारं विनाशयतु । गृह्णातु शुभाशिषः !

* * *

सुप्रभातस्य युग्माङ्क प्रकाशनं जातम्, सम्पादकोऽपि वैधुर्याद्विमुच्य युग्ममलभत् द्वावपि द्विगुणितौ जातौ । अहमपि द्वयोर्द्विगुणितमाशीर्वादं ददामि । न जाने भङ्गाभट्टः कदा द्विगुणितो भविष्यति । वैधुर्य-विनाशधुर्याणां सूर्योदय सम्पादकानां दृष्टि रपेक्ष्यते ।

* * *

महामहोपदेशकानां मदनमोहनशास्त्रिणां सनातनधर्म-सभा बहून् डिम्भानुत्पाद्य साम्प्रतं श्वासान् गणयति । डिम्भाश्चेतस्ततः संजाताः । अहन्तु प्रार्थयामि यत, कश्चन सुपुत्रः पित्रोरस्या विपत्तेः समुद्धरेदिति । वर्तते कश्चन सुपुत्रः ?

वसन्तवीरः

शिलीमुखालिङ्गित-सद्गुणोल्लस-
द्रसालचापस्थित चारुविक्रमः ॥
स्मरस्य मुख्यः पृतनाधिनायको-
वसन्तवीरो विजयी विराजते ॥ १ ॥

श्रीमान् म० म० देवीप्रसाद शुक्लः
कवि चक्रवर्ती

पञ्च-पञ्चाशिका ।

[गुमानीगीता]

प्रणेता—महाकविगुमानी पन्तः ।

सम्पादकौ—
श्रीतारादत्त पन्तः, व्याकरणाचार्यः ।
श्रीहीरावल्लभ पन्तश्च [कविप्रपौत्रः]

आत्मा स्वयं विशुद्धस्त्रिगुणोपाधिप्रधानसंसर्गात् ।
आभाति तत्स्वरूपः प्रसूनयोगादिव स्फटिकः ॥ १ ॥
चैतन्यसन्निकर्षात् मायासम्भूतभूतनिकुरम्बम् ।
अचिदपि चलति विचित्रं चुम्बकसामीप्य लोह इव ।२।
महदादौ प्रतिफलितं प्रविष्टवद्भाति तत्र चैतन्यम् ।
नहि वस्तुतः प्रविष्टं वदनमिव द्रष्टुरादर्शे ॥ ३ ॥
उच्चावचेषु भूतेष्वेकाकारोऽपि तत्तदाकारः ।
प्रतिभासतेऽयमात्मा दारुषु विविधेषु वह्निरिव ॥४॥
"विक्षेपशक्तियोगाज्जगदाकारेण चित्तदध्यस्ता ।
विलसति विवर्तमाना सर्पाकारेण रज्जुरिव ॥ ५ ॥"
'सृष्ट्वा जगत्समन्तात् ब्रह्म यथावत्स्वमायया सर्वम् ।
तदनु स्वयं प्रविष्टं पटमिव सूत्रं स्वरूपेण ॥ ६ ॥'
धीतन्त्रेष्वखिलेषु प्रतिविम्बित एक एव सन्नात्मा ।
विलसति वहुविधरूपो हिमकर इव नीरपात्रेषु ॥५॥
स्वाधिष्ठितात्प्रधानाद्भिन्नोऽप्यभिन्न एवेति ।
भवति प्रतीयमान स्तप्तायः पिण्डतोऽग्निरिव ॥ ६ ॥

छेदविशोषणदाहाद्यविषयप्रसक्तमस्पृश्यम् ।
सूक्ष्मं सर्वगमचलं भवति ब्रह्मान्तरिक्षमिव ॥ ७ ॥
स्फुटदृश्ये क्षणनाशिनि विश्वे मायामये त्वस्मिन् ।
तादात्म्यतो निगूढं ब्रह्म ततं क्षीर इव सर्पिः ॥ ८ ॥
अन्तः सुदुर्विभाव्यं वस्तु समस्तस्य भुवनकोशस्य ।
आधारभूतमेकं मुक्ताहारस्य सूत्रमिव ॥ ९ ॥
शून्यो गुणरहितत्वे गुणवत्वे संस्थितश्च परिपूर्णः ।
अन्तर्वहिरयमात्मा कलश इव व्योम्नि वारिणि च ।१०
जगतः स एक एव स्वमुपादानं निमित्तरूपश्च ।
कारणमयमात्मा तन्तुचयस्योर्णनाभ इव ॥ ११ ॥
अज्ञानसंवृता धीः स्वयं सती तं दुरन्तमात्मानम् ।
जानाति तं निगूढं दृष्टिरिवार्कं घनच्छन्ना ॥ १२ ॥
विक्षेपशक्तियोगाज्जगदाकारेण चित्तदध्यस्ता ।
विलसति विवर्तमाना सर्पाकारेण रज्जुरिव ॥ १३ ॥
सृष्ट्वा जगत्समन्तात् ब्रह्म यथावत्स्वमायया सर्वम् ।
तदनु स्वयं प्रविष्टं पटमिव सूत्रं स्वरूपेण ॥ १४ ॥
प्रकृतिर्ब्रह्मणि दूरादपरिच्छिन्ने स्वतः परिच्छिन्ना ।
स्फुरति कापि कदाचित्सुरवर्त्मनि मेघलेखेव ।१५।
स्वगुणैः पूरुषमाद्यं वशमानीयानुवर्तिनी माया ।
आनन्दयति विहारैर्नारी साध्वीव भर्तारम् ॥ १६ ॥
ब्रह्मणि कारणभूते मुहुर्मुहुः प्रोद्भवन्ति लीयन्ते ।
वहवो गुणवति जीवा अलाम्भसीवोर्मयः सरसि १७
रूपाभिधानभूतं भेदोपाधिं निरस्य तत्कालम् ।
ब्रह्मत्वमेति जीवः कनकत्वं कुण्डलादिरिव ॥ १८ ॥
ईश्वरजीवविभेदाद् ब्रह्मोपहितं प्रकृत्यविद्याभ्याम् ।
भाति द्विधैकरूपं ह्याकाशं घटाकाशमिव ॥ १९ ॥
विहितास्पदौ शरीरे मिथः सखायौ सनातनौ सयुजौ ।
वसतः परात्मजीवौ खगाविव द्वौ महावृक्षे ॥ २० ॥

भानेऽपि भिन्नताया जगदिदमखिलं चितो विनिष्पन्नम् ।
तत्वात्ततो न भिन्नं मृद इव तत्तद्घटाद्यखिलम् २१
निर्धारितोऽपि तत्त्वाद्वितथः सुतरां जगत्प्रपञ्चोऽयम्
सत्वेन भाति साक्षाद्मृद्गज इव सद्गजत्वेन ॥२२॥
कर्तृत्वाद्यविवेकादज्ञानस्यार्थतः क्रियाशून्ये ।
आरोप्यते परात्मनि गिराविवाक्ष्णः परिभ्रमणम् २३
दृग्गोचरोऽन्तरस्थः सुमृग्यमाणः प्रमत्तया बुद्ध्या ।
नासाद्यते चिदात्मा मणिरिव कण्ठोपकण्ठस्थः ।२४।
पुरुषस्य बन्धमोक्षौ परस्य परितः प्रकाशरूपस्य ।
द्वावप्यतथ्यरूपौ रजनी दिवसाविव द्युमणेः ॥ २५ ॥
घनकोशपञ्चकान्तर्गतस्वरूपा स्वयं प्रकाशापि ।
न बहिः प्रकाशते चित् घटगर्भस्थेव दीपार्चिः ॥२६॥
प्रभवन्नप्यसमर्थो मोहग्रस्तः स्वमाशु मोचयितुम् ।
आत्मैति पारवश्यं ग्राहगृहीतो गजेन्द्र इव ॥ २७ ॥
अस्वस्थोऽप्ययमात्मा कामाकुलितो मुहुः परिक्लिश्यन् ।
अनवस्थितिमधिगच्छति वृश्चिकदष्टः प्लवङ्ग इव २८
इन्द्रियवृत्तिभिरभितः स्वार्थान् सर्वाभिरर्थयन्तीभिः ।
आकृष्यतेऽन्तरात्मा, पतिरिव बहुभिः सपत्नीभिः॥२९॥
चित्त्वं जडे जडत्वं चिति पुनरविवेकसंवृतो मुह्यन् ।
वेत्ति विपर्ययमात्मा पुमानिवोन्माददोषार्तः ॥ ३० ॥
फल्गुविषयसुखमात्मा, प्रतीयमानं सदित्यसत्प्रायम् ।
अभिधावति बहुतृष्णो,मृग इव मृगतृष्णिकासलिलम् ३१
कृतयोर्धिया विभाव्यं, स्वकृतत्वं कर्मणोः शुभाऽशुभयोः।
भुङ्क्ते तत्फलमात्मा नृप इव चम्वा जयाऽजययोः ३२
चिरमानन्दमयेऽन्तर्विहरन् कोशेऽजया समं मुग्धः ।
विस्मरति सर्वमात्मा विजने कामीव कामिन्या ॥३३॥
भोगार्पणोपहारैः पृथगिन्द्रियदैवतैः परः पुरुषः ।
समुपास्यतेऽत्र देहे सामन्तैः सार्वभौम इव ॥ ३४ ॥

भोगेच्छया हृषीकैः सह निर्यत्सत्वरं मनो दूरम् ।
हरति प्रसह्य बुद्धिं पयसि तरीं मातरिश्वेव ॥ ३५ ॥
जाग्रत्स्वप्नसुषुप्तिप्रभेदतो वृत्तयो धियस्तिस्रः ।
सम्भाव्यन्त इहात्मनि मुधैव तन्वा इहावस्थाः॥३६॥
परितस्ततेन गूढं तत्वस्तोमेन मुग्धमात्मानम् ।
द्रुतमावृणोति माया विहगं भिल्लीव जालेन ॥ ३७ ॥
अज्ञानमात्मनोऽन्तः कोशनिरुद्धस्य बहिरवस्थानात् ।
स्वसरूपतां प्रयुङ्क्ते पेशस्कारीव कीटस्य ॥ ३८ ॥
उपलक्षितोपचाराद्ब्रह्मात्मत्वेन लक्षणैस्तैस्तैः ।
प्रकृतिः स्फुरति समक्षं रजतात्मत्वेन शुक्तिरिव॥३९॥
भासा विसृत्वरेण व्यवधानेऽप्यन्तरात्मना क्रमव्याप्त्या
बहिरञ्चितं शरीरं स्थाल्योदनमग्निनेवेद्धम् ॥ ४० ॥
सहसोपचयापचयौ संहततत्वात्मनः शरीरस्य ।
अध्यस्तौ परमात्मनि कलाकलापस्य शशिनीव॥४१॥
देहो यथा स्वभागाज्जनितः सम्भूय भूतसंहतजा ।
तत्रैव लीयतेऽन्ते मृदानुघटितो मृदीव घटः ॥ ४२ ॥
मायोपाधिरधृष्यः परमात्मानं प्रकाशमानमिव ।
द्राक्पिदधाति समन्तात् स्वर्भानुश्चण्डभानुमिव॥४३॥
भिदयापि भासमाने ब्रह्मणि तादात्म्यतो जगत्सर्वम्
संलीय पर्यवस्यति बुद्बुद्निकुरम्बमिव नीरे ॥४४॥
आपाततः प्रधानं निजधर्मैर्व्याप्नुवत् परं ब्रह्म ।
स्प्रष्टुं न शक्यतेऽन्तः पद्मं पद्माकराम्भ इव ॥ ४५ ॥
विभुना यथा नियुक्तं कूटस्थेनात्मना तथा चेतः ।
स्वहृषीकाणि नियुङ्क्ते रथिना यन्तेव युग्यानि ॥४६॥
आत्मानं विपरीतेष्वर्थेष्वभिनोदयन्नहंकारः ।
भ्रंशयति स्वविवेकान् मुग्धं भूपं कुमन्त्रीव ॥४७॥
त्रिगुणैः कर्मभिरन्तः संकलितान् देहिनः परेशोऽन्तः।
व्यापारयति यथेष्टं सूत्रैरिव पुत्तिकाः कुहकाः ॥४८॥

कर्मोद्भवं शरीरङ्कर्म ह्यन्योऽन्यपरीवृत्त्या ।
अन्योन्यजनुरुभयो रनयोरिव वीज-भूरुहयोः ॥४६॥
अपि कर्म कार्यभूतङ्कारणमज्ञानमात्मनः सद्यः ।
कषति हि समूलकाषं दारु तदुत्थः कृशानुरिव ५०॥
देहो विनश्वरोऽयं सनातनाल्लिङ्गलक्षणाज्जीवात् ।
सम्बन्धोऽपि विभिन्नः परिहित इव कञ्चुको देहात् ५१
रागाद्याविलमन्तःकरणं सत्कर्मणा सुनिर्णिक्तम् ।
विमलत्वमेति जीवो नूनं निकषेण रत्नमिव ॥५२॥
चित्ते विधूतदोषे विमलीभावाद्वु विसारि विज्ञानम् ।
सहसाभ्युपैति भास्वन्नि र्धौत इवांशुके शौक्ल्यम् ५३
पुंसा परेण युक्ता सूक्ष्मविद्या जगन्ति धीतत्वम् ।
स्वविनाशबीजभूतं सूतेऽश्वतरी स्वतोकमिव ॥५४॥
आत्मा प्रयत्नलब्धात् त्रिविधोपाधिक्षयात् क्रमेणैव ।
स्वं लभते स्वरूपं त्रिदोषनाशाद्बु गदार्त्त इव ॥५५॥
समाधिविधिमन्तरा त्वरितमात्मबोधैषिणाम्
नितान्तमुपकारिणी कृतधियाम्मनोहारिणी ॥
महोपनिषदर्थसञ्जनिततत्त्वविद्योतिनी
गुमानिरचिता चिरं जयति पञ्चपञ्चाशिका ॥५६॥ *

—:०:—

कम्बोजीयः ।

कवीन्द्र-रवीन्द्र-कथानुवाद-रूपः ।

(अनुवादकः-बहादुरचन्द्र गुप्तः, शास्त्री)

[क्रमागतः]

अथेमे शिशिराहा आसन्, अर्थात् संवत्सरस्य स एव काल आसीत्, यत्र किल प्राचीना राजानो विजयार्थमभिनिर्यान्तिस्म; अहञ्च, कलिकातायां स्वकीयक्षुद्रकोणादचलम्, मनसैव विश्वं जगत् परिभ्रमामिस्म* । देशान्तरनाम श्रावंश्रावं मम चित्तं तत्रैवाव्राजीत्, रथ्यासु च कस्यापि विदेशीयस्य दर्शनमात्रेणैव शिखरिणः, उपत्यकाः, विदेशीयकुटीराधिष्ठितमध्यभागं विप्रकृष्टकं काननम्, निर्बाधं स्वतन्त्रं च वन्यं जीवनम्—इत्येवमादिध्यानपरम्परायां न्यमज्जम् । तानि नाम यात्राद्दृश्यानि मत्पुरस्तात्सङ्कलितानि भवन्ति, मम मनस्कारे चोत्तरोत्तरं स्फुटतरमागमापायं कुर्वन्ति; अहं हि तथा शाकजीवं जीवामि यथा व्रज्यार्थमाहूतिर्मय्यशनिपातं पतति । अस्य कम्बोजीयस्योपस्थित्याम्, अहं सपदि वहिरन्तः-सरीसृप्यमाण-नानानिविडसरणी कोत्तुङ्गशृङ्गानां रूक्षशिलोच्चयनितम्बानां पादान् अनीये । तत्राहमुदूढभारामुष्ट्रपङ्क्तिम्, समतल भूमिं प्रति प्रयातां केषाञ्चिद्बु विलक्षणानि पुरातनान्याग्नेयानि शस्त्राणि दधतां केषाञ्चित्कुन्तान्वहता मुष्णीषिणां सार्थवाहानां सङ्घञ्च साक्षादकरवम् । अन्यच्चापीक्षितुं आसीत् । किन्तु, अस्मिन्क्षणे मिन्या माताऽऽगत्य विच्छेदमाधात्, प्रार्थयच्च—' तस्मिन्पुरुषेऽवहितो भव ' इति ।

दौर्भाग्यान्मिन्या माताऽतीव भीरुरस्ति । यदा कदाचित्सा प्रतोल्यां कमपि कोलाहलं शृणोति, गृहाभिमुखमागच्छतो जनान्वाऽवलोकते, तदा सर्वदैवं साऽवधारयति, यन्नूनं ते चौरा वा, मद्यपा वा, सर्पा वा, व्यांघ्रा वा, ज्वरा वा, दंशका वा, वृश्चिका वा, स्युरिति । एतावतीः शरदोऽनुभूत्वाऽपि, सा स्वकं साध्वसं पराभवितुं न प्रभवति । तस्मात्सा

*अस्य पुनर्मुद्रणे भाषादिकरणे च सम्पादकत्रयभिन्नस्य नाधिकारः । —तारादत्तपन्तः ।

*मनस्कारमन्नस्यपरोक्षता ।

कम्बोजीयं प्रति नित्यं व्यचिकित्सत, माञ्च तस्मिन् सततमवहितँ चक्षुः स्थापयितुमयाचत ।

यद्यहं दाक्षिण्येन तदीयामेतां भीतिं परिहासेन विधूनयितुमध्यवास्यम्, तदा सा गम्भीरभावमापद्यत, रहस्यपूर्णांश्च प्रश्नानपृच्छत—

'अपि बाला नैवाह्रियन्त ?'

'अपि नैतत्सत्यं यत्कम्बोजे दासभूयमासीद् इति ?'

'किमेतत्सर्वथा निर्मूलमेव यदयं विपुलः पुरुषस्तन्वङ्गीं बालामपहर्तुमकल्पतेति ?'

ततोऽहं प्रत्यवादिषम्—'कामं नैतदसंभवम्, किन्तु नितान्तमनाशङ्कनीयमिदम्' इति । परन्त्वेतावन्मात्रं पर्याप्तं नाभवत्, तस्याः साध्वसमतिष्ठदेव । इदं निःसारं साध्वसमासीत्, अतस्तस्य पुरुषस्य गृहाद्वारणं न साम्प्रतं प्रत्यभासीत् । तेन तत् सख्यं निर्बाधमुपाचीयत ।

वर्षस्य सकृद्, माघमासारम्भे रहमान नामासौ कम्बोजीयः स्वकं जनपदं प्रति निववृते । यथा यथा समयः प्रत्यासन्नाद तथा तथा स गृहाद्गृहं पर्यटन् स्वानि-ऋणानि संगृह्णन् भूयः प्रसितो बभूव । परन्त्वेषमः स मिनीमुपगन्तुं वीक्षितुञ्च नित्यं वेलामविन्दत । कस्मैचिदागन्तुकाय त्वेवं प्रत्यभास्यत; यन्नूनं तयोः कापि मिथोमन्त्रणा संजायते' इति स हि यदा प्रातरागन्तुं नाशक्नोत् तदा सायमागात् ।

मत्कृतेऽपि प्रायस्तमसावृतस्य वेश्मनः कोणमध्यासीनस्य विपुलाकृतेः शिथिलवाससः पृष्ठोदूढप्रसेवस्यास्य पुरुषस्याकस्मिकं दर्शनं मनागुद्वेजकं समजायत; किन्तु यदा मिनी स्मयमाना यथापूर्वं च 'अयि कम्बोजीय ! कम्बोजीय!' इति चत्वाणाऽधावीत्, यदा च वयसा तथातिभिन्नौ तौ द्वौ सुहृदौ स्वं प्रतनं प्रहासं स्थानि प्रत्नानि नर्माणि च कुर्वन्तौ व्यरंसिष्टाम्, तदाहं निर्द्वन्द्वोऽभवम् ।

अथ यदाऽसौ प्रस्थातुं निश्चिकाय, ततः कालात्कतिपयैरहोभिः पूर्वमहमेकदा प्रातः स्वस्मिन्नभ्यासवेश्मनि निषण्णो मुद्रितपत्राणि समशोधयम् । ऋतुरतीव तुषार आसीत् । गवाक्षात्सूर्यस्य रश्मयो ममाङ्घ्री अस्पृशन् । मनाक् सौरतापश्च परं सुभग आसीत् । आसन्नाष्टवादनसमय आसीत्, प्रातरित्वानश्च प्रच्छन्नैः शिरोभिर्गृहान् प्रति निवर्तन्ते स्म । अकस्मादहं रथ्यायां कोलाहलमशृणवम्, अथ बहिश्चक्षुश्चारयन् द्वयो राजपुरुषयोरन्तराले नीयमानं सन्दानितं रहमानं, तदनुपदं चान्वेषणपराणां माणवकानां व्रातमलोकिषि । तस्य वासस्सु शोणितबिन्दव आसन्, एकतरश्च राजपुरुषोऽसिपुत्रमबिभः । अथाहं ससंभ्रमं निरगाम्, तांश्च रुन्धन् समपृच्छे 'किमेतदिति' । किञ्चिदितः किञ्चित्ततश्चाहमेतावन्मात्रमवागच्छम् यत् 'कश्चित्प्रतिवेशी तस्मै पण्याजीवाय रामपुरीयकम्बलार्णस्तोकं धारयाञ्चकार, परं पश्चात्स तत्क्रयणमेवापजज्ञे । अथ कलहे जायमाने रहमानस्तमाजघान' इति । इदानीं समुत्तेजितः सन् स बन्दी स्वं प्रतिपक्षिणं बहुविधं दुर्वक्तुमारभत । तत्कालमेव मम तन्वी मिनी यथापूर्वं 'अयिकम्बोजीय ! कम्बोजीय !' इति शब्दायमाना सहसा गृहवितर्द्यामाविरासीत् । तां विलोक्यैव रहमानस्याननं व्यद्योतिष्ट । अद्य तस्य बाहुतले प्रसेवादिकं नासीत्, फलतः सा तत्कुञ्जरविषयकं वाकोवाकं कर्तुं न प्राभवत् । अस्य हेतोः

सा सपदि प्रश्नानन्तरं प्राक्रमत ‘ कच्चित् स्वकं श्वशुरालयं गच्छसि ? ’ इति । रहमानः प्रहसन्नब्रवीत्—‘ साधु, तत्रैव गच्छामि वत्से ! , । ततश्च ‘ तदुत्तरं बालिकां नाह्लादयद्व ’ इति भावयन्नसौ स्वौ बद्धौ पाणी उन्नमय्य, उच्चकैः ‘ आः !’ कुर्वन् व्याहरत्—‘अवश्यं तं स्थविरं श्वशुरमकुट्टयिष्यम् , किन्तु मम हस्तौ निगडितौ स्तः ’ इति ।

अथ वधात्मकस्याक्रमणस्यापराधे, रहमानोऽनल्पाः शरदः कारावासं दण्डितोऽभूत् ।

* * *

कालोऽतिययौ, स च विसस्मरे अस्माभिः । अस्माकं शीलितं कार्यं शीलिते प्रदेशे प्राचलत्, तस्य चानुभूतस्वतन्त्रतानन्दयोः कारावासे वत्सरान्गमयतः पर्वतीयस्य वयं जातुचिदस्मराम नैव वाऽस्मराम । किं बहुना, मृदुमना मम मिन्यपि (कथयञ्जिह्रेमि) स्वकं चिरन्तनं सखायं व्यस्मरत् । अभिनवानि मित्राणि तस्या जीवनमपूरयन् । यथा-यथा साऽऽयुषाऽवर्धततराम् , तथा-तथा सा कन्याभिः सार्धमधिकतरं कालमनैषीत् । यत्सत्यं तावन्मात्रं सा ताभिः सह समयाऽकरोद्, येन पितुर्निकेतमपि यथा पूर्वं नोपासरत् । तस्मात्तया साकमालपितुमवसरो मे दुर्लभ आसीत् ।

समा व्यतीयुः । सकृत्पुनः शिशिरागमः प्रावर्तत वयं च मिन्याः परिणयाय विविधान्संभारान्निरवर्तयाम । परिणयः पूजावकाशाहेषु भवितुं निश्चित आसीत् । कैलासं प्रति निवर्तमानया दुर्गया सह, अस्मद्गृहदीप्तिरपि निजभर्तुः कुलाय प्रस्थातुं पित्र्यं चाऽप्रकाशे हातुं प्रगुणाऽऽसीत् ।

प्रातः कमनीय मासीत् । वर्षानन्तरं समीरणः प्रक्षालित इवाभासीत्, सहस्रांशोरंशवश्च निष्टप्तहेमप्रभा इव भासमाना मलिनान्यपि कलिकाताप्रतोलीनामिष्टकाकुड्यानि समुज्ज्वलयन्तिस्म । आप्रभातं वैवाहिकानि तूर्याणि अशब्दायन्त, प्रतिशब्दाघ्रातश्च मम हृदयं प्राकम्पत । उपनंस्यद्वियोगपीडा मुद्गलयन्तीव भैरवीतालस्य काकली अक्वणीत् । तस्यां रजन्यां मम मिनी परिणेयाऽऽसीत् ।

आ प्रातःकालात् तुमुलः कोलाहलः सदनमपूरयत् । प्राङ्गणे वंशाग्रेषूल्लोचः प्रतननीय आसीत् , प्रतिशालञ्च वितर्द्यश्च क्वणत्किङ्किणीका दीपवृक्षा आसञ्जनीया आसन्, वगाहः स्फूर्जथुश्चातिसोममास्ताम् । अथाहं स्वस्मिन्नभ्यासवेश्मनि व्ययविवरणं निरीक्षमाण आसे, यावत्कश्चिद्विनयपुरः सरं नमस्यन्नन्तरागात् , मत्पुरस्तादतिष्ठच्च । अयं स एव कम्बोजीयो रहमान आसीत् । पूर्वमहं तं नाभ्यजानाम् । स प्रसेवं नावोढ, तस्य दीर्घाः केशाश्च लघूकृता आसन् , तत्प्राक्तनं बलञ्चापि प्रनष्टमिवाभवत् । किन्त्वसावस्मयत, अहञ्च तं पर्यचिनवम् । अथाहं तमपृच्छम्—‘ कदाऽऽगतोसि रहमान ! ’ इति स प्रत्यवोचत्—‘ ह्यः सायं कारावासान्मुक्तोऽभूवम् ’ इति ।

ते शब्दा मम कर्णौ परुषमतीतपन् । नाहं पुरा कदाचिदपि स्वजातीयं पुरुषं घातुकेन पुरुषेण साकमालापमकरवम् । अथ तदनुसंदधानस्य मे मनः स्वस्मिन्नेव समकुचत्; अहं हि व्यचिन्तयम्, यत्—‘स दिवसः शुभशकुनोऽभविष्यत्, स चेद् दृष्टिगोचरं नाभविष्यत् ’ इति ।

अथाहं व्याहरम्—'गृह उत्सवस्तायते, अहश्च व्यापृतोऽस्मि । अतस्त्वमन्यदा कदाचिदागच्छेः' इति ।

स तत्क्षणं गन्तुं न्यवर्तत, परं यावदेव द्वारमासीसदत्, तावत्किमप्यतर्कयत्, अकथयच्च—'नन्वार्य ! क्षणं बालिकां द्रष्टुं न पारये ?' इति । तस्य विचारे मिनी पूर्ववदेवासीत् । स तां यथापुरा 'अयि कम्बोजीय ! कम्बोजीय !' इति क्रोशन्तीं स्वाभिमुखं धावन्तीञ्चाऽऽध्यायत् । स तु 'आवां परस्परं यथा पूर्वं हसिष्याव आलपिष्यावश्च' इत्यपि व्यचारयत् । तत्वतश्च स भूतपूर्वदिवसानां स्मृतौ पत्रके संवेष्टितान् कतिपयान् वातादान् शुष्कद्राक्षां मृद्वीकाश्चानीतवानासीत् । सर्वं तद् वस्तुजातं स यथाकथं कस्माच्चित्स्वदेशीयजनाद् आहरत्, तस्य सविधे हि यत्किमपि धनमासीत् तत्सर्वं समाप्तिमगात् ।

अथाहं पुनरवोचम्—'गृह उत्सवस्तायते, त्वश्चाद्य कमपि द्रष्टुं न शक्यसि' इति । एतेन तस्य वदनं विच्छायमजायत । क्षणं यावत्स मां साकूतं निरवर्णयत्, ततश्चाब्रवीत्—'अभिवादये भोः !' इति । अथ निरगात् ।

अहं किञ्चिदिव पर्यशोचम्, तञ्च पुनराह्वास्यम्, परन्तु स्वेच्छयैव निवर्तमानं तं व्यलोकयम् । अथासौ मामुपसीदत्, तमुपहारं पुरोऽधाद्, अभ्यधाच्च—'इदं वस्तुस्तोकं बालिकार्थं मानीतवानस्मि, भोः ! तत्किमस्यै दास्यसि त्वम् ?' इति ।

अहं तत्प्रत्यैच्छम् । अथ यावदहं किञ्चित्प्रतिदातुमकामये, तावत्स ममहस्तमग्रहीद्, अगादीच्च—'परं कारुणिकोऽसि भोः ! जातु स्मरणीयस्त्वयाऽहम् । न मे द्रव्यमुपहर ! तवेयं दुहिताऽस्ति, ममाप्यस्ति गृहे तया तुल्यैका । तस्याः स्मरन्नहं तव कन्यकायै इदमुपायनमिति कृत्वा ददामि न तु लाभाशया' इति ।

एवमाचक्षाणः स स्वकं हस्तं विपुल-शिथिलस्य निचोलस्यान्तर्न्यधत्त, एकं क्षुद्रं अलीमसं पत्रकशकलञ्च निरकासयत् । अथ महताऽवधानेन तद् अपावृण्वन् मम चतुष्किकायां निधाय स उभाभ्यां हस्ताभ्यां पर्यमार्ट् । तस्मिंश्च पत्रकखण्डे एकस्य लघोः पाणेः प्रतिलिपिरासीत् । नासीच्छायाचित्रम्, नाप्यालेख्यम्, केवलं मसीछुरितस्य पत्रके विततं निहितस्य पाणेः प्रतिलिपिरासीत् । इदं निजायास्तन्वङ्ग्या दारिकायाः पाणेः स्पर्शनकं स सर्वदा हृदयेनोवाह, यदा प्रतिवर्षं स रथ्यासु पण्यानि विक्रेतुं कलिकातां प्रति समाजगाम ।

अथ मम नेत्राभ्यामश्रूण्यस्रवन् । अहं व्यस्मरम् यत्सोऽकिञ्चनः कम्बोजीयः फलविक्रेतासीद्, अहञ्च····। परन्तु नहि, कोन्वहं तस्मादधिकतरः ? असावपि पिताऽऽसीत् ।

विप्रकृष्टकं पर्वतीयं गृहमधिवसन्त्याः सुकुमार्याः पार्वत्या हस्तस्य सा प्रतिलिपिर्ममात्मीयाया मृद्व्या मिन्या अस्मारयत् ।

अथाऽहं सद्यो मिनीमन्तः पुरादुपातिष्ठिपम् । प्रचुरा बाधा उदभवन्, परन्त्वहं सर्वास्ता दूरं व्यक्षिपम् । परिणय-कालानुकूल-माञ्जिष्ठदुकूलावृता चन्दनतिलकाङ्कितललाट-कलिका, नवबधूरिवालङ्कृता मिनी समागात्, प्रश्रयानता च मम पुरस्तादतिष्ठत् ।

अथ तथाभूतां तां निध्याय, कम्बोजीयः परं चकित इवालक्ष्यत। नासौ पुरातनसख्यजीवातवे समर्थोऽभवत्। अथावभृथे स आचष्ट—'कच्चित्त्वकं श्वशुरालयं गच्छसि वत्से ? इति।

परन्त्विदानीं मिनी श्वशुरालयशब्दस्यार्थमवागच्छत्, ततश्च यथापूर्वं प्रतिवक्तुं नाकल्पत। तस्याः कपोलौ शोणिमानमापद्येतां तेन प्रश्नेन। वधूस्त्या इव नम्रेण मुखेन सा तस्य पुरस्तादवातिष्ठत।

अहं तस्य दिवसस्यास्मरम्; यत्र कम्बोजीयो मदीया मिनी च प्रथममिलताम्, उन्मनाश्चाभवम्। अथ निष्क्रान्तायां तस्यां रहमानो दीर्घं न्यश्वसीत् कुट्टिमे च न्यषीदत्। तस्य मनसि सहसा विचार आविरासीत्, यन्नूनमेतावन्तं कालं दूरं तिष्ठतो मम पुत्री संप्रति वयस्का संवृत्ता स्यात्, तया साकञ्चापि सख्यं पुनर्बन्धनीयं स्यदिति। यथाभूतां स तामहासीत्, तथाभूतां स तां द्रष्टुँ नाशक्यदिति तु निश्चय एव। किञ्च, आस्वष्टासु शरत्सु किं किं नाम न संवृत्तं स्यात्तस्याः ?

वैवाहिकानि वाद्यान्यशब्दायन्त, सुभगः शैशिरः सौरतापश्चास्मान्परितः पर्यपप्तत्। रहमानस्तु कलिकातायाः शुद्रायां वीथ्यामुपविष्टः स्वपुरस्तात् अफगानस्थानस्य नग्नान् गिरीन् साक्षादकरोत्।

अथाहमेकं करन्सीनोटं (Currency:Noty) निरकासयम्, अस्मै चादाम्, अकथयञ्च, याहि भो रहमान ! स्विकां तनयां प्रति निजं जनपदम्, युवयोः परस्परसम्मेलनसम्मदश्च मम पुत्र्यै सौभाग्य-सम्पदं जनयतात्' इति।

इमामुपदां दत्तवता मया कतिपया उत्सवाः स्थगनीया अभवन्। सङ्कल्पितपूर्वान् विद्युत्प्रदीपान् आहर्तुं नाशक्नवम्, नापि सैनिकं वादित्रिकम्, गृहमहिलाश्चास्मिन् विषये नैराश्यमभजन्। किन्तु मत्कृते स विवाह-महोत्सवो भूयोऽपि भास्वानभासीत्। एकश्चिरविरहितः पिता विप्रकृष्टके देशे पुनः स्वमेककमपत्यं सममिलदिति।

॥ इति कम्बोजीय कथा समाप्ता ॥

---:※:---

सरस-सूक्ति-संग्रहः।

[संग्रहीता-सम्पादकः]

(१)

होलाका-दिवसेषु मञ्जुलरसेष्वादेशतो गोकुला-
धीशस्यातुल-वत्सलस्य नियमं सन्त्यज्य गोचारणे।
निःशङ्कं कुलकन्यकाभिरभितः कुर्वन् कलिं कौतुकी
राधा-वर्ग-जितो हरिर्विजयते वृन्दाटवी-चन्द्रमाः॥

(२)

मूकीभूय कियत्,कियन्ननगिरा, नाद्येतिवाक्ये कियत्,
नेदानीमपि भाषणैरपि कियत्, कालं नयन्त्या तया।
अश्रान्तेन मया च नीव्युपहिते पाणौ कुरङ्गीदृशः
किन्नाकारि नवं नवं नव-नवं नूत्न-प्रसङ्गे नवे॥

(३)

कृतान्तः कान्तो वा समजनि न भेदः प्रथमत-
स्ततो द्वित्रर्मासैर्मनुज इति जग्राह हृदयम्।
ततोऽसौ मे प्रेयानहमपि तदीया सहचरी
ततो जाते वर्षे जगदिद मभूत्तन्मयमिति॥

(४)

धन्यस्त्वं भुवि यस्य राजति महाराष्ट्री-कुचोच्चं कुलं,
लाटीवाङ्मृदु नर्म, चेदिवनिता-नाभी-गभीरं वचः।
काश्मीरी-कटि-विस्तृता मतिरसि गौडी-कच-श्यामलः
कार्णाटी-रत-निष्ठुरो रण-रसः, कीरीमुखोत्थं यशः॥

होलोत्सवगीतयः

हिमसमयोत्थो व्रण इति मातरि कृपया कृतोपचारायाम्।
दयितादलितौष्ठपुटो व्रीडा-विनतो व्रजे विधुर्जयति ॥ १ ॥

दत्वाञ्जनं नयनयोः, प्रसाध्य केशान्, पटं च परिधाप्य।
बद्धो बलाल्ललितया पुन र्हरिर्लसति मोहनीभूतः ॥ २ ॥

भङ्गारङ्गतरङ्गैर्नग्नं नटतो महानटेशस्य।
वामाङ्गसङ्गिवामा-विशद-विलास-स्मितं पटीभवति ॥ ३ ॥

एकोऽस्ति नाभिजातः, शिरसाऽन्यो निम्नगामिनीं वहति।
इतरश्च चोरजाराग्रणी, र्नैकोमीषु होलिकाराध्यः ॥ ४ ॥

उपनीतचूतकलिका, नवमधुमत्ताऽन्यपुष्टवाचाला।
धृतवहुसाधनयोगा सुभगा होला विलासिनी जयति ॥ ५ ॥

सल्लिङ्गवृद्धिविदुरा, व्यभिचारज्ञा, रसैकनिष्ठधियः,।
सद्वेशविधृतरुचयो विदो नमस्या न कस्य होलायाम् ॥ ६ ॥

चतुर-नव-सूक्तिसङ्गत मधरीकुर्व "त्सुपत्रिकाः" सकलाः।
समुदश्चितरस मेतन्मधुमनुगृह्णाति "सुप्रभात" मपि ॥ ७ ॥

विबुधो वैधेयो वा बाला बालो युवा प्रवृद्धो वा।
सर्वे तपस्यदेशिकदीक्षां लब्ध्वा त्यजन्त्यहो द्वैतम् ॥ ८ ॥

मधुरेष कोऽपि शिल्पी, विहितं येनाशु कामिमिथुनानाम्।
सदने, वसने, नयने, वदने, हृदये, च रागसान्द्रत्वम् ॥ ९ ॥

मासेषु फाल्गुनोऽयं परं महत्वं विभर्ति, यद्यस्मिन्।
यूनां सरागमनसां "जीवनमुक्तिः" करोदरे स्फुरति ॥ १० ॥

अतिमसृणशोणचूर्णं संवितरन्तः परस्परं सुहृदः।
स्वं स्वमनुरागपूरं भान्ति समोदं समर्पयन्त इव ॥ ११ ॥

मधुमन्दसञ्चरोऽयं लताः सपुष्पाः सलीलमालिङ्गन्।
मृदुकुसुमरेणुचूर्णं क्षिपति दिगास्येषु दक्षिणः पवनः ॥ १२ ॥

प्रविकीर्णशोणचूर्णै रुपनतरागां स्फुरत्पिकालापाम्।
कुसुमेषुकान्ति मुच्चैर्दधतीं जगतीं वसन्त उपसरति ॥ १३ ॥

अपहाय दक्षिणाशां रविरपि निभृतं कृतोत्तरासङ्गः ।
　　मधुनोल्लासित एव द्यावाभूमीं सुखैः करैः श्रयति ॥ १४ ॥
दरचलदलाङ्गुलीभिर्मधुरनिषेधं प्रकाशयन्त्य इव ।
　　लतिका नवाः सपुष्पा मधुकरयुवभिः प्रसह्य भुज्यन्ते ॥ १५ ॥
पुरहर-नयन-हुताशन-हव्यीभूतं मनोभवं भूयः ।
　　संगत्य भुवनलक्ष्म्या माधव एषो धुनाऽवतारयति ॥ १६ ॥
मधुसहचारिणि मदने धुन्वति जैत्रं शरासनं स्वस्य ।
　　शृङ्गाररसरवीराः कम्पं पुलकं च के न कलयन्ति ॥ १७ ॥
युगपद्भुवनत्रयजनितां श्रान्तिं विनेतुकामेन ।
　　कामेन वसतिरिष्टा, "सरसे" वदने कुरङ्गनयनानाम् ॥ १८ ॥
माकन्दकाण्डविनिहितदोलाभाजां नवीनतरुणीनाम् ।
　　आकर्ण्य किमपि गीतं कलकण्ठाः कुण्ठकण्ठतां दधते ॥ १९ ॥
बहलपटवासपटलैर्विततै तमसि प्रगल्भरमणीभिः ।
　　सविलाससमाहतानां यूनां पुण्यानि मन्यते मदनः ॥ २० ॥
चञ्चलचेलाञ्चलचलनिविडकटाक्षालिभिर्वृतो-बध्वा ।
　　सिक्तश्च शोणसलिलैः सत्य "मशोकत्व" मेति कोऽपि कृती ॥ २१ ॥
उद्धुरविषमशरज्वरभरहरणायैव कोप्युपायज्ञः ।
　　जलयन्त्रमुक्तसलिलैः स्नपयति "शीतांशुशेखरद्वितयम्" ॥ २२ ॥
चिन्ताशत-हत-हृदया जनता प्रत्नं स्व "मैक्यसर्वस्व" म् ।
　　लुप्तं पुनरपि लभता मिति होलाख्या हरेर्दयाऽभ्येति ॥ २३ ॥
आराध्य होलिके ! त्वां याचे, साकं त्वयैव भरतभुवः ।
　　दुर्भिक्ष-दैन्य-दुर्गद-दुःखदशा देवि ! भस्मसाद्भवतु ॥ २४ ॥
उत्सवमयेऽत्र समये रसिकसमाजः सभाजनीय इति ।
　　अलवरवसति गिरिधर-शर्म्मा निर्म्माणसाहसं श्रयते ॥ २५ ॥

ॐ स्वस्ति सर्वेभ्यः ।

अलवरस्थ भट्ट गिरिधारीशर्म्मा—

"कविकिङ्करः"

(१०) जीवनं जलं जीवितं च (१३) कुसुमेषु पुष्पेषु कान्ति शोभाम्, पञ्चेपुजनितामिच्छाञ्च । (१४) मधुना वसन्तेन मद्येन च । दक्षिणोत्तरयोर्द्यावाभूम्योश्च सम्बन्धेन वहुवल्लभता द्योत्यते । (१५) मधुरनिषेधः अन्तरिच्छासत्त्वेपि बाह्य एवेत्याशयः (१६) माधवो वसन्तो विष्णुश्च । (१८) श्रान्तिविनयनेच्छायां सरसत्वं हेतुः । (२१) कटाक्ष एवालयो भ्रमराः कटाक्षाणामालयो वा (२२) शीतांशुशेखरशब्दो रसैकगम्यः ।

छात्र नियमाः ।

(ले०—वासुदेवशर्म्मा, चूरू)

[अवशिष्टांशः]

१३ प्रत्येकवस्तुस्थापनार्थं एकं स्थानं नियमितं विधातव्यम्, वस्तु च तस्मिन्नेव नियोक्तव्यम् ।

१४ यदा कोऽपि जनो लिखति वा पठति, तदा कदापि तत्पार्श्वे स्थित्वा तल्लेखनं पठनं च न पठितव्यम् । यतः स काश्चिदपि वार्ता ईदृशीः लिखेत् ; या न द्रष्टुं योग्याः । अन्येषां पत्राणां पठनं महत्पातकम् । चेद्यूयमविचार्य्यैवं करिष्यथ; तर्हि-लोका युष्मान् मूर्खासभ्यादिपदवीकान् विधास्यन्ति ।

१५ नियतसमय एव सर्वाणि कार्य्याणि विधेयानि । यो मनुष्य उचितसमये कार्यं नो विधत्ते, स स्वस्यान्येषां च समयमपि नाशयति । अत्यल्पकार्यमपि दक्षतया कर्त्तव्यम् । यत्कार्य्यं द्वितीयदिवसे निर्भरं कृतं तदद्यमेव विधातव्यम् ।

१६ स्ववस्त्राणि शुद्धानि स्वच्छानि च कर्त्तव्यानि । वासांसि युष्माकं भवेयुरथवाऽपरेषां कदापीत्थं न विचारयन्तु भवन्तो यत् वयं तु सुन्दर-वस्त्राभरण-भूपिताः स्मोऽपरे च मलिन-दरिद्र-वेषाः सन्ति ।

१७ देहमपि स्वच्छं विधेयम्, यतः "शरीरमाद्यं खलु सर्वसाधनम् । रुग्णो जनः संसारे कदापि सुखेन नो वसति। अतएवारोगिता प्रतिक्षणं विचारणीया । नीरोगतैव संसारे सुखस्य प्रथमं परमं साधनम् ।

१८ सर्वदा प्रसन्नचेतसः सन्तुष्टाश्च भवन्तु । यो जनोऽसंतुष्टः प्रतिपद्यते, स महान् दुःखी सञ्जायते । योऽपरेभ्यो गर्तं खनति स स्वयमेव तस्मिन् पतति ।

१९ लाभः कदापि न कर्त्तव्यः । अपरेषां वस्तूनां रक्षा तथैव विधेया यथा युष्मद्वस्तूनां क्रियते । न कदापि परवस्तुषु स्वत्वाधिकारो विधेयः ।

२० सर्वदा स्वाचरणानि सन्तव्यानि च सर्वथा शुद्धानि विधेयानि । सत्सङ्गो विधेयोऽसत्संगेषु दुर्जनसमूहेषु च कदापि नो स्थातव्यम् ।

२१ क्रोधो महान् दुर्गुणः, एकप्रकारस्य ज्वर एव प्रतिवर्तते । अग्निः प्रथमं तद्वस्तु एव दहति, यस्मिन् स प्रभवति, चेद्यूयं क्रोधिनो भविष्यथ, तर्हि क्रोधः पूर्वं युष्मच्छरीरस्य रक्तं पास्यति। यूयं च कृश-काया दुर्बला मृतप्राया भविष्यन्ति। अतएव क्रोधस्य त्याग एव श्रेष्ठः । यतो गीतायां—

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

२२ पिशुनेभ्यो धूर्तेभ्यश्च सर्वदा दूरे स्थातव्यम् । धूर्ता युष्मान्मूर्खान्कृत्वा युष्मद्बुद्धिं समयं विवेकञ्च नाशयन्ति ।

२३ विपत्तौ धैर्यं विधेयम् । विपत्तिषु व्याकुला न भवन्तु, अपितु धैर्येण तस्यावलम्बनं विदधतु । विपत्तिवर्द्धनमेव सफलताया आदिकारणम् । विपत्तिष्वधीरो जनः कदापि महत्कार्यं कर्तुं न शक्नोति ।

२४ तदेव कर्त्तव्यम् यदुचितं वर्तते, कार्यं कुरुत, फलं च परमात्मनि त्यजत । ईश्वरो यत्किञ्चिदपि विधत्ते तदस्माकं प्रीत्यै श्रेयसे साधीय एव करोति ।

२५ ईश्वरस्य प्रेम सहृदयेन कर्तव्यम् । यथा यूयम् स्वशरीरं प्रीणीथ, तथैवापरानस्माकं भ्रातॄनपि प्रेमदृष्ट्या पश्यत ।*

हेमन्तानुरोधः ।

हेमन्त ! त्वं तरलयसि किं गन्तुमन्तः समन्ता-
न्मागा मागा वस वस पुनर्द्वित्रमासानपीह ॥
श्रुत्वैव त्वद्गमनमधुनाऽनारतैकान्ततान्ताः
कान्ता नूनं त्वयि गतवति स्युर्भवज्जीवितान्ताः ॥ १ ॥
रोरुद्यन्ते रहसि सुभगा निश्चितत्वद्वियोगा-
भोगानेहस्यपि कतिपयाः स्वामिनोऽङ्के रुदन्ति ॥

* संकलिताः ।

आलीं काश्चिद्विरदविधुरं बोधयन्त्यो व्यथन्ते
हन्तोद्वेगस्तदपि वद हेमन्त ! गन्तुं कथन्ते ॥ २ ॥
हे हेमन्त ! त्वयि गतवति स्यन्दमानैस्तुषारै-
स्सीत्कुर्वाणास्तरुणिसमदोन्मत्तचित्ता अपीह ॥
मानं मुक्त्वा स्वयमुपगतास्तूर्णमुत्सङ्गमङ्गा-
ऽऽसङ्गाकाङ्क्षां कथमनुनिशं कान्तमुद्बोधयेयुः ॥ ३ ॥
हे हेमन्त ! त्वयि वत ! गते शीतसंचोकुचन्तः
सन्यस्यन्तः सपदि च शिरश्चञ्चलाक्ष्यञ्चलान्तः ॥
तत्प्रोत्तुङ्गस्तनयुगमुरस्यञ्जसाऽऽसञ्जयन्तः
सानन्दाः स्युः कथमविरतं कामिनो यामिनीषु ॥ ४ ॥
हेमन्त ! त्वं प्रियविरहिणीहृद्व्यथामात्मसत्वे
सत्वेच्छुश्चेद्गलनविधये, कर्हिचित्तर्हि मागाः ॥
धातावामस्त्वदुपरि, न ते कश्चिदस्तीह दोषो-
दोषो नाम्भोमुच इह हि यच्चातको नैति विन्दुम् ॥ ५ ॥
हेमन्त ! त्वं विधुरमधनानामिदानीं स्वसत्वे-
ऽसत्त्वेनाङ्गावरणवसनस्यानुमायापि मागाः ॥
शालित्वग्भिर्विरचितकटेनावृताङ्गा मृगाक्षी-
वक्षोजाग्निक्षपितशिशिरास्तेऽपि निश्युल्लसन्ति ॥ ६ ॥
हे हेमन्त ! व्रजनमथचेन्निश्चितन्ते तदानीं-
सानन्दम्प्रव्रज, कथमपि स्वैरिणं कोऽनुरुन्ध्यात् ॥
अह्नाय स्वप्रतिनिधिमृतुं प्रेषयन्नात्मतुल्यं
शल्यं सम्यङ् निजविरहजं नूनमुत्पाटयेथाः ॥ ७ ॥

—श्रीभूपनारायणझा शर्मा (व्याकरणाचार्यः)

—:*:—

उपाधि कौतुकम् ।

मातर्भारति ! भारतावनिरियं
सौभाग्य-सीमोन्नतिं
प्राप्ता प्रागनुपाधिभिर्बुधशिरो-
रत्नैः प्रकाशोज्ज्वलैः ॥
यन्नामाऽप्यभिधीयमानमधुना
शून्यं किलोपाधिना
मूर्द्धानं नमयत्युदित्वरवर
श्रद्धा-निवद्धाञ्जलिः ॥ १ ॥
हा हा सम्प्रति ते न सन्ति विबुधाः
कालेन नीताः कथा—
शेषत्वं निज-शिष्य-वर्ग-निहित-
स्वौजःप्रकर्षाः क्षितौ ॥
शिष्वास्तेऽपि गुरूपमास्तृणमिवो-
पाधिं विधूय क्षणा—
त्सायुज्यं निरुपाधिनाऽभ्युपगताः
स्वैरं किल ब्रह्मणा ॥ २ ॥
दुर्दैवादिह तत्क्रमागतसदा-
चारा अपि प्रायश—
स्तच्छिष्या वितथाभिमानमलिनाः
पाण्डित्य-चण्डाशयाः ॥
पापानां धनिनां सदा मदजुषां
लालाटिकास्तत्कृपा-
द्वारा हन्त ! वहन्त्युपाधिमलघुं
भारं यथा रासभाः ॥ ३ ॥
शास्त्राण्याकलितानि, जन्म गमितं
वेदान्त-वादादरै—
र्व्याख्यानेऽप्युपदिश्यते वत
सदोपाधिप्रहाणे मतिः ॥
गूढं वित्तवदाश्रयाद्बहुविधो
यत्नो मुहुस्तन्यते
हा हा लब्धुमुपाधिमद्य विदुषा-
मेषाऽस्ति शोच्या गतिः ॥ ४ ॥

उद्दण्डावलिमुण्ड-खण्डनचणै-
श्चण्डैः कृपाणैः पुरा
येषां राजपद-प्रशस्तिरुदिता
लोकैः स्वयं घोषिता ॥
राजानः खलु ते, तृणादपि भयं
येषां, कथञ्चिच्छद्—
व्याजासादितराजराजपदवी-
मन्ये वहन्त्युच्चकैः ॥ ५ ॥
लोकान् रञ्जयते गुणैरगणितै-
र्यो दानपाथःप्लवै—
र्दैन्यं मज्जयते सदैव विदुषां
राजा स एव ध्रुवम् ॥
यन्नामग्रहणं प्रभातसमये
लोकोऽशुभं मन्यते
राजाऽप्येष न राजते कृपणता
पाणिग्रहीता (?) यदि ॥ ६ ॥

श्रीनारायणशास्त्री, खिस्ते,
साहित्याचार्यः ।

——:※:——

सतीर्थ्य विनोदः ।

प्रथमः—(द्वितीयं प्रति) सखे ! विद्यालयेऽस्मिन्पठतामन्तेवासिनां कतमं श्रुतग्रहणधारणपटुम् वटुम् मन्यसे ?

द्वितीयः—(स्वगतं) दृप्यत्ययमात्मनः पाण्डित्येन । भवतु । अपनेष्यामि तावत् वाचोयुक्त्यास्य दर्पम् (प्रकाशम्) वयस्य ! यदि सर्वेऽपि विद्यार्थिनः सति पाठसंशये भवन्तमेव निर्णयाय समाश्रयन्ति; तर्हि कथमयं प्रश्नावकाशः ? यत्सत्यं पाणिनीयानुशासने तु भवान् दीक्षितायते ।

प्रथमः—(सहर्षं) सखे ! साधु पश्यसि ।

द्वितीयः—(क्षणं विलम्ब्य) सखे । तस्मिन् दिवसे प्रसंगात् भवत्पूर्ववृत्तमाख्यातुमारब्धवति त्वयि भवत्तातपादनिधनं यावदाकर्ण्य, गुरुनिदेशाद्बहिर्गतेन मया न तदासमाप्तेरश्रावि । तद्यदि सावकाशो भवांस्तदा कथाशेषश्रवणकौतुकं मे पूरयेत् ।

प्रथमः—श्रूयताम् । ननु उक्तमेव मया पूर्वं यदस्मत्कुलं पद्मा-प्रसन्न-कटाक्ष-क्षेप-पात्रं नासीदिति । स्वल्पंच कथंचित्संगृहीतं वित्तमपि रुग्ण-तातचरणानाम् औषधोपचारादिकृत्ये निःशेषतां गतम् । ततश्चोपरतेषु तातपादेषु अस्मासु च बालेषु निष्किंचना नो जननी बहु विमृश्यापि उपायान्तरमपश्यन्ती प्रतिगेहं भैक्षं चरित्वा कथंचिदस्मांस्तनयानवीवृधत् ।

द्वितीयः—(स्वगतम्) लब्धावसरोऽस्मि सांप्रतम् । (प्रकाशं) हन्त शोचनीया सा वराकी कुलटा ।

प्रथमः—(सामर्षम्) आः पाप ! कथं स्पृहणीयशीलामपि मज्जननीं कुलटां ब्रवीषीति (तं प्रहर्तुमुद्युङ्क्ते) ।

द्वितीयः—(स्मित्वा) काल्याणिनेय ! मा भूत् भवान् मयि उग्रंपश्यः । किल स्मरति भवान् कुलटायावेति सूत्रव्याख्याने श्रीमद्दीक्षितोक्तं सती भिक्षुक्यत्र कुलटेति ? तत् भिक्षुकीं भवन्मातरं कुलटां ब्रुवता मया किं तवापराद्धं ? येन वैयाकरणप्रकाण्डोऽपि मयि कोपनः संवृत्तः ? ।

प्रथमः—(सानुतापं) लब्धं दर्पस्य सदृशं फलम् ।

सूर्यपुरम् । (सूरत) { —निगमशङ्कर शर्मा, द्विवेदः

पद्मान्योक्तिः

हा हा पद्म ! वृथैवपल्वल-जले
जातोऽसि वद्धादरः,
भेकाजा-वक-गो-वराह-महिषी-
पङ्कैः परं वेष्टिते ।
ते भृङ्गा मधुपानमत्त-मुखरा
हंसा गुण-ग्राहिणः,
सन्ति क्वात्र सुगन्धशुद्धपयसा
स्निग्धास्तथा वायवः ॥

—कालीप्रसाद शास्त्रिणः
(श्रीकरस्य)

रघुवंश-महाकाव्यम् ।

चोरपक्षीया टीका ।

(प्रणेता-महाकवि श्रीदुःखभञ्जनकवीन्द्रः)

धनुर्भृतोप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशङ्कैः ॥
विलोकयन्त्यो वपुरापुरक्ष्णां
प्रकाम-विस्तार-फलं हरिण्यः ॥ ११ ॥

अपिर्निश्चयार्थे धनुर्भृतः चैरस्य, अवपुः न वपुर्यत्र विलोकनकर्मणि तद्यथा तथा अस्यदयार्द्रभावं असिना करवालेन उपलक्षितम् अदयार्द्रभावं अतिशयितहिंस्रभावं विलोकयन्त्यः सत्यः हरिण्यः अक्ष्णां प्रकामविस्तारफलं आपुः, प्रकर्षेण कं सुखं नमाति तादृशः विस्तारः तत्फलं प्रापुः, अथ कं प्रकाशं न माति किन्तु मीलित्वा अन्धकारमेव तादृक् विस्तारो यस्मिन् फले तत्फलम्, अर्थात् अक्ष्णां विस्तारे सत्यपि तस्य क्रौर्य्यं द्रष्टुं न शेकुः, मीलयित्वा पलायन्तेस्म, अथ नेत्र-वैपुल्य-फलं न प्रापुः, कीदृशं अस्यदयार्द्रभावम्, विशङ्कैः विशेष शङ्कैः स्वान्तैः आख्यातम्, करवाल-दर्शनेनैव सञ्जातशङ्कैः मनोभिरेव परिचायितम् ॥ ११ ॥

सकीचकैर्मारुतपूर्णरन्ध्रैः
कूजद्भिरापादितवंशकृत्यम् ॥
शुश्राव कुञ्जेषु यशः स्वमुच्चै-
रुद्गीयमानं वनदेव ताभिः ॥ १२ ॥

हे आपादित आसमन्तात् संजातपाद ! तारकादेराकृतिगणत्वात् इतच, अथ आपादः अकारि इतिनामधातोः क्तः आपादीकृत इति यावत्, तत्संबुद्धौ । स चौरः कूजद्भिरिव कूजनं कुर्वद्भिरिव मारुतपूर्णरन्ध्रैः कीचकैः उद्गीयमानं यशस्सु कीर्तिषु वंशकृत्यं वेणुकर्म शुश्राव अशृणोत्, केषु काभिः कं का इव, कुञ्जेषु लतादिपिहितोदरेषु ताभिः प्रसिद्धाभिः गोपीभिः उद्गीयमानम् अं कृष्णं वनदा इव उच्चैरतिशयार्थे वनदा अवगतः तिरस्कृतः नदो यया अल्लोपे वनदा नद मुतीर्य कृष्णमागता ततो वनदेति संज्ञां लब्धवती, एका वनं जलम् आलवाले दत्वा इति संज्ञां प्राप, इति पौराणिकी कथानुसर्तव्या ॥ १२ ॥

पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी ॥

तमातपक्लान्तमनातपत्र-
माचारपूतं पवनः सिषेवे ॥ १३ ॥

अथ पवनः वातरोगविशेषः, तं सिषेवे भेजे, कीदृशं तम्, आतपक्लान्तं घर्माभितप्तं, तथा अनात पत्रम्, अतनमातः सातत्यगमनं न आतो यस्य तादृशं पत्रं वाहनो यस्य, तम्, अथ अच्छत्रं तथा आचार पूतं समन्तात् चारः संचारो यस्य तादृक् पूतं पूतिः दुर्गन्धिः यस्य तं कीदृशः पवनः तुषारैः पृक्तः तुषाः अराणि इव उपमितसमासः, तैः पृक्तः छुरितः, तथा अनोकहाकम्पितपुष्पगन्धी, अनोकहानां अकम्पितानि पुष्पाणि तेषां गन्धः तद्वान्, कस्यां सत्याम्, निर्झराणां निर्गताः झराः येषां येभ्यो वा दूरीभूतवारिप्रवाहा इति यावत्, तेषां गिरि वाण्यां सत्यां अर्थात् दूरेऽस्ति प्रवाहः दूरे त्यक्तः वारिप्रवाहोऽस्माभिः इति उक्तवत्सु मिलितेषु जनेषु सत्सु इत्येतद्रूपायां तेषां वाण्यां सत्याम् ॥१३॥

श्री गीताजयन्ती।

"सुप्तान् सम्बोधयन्ती, शुभपथ-विमुखान्
दर्शयन्ती च मार्गम्,
दीनान् प्रोत्साहयन्ती, तदनु च ददती
कर्मयोगस्य दीक्षाम् ॥
शब्दाख्यस्यापि बोधं त्रिगुणपरतरं
ब्रह्मणो भावयन्ती,
आनन्दे प्लावयन्ती, जयतु जगति सा
कापि गीताजयन्ती ॥ १ ॥"

ले० चक्रधर शर्मा "बहुगुणः"।
सनातनधर्म कालेज, लाहौर।

पाणिनीयप्रकाशः।

ले०—म० म० श्रीदेवीप्रसादशर्म्मा, शुक्लः, कविचक्रवर्ती।

नकारस्य नकारो वा हकारे नपरे परे।
किंह् नुतेऽसौ बलं स्वीयं किंह् नुतेऽयं निजं धनम् ४१
डात्परस्य सकारस्य वा धुडागम इष्यते।
यस्योक्तौ टित्कितौ तस्य ह्याद्यन्तावयवौ क्रमात् ॥४२॥
षड्त्सन्तो नात्र विद्यन्ते षड्सन्तोऽत्र वसन्ति भोः।
कुक्टुकावागमौ स्यातां वा ङकार-णकारयोः ॥ ४३॥
परे शरि तथा जश्त्वमसिद्धत्वात्तयोर्नहि।
परे शरि द्वितीयाःस्यु श्चयः स्थाने विकल्पतः ॥४४॥
प्राङ्ख्षष्ठो भात्ययं दूरात्प्राङ्क्षष्ठोऽसौ समागतः।
प्राङ्षष्ठो हर्षदोऽस्माकं सुगण्ठ्षष्ठोऽयमीद्यताम् ४५
सुगण्ट्षष्ठो हितो नृणां सुगणषष्ठोऽर्च्यते जनैः।
नकारान्तात्सकारस्य वा परस्य धुडागमः ॥ ४६ ॥
सन्त्स किन्नागतो मित्र सन्स किम्बा पलायितः।
पदान्तस्य नकारस्य शकारे तु परे सति ॥ ४७ ॥
स्याद्वा तुगागम इति प्रोक्तवान् पाणिनिर्मुनिः।
सञ्छम्भुस्सृष्टिकर्तास्ति सञ्च्छम्भुस्सृष्टिपालकः ४८
सञ्चशम्भुस्सृष्टिहर्ता च सञ् शम्भुः परमेश्वरः।
एकं जछान्वितं रूपं द्वितीयं ञचछान्वितम् ॥ ४९ ॥
तृतीयं ञचशैर्युक्तं चतुर्थन्तु ञशान्वितम्।
विज्ञेयमिह तुक्छत्वचलोपानां विकल्पनात् ॥ ५० ॥
परो ह्रस्वतो यो ङकारो णकारो-
नकारस्तदन्तं पदं यद्धि तस्मात्।

परस्य क्रमाद् डुट् तथा णुट् तथा नुट्
भवेदागमोऽचः सदेत्युक्तमार्य्यैः ॥ ५१ ॥
प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युत इहेज्यते ।
ङमोह्रस्वात्सुटि परे पाणिनिः प्रोक्तवानिदम् ॥५२॥
अस्मिन् हि रुप्रकरणे रोः पूर्वस्याऽनुनासिको वा स्यात्
त्यक्त्वाऽनुनासिकं रोः; पूर्वात्पर आगमोऽस्त्वनुस्वारः।
विसर्गस्स्यात्पदान्तस्य रेफस्य तु परे खरि ॥
अवसाने तथेत्याख्यन्महर्षिः खलु पाणिनिः ॥ ५३ ॥
सस्पुंकानां विसर्गस्य सकारो भवति ध्रुवम् ।
सँस्कर्त्तास्म्यहमेतस्य सँस्स्कर्त्ताऽसि त्वमस्य च ५४
वा रुप्रकरणे लोपमिच्छन्त्येके समस्त्विह ।
शरः परस्य द्वित्वं स्यात्खयश्चाऽथ खयो भवेत् ॥५५॥
परस्य च शरो द्वित्वमेतत्पक्षद्वयं स्मृतम् ।
इत्थं सँस्स्कर्त्तृ शब्दस्य रूपाण्युक्तानि पण्डितैः ।५६।
अष्टोत्तरशतं वै वा लोवद्वित्वानुनासिकैः ॥
केवलं कौतुकं तत्तु विज्ञेयं बालकैः खलु ।।५७॥
परे खय्यम्परे ह्रस्वस्यात्पुम एतन्मुनेर्मतम् ।
पुँस्कोकिलः कलं रौति भाति पुंस्कोकिलः किल ॥५८॥
परे खय्यम्परे चेति निर्देशात्तु न दुष्टता ॥
प्रयोगेष्वस्ति पुंक्षीर पुंदासादिष्विति ध्रुवम् ॥५९॥
परे खय्यम्परे ख्याञादेशे रुर्न पुमो भवेत् ।
पुंख्यानमुत्तमम्भाति कच्चित्ते रोचते न वा ॥ ६० ॥

(क्रमशः)

त्वं सैव सैव जननि !

(श्रीमूलशंकर केशवराम शास्त्री)

त्वं सैव सैव जननि, प्रथितप्रतापा
द्वीपेषु खण्डनिवहेषु सनातनी त्वम् ।
दीना वयं विभव-कीर्ति-सुविक्रमेषु,
हीना विषादमुपयाम इव प्रमत्ताः ॥ १ ॥
ईड्या सवित्रि ! महतां महता महिम्ना,
विश्वस्य सम्प्रति तथैव; वयं हि तुच्छाः ।
अद्य स्थितिः स्वभवने भविके परेषां,
पापेन केन जगदम्ब विजृम्भितं तत् ॥ २ ॥
नीले त्वदीयगगने विमलेऽधुनापि
मार्तण्ड-तारक-सुधाकर-सुप्रकाशः ।
प्रालेयशैलचरणपङ्कजमर्णवस्ते
गर्जत्यमर्त्यशुभदुन्दुभिमन्द्रमम्ब ! ! ॥ ३ ॥
भित्वा तुषारगिरिनिर्मलदीर्घजङ्घां
दिव्यं पयो वहति सूर्यसुता † च गङ्गा ।
वक्षःस्थले परिवहन्ति सुधाप्रपूर्णं
स्नेहामृतं जननि. ते शतशो झराश्च ॥ ४ ॥
त्वं सैव सैव सुजला सुफला विधात्रि,
हर्षप्रकर्ष-सरसीज-सुफुल्लनेत्रा ।
कुञ्जानि चात्र गहनानि सुपुष्पितानि
क्षेत्राणि धान्यपरिपूर्णतमानि मातः ॥ ५ ॥
विश्वं प्रपूर्णमखिलं गुरुसम्पदा ते,
दीना वयं विधिवशान्ननु दुःखभाजः ।
तस्मिन् किमत्र भवती प्रकरोतु नाम ?
पुण्ये गरीयसि यशस्विनि कर्मभूमे !!! ॥ ६ ॥

† यमुना ।

किं शुद्धिर्विरोधकारिणी न वा?

(लेखकः—धर्मदेववर्म्मा शास्त्री, अलीपुर वलवां)

"नीचैः पद्यन्तामधरे भवन्तु ये नः सूरिं मघवानं पृतन्यान् क्षिणामि ब्रह्मणाऽमित्रानुन्नयामि स्वानहम्।"

अयि भोः ? मान्याः सुप्रभात-पाठकाः ? आधुनिक-जगति या हिन्दूजातीय जनहत्यादिदुर्व्यवस्था प्रचलिता, तत्र को हेतुरित्यत्र केषाञ्चनाऽनभिज्ञानां तथा विरोधोत्पादकानां' हिन्दूनामपि श्रूयत एष सिद्धान्तः, यत् त्रीणि कारणान्यत्र बोभूयन्ते, (१) शुद्धिः, (२) सङ्ग्रन्थनम्, (३) यावनमतप्रकाशक-रङ्गीलारसूलादिपुस्तकमुद्रापणम् इति । मन्मते तु नैतानि त्रीणि कारणान्यपितु (१) अस्माकं दौर्बल्यम्, (२) यावन-मत-धर्म्म-पुस्तक-कुरान-सत्त्वम्, (३) आस्माकीनसंहत्यभावः, इत्येव त्रीणि कारणानि सन्ति !

तथाहि—तत्र पूर्वं मौहम्मदास्तथाऽऽस्माकमनभिज्ञाः जना विरोधे—

प्रथमं प्रधानञ्च कारणं शुद्धिमेव गणयन्ति,—

इति हेतुस्तदीयसन्मतौ हेत्वाभास एव वरिवर्ति । यतो हि—किन्ते तवलीगाभिधां शुद्धिं न कुर्व्वन्ति । उत वा तेषामन्यधर्मणाम् स्वमतप्रवेशस्य विद्यते राजनियमः,—नत्वस्माकमिति ।

यदि-तेषान्धर्मपुस्तकेषु तत्सत्वात्तदीयन्तथा करणं सुष्ठु नाऽस्माकन्तथाऽभावादित्थङ्कार इति कथ्येत, तर्हि तदपि न स्वयं वेदे "कृण्वन्तो विश्वमार्य्यम्, इत्यादि कथनात्तथा श्रीभागवतेऽपि—

"किरात हूणान्ध्र पुलिन्द-पुक्कसा
आभीर-कङ्काः यवनाः खशादयः ।
येऽन्ये च पापा यदुपाश्रयाश्रया-
च्छुध्यन्ति तस्मै प्रभविष्णवेनमः ।

इत्यादि वचनैश्शुद्ध्या अपि वेदशास्त्र-सम्मतत्वात्।

तथा बुद्ध चैतन्यादीनान्तत्राचरणकरणत्वात्। शुद्धिप्राक्तनत्वमपि द्योत्यत एव ।

यद्यपि सा पूर्वमतोलुप्तायिताऽऽसीत्तथाऽपि मध्यकाले तु तत्प्रचारोऽविद्यतैव । तथा हि—

(२) काश्मीरे पञ्चदशशताब्द्यामल्लाउद्दीन "वुतशिकन" नामा नृपोऽभूत् । असको अनिच्छतोऽपि हिन्दून्मौहम्मदा श्चकार । पश्चात्तत्पुत्रोऽलाउद्दीनस्तु सर्व्वथैव स्वपितृविरुद्धाचरणोऽवर्तिष्ट, स तान् पुनरपि स्वधर्म्मं प्रवेष्टुमाज्ञप्तवान् । तेन बहवोऽहिन्दवः पुनरपि स्वधर्म्मं प्रविष्टाः ।

(२) शिवाजीत्यस्य वृत्तान्तस्तु सर्व्वैरपि ज्ञात एव ।

(३) महमूदेन १०६ शताब्द्यां भूय एव भारतवर्षं आक्रान्तम् । तदा पराजितस्सेवकपालस्तेन बन्दिगृहे निवेशितः । असौ पुनरपि हिन्दूधर्म्मं स्वीचकारेत्यत्र यवनेतिहासास्तथा खलफीतिहासादयोऽत्र प्रमाणम् । इति ।

किमौरङ्गज़ेबनादिरशाहादि समयेऽपि शुद्धिरार्य्यसमाजो वाऽभवद्येनाऽभूवन् हिन्दु-हत्याविरोधाः एवम्भूतेऽपि यत्तेषां तदर्थं विरोधकृतिर्मारणं तदस्माकं दौर्बल्यनिमित्तमेवेति मन्ये ।

(२) सङ्गन्थनम् + द्वितीयं कारणन्तन्मते हिन्दू-सङ्गन्थनम् । मौहम्मदा मन्यन्ते, यदेतेषां संहतिरस्मावपि क्षयकारिण्येवाऽस्माकम् ।

इति विमृश्यैव तदा तत्कार्य्यकर्त्तृनपि निहन्ति । ते प्रष्टव्याः, किन्ते "इत्तहाद" नामकं सङ्गन्थनं न विदधति । यदर्थमस्मान्निहन्ति । अतोऽत्राऽपि कारणं मे मतौ दौर्बल्यमेव भाति ।

ते तु सर्व्वथाऽपि सर्व्वतोऽपि वा एत्तहादमेव कुर्व्वाणा आसते । अपरांश्च तदर्थं निहन्ति ।

(३) तृतीयन्तु कारणम्—"तदीयमतप्रकाशक पुस्तक-मुद्रापण" मेव भाषन्ते ।

अत्राऽपि किमस्मत्तः प्राथम्यमजनिष्ट ततो वेति विचारणीयम्—

पूर्वन्तैः (१) रद्दे हिन्दू । (२) तोफ़तुल हिन्दू, (३) उन्नीसवीं सदी का महर्षि । इत्यादीनि पुस्तकानि प्रकाशितानि । पश्चादेव चास्मत्तः—

(१) रद्दे मुसिलमान् (२) तोफ़तुल मुस्लिम (३) रङ्गीला-रसूलादीनि पुस्तकानि प्रकाशितानि । अतो मन्मतौ तु नैतदप्यस्ति कारणम् । परन्तु निर्दिश्यमानान्येव कारणानि ।

आर्य्यसमाजिनामेव कारणात्तैर्निर्दिष्टानि पुस्तकानि व्यधायिषतेति चेन्न—

"तेज़े फ़कीर वर गर्दने शरीर" इति पुस्तकस्य हि श्री कृष्णनिन्दकत्वात् । इदं हि पुस्तकं श्री कृष्ण भगवतो व्यभिचारित्वद्योतकम्,-तत्र किं लिखितमिति चेच्छ्रूयताम्—

" लगाया दिल अजब शौके ज़िनह से
कृष्णे बेहिया ने गोपियों से "

४

किमेष लेख आर्य्यसमाजिपरको हिन्दूजातिपरको वा ॥

अत इदमपि न कारणमाधुनिकविद्रोहस्य, यदि भवेदपि तर्हि, किन्तदुत्तरे हत्यैव भवेदिति विचारणीयम् ।

कानि तर्हि तत्र कारणानीतिचेच्छ्रूयताम्—

(१) अस्माकं दौर्बल्यम्, (२) कुरानसत्ता (३) आस्माकीन संहत्यभावः । इति ।

तत्र (१) अस्माकं दौर्बल्यम्—

यदा वयं सबला भविष्यामस्तदा कोऽस्मान्वीक्षितुमपि क्षमः । तदाऽऽस्माकीनसबलत्वाद्विद्रोहशम एव स्यादिति । यथा सबलत्वादेते सप्तकोटिपरिमिता अपि यथेच्छमेव विदधति । अर्थात् यदीच्छन्ति, यदस्मद्धर्मो राजनियमे सुरक्षितो भवेत्तदा झटित्येव तथैव भवति । यदेच्छन्ति यदयं हन्तव्यस्तदाऽसौ व्यक्तिरवश्यमेव हन्यते । अतोऽस्मासु यदाशक्तिर्भविष्यति तदैतेऽनुचरा इवाऽस्माकं भूत्वा निवसिष्यन्ति ।

(२) द्वितीयं कारणं विद्रोहस्य कुरानपुस्तकमेव, तथाहि-यदेतान्शिक्षयति, "यदयि मदनुयायिनः,—ये मन्मताऽनुयायी न भवेदसौ क़ाफ़िर संज्ञां लभते । स सर्व्वथाऽपि हन्तव्यः । " इदं पुस्तकं राजनियमद्वारैव निषेधनीयम् । येन विद्रोहोपशमो भवेत् ।

(३) तृतीयन्निदानं विद्रोहस्य "अस्माकं संहत्यभावः" एव । मोहमदानां सन्ध्यावन्दनादौ कुरानस्यैवेश्वरीय-ग्रन्थात् साम्यमस्ति । परमस्माकन्तु किमन्यदीश्वरप्रार्थनोपासनेऽपि भिन्ने । कुतो भवेदुद्धारोऽस्माकम्, अधुना तु सानातनिकमार्य्यसामा-

जिकं वा भेदमपास्य परस्परं सम्मेलनं विधेलिमं येन विद्रोहोपशमो भवेत् ।

—:o:—

व्याघ्राचार्यो बृहल्लाङ्गूलः ।

पूर्वोभागः ।

(ले०—श्री वी. सु. रामस्वामिशास्त्री, बी. ए., बी. एल्.)

कस्मिंश्चित्समये सुन्दरवननामके महारण्ये समवेतासीन्महासभा शार्दूलानाम्। निविडवनमध्ये समीचीने भूमिभागे भीमाकृतयो बहवो व्याघ्राः पुच्छानुन्नमय्य पंक्तिश उपाविशन् । सर्वोऽप्यरण्यभागः प्रकाशितोऽभूत् एतेषां दृष्ट्यग्रैः । अमितोदरनामा प्राचीनो व्याघ्रो निवेशितश्च सभापतिपदे, ऐकमत्येन सभासद्भिः सर्वैः । स च पुच्छासनग्रहणपूर्वकमारभत सभायाः कार्यम्, अवादीच्च संबोध्य सभ्यगणम् । " सर्वे वयं व्याघ्रकुलतिलका एकत्र मिलिताः स्मः, परस्पर मंगलावहार्थम् । खलस्वभावेषु क्षुद्रपशुषु मध्ये काचित्प्रथास्ति " इच्छामो वयं वन मध्ये एकाकिन एव वर्तितुम्, परं च नास्त्यस्मासु परस्परस्नेहभाव " इति । अमूलकनिन्दावादममुं निराकर्तुं प्रवर्तामहेऽस्मिञ्छुभदिने, अभिलषामश्च सभ्या भूत्वा लभेमहि समधिकामुन्नतिमिति । दिने दिने अस्मासु जातिहितैषिता वर्धतां वयमपि नाना विधान्पशून् मारयित्वा सुखिनश्च भूयास्मेति " प्रार्थये पशुपतिं परमेश्वरम् ।

(सभामध्ये लांगूलचटचटारवः)

हे भ्रातृवृन्द ! संक्षेपतो विवृणोमि यदर्थं वयमत्र मिलिता इति । सुविदितमस्माकमिदं सुन्दरवनवासिव्याघ्रसमजे विद्या क्रमेणाल्लुप्यदिति । पुनरपि वयं पण्डिता भवेमइति नितरामभिलषामः। एतत्समालोचनार्थमेव मेलितैषा मण्डली । अनुमोदन्तामत्रभवन्तः सर्वे । कालेऽस्मिन् सर्वेऽपि भवन्ति विद्वांसः । वयमपि भवामः, किमत्र दुःसाधम् । (सभापतिः समापयद्वक्तृताम्)

परंच कतिभिः सभ्यैः कृतान्यनेकानि व्याख्यानानि । सकलानि व्याकरणशुद्धानि अलङ्कारविशिष्टानि च । किन्तु शब्दविन्यासभ्करी अतिभयावहा। कंपितमेवाभूत्सर्वं सुन्दरवनं वक्तॄणां भीषणस्वरेण। पश्चात्सभापतिरवोचदिदम् । एतद्वनवासी महापण्डितो व्याघ्रो बृहल्लांगूलनामधेयः स्वीकृतवान्पठितुं मनुष्यसंबन्धिनमुपन्यासमेकम् ।

अवधत्त किंचित् । 'मनुष्य' शब्दश्रवणमात्रे नवीनसभ्याः केचिद् दर्शयन् लालसाम् । किन्तु "पब्लिक् डिनर" स्य (Publice dinner) सूचनाम दृष्ट्वा तूष्णीमेवातिष्ठन् । बृहल्लांगूलोऽपि सादरमाहूतस्सभापतिना गर्जनपूर्वकमुदितष्ठत्, समारभत च पठितुं पथिक-प्रीतिविधायकस्वरेण निम्नलिखित मुपन्यासम् ।

सभापतिमहाशय, शार्दूलगण ! मनुष्य एकप्रकारो द्विपाज्जन्तुः, पक्षाभावेन स पक्षिगणेषु न गण्यते । चतुष्पदपशुना सह तस्यातीव विद्यते सादृश्यम् । चतुष्पदपशोरासते यानि यान्यस्थीनि तादृशान्येव विद्यन्ते मनुष्यस्यापि । अतएव मनुष्य एकविधश्चतुष्पात्पशुरिति कथ्यते । एष एव प्रभेदः

यत्, चतुष्पदस्य यादृशी घटनापरिपाटी विद्यते, तादृशी नास्ति मानवस्य । एतन्मात्रभेदनिमित्तेन मनुष्यं द्विपदमिति कृत्वा विद्वेष्टुं न युज्यतेऽस्माकम् । पण्डिता वदन्ति, कालक्रमेण जायत उत्कर्षः पशोरवयवानाम् । एकविधावयववान् पशुः कालक्रमेण उत्कृष्टतरस्य पशोरन्यस्याकारं क्रमशः प्राप्नोति । विश्वसिमो वयं मनुष्यपशुरपि कालक्रमेण लाङ्गूलाद्यलंकृतो भूत्वा वानरो भविष्यतीति । मनुष्य पशुरतीव स्वादुस्सुभक्ष्यश्च । (व्याघ्रगणस्सर्वो व्यादात् स्वस्ववदनं) । सुशकं तमनायासेन मारयितुम् । जगदीशो व्याघ्रजातेराहारार्थमेव मनुजानसृजदिति मन्ये । नास्त्यत्र संशयः कोपि । अतएव व्याघ्रोपादेयपशोर्नरस्य पलायनेऽथवात्मसंरक्षणे, न दत्तवान् सामर्थ्यमीश्वरः । व्याघ्रसेवां विना न पश्यामः प्रयोजनान्तरं जीवितस्य तेषाम् । अतएव तन्मांसस्वादुताहेतोश्च मनुष्य जातिरेवातिप्रियास्माकम् । मनुष्यो दृष्टमात्र एव धर्तव्योऽस्माभिः। किंचाश्चर्यावहमेतत्, मनुष्याः पुनस्सुतरां व्याघ्रभक्ताः । यद्येतां वार्त्तां न विश्वसिथ, तदा यन्ममाघटत वृत्तम्, तदुदाहरणरूपेण निवेदयाम्यधुना । सुविदित मेवात्रभवतां यत् वयं चिरं देशानटित्वा बहुदर्शिनो भवाम इति, यस्मिंश्चिरमभ्रमाम, सविषयोऽस्मात्सुन्दरवनादुत्तरस्मिन्नास्ते । धेनु-महिष-मनुष्यादिरहिंस्रः क्षुद्रपशुरेव वसति तत्र । एकदागममं विषयकर्मोपलक्ष्यात्तं प्रदेशम्, (श्रुत्वा महादंष्ट्रनामा उद्धतस्वाभावो व्याघ्रयुवक अपृच्छद्धक्कारं) किं विषयकर्मेति । प्रत्यवोचदुपन्यासकः "आहारान्वेषणमेव 'विषयकर्म' वदन्ति सभ्या जनाः । संभ्रान्तलोकस्य आहारान्वेषणस्य नाम विषयकर्म । असंभ्रान्तलोकस्य तु तदेव द्यूतम्, चौर्यम्, उञ्छवृत्तिः, भिक्षावेति नानाविधैर्नामभिः व्यवह्रियते । धूर्तस्याहारान्वेषणस्य नाम चौर्यम्, बलवतस्तु तदेव दस्युतेत्यभिधीयते । लोके पुनर्दस्युताशब्दो न व्यवह्रियते । तत्परिवर्तनेन, तमेव वीरत्वमिति जना वदन्ति । दस्यो र्दण्डप्रणेतुः कार्यस्य नाम प्रभुता । यो दस्युस्स्वयं दण्डप्रणेता न भवति; तस्य कार्यस्य नाम वीरत्वम् । उदरपूजायाः स्मरणेन बुध्यामः, यत् वीरत्वादीनि नामानि सकलानि । यथाकथं वा भवतु । यद्यद्वदामि तत्तत् श्रुणुत सावधानम् ।

मनुष्याः सुतरां व्याघ्रभक्ताः । विषयकर्मोपलक्ष्यात् प्राविशमेकदा मनुष्यवसतिमध्यम् । वंशरचिते मण्डपे निशाम्य मांसलं नृत्यशीलं मेषवत्सं तदास्वादनलोलुपस्तत्र पदमकार्षम् । पश्चादज्ञासिषम्, यत्, एतन्मण्डपं पञ्जरमिति वदन्तीति । प्रविष्टमात्रे मयि संवृतमभूत् द्वारमेतस्य । तत्रागताः जनाः संप्राप्य मद्दर्शनं अमोदन्त नितराम् । अशक्नुवंश्च मद्विषये तत्कृतां भूयसीं प्रशंसामप्यवगन्तुम् । केचित् दंष्ट्रयोर्मम, परे नासिकायाः, अन्ये लाङ्गूलस्य गुणानारभन्त गातुम् । परंच दारान् सोदरान् अन्यांश्च बन्धून् संबोध्य प्रियवचनैरभाषन्त मां प्रति । ततो भक्तिनो मण्डपाधिरूढं मां स्वस्कन्धोपर्युत्थाप्य श्वेतवर्णेन वृषभद्वयेनोढे शकटे मामारोपयन् मण्डप सहितम् । दृष्ट्वा अनडुहौ मम अतीव क्षुधाया आसी दुद्रेकः, किंतु नापारयम् मण्डपाद्बहिर्गन्तुम् । अहं पुनः चर्वं चर्वं छागमांसं सुखेनाप्रापं प्रासादं गौरस्य नागरिकस्य जनस्य कस्यचित् आगतमात्रस्यममाराधनार्थम् । स भद्रपुरुषः स्वयमेव द्वारदेशमागत्य अभ्यर्थयन्मां सविनयम् । ममवासार्थं निरदिशन्म-

एडपमेकं लोहदएडमरिडतम् । सेवार्थं मम न्ययुङ्क्त विनीतं सेवकमेकम् । स्वादुभिर्मांस शोणितैराराधयञ्च मां सादरम् । ततस्सजीवस्य वा सद्योमारितस्य मेषस्य धेनोर्वा मांसमास्वाद्यास्वाद्य सुखेनावसमेतस्मिन्नेव प्रकोष्ठे । इच्छा नाभूत्प्रतिनिवर्त्तितुम् । तथापि नापारयं त्यक्तुं स्वदेशवात्सल्यम् , जननी जन्मभूमिश्च स्वर्गादपि गरीयसी । यदा यदैषा-जन्मभूमिर्मानसे ममास्फुरत्, तदातदा "हाउ" "हाउ" कृत्वा प्राभवं गर्जितुम् । हे जननि ! सुन्दर वनि ! कथं त्वामहं विस्मरामि ? यदा मन्मनसि त्वमाविर्भवसि तदाहं परित्यजामि धेनुमांसम् । जहामि मेषमांसम् । (अर्थात् त्यजामि अस्थिचर्ममात्रम्) लांगूलाघातद्वारा सदा प्रकटयामि लालसां मम । यस्मिन् दिने त्वां नाहं दृष्टवान् तदा क्षुधामप्राप्य नैव खादामि,निद्रामलब्ध्वा न स्वपिमि। यावद्धरामि जठरे तावन्मात्रं भुंजे। तदुपरि भक्षयामि त्रिचतुर "सेटक" मात्रं मांसम् । तदुपरि न खादामि (वक्ता धैर्यमवलम्ब्य पुनरप्यारभत वक्तुम्) एकस्मिन् दिवसे मदभिप्रायं ज्ञात्वा वा प्रमादाद्वा सेवकः मन्दिरस्य मार्जनान्ते द्वारदेशमसंवृत्यैव गतवान् । अहंतु द्वाराद्बहिरागत्य उद्यानपालकमदृष्ट्वा पलायमानो झटित्येवागममेतदरण्यम् ॥

मनुष्याः क्षुद्रकाया अपि निर्मान्ति पर्वताकाराणि मन्दिराणि । कदाप्येतादृशगृहाणां निर्माण समये वयं न प्रत्यक्षीकृतवन्तः । एते पुनस्स्वयमेवैतानि निर्मान्तीति प्रमाणाभावः । एष गिरिरेवास्माकं मन्दिरम् । आस्तामेषा स्वभावसृष्टिः । बहुगुहा मरिडतानेतान् महागिरीन्निशाम्य बुद्ध्याजीवी मनुष्यः स्वयमेवाश्रयत् तानेव पर्वतान्।

मनुष्यजन्तुरुभयाहारी, मांसमपि खादति, तृणमूलान्यपि । मनुष्याः फल-मूल-गुल्मादीनि भुंजताम्, नाहं जाने किमर्थं शष्पाणि नाभ्यवहरन्तीति । यत्र कुत्रापि तृणभोजिनं मनुष्यं नाहमपश्यम् । ममास्ति संशयः कोप्यस्मिन् विषये । गौरवर्णा नरा धनिनश्च कृष्णवर्णाः स्वीयेषूद्यानेषु शष्पाणि वर्धयन्ति सादरम् । आहारार्थमेवेति मन्ये । नो चेत् तृणवर्धने किमर्थमादरः प्रयासश्च । मनुष्यास्तृणानि आहरन्तीति, कथां कृष्णवर्णस्य मनुष्यस्य कस्यचिन्मुखादेवाश्रौषम् । 'साहेब'वदुषित्वा,धनानि च व्ययित्वा,कश्चिद्धनवान् तृणं खादितवान् इति । मनुष्याः पुनर्नाहरन्ति बृहतीः शाखाः । किन्तु पक्त्वा भुञ्जतेऽल्पीयांसि सस्यानि । सस्यानि भूमावुत्पाद्य रक्षन्ति । रक्षितप्रदेशं कथयन्ति क्षेत्रं वा उद्यानं वेति । एकस्योद्याने न प्रभवत्यन्यः प्रवेष्टुम् । क्रोधातिरेकान्मनुष्यो वदति,किमहं तृणं खादामि इति। जानाम्यहं मनुष्यस्वभाव एषः यद्यत् कार्यं कुर्वन्त्येते न तद्गूहयन्त्यतियत्नतः। मां यथाऽपूजयन्नश्वानपि तथैवोपासते। घोटका मनुष्याणां श्रेय इति निश्चयमेतत् । ते पुनः छागमेषगवादीनपि पोषयन्ति नितराम् । तेषां गोसंबन्धीव्यापार आश्चर्यावहः । पिबन्ति गवां दुग्धम् । तस्मात्पूर्वकालिका व्याघ्रपरिडता स्सिद्धान्तितवन्तः कस्मिंश्चित्काले मनुष्याःगवां वत्सा अभूवन्निति । तस्माद्वध्यामि, मनुष्यस्य गवा बुद्धिगतं सादृश्यमस्तीति । धेनुछाग–मेषादीनाहारार्थं एव पोषयन्ति । प्रस्तौमि चाहं गेहानि निर्माय वयमपि नरान् पालयिष्यामः इति । परमपरे हस्ति-गर्दभ-कुक्कुर-बिडालादयोऽपि सेव्यन्ते मनुष्यैः । अतएव मनुष्यजातिः सकल पशूनां भृत्येति कथ्येत । अद्रात्तं मनुष्यालये वानरा-

नपि । मनुष्यचरित्रमतिविचित्रम्, तेषां विवाहरीति कौतुकावहा । पश्चाद्विवृणोमि तां सरणीम् ।

सभापतिरमितोदरो दूरे दृष्ट्वा हरिणशिशुमेकं जवादुदतिष्ठदासनात्, सरभसमन्वधावच्च तमर्भकम्। एवममितोदरो दूरदर्शीति ज्ञात्वैव सभ्यैर्निवेशितस्साभापत्ये । यस्यां दिशि सगतः तामेव ककुभं प्रातिष्ठन्तान्येऽपि सभासदः । व्याघ्र महासभेत्थमकाल एव भग्नाभूत् ॥

भूदेवमहत्वम् ।

[ले०—श्रीगङ्गाविष्णु शास्त्री, मुलतान]

विपद्घनध्वान्त-सहस्र-भानवः,
समीहितार्थार्पण-कामधेनवः ।
अपार-संसार-समुद्र-सेतवः,
पुनन्तु मां ब्राह्मण-पाद-पांसवः ॥

उद्धृतपद्यम् ।

अयि ! सद्विद्योद्यन्नूतन प्रतिभाजन्याऽनवद्यहृद्य-गद्यपद्य-वैशद्य-माधुरीमधुरवाचः ! सकलगुणगम्भीरता-तिरस्कृतमहासमुद्राः ! जिज्ञासुजनमानसमुद्राः ! निरन्तर-विद्यादान-सन्तान-तिरस्कृत-सन्तानाः ! परोपकृतिकृतिचिन्तासन्तानवितानैकतानाः ! ब्राह्मणमहाभागाश्च ! पाठकमहाभागाः !

निगम-निगमाङ्गागम-प्रकाशरते, समस्तदेशान्तर्वर्तित्तमस्ततिनिवृत्तिनिरते, अखिलदेशजातिकुलानामादर्शभूते, देवभूमिभूते, भूतधात्री-समुद्भूत प्रभूत-भूतनाथ-ध्यानभूतभावनानाम्, भूतार्थ (सत्यार्थ) प्रतिपादनक्षमानाम्, क्षमासमान-क्षमानाम्, श्रीवशिष्ठ-वाल्मीकि-पराशर-व्यास-शुक-शौनकात्रि-च्यवन-जैमिनि-कपिञ्जल-पतञ्जलि-पाणिनि-कैयट-कणाद-पिप्पलादिमहात्मनां पूतात्मनां मण्डलैर्मण्डिते, प्राचेतस-व्यास-भास-भारवि-श्रीहर्ष-बाण-भवभूति-कालिदासादिकवि-पुङ्गवराजि-राजिते, भट्टोजिदीक्षिताऽप्ययदीक्षित-नागेशभट्ट-गदाधरभट्ट-जगदीशभट्टाचार्यादिकोविद-सनाथिते, भरतप्रतिष्ठापिते, भा-रते, भारतेऽनादिकालादेव देवशंकासा भूदेवा अनुत्तमं-सर्वोत्कृष्टतमं स्थानं, ज्ञानप्रकर्षाज्जगति जायमानानाम् मनुतनुजनुषां मध्ये सर्वश्रेष्ठां पदवीञ्चाविन्दन्त । नाऽत्रकोऽपि संशीतिलवः । निरस्तसमस्तमानवस्वान्तखेदाः शब्दात्मक-ब्रह्मरूपा वेदा ब्राह्मणानामुत्पत्तिम्-विश्वाधारस्य-विश्व-नियामकस्य-विश्वविश्वकर्तुर्विराट्स्वरूपस्य, सर्वात्मनः परमात्मनो मुखादेव प्रणिगदन्तीति नाऽविदितं विदितवेदितव्यानां भव्यानां महानुभावानां भावानाम् ।

स्मृतिकारचक्रचूडामणिर्मुख्यप्रजापतिरिद्धबोधो बुध-विबुधाग्रगण्यो यशसा वरिष्ठो वृन्दिष्ठः स्वायम्भुवमनुर्महतीं-भगवतीं श्रुतिमनु, प्रथमाध्यायत एव भूसुरस्तुतिसन्ततिं प्रतिपादयन् , निम्नोक्तयुक्तियुक्तव्याहरणान्नजात्वपि व्यरंसीत् यज्जन्मन एव ब्राह्मणमूर्तिर्धर्ममूर्तिः ।

धर्मार्थमेवाऽयं विश्वस्मिन्नस्मिन् विजायते । विजायमानोऽयं जागतिकपदार्थसार्थपरिवृढः । अपरे जना अकम्पानुकम्पानुकम्पार्णवस्य भूदेवस्याऽनुकम्पा-कटाक्षपातेनोपयोगार्थं सांसारिकपदार्थानुपाददते ।

भारतविज्ञानम्, भारतदर्शनानि, धर्मशास्त्राणि, अर्थशास्त्राणि, ज्यौतिषम्, आयुर्वेदः,वनस्पति विज्ञानम्, भूगर्भविद्या, सर्वातिरिच्यमानं ब्रह्मविज्ञानञ्च ब्राह्मणानामप्रतिमतपस्यायाः प्रखर-प्रतिभायाश्च जाज्वल्यमानानि निदर्शनानि सन्ति । संक्षेपतः ब्राह्मणान्ववाय-गौरवे भारतीयगौरवस्य प्रशस्यं रहस्यं प्रच्छन्नमेव वर्वर्त्ति ।

किमधिकमुच्येत, सृष्टिसृजनदक्षः करुणासिन्धुः सर्वबन्धुरनाथनाथो विश्वनाथो ब्राह्मणजातिविरचनायां स्वरचनाचातुरीमेव प्राचोकटत् , परं तद्रचनाया अखर्वं-गर्वं प्रभुर्विभुरद्यापि न जहाति ।

यथोत्कृष्टशिल्पकर्मव्यापृतः शिल्पी यदृच्छया निर्मित-सुन्दरं वस्तु विलोक्य मोमुदिति, तथैवाऽयं जगच्छिल्पी सकलोदात्त-गुणोपेत-ब्राह्मणजातिनिर्मितं निभाल्यामन्दमानन्द

सन्दोहमनुभवन्; तत्कल्पनायां न केवलं गर्वायते, परमेतज्जाति गुणगणे मुग्धायत एव ।

प्राचीनकालिकाः सुरनदीस्नाता वेदशास्त्र-निष्णातास्त्रुटितभवबन्धव्यतिकराश्चित्तान्तर्विषमविषयाशीविष-गता अकिञ्चना अपि शमधनिनः, अनिकेतना अपि सत्यकेतनाः, मनस्विनो यशस्विनः, परमतपस्विनो । धर्मिष्ठाः, आत्मनिष्ठाः, सन्मङ्गलौघकरणीं, विपत्तेर्हरणींसंसारसिन्धुतरणिम्, तमोऽन्धे तरणिम् (सूर्यम्) अद्वैततत्त्वजननीं जननीं पुराणीममर्त्यवाणीं सेवमानाः, सुकृतचयचित्तैकशरणमाननीयाः, ब्राह्मणाः पर्णकुटीरेषु निवसन्तः, स्वेच्छया विलासैश्वर्यादिकं विहाय, केवलं धर्मज्ञानानुशीलनेऽहोरात्रमतिवाहयन्तः, भुवनत्रयमुपकृतिकृतिभिः प्रीणयन्तः, अशेषदुःखशमनव्यापारदक्षं श्रेयोमार्गमपरान् वदन्तः, परगुणपरमाणूनपि पर्वतीकृत्य नित्यं निजस्वान्ते विकसन्तः, स्वयमाम्नायाऽध्ययनरतिजनितेनाऽमन्देनाऽऽनन्देन विलसन्तः, आत्मज्योतिषा प्रसीदन्तः, न जात्वपि विषीदन्तः, पुत्रान् शिष्यान् सर्वाङ्गसुन्दरीं सौपर्वणीं सौवर्णीं वाणीमध्यजीगपन् ।

राजन्यानां कृते राज्यसुख-भोगं, वैश्यानां कृते वाणिज्य व्यवसायद्वारा धनानन्दसुखं कृत्वा स्वयं भवरतिविरताः केवलं शरीरयात्रानिर्वाहाय भिक्षां भिक्षित्वा तदन्नेन जठरपिठरपूर्तिमरचयन् । सज्जनजन-शान्त-शान्तवृत्तिमिवातिस्वच्छं, कुन्दकुसुम--कर्पूर-नीहारवदतिधवलं बलप्रदम्, अच्युतचरणच्युतम्, त्रिपुरारिशिरश्चारि, पापपुञ्जहारि मनोहारि गाङ्गं पयो निपीय, तत्प्रभावेणातिगहनब्रह्माद्वैत तत्त्वराद्धांताटवीस्वच्छन्दसंचरणपञ्चाननप्रभावाः साहित्य पाथोनिधि-मन्थनमन्दरायमाण-प्रतिभा-विभवा आर्त्विजीना अनूचाना अश्वस्तनिकवृत्तयो विश्वजनीनवृत्तयः, धर्मसंतानसुवः, वाचंयमाः, स्थाण्डिलशयिनः, सत्यवद्याः, अनवद्याः, लोकोपकृतये, अज्ञानततिहतये शास्त्राणि, पुराणानि, नाटकानि, तथोच्चावच ग्रन्थराशीन् व्यरचयन्; यैः संसारस्य प्रभूतोपकृतिमन्वतिष्ठन् ।

मान्याः ! एतद्गुणगणगौरवावर्जितहृदयाः, सदय-हृदयाः नरपतयः, प्रभाते प्रदोषे च सामवेदगानेन तपोवनवासिनामानन्दराशिं समेधयतां महर्षीणामपनीतपान्थक्लमेषु पवित्राश्रमेषु सदा सदारदारिका विवसन्तः तच्चरणपायोषु बिलुठन्तः कतिपयसमयं तान्समयाऽतिवाह्य, ऋषिगणं परिचरन्तः, काननेषु विचरन्तः सदाचारवन्तः सद्धर्मवन्तः सन्तः राजनीतिशिक्षा मशिक्षन्त ।

तद्वदपरद्वीपवासिनोऽपि 'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।" इतिमनूक्तदिशा, एतज्जम्बूद्वीपान्तर्गताल्लब्धसमस्तोत्कर्षाद् विहित-सदुपदेश-पीयूषवर्षाद् भारतवर्षात् समुद्भूतानां प्रभूतानां भूदेवानां सकाशान्न केवलं विद्यां परं स्वं स्वं चरित्रमेवाऽप्य शिक्षन्त । यतः प्राणिमात्ररक्षायास्तेषु विज्ञानज्योतिः प्रसारणस्योत्तरदायित्वात्तैरात्मन्येव निहितमासीत्तदेव निजपवित्रनिर्मलधर्मभावेन पूर्णेन चरित्रबलेन महत्या योग्यतया च निर्व्यूढ मासीत् ।

एतदर्थं तदात्वे परोपकारमयजीवनानां निःस्वार्थपराणां करुणा-वरुणालयानामेषां करुणयाऽऽदर्शवतां चारु चरित्रवतां भूपानां समाजानाञ्चाभावो नावर्तिष्ट । सभाजनीयाः ! सत्यमिदं यत्सदा जागतिककल्याणाय निजसर्वस्वोत्सर्गमपि विदधतां समाजार्थमादर्शस्वरूपाणां देवरूपाणां भूदेवानां समाना नाऽपरा कापि जाति र्लब्धसमस्तोत्कर्षं भारतवर्षं विरहय्य, दृष्टिपथमवतरिष्यति ।

इदानीमितिवृत्ते सुवृत्ते सुचारुतया चारुचारितानां भवतां दृष्टिराकृष्यते । नाऽसौ शुभमयः स्मृतिसरण्या अपेतो भवताम्भवताम्, यत् भूदेवा न केवलं विद्यया, तपसा, परं कायेन कष्टजातं सोढ्वाऽपि समाजमरक्षन् । तत्समाजसेवाप्रतिज्ञानेऽवदानसक्ताः ' सम्मानाद् ब्राह्मणो नित्यमुद्विजेत विषादिव इत्युक्तेः मानधनिनः सन्तोऽपि मानं नाचीकमन्त ।

अत्राऽस्मत्पूर्वजा द्विजा अस्मद्धर्मसम्प्रवर्तका ऋषयो महर्षयः धर्मरक्षायै, अज्ञानहत्यै, विज्ञानोन्नत्यै, परोपकृत्यै संसारे सर्वातिशायिनं त्यागं विधायेदमपि याथातथ्येन इदं आदर्शकान् प्रत्यदर्शयन्, यद्देश-धर्म-सेवार्थमकिञ्चना निखिलामापदं तपोधनास्तपस्विनो मनस्विनः--सर्वंकष्टम्, सानन्दं सोढुं सदा बद्धपरिकराः सन्ति ।

पुरा वृत्रासुरादिक्षणदाचराणां प्रबलपराक्रमैर्वित्रस्ता (चकिता) विद्रुता पलायिता) भयभीता देवसेना विह

धृतिरभूत् । नैजरक्षणमुपायमनालोक्याऽऽत्मना स्वयमेव सुराधिपस्तपस्याकारणेनाऽसाधारणेनास्थिककङ्कालावशिष्टं विशिष्टगुणोपेतं महर्षिपुङ्गवं दधीचिनामधेयं नैजवज्रनिर्मितिहेतवे तदस्थिभिक्षामभिक्षत । तद्वाक्यकर्णगोचरीकरणसमकालमेवाऽसौ परमत्यागी तपःक्लिष्टो सूदेवद्वन्दिष्टो भूसुरः सुराणां धर्मपक्षस्य च विजयार्थं निजशरीरास्थिजातं वितीर्य, ब्राह्मणजातेरादर्शत्यागस्य मूर्तिमन्तमुदाहरणं सार्वदिके साहित्य सुवर्ण-फलके समस्थापयत् ।

हाहन्त । कियतीनामेयमुक्तिक्तेः पराकाष्ठा । एतद्गुणगणकारणेन ब्राह्मणाः सर्वजनस्वान्तेषु राज्यमकुर्वन् । तस्मिन् रमणीयसमये शुभमये सदाचारेण, धैर्येण, क्षमया, विद्यया, प्रतिभया, विज्ञानेन, आचरणेन, व्यवहरणेन, सत्यव्यवहारणेन च मूर्तिमतामेव सनातनधर्माणाम्, शान्त्या, शुचितया, जितेन्द्रियतया चाहमहमिकया समालिङ्गितशिरोधराणां भगवदाराधनदत्तचेतसाम्, उदारगुणावदातसचेतसाम्, सुमेधसाम्, निरेनसाम्, संयतरेतसाम्, अप्रतिमप्रतापानाम्, निजप्रताप-निर्जिततपन-प्रतापानामेषां महामहिममहितानां महसा महीपतयोऽपि वेपन्तेस्म । स्मर्यतां भूतपूर्वःसमयः, यदा गाधेयः, रक्षोभिरभ्याहतकर्मवृत्तिः कर्मठो महाराजं दशरथं निकषा श्रीरामचन्द्रं याचितुमायात्तदा किंकर्त्तव्यताविमूढो दोलायितचित्तवृत्तिः सन् पङ्क्तिरथो (दशरथ-) मनसि मीमांसाम्बभूवः—

'क्रुध्यन् कुलं धक्ष्यति विप्रवह्नि-र्यास्यन् सुतस्तप्स्यति मां समन्युम् । इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य ।' अत्र महाराजो दशरथः प्रेष्ठप्रष्ठमपि प्राणप्रियमपि श्रीगाधिनन्दनप्रभावप्रभावितः, तत्प्रतापानलजातसाध्वसः श्रीरामचन्द्रं ससौमित्रिं प्रजिघाय ।

भगवान्, तत्रभवान्, मर्यादापुरुषोत्तमः, धर्मोद्धारायाऽवतीर्णः श्रीजनकजाजानिर्ब्राह्मणोत्कर्षविषय मुद्दिश्यैतदेव व्याचष्टे, यत्

विप्रप्रसादाद् धरणीधरोऽहं विप्रप्रसादात्कमलावरोऽहम् ।
बिप्रप्रसादादजिता जितोऽहं विप्रप्रसादान्मम राम नाम,

अग्रे निर्वर्ण्यतां रामायणीयः प्रसङ्गः, मिथिला नगर्यां मिथिलेशानिकेतन-संस्थानं चन्द्रमौलिशरासनं खण्डशः कृत्वाऽखण्डपराक्रमां मिथिलाधिराजनन्दिनीमुपयम्य, वरयात्रया सह पथि परापतन्तं रघुवंशकेतुं संसारसन्तरणैकसेतुं श्रीदाशरथं तरुणेन्दुशेखर-शरासन-भङ्गजात-कोपः, वक्षसि विशङ्कटः (विशालोरस्कः), सम्पन्न-ताल-द्वयसः, भीष्मः, धनुष्मान्, उपजान्वरत्निः, कार्त्तस्वर-भास्वराङ्गयष्टिर्भार्गवः भास्वरेण तारस्वरेण यदा युद्धायाह्वत, तदा श्रीरामचन्द्रः स्पष्टमेव व्याजहार ।

"भोब्रह्मन्, भवता समं न घटते संग्रामवार्ताऽपि नः, सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्धनि । यस्मादेकगुणं शरासनमिदं सुव्यक्तमुर्वीभुजाम् युष्माकन्तु सदैव तन्नवगुणं यज्ञोपवीतं बलम् ॥" "जातःसोऽहं दिनकरकुले क्षत्रियश्रोत्रियेभ्यः, विश्वामित्रादपि भगवतो दृष्टदिव्यास्त्रपारः । अस्मिन्वंशे कथयतु जनो दुर्यशो वा यशो वा, विप्रे शस्त्रग्रहणगुरुणः साहसिक्याद्बिभेमि ॥" हनुमन्नाटकम् ।

अत्र भास्वरभास्करान्ववायोद्भवः, युद्धायालंभविष्णुरपि रोचिष्णुमुखस्य विष्णोरवतारः, जिष्णुर्भूदेवमानवर्धिष्णुः, धृष्णुः (शत्रुविध्वंस-प्रगल्भः), सबलारातिजनबलनिराकरिष्णुः, दुर्यशो यशो वा नाजीगणत् । पर्यवसितौ, यदाऽऽबद्धभीमभ्रुकुटीविहङ्गः, शेश्वीयमानारुणरौद्रनेत्रः, परशुरामः परशुमादाय, निम्नोक्तं वच उदैरयत, यदिदानीमेष मे कठोरधारो निष्करुणः कुठारः कण्ठं ते विशतु तत्प्रवीरोभव, तदैतत्परशुराम परुषभाषणमाकर्ण्याऽपि सरलप्रकृति विगतविकृतिः, धन्यधन्यः सुगृहीत-नामधेयो भगवान् भास्करवंश-भास्करः संयोजितकरः सप्रश्रयमभ्यधात्—

'हारः कण्ठं विशतु यदि वा तीक्ष्णधारः कुठारः
स्त्रीणां नेत्राण्यधिवसतु नः कज्जलं वा जलं वा ।
संपश्यामो ध्रुवमिह सुखं प्रेतभर्तुर्मुखं वा,
यद्वा तद्वा भवतु, न वयं ब्राह्मणेषु प्रवीराः ॥ प्रसन्नराघवम्

अथ, जीवतो वाक्यपालश्च मृताहे भूरिभोजनम् ।
गयायां पिण्डदानञ्च—त्रिभिः पुत्रस्य पुत्रता ॥

उपर्युक्तं युक्तियुक्तवाक्यं चरितार्थयितुमभियुक्तः पितुर्नियोगेन काननं प्रति प्रस्थितः, स्वप्राणवल्लभाया जनकजाया अन्वेषणयुतः, सुग्रीवाभिधकपिपतिना समं मैत्रीञ्चकार, राघवं प्रशस्यं वयस्यमासाद्य नतग्रीवः सुग्रीवः स प्रणयं प्रण्यगदत्, भगवन् ! यावदेकेन शरेण

देवस्य सकृदेव सप्ततालच्छेदो न स्यात्तावद्धि मम ज्येष्ठभ्रातु र्बलिनो बालिनः (बालेः) निग्रहणं साम्प्रतमसाम्प्रतं मां प्रतिभाति ।

इत्थं तद्वचनोत्तजितो न केनाऽपि जितो धनुष्पाणी रामः शपथ-पूर्वकमुपदेशपूर्णं नूनं निम्नोक्तं वचः सुग्रीवं प्रत्यपादयत् ।

'भावोऽस्ति चेत्कुशिकनन्दन-पादयोर्मे, यद्यस्म्यहं द्विजतिरस्कृत-रोषहीनः । नान्याङ्गनासु च मनो यदि सप्त तालान् भित्वा तदा प्रविश भूतल मप्यगाधम्" इति ।

पाठकमहाभागैरवालोकिषत भगवतो महानुभावस्य श्रीरामचन्द्रस्य मुखारविन्दान्निःसृता नैसर्गिका भावाः ।

(क्रमशः)

कन्या गुरुकुलम् ।

[ले०-श्रीमती सीतादेवी, विशारदा]

[एष निबन्धो देहरादून-कन्या-गुरुकुल-जन्मोत्सवावसरे श्रीमत्या सीतादेव्या पठित आसीत् । एषा श्रीमती सीतादेवी, कांगडीगुरुकुलस्य प्रधानाध्यापकानामध्यापक श्रीरामदेव महोदयानां पुत्री वर्तते । तदस्या भगिन्या अयं निबन्धःसादर मस्माभिर्यथायथं प्रकाश्यते । —सु० सं०]

अयि सारासार-विचार-महनीय-मते ! संसत्पते ! विविध शास्त्रावगाहन-श्रुतिगीति-जनित-महिम-समुपलब्ध-लभ्याः सभ्याश्च !

इदन्तु नाविदितमेव तत्रभवतां यदस्यां भारतीय-वेद्यां कीदृशा ज्ञान-विज्ञान-निधयः, कपिल-कणाद-गौतम-वशिष्ठ-प्रभृतयो यतयः, प्रचण्ड-दोर्दण्ड-खण्डिताखण्डशत्रुमण्डला रामकृष्ण-भीष्मार्जुन-प्रताप-पृथ्वीराज-शिववीरादयो वीरवराः, विश्वामित्र द्रोण-कृपाचार्य्य-सदृशाः गुरुवर्य्याः, स्वकीय-सत्यव्रत-कम्पित-सुरेन्द्रशासनाः हरिचन्द्र-प्रमुखा व्रतिनः, निजभुजार्जिताक्षयकोशराशयः कुबेरतुल्या धनपाः, अरातिगृहीतसम्पदः, क्षुत्पिपासाशुष्क-कण्ठाः कृश-कलेवराः, प्रतापसिंह-सन्निभा मानिनः, स्वकीयया सरस्वतीनिभया अलौकिक प्रतिभया शक्त्या च मूकीकृतवादिवृन्दाः बुद्ध-शङ्कर दयानन्दाद्याः स्वनामधन्या महोदयाः मानवाः ।

भगवतो धर्मस्य प्रसवभूमिरिव उत्पातकेतुरिव कल्मषस्य, अखिललोकललना-ललामभूता जगज्जननी जानकी, हतोत्साहेष्वपि प्रियजनेषु वीररस प्रवाह-प्रवाहिनी द्रौपदी, अगणितमतिवितत गणित-तन्तुः लीलावती, अन्या अपि निज-चारित्र्य परिपूत-वसुन्धराः शैव्या, सावित्री, दमयन्ती प्रधानाः तथा यवन-राज-कालीनाः इतिहास-प्रसिद्धाः अवला अपि सबलाः पातिव्रत्यमेव सर्वस्वं मन्यमानाः ललना लेभिरे । परं नराणां नारीणां च तस्मिन उत्कर्षे कोऽयं उपायो नाम इति यदि विचार दृशा विलोकयामस्तदा शिक्षोत्कर्ष एव तदुत्कर्ष-निदानमवगच्छामः । केयं शिक्षा नाम । अत्र शास्त्रं वदति—

मातृमान्, पितृमान्, आचार्यवान्, पुरुषोवेद इति पितृभ्यां संस्कृतस्य पञ्चवर्षदेशीयस्य बालस्य सुचरित्र संपदः गुरोः सकाशे विद्याऽभ्यासेन उभयलोकगतिरिति तात्पर्य्यम् । पञ्चमवर्षादारभ्य दशम वर्षपर्य्यन्तं गुरोरन्तिके गमनकालः, तत्र च नियमेन ब्रह्मचारी ब्रह्मचारिणी च चारित्र्यनिर्माण पूर्वकं विद्या अधीत्य गृहस्थाश्रममाविशेत इति इति शास्त्राणां समयः ।

साम्प्रतं यदि सन्ति कतिचन पाठशालाः विद्यालयाः, महाविद्यालयाश्च यत्र वाला वालिकाश्च सम्यगधीयते, परं तेषां विदेशीयाचार परिपुष्टत्वात् वैदिक-सनातनधर्म-सभ्यता ततो दुर्लभाः । न तत्र श्रुतिस्मृतीनां शिक्षा, न च पित्रोः गुरोश्चादेशाववोधनम्, न जनेषु सदाचारप्रणाली, न च वालासु पातिव्रत्य प्रचारणम्, एवस्थिते सा शिक्षा नास्मत्कृते सुखावहा, एतदेवालोक्योक्तं भगवता मनुना—

"एतद्देश प्रसूतस्य सकाशादग्रजन्मनः" इत्यादि । सदाचार सम्पन्नस्य त्रैविद्यमूर्तेः, आचार्यस्याऽभ्याशे गुरुकुलात्मके विविक्तप्रदेशे यावान्विद्याधिगमः सम्भाव्यते, न तदंशेनापि अन्यत्र, इतिहासपर्यालोचनया प्रतीमः पुरा सर्वे भूमिदेवाः राजन्याश्च गुरो कुलेऽधीतविद्या धर्मार्थकाम मोक्षादिचतुवर्गं प्रापुः, नात्र लेशोऽपि संशयस्य । एषैव प्रणाली या राजपुत्रेषु रङ्कतनयेषु च परस्परं सहानभूतिं सातीर्थ्यं प्रणयं च जनयति, यथा हि कृष्णसुदामाचरिते जनसाधारणेनापि विलोक्यते । जगदानन्दकन्दो भगवान् रामचन्द्रोऽपि विश्वामित्र मुनेः सकाशात् विविक्ते एव सकल निशाचर नाश करीं विद्यामधिगतवान्, प्राचीन शिक्षा पद्धतेः अगणित लाभान्वि ताः कतिचित् आर्यवीराः इमां पद्धतिं पुनरुद्धृतवन्तः । इदं हि इन्द्रप्रस्थीयं कन्या गुरुकुलं पञ्चभिर्वषः यादृशीं शिक्षणद्वारा लोक सेवां तनोति, न सा तिरोहिता विदुषाम् ।

विधिवत्कन्या उपनीय वेदादि शास्त्रेषु तदङ्गेषु च शिक्ष्येत, अन्योऽपि स्त्रीजनो पितावचनचित्रण सीवनादि कला यथाऽवसरं ज्ञास्यन्ति । अस्मद्देशे हि स्त्री समाजे ब्रह्मचर्य्यस्य च वेदादि सच्छास्त्र पङ्क्तेश्च महान्तमभावं विलोक्यैतत्पूर्त्यै विहितोऽयं यत्नः, भारतवर्षे एतादृशः कन्याजने सदाचार शिक्षाप्रचारणपरः नास्ति कोऽपि विद्यालयः । अन्यत्र जलवायोः सांसारिकदुर्वासनारहित तपस्विजनोचितपरस्परिकस्नेहस्य च संपर्केण नात्र कोऽपि दोषः संभाव्यते । यदि तु वयं पुनरपि भारतवर्षे सावित्रीसदृशीं पतिपरायणाम्, जानकीसदृशीं धर्मपरायणाम्, लीलावती सदृशीं बुद्धिमतीम्, लोपामुद्रा—गार्गी—सुलभा-सदृशीं विदुषीं च दिदृक्षामस्तदेष गुरुकुलपद्धतिः पौरुषेण, धनेन, कायिक-मानसिक-आत्मिक-साहाय्येन च पोषणीया, अन्यथा पुरुषेषु शिक्षितेष्वपि न जातु भारतीयोन्नतिः संभाविनी, इदं खलु स्त्रीपुरुषयुगलं गार्हस्थ्य यानस्य चक्ररूपं, तथा च एक विकारोऽपि यानं चलनानर्हम् वाल्ये यथा मातुः संस्काराः शिशौ संक्रामन्ते स्थिरी भवन्ति च, न तथा प्रयत्नशतेनापि, विद्ययैव भामिनीनां आदरः, विद्ययैव सुखम्, किं बहुना—सदाचारपूर्वकं शिक्षिताः एव वालाः ऐहिक पारलौकिक सुखं भुञ्जाना स्वकीर्तिस्तम्भं दृढयन्ति ।

होलिका ।

ले० म० म० देवीप्रसाद शुक्कः कविचक्रवर्ती ।

वसन्तलिङ्गेन सुसंगता सती
विकासयन्ती नवचूतकोरकम् ॥
कृतार्थयन्ती मुदितं मनोभवं
सुखेन रागं वितनोति होलिका ॥ १ ॥
सुतं वसन्तं सुखदं प्रसूय
गतेऽन्यलोकं शिशिरे स्वकान्ते ॥
सन्तापमन्तर्दधती नितान्तं
किं होलिकेयं विशतिस्म वह्नौ ॥ २॥

अष्टादश-हिन्दी साहित्य-सम्मेलनम् ।

सूचना ।

हिन्दी-भाषापत्रावलोकनरसिका जानन्त्येव यत्, अष्टादश-हिन्दीसाहित्य-सम्मेलनं विहार प्रान्तस्य प्रधान नगरे मुजफ्फरपुरे भविष्यतीति । तद्विषये सम्मेलन कार्यकर्तृभिः श्रीमद्भी रामधारी प्रसाद महोदयैर्विज्ञप्तित्रयं प्रेषितम् । तदस्माभिः क्रमशः संक्षिप्य प्रकाश्यते ।

सु० सम्पादकः

प्रथमा विज्ञप्तिः ।

चिरकालं यावत् प्रामाणिक सूचनाभावेन हिन्दी-संसारे महती व्याकुलता प्रसृताऽसीत्, यत, अष्टादशहिन्दी-साहित्य-सम्मेलन-कृते मुजफ्फरपुरनगरे किमपि कार्यं न भवतीति । परमिदानीं सानन्दं विज्ञापयामो यत् यद्यपि बहुभिः कारणैः कार्यमिदमवरुद्धमासीत्, तथापीदानीं हरिहरक्षेत्रसम्मेलनावसरे स्वागतसमितेः संग्रन्थनाय नियोजिका समितिर्निर्वाचिता विद्यते । तस्यां समितौ प्रान्तीयाः प्रमुखपुरुषाः सम्मिलिताः सन्ति । क्रमबद्ध-कार्यचालनाय प्रादेशिक-साहित्यसम्मेलन-कार्यालये अस्थायिकार्यालयोऽपि संस्थापितो विद्यते । सम्मेलनस्य साफल्याय सततं क्रियते प्रयत्नः । नियोजक-समित्या निश्चितम्, यत् आगामिनि अप्रेलमासे (वैशाखे) हिन्दीसाहित्य-सम्मेलनं भवत्विति । सम्मेलनेन सह कवि-सम्मेलनम्, सम्पादक-सम्मेलनम्, अन्यानि च सम्मेलनानि भविष्यन्ति । ललितकला प्रदर्शनम्, साहित्य-प्रदर्शनञ्चापि भविष्यति ।

एतस्मिन्नवसरे वयं हिन्दी-लेखकान्, सम्पादकान्, हितैषिणश्च निवेदयामो यत्ते सम्मेलन-साफल्याय स्वीयान् विचारानस्माकं सविधे प्रेषयन्तु, पत्रेषु वा प्रकाशयन्तु । एतस्मिन् सम्मेलन किमपि वैशिष्ट्यं स्यादिति सम्भिलपामः ।

द्वितीया विज्ञप्तिः ।

विहार प्रान्तीय—हिन्दी-हितैषिणः—

प्रिया भ्रातरः—

विदितमेव स्यात् तत्र भवतां श्रीमतां यत हिन्दी साहित्य-सम्मेलनस्य अष्टादशाधिवेशनं मुजफ्फरपुर नगरे भविष्यतीति । अस्य कार्यस्य सुचारुरूपेण सम्पादनाय, स्वागत समितेः सङ्ग्रन्थनाय च नियोजिका समिति निर्मिता विद्यते; यस्यां प्रान्तीयाः प्रमुखाः व्यक्तयः सम्मिलिताः सन्ति । समित्यां निश्चितम्, यत्, अप्रेल मासे सम्मेलनम्, फरवरी मासे च स्वागतसमितेः सङ्ग्रन्थनं भवत्विति । सम्मेलनस्य महत्व विषये किमपि वक्तव्यं नास्ति । मद्र-कामरूप-सिन्धु प्रभृतिप्रान्तेषु हिन्दीप्रचारकार्यं गृहीत्वा सम्मेलनेन महती ख्यातिर्लब्धा । सौभाग्यमिदमस्माकं यदिदं सम्मेलनमस्माकं प्रान्ते तृतीयवारं भवति । अतो वयं सादरमभ्यर्थयामो यत, भवन्तः स्वागतसमितिसदस्येषु नामोल्लेखनं कारयन्तु । सदस्य शुल्कम् ५), परन्तु यवनानाम्, स्त्रीणाम्, छात्राणाम्, बाङ्गानां च कृते मुद्रात्रयमेव । यस्य कस्यापि सम्मेलनस्य साफल्यं स्वागतसमितिसदस्यानामधिकाधिक सङ्ख्यायां निर्भरं तिष्ठति । वयं विश्वसिमः, आशास्महे च यद् विहारप्रान्तीया अस्माकं भ्रातरः स्वागतसमितौ सदस्यतां स्वीकृत्यास्माकमुत्साहम्, प्रान्तस्य महत्वं गौरवञ्च स्थापयिष्यन्ति । एतस्मिन् कार्ये विलम्बः शैथिल्यं वा न विधेयम् । शाघ्रता विधेया । समयः स्वल्पीयानेव विद्यते ।

अन्यच्च—

वयमेतदपि ज्ञातुमिच्छामो यत्, अस्माकं प्रान्ते हिन्दी भाषा-सम्बन्धिन्याः कियत्यः संस्थाः सन्ति । यथा-पुस्तकालयाः, वाचनालयाः, नाट्यसमितयः । तासां नामानि प्रेषणीयानि । तासां हिन्दी-सेवामुपकारञ्च प्रख्यापयितुमिच्छामः ।

तृतीया—विज्ञप्तिः ।

अस्यां विज्ञप्तौ लेखकाः सूचिताः सन्ति, यत्ते सम्मेलनाय लेखविषयान् चिन्वन्तु । स्वयञ्च स्वाभीप्सितविषयेषु लेखान् प्रहिण्वन्त्विति ।

निवेदकः—

श्रीरामधारी प्रसादः

सहकारी संयोजकः—

प्रधानमन्त्री, विहारप्रान्तीय-हिन्दी-साहित्यसम्मेलनस्य

मुजफ्फरपुर ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौर चैत्रः १९८४

चतुर्थवर्षे] [द्वादशी सङ्ख्या

सुप्रभातम् ।

समाजाङ्कः

संस्कृत-साहित्य-समाजस्य मासिकं मुखपत्रम् ।

तिमिरततिमुद्धरन्, मेदतारा विलुम्पन्, नयदधि सुरभापाभाषिजागर्तिभावम् ।
विबुध-विहग-वादै-राह्वयद् भाग्य-भानुम्, विलसतु-भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'

विशिष्टाङ्क-सूचनाः ।

विशिष्टाङ्ककृते चित्राणां क्रियते व्यवस्था । लेखाश्चातिविलम्बेन समागच्छन्ति । आकारोऽपि द्विगुणितः स्यादिति मुद्रणेऽपि समयोऽपेक्ष्यते । चित्राणां निर्माणमपि नास्माकं हस्ते विद्यते । तत्र परायत्ता वयम् । विशिष्टाङ्कव्ययार्थं विशिष्टो धनसङ्ग्रहश्च कर्त्तुमावश्यकः । अतएव यदि विशिष्टाङ्को यथासमयं न लभ्येत चेत्, ग्राहकैर्मर्षणीयम् । पञ्चदशदिवसेभ्योऽधिको विलम्बस्तु कदापि न स्यात् ।

द्रव्याभावात् विशिष्टाङ्कस्य मुद्रणसङ्ख्या स्वल्पैव भविष्यति । अतो नवीनैर्ग्राहकैः प्राचीनैश्चावश्यं ग्राहकत्वं स्वीकर्तव्यम् । नोचेन्नमेलिष्यत्ययमङ्कः । एतादृशो विशिष्टाङ्कश्चाऽपि संस्कृते अभूतपूर्वः, आश्चर्य जनक एव भविष्यति । अस्मिन् वर्षे सुप्रभातस्य महती समुन्नतिर्भविष्यति । अस्य ग्राहकत्वं स्वीकृत्य, प्रचारं कृत्वा, विविधञ्च साहाय्यं दत्त्वा भवन्तोऽपि सहृदयतामातन्वन्तु । विनीतः—सम्पादकः

वार्षिकम्मूल्यम् ३) प्राप्तिस्थानम्— छात्रेभ्यः १॥)

सुप्रभातकार्यालयः, काशी ।

सनातनधर्मियों को शुभ सन्देश ! ! !

श्रुति-स्मृति-पुराण-इतिहास प्रतिपादित सनातनधर्म का सच्चा प्रतिपादक सनातनधर्म के बाह्य तथा आन्तरिक विरोधियों का मुखमर्दक, विवादग्रस्त धार्मिक ग्रन्थियों को सुलझानेवाला, समस्त भारत में निर्भीक धर्म-प्रचारक,

'काशी-सनातनधर्म-पण्डितसभा का' पाक्षिक मुखपत्र

"सनातनधर्म"

वार्षिक मूल्य— २) मात्र,

वैशाख-पूर्णिमा को सजधज के साथ प्रकाशित होगा ।

भारत के धार्मिक नेता काशी के विद्वान अनेक कारणों से अपने जन्मसिद्ध नेतृत्व से हाथ खींचते जा रहे हैं, जिससे समूचे देश में धार्मिक विप्लव मच उठा है । चारों ओर से सनातनधर्म पर अनर्गल कुठाराघात हो रहा है । धार्मिक स्थिति में दिनोंदिन भयङ्कर परिवर्तन देखने में आ रहा है । ऐसी स्थिति में अनेक अल्पज्ञ और स्वार्थी मनमाना ढोल पीटकर सनातन धर्म के नाम पर जनता को ठग रहे हैं । सनातन धर्म के गूढ रहस्यों से अनभिज्ञ नवीन सुधारक इस असहाय को रसातल में पहुँचा देना चाहते हैं । इन्हीं सब कारणों से काशी की सनातनधर्म पण्डित सभा ने शीघ्रही इस विप्लव का दमन करने के लिये पत्र निकालना प्रारम्भ किया है ।

यह पत्र शास्त्रसिद्ध सनातनधर्म का दृढता और उदारता पूर्वक समर्थन करेगा । सनातन धर्म के बाहरी और भीतरी शत्रुओं की पोल खोलकर जनता के सन्मुख उपस्थित करेगा ।

इसमें प्रतिमास 'धर्मपरिषद्' द्वारा निर्णीत की गयी शास्त्रानुकूल धार्मिक व्यवस्थाएँ रहेंगी। प्रतिमासके व्रत, त्योहार आदिका निर्णय रहा करेगा । सनातनधर्म सम्बन्धी भिन्न २ विषयों पर काशी के प्रकाण्ड और अद्वितीय विद्वानोंके युक्तियुक्त और तर्कपूर्ण लेख रहा करेंगे । विशेष लिखने की आवश्यकता नहीं । सभी प्रकारकी धार्मिक सामग्रियों से परिपूर्ण यह पत्र सनातनधर्म का वास्तविक नेतृत्व करेगा । इस पत्र को अपनाना प्रत्येक हिन्दू मात्र का आवश्यक कर्तव्य है । सनातनधर्मी जनता चिरकाल से इसे चाहती थी ।

बस ! आजही एक कार्ड भेजकर ग्राहक हों ।

पता—'सनातनधर्म'—कार्यालय, काशी ।

सुप्रभातम् ।

विविध-विषय-विभूषितम्, अद्वितीयम्, संस्कृत-मासिक-पत्रम् ।

चतुर्थ-वर्षे | सौर—चैत्रः । १९८४ वैक्रमाब्दाः | द्वादशी संख्या

मासावतरणिका ।

जाड्यं प्रोज्जासयन्ती, जगति विदधती मित्रतेजः समृद्धिम्,
भूयोपि प्रोन्नयन्ती द्विजपतिवलयस्याच्छतां पूर्वसिद्धाम् ।
युक्ता जातिप्रपञ्चैः, प्रकटितसुमनोमोदभूत-"सुप्रभाता"
सद्गोष्ठीवेयमुच्चैः प्रगुणयति मुदं चेतसश्चैत्रलक्ष्मीः ॥ १ ॥

—भट्ट श्रीगिरिधारी शर्मा

जातिप्रपञ्चैः जातौकलहविस्तारैरित्यर्थः पक्षे मालतीविस्तारैः, "मालतीमुखश्चैत्र" इति कविसमय:सिद्धत्वात् । सद्गोष्ठी शब्देन सुप्रभातप्रकाशकः संस्कृतसाहित्यसमाजोऽभिप्रेयते ॥

विरहिणीविलापः ।

प्रियो नागतो मे वयस्य ! वसन्ते । ध्रु०

लसन्मञ्जरीसञ्चरच्चञ्चरीकं,
न किं किञ्चिदुद्यानमास्ते तदन्ते ॥ १ ॥

कदाऽप्युल्लसन्मल्लिकाऽऽमोदवाहाः,
न किं तत्र हा गन्धवाहा वहन्ते ॥ २ ॥

कथं कोकिला मञ्जुलाऽऽलापशीला-
स्तदीयान्तिके मौनमासादयन्ते ॥ ३ ॥

कथा काऽधुना चेतनानाम्प्रसूनै-
र्लतास्सन्नताश्शाखिनः संश्रयन्ते ॥ ४ ॥

ऋतूनाम्प्रभोरस्य केचिन्निदेशं
न देशान्तरे किङ्कमप्याद्रियन्ते ॥ ५ ॥

इदानीं स्मरोन्मत्तचित्तो हरिः किं,
जना मादृशा यद्विपन्ना म्रियन्ते ॥ ६ ॥

कृतं भूपनारायणेनेति गातं,
न गीत्वा जनाः के व्यथामाश्रयन्ते ॥ ७ ॥

श्रीभूपनारायणझा शर्मा,
व्याकरणाचार्यः, साहित्यरत्नम्.

"अभेदोपासना ।"

शिवः, स्वयंज्योति,—रहीनसेवितो,
निरस्त-माद्यन्मकरध्वज-स्मयः,
मनुष्यधर्म्मादरकृ,—न्महेश्वरो
ध्रुवो धियामस्तु धरात्मजाधवः ॥

विनायकाराध्यवता, गुहावन-
प्रसक्तचित्ता, धृतचन्द्रभूषणा ।
मता सतीशेखरतां गताऽवता-
दगण्यकारुण्यधरा धरात्मजा ॥

—भट्ट श्रीगिरिधारी शर्मा, "कविकिङ्कर:"

धरात्मजाधवः, गिरिजापतिः, सीतापतिर्वा ।

सम्पादकीयम् ।

संस्कृत-साहित्य-समाजस्याधिवेशनम् ।

संस्कृत-साहित्य समाजस्य चतुर्थमधिवेशनं साम्प्रतं सानन्दं ससमारोहश्च सम्पन्नमिति विदितमेव स्यात् सुप्रभातरसिकानां समाज-सदस्यानाञ्च । एतस्मिन् वत्सरे खलु हिन्दूविश्वविद्यालयस्याचार्याः प्राच्य-पाश्चात्य-सिन्धुसम्भेद- स्नान-निर्मलाः, प्रसिद्धा गवेषका विद्वाँसः, परमदेशभक्ताः, श्रीआनन्दशङ्कर बापूभाईध्रुवमहोदयाः सभापतेरासनमलङ्कृत्य समाजमनुग्रहीतवन्त इति परं सन्तोषस्थानम् । एतस्मिन् वत्सरे विदुषामुपस्थितिरपि पूर्वेषां वर्षाणामपेक्षया प्रचुरा समभूत् । परन्तु यदर्थं परीक्षासमये क्रियते समाजाधिवेशनम् , तत्कार्यं न सम्यक् सम्पद्यत इति खेदं जनयति । एतदधिवेशनं प्रथमं श्रावणमासे भवतिस्म । परमिदानीं परीक्षासमय एतदर्थमेव क्रियते, येनैतस्मिन्नवसरे भिन्नभिन्नदेशेभ्यः पाठशालाभ्यश्च समागताश्छात्राः सम्मेलनेऽस्मिन् सम्भूय स्वीयामवस्थां समालोचयन्तु, समुन्नतेरुपायान् विमृशन्तु, तत्र तत्र प्रचारमान्दोलनञ्च कृत्वा मृतप्रायं समाजं जागरयन्त्विति; परं हन्त ! सर्वत्रैव संस्कृतज्ञेषु संस्कृतत्त्वं समानमेव दरीदृश्यते । छात्राः परीक्षार्थं समागच्छन्ति । परीक्षापिशाच्यास्तेषां शिरसि तादृशं नग्नताण्डवं भवति येन तदभिभूतास्ते न किमपि पश्यन्ति, न शृण्वन्ति, न च विचारयन्ति । तेषामियमुपेक्षा न तेषामेव प्राणघातिनो, परं संस्कृतभाषायाः, ब्राह्मणजातेः,

सनातनधर्मस्य च प्राणघातिनी । एत एव छात्राः धर्मस्य नेतृत्वं करिष्यन्ति, ब्राह्मणानामादर्शं स्थापयिष्यन्ति । यदि इदानीमेव ते स्वीयां दुरवस्थां न ज्ञास्यन्ति, तदा आगामिनि समये का नाम गतिः स्यादिति परमेश्वर एव जानातु । तदग्रे समाजमन्त्रिभिः प्रथममेव सर्वे पाठशालाध्यक्षाः सूचनीयाः, यत् तेषां छात्राः काश्यां समेत्य सम्मेलनेऽस्मिन् भागं गृहीत्वा वास्तविकं छात्रत्वं समासादयेयुः । हृदयमात्मानञ्च सुदृढं सबलञ्च कुर्वन्तु ।

अन्यच्चास्मिन् महोत्सवे ये प्रस्तावाः समुपस्थापिता विद्यन्ते, ते नितरामुत्कृष्टा अत्यावश्यकाश्च सन्ति, केवलं तेषां स्वीकृत्या किमपि न भविष्यति, तदर्थमान्दोलनं विधेयम्, प्रचारः कर्तव्यः, तत्तदधिकारिणः सानुरोधं सबलञ्च विज्ञापनीयाः, बहुमतसङ्ग्रहश्च कर्तव्यः । नोचेत्किमपि वास्तविकं कार्यं न स्यात् ।

वयं समाजस्योत्तरोत्तरामभिवृद्धिं तत्र तत्र विदुषां स्नेहमुत्साहञ्च दृष्ट्वा द्विगुणितोत्साहाः सञ्जाताः । एतदेवाभिलषितं विद्यतेऽस्माकं यदत्र सार्वजनीन-संस्कृत-कार्ये सर्वेषां सस्नेहं साग्रहञ्चाभिनिवेशः स्यादिति ।

× × × ×

उद्योतः ।

परमिदं हर्षस्थानं यत् शिक्षाविषये सर्वेष्वपि प्रान्तेषु पृष्ठेस्थितोऽस्माकं पञ्चनदप्रान्तः साम्प्रतं संस्कृतभाषायां समुन्नतिं सम्पादयितुं सुसन्नद्धः समालोक्यते । संस्कृतनवयुवकेषु अभूतपूर्वां जागर्तिं जनयताम्, तेष्वद्भुतं जीवनमन्त्रं दत्तवताम्, संस्कृतकार्यकर्तॄणामादर्शभूतानाम्, विद्वद्धुरीणानाम् श्रीमतां महामहोपाध्यायश्रीगिरिधरशर्म्मचतुर्वेद-महोदयानां शुभया प्रेरणया संस्थापिता पञ्चनदीया संस्कृत-साहित्य-परिषद् साम्प्रतं कार्यक्षेत्रे समवतीर्य 'उद्योत'—नामकं संस्कृतमासिकपत्रं निःसारितवती । एतस्य सम्पादका अस्माकं मान्याः प्रणयिनः श्रीमन्तो नृसिंहदेवशास्त्रिणः, सहायकाश्च श्रीपरमेश्वरानन्दशास्त्रिणः, नवयुगप्रवर्तकाः संस्कृत-समाजस्थितिमर्मविदो विद्वांसः कार्यकर्तारश्च सन्ति । पञ्चनदीय-शास्त्रिपरीक्षोत्तीर्णाश्च विद्वांसः प्रायः समयमर्मविदः, स्वकर्मज्ञाश्च भवन्ति । तदयं परिषद्प्रयत्न-सम्पादितः 'सुप्रभातस्य' 'उद्योतः' तेषां हृदिस्थितमालस्यमौदासीन्यं शैथिल्यं वैमनस्यं हृदयदौर्बल्यं दारिद्र्यञ्च दूरीकर्तुं शक्नुयादिति प्रबला सम्भावना वरीवर्त्यस्माकम् ।

पञ्चनदीयानां सर्वेषामेव विशारदपरीक्षोत्तीर्णानाम्, शास्त्रिपरीक्षोत्तीर्णानाञ्च विदुषां पुरस्तादस्माकं सानुरोधं साञ्जलिबन्धञ्च प्रार्थनमिदं विद्यते, यत् संस्कृत-साहित्य-परिषदं, तन्मुखपत्रमुद्योतञ्च समुन्नयन्तु । सर्वेषां संस्कृतज्ञानामिदं प्रधानं कर्तव्यं स्यात् । यदि नाम पञ्चनदप्रान्तीयाः शास्त्रिविशारदपरीक्षोत्तीर्णाः सर्वेऽपि छात्राः विद्वांसश्च प्रतिज्ञां करिष्यन्ति चेत् पत्रस्यास्य द्विसहस्रतोऽप्यधिका ग्राहकाः भविष्यन्ति ।

पत्रस्यास्य वार्षिकं मूल्यमपि नास्ति किमप्यधिकम् । अन्तर्बहिश्चायं मनोहरः । भविष्यति च शनैः शनैरुत्तरोत्तरमस्याधिकाधिका समुन्नतिः । वयमस्यानुभवज्ञाः स्मः । साम्प्रतं नूतनं बलमिदं सुप्रभातस्य सम्पन्नम् । तद् वयमस्य भ्रातुः सादरं सहर्षं सबहुमानं स्वागतं कुर्महे । एतस्य चिरजीवित्वं कल्याणञ्च कामयामहे । सर्वत्र भारते पत्रस्यास्य प्रचारोऽचिरेण स्यादिति च परमेश्वरं प्रार्थयामहे ।

* * * *

अस्माकं साफल्यम् ।

अप्रैलमासस्य चतुर्थे दिवसे पूज्यपादैर्महामहोपाध्यायैः श्रीलक्ष्मणशास्त्रिद्रविडमहोदयैः सञ्चालिते काशीस्थ-साङ्गवेद-विद्यालये काशीस्थ विदुषां काचन समितिः सम्पन्ना । तत्र च सभाया उपमन्त्रिणा श्रीमता विद्वद्वरेण श्रीराजेश्वरशास्त्रिणा

समितिपरिचयावसरे उक्तम्, यत्, अचिरादेव समितिरियं मासिकं पत्रं प्रचिचारयिषतीति, एतत्खलु नवीनं संस्कृतपत्रं शुद्धसनातनधर्मस्य प्रचारं करिष्यति। वयमेतत् निशम्य परं प्रमुदिता भवामो यत् प्राचीना विद्वाँसोऽपि साम्प्रतं कार्यक्षेत्रे समवतरितुं सज्जा भवन्ति। एतदेवास्माकमभिलषितमासीत् यत्, "चिरसुप्ताः, विस्मृतस्वकर्तव्याः, प्रचीनपण्डितास्त्यागमन्तरा केवलं मौखिकीं सनातनधर्मसेवामेव कुर्वन्तः समेषामपि पराभव-भाजनभूताः सन्ति तेषामिमं दुरादर्शं दृष्ट्वा छात्रा अपि पथभ्रष्टाः, किंकर्तव्यविमूढाः, व्यर्थजीवना भवन्ति। यदि नाम प्राचीनाःपण्डिताः सत्यं सनातनधर्मसेवासु सन्नद्धा अभविष्यन्, तदा किं नाभविष्यत्। पण्डितानां कृते तु जन्मसिद्धं नेतृत्वम्, धनसाहाय्यम्, जनसाहाय्यञ्च सर्वमपि विद्यते, केवलं न विद्यते त्यागः, न विद्यते हृदये बलम्। अतएवान्ये तेषां मुखाद्ग्रासमाच्छिन्दन्ति। पण्डिता यथाकथमप्युत्थाय सुचिरप्रसृतमज्ञानं दूरीकृत्य धर्मरक्षां कुर्वन्त्विति।" अतएव सुप्रभाते वारंवारं लिखितमासीत्—यत् "प्रतियोगिविधया, अनुयोगिविधया, यथाकथमपि वा पण्डिताः कार्यं कुर्वन्तु" इति। तदिदानीं श्रीमतां लक्ष्मणशास्त्रिमहोदयानां प्रयत्नेन यदि पण्डितसभा धर्मस्वरूपस्य भगवतः सनातनस्य सेवां कर्तुं प्रयता भवेच्चेदन्येषां छात्राणां कृतेऽपि समीचीन आदर्शः स्थापितः स्यात्, तेषां पन्थाश्च सुपरिस्कृतो भवेत्। श्रीमतां लक्ष्मणशास्त्रिणामुद्योगेनैव कलिकातानगरे शिवकुमारभवनम्, काश्याञ्च साङ्गवेदविद्यालयः, उभावपि संस्कृतसेवां सम्पादयन्तौ तेषां कीर्तिमक्षुण्णां विदधतः। एतद्धि महत्सुप्रभातसाफल्यं यत्तत्क्षुण्णे पथि बहवः पथिकाः प्रयतमानास्तं परिस्कर्तुं समुद्युक्ताः सन्तीति। भगवान् सनातनस्तेषां कार्येषु साफल्यं कुर्यात्, तेषु आत्मबलम्, मनोबलम्, त्यागसिद्धाञ्च दद्यादिति।

मालवीय-महोदयानां धर्मकथा।

अप्रेलमासस्य प्रथमदिवसादारभ्य चतुर्थदिवसं यावत् काश्यां जाह्नवीपरिसरे दशाश्वमेधघट्टे देशपूज्यानां त्यागमूर्तीनां महामान्यानां मालवीयमहोदयानां सनातनधर्मकथा महतासमारम्भेण सम्पन्ना। एतस्यां कथायां काशीस्था मान्याः पण्डिताः, श्रेष्ठिनश्च समुपस्थिता आसन्। जनतायास्तु कथैव का मालवीय महोदयानां भाषणे। एतन्महत्त्व परममासीत् यत् आर्यसमाजिका अन्ये च भिन्नभिन्नसामाजिकाः समुपस्थिता आसन्। मालवीयैश्च सनातनधर्मान्तर्गतानां सन्ध्यातर्पण-स्वाध्याय-बलिवैश्वदेवप्रभृतीनामवान्तरधर्माणां यत् युक्तियुक्तं हृदयङ्गमञ्च वर्णनं कृतम्, तच्छ्रुत्वा तद्विरुद्धा आर्यसामाजिका अन्यधर्मावलम्बिनश्च लज्जिता आसन्। एतादृशी मर्मस्पर्शिनी, हृदयङ्गमा, सुधा-सरसा कथा नास्माभिः कदापि श्रुता आसीत्। वयन्तु निर्धारयामो यद्यदीदृशीनामेव कथानां सर्वत्र भारते प्रचारः स्याच्चेत्तदा न कोऽपि सनातनधर्मं विहायान्यं धर्मं मनसाऽपि चिन्तयेत्। एषैव रीतिः सनातनधर्मप्रचारस्य वास्तविकी रीतिः। अनया न केवलं धर्म-प्रचार एव स्यात्, अपितु संस्कृतभाषाप्रचारः, ब्राह्मणानां महत्वप्रचारश्च स्यात्।

* * * *

हा हन्त !

मुद्रितप्राये सुप्रभाते सहसैव श्रुतं यत् काशी-प्रबन्धसमितेः सभापतयः (चेयरमैन-बनारसम्युनिसिपल बोर्ड) सनातनधर्मस्य प्रबला हितैषिणः जनप्रियाः, प्रतिष्ठिताः, नागरिकाः श्रीमुन्शी महादेव प्रसाद (एम० ए०, एल्-एल्० बी०) महोदया आकस्मिकेन मृत्युना दिवं प्रयाता इति। द्वित्रिदिवसानन्तरमेवापरो दारुणः समाचारोऽश्रूयत, यत् काशीस्थाः प्रसिद्धवैद्यप्रवराः प्रतिष्ठिताश्च नागरिका महामान्याः श्रीरघुनन्दनशर्म्मवैद्या अपि आकस्मिकेन रोगाक्रमणेनास्मान् शोकमग्नानकार्षुरिति। हन्त ! दुर्विधर्दुर्विपाकः !!

श्रीमद्भगवद्गीता ।

ले०—त्र्यम्बक-विनायक-मोहरीरः ।

यथा च खिष्टीयानां बायबलग्रन्थः, मोहम्मदीयानां कुराणग्रन्थस्तथैवास्माकं हिन्दूनामयमेव धर्मग्रन्थः । अस्मिन् विषये तु साम्प्रतं न मतवैचित्र्यम् । यथा खिश्चना बायबलोपदेशमनुसरन्ति, यथा च मोहम्मदीयाः कुराणोपदेशं तथैवास्माभिरपि धर्मग्रन्थानुरूपमेव वर्तितव्यम् । धर्माचरणे पापं तु न लगतीति सर्वत्रैव दरीदृश्यते । स एव साधारणतो धर्म इत्युच्यते योधर्मग्रन्थोदितोऽस्ति । यथा धर्मस्य सनातनत्वं तथैव धर्मग्रन्थस्याऽपि । अनेन धर्मस्य धर्मग्रन्थस्य वा परिवर्तनशीलत्वं निषिध्यते । किन्तु परिस्थित्यनुरूपमर्थपरिवर्तनं कदाचित् सम्भवति । यदा च जना धर्मस्य मूलतत्वं न जानन्ति, धर्मविरुद्धमपि धर्म इत्याचरन्ति, तदा भगवान्—यथा गीतायां वदति, तथैव युगे युगेऽवतरति, तमेवार्थं च परिस्थित्यनुरूपं प्रतिपादयति । अयमेवार्थो यथार्थोऽत्र न संशयो विद्यते । पूर्वेतिहासेनैतदेव स्पष्टीक्रियते । तदा भारते कुमारिलभट्टमतप्रावल्यमासीत् यदा च सर्वे कर्मकाण्डरता आसन् तदा शंकराचार्यस्यावतारोऽभवत् तद्दूरीकरणार्थम् । तेनाद्वैतसिद्धान्तेन कर्मकाण्डरतानां मतखण्डनं कृतम् । स्वसिद्धान्तश्च प्रचालितः ।

अन्यच्च यदा जना यज्ञयागादिकं प्रामाण्याधिक्यत्वेन कुर्वन्तिस्म, तदा नितरां हत्या भवतिस्म । तन्निवारणार्थं बौद्धावतारः सर्वेषां ज्ञात एव ।

अर्थादनेन प्रमाणद्वयेनैतत् सिद्धं यत् यदा यदा धर्मस्य सज्ज्ञानमज्ञातं भवति; अन्यच्चैकस्यापथ्यकरस्य मतस्य प्राबल्यं वर्तते, तदा धर्मतत्वं सम्यग्विवर्णयितुं भगवानवतरति । 'धर्मसंस्थापनार्थाय संभवामि युगे युगे' अत्रस्थधर्मसंस्थापनपदस्य नायमर्थो यदन्यस्य धर्मस्य संस्थापनं किन्तु पूर्वप्रचलितधर्मस्य पुनः संस्करणम्, यतो धर्मः सनातनः ।

अधुना सर्वेषामप्येतत् विदितचरं भवेत् यत् किमर्थमेकस्यैव ग्रन्थस्य टीकाः प्रटीकाः सन्ति । सूक्ष्मावलोकनेनेदमस्माकं ज्ञानं भविष्यति यदासां टीकाप्रटीकानां कर्तारः एकसमये नाभवन् । सर्वेऽप्येते कर्तारो धर्मग्रन्थस्य तत्त्वं परिस्थित्यनुरूपं ज्ञापयितुं टीकाः कृतवन्तः ।

धर्मग्रन्थे तु सन्ति त्रिकालाबाधितानि तत्वानि । तेषु कानिचित् परस्परविरुद्धान्यपि सन्ति । अस्येदं कारणम् । कालस्तु परिवर्तनशीलः, कदाचित् सुखमयः, कदाचित् दुःखमयः । सुखमये काले यानि यानि धर्मकर्माणि कर्तव्यानि, तानि तानि दुःखमये काले कदाचिदकर्तव्यानि भवितुमर्हन्ति, सुखमये काले येषां धर्मतत्वानां प्राबल्यं, तेषां दुःखमये काले कदाचिदेव । यथा सुखमयकालात् दुःखमयकालो विभिन्नस्तथैव तत्तदाचरणीयानि धर्मतत्वानि भिन्नानि सन्ति । दास्याभिभूते काले न तानि धर्मतत्वान्याचरणीयानि यानि खलु स्वातन्त्र्याधिष्ठिते समाचरणीयानि ।

भगवद्गीतायां योगत्रयमप्युक्तमित्यत्र न केषामपि मतवैचित्र्यम् । भगवद्गीताया धर्मग्रन्थत्वमनेनैव सिद्धीभूतं यतस्तस्यां त्रिकालावाधितत्त्वं योगत्रयमेव समुत्पन्नम् । तत्र ज्ञान कर्म-भक्ति-योगाः कथिताः । समयानुरूपं हि भवतु ज्ञानस्य कर्मणो भक्तियोगस्य वा प्राधान्यम् । यदा वयं सुखिनो भवामस्तदा तु ज्ञानस्यास्त्वभिभूतत्वमिति 'ज्ञाने सर्वकर्माणि' समाप्तिं यान्ति । यदा च वयं परैरभिभूताः स्मः, तदा कर्मणः 'युध्यस्व-युद्धायोत्तिष्ठ' इति पदेन परिज्ञायते । यदात्र सुखदुःखनिमग्ना वयं भविष्यामस्तदाऽस्तु भक्तियोगस्य प्राधान्यम् ।

अधुनाऽस्माकमवस्था सर्वेषां हि नेत्रपथमधिरोहति । तद्वर्णनसमये कम्पते हस्तः, रोदिति हृदयं; दह्यते चेतः । साम्प्रतं खलु कालचक्रस्य अधो भागमनुभवामः ! पारतन्त्र्यशृङ्खला दिने दिनेऽधिकत्वेन निगडयत्यस्मान् । न धर्मस्वातन्त्र्यं न विद्यास्वातन्त्र्यम् ! किं वहुना ! शरीरस्वातन्त्र्यमपि नास्ति । यदि कश्चिदात्मत्यागं कर्तुं सुखेनेच्छेत् तर्ह्यपि तत्कर्तुं न स शक्नोति बन्धनत्वात् । यदि काचित् स्त्री पतिगमनं कर्तुमिच्छेत् तदपि पारतन्त्र्यात् न शक्यम् । धर्मपालनमप्यतोऽशक्यमेव ।

अस्मिन् समये कथयन्तु भवन्तो यदस्माकं धर्मग्रन्थः किं कर्तुमादिशति । एतदेव । यत्—

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥

——:*:——

दानम् ।

लेखकः—"याचकः" ।

यत्किञ्चिदपि कस्मैचिद्दत्तं भवति तद्दानमिति दानशब्दस्य भावः । किन्तु विशिष्टार्थेन स शब्दो व्यवहारे समानीतः । येषां खल्वावश्यकता वर्तते साहाय्यस्य तेभ्यस्तद्दानमिति विशिष्टार्थः । परोपकारस्यापि तस्मिन्नन्तर्भावः कृतः प्रामुख्येन । स एव परोपकारो यः खल्वावश्यकसमये कृतो भवति । इदमेव तत्त्वं दानेन स्वीकृतम् । अनेनार्थेन प्रदत्तं दानं निःसंशयं हितकरमेव । किन्तु व्यवहारे तस्य वैपरीत्यं दृश्यतेऽधुना । यः कोऽप्यागच्छत्वार्थार्थी, तस्मै जनाः प्रयच्छन्ति साहाय्यम् । अन्यथा ते पापाधिकारिणो भवन्तीति तेषां दृढभावना । दाने पुण्यं, विपरीते तु पापमित्यस्माकमपि सम्मतम् । किन्तु दानसम्बन्धिनी धारणाऽस्माभिर्लिखितैव । तदनुरूपदानं पुण्योत्पादकम् ।

अन्धपङ्गुबधिरमूकादिदूषितावयवेभ्यो दानं युक्तम् । यत्रकुत्रचिदेतादृशो जना दृश्यन्तां नाम, तेषां साहाय्यमवश्यं करणीयमिति गृहमेधिनामाद्यं कर्तव्यं भवति । तदेव पुण्यदायकम् । शारीरिक-व्यङ्गयेण स्वकीयोदरनिर्वाहं कर्तुं ये खल्वसमर्थास्तेषां कालयापनमन्नादिसाहाय्यं विना कथं भवेत् ? एवम्भूतानां साहाय्यमकृत्वा निर्व्यङ्गेभ्यः पुष्टशरीरेभ्यः, श्रमसाधनसमर्थेभ्यो याचनार्थमागतेभ्यः सुदृढयाचकेभ्यो यद्दानं प्रदत्तं भवति

कथं तत्पुण्यसम्पादकम् ? एवंकृतेन दानेन याचकाऽऽलस्यविवर्धनरूपपातकानामधिकारी भवति दाता । नान्यत्फलं विद्यते तस्य कृते ।

अद्य खलु भारतवर्षेषु स्वावलम्बिपुरुषाणामतीवावश्यकता वर्तते । पारतन्त्र्यशृङ्खलानिगडितोऽयं देशोऽतित्रस्तः सञ्जातः । स्वावलम्बनेन विना न कोऽपि देशः स्वातन्त्र्यशिखरमधिष्ठातुं शक्नोतीत्येव ह्यनुभवसिद्धम् । यदि भारतम् स्वातन्त्र्य-वृक्षस्यामृतफलान्यास्वादयितुमाकाङ्क्षति, तर्हि तेन परावलम्बनत्यागः स्वावलम्बनयोगश्च प्रथमतो विधेयः । अनेनैवोद्देशेन महात्म-गान्धिभिरादिष्टं भारतवर्षेचक्रचालनार्थं तदुत्पादितवस्त्रोपभोगार्थं च । देशनेतारो भारतीयेषु स्वावलम्बनभावागमनार्थमेकतः प्रयतन्ते, अन्यतस्तु तद्देशनिवासिनोऽन्धश्रद्धाप्रदत्तदानेनालस्यफलतः परावलम्बनमेव विवर्धयन्ति । हन्त ! अनेनोन्नतिविघातकपरम्पराचरणेन प्रतिसमयं भारतस्य हानिरेव सम्पादिता, विदितचरमेवेतत्त्वैतिहासिकानाम् ! अस्तु ।

दानेन याचकानामपि हितं भवति न वेति विचारणीयोऽयं प्रश्नः । अस्मन्मते त्वहितमेव भवति । किमिति ज्ञातव्यमवश्यम् । अखिला याचका व्यसनिन एवेति सर्वत्र दृश्यते । केचिन्मद्यपाः, केचिद्वेश्यावासगमनासक्ताः, केचित्तु चौर्यादिदुष्कर्मनिरता इति महापातकाधिकारिण एव भवन्ति । एवम्भूतेभ्यो भिक्षाटनप्रवीणेभ्यो याचकेभ्यो दानं तेषां कुकर्मोत्तेजनमेव भवति । अर्थात् कुकर्मोत्तेजका यजमाना अपि महापातकाधिकारिणो भवतुमर्हन्ति निःसंशयम् । किमर्थमिदं भवति ? दानेनालस्यं वर्द्धते, आलस्येन मनोविनोदनार्थं प्रयत्नो भवति, मनसश्च निसर्गतः कुपथगामित्वादुक्तदुष्कर्मसाधने मानववृत्तिर्लगतीति स्पष्टमेव दानफलं दृश्यते । अतः सुविचार्यैव दानं कर्तव्यम् ।

दानग्राहकयोग्यतोपरि कथितैव किन्तु कीदृग्दानं प्रदेयमित्यद्यापि नास्माभिरुल्लिखितम् । तदुल्लेखनेन प्रबन्धस्यास्य कार्यमपि सम्पादितं स्यात् । यावच्छक्यं नाणकरूपेण दानमदेयम् । कस्मैचित्क्षुधार्त्तायाऽन्नप्रदानं यावद्युक्तम्, न तावन्नाणकदानं भवतीति सर्वे जानन्त्येव । वापी-कूप-तडाग-प्रपा-धर्मशालाऽन्नसत्रादिरूपं दानं सर्वोत्कृष्टम् । तेन परोपकारसाधनं भवति, स्वतुष्टिरपि सिध्यति । अत्र मनुर्विचारणीयो यथा—

"दानधर्मं निषेवेत नित्यमैष्टिक-पौर्तिकम् ।
परितुष्टेन भावेन पात्रमासाद्य शक्तितः ॥" ४-२२७.

अस्मिंस्तु कर्मफलाशामकृत्वा, यथाशक्ति, पात्रापात्रं विचार्य, दानग्राहकस्य वास्तविककल्याणं यस्मिन् भवति तद्दानस्य मीमांसा दातृकृते लिखिता । तदेव दानं सात्त्विकमित्याह भगवान् श्रीकृष्णो गीतोपनिषत्सु—

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ १७-२०

इयं भगवदुक्तिरेवास्य लेखस्य प्रवर्तिका । अनेन लेखेन प्रतियाचकं साहाय्यं निषिद्धम् । पात्रापात्रविचारोऽपि तत्कार्ये परमावश्यकः, तेन विना दानं न पुण्यम् । यतः,

'दरिद्रान्भर कौन्तेय ! मा प्रयच्छेश्वरे धनम् ।'

इयं भगवदुक्तिरेव तत्र प्रमाणम् ; न तु लेखकलेखनम् केवलम् !

भूदेव-महत्वम्।

ले०—श्रीगङ्गाविष्णु मिश्रः, (मुलतान)

इदानीमानन्दकन्दस्य दनुजकुल-निशानाशन चन्द्रस्य श्रीकृष्णचन्द्रस्य साक्षात्परब्रह्मणः भावा अपि भावुकै र्भावैर्महानुभावैर्विभावनीयाः।

गविष्ठिरस्य युधिष्ठिरस्य राजसूययज्ञे कार्यान्तरं विहाय विप्रपादप्रक्षालनकार्यं स्वयं स्वयंभूर्विभुः प्रभुः श्रीकृष्णचन्द्रो भक्तजनरक्षणत्यक्ततन्द्रः सादरं—साभिनिवेशं जग्राह। स्व-करारविन्देन भूदेवपदारविन्दान् सप्रेम प्राक्षालयत्। तथा कर्कटरूपनृगभूपस्योद्धारसमये भूदेवमहामहिमानं तद्गुणगणगरिमाणं सामञ्जस्येन चाऽवर्णयत्।

आदर्शमैत्रीं प्रदर्शयितुकाम आप्तकामोऽकिञ्चनं तपोधनं सुदामाख्यविप्रं समागतं कर्णगोचरीकृत्य त्यक्तावश्यककृत्यः सिंहासनासीनोऽपि तत्कालमेवासनं विहाय चिरादक्ष्णोर्विषयतामितमपरिमितगुणराजिराजितं रजतवद्गौराङ्गन्तं श्लक्ष्णतयाऽश्लिष्यत्, स्वपाणिना तत्पाद-प्रक्षालनञ्चाकृत।

इत्थं वीरवारवरः वदान्यः कर्णः संग्रामावन्यां ब्राह्मणानां विषये व्याहार्षीत्,

'नाऽहं विशङ्के सुरराजवज्रा-
न्न त्र्यक्षशूलान्न यमस्य दण्डात्।
नाग्नेर्न सोमान्न रविप्रतापा-
च्छङ्काम्यहं ब्रह्मकुलापमानात्॥

ब्रह्म तेजःप्रभावमुद्वीक्ष्य विश्वामित्रःस्पष्टमचीकथत

'धिग्बलं क्षत्रियबलम्, अहो ब्रह्मबलं बलम्,॥

अपिच-यस्य शूरवीरधौरेयस्य गुणार्जुनस्यार्जुनस्य बलं निभाल्य, बलवन्तोऽप्यरयः वेपथुमन्तः सन्तिस्म (वेपन्तेस्म), असौ वीरशौण्डः शौण्डीरो जिष्णुः (जयशीलः) जिष्णुः (अर्जुनः) महाभारतीय-संग्रामे चतुर्विद्यादनवद्यचर्याद् द्रोणाचार्याद्वेपते, युद्धादर्वाक्-अवाङ्मुखः सन्निदं ब्रूते,

'मुखाग्रे चतुरो वेदाः कराग्रे सशरं धनुः।
उभयोर्द्रोणसामर्थ्यं-शापादपि शरादपि॥

महानुभावाः! कियदेषां गौरवं कीर्त्यते, यद्यशेषार्थविद् भगवान् नागविशेषः शेषोऽपि रसना सहस्त्रहितयेनैषां शारदशशाङ्कगौरगुणान् गणयेत, सागरश्च मसीपात्रयेत्, विघ्नाटवीहव्यवाट्, गणनायको विनायको लिपिकर्मण्यात्मानं व्यापारयेत्, मन्ये, तदाऽपि भूदेवगुणगणा गणयितुं न शक्येरन्। दुर्दान्तहिरण्यकशिपु-समये सद्धर्मरक्षणदक्षैः महाविचक्षणैः शुभलक्षणैरेभिरेव धर्मग्रन्थानां रक्षणं व्यधायि, पुरा विनिर्जितदिग्वारणेन बलातिरेकात्केनाऽप्यनिवारणेन लोकरावणेन सर्वजनजातविद्रावणेन शास्त्रविद्रावणेन वैरावणेन रावणेन साहसिकेनाऽपि ब्राह्मणगणसाहसभीतेनाऽविनीतेन धर्मनाशं विधातुं नाऽपारि।

अघासुर-बकासुरादि-कंसभृत्य-कृताऽत्याचाराणां संसारात्समूलमुन्मूलनद्वारा तदत्याचारव्रातैर्भवगोपनं विधाय भक्तजनरक्षणत्यक्ततन्द्रं श्रीकृष्णचन्द्रं भवे समाकार्य सम्यक्तया भगवद्भक्तेरादर्शो दर्शितः।

अपि च—

'नाग्निहोत्रं श्रुतेर्घोषः नाऽऽचारो वेदबोधितः ।
श्रमामि हन्त ! किं ब्रूमः को वेदानुद्धरिष्यति ।

इति राजकुमार्या वेदव्रतायाः, मुखाद्वैदिक धर्मदुर्दशासूचयितृन् श्रवणविषयीकृत्य शोकशब्दानिमान् वाराणसीवीथीषु परिभ्रमन् श्रीकुमारिलभट्टाचार्यो बौद्धधर्मापोहन-बद्धपरिकरो बाष्पावरुद्धकण्ठो राजकुमारीमभिलक्ष्य निजकर्त्तव्यञ्चाभिध्याय द्रागेवोदतरत्,

मा शुचो वर्धसे दिष्ट्या भद्रे भद्रं वचस्तव ।
एष कौमारिलो नाम वेदानुद्धर्त्तुमुद्यतः ॥

अनन्तरं बौद्धपुस्तकानि बौद्धशालाम्प्रविश्याध्येतुमगात्, तत्रैकदाऽभ्यस्यन्नसौ वेदनिन्दामश्रौषीत् तच्छ्रवणसमकालमेव नेत्राभ्यामश्रूणि प्रावर्तयत्, तदवलोक्य तद्व्यापादनकृतनिश्चया धार्मिकम्मन्या बौद्धा निशायां तमेवाक्षिपन् । पततस्तस्याननाच्छब्दा निर्गलिता—यदि वेदाः सन्ति सत्यास्तर्हि तान् शरणीकरवाणि, यथा च—

'पतन् पतन् सौधतलान्यरोहं-
यदि प्रमाणं श्रुतयो भवन्ति ।
जीवेयमस्मिन्पतनेऽसमस्थले,
मज्जीवने तच्छ्रुतिमानता गतिः ।

यद्यपि 'यदि, शब्देन संशयानस्य तस्याक्षि विगतम्, तथापि वेदेषु श्रद्धां कुर्वाणोऽक्षिनाशे स्वकर्मदोषं मन्वानो वेदोद्धाराय यावज्जीवनं नितरां सुतरामयतत । अन्ते प्रायश्चितं चिकीर्षु रित्थमेव देहातिपातञ्चकार; यथा निम्नपद्येन प्रतीयते ।

'सोऽयं गुरोरुन्मथन-प्रसक्तं
महत्तरं दोषमपाकरिष्णुः ।
अशेषवेदार्थविदास्तिकत्वा-
त्तुषानलं प्राविशदेषधीरः ॥

अपि च निगमागम-कल्पलता-तुषारायमाणे यवनसम्राजां साम्राज्ये तत्खड्गोल्लासमविगणय्यारण्यानीषु धावं धावं गाढान्धकारयुक्तासु निशासु जागरं जागरं यत्किञ्चित्फलानि भोजं भोजम् प्रायोऽनाहारं कारं कारम् वेदशास्त्राणि स्मारं स्मारं यद्वैदिक साहित्यरक्षणैकतानतापरिचयं पूर्वजा अस्माकमयच्छन्, स कस्य सदयहृदयस्य सहृदयस्य तोषाय नाऽलम् । इति ।

ये ब्राह्मणानामकृतज्ञाः प्रभूतोपकृतिं न मन्यन्ते तेषां कृते कविरत्नविरुदावलीविराजमानस्य-विद्वज्जन-प्रचुरमानस-राजहंसायमानस्य पण्डित सदोमण्डितस्याखिलानन्दशर्मणः लोकैकशर्मशर्मणः सूक्तयो लिख्यन्ते—यथा च—

यत्कर्म दुष्करतरं जगती तलेऽस्मिन्
विप्रैरकारि निजशर्म विहाय चासून् ॥
नाऽकारि तत्तदितरेण न कोऽपि कर्ता ।
तस्यास्ति सम्प्रति भविष्यति नाऽपि कश्चित् ॥१॥
मा नाशमेतु सुरगीरियमप्रमेय-
भावोन्नता कथमपीति विचिन्त्य चित्ते ।
यैराश्रितं वनमपास्य महोन्नतानि
नव्यानि दिव्यभवनानि विवृद्धकष्टम् ॥ २ ॥
किं दुष्करं जगति यन्न कृतं स्वभावादु
वागीश्वरीसमवनाय मुखप्रजातैः ।
सत्यं समक्षमुपगत्य वदन्तु वर्षे
सर्वत्र संस्थितमवेदय जना महेशम् ॥ ३ ॥

त्यक्ताः सुताः सकलमुज्झितमत्र राज्यं
प्राणप्रियाऽपि बहुशर्मकरी निरस्ता ।
यैरात्मना सममभर्त्यगिरां प्रचारे
सर्वं समापितमभून्न निरस्तु तेभ्यः ॥ ४ ॥

यो भूतले जनिमुपेत्य मनुष्यमानी
विप्रोपकारमतुलं हृदये न धत्ते ।
नाशः समीपमधिकं गत एव तस्य
मन्ये कृतघ्नपुरुषस्य नराधमस्य ॥ ५ ॥

सम्माननीयाः! कियद्वर्णयामि वर्णेषु श्रेष्ठस्य द्विजोत्तमस्य लब्धजन्मनोऽग्रजन्मनो महत्त्वविषये, अस्माकन्तु सुकुमाराः कुमाराः स्वधर्मबलात्त-सिद्धिवित्ता वित्तविद्याविताः कर्तुमकर्तुमन्य-थाकर्तुञ्च प्रभविष्णवोऽभूवन् का कथाऽपरेषाम् । किन्न स्मर्यते स्मृतिमद्भिर्भवद्भिर्भा-वद्भिः प्रतिभा वद्भिः यदस्माकं श्रीसमीकतनुजनुः श्रीशृङ्गीऋषि कुमारात्कुशान्निजजनकाषमानोदन्तमाकर्ण्य तत्क्षणं शतक्षणो महाविचक्षणः करे जलमादाय स्वपितुः कण्ठे मृतकसर्पं प्रक्षिप्य, स्वगेहं प्रति प्रस्थिताय परिक्षिते परीक्षित-महीपाय शापमयच्छत्, तत्कथनानुसारं सप्तमे दिने सर्पदष्टोऽभिमन्यु तनुजनुर्यमास्यद्रष्टश्वरोऽभूत । इति वृत्तं ब्राह्मण तनुभुवो धर्मसन्तानसुवो विदुर्विदांवरा विद्वांसः ।

सम्प्रति भूतपूर्वं भूतकालवृत्तमत्रैव पर्यवस्य-तीति माननीयानां पुर इदमपि सविनयं निवेद्यते, यदिदानीमपि सन्ति सन्तः कियन्तो धीमन्तः धीर धिषण-धिषणाः सुरभारतीसमुन्नमन-बद्धपरिकरा निजदेशं स्वकीयाञ्च जातिं समुन्नमयितुं कृतोत्साहा बल-बुद्धि-सागराः स्वकीर्तिकौमुदीधवलीकृतदिगन्ता महामहिमशालिनः षड्दर्शनीमार्मिका धार्मिका धर्मकथासनाथगलाः समाराधनीयपादयुगला भार-तभूमिं स्वजन्मनोत्तंसयन्तो ब्राह्मणमहाभागाः, ये देशसेवायाम्, धर्मवरिवस्यायामग्रेसरीभूता विलो-क्यन्ते लोके लोकैः । साम्प्रतमपि विद्यादानाऽवदा-नकर्मसक्ता देशभक्ता विद्यालय-महाविद्यालय-वि-श्वविद्यालय-समुद्घाटन-संरक्षण-रक्ता देशनेतारः सुगृहीतनामधेया मालवीयमहोदया भारतभूष-णायितमूर्त्तयः सन्तीति विदितचरमेव विदुषाम् । भगवतस्तिलकमहोदयस्य गोखले महोदयस्य वा लोकविदितं चरितं के न जानन्ति ? इत्थमपरेऽप्य-परिमिताः सन्ति भूयांसो विद्वांसः पुमांसः । केषां केषां क्रियेताऽत्रगणना । यदि स्यात्सर्वेषां नामो-ल्लेखस्तर्हि भूयसी भवेद्विस्तृतिरतो विस्तारभिया समाप्यते लेखोऽयम् । अलमतिपल्लवितेन ।

विधवोद्वहन विवेकः ।

(ले०-पं० रूपनारायण शास्त्री, अयोध्या)

'यदा जगतीतले निखिलजातयः, काननेष्वित-स्ततः पर्य्यटन्त्यो द्रुमफलैस्तरुपत्रकुसुमैश्चोदरपोषणं कृतवत्य आसन्; यदा च महीतलस्थाः समस्त मानवा रम्भादितरुवल्कलैस्तद्दलैश्च स्वीयतनुवेष्टनं कुर्वन्ति स्म; यस्मिन्समये साम्प्रतिकांग्लादीनां प्रादुर्भावोऽपि नाभूत्; तस्मिन्समयेऽपि भारतीय हिन्दूजातयो विज्ञानभागीरथीं वाहयन्तोऽखिल-जनान्सभ्यान्कुर्वन्तस्तापत्रयान्निवृत्ताः समजायन्त । अधुना तद्वंशीया एव पाश्चात्योपदेशपिशाचग्रस्ता

लीडरपदवीं भजमाना 'न्यूलाइट' सभ्यतावन्तो जनास्तान् पूर्वजान् श्रुतिस्मृतिपुराणेतिहासनिर्धारितधर्मपरायणान् (ते मूर्खास्तर्करहिता ज्ञानशून्याः पशुवृत्तयः) इत्यादिक्रूरवाक्यैरधिक्षिपन्ति । जपन्ति चाहर्निशन्ते विधवोद्वहनं भवितव्यमिति रामनामवत् । तत्रेत्थं विचार्य्यते, सृष्टेः प्राक् परमात्मैक एव तिष्ठति । या च प्रकृतिस्तदीयच्छायामात्रमस्ति । तदुपरि जगदीशप्रतिबिम्बसंसर्गेणाविर्भावं संप्राप्नोति । भूयोऽपि तस्मिन्नेव लीयते पूर्णः सन्नपि परमेश्वरः प्रकृतिबीजात् अपूर्ण इव दृश्यते । यथा च प्रकृतिर्विराट् पुरुषे लयं गत्वैव पूर्णा भवति । तथैव प्रकृत्यंशादुत्पन्ना महिलापि निजप्राणवल्लभे संलीयैव पूर्णा भवितुमर्हति, उपासनासिद्धान्तानुसारेण चैकस्मिन्नेव मनो लीनं कर्त्तुं शक्यते । यदि लयसम्भावनैकस्मिन्नेव भवितव्यास्ति । तर्हि स्त्रीणामपि एक एव पतिर्भवितव्यः । स्त्रीणां बहुशो विवाहा मुक्तिमार्गवर्णादिस्थितिप्रतिबन्धकत्वात् दूरतः परिहर्त्तव्याः । पतिव्रतपरायणा रामा स्वोपास्य देवे पत्यौ, मनसा वाचा कर्म्मणा च तन्मयी भूय कर्म्मबन्धनान्मुक्ता भवति । योगसिद्धान्तानुसारेण पुरुषेषु प्राधान्येन प्राणवायुस्तिष्ठति । अपानवायुश्च स्त्रीषु, अतएव पुरुषेषु बलम्, निर्भीकत्वम्, काठिन्यम्, पुरुषार्थादिकं तथाचानेकविधोत्तमगुणाश्चोपलभ्यन्ते । स्त्रीषु तद्विपरीता निर्बलता, नम्रता, कोमलताधीनतादिगुणा दृश्यन्ते । योगिनामेतत् सामर्थ्यं विद्यते—यत् प्राणवायुबलेनापानवायुं यदीच्छन्ति तदैवाकर्षन्ति । पुनश्च तत्रैव स्थापयितुं शक्नुवन्ति, परञ्चापानवायुबलेन प्राणवायुर्नेतस्ततः कर्षुं समर्थयन्ते । एतावुभौ प्रकारौ समाधौ मृत्युकाले च परमार्थतो विदितौ भवतः । योगमेकं सनातनं मत्वा हिन्दुजातिषु प्रचारितमिदं कृतमस्ति । यत् अपानवायुसदृशी नारी द्वितीयं प्राणवायुसमं पुरुषं नो सेवते । कुतः ? तन्मर्यादातो बहिर्भूतोयं वातोस्ति । यद्यपि

नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इत्यादि पराशरप्रभृतिमहर्षिवाक्यैर्विधवोद्वहनं चोररीकर्त्तव्यमित्येव प्रतीयते । तथापि शूद्रपरत्वेन तानि वाक्यानि ध्येयानि । अत एव महर्षिणा मनुना-

नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
न विवाहविधावुक्तं विधवावेदनं पुनः—इत्युक्तम् ॥

अखिल भारतीय-संस्कृत-साहित्य-सम्मेलनम् ।

अखिल भारतीय-संस्कृत-साहित्य सम्मेलनस्य यदद्वादशाधिवेशनं गुरुकुल-विश्वविद्यालयस्य (कांगडी, बिजनौर) वार्षिकोत्सवावसरे अप्रेल मासस्य पञ्चमे षष्ठे च दिवसे निश्चितमासीत् । तदिदानीं कतिपयैरनिवार्यैः कारणैः स्थगितं जातम् । यद्यपि सम्मेलनस्य सर्वेऽपि सम्भराः निबन्धाः, प्रस्तावाश्च निर्णीता आसन् । बहुभिर्विद्वद्भिश्च समागमनस्य वचनानि दत्तान्यासन् । परन्तु सम्मेलनस्य प्रधानकार्यालयाधिकारिणां शैथिल्येन सभापतिनिर्वाचनमिदानीं यावदपि न सञ्जातम् । इदानीनितरां स्वल्पीयान् समयो वर्वर्ति । नियमानुसारमेतस्मिन् स्वल्पे समये सभापतिनिर्वाचनं न भवितुमर्हतीति सम्मेलनं नास्मिन समये भविष्यति । पुनः कदा भविष्यतीति न वक्तुं पार्यते ।

गुरुकुल-विश्वविद्यालयः, कांगडी (बिजनौर)

विनीतः—
श्रीवागीश्वरो विद्यालंकारः
स्वागतमन्त्री

संस्कृत-साहित्य-समाजस्य चतुर्थाधिवेशनम् ।

चैत्रकृष्णाष्टम्यां संस्कृत-साहित्य-समाजस्य चतुर्थमधिवेशनं सायं 'टाउनहाल' नाम्नि नगरमण्डपे चतुर्वादने महता समारम्भेण समपद्यत । यथासमयमेव सभापतिमहोदयाः काशीहिन्दूविश्वविद्यालयस्योपकुलपतयः (प्रो० वाइस-चान्सलर) श्रीमदाचार्या आनन्दशङ्कर वापूभाई ध्रुव-महोदयाः सभास्थानमलमकुर्वन् । सभापतिमञ्चे समवेता आसन् काशीस्था विद्वांसश्चान्ये यथा—महामहोपाध्यायश्रीदेवीप्रसादकविचक्रवर्तिमहोदयाः, श्रीयज्ञनारायण उपाध्याय—(एम० ए० एल एल० बी०)—महोदयाः, श्री श्रीकृष्णजोशी (बी० ए०, एल-एल० बी०) महोदयाः, श्रीसत्यनारायण कविरत्नमहोदयाः, श्रीरघुवीर वैद्य-महोदयाः, श्रीबलदेवमिश्रज्यौतिषाचार्य—(हि० वि० वि०)—ः महोदयाः, श्रीबलदेव मिश्र ज्यौतिषाचार्य—महोदयाः, श्रीराजनारायणशास्त्रिणः, श्रीमहादेव पाण्डेयाः साहित्याचार्याः, श्रीगेन्दालाल चौधरी महोदयाः, श्रीतारादत्त पन्त-साहित्यचार्याः, श्रीविद्याधर झा (बी० ए० एल० टी०) महाशयाः, श्रीगणेशदत्त शास्त्री (एम० ए० एल-एल बी०) श्रीजानकी शरण त्रिपाठिनः 'सूर्य'—सम्पादकाः, श्रीदामोदर शास्त्रिणो भिषगाचार्याः, श्रीगुलाबझा व्याकरणाचार्य महोदयाः, श्रीराधाकान्त झा न्यायाचार्याः, ऋषिकुल-हरद्वारस्थ-प्रधानाचार्याः श्रीघुटर झा महोदयाः, श्रीअजबलाल झा वेदाचार्याः श्रीविद्याधरशास्त्रिणो वेदाचार्याः, श्रीरुद्रदेव शास्त्रिणो वेदालङ्काराः, श्रीसीताराम झा ज्यौतिषाचार्याः, श्रीसत्यदेव वेदान्तशास्त्रिणः, श्रीकाशीनाथ मिश्राः वेदाचार्याः, श्रीरामाधार मिश्राः, अन्ये च बहवो विद्वांसः समुपस्थिता आसन् ।

प्रथमं श्रीगोपालशर्म्मणा संस्कृत-गीतिकायां गीतायाम् श्रीगोपालशास्त्रिणां प्रस्तावे, श्रीदामोदरशास्त्रिणां भिषगाचार्याणाञ्च समर्थने सभापतिमहोदयाः, सभापतेः स्थानमलमकार्षुः । ततश्च श्रीकाशीविद्यापीठस्थाः दर्शनाध्यापकाः श्रीगोपालशास्त्रिणो दर्शनकेशरिणः समाजस्य प्रधानमन्त्रिणश्चतुर्थवार्षिकं विवरणमश्रावयन् ।

तदनन्तरं सभापतेरनुज्ञया प्रथमोऽयं प्रस्तावः समुपस्थितः—

१—" सत्यामपि भारतीय-संस्कृति-सभ्यता-संस्कार-धर्मादिज्ञान-जनयित्र्यां संस्कृत भाषायाम्, भारतीय-जनतायां संस्कृताध्ययनाभावमवमृश्य, अनेन संस्कृत-साहित्य-समाजेन, राजकीय-शिक्षा प्रबन्ध-समितिसदस्याः सादरं सानुरोधञ्च विज्ञाप्यन्ते—"यदिदानीन्तनेषु सर्वेष्वपि हिन्दी-मिडिल-शिक्षालयेषु संस्कृत-शिक्षण-प्रबन्धोऽपि विधेयः, येन तत्रत्यच्छात्राणां तद्विद्यालयतो निर्गमनानन्तरं संस्कृताध्ययने सौकर्यं स्यादिति ।

अस्य च प्रस्तावस्य प्रतिलिपिं संप्रेष्य शिक्षाविभागाधिकारिणोऽपि विज्ञापनीयाः ।"

प्रस्तावकः—श्री पं० सरयूप्रसाद पाण्डेयः

समर्थकः— श्री पं० रुद्रदेव शास्त्रिणो वेदाचार्याः

२—द्वितीयः प्रस्तावः—

"इदानीं सर्वतोऽपि संस्कृताध्यायिनां वृत्ति निरोधं निरीक्ष्य चिक्लिश्यमानहृदयोऽयं संस्कृत-साहित्य-समाजः सर्वानपि संस्कृताध्येतॄन् साग्रहं विज्ञापयति, यत्, " ते स्वाध्यायाध्ययनेन सह सर्व साधारणजनहितकरोपदेशादिजनकयोग्यतामपि सम्पादयेयुः, येन देश-कालात्मविज्ञानवन्तस्ते स्वजीवनयात्रादिलोकव्यवहारं साधु सम्पादयन्तो लोके प्रवर्द्धमानं धर्मकृत्योपेक्षणादिभावं निरोद्धुं समर्थाः स्युः । "

प्रस्तावकः—श्रीगोपालशास्त्री (प्रधान मन्त्री)

समर्थकः—श्रीराजनारायणशास्त्री (हि० वि० वि०

३–तृतीयः प्रस्तावः—

३—" संस्कृत साहित्य-समाजोऽयं संस्कृत-परीक्षासमितिसदस्यान् सानुरोधमभ्यर्थयते, यत् ते स्वीयपरीक्षा-पाठ्यपद्धतिं परिस्कृत्य, इतिहास-भूगोल – गणितादिसाधारण-ज्ञान-निवेशनेन देशकालोपयोगिनीं कुर्वन्तु । परीक्षार्थिप्रश्नोत्तर-पत्रगत न्यूनता-विवरणञ्च प्रकाशयन्तु । येन परीक्ष्य विद्यार्थिनां तद्विषयकमान्ध्यं व्यपगतं स्यादिति।"

प्रस्तावकः—श्रीकेदारनाथ शर्म्मा सारस्वतः,

समर्थकः—श्रीकाशीनाथ शर्म्मा, वेदाचार्यः

प्रस्तावत्रयानन्तरं समयातिपातात् सभापतिमहोदयैरवशिष्टं कार्यजातमागामिदिवसकृतेऽवरुद्धम् । ततश्च संस्कृत-साहित्य-समाजस्य भूतपूर्व-सभापतयः श्रीमन्तो महामहोपाध्यायाः श्रीदेवीप्रसादकविचक्रवर्तिमहोदयाः समाजावस्थायाः संक्षिप्तं परिचयं सुललितैः सारगर्भैर्वाक्यैरदुः । तदनन्तरञ्च सभापतिमहोदयैः संस्कृतम्, साहित्यञ्चावलम्ब्य, गवेषणपूर्णम् महत्वमहितम्, अध्येयम्, मननीयञ्च भाषणं पठितम् । †

ततश्च धन्यवादादिवितरणानन्तरं सभा-विसर्जनमभूत् ।

द्वितीयोदिवसः ।

अपरस्मिन् दिवसे सायं चतुर्वादनतस्तत्रैव मण्डपे पुनरपि समारम्भः समारब्धोऽभूत । अद्य खलु ज्वर-पीडिताः सभापतिमहोदया नागन्तुमशकन्निति श्रीमतां श्रीगोपालशास्त्रिणां प्रस्तावे, श्रीमतां श्रीदामोदरशास्त्रिणाञ्च समर्थने, हिन्दू विश्व-विद्यालयस्य न्यायशास्त्र-प्रधानाध्यापकाः पण्डित-प्रवराः **श्रीबालकृष्ण मिश्राः न्यायाचार्याः** सभापतेरासनं समलञ्चक्रुः । अद्य खलु मान्येषु विद्वत्सु—

रणवीरपाठशाला-ध्यक्षाः श्रीमदनन्तरामशास्त्रि महोदयाः, राजकीय-महाविद्यालयस्य प्रधान वैयाकरणमणयः श्रीरामभवनशास्त्रिणः, महामहोपाध्यायाः श्रीदेवीप्रसाद कविचक्रवर्तिमहोदयाः रा० सं० विद्यालये ज्योतिःशास्त्रप्रधानाध्यापकाः श्रीहृषीकेशोपाध्यायाः, तत्रैव वेदान्तमीमांसाध्यापकाः श्री बालबोध मिश्राः, मारवाडीमहाविद्यालयाध्यक्षाः श्रीमदनमोहनशास्त्रिणः, हरद्वारस्थ-ऋषिकुल-ब्रह्मचर्याश्रम-प्रधानाध्यापकाः श्रीबुद्दरझामहोदयाः, श्रीयज्ञनारायणोपाध्यायाः, श्रीगुलाबझा व्याकरणाचार्याः, हिन्दूविश्वविद्यालयस्यायुर्वेदाध्यापकाः श्रीसत्यनारायणकविरत्न-महोदयाः, विरला पाठशाला-प्रधानाध्यापकाः श्रीसभापति उपाध्यायाः, श्रीव्रजविहारीझा शास्त्रिणः, श्रीवामदेव शास्त्रिणः (हि० वि० वि०) श्रीरुद्रदेव शास्त्रिणो वेदाचार्याः, श्रीढुंढिराजशास्त्रिणः, श्री तारादत्त पन्ताः साहित्याचार्याः, श्रीमहादेव शास्त्रिणः साहित्याचार्याः श्रीकृष्ण जोशी, बी० ए०, एल् एल् बी० महाशयः, पुरुषोत्तम शास्त्रिणश्चतुर्वेदाः साहित्याचार्याः (जयपुरस्थाः); श्रीकाशीनाथ पाण्डेयाः श्रौतमार्तण्डाः, श्रीसुखराम शास्त्रिणः (देहलीस्थाः), श्रीबलदेव मिश्राः ज्यौतिषाचार्याः (हि० वि० वि०) श्रीबलदेव मिश्राः ज्यौतिषाचार्याः (का० वि० पी०) श्रीदामोदर शास्त्रिणो भिषगाचार्याः सर्वदर्शनतीर्थाः, श्रीसाँवलजी नागराः, श्रीअम्बिका प्रसाद शास्त्रिणः, श्रीशुभकरणमिश्राः व्याकरण-न्यायाचार्याः, श्रीसीतारामझा ज्यौतिषाचार्याः, श्रीअजबलालझावेदाचार्याः, श्रीराजनारायण शास्त्रिणो व्याकरणाचार्याः (हि० वि० वि०) अन्ये च विद्वांसः समुपस्थिता आसन् ।

ततः श्रीबालकृष्ण मिश्राणाम्,श्रीयज्ञनारायणोपाध्यायानाम् तथा श्रीहृषीकेशोपाध्यायानाञ्च माध्यस्थ्ये, 'यावदध्ययनकालं व्याकरणमेवाध्येयन्न वा ? इत्यस्मिन् विषये विवादः प्रारब्धोऽभूत् । तत्र यावदध्ययनकालं व्याकरणमेवाध्येयमित्यमुं पूर्वपक्षमुररीकृत्य, श्रीशन्तनुविहारी द्विवेदी, श्रीकुबेरनाथ शुक्लः, श्रीगोपालदत्त त्रिपाठी, श्रीयाज्ञवल्क्य शर्म्मा चेतिछात्राः क्रमशो व्याख्यानं दत्तवन्तः । उत्तरपक्षमवलम्ब्य च श्रीस्वामी सच्चिदानन्दः, श्रीदामोदर पाण्डेयः, श्रीत्र्यम्बक विनायक मोहरिरः, श्रीसत्यदेव शर्म्मा, श्रीमरुलाराध्य शर्म्मा चेतिछात्राः विवरणमकार्षुः ।

तदनन्तरं पूर्वदिवसावशिष्टानां प्रस्तावानामुपस्थापनमभूत् । तत्र स्त्री-शिक्षा-विषयकश्चतुर्थः प्रस्तावः—

† तेषां तद्भाषणं विशिष्टाङ्के प्रकाशितं भविष्यति—सम्पादकः

४—" स्त्रीसमाजे संस्कृत-शिक्षाया अभावात्, प्राचीन-भारतीय-सभ्यतायाः ह्रासम्, पाश्चात्य-सभ्यतायाश्च भारतीयान्तःपुरे निर्बाधं सञ्चार-मालोक्य, व्यथितहृदयोऽयं समाजः, सर्वानपि भारतीयाननुरुणद्धि, यत् तैः स्वीयाः कन्याः प्रथमतः संस्कृत-धर्म शिक्षा-दीक्षिता एव विधातव्याः, तदर्थं च प्रति नगरम्, प्रतिग्रामञ्चैका संस्कृत-कन्या-पाठशाला संस्थापयितव्या इति । तथा अत्रत्यान् धनिनो राष्ट्रनेतारो राजकर्मचारिणश्च सानुरोधं प्रार्थ्यन्ते, यत् ते वाराणस्यामस्यामादर्शरूपेणैकं ' महिला-संस्कृत-विद्यालय-'मुद्घाटयन्तु, यत्र सर्वासामपि स्त्रीणां सुलभतया शिक्षाप्रबन्धो भवेत्—इति च ॥ "

प्रस्तोता—श्रीगिरीश शुक्लः, न्यायाचार्यः,

समर्थकः—श्रीमहादेव पाण्डेयः, साहित्याचार्यः,

पञ्चमः प्रस्तावः—

५—" प्राच्य-पाश्चात्योभयशिक्षाक्रमे स्वास्थ्योपयोगिनोदीर्घायुष्ट्वसम्पादनोपयोगिनःसाधारणायुर्वेदशिक्षणस्य उपयोगो यथा भवेत्तथा तेषु विद्यालयेषु आयुर्वेदशिक्षा सर्वेभ्योऽनिवार्यरूपेण देया, एतदर्थञ्च स्वास्थ्यविभागीयाध्यक्षास्तथा काउन्सिल-कार्य-सम्पादकाश्चाभ्यर्थ्याः । "

प्रस्तावकः —श्रीदामोदरशास्त्री भिषगाचार्यः,

समर्थकः—श्रीसत्यनारायण कविरत्नम्, आयुर्वेदाचार्यः

षष्ठः प्रस्तावः—

६—" जनसाधारणकार्ये सर्वेषामधिकारस्य समत्वात् देशकाल-धर्मस्थितिरक्षणार्थं संस्कृताध्येतॄणां तत्र प्रवेशस्यावश्यकत्वात् व्यवस्थापकसभा-(कौन्सिल)-सदस्यनिर्वाचनमताधिकारे आचार्यशास्त्रितत्समान्यान्यपरीक्षोत्तीर्णानाम्, नगररक्षणसमितिसदस्य-(म्युनिसिपल मेम्बर)-निर्वाचन-मताधिकारे, ग्राम-पञ्चायतन-(पञ्चायत)-निर्णायकसदस्य-मताधिकारे च उत्तम-मध्यम-प्रथम-परीक्षोत्तीर्णानां विदुषाञ्च युक्तियुक्तो मताधिकारो देयश्चेति सविनयं राजकीय सभ्याः देशनायकाश्च प्रार्थनीयाः, येनाग्रिमनिर्वाचनावसरे संस्कृतपण्डिता मत दातारो भवन्त्विति ।

प्रस्तावकः—श्रीसभापति उपाध्यायः, व्याकरणाचार्यः,

समर्थकः—श्रीघुटरझा, शास्त्री, साहित्य-व्याकरणाचार्यः

सर्वसम्मत्या स्वीकृतेषु प्रस्तावेषु विवादे समुत्तीर्णेभ्यश्छात्रेभ्यः पुरस्कारप्रदानमभूत् । तत्र सभापति महोदयैः प्रथमः पुरस्कारो विरलासंस्कृत-पाठशालीयाय श्री सभापतिमहोदयानां शिष्याय श्रीदामोदर शर्म्मणे, द्वितीयश्च पुरस्कारो विरजानन्द-संस्कृतविद्यालयीयाय श्रीब्रह्मदत्त जिज्ञासुशिष्याय श्रीसत्यदेव शर्म्मणे (बालकाय) तृतीयश्च पुरस्कारः काशीविद्यापीठस्थाय श्रीगोपालशास्त्रिणां छात्राय श्री त्र्यम्बकविनायकशर्म्मणे प्रदत्तः । स्वल्पवयस्काय बालकाय श्रीयाज्ञवल्क्यशर्म्मणे श्रीमद्भिर्यज्ञनारायणोपाध्यायमहोदयैस्तदुत्साहवर्धनाय मुद्राद्वयं प्रदत्तम् ।

ततश्च संस्कृत-साहित्य-समाजस्याधिवेशनं विसर्जितमभूत् * तत्रैव च निखिल-भारतीय-सनातन-धर्म-सभायाः प्रचारः समारब्धः ।

श्रीमहादेव पाण्डेयः, शास्त्री, साहित्याचार्यः,

सहायक—मन्त्री ।

* संस्कृतछात्रसङ्घस्य विशिष्टाधिवेशनं समयाभावान्नजातम् । तच्च चैत्रशुक्लप्रतिपदि तत्रैव नगरसभामण्डपे (टाउन हाले) सञ्जातम् ।

काशीस्थ-संस्कृत-साहित्य-समाजस्य चतुर्थवर्षस्य विवरणम्।

ॐ भद्रमिच्छन्त ऋषयः
स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे
ततो राष्ट्रं बलमोजश्च जातं
तदस्मै देवा उपसन्नमन्तु ॥

अथर्व-कां०, १९ अ० ५-,सू० ४१

अत्यद्भुतं कर्म चकार योऽर्भकोऽ-
वधीद्युवा भारत दुष्ट-शासकान्।
गीताऽमृतं वेदरहस्यमादिशत्
कृष्णः स नोऽव्याद्भगवान् सनातनः।

अयि माननीयाः सभापति-महोदयाः, प्रेष्ठाः पूज्या विद्वांसः, सुहृदश्च, अन्ये चोपस्थिताः सुरभारतीसमुपासका नागरिकाः, भावुकाश्च संस्कृतज्ञा अन्तेवासिनः।

विदितमेव तत्रभवतां सर्वेषाम् सुप्रभात पाठकानां, यदस्यां वाराणस्यां वर्ष-चतुष्टयतोऽयं संस्कृत-साहित्य-समाजः, सुरभारती-समुपासक-विदुषामन्तेवासिनाञ्च, सर्व-विधमपि परं श्रेयो विदधत्तेषां शाश्वतिक-सङ्घटनायाविरतं यतमानोऽद्य चतुर्थं वर्षं समतिक्रम्य पञ्चमे वर्षे पादन्यासमातनोतीति। आधुनिक-जनप्रवाह-प्रकृतिनियमतोऽनेन बालक्रीडामेवानुभवता बहु आघात-प्रत्याघात प्रयास-परिवर्तनमासादितम्। तद्यथा-प्रथमतो वाराणसीस्थानां विदुषामौदासीन्येन अस्य स्वात्मलाभ एव महानन्तरायोऽभूत्। परन्तु; विद्वद्धौरेयाणां कतिपयेषां हस्तालम्बनेन द्विगुणितोत्साहोऽयंनाविरतोऽभूत् स्वचिकीर्षितव्य-व्यापारात। शनैः शनैश्चङ्क्रम्यमाणोऽयमिदानीं काशीस्थानां समेषामेव मान्यानां महर्षिकल्पानां मनीषिणां वात्सल्य-भाजनमस्तीति हर्षास्पदमस्माकम्।

अनेन च—

(१) सुगमैः समुचितैश्चोपायजातैः संस्कृत-साहित्यस्य संरक्षणम्।

(२) संस्कृत-समाजे प्रचलितानां देशकालानुपयुक्तानां पद्धतीनामपाकरणम्, सामयिक-नवजीवनसञ्चारः।

(३) संस्कृत-भाषाया महत्वप्रचारः, तदुपयोगिता-प्रख्यापनञ्च।

(४) सं० सा० संरक्षणे समुन्नतौ च समयोपयोगिनामनुकूलानामावश्यकानां सर्वसम्मतानाञ्चोपायानां सम्यगुपयोगः। इत्यादि स्वोद्देशपूर्तये—

(१) संस्कृतच्छात्र-सम्मेलनम्

२) संस्कृत-कवि-सम्मेलनम्

(३) पत्र-प्रकाशन-समितिः

(४) पुस्तक-प्रकाशन-परिषद्

(५) संस्कृत-नाट्य-परिषद्

(६) गवेषणा-समितिः

(७) परीक्षा-परिषद्

(८) संस्कृत-विद्यालय-समीक्षासभा

(९) संस्कृत-सेवासङ्घश्च। इत्यादयो बहवो विभागाश्चिन्तिता आसन्। परन्तु तत्र सहायकाभावात् द्रव्यादि-साहाय्यानुपलब्धेश्च तेषां मध्ये—

(१) पत्र-प्रकाशन-समितिः
(२) शास्त्रार्थ-सभा, (विवाद-सभा)
(३) संस्कृतच्छात्र-सङ्घः
(४) संस्कृत-वाचनालयः

इत्येत एव विभागाः सञ्चाल्यमाना विद्यन्ते। तत्रापि च संस्कृतच्छात्राणामनुत्साहेन तेषु देश-कालादिज्ञानाभावात् स्थानाभावाच्च शास्त्रार्थ-सभा, विवाद-सभा, वाचनालय विभागानान्तु शैथिल्यमेव वरीवृत्यते। केवलम्-कार्यकर्तॄणामेवाविरतोत्साहेन पत्र-प्रकाशन-समितेः संस्कृतच्छात्र-संघस्य च काय साधु प्रचलति। [तत्र श्वोभाविनि संस्कृतच्छात्र सम्मेलने संस्कृतच्छात्रसङ्घस्य विवरणन्तन्मन्त्रिणा श्रीमतामन्तिके उपस्थापयिष्यते।] *

अथाहं श्रीमन्तं सर्वान्तर्य्यामिणम्परमेश्वरं प्रार्थयमानः सुप्रभात-पाठकान् संस्कृत-साहित्य-समाज-सदस्यांश्च ससाधुवादमभिनन्दन् स्वीयकर्तव्यपालनपूर्वकमेतद्वर्षजन्यं संस्कृत साहित्य-समाजीयकृत्यं श्रीमतां पुरस्तादुपाहरामि।

व्यतीतेऽब्दे, युवकसमाजेऽजातपूर्वां जागर्तिं सम्पादयद्भिर्ममप्रियवयस्यैः विद्यालङ्कार-काव्य-तीर्थ-—साहित्यशास्त्रिभिर्हिन्दूविश्वविद्यालयीयरणवीरसंस्कृतपाठशालाया न्यायाध्यापकैः श्रीकेदार-नाथशर्मसारस्वत-महोदयैः संस्कृत-साहित्य-समाजस्य मन्त्रिपदमलङ्कृतमासीत्। परन्तु तैः सुप्रभातसम्पादनादिबहुकार्यव्यापृतिं जुषमाणैः परित्यक्तोऽयम्भारः 'पुनर्वैतालस्तत्रैवावलम्बितः' इति न्यायात् पातितो भूयोऽपि ममैव शिरसि साग्रहं मन्त्रणा-समिति-सदस्यैरिति कार्यान्तरव्यापृतोऽपि नाशकन्तदीयामाज्ञामुल्लङ्घयितुम्।

न्यायाचार्य्यवर्यैः हिन्दुविश्वविद्यालये जैनन्यायाध्यापक—पदप्रतिष्ठितैर्मम मान्यमित्रैः-श्रीमद्भिः श्रीगिरीशशुक्लवर्यैश्च व्यवस्थापकत्वमुररीकृतम्। सभापतिपदञ्च तत्रभवन्तो वैदिकशिरोमणयो म० म० श्री प्रभुदत्तशर्म्माणोऽग्निहोत्रिणः समेषामेव सुधियां परिचिततराः पूर्ववदेवाधितिष्ठन्ति। एवं परिवर्तनमासादयता मंत्रिमण्डलेन प्राक्तनैः, श्रीदेवीनारायण वर्मभिः (बी० ए०,एल् एल् बी) महोदयैः, सूर्योदय-सम्पादकैः श्रीविन्ध्येश्वरीप्रसाद शास्त्रिभिः श्रीकाशीविद्यापीठस्य वेदसाहित्याध्यापकैः श्रीरुद्रदेवशुक्लैर्वेदाचार्यदर्शनालङ्कारमहोदयै रणवीर संस्कृत-पाठशालायाः प्रधानाध्यापकैः श्रीअनन्तरामशास्त्रिभिस्तथा सनातनविद्यालयादिपवित्रतर-संस्थासञ्चालकैः श्रीमद्भिर्मदनमोहनशास्त्रिभिरन्यैश्च मध्ये मध्ये सहयोगदातृभिः सदस्यैः सह पेषमः कार्यभारः संचाल्यते।

तत्र प्रतिवर्षं प्रथमत एव सभास्थानं सुशोभयतां तेषामस्माकं स्थायिसभापतीनामग्निहोत्रिमहोदयानामिदानीं मासत्रयात् शरीरमस्वस्थमस्तीति ते नात्रोपतिष्ठन्ते। आशासे प्रार्थयेचाहं श्री काशीविश्वेश्वरं यत्ते सत्वरमेव पूर्ववन्नीरुजाः स्वस्थ शरीरा आसादितद्विगुणोत्साहाश्च भूत्वा अस्माकं सूत्रसञ्चालका भवन्तु इति।

गताधिवेशन-कृत्यं तत्र भवतां श्रीमतां स्वनामधन्यानां सर्वतन्त्रस्वतन्त्राणां म० म० श्रीप्रमथनाथ

* एतत्सम्मेलनं कारणवशात् प्रदितपदि संजातम्। तद्विवरणञ्चान्यत्र प्रकाशितं द्रष्टव्यम्।—सु०सम्पादकः

तर्कभूषणमहोदयानां सभापतित्वे संजातम् । तत्र "हिन्दूधर्मः परिवर्तनशीलो न वा ?" इति विवाद-विषये दर्शनविद्यालयच्छात्रः श्रीसुन्दरलाल शर्मा, तथा श्रीविड़लाविद्यालयच्छात्रः श्रीदामोदर शर्मा च क्रमशः प्रथमद्वितीयौ सञ्जातौ । तयोश्च संस्कृत साहित्य-समाज-कोषत एव पुरस्कार-प्रदानमभूत् ।

प्रस्तावेषु च संस्कृतराजकीय-परीक्षादिवस-परिवर्तनादि-विषयकं प्रस्तावं स्वीकृत्य तै राजकीय-परीक्षा-प्रबन्धक-समिति-पदाधिकारिभिर्यत् संस्कृत साहित्य-समाज-समादरणं कृतमिति तेभ्यः शतशः साधुवादाः ? अपरे च प्रस्तावा ये संस्कृत विदुषां विद्यार्थिनां सम्बन्ध आसन् तदनुसारतो वर्तयन्त-स्तेऽपि महानुभावाः सुरभारत्याः, प्रेमास्पदीभूता धन्यवादार्हाः ।

अस्मिन्हायने मन्त्रणासमितेः पञ्चाधिवेशनानि समपद्यन्त । तत्र सर्वेष्वपि सदस्य-महोदयानामुपस्थितिर्दयनीयैवासीत् । कथमेवं प्रचलेत् मंत्रणा-समिति-कार्यमिति साञ्जलि प्रार्थना महानुभावेभ्यस्तेभ्यः ।

अस्मिन्वर्षे श्रीमतां संस्कृतसाहित्य-समाजस्य भूतपूर्व-सभापतीनां तत्रभवतां श्रीमतां सर्वमान्यानां श्रीदेवीप्रसादशुक्लकविचक्रवर्ति-महोदयानां महामहोपाध्याय-पदाभिनन्दनोपलक्ष्ये भाद्रपदकृष्ण प्रतिपदि विशिष्टाधिवेशनं महता समारोहेण समजनि । तत्रैव चम्पारण्यजनपदस्थवगहारत्नमाला-निवासिनामायुर्वेदाचार्य्य-(चिकित्सकचूड़ामणि-विद्यालङ्कार-कवीन्द्र) श्रीचन्द्रशेखरधर मिश्रमहोदयानामद्भुताविष्काराणामुदुम्बरसारादीनाम्परिचयः संस्कृतविदुषां समजनि । तत्रैव श्रीमतां भिषगाचार्यमहोदयानां श्रीदामोदर शास्त्रिणां सभापतित्वे छात्रसङ्घस्य प्रथमाधिवेशनं समपद्यत इति। सत्यप्येवं केवलं सदस्यानामुत्साहमात्रधनेनानेन सं० सा० समाजेन स्वकार्य्य सञ्चालनाय कार्य्यालयाभाव-प्रयुक्तं महत्कष्टमनुभूयते । केवलं सुप्रभात कार्य्यालयस्य कृते इदानीं टेढ़ीनीमस्थायां श्रीमतां साहित्यरसिकानां काशीस्थानां परिचिततराणां सुधनी-साहुवर्य्यश्रीजयशंकरप्रसादानामनुकम्पया तदीय-पूर्वपुरुषप्रतिष्ठापित-शिवालये व्यवस्थापक-महोदय-प्रसादतो लब्धप्रसरः संकुचिततरेऽपि स्थाने श्रीढुण्ढिराजगणेशाधिष्ठानमनुकृत्य स्वात्मानं गोपयति समाजोऽयम् । इत्यहो विषादास्पदमस्माकं यत्संस्कृतज्ञबहुलायामस्यां वाराणस्यां मुक्तहस्तं वितरणपरेषु श्रेष्ठिसमाजेषु, विद्यमानेषु च बहुषु रिक्तेष्वपि राजप्रासादेषु, तिष्ठत्सु चैवम्भूतेषु विद्वद्धुरीणेषु अयं हि समाजश्चतुर्भ्यो वर्षेभ्यः शरणार्थं शरणमीहत इति । शरणाभावादेवास्य समाजस्य वाचनालय-पुस्तकालयादिविभागो न प्रलचति ।

विदुषामभ्यर्थना ।

सर्वतोऽपि समाज-सदस्य-विषयेऽस्माकं बहु-विज्ञापनीयमस्ति । पश्यन्तु चत्वारि वर्षाणि व्यतिजगुरेतस्य प्रचलतः समाजस्य । परन्तु अद्यापि त्रयोनवतिरेवास्ति संख्या सहायक-सदस्यानाम् । तत्रापि च यावन्तः पण्डिता बहिस्थाः सदस्याः सन्ति, न तावन्तः काशीस्था इत्यपि महदाश्चर्यम् । विचारणीयोऽयंविषयः यदस्यां वाराणस्या

मेव सहस्रशो विद्वांसो भविष्यन्ति । बहिस्थाश्च लब्धावधिकास्तेषु सर्वेष्वपि इदमेवैकं वाराणसीतः प्रधाननगरीतो निःसरति संस्कृतज्ञानां मुखपत्रम् सुप्रभातम् । यच्च सर्वेभ्योऽपि सदस्येभ्यो निःशुल्कं दीयते । तथापि सं० समाजस्य त्रयोनवतिसदस्या इति श्रावं श्रावं करुणा-क्रान्तं चेतो निमज्जति शोक-सागरे संस्कृतज्ञानां दशोपरि । कथमेवं सुरभारत्याः भविष्यत्समयः समेधितः स्यादित्यनिर्वचनीयम-स्माकम् । अतो वयं भूयो भूयोऽभ्यर्थयामहे संस्कृता-भिवृद्धिमीहमानान् आधुनिक-परिस्थिति-परिचितान् विपश्चितो, भावुकान् देशकालज्ञांश्च सुरभारती-समुपासकान्तेवासिनश्च यत्—

किमधुनाऽपि भवन्त उदासते,
विगलिते सुरगीर्विभवे शते ।
प्रतिदिशं प्रहरत्सु निजारिषु,
प्रबलबुद्धि-पराक्रम-शालिषु ॥
किमियती दयिताऽलसता तता,
द्विजसमाजगताऽपि विलोकिता ?
विलपतीय मधीर-विलोचना,
सुरगिरा स्वसमाजगशोचना ॥
अतो भवन्तः समुपेत्य सादरात्,
परस्परप्रेमजुषानया धिया ।
सदस्य-संख्या वितता विधीयताम्,
भवेत्समाजाभ्युदयो यतोऽनिशम् ॥

अपि भो महानुभावाः ! किमभिदधामि श्रीमतां पुरः समाज-सदस्य-दशाम्, वहवो विद्वांसस्तु एव-म्भूताः सन्ति ये समाजसदस्यतान्न स्वीकुर्वन्ति, किन्तु सुप्रभातजिघृक्षया स्वकीयांश्छात्रानेव साधारणसदस्यतां नयन्ति, येन द्विगुणा भवति सं० सा० समाजस्य क्षतिः—यत एकतो भाविनो विदुषः सहायक-सदस्यस्याभावः संजायते, अपरतश्च रूप्यकत्रयमूल्यस्य सुप्रभातस्य सार्धरूप्यकमूल्ये-नैव वितरणं जायत इति । यतः पत्रवाहक-लेखक-कार्य्यालय-चिटिकाप्रभृति-व्ययादिकं संकलय्य रूप्यकत्रयन्तु मूल्यमेव भवति सुप्रभातस्य, छात्राणां कृते यदर्द्धमूल्येन दीयते तत्र तेषामकिञ्चिनत्वं पत्र पाठन-रुचि-विवर्द्धनादिकमेव हेतुः, परन्तु तत्रापि तेष्वपि अल्पीयांस एव सुप्रभातपाठकाः सन्ति । ये च सन्ति तेऽपि च सुप्रभातपोषकमेवात्मानं मन्यन्ते । इत्यहो विलसितं संस्कृत-साहित्य-दुरव-स्थायाः । इत्यत्रतु अप्पयदीक्षितस्य तत्पद्यमेव दृष्टिपथमारोहति यत्—

"कपिरपि च कापिशायनमदमत्तो वृश्चिकेन संदष्टः ।
अपि च पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य ॥"

अस्तु; किम्बहुज्ञेषु बहुना विज्ञापितेनेति । अतः एतद्वर्षगतं आय-व्यय विवरणं* श्रीमतां पुरस्तात् समुपस्थाप्य विरमामि ।

अन्तेच—

भूयो भूयोऽभ्यर्थयन्नीश्वरन्तं
भारत्याश्चाप्युन्नतीरीहमानः ।
काशीस्था वाऽन्ये वहिस्थाश्च धीराः !
साहाय्यं वो याचमानोऽप्ययामि ॥

श्रीगोपाल शास्त्री त्रिपाठी
प्रधानमंत्री,
सं० सा० समाजस्य,
सुप्रभात-कार्य्यालय, काशी ।

—:०:—

* इदमन्यत्रास्मिन्नेवाङ्के मुद्रितमस्ति (सम्पा०)

१९८३ वैक्रमाब्दिकायव्ययविवरणम्

आयः

* ६००) संरक्षकेभ्यः
† ४४।≡) माननीयेभ्यः
२१८॥–) सहायकेभ्यः
७५५≡) साधारणसदस्येभ्यः
३२॥≡)। प्रकीर्णकायः
५६।≡) विज्ञापनेभ्यः
‡ २॥) विशिष्टाङ्कसाहाय्यम्
× ३२) विशिष्टसाहाय्यम्
२३≡)॥ ¼ कुसीदायः
५०) श्रीयुत पं० अनन्तराम शास्त्रिणामृणम्
÷ १६।–)॥।वाचनमन्दिरस्य देयम्
६६॥≡) तारायन्त्रालयस्य देयम्

योगः १६३०॥।–)॥ ¼

व्ययः

५७॥)॥ ¼ कार्यालयीयवस्तुषु व्ययः
१३८॥।≡)॥। कर्मचारिपुरस्कारे व्ययः
५३।–) कार्यालयीयगृहशुल्कम्
११४४–)॥ सुप्रभाते
५८८॥≡) मुद्रणे
३०७) कर्गज़े (कागज)
२५।≡)। यन्त्रालयगमनागमने यानव्ययः
२२३–)। चिटिकासु (Stamps)
५॥–)। शुल्कसमानेतृभ्यो लाभांशे (कमीशन) दत्तः
६८) अधिवेशनेषु
२।≡) प्रचारकार्ये
६।–)॥। 'सेविङ्गबेङ्क' कोषे
६२२॥।≡)॥। ¼ 'बनारसबेङ्क'नाम्नि कोषे

योगः २०६६–)॥ ¼

२३८॥≡)। पूर्वावशिष्टम्
१६३०॥।–)॥ ¼ १९८३ आब्दिकायः
२१६६॥)॥। ¼ सर्वयोगः
२०६६–)॥ ¼ १९८३ आब्दिको व्ययः
७०।≡) ¼ व्यवस्थापकमहोदयानां सविधे सुरक्षितमस्ति

गिरीशशुक्लः
व्यवस्थापकः

मदनगोपालशर्मा
कार्याध्यक्षः

---

* ५००) श्रीबाबू-घनश्यामदास-बिडला-महोदयेभ्यः (काशी)
१००) श्री १०८ जगद्गुरु-स्वामी-शिवानन्द-महाराजेभ्यः (वाल्ले होन्नूर) । एवं संरक्षकेभ्यः ६००)
† ११) श्रीमती श्री ५ लक्ष्मीवती देवी दरभङ्गा महाराज्ञी प्रादात्
१२।≡) माननीय श्रीमान् हिज हाईनेस महाराजा रामसिंह महोदयेभ्यः (सीतामऊ)
६) श्रीयुत पं० महावीर प्रसाद त्रिपाठी महोदयेभ्यः (काशी)
१२) नारायणविद्यालयाध्यक्षेभ्यः श्रीयुत महन्त केशवदास (अयोध्या)

स्पष्टीकरणम्।

उपरि निर्दिष्टे विवरणे १९८३ आब्दिको यो हि १९३०॥।-)॥ $\frac{1}{3}$ आयः प्रदर्शितो विद्यते तत्र ६२२॥।=)॥। $\frac{1}{3}$ इदं धनं संस्कृतसाहित्यसमाजस्य स्थायिकोशविभागे निक्षिप्तमस्ति। एतस्य धनस्य विशिष्टं कारणमन्तरा व्ययो न भवति अथच १६।-)॥। वाचनमन्दिरस्य ५०) अनन्तराम शास्त्रिणाम् ९९॥=) तारायन्त्रालयस्य च ऋणमस्ति। एतेषामङ्कानां योगफलं ७८८॥।=)॥ $\frac{1}{3}$ एतावद्भवति। पूर्वोक्ताद् १९३०॥।-)॥ $\frac{1}{3}$ आयादेतस्य ७८८॥।=)॥ $\frac{1}{3}$ व्यवकलने ११४१॥।≡) एतावदेव शिष्यते। तत्र १९८२ आब्दिकस्य शिष्टधनस्य २३८॥≡)। संकलने १३८०॥=) एतावदेव भवति। इदमेव सुप्रभातस्य धनम्। व्यये च २०९९-)॥ $\frac{1}{3}$ संकलिता संख्या वर्तते ततः ६२६।)॥ $\frac{1}{3}$ कोषयोर्निहितस्य धनस्य निःसारणे १४६९॥।-) $\frac{1}{3}$ शिष्यते। स एव वास्तवो व्ययः। तथाचायापेक्षया८९=)॥ $\frac{1}{3}$ अधिको व्ययः समभूत्।

तथाच ५०) + ९९॥=) + १६।-)॥। क्रमशः श्रीमदनन्तरामशास्त्रि-तारायन्त्रालय-वाचनमन्दिराणां यदृणमस्ति तस्मात् ८९=)।॥ $\frac{1}{3}$ आयादधिको व्ययस्संजातः। अवशिष्टेषु ६।-)॥। 'सेविंग बैंक' सन्ति ७०।≡) $\frac{1}{3}$ व्यवस्थापकमहोदयस्य सविधे सन्ति।

‡॥) श्रीरामशरण शास्त्रि महोदयेभ्यः ग्रा० सं० ६०४
१) श्रीसूर्यनारायण व्यास महोदयेभ्यः ग्रा० सं० ५३
१) श्रीरामशङ्कर जोशी महोदयेभ्यः ग्रा० सं० १२१९
एवम् २॥) विशिष्टाङ्कस्य सहाय्यार्थं प्राप्तम्

× १) श्रीशिवप्रसाद शर्मभ्यः ग्रा० सं० २०९
१०) श्रीयुत पं० रुद्रदेव वेदालङ्कारस्य धर्मपत्न्या प्रदत्तम्।
१) श्रीयुत पं० रामप्रकट शर्मभ्यः ग्रा० सं० ८०७
५) श्रीयुत पं० मांगीलाल शर्मा (प्रिंसिपल वी० एन० मेहता विद्यालय प्रतापगढ़ अवध)
५) श्री १०८ हिज़ हाइनेस कैप्टेन सर महाराणा रणजीतसिंह (के० सी० आई० ई०, सी० आई० आई०) बड़वानी नरेशेभ्यः
३) श्रीयुत पं० सूर्यनारायण व्यास महोदयेभ्यः ग्रा० सं० ५३
५) काशीविद्यापीठाध्यापकेभ्यः श्रीयुत पं० रुद्रदेव वेदालङ्कारेभ्यः
२) श्रीयुत पं० ब्रह्मदत्त जिज्ञासु महोदयेभ्यः ग्रा. सं. २५१
एवम् ३२) सुप्रभातस्य विशिष्टं साहाय्यम् प्राप्तम्

÷१६।-)॥। वाचनमन्दिरस्य देयमिति। अत्र ५०) मुद्रा श्रीमान् श्रेष्ठी अद्वैत प्रसादः वाचनमन्दिरस्य कृते प्रदत्तवान्। तेषां मध्ये ३३॥=)। व्ययीभूताः।

१६।-)॥। अवशिष्टमस्ति।

६९५।)॥। सर्वयोगः

अलीगढस्थ-अखिल-भारतीय-विद्वत्सम्मेलन-परीक्षायाः १९८४ संवत्सरस्याशेष-परीक्षाफलम् ।

न्यायशास्त्राचार्य II श्रेणी

१ परमानन्द भट्टारा शास्त्री

२ साहित्य-शास्त्राचार्य II श्रेणी

श्रेणी

आयुर्वेदाचार्य I श्रेणी

३ शिवदत्त शुक्ल

४ राव श्रीराजेन्द्रसिंह

५ चेतराम गुप्त

६ प्रेमराज सिंह

७ अयोध्याप्रसाद शर्मा

८ अमृतलाल शर्मा

९ रामेश्वरप्रसाद शर्मा

II श्रेणी

१० सिद्धगोपाल शास्त्री

११ रामकुमार शास्त्री

१२ श्रीकृष्णमाचार्य

१३ छोटेलाल जैन III

१४ बाबूराम मालवीय II

१५ राजकिशोर शर्मा II

१६ लक्ष्मीनारायण शुक्ल II

वैद्यशिरोमणि II श्रेणी

१७ चन्द्रमणिकान्त शर्मा

१८ सागरमल शर्मा

१९ मंगलाप्रसाद मिश्र

काव्य-व्या० वेद-वेदान्ततीर्थ II श्रेणी

२० बृहद्बलसंयमी शास्त्री सा०आ०

हिन्दीसाहित्य-शिरोमणि I श्रेणी

२१ श्रीमन्नारायण शास्त्री-'प्रभाकर'

२२ कुञ्जीलाल शर्मा

२३ गङ्गाचरण द्विवेदी

II श्रेणी

२४ हीरालाल तिवारी

२५ सिद्धिनाथ त्रिपाठी

हिन्दी साहित्यरत्न

२६ घनश्याम विशारद III

२६ (क) पृथ्वीराज डागा III

२७ अर्जुनसिंह वर्मा II

२८ गोपालप्रसाद कौशिक III

२९ माताप्रसाद तिवारी III

वैद्यराज II श्रेणी

३० ऊभाराजू नारसिंहम्

३१ डी० चिरंजीवाचार्युलु

कविराज

३२ जयन्ती सुब्बाराव II

३३ काली पोरावीरय्य III

३४ पोन्नुरुभुजङ्गराव III

३५ बेम्पतिलिङ्ग दीक्षितुलु III

वैद्यरत्न

३६ गरलपद हनुमन्तराव III

३७ वृन्दावनम् नारसिंहाचार्युलु III

वैद्यशास्त्री II श्रेणी

३८ रामचन्द्र शर्मा

३९ गङ्गादत्त शर्मा

४० विश्वेश्वरदत्त

४१ ईश्वरचन्द्र शर्मा

४२ लालमणि गुप्त

४३ अर्जुनसिंह

४४ होतीराम दीक्षित

४५ हीरालाल तिवारी

४६ रामनारायण गुप्त

४७ शालग्राम वैद्यभूषण

४८ छेदीगोपाल शर्मा

४९ यदुनन्दनप्रसाद वाज०

५० गुलाबदत्त शर्मा

५१ मानसिंह शर्मा

५२ रविशङ्कर शर्मा, बी० ए०

५३ मेवाराम शर्मा

५४ मणिराम शर्मा

५५ पूर्णप्रसाद मिश्र

५६ श्यामलाल मिश्र

५७ शोभाराम अग्निहोत्री

५८ वेदराम शर्मा

५९ राजाराम शर्मा

६० किशोरीलाल शर्मा

६१ इन्द्रदत्त शर्मा

६२ रामचन्द्र शर्मा

६२ (क) चन्द्रदत्तशर्मा

तृतीय श्रेणी

६३ मुरारीलाल शर्मा

६४ कृष्णविहारीलाल शर्मा

६५ ज्ञानचन्द्रगुप्त जैन

६६ रूपेन्द्रनाथ द्विवेदी

६७ कृपाशङ्कर द्विवेदी

६८ रघुवीरसहाय द्विवेदी

६९ मिश्रीलाल शर्मा

७० रघुनाथ प्रसाद

७१ रामस्वरूप गुप्त

७२ अवधविहारीलाल द्विवेदी

७३ फुलजारीलाल जैन

७४ राजकुमार जैन

द्वितीय श्रेणी

२६६ रामशरण
२६७ शिवशङ्कर सिंह
२६८ रामबोध शर्मा
२६९ हेमराज
२७० गौरीशङ्कर कौशिक
२७१ केदारनाथ
२७२ बनवारी लाल

III. श्रेणी

२७३ रामचन्द्र
२७४ मोहन लाल
२७५ कन्हयालाल
२७६ रघुनाथसिंह त्यागी

व्याकरण प्रथमा

२७७ गङ्गाचरण द्विवेदी
२७८ रामनरेश पाण्डेय
२७९ रामपाल शुक्ल
२८० पुरुषोत्तम मिश्र
२८१ जयलाल द्विवेदी
२८२ राधावल्लभ दाधीच
२८३ भुवनप्रसाद द्विवेदी
२८४ रेवाराम द्विवेदी
२८५ चिरञ्जीवकुमार
२८६ पुष्पकुमार
२८७ विजयकुमार
२८८ गङ्गाचरण द्विवेदी शर्मा

III

२८९ गुरुप्रसाद पण्डा
२९० निर्मलकुमार
२९१ चन्द्रकुमार
२९२ महेन्द्रकुमार
२९३ कमलकुमार
२९४ गिरिराज शर्मा
२९५ कन्हैयालाल मिश्र
२९६ हरसहाय पुरोहित
२९७ राधावल्लभ
२९८ दुर्गाप्रसाद गौड़

काव्य प्रथमा II. श्रेणी

२९९ रामदेव त्रिपाठी
३०० तनसुख शर्मा
३०१ गणपति खाण्डल जोशी

III. श्रेणी

३०२ श्रीरामशर्मा त्रिपाठी
३०३ रामलषन मिश्र
३०४ भगौतीदीन मिश्र

ज्योतिष प्रथमा III श्रेणी

३०५ सुधाकर पाण्डेय

वेद प्रथमा III. श्रेणी

३०६ श्यामस्वरूप त्रिपाठी

वैद्य प्रथमा I श्रेणी

३०७ रामचरण शर्मा
३०८ ज्वालाप्रसाद गुप्त
३०९ दुःशासन गुप्त

II. श्रेणी

३१० राजाराम शर्मा
३११ ज्वालाप्रसाद
३१२ तोताराम
३१३ सूबेदार शर्मा
३१४ झाऊलाल गुप्त
३१५ रामभरोस शर्मा
३१६ काशीनाथ ठक्कुर
३१७ बद्रीविशाल शर्मा
३१८ सूर्यनारायण गौड़
३१९ मेघराज शर्मा
३२० प्रभुदयालु गौड़
३२१ शिवराज सिंह
३२२ अशर्फीलाल शर्मा
३२३ चेतराम कूर्मिक्षत्री
३२४ गयादीनलाल श्रीवास्तव्य
३२५ चन्द्रपाल शर्मा
३२६ गोपाल दास
३२७ वासुदेवप्रसाद पाण्डेय
३२८ कालकाप्रसाद गुप्त
३२९ रुद्रप्रसाद त्रिपाठी
३३० रघुनन्दन
३३१ द्वारिकानाथ मिश्र
३३२ जी० कनकसुन्दरम्
३३३ के० श्रीराममूर्ती

तृतीय श्रेणी

३३४ ब्रजसुन्दर द्विवेदी
३३५ गङ्गाधर सिंह
३३६ रामेश्वर शर्मा
३३७ युगलकिशोर चौबे
३३८ बनवारीलाल त्रिपाठी
३३९ मन्नीलाल
३४० भैरवदत्त शर्मा
३४१ छेदीलाल यति
३४२ बदलूप्रसाद नापित
३४३ झुत्थाराम जोशी
३४४ चुन्नीलाल वैद्य
३४५ ईश्वरदत्त

हिन्दी साहित्य प्रथमा II. श्रेणी

३४६ ज्ञानप्रकाश
३४७ आतिराम शर्मा
३४८ मुन्शीलाल वर्मा

III. श्रेणी

३४९ कन्हैयालाल जोशी
३५० वरग मेल्ल
३५१ गोवर्द्धन
३५२ शान्तीलाल
३५३ राधेलाल शर्मा
३५४ हीरालाल पसारी
३५५ गोपीचन्द्र

सम्मानार्थोपाधिप्रदान विद्याभूषण

१ विधुशेखर भट्टाचार्य एम० ए० वेदान्ततीर्थ, कलकत्ता
२ वृहद्बल संयमी शास्त्री सा० श्र० का० वे० तीर्थ, लाहौर

आयुर्वेदाचार्य

३ पं० सोहनलाल पाठक शा[illegible] केन्द्राध्यक्ष विद्यापीठ, मथु[illegible]

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

विशिष्टाङ्कः

सौर वैशाखः, १९८५ वैक्रमाब्दः

पञ्चमवर्षे Vol:. 5

May 1928.

प्रथमसङ्ख्या No. 1

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिमुदस्यद् भेदतारा विलुम्पन्
नयदधिखुरभाषाभाषि जागार्तिभावम् ।
विबुध-विहग-वादैराह्वयद् भाग्यभानुम्
विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्' ॥

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती, साहित्यवारिधिः

सम्पादकः—
श्रीकेदारनाथशर्म्मा सारस्वतः

व्यवस्थापकः—
श्रीगिरीशशुक्लः, न्यायाचार्यः ।

वार्षिकम्मूल्यम्—३)
माननीयेभ्यः—१२)
अस्यांकस्य मूल्यम् ।।।)
छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—६)

लेख-सूची ।

चित्रसूची ।

संस्कृत-समाचारः

प्रतीक्ष्यताम् ।

आषाढ़-श्रावणयोः सम्मिलिता सङ्ख्या प्रकाशिता भविष्यतीति प्रागेव निवेदितम् । एतस्यां खलु केचन विचित्राः विप्लवकारिणो हृदयाकर्षकाः परिमिता एव लेखाः प्रकाशमेष्यन्ति । एतस्या एत एव नियमिता लेखका भविष्यन्ति ।

१ श्रद्धेय—रामावतार शर्म्मा एम० ए० साहित्याचार्यः,
२ महामहोपाध्याय-श्रीदेवीप्रसादशुक्लकविचक्रवर्तिनः
३ श्रीगोपालशास्त्री, साहित्याचार्यः, दर्शन केशरी
४ श्रीगिरीश शुक्लो न्यायाचार्य, (व्यवस्थापकः)
५ श्रीतारादत्तपन्तः, साहित्याचार्यः, दर्शनशास्त्री
६ श्रीदामोदरशास्त्री भिषगाचार्यः, सर्वदर्शनतीर्थः
७ श्रीविध्येश्वरीप्रसाद शास्त्री (सूर्योदय-सम्पादकः)
८ श्रीमहादेवशास्त्री पाण्डेयः, साहित्याचार्यः
९ श्रीकेदारनाथ शर्म्मा, सारस्वतः (सम्पादकः)

एषा विचित्रा दर्शनीया, मननीया, क्रान्तिकारिणी सङ्ख्या भविष्यति । एतस्मिन् सर्वेषां समाज-कार्यकर्तॄणां सचित्रः परिचयोऽपि स्थास्यति

कार्तिके च कविताङ्कः प्रकाशितः स्यात् । एतस्मिन् भारतवर्षीयाणां धुरन्धर-कवीनां मनोहारिण्यः क्रान्तिकारिण्यश्च कविताः प्रकाशिता भविष्यन्ति ।

ग्राहकैरनुग्राहकैश्चास्याः समुन्नयने, प्रोत्साहने च बद्धपरिकरैर्भाव्यम् ।

अखिल-भारतवर्षीय-संस्कृत-साहित्य-सम्मेलनम् ।

सम्यक् सम्भाव्यते यदस्मिन् संवत्सरे कार्तिकमासे सूर्यग्रहणावसरे सम्मेलनस्याधिवेशनं संस्कृतप्रधानकेन्द्रे वाराणस्यां महता समारम्भेण, उत्साहेन सम्पत्स्यते । तस्मिन्नेवावसरे, सनातनधर्मप्रचाराय विदुषां सद्ग्रन्थनाय

च अखिल भारतवर्षीयं विद्वत्सम्मेलनम् अपि भविष्यति । छात्र-सम्मेलन-कविसम्मेलनादयश्च भविष्यन्ति ।

* * * *

अस्माकं नवीनाः स्तम्भाः ।

अस्माभिः सुप्रभाते केषाञ्चनावश्यकविषयाणां स्थायित्व-सम्पादनाय साम्प्रतं सप्तस्तम्भाः संस्थापिताः सन्ति । तेषां चित्राण्यपि निर्मापितानि सन्ति, यानि पाठकानां सम्मुखमेव समागतानि । तत्र प्रथमं 'काव्यकथा' नामकः स्तम्भो वरीवर्ति । एतस्मिन् स्तम्भे संस्कृतकाव्यानां कथा, तेषां समालोचनम्, तद्विषये चान्या ज्ञातव्या वार्ताः स्थास्यन्ति । (२) द्वितीये—**स्वर्गीयस्मृति**—नाम्नि स्तम्भे स्वर्गीयाणां भारतीयसंस्कृतविदुषां चित्राणि चरित्राणि च स्थास्यन्ति । एष सङ्ग्रहः कालान्तरे परं महत्वमासादयन् भविष्यति काले संस्कृत-साहित्यस्येतिहासस्य रूपं धारयित्वा भाविनां गवेषकानां लोकानाञ्च महान्तमान्ध्यं दूरी करिष्यति । वयमित्र तेऽपि नेतिहासविषये सर्वथान्धाः स्थास्यन्ति । तृतीये 'पण्डितपरिचय'-नाम्नि स्तम्भे साम्प्रतिकानां विदुषां परिचयः स्थास्यति । एतेन खलु विदुषां परिचयेन परस्परं सर्वेषां विदुषामनायासपरिचयः, परस्परं सुदृढः स्नेहः सद्भावश्च सम्भवेत् । चतुर्थे 'विज्ञान-वैभव' नाम्नि स्तम्भे नवीना वैज्ञानिकवार्ताः, आविष्काराश्च संस्कृते सम्यग् विज्ञाता भविष्यन्ति, यस्य खलु विज्ञानस्य साम्प्रतं सर्वाधिका वर्तते संस्कृते आवश्यकता । पञ्चमे **स्वास्थ्य-सुधा**, नाम्नि स्तम्भे आयुर्वेदविषयकाः स्वास्थ्य सम्बन्धिनो विषयाः सन्निवेशिता स्युः । एतास्मिन् स्तम्भेऽपि संस्कृतसंसारस्य परमोपयोगिनो लेखाविचाराश्च संगृह्येरन् । षष्ठे 'संस्कृत-समाचाराः' इति शीर्षके स्तम्भे संस्कृत विषयकाः पाठशाला-विद्यालय-सभा- सम्मेलनोत्सवादिसंस्कृतसम्बन्धिनीनां समाचारा-वलीनां संङ्ग्रहो भविष्यति । सप्तमश्च **सम्पादकीय**-नामा स्तम्भो विदित एव पाठकानाम् ।

एवंसत्यपि पञ्चपाः स्तम्भाः साम्प्रतमप्यशिष्टाः सन्ति । यथा-'समाचार-संग्रहः', 'प्राप्तपत्राणि', व्यापारे वर्धते लक्ष्मीः', 'कवि-कीर्तनम्', 'पुस्तक-परिचयः" इत्यादयः । ग्राहकाणामभिरुचिमालोच्य यथासम्भवं शनैश्शनैस्तदपि सम्पत्स्यते ।

एतेषां स्तम्भानां साफल्यं लेखायत्तं भवति । लेखाश्च लेखकैरेव लिखित भविष्यन्ति, तल्लेखक महानुभावानामेव शिरसि विद्यते साफल्यमेतेषाम् । अतः सुप्रभात-लेखका लेखाञ्लिख्य प्रेषयेयुः । परमेतदेव निवेदनम् , यत् लेखा नितरामुपयोगिनः, सरलाः, अतिसंक्षिप्ताः लोकहित-करा एव प्रेषणीयाः । अन्यथा वयं प्रकाशनेऽसमर्था भविष्यामः ।

* * * *

सूचना ।

ये महानुभावाः छात्रमूल्येन १॥) सार्धैकरूप्यकेण सुप्रभातं गृह्णन्ति, अद्यपर्यन्तं ।) आणकचतुष्टयं विशिष्टाङ्कसाहाय्यं न प्रेषितवन्तस्तेषां विशिष्टाङ्कः सुरक्षितः कार्यालये विद्यते । सत्वरं स्वकीयं ।) साहाय्यमाणकचतुष्टयं प्रेष्य स्वीयमङ्कं समासादयन्तु । आणकचतुष्टयं धनादेशेन (मनीआर्डरसे) अथवा तन्मूल्याश्चिटिकाः (स्टाम्प) राजेस्टित (रजिस्टर्ड) पत्रेण प्रेषयन्तु । अन्यथा कार्यालयोनोत्तरदायी स्यात् ।

व्यवस्थापकः ।

सुप्रभातकार्यालयः, काशी ।

संस्कृत-साहित्य-समाज-संस्थापकाः ।

तत्सहकारिणश्च ।



(१) महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती । (२) श्रीगिरीश शुक्लः, न्यायाचार्यः, (सुप्रभात व्यवस्थापकः) । (३) श्रीकेदारनाथ शर्म्मा सारस्वतः, (सुप्रभात-सम्पादकः) । (४) श्रीविन्ध्येश्वरी प्रसाद शास्त्री, (सूर्योदय-सम्पादकः) । (५) श्रीगोपाल शास्त्री, (समाज-मंत्री) । (६) दामोदर शास्त्री, भिषगाचार्यः । (७) श्रीतारादत्त पन्तः, साहित्याचार्यः, कार्यकर्तारः (८) श्रीमदनगोपाल शर्म्मा (प्रधानलेखकः) । (९) श्रीरामदेव द्विवेदः, । (१०) श्रीरामेश्वर शर्म्मा । (११) श्रीविमलेश्वर शर्म्मा, (सम्पादकीयः कर्मकरः) ।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रं संस्कृत-मासिक-पत्रम् ।

पञ्चम-वर्षे | सौर—वैशाखः । १९८५ वैक्रमाब्दाः | प्रथम-संख्या

माङ्गलिक्यः सूक्तयः ।

आच्छाद्य शङ्करमनच्छाशयः सदसि कच्छायतिं बुध ! वह,-
न्नच्छान्दसोऽपि परमुच्छास्त्रवाग्जयसि तुच्छान् मदं च भजसे ।
सच्छास्त्रपान्थ ! किमु नेच्छापि ते भवति तच्छासनानुसरणे,
तच्छान्तिमेत्य हृदि गच्छानघं शरणमच्छाङ्गमन्धकरिपुम् ॥

—म. म. स्वर्गीय-रामशास्त्रि तैलङ्गानाम्

*   *   *   *

भिल्ली-धम्मिल्ल-मल्ली-परिमलिनि, दरोत्फुल्ल-काम्पिल्ल-वल्ली-
हल्लीसोल्लास-मल्ले, मरुति सति सरिल्लोल-कल्लोल-वेल्ले ।
झिल्ली-क्षुल्लान् प्रफुल्लांल्लघुरजनिचरांल्लीलयोल्लोठ्य नर्द-
ल्लेखानुल्लाघयन्सँल्लघयतु विपदं तल्लजो मर्कटानाम् ।

—श्रीरामावतारशर्म्मणाम्

राधाश्लेषार्द्रा तनुः कृष्ण ! तेऽद्धा
वंशी-हस्ता रोहिणी पाणिपादे ।
दृष्टौ चित्रा शालिनी स्वातिभासा
मूलं भूयान्मामकप्रीतिवल्ल्याः ।

—श्रीगोस्वामिदामोदरलालशास्त्रिणाम्

*   *   *   *

अमन्दानन्दसन्दोह-मन्दिरं सुन्दरं महः ।
अलं कलिमलं लीला-ललितं लघु लुम्पतु ॥

—म. म. श्रीदेवीप्रसादशुक्लकविचक्रवर्तिनाम्

*   *   *   *

अमन्दानन्दसन्दोहनिष्यन्दिमधुरस्वराः ।
पान्तु वाग्देवतास्पर्श-मुदिताः कच्छपीस्वनाः ॥

—श्रीनारायणशास्त्रिणाम् (खिस्ते)

*   *   *   *

जगदम्बावलम्बाय निरालम्बाय शूलिने ।
जगत्त्रयकुटुम्बाय नमः साम्बाय शम्भवे ॥

—सम्पादकस्य

शुभाशिषः ।

महामहोपाध्यायस्य पण्डितसम्राजः—श्री प्रमथनाथ-तर्कभूषणभट्टाचार्य-महोदयस्य ।
विविध-विबुधमोदं तन्वतः सत्क्रियाभिस्तम इह भुवि सान्द्रं निघ्नतः स्वोदयेन ।
गहन-विधिरहस्यं कुर्वतो व्यक्तमुच्चैर्दिशि दिशि विजयन्तां सुप्रभातस्य भासः ॥

नूतनवर्षाभिनन्दनम् ।

आयाहि भो नूतन-वर्ष ! हर्षप्रकर्षमाधातुमलं यतस्व ।
तव प्रसादेन सदैव देवः श्री विश्वनाथः सुतरां प्रसीदेत् ॥ १ ॥

सद्भूतिभूमोपचिताऽस्तुभूमिर्भाग्योदयो भूरि भवेत् प्रजानाम् ।
भातु प्रभावप्रभवाऽस्तभीतिर्भोगोपयुक्ता भृत-भावुका श्रीः ॥ २ ॥

उदेतुसन्मङ्गलसम्पदुच्चैरमङ्गलं द्राग्विलयं प्रयातु ।
दरिद्रता नश्यतु, वश्यभावमवश्यमासाद्य महः स्थिरः स्यात् ॥ ३ ॥

दोषा अशेषाः खलुनामशेषा-भवन्तु, भक्तिर्भगवत्युदीयात् ।
पूता मनोरञ्जनहेतुभूता गुणाः प्रभूताश्च समुल्लसन्तु ॥ ४ ॥

आधिर्जनानां हृदयं विहाय कुत्राऽपि यायादथवा प्रणश्येत् ।
व्याधिर्निदानेन निजेन साकं स्वयं समासाद्य भयं म्रियेत ॥ ५ ॥

पापानि सर्वाणि सहैव दुःखैः पलाय्य पातालतलं प्रयान्तु ।
सुखैःसमेतः सुकृतस्य राशिः समेधतामाशु विनाऽन्तरायम् ॥ ६ ॥

लोकोपकारैकपराऽपरागा निश्शेषविद्वेषविकारशून्या ।
शश्वत्समासादित-सुप्रसादा मतिस्सतामस्तु गतिर्गुणानाम् ॥ ७ ॥

—श्रीदेवीप्रसादशुक्लः, कविः
(महामहोपाध्यायः)

भारतमातृवन्दना ।

हिमवता मुकुटेन विराजिता,
द्विगुणषोडशकोटिसुतान्विता ।
स्मितपराजित-पूर्णसुधाकरा,
जयति भारतवर्ष-वसुन्धरा ॥ १ ॥

अमृतपङ्कज-भास्वरिताननां,
छविविनिन्दित-नन्दनकानना ।
अमल कोमल बिम्बफलाधरा,
जयति मे सुफला सुजला धरा ॥ २ ॥

महितराघवमाधवमातृका,
विहितवर्गचतुष्टयदातृका ।
अधिगता मुनिभिश्च यतो जनिः,
जयति मे वरदा भरतावनिः ॥ ३ ॥

प्रणतमानव बुद्धिविकाशिनी,
प्रबलराक्षसवंश-विनाशिनी ।
सुमतिदा विशदा भयहारिणी,
जयति मा परमाऽऽमयवारिणी ॥ ४ ॥

सुखद सुन्दर शाद्वल शालिनी,
सुम समूहलसद्गु गिरिमालिनी ।
बहुनदाऽऽप्रपदीन-कचाचिता,
जयति विश्वजनीन-गुणार्चिता ॥ ५ ॥

श्रुतिशुचिस्मृतिदर्शन हेतवे,
विधुरवीचिभवार्णवसेतवे ।
निखिल वाञ्छितकामदधेनवे,
तव धरित्रि ! नमोऽङ्घ्रिसरोरुहे ॥ ६ ॥

जनित-विष्णु-विरञ्चि-दिगम्बरा,
वितत-शुद्ध-यशोलसदम्बरा ।
ऋषि-महर्षि-निपीत-पयोधरा,
जयति जन्मधरा सुमनोहरा ॥ ७ ॥

सुमहनीयमहामहिमान्विताम्,
विजयिनीं महतीं महितां हिताम् ।
प्रतिपलं कलये हृदि सादरम्,
विबुध-वन्दित-भारतमातरम् ॥ ८ ॥

सुरसरिद्यमुना च सरस्वती,
सुरस सिन्धुनदी च दृषद्वती ।
अगणिताः सरितोऽपि च नर्मदा,
धवलयन्ति पदं तव सर्वदा ॥ ९ ॥

मलयजः पवनः परिपावनः,
सरसिजामृत शीकरवाहनः ।
व्यजनमातनुतेऽनिशमर्चिते,
वपुषि ते हरिचन्दनचर्चिते ॥ १० ॥

पदपरागमतीवशिवङ्करम्,
परिचरन्नपि तेऽम्ब ! निरन्तरम् ।
प्रियजनं जनकं च सहोदरम्,
परिजहामि भजामि च नोदरम् ॥ ११ ॥

जननि ! मन्नयनं भयनाशया,
प्रथममुल्लसितं तव भासया ।
मृतिदिनेऽपि तया परिपूरितम्,
भवतु भारतभूमि ! निमीलितम् ॥ १२ ॥

न वसु नापि सुखं न सुतानये !
परपदं जगदम्ब ! न कामये ।
चरणमर्चितुमीश्वरि ! तावकम्,
जनुरिदं व्यतिगच्छतु मामकम् ॥ १३ ॥

श्रीविन्ध्येश्वरीप्रसाद शास्त्रिणः
('सूर्योदय'-सम्पादकस्य)

शृङ्गारस्यैकमात्ररसत्वम् ।

लेखकः—

श्रद्धेय-श्रीरामावतारशर्म्मा, एम० ए०, साहित्याचार्यः

यथा भवभूतिना—

"एको रसः करुण एव निमित्तभेदात्
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।"

इत्यादौ करुणस्यैव एकमात्ररसत्वं प्रतिपादितम्; तथा भोजेनाऽपि 'शृङ्गार प्रकाशे'[1] शृङ्गाररसस्यैकमात्ररसत्वं प्रतिपादितम् । तथाच शृङ्गारप्रकाशस्योपक्रमे द्वे पद्ये—

शृङ्गार-वीर-करुणाद्भुत-रौद्र-हास्य-
बीभत्स-वत्सल-भयानक-शान्तनाम्नः ।
आम्नासिषुर्दश रसान् सुधियो वयं तु
शृङ्गारमेव रसनाद्रसमामनामः ॥

* * *

वीराद्भुतादिषु च येह रस-प्रसिद्धिः
सिद्धा कुतोऽपि वटयक्षवदाविभाति ।
लोके गतानुगतिकत्ववशादुपेता-
मेतां निवर्तयितुमेष परिश्रमोऽयम् ।

१—शृङ्गारप्रकाशाख्यो महान् रसग्रन्थः श्रीभोजनिर्मितः साम्प्रतमेव मद्रास-पुस्तकालये समुपलब्धः तस्य प्रकाशनञ्च तत्रैव जायते । तस्य कश्चनांश एव सम्प्रति मुद्रितो मया लेखक महोदयानां सविधे दृष्टः । तद्विषये पुनर्विशेषं व्याख्यास्यामः ।

एतत्पद्यद्वयं धर्मदाससूरिणा 'साहित्य-रत्नाकरे समुद्धृतं मया दृष्टपूर्वम् । सम्प्रति तु प्रकाशितस्य शृङ्गारप्रकाशांशस्य भूमिकायामिदमुपन्यस्तम् ।

भोजराजेन स्वसभापण्डितैर्बहवः प्रबन्धा निर्मापिता इति प्रतिभाति । तत्र षट्त्रिंशत् प्रकाशात्मकः शृङ्गार प्रकाशोऽयं महाकविना छित्तपेन निर्मित इति प्रतिभाति । तथाहि—

"अच्छिन्नमेखलमलब्ध-दृढोपगूढ-
मप्राप्तचुम्बनमवीक्षितवक्त्रकान्ति ।
कान्ता-विमिश्र-वपुषः कृतविप्रलम्भ-
सम्भोगसख्यमिव पातु वपुः पुरारेः ॥"

इतीदं शृङ्गारप्रकाशस्य मङ्गलपद्यम्, तच्च मया प्रकाश्यमाने सदुक्तिकर्णामृते छित्तपस्य पद्यत्वेनोपन्यस्तम् । भोजराजात् किञ्चिदेवार्वाचीनः सदुक्तिकर्णामृत-सङ्ग्रहीता सुकविः श्रीधर-दासः स्व-संग्रहे भोजीयानि पद्यानि भोजीयत्वेनैवोदाजहार । छित्तपादीनां पद्यानि तु तत्तन्नाम्नैवेति शृङ्गारप्रकाशस्य छित्तपप्रणीतत्वेन तत्समये प्रसिद्धौ नाभविष्यत्तदानीं 'अच्छिन्नमेखलमिति पद्यं तच्छित्तपीयत्वेन व्याहरिष्यत छित्तपश्च सुप्रसिद्धो भोजसदस्य इति "भोजश्छित्तपबिल्हण प्रभृतिभि" रित्यादिश्लोकादवगम्यते । प्रमाणान्तराणि च अत्र न विस्तरभयेनोपन्यस्तानि । यथाशृङ्गारप्रकाशानुसारेण शृङ्गार एवैको रसः, अन्ये रसास्तु भावमात्राणि । यथा शृङ्गार प्रकाशे—

"रत्यादयो यदि रसास्युरतिप्रकर्षे
हर्षादिभिः किमपराद्धमतद्भिभिन्नैः ।
अस्थायिनस्त इतिचेद्भयहासशोक-
क्रोधादयो वद कियच्चिरमुल्लसन्ति ॥"

शृङ्गारमात्रस्य रसत्वसिद्धान्तश्चात्र सङ्क्षेपेण मया विदुषां विचाराय विन्यस्तः । विस्तरार्थिनः शृङ्गारप्रकाशमालोकयन्तु ।

शृङ्गारप्रकाशे बहून्यैतिहासिकवृत्तान्यपि दृश्यन्ते । तद्यथा—कालिदासस्य कुन्तलेश्वरदौत्यादुद्धृतमिदं पद्यम्—

असकलहसितत्वात् क्षालितानीव कान्त्या,
मुकुलितनयनत्वात् व्यक्तकर्णोत्पलानि ।
पिबति मधुसुगन्धीन्याननानि प्रियाणां
त्वयि विनिहितभारः कुन्तलानामधीशः ।

एतत्पद्यं कालिदासेन विक्रमादित्य समक्षमुक्तमासीत् विक्रमेण चैत्तदुत्तरे प्रोक्तम्—

" पिबतु मधुसुगन्धीन्याननानि प्रियाणां
मयि विनिहितभारः कुन्तलानामधीशः ॥"

एवं विकटनितम्बा पूनर्भूरासीदित्यपि शृङ्गारप्रकाशादवगम्यते ।

अभिभाषणम् । *

श्रीमन्तो विविधविद्याविलासिनो विद्वद्वृन्दारकाः, श्रीवाराणसी-संस्कृत-साहित्य-समाजभाजः, अत्र समागताः साहित्यप्रेमजुषः सभाजनाश्च !

भवद्भिरेतत्सभाध्यक्षपदप्रदानेन नितान्तमहमुपकृतोऽस्मि; विशेषतश्च अनेन काशीस्थ-विद्वज्जन-समागम-सम्पादनेन । अधुना एतदावेदयामि यत् समाजमन्त्रिभिः प्रबद्धं क्रममनुसृत्य दिनद्वयमस्मिन् स्थाने अपराह्णे चतुर्थघण्टावादनादारभ्य षष्ठघण्टावादनपर्यन्तमस्माकं कार्यं भविष्यति । अद्यतनकार्यविभागपर्यवसाने च सभाध्यक्षस्थानानुरूपमध्यक्षेन किञ्चिद्वक्ष्यते ।

आदौ शिष्टाचारानुसारेण सर्वविघ्नशान्त्यर्थमस्मत्कार्यसाफल्यसिद्ध्यर्थञ्च श्रीशप्रार्थना सभाजनैर्विधीयताम् ।

श्रीमन्तो महानुभावाः सभाजनाः !

इदानीमध्यक्षस्थानात् यत्किञ्चिदल्पमेव प्रसङ्गाकाङ्क्षितं वक्तुं भवद्भिरनुज्ञा दीयतामित्यभ्यर्थये ।

ॐ नमः श्रीधर्मदत्ताय गुरवे बुद्धिरूपिणे ।

अयं समाजः "संस्कृतसाहित्यसमाज" इति विचिन्त्य संस्कृत-साहित्य-शब्दार्थयोर्मीमांसा यदि क्रियते तर्हि न अकाले अस्थाने वाऽकाण्डताण्डवं स्यादिति मन्ये । सापि कालमर्यादामनुरुध्य समासत एव विधास्यते नतु विस्तरेण इति भवतान्नातिक्लेशो भविता । तथापि यः कोऽपि श्रमः स्यात् स महानुभावतया भवद्भिः सोढव्य इति प्रार्थ्यते ।

(* संस्कृत-साहित्य-समाजस्य चतुर्थाधिवेशने सभापति पदमलंकुर्वतां श्रीमदाचार्यआनन्दशङ्करबापूभाई ध्रुव [एम्० ए० एल्एल् बी०, प्रो०—वाइस चांसलर हिन्दू विश्वविद्यालय, काशी] महोदयानाम्)

तत्र प्रथमं "संस्कृत"-पदार्थविचारे कल्पद्वयं प्रतिभाति—

(१) संस्कृतैः—शास्त्रोक्तसंस्कारविशेषैः परिशुद्धैः शिष्टैर्जनैर्या या वाग् भाष्यते सा संस्कृता ।

(२) अथवा, प्रकृतिरूपाद् वाग्विशेषात् संस्कारं प्राप्य या भाषा समजनि सा संस्कृता ।

अनयोः कल्पयोरयं भेदोऽवधारणीयः—यत् प्रथमे कल्पे या संस्कृता भाषा सा न सार्वलौकिकी; किन्तु शिष्टजनमुखस्यैवालङ्कारः । नन्वेवं चेत् संस्कृता वाक् महर्षिणा पाणिनिना "भाषा"शब्देन कथमगादि ? लोके च तस्या व्यवहार—इतिकथमुक्तम् ? उच्यते । तत्तु तत्कालीनशिष्टजनभाष्यमाणत्वात्, न पुनः सर्वजनसाधारणत्वात् । अतएव तस्या गीर्वाणवाणीति प्रसिद्धिः । तस्मात् संस्कृतप्राकृतयोः सम्बन्धः पौर्वापर्य-निबद्धः । तच्च निबन्धनं बीजाङ्कुरभावसदृशं न भवति, किन्तु एककालावच्छिन्न-संस्कारभावाभावप्रयुक्तभाषाभेदस्वरूपः-इति एके मन्यन्ते ।

अस्मिन् मते प्रकृतिः संस्कृतम्, तद्भवं प्राकृतमिति हेमन्द्राचार्यैर्यदुक्तम् तदयुक्तम् । संस्कृतस्य क्वापि प्रकृतिशब्दवाच्यतानुपलम्भात् । अत्र पुनः, अयं भाषाभेदः सर्वथा भाषाद्वयसंमितः । एकस्या एव भाषायाः संस्कारभावाभावमात्रप्रयुक्तः प्रकारभेदो वा इत्यपि विमर्शान्तरम् ।

द्वितीयं कल्पं स्वीकृत्य अपरे पुनरेवमाहुः, यत् कस्मादपि सर्वजनसाधारणात् प्राकृतविशेषात् संस्कृतस्य प्रादुर्भावो बीजाङ्कुरन्यायेन । अत्र पुनर्बीजसदृशः स प्राकृत-विशेषः । प्राचीनतमे कस्मिन्नपि समये सर्वत्र न प्रसिद्धा वेदभाषा, अथवा सापि श्रोत्रियजनसंस्तुता भाषा इति अवान्तरो विकल्पः ।

प्राकृतविशेषात् संस्कृतस्य बीजाङ्कुरन्यायेन प्रादुर्भाव इति यदुक्तं तस्यायमर्थः । आद्यप्राकृतात् संस्कृतम्, संस्कृतात् पुनरन्यत् प्राकृतमिति बीजाङ्कुरन्यायः । तस्मादेतदपि चिन्तनीयं प्रसज्यते, यद्वररुच्यादिव्याकृताः प्राकृतभाषाः संस्कृतभाषाप्रभवाः, भाषान्तरप्रभवाः उभयप्रभवा वा । एवमपि अपभ्रंशः प्राकृतमात्राजातः, तस्य भाषान्तरसम्पर्को वा । अपिच-हेमचन्द्रेण यद्देशीति कथ्यते, तदपि पूर्वोक्तमहाप्राकृतादिभाषाभिः सम्बद्धमसम्बद्धं वा इति वैदुष्यप्रकर्षेण विचारणीयम् । तदपि दुर्बोधमपि विदुषां किमगोचरमिति मनसि निधाय यत्नेनावबोध्यम् । साहित्यसमाजभाजां विदुषां विद्यार्थिनामस्मिन् विषये समीचीना गवेषणा भवेदिति हेतोर्मयाऽस्यां सभायामिदं विचारस्थानं प्रादर्शि ।

अथेदानीं साहित्यशब्दार्थौ विचार्येते । साहित्यशब्दस्य रूढार्थं तु 'साहित्यसंगीतकलाविहीनः, साक्षात् पशुः पुच्छविषाणहीनः' इति हरिवाक्यं स्मारं स्मारं बालोऽपि जानाति । किन्तु कः खलु तस्य यौगिकोऽर्थः ? तेन यौगिकार्थेन तस्य रूढार्थस्य कः सम्बन्धः इति तु दुरूहम् । तथापि तदूहगोचरीकर्त्तुं यथामति यतिष्ये । रामादिवद्वर्तितव्यं न रावणादिवत् इति हितेन सहितं स-हित तदेव साहित्यम् । हितोपदेशकं काव्यमित्यर्थः इत्येकं निर्वचनम् । "सकल विद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानमिति यायावरीयः । गद्यपद्यमयत्वात् हितोपदेशकत्वात्" इति काव्यमीमांसायां राजशेखरोक्तिरिमामेव निरुक्तिं सूचयति, किन्तु; तस्मिन्नेव ग्रन्थे राजशेखरेणान्यदेव निर्वचनं कृतम् । तद्यथा—"शब्दार्थयोः सहभावेन विद्या साहित्यविद्या ।" चिरन्तनेन भामहेनाऽपि "शब्दार्थौ सहितौ काव्यम्" इत्युक्तम् ।

अथवा तृतीयमेवं स्यात्, यत्, नटाः सूत्रधारेण सहिताः संलापं यत्र कुर्वते, तत् साहित्यं नाटकापरपर्यायम् । नाटकस्य च काव्यविशेषत्वात् अजहल्लक्षणया साहित्यशब्दः काव्यसामान्य प्रतिपादयति । किन्तु; साहित्यशब्दः क्वचिदपि केवलं नाटकार्थे, सहितशब्दः क्वचिदपि काव्यार्थे अदृष्ट इति सर्वत्र (त्रिष्वपि निर्वचनेषु) अरुचिबीजम् । शोभनतरनिर्वचनाभावे 'दुर्भिक्ष-भोजन' न्यायेन च त्रिषु मध्ये किमपि स्वीक्रियताम् ।

[अपूर्णम्]

इन्द्रजाल-मञ्जूषा ।

लेखकः-श्री पं० मंगलदेव शास्त्री, एम० ए०, पी-एच्० डी०

(१९१२ सने हिन्दीभाषाया अनूदिताऽऽख्यायिका)

'महतीमपि श्रियमवाप्य विस्मयः सुजनो न विस्मरति जातु किञ्चन '

सखल्वासीत् साधारणसमितेर्वासरः । प्रधानामात्यप्रमुखा महत्पदमधिष्ठिता लघुपदभाजस्तथान्ये कार्यकर्तारः सर्वेऽप्यासन्नुपस्थिताः । निर्दिष्टमासीद् भूभुजा—"यद्यानिवार्यः प्रवेशः सर्वसाधारणस्य । यः कोऽपि समेत्यास्थानमण्डपमभिक्षोणिपतिं स्वमनोऽनुरूपमावेदयतु वाञ्छितम् । नहि कश्चन परिचारकोऽधिकरणमण्डपमाविशन्तमवरोद्धुं क्षमः । सर्वोऽपि निजपरितापमभिदधातु । यतो विशां त्राणाय प्रकल्पेऽहम्" इति ।

पराभूतानेकनृपतिमण्डलपरिवृतस्तारागणैरिव भगवान् राकापतिः, गोमेद-हीरकादिरत्नकलापगुम्फितमध्यास्तेस्म हैममासनमतुलवीर्यो महामतिर्महीपतिः । दक्षिणपार्श्वे प्रधानामात्यो वामपार्श्वे च चमूपतिरासन्दीमधितष्ठतुः । अन्येऽपि सानुक्रमं स्वं स्वमासनं भेजिरे ।

यथावारं सर्वेऽपि प्रार्थिनो महीभुजः पुरो निजावेदनमुदीरयामासुः । स च सस्मितमनायासञ्च यथार्थंन्यायमनुतिष्ठँस्तांस्तुतोष । शुभेऽहनि तस्मिन् सुबहूनभिनन्दयन्ननेकेषामाशिषां धन्यवादानाञ्च भाजनं बभूव भूपः ।

नातिदूरे नृपासनान्मलिनाम्बरः कश्चिदेको मानवो नरपतेराननं दत्तदृष्टिस्तस्थौ । सोऽपि महीपतेरभिमुखमावेदयितुं साधारणसमितौ किञ्चन समागात्; परमास्थानमण्डपस्यादृष्टपूर्वामनेकाभरणपरिच्छदैर्भास्वरां सुषमासम्पत्तिमवलोक्य चकितचकितो नैजमावेदनमपि विसस्मार । नहि क्षितिभर्तृसविधे स्यात; नापि किमपि स प्रार्थितवान् । प्रसङ्गवशाद्धरापतिः प्रधानामात्यं सम्बोध्य ऊचे—"भद्र ! जगतो मात्रायां सुगमो निर्वाहाभ्युपायः कस्माद्वगन्तव्यः" इति । प्रधानसचिवः सानुनयं भक्तिपुरस्सरं चाह—"देव ! स्त्रियाः" —इति ।

तत्क्षणमेव सवेशे समासीनस्य तस्याऽनिर्णिक्तवाससोऽपावृतमास्यम् । सप्रश्रयं शनैश्चासावादीत्—"सती पतिव्रता च चेद्वर्तते स्त्री–यतस्तस्याः सतीत्वाभावे पत्युरापत्परम्परा अवश्यं भवेयुः" इति । धराधिपतिरप्येतदश्रृणोत् । मुहुरपि च स सस्मितमन्वयुङ्क्त महामात्यमेव—"आर्य ! संसारे किमत्यधिकमुपयुज्यते ?" इति प्रत्युत्तरितं मन्त्रिणा—"देव ! दयापाथोनिधे ! धनमेवास्मिन् विषयेऽन्यानि वस्तून्यतिशेते" इति ।

भूयोऽपि—"धनं चेत्करगतं भवति, मनुजश्च यदि तदुपयोगरहस्यं वेत्ति । अन्यथा तद्भावाभावौ न विशिष्येते" इति स एव मलिनवासाः शनकैः सान्तस्तोषं प्रौढमुवाच । महीपतिस्तद्वचोभिरतिशयेन तृप्तस्तदभिमुखं सामोदमैक्षत । अनन्तरं च तमात्मसन्निधौ सादरं समाहूय प्रावोचत्—"को भवान् ? किं प्रयोजनञ्चात्र मदन्तिके समागमनम् ? सर्वोऽपि स्वमनोनुरूपमस्मत् पुरतो निवेद्य स्ववाञ्छितं लब्धवान्, परं नहि भवता किमपि समुदीरितं साम्प्रतं यावत् । किमत्र निदानम् ?" इति ।

एवमनुयुक्तो नरपतिपुङ्गवेन—"विदधातु परेशोऽरिष्टतातिं भवताम् । देव ! वसुन्धरापते ! अहमतिदरिद्रः, परं विद्वान्, भवतां राज्याधिवासी ब्राह्मणः, पुस्तकान्येव मे धनम्, निजभार्याहेतोश्चात्रागतं वेत्तु भवान् मामकम्, सा हि मे प्राणेभ्योऽपि प्रेयसी, धर्माचारवती, सती, भार्या । सार्द्धं तया सानन्दं जीवनकालकला अतिवाहयतो निजपुस्तकस्वाध्याये दिवानिशं रममाणस्य धर्म्यां साध्वीमवस्थां

परिषेवमाणस्य नाद्य यावत् कदाचिदपि अवकाशं लब्धवती मे मानसे वित्तैषणा लौकिकसुखैषणा वा। गतवासरात् सा तीव्रेण कठिनामयेन ग्रस्ता, न हि मदन्तिके पानभोजनाय किञ्चित्, न चाप्यौषधपरिषेवणसामर्थ्यम्। अतो भवतां सविधमुपस्थितोऽस्मि, ततः साहाय्य-वितरणेन मामनुगृह्णातु देवः। स्थापयतु च परलोकेऽपि साम्राज्यम्। सन्ततं पुनर्निजविद्यया बुद्ध्या च भवतः सेवायां सन्नद्धो भविष्यामि। अग्रे देवः प्रमाणम्। " —इति एवं स सविनयमावेद्य विरराम।

क्षितिपतिस्तस्य सूनृतां वाचं निशम्य तदानने दृशं पातयामास। प्रख्यापयतः स्म हि तस्य चक्षुषी अनुपमं तद्वैशारद्यम्।

अथ महीपतिः प्रधानामात्यमादिदेश—" अद्य प्रभृति इममहं स्वपरिषदः सभास्तारपदे नियोजयामि। भवद्भिश्चैतन्निखिला आवश्यकताः सम्पूरणीयाः " इति। अचिरादेव नृपादेशमन्वतिष्ठत् सचिवः। समुपस्थितो भार्यां चिकित्सितुं तद्गेहेऽगदङ्कारः। सा चाचिरादेव निरामयत्वं भेजे। स चापि मनीषी विप्रो नियमेन राजपरिषदं सभास्तारपदेनालञ्चकार। ततः प्रभृति न खलु कदाचित् सोऽदृश्यत पूर्वमिव मलिनाम्बरः। परमासीदच्छश्लक्ष्णवासाः। तथापि स पूर्ववदेव पुस्तकालोचन-निरतोऽभूत्। राजपरिषत् कार्याल्लब्धावकाशस्तेष्वेवासीत् सततं व्यासक्तमनाः।

स हि क्षमाया क्षमया, धैर्यं च हिमवतः सदृशः; परम भागवतः समेषामचिरादेव समादरभाजनं बभूव। महीपतिश्चाविरतं समादरेण तं सुबहु सत्कृतवान्। तस्य गेहिन्यपि यथापूर्वं दारिद्र्यावस्थायां देवीभावनया तं समर्चयामास; तथैवेदानीमपि सम्पत्तिसद्भावेऽपि तं महात्मभावनया सम्भावयामास। नूनमैश्वर्यसम्पदायामपि पूर्ववदेव सहजसरलस्याऽपरिवर्तितन्मस्तिष्कस्य तस्य जीवनयात्रायां केवलं शरीरवसनेष्वेव समदृश्यत परिवृत्तिलवो न पुनराचारेषु स्वभावेषु वा। तथा खल्वेषोऽत्युदारैः स्वगुणैर्नरपतेर्मनो जग्राह यत् क्षोणिपतिरेतस्य निखिलविद्यासु दाक्षिण्यम्, सकलकलासु च वैचक्षण्यमालोच्य निरतिशयं प्रसन्न उत्तरोत्तरे पदे स्थापयन् क्रमेणामात्यपदे नियोजितवान्। समासाद्य तमधिकारं सततमात्मकृत्यस्य सत्यभावेन तत्प्रवणतया चानुष्ठानेन समधत्त पदमाशु स प्रजाजनचेतःशिलापट्टेषु।

राज्ञोऽन्येऽधिकारिणः संवीक्ष्य तस्याभ्युन्नतिं दिने दिने चाभिवृद्धिमीर्ष्यां कलुषितचेतसोऽचिन्तयन्—अहो, दरिद्र एवं गुरुपदमारूढोऽयमस्मानपि शास्तीति।

आश्चर्यम्, अपरित्याज्यो हि दुःस्वभावो दुर्मतीनाम् !!!

ते हि तद्विरुद्धं कर्तुमुद्युक्ता मिथो मन्त्रयाञ्चक्रिरे। अन्ततस्तेषामेको रहसि कदाचन लब्धावसरो नरपतिमेवमुदीरयामास "क्षमापते ! देव ! अयमतीव मायिको विप्रः। इन्द्रजालेन ह्येतेन वशीकृतो भवान्। एवं हि जनप्रवादः—यद्भवदभिमुखमागमनात्पूर्वमयं नियतमेव निजगेहप्रकोष्ठे प्रविशति। स च सततमनयावृतद्वारको वर्तते। तत्रास्ते पुनरेका रजतमयी लघ्वी मञ्जूषा, इन्द्रजालमयी च सा। तामुद्घाट्य किञ्चित्तान्त्रिककृत्यमनुष्ठायैवायं भवतामभिमुखमायाति, इति। किञ्च नाभविष्यद्यदि अयं मायावी; कथंकारमन्यथा झटित्येवामात्यपदे प्रारोढुं प्राभविष्यत्। देव समवहितैर्भाव्यं भवद्भिः। नहि जातु एतादृशो दरिद्रो विशिष्टं कारणमन्तरा सहसा एतामवस्थामाप्तुं शक्नोति। नूनमेतस्या मञ्जूषाया एव विलसितम्, यद्भवानप्येतद्वशः समजनि। झटित्येवायममात्यपदमारूढः—न ज्ञायते किमग्रेभावि ? अतो मायामञ्जूषां प्रति सततमेव सावहितस्तिष्ठतु भवान्" इति।

एवमाकर्ण्य तस्य वाग्जालं भूपः, प्रथमन्तु सर्वमेतज्जाड्यहेतुकं वा ईर्ष्याकारितं वा इत्येवामन्यत; परं यदानेकैरधिकारिभिः स्ववंशसम्भूतैरपि च बन्धुभिर्बहुवारमनेकश एवं भणितस्तदा कश्चित्सन्देहलवस्तस्मिन् विषये तस्य मनसि प्रादुर्भूतः सत्यमेवोच्यतेः—

सुजनानामपि हृदयं पिशुनपरिष्वङ्गलिप्तमिह भवति।
पवनः परागवाही रथ्यासु वहन् रजस्वलो भवति॥

[अपूर्णम्]

आयुर्वेदस्य क्रमिक ह्रासः ।

लेखकः—
डा० गणनाथ सेन महोदयः, एम्० ए०, एल० एम्० एस्०
महामहोपाध्यायः, विद्यानिधिः, सरस्वती

इह खलु क्रमेण दुर्दैववशाद्धीयमाने चिरन्तनवैदिकाचारगौरवे, क्षीयमाणज्योतिषि बौद्धदुर्दिनाच्छन्ने च भारतप्रभावदिनकरे प्रादुरभूवन्नकालवज्रनिर्घाता इव शक-हूण-यवनादिजातीनामुत्पाताः शश्वद्धा ज्ञानार्ज्जनविघ्नभूताः । तेष्वाद्य उत्पातो भारताक्रमणमलिकसन्दराख्येन (अलेक्जेण्डर) ग्रीकभूपतिना । स हि महाबलः परःसहस्र चतुरङ्गसेनासमृद्धिः खीस्तपूर्वसप्तविंशत्यधिकत्रिशतमिते वर्षे (327 B. C.—अर्थात् प्रायः सपादद्विसहस्रवर्षेभ्यः प्राक्) राहुरिव करालो भारतसूर्यमग्रसीत् । तदाक्रमणजन्ये च महति विप्लवे विध्वस्तप्राय आसिन्धुपञ्चनदावधिर्महादेशो येन गृहदाहदुर्भिक्षादिना सहस्रशो विनष्टाः प्रजाः, शतशः प्रणष्टानि च ग्रन्थरत्नानि । प्रतिनिवर्त्तमानेन च तेन ग्रीकभूपतिना तत्तत्प्रदेशशासनाय विनियुक्तः सेल्युकसाख्यो ग्रीकवीरः, स्वदेश प्रापिताश्च केचन भारतीया ग्रन्थाः विशेषतश्चचिकित्साग्रन्थाः भारतीयचिकित्सानैपुण्यविलोकनविमुग्धेन चेतसा । ततो मगधाधिपेन महाराजचन्द्रगुप्तेन पराजितोऽसौ सेल्युकस्वीरः सन्धाय प्रतिनिवर्त्तमानोऽपि भारतीयविद्यार्ज्जनाय मेगास्थिनिसाख्यं (मेगास्थनीज) ग्रीकभिषजं चन्द्रगुप्तसदसि पाटलिपुत्रे स्थापयाम्बभूव । तदेतदखिलं भारतीयज्ञानालोकस्य यावनदेशप्रचारस्य द्वारमभूदिति पुरावृत्तविदां वार्त्तया सुप्रतिपन्नं चक्षुष्मताम् । न च शंक्यम्—ग्रीसदेशीयज्ञानत एव भारतस्यासीद् विज्ञानसमृद्धिरिति । न हि मुष्टिमेयैर्विताड़िताविशिष्टैश्च ग्रीकसैनिकैः शिक्ष्यन्ते स्म भारतीया ज्ञानर्द्धिसमृद्धाः सुधियः, न च सत्येवं ग्रीसदेशीयैरैतिहासिकैस्तथा नाभविष्यल्लिखितम् । दर्शिताश्चास्माभिरनेकधाऽन्येऽपि भूतार्थप्रतिपादका हेतवः ।

ततः प्रशान्तप्राये नन्दकुलधूमकेतोर्महाराजचन्द्रगुप्तस्य शौर्येण ग्रीकाख्ययवनानां प्रभावे चन्द्रगुप्तस्य तत्सूनोर्बिन्दुसारस्य च राज्यावसाने क्रूरप्रकृतिरशोकनामा बिन्दुसारपुत्रो राजवंश्यान् बहुधा विनिपात्य सिंहासनमारुरोह (264. B. C.) । तेन च क्रोधभयानकेन 'चण्डाशोक' इति ख्यातिं गतेन कलिंगेषु वर्षत्रयं सुमहान् युद्धविप्लवः समारब्धस्तेन लक्षशो विनष्टाः प्रजाः, न किमुत शतशो ग्रन्थरत्नानि ? ततोऽसौ उपगुप्ताख्येन बौद्धाचार्येणोपदिष्टो बौद्धधर्ममग्रहीत, प्रसिद्धश्चानन्तरं धर्मिष्ठो भवन् 'धर्माशोक' इति बौद्धेषु । प्रचारितश्च तेन नानादिगन्तेषु प्रेषितैर्बौद्धश्रमणैश्चीन-ग्रीसादिसुदूरदेशेषु बौद्धानां धर्मो ज्ञानालोकश्च भारतीयः । आयुर्वेदस्य पुनस्तदानीं किञ्चिन्मन्दप्रभोऽपि परहितव्रतैर्बौद्धश्रमणैरुपासितश्चीन-यवनादिदेशेषु प्रचारविशेषं लेभे । तथापि राजाज्ञया शवच्छेदादिनिषेधात्ततःप्रभृति शारीरशास्त्रस्यावनतिरेवाभूत, नष्टप्रायशारीरस्य च वैद्यकस्य कथङ्कारं समुन्नतिः ?

ततो विनष्टपराक्रमे मौर्यवंशे (183. B. C.) पार्थिनामानो ग्रीकयवनाः शकाख्यबर्बराश्च पुनःपुनर्भारतमाक्रम्य आसिन्धु-साकेतपुरावधिप्रदेशेषु निरन्तरं विप्लवं जनयामासुः। तदा मिलिन्दाख्यो यवनः पञ्चनदप्रदेशं बुभुजे, स च नागार्जुनेन बौद्धधर्मे उपदिष्ट इति मिलिन्दप्रश्नीया कथा बौद्धानाम्। मगधेषु च तदैव पुष्पमित्रः शुङ्गवंश्यो मौर्यवंश्यं बृहद्रथं विनाश्य राज्यमग्रहीत्, विताड़ितश्च तेन मिलिन्दाख्यो यवनः साकेतपुरीं रुन्धानः। भगवान् पतञ्जलिश्च तदानीन्तन एवेति ऐतिहासिकाः।

एवञ्च मनाक् प्रशान्ते विप्लवे चरकापरपर्यायेण तेन भगवता पतञ्जलिना प्रतिसंस्कृता विशीर्णप्राया अग्निवेश-संहितेति प्रागदर्शयाम। बौद्धाचार्येण नागार्जुनेन च तस्मिन्नेव काल सुश्रुतसंहिताऽपि प्रतिसंस्कृतेति केचित्। अमुष्य च प्रायो वर्षसहस्रद्वयी समतीता वृत्तान्तस्य।

अथ पुनः पुनः शकजातीयानामाक्रमणेन क्षीणदीनबलेषु सकलराजकेषु कुशाणवंशीयः कनिष्कनामा महाप्रतापः शक-नरपतिराहिमाद्रिविन्ध्यपर्यन्तं भारतस्य उत्तरपश्चिमार्द्धं बहुभिर्युद्धैर्जिगाय। तस्य शकनरपतेरतीताब्दाश्च साम्प्रतं १८३५ संख्याः। परास्ताद्वर्षशतत्रयं कथञ्चिदिव प्रशान्ता रणलीला। अस्मिश्चावसरे चरकसंहितापूरकः सम्बभूव काश्मीरेषु दृढबलाचार्यः। ततो हूणैः काम्बोजीयैश्च पुनर्भारतमाक्रम्य शलभैरिव शतकोटिसंख्यैर्वर्षशतं समारब्धो विप्लवः सुमहान्। हूणाश्च शका एव भिन्नप्रान्तीयाः इति केचित्। तांश्च सर्वान् मालवाधिपो विक्रमादित्यो यशोधर्मदेवाख्यो महता शौर्येण विजित्य शकारिसंज्ञां लेभे, विस्तारयामास च सुमहत् साम्राज्यमुज्जयिनीत आ-हिमाद्रिमूलम्। ततश्च प्रभृति (खीस्तीय ५३३ अब्दतः—सर्वथा विताड़ितेषु शकहूणादि-बर्बरेषु सार्द्धचतुःशतवर्षाणि पञ्चशतवर्षाणि वा कथञ्चित् प्रति-ष्ठिता शान्तिः। विक्रमादित्यश्चायं कालिदासादिनवरत्नोपा-सितो विद्याधिकर्णधार इति प्रख्याप्यते पुरावृत्तवेदिभिः। सोऽयं सम्वत्सर प्रवर्त्तको विक्रमो न वेति नास्मद्विचार्यम्।

अत्र च सार्द्धचतुःशतवर्षान्तः पञ्चशतवर्षान्तर्वा विक्रमा-दित्यवंश्येषु भारतं शासत्सु पुनरपि समुद्भासते स्म म्लान-

ज्योतिरपि भारतीयज्ञानसमृद्धिः। अत्रैव खल्वाविर्बभूवुर्वि-क्रमकाले कालिदासामरसिंह-वररुचि वराहमिहिराद्या विद्वांसः, ततश्च परं क्रमेण दण्डि-बाणभट्ट-भवभूत्यादयः केचन कवयः आर्यभट्ट-ब्रह्मगुप्तादयो ज्योतिर्विदश्च। स च भगवान् शङ्कराचार्योऽपि खीस्तीयनवमशतके प्रादुर्भूतः एतत्काला-भ्यन्तरीण एव। आयुर्वेदे च एतत्समयान्तरेव प्रादुरासीद् वाग्भटाचार्यो नाम अष्टाङ्गवैद्यकसंग्रहीता, वृन्दमाधवादयश्चा-परे संग्रहकाराः, जेज्जट-गयदास-भास्कर-ब्रह्मदेवाद्या वैद्यक-व्याख्यातारश्च। चक्रपाणिदत्तस्तु वङ्गेषु नयपालनृपतेः प्रियभि-षगासीदिति तदुक्त्या ज्ञायते, नयपालकालश्च खीस्तीय १०४०—१०६० वर्षाणि। तस्माद् भारतीयविद्यानां पुन-रभ्युदयकालस्य शेषतः प्रादुरासीद् वैद्यकाचार्यश्चक्रपाणिः। डल्लनाख्यः सुप्रसिद्धसुश्रुतटीकाकारश्च चक्रपाणेः समकालीनः किञ्चित्पूर्वतनो वा।

मालवराज्याधिपो नानाशास्त्ररसिकः प्रसिद्धतमो भोज-नरपतिश्च एतत्कालान्ते खृ० १००६ अब्दे सम्बभूवेत्यै-तिहासिकाः। मालवदेशश्च विन्ध्याद्रिश्रेणिरक्षितो नाभूद् महम्मदीयाक्रमणविषयस्तदानीम्।

अथ पुनर्भारतीयानां मन्दभाग्यवशात् प्रवृत्ते महम्मदी-यानां घोराक्रमणप्रवाहः। तत्राद्यमाक्रमणं महम्मद-बिन्-कासिम-कृतं सिन्धुदेशेषु (खी० ७१२ वर्षे श्रूयते। ततः परं यदा एकादशशतके गान्धारप्रान्तीयाद् गज्निनगरादा-गतेन दुर्द्धर्षेण महम्मुदाख्येन पापिष्ठेन बहुसहस्रदुराचारसैनिक-सहायेन पुनः पुनराक्रम्य लुण्ठिताः सोमनाथपत्तनादिषु भारतीयसम्पदः, कुट्टितास्तीर्थस्थानेषु देवमूर्त्तयः, व्यापादिताः सहस्रशो ब्राह्मणाः, निर्दग्धाश्च प्रतिदिनं शतशो गृहाः, तदा सर्वथा धनजनधर्मरक्षणव्याकुलैः परित्यक्तो नवीनज्ञानार्जन-प्रयत्नो लोकैः। न विद्मः—कियन्ति नाम तदा ततः प्रभृति च भस्मीभूतानि लुप्तावशिष्टानि प्राचीनग्रन्थरत्नानि !!

ततोऽनुपदमेव सुघोरकर्मणा घोराख्येन महम्मदेन स्वदेश-द्रोहिणो जयचन्द्राख्यस्य कान्यकुब्जाधिपस्य साहाय्या-समास्कन्द्य पातिता क्षत्रकुलसूर्यस्य देहलीपतेर्महाराजपृथ्वी-राजस्य राज्यश्रीः (खीस्तीय० ११९१)। देहलीराजधान्या

छायापि तत्कीर्त्तिस्तम्भमन्दिर-भग्नावशेषास्तत्तत्कुकृत्यसाक्षि-भूताः। ततश्च दशवर्षाभ्यन्तरत एव महम्मदीयैर्दुर्वृत्तैर्निर्जिता समया आर्यावर्त्तभूमिर्मालव-दाक्षिणात्यवर्जम् । मालव-दक्षिणात्ययोस्तु 'अल्तामास' इत्याख्येनतद्दासपुत्रेण, 'अलाउद्दीन' इत्याख्येन च तत्परवर्तिना महम्मदीयेन खीस्तीयत्रयोदशशतकेऽभूदाक्रमणम् । तयोश्च कुकृत्यशतैर्भारतदक्षिणार्द्धस्था अपि विध्वस्तप्रायाः प्रायेण सर्वा एवाऽर्यकीर्त्तयः । उज्जयिनीस्थानि महाकालमन्दिरादीनि तु—अल्तामास इत्यनेनैव विध्वस्तानि ।

वङ्गेषु तु महम्मदीयाक्रमणाद् दूरतरं स्थितेषु, खीस्तीय-सप्तमशतके वा निदानसंग्रहकार इन्दुकरात्मजो माधवस्ततश्च परम् एकादशशतके चक्रपाणिर्नाम नयपालराजस्य वैद्यवरः प्रादुर्बभूव । ततो द्वादशशतके त्रयोदशशतके वा किञ्चित् प्रवृत्तेऽपि मुसल्मानाक्रमणे विजयरक्षित—श्रीकण्ठदत्ताभ्यां टीकाकाराभ्यां पुनरपि किञ्चित् समुद्दीपितं वैद्यकज्योतिः । तयोश्चान्तिके तदानीमप्यासन्ननेके प्राचीनवैद्यकग्रन्था इति तदुद्धृतप्रमाणशतैरनुमीयते । ततश्च हन्त महम्मदीयैः कपटनीत्या निर्जिता वङ्गराजलक्ष्मीरपि ।

ततश्च षोडशशतकमध्यभागे 'चेङ्गिज्खान्' इत्याख्येन मुगलजातीयमहादस्युना पुनरपि विलुण्ठिता भारतीयाः सम्पद आ-हिमाद्रिमध्यदेशपर्यन्तम् । नृशंसाधमेन च तेन बहुलक्ष-नरघातकेनानुष्ठितान्यतिघोराणि कुकृत्यानि । ततः परावृत्तेऽपि चेङ्गिज्खानाख्ये मुगले पुनः पुनः समागतैर्मुगलैः सह पाठान-नरपतीनां प्रावर्तत चिराय दारुणा रणलीला बहुजनपदध्वंसिनी । अन्तरा च 'तैमूरलङ्ग'ख्यो घोरकर्म्मा मुगलदस्युराजः खीस्तीयचतुर्दशशतकान्ते समापतितां मासद्वयं यावदप्रतिहत-प्रसरो लक्षशः प्रजा विनिहत्य, प्रज्वाल्य च तद्गृहान् विलुण्ठ्य च तत्समृद्धीः समग्रमार्यावर्त्तं हाहाकारमयमकरोत् ।

दाक्षिणात्येत्वेवंविधेऽपि समये वीरवुक्को नामाऽभून्महा-विक्रान्तो नरपतिर्येन विजयनगरराज्यमधितिष्ठता न केवलं सुरक्षिता दाक्षिणात्यराज्यश्रीरेव किन्तु भगवता मत्स्याव-तारेणेव समुद्धृता व्याख्यापिताश्च वेदाः स्वसभासदः सायणमाधवादीन् प्रोत्साह्य । शार्ङ्गधरो नाम स्वसंहिताख्य-वैद्यकसंग्रहकारश्च दाक्षिणात्ये एतत्कालाभ्यन्तर एव सम-भूदिति शार्ङ्गधरपद्धत्यां निर्दिष्टेन कालेन (सं० १४२०) प्रतीयते ।

अथ षोडशशतकारम्भे बावराख्येन मुगलराजेन विजितेषु पाठानराजकेषु मुगलराज्याधिकारः प्रववृते । ततः कतिपय-वर्षाणि बावरपुत्रो हुमायूनो दिग्विजयविप्लवं समारेभे, शेरशाह इत्यनेन वङ्गेषु पराजितोऽसौ क्रमादपहृतसिंहासनश्चाभूत् । अन्तरा च मुगल-पाठानानां सुदुर्द्धर्षाणां युध्यमानानां संघर्षेण महानभूत् प्रजाविध्वंसः षोड़शवर्षाणि । ततः षोड़शवर्षान्ते पुनर्मुगलराज्यं प्रतिष्ठाप्य उपरते हुमायूने तत्पुत्रः प्रथितनामा अकब्बरशाहाख्यो नरपतिर्बाहुबलेन सिंहासनमध्यास्य विजित-वान् प्रायः समग्रमपि भारतं वर्षम् ।

ततः सुप्रतिष्ठितायां शान्तौ नानाविद्यारसिकोऽसौ नरपतिर्बहुधा समादृत्य भारतीयान् विदुषः शास्त्राणि च, "दिल्लीश्वरो वा जगदीश्वरो वेति" महतीं यशोगाथामर्ज्ज-याञ्चकार । ईदृशे च समयेऽभूवन् तानसेनाद्या भारतीयसङ्गीता-चार्याः, टोडरमल्लाद्या राजनीतिकोविदाः, अपरे च केचिन्ना-नाशास्त्ररसिका विद्वांसः । अस्मिन्नेव च काले षोड़शशत-कपरार्द्धे वा कान्यकुब्जेषु प्रादुर्बभूव भावमिश्राख्यः प्रसिद्धवैद्यकसंग्रहकारः ।

ततोऽकब्बरशाहानन्तरं तत्पुत्रे जहाङ्गीरबादशाहे राज्यं भुक्त्वा उपरते जहाङ्गीरपुत्रो शाहजहान् नरपतिर्भारतसाम्राज्यं बुभुजे । स चासौ देहलीदुर्ग-ताजमहलादिनिरमापयत् स्थापत्यादिनानाकलाप्रियः सुप्रसिद्धकीर्तिरप्यपि । तद्राज्यकाले च भट्टोजिदीक्षित-जगन्नाथपण्डितराजादीनां, समनन्तरञ्च नागेशभट्टादीनां प्रादुर्भाव इत्यैतिहासिकाः ।

ततः अवरङ्गजेबनामा शाहजहानस्य कनिष्ठपुत्रः कपटशतेन स्थविरं पितरमवरुध्य भ्रातॄंश्च हत्वा राज्यमधिचक्रमे । ततश्च पुनः प्रावर्त्तत यतस्ततः सुमहानार्य्यकीर्तिध्वंससंरम्भः । तेन हि 'हिन्दु'नाम द्वेषिणा विनाऽपि क्रोधकारणं शतशश्चूर्णी-कृतानि देवमन्दिराणि, निर्दग्धा सहस्रशो ग्रन्थराशयः व्यापादिताश्च बहुशः स्वधर्म्मनिष्ठाः प्रजा नानाविधमिषश-तेन । एवञ्च भूयः कथञ्चिदुज्जीवितप्रायाऽपि शोच्यां दशा-

माजगाम पुनरपि भारतीया विद्यासमृद्धिः । आयुर्वेदश्च यावनवैद्यैर्हतसर्वस्वस्ततः प्रभृति कथञ्चित् प्राणिति स्म ।

सोऽयमायुर्वेदस्य,—अथवा समस्तभारतीयविज्ञानदिनकरस्य—अपराह्नकालः, नूनं वा सन्ध्यारम्भ एव । तादृशे च काले प्राचीनविज्ञानारुणरागसंग्रहणपरा एवाभूवन्नाचार्य्या इत्यपि भागधेयमेव भारतस्य । नवीनविज्ञानाविष्करणी तु प्रतिभा न समुन्मिमेष तादृश्यराज्यविप्लवैकार्णवीभूते भारते इति किमत्र विस्मयपदं नाम ?

एवंविधे च काले महाराष्ट्रवीरैः शिवाजीप्रमुखैः पुनरपि धर्म्मसाम्राज्यस्थापनाय समारब्धः सुमहान् प्रयत्नो लब्धश्च कथञ्चित् साफल्यमपीति चिराय स्मरणार्हम् । परं तत्परवर्त्तिभिर्महाराष्ट्रराजकैः परस्परं विवदमानैः प्रकामं विलुण्ठनपरैश्च निर्मूलिता स्वल्पेनैव कालेन महाराष्ट्रसाम्राज्यस्थापनस्याऽऽशा-लता । तथापि पुण्यश्लोकानां शिवाजी-राजारामादीनां सुकृतप्रभावादद्यापि इन्दौर-बड़ौदा-ग्वालियरादिराज्येषु सावशेषं महाराष्ट्रज्योतिरिति महदिदं हर्षस्थानं भारतीयानाम् ।

अथ दुर्व्विषहपापभाराक्रान्ते मुगलसाम्राज्ये, अवरङ्गजेबराज्यावसाने (खी० १७०७) अतिदुर्बलप्रभावेषु तत्पुत्रपौत्रादिषु पुनरपि 'नादिरशाह' इत्याख्येन महादस्युना नवधा देहलीराजधानीमाक्रम्य महती संहारलीला प्रवर्त्तिता (खी० १७३९) । ततश्च पुनर्नववर्षान्ते 'अहमदशाह अब्दली'— इत्याख्येन दुर्द्धर्षदस्युना चतुर्द्धा विलुण्ठितानि देहलीमथुराद्यानि नगराणि, अनुष्ठितानि च पुनःपुनस्तानि तानि गृहदाहादिकुकृत्यानि ।

ततः सदयहृदयेन वेधसा एतावतीभिरत्याचारपरम्पराभिरपि अविनश्यन्तीमिव भारतीयविद्यासमृद्धिमाकलयता तद्रक्षणाय सम्प्रेषिता उदारहृदयाः श्वेतद्वीपपुरुषा ब्रिटिशनामानः । तैश्च वाणिज्यार्थमागतैरपि भारतीयप्रजानां दुर्द्दशाविमोचनार्थमिव क्रमात् वङ्गेषु च दाक्षिणात्ये च राज्यभित्तयो निर्म्मिताः, स्थापितञ्च वर्षशतेन बहुरक्तपातं विनैव सुमहत् साम्राज्यमखिलभारतव्यापि । ततः (खी० १८५७ वर्षे) प्राप्तेऽपि सैनिकविद्रोहकृते विप्लवे गुणलुब्धेव राज्यश्रीर्न मुमोच तेषामेवाङ्कारोहणसुखम् । ततः प्रभृति क्रमात् सुप्रतिष्ठायां शान्तौ सुरक्षिते च प्रजालोके, प्रतिदिनमादीप्यते भारतीयं ज्ञानज्योतिः । न च स्वयं सुविमलज्ञानाधिकारिणोऽपि प्रकामं नोत्साहयन्ति राजपुरुषाः सम्प्रति सर्व्वा अपि भारतीया विद्याः—इति सर्व्वथा धन्यवादार्हा एते भारतीयानाम् ।

सोऽयमेतावानतिदारुणोऽपि सम्प्रति प्रासावधिर्वैद्यकविद्यायाः (प्रत्युत सर्व्वासां विद्यानां) ध्वंससमयः । अथेदानीमेतत्कालान्तः प्रादुर्भूतानां वैद्यकाचार्य्याणां कालनिर्णये हेतवः केचिदुपन्यस्यन्ते प्रसङ्गात् संक्षेपेण ।

तत्र चरकदृढबलयोः कालो निर्णीतपूर्व्वः । वाग्भटश्च दृढबलस्यावरज एव न पूर्वजः, इति निश्चयोऽस्माकम् । यतो वाग्भटेन अष्टाङ्गसंग्रहशेषे दृढबलीयकल्पस्थानमेव गद्यमयेन वचसाऽनूदितं, अष्टाङ्गहृदये "ऋषिप्रणीते प्रीतिश्चे" दित्यादिवचनेन स्पष्टं लक्षितञ्च दृढबलकृतं चरकापूरणम् ।

सुश्रुतसंहितायाः प्रतिसंस्कारस्तु चरकसंहितारचनादनन्तरजः प्रतिभाति । दृश्यन्ते ह्यत्र बहुधा चरकीयाः पाठाः, विशयसन्निवेशक्रमश्च साधीयान् । तत्र दिङ्मात्रमुदाह्रियते—

चरके—"सूक्ष्माणि हि दोष-भेषज-देश-काल-बल-शरीराहार-सात्म्य-सत्व-प्रकृति-वयसामवस्थान्तराणि यान्यनुचिन्त्यमानानि विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्य्युः किं पुनरल्पबुद्धेः ।" (च० सूत्र० १५ अ०) इति । सुश्रुते— "सूक्ष्मा हि द्रव्य-रस-गुण-वीर्य-विपाक-दोष-धातु-मलाशय-मर्म-शिरा-स्नायु-सन्ध्यस्थिगर्भसम्भवद्रव्यसमूहविभागाः । * * ये विचिन्त्यमाना विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्य्युः किं पुनरल्पबुद्धेः । (सु० सूत्र० ४ अ०) इति ।" पुनः सुश्रुते कासाधिकारे—"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहै" रित्यारभ्य "कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम्"—इत्यन्तः सन्दर्भः (सु० उत्तर० ५२ अ०) चरकीयकासाधिकाराद् गृहीतः (च० चिकि० १८ अ०) । सुश्रुतीय ऋतुचर्याध्यायश्च (सु० सू० ६ अ०) चरकीयकालविभागानुवादपुरःसरमारब्धः । सुश्रुतप्रतिसंस्कर्त्ता चासौ न माध्यमिकाचार्य्यो नागार्जुनो भवितुमर्हति तन्नाम्नः प्रसिद्ध-

बौद्धाचार्य्यस्य चरकसमकालीनत्वात्। न हि समकालीनानामाचार्य्याणां वचांसि यथावद् गृह्यन्ते प्रसिद्धैराचार्य्यैर्विनैव तन्नामग्रहणम्। अथासौ कश्चनान्यो बौद्धाचार्य्यो नागार्ज्जुनाख्यः स्वीक्रियते तदवरजः सुश्रुतप्रतिसंस्कर्त्तेति, तथास्तु,—का क्षतिः ?

अथ वाग्भटकालनिर्णये त्रयो हेतव उपलभ्यन्ते। तत्र इत्सिङ्गाख्येन चैनिकपरिव्राजककृतः "अष्टाङ्गवैद्यकसंग्राहको नवीनाचार्य्यः" इत्यादिनिर्देशो दर्शितपूर्वः प्रथमो हेतुः। तेन खीस्तीयपञ्चमशतकारम्भे वाग्भटकालोऽस्माभिः स्थापितः। अथ चक्रपाणिडह्लनादिभिः प्रायो वर्षसहस्रपुराणैराचार्य्यैर्वाग्भटपाठोद्धारो द्वितीयो हेतुर्येन तत्कालादपि बहुपुराणः (अन्यूनपञ्चशतवर्षप्राक्तनः) सम्भाव्यते वाग्भटसमयः। महम्मद-बिन्-कासिमकृतं (ख्रीस्तीयाष्टमशतकारम्भे) सिन्धुदेशाक्रमणं तृतीयो हेतुर्येन तत्पूर्वतन एव स्यात् सिन्धुदेशजो वाग्भट इति प्रतीतिः। न हि तदारभ्य प्रवृत्ते सिन्धुराजविप्लवे कथमपि अष्टाङ्गसंग्रहाष्टाङ्गहृदयाख्ययोर्महाग्रन्थयोर्निर्म्माणं सम्भवति नाम। यत्तु अष्टाङ्गसंग्रहकारो वाग्भटः अष्टाङ्गहृदयकाराद् वाग्भटाद् भिन्न इति कस्यचित् पाश्चात्यविदुषो मतम् तत् सर्वथा निर्मूलमतिविस्मयकरञ्च नः। ग्रन्थद्वयस्य सर्वत्रैव भाषासादृश्यात्, क्वचिदपि मतभेदस्यादर्शनाच्च। वाग्भटेन हि महान्तं ग्रन्थमष्टाङ्गसंग्रहाख्यं विरचय्य तत्संक्षेपो "हृदयमिव हृदयमेतत्" निरमायीति स्वयमेवाभिहितं तेन सुस्पष्टया गिरा ग्रन्थसमासौ

'रसरत्नसमुच्चय' कारो वाग्भटस्तुबहुपरतनः कश्चन भिन्न एवाचार्य्यस्तुल्यनामा। यतः समुद्रवद् गम्भीरे अष्टाङ्गसंग्रहेऽपि न लभ्यते रसतन्त्रोक्तविषयाणां रससंस्कारादीनां गन्धोऽपि, लभ्यन्ते च समुच्चये प्राचीनवाग्भटापेक्षया भृशमवरजानां सोमदेव-गोविन्दभगवत्पादादीनां ग्रन्थेभ्यः पाठोद्धाराः। तत्र सोमदेवग्रन्थात् समग्रं रसपरिभाषाप्रकरणं गृहीतं रसरत्नसमुच्चये (र० र० स० ९ अ०)। गोविन्दभगवत्पादकृताद् रसहृदयतन्त्राच्च गृहीतानि—"सुकृतफलं तावदिदम्" इत्यादीनि "भ्रूयुगमध्यगतं यत्"—इत्यादीनि च कानिचित् पद्यानि। गोविन्दभगवत्पादाश्च भगवतः शङ्कराचार्य्यस्य गुरव इति प्रसिद्धा एव नान्ये इति सुप्रतिपादितं विद्वद्वरैः श्रीमद् गुरुनाथ त्र्यम्बक काले इत्येतैः रसहृदयोपोद्धाते। न च शंक्यं-कथं तर्हि "सूनुना सिंहगुप्तस्ये"ति रसरत्नसमुच्चयादौ परिचय इति, यतो बहुषु हस्तलिखितग्रन्थेषु "सूनुना सङ्घगुप्तस्ये" त्येव पाठः साधीयान् दृश्यते। तेन "सिंहगुप्तस्ये"ति पाठः कस्यचित् पण्डितम्मन्यस्य संशोधनप्रसूतो मन्तव्यः। असौ च रसतान्त्रिको वाग्भटः खीस्तीयत्रयोदशशतके प्रादुरासीदिति डा० प्रफुल्लचन्द्ररायस्य मतं युक्तियुक्तमेव।

अथ माधवकरो नाम प्रसिद्धवैद्याचार्यो निदानकार इन्दुकरात्मजो वङ्गेषु प्रादुरासीदिति सुप्रथिता किंवदन्ती। कर इत्युपाधिश्चास्य वङ्गीयतां स्फुटं व्यनक्ति। स च वाग्भटादवरजः, निदाने "निदानं पूर्वरूपाणि"—इत्यादि "तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्"—इत्यन्तस्य समग्रसन्दर्भस्यान्येषाञ्च वाग्भटपद्यानां बहुधा ग्रहणात्। वृन्दचक्रपाण्योः पूर्वजश्च सः, ताभ्यां स्व-स्व-चिकित्सासंग्रहयोः "गदविनिश्चयो" क्तक्रमेण चिकित्सोपदेशात्। चक्रपाणिश्च खीस्तीयैकादशशतकमध्यभागे वङ्गभूमिमलञ्चकारेति सहेतुकमवोचाम, स च वृन्दकृत-"सिद्धयोगा" ख्यग्रन्थमुपजीव्य स्वकीयं चिकित्सासंग्रहं रचयाम्बभूवेति तदुक्त्या चक्रपाणेरन्यूनवर्षशतद्वयेन प्राक्तनः स्याद् वृन्दः। तेनासौ वृन्दाचार्य्यो नवमशतकेऽभूदिति उन्नीयते। माधवश्च तत्पूर्वजः खीस्तीयसप्तमशतके सम्भूवेति सम्भाव्यते। इतश्च अष्टमशतके "हरूण उल् रसीद" समये माधवीयनिदानस्य पारस्यभाषानुवादोऽभूदित्यैतिहासिकवार्त्तयाऽपि तत्पूर्वज एव माधवः पर्य्यवस्यति। तस्माद् वाग्भटपरवर्त्तित्वाच्च सप्तमशतके किञ्चित् पूर्वं वा माधवप्रादुर्भावः सिध्यति। माधवकरश्चासौ रुग्विनिश्चयाख्यनिदानग्रन्थप्रणेता रत्नमालाख्यद्रव्यगुणकारश्चेति प्रसिद्धिः। डह्लनादिनिर्दिष्टः सुश्रुतटिप्पणकारः श्रीमाधवस्तु भिन्न एवस्यात् इति प्रतिभाति, तस्य कुत्रापि माधवकर इति निर्देशादर्शनात्।

सायणापरनामा वेदभाष्यकृन्माधवाचार्य्यस्तु माधवकरात् सर्वथा भिन्नः पूर्वोक्तहेतोः, वर्षपञ्चशत्या तदवरजश्चेति तयोरभेदः कथमपि न शङ्कनीयः।

डल्लनो नाम सुप्रसिद्धः सुश्रुतव्याख्याता तु चक्रपाणेः समकालीनः समीपकालीनो वेति शक्यं निश्चयेन वक्तुम्, यतोऽसौ सहनपालदेवनृपतेर्वल्लभमात्मानं ख्यापयामास । पालनरपतयः खल्विह भारते ख्रीस्तीयदशमैकादशशतकयोरेव मगधेषु गौड़ेष्वन्यत्र च प्रादुर्बभूवुः । तत्र नयपालनृपते-र्गौड़ाधिपस्य वैद्योऽभूच्चक्रपाणिरिति तदुक्त्या ज्ञायते, तत्-पूर्वजस्य "पाल" वंशीयनृपस्य नृपद्वयस्य वा नाम न सम्यङ्निरूपितमद्यापि तद्वंश्याधस्तनास्तु नारायणपालाद्यो नरपतयः सुविदितनामान इतिहासविदाम् । तदस्यर्णकाल-जाश्च 'गया'-'भागलपुरा' दिस्थानेषु कृतराज्या गोविन्दपाल-देव-मदनपालदेवाख्या भूपतयः "पालदेवा" न्तसंज्ञा इत्यपि सम्प्रत्येवाऽविष्कृतं ताम्रशासनाद्युट्टङ्कनेन । तस्मादुच्यते चक्रपाणेः समकालीनः समीपकालीनो वाऽभूड्डल्लन इति । डल्लन-चक्रपाणिभ्याञ्च लभ्यमानसुश्रुतटीकयोस्तत्प्रणीतयोः क्वचिदपि परस्परस्य नाम न गृहीतं, गृहीतानि तु डल्लनेन जेज्जट-गयदासब्रह्मदेवादीनां नामानि । तस्मादितोऽपि तयोः परस्परप्रतिद्वन्द्विता शङ्क्यते । तदेवं ख्रीस्तीयदशशतकशेषार्द्धं एकादशशतकपूर्वार्द्धं वा समभूद् डल्लन इति नः प्रत्ययः ।

चक्रपाणिकालश्च ख्रीस्तीयैकादशशतकमध्यभाग इति सर्व्ववादिसम्मतः सिद्धान्तः पूर्वोक्तहेतुः ।

विजयरक्षितस्तु निदानटीकामुखे चक्रपाणिनामतो निर्दिदेश, श्रीकण्ठश्च तच्छिष्य एव । कालश्चानयोस्त्रयोदशशत-कस्य द्वितीयः पादः, आतङ्कदर्पणाख्य-निदानटीकाकृता वाचस्पतिना त्रयोदशशतकमध्यजेन तन्निर्देशात । कृतश्च विजयरक्षितेन योगरत्नमालाकारस्य गुणाकरस्य मतोद्धारः । योगरत्नमालाकारकालश्च त्रयोदशशतकस्याद्यः पादः,—इत्यपि हेतोः स एव निश्चयः । तदेतत् सर्वं साधु निर्णीतं डा० हर्नलि इत्याख्येन पाश्चात्यविदुषा ।

अरुणदत्ताख्यः प्रसिद्धवाग्भटटीकाकारस्तु त्रयोदशशत-कस्य प्रथमे पादे समभूदित्यपि तत्कृत एव निर्णयः ।

शार्ङ्गधरसंहितादिग्रन्थकारः शार्ङ्गधरस्तु चतुर्दशशतकस्य प्रथमार्द्धे प्रादुरासीदिति शार्ङ्गधरपद्धतिप्रस्तावनायां लिखितेन परिचयेन समुन्नेयम् ।

शिवदाससेनो नाम चक्रसंग्रहस्य चरकसंहितायाश्च प्रसिद्धटीकाकारस्तु अरुणदत्त-श्रीकण्ठदत्तयोरर्वाचीनः, गौड़ा-वनीपालाश्रितभिषग्वरस्य सुतः, इति कृत्वा वङ्गदेशीय-वैद्यब्राह्मणः पञ्चदशशतकीयश्च प्रतीयते । गौड़ावनीपालश्चासौ महम्मदीय एव स्यादिति तत्प्रदत्तपरिचयभङ्ग्या ऐतिहासिक-विचारेण च समुन्नेयम् ।

भावमिश्रस्तु शार्ङ्गधरवङ्गसेनयोरवरजः कान्यकुब्जश्च—इत्यत्र नास्ति संशयः, यतोऽसावनयोः पाठानुद्धरति स्वग्रन्थे भावप्रकाशाख्ये, निर्दिशति च परिचयं स्वकीयं तत्रैव । किञ्च तत्र फिरङ्गरोगस्य वर्णनात् षोड़शशतकस्य प्रथमपादा-दर्वाचीनोऽसौ निश्चीयते । फिरङ्गरोगो हि प्रथमं पोर्तुगीजा-ख्यफिरङ्गीयैस्तस्मिन्नेव काले स्वाङ्गसम्पर्केण भारतीयपण्या-ङ्गनासु प्रसारितः--इति सुप्रथितेयं वार्त्ता । चोपचीन्यहि-फेनादीनां गुणाख्यानञ्चास्य नवीनतां व्यनक्ति ।

वङ्गसेनस्तु शार्ङ्गधरभावमिश्रयोर्मध्यस्थे समये समभूत् । स च वङ्गदेशीय एव संग्रहकारः सेनोपाधिश्चास्य वङ्गीय-वैद्यब्राह्मणतां तत्संग्रहस्तु जीर्णप्रतिसंस्कृता अगस्त्यसंहितै-वेति स स्वयमेवाह । त एते वैद्यकापराह्णकालसम्भवा अतिप्रसिद्धवैद्यकाचार्य्याः यैः खल्विह संग्रहैकव्रतैः समूहिताः परमयत्नेन हीयमानदीप्तेरायुर्वेदभास्करस्य ज्योतिश्छटाः । राज्यविप्लवसमये च तावदेवाभूत् पर्य्याप्तमित्यकामेनापि स्वीकरणीयं बुद्धिमता । तथाप्यत्र सर्व्वथा विलुप्तप्रायाणि न केवलमसंख्येयप्रायाणि प्राचीनार्षतन्त्राणि किन्तु काय-चिकित्सावर्जं सर्वाण्यप्यायुर्वेदाङ्गानीति सशोकं स्मर्त्तव्यं नाम । किञ्चात्र कथं कथमपि ध्रियमाणस्यास्य कायचिकित्सा-ङ्गमात्रस्यापि प्रधानपूर्वाङ्गम्—शारीरविद्या वनौषधिविद्या चेति विद्याद्वयं विलुप्तप्रायमेव । तत्राप्याद्या शारीरविद्या तु साम्प्रतमशरीरिण्येव प्रायः संवृत्तेति हन्त को नाम सहृदयो नात्र दीर्घं निःश्वसिति ? कश्च वा इदानीं समर्थः सम्प्रति सुप्रतिष्ठितशान्तिके देशे विद्योत्साहिषु च महानुभावराजकेषु पुनरपि समग्रभारतशरण्यमिदमायुर्वेदशास्त्रं तया संवर्द्धयितुं न प्रयतेत विपद्येत वा दुर्दैवहतकप्रापितामायुर्वेदस्याऽपूर्णतां परैर्विहस्यमानाम् ?

पण्डितेभ्यः प्रार्थनम् ।

वाराणसेयाः सुधियः स्वधर्मा-
वने करिष्यन्ति न चेत्प्रयत्नम् ।
सनातनी तर्हि सुनीतिरीतिः
पातालमूलं खलु यास्यतीह ॥ १ ॥
सनातनोऽयं सुखदः स्वधर्मो
ह्रासं व्रजत्याकुलतामुपेत्य ।
वाराणसेयः समुपेक्षते तं
विद्वद्व्रजो हा किमिदं न दुःखम् ॥ २ ॥
सनातनो वृद्धतमो वृषोऽयं
त्रिभिर्विलूनैर्विकलः पदैर्हा ।
वाराणसेयैः समुपेक्ष्यते चेद्
बुधैस्तदा काऽस्य गतिर्भवित्री ॥ ३ ॥
महम्मदीयैर्बहु हन्यमान-
स्तथेशवीयैर्विनिपात्यमानः ।
अन्यैश्च कैश्चित्परिपीड्यमानो
वृद्धो वृषः कं शरणं श्रयेत ॥ ४ ॥
वाराणसेयान्विदुषः शरण्यान्
समाश्रितो वृद्धतमो विपन्नः ।
सनातनः संप्रति धर्म एष
स्वं जीवनं नो विजहाति नूनम् ॥ ५ ॥
सनातनं धर्ममिमं निषेव्य
वाराणसेया विबुधाः प्रतिष्ठाम् ।
लोके लभन्ते यदि तर्हि किन्तैः
सर्वात्मनाऽयं न सुरक्षणीयः ॥ ६ ॥

म० म० देवीप्रसाद शुक्लः कविचक्रवर्ती

स्थानासनाभ्यां विहरेत् ।

लेखक—श्रीगङ्गानाथ झा शर्म्मा, एम० ए०, डी० लिट्०
महामहोपाध्यायः ।
[वाइस चान्सलर—प्रयाग—विश्वविद्यालय] ।

समुद्रयात्राविचारप्रकरणे बौधायनीये धर्म सूत्रे उपलब्धमेतद्वाक्यम्—'समुद्रसंयानम्…… …. एषामन्यतमत् कृत्वा चतुर्थकालामितभोजिनः स्यु-रपोऽभ्यपेयुः सवनानुकल्पम् । स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपहन्ति पापम्' इति । (२।१।४१) ।

समुद्रयातुः प्रायश्चित्तमत्रोच्यत इति स्पष्टम् । परन्तु 'स्थानासनाभ्यां विहरन्तः' इत्यस्य कोऽर्थः । वर्षत्रयपर्यन्तं स्थानसनाभ्यामवस्थानं सर्वथाऽसम्भवम् । असम्भवं च प्रायश्चित्तं न कुत्रापि शास्त्रकारैरुपदिष्टम्—इत्येवं सन्दिहानेन मया ग्रन्थान्तरेषु स्थानासनविहारस्य तात्पर्यगवेषणा कृता । समुपलब्धश्चैतादृशः प्रयोगः कतिपयग्रन्थेषु ।

(१) पद्मपुराणे वानप्रस्थधर्मप्रकरणे—'स्थानासनाभ्यां विहरेत् न क्वचिद्‌ धैर्यमुत्सृजेत्' इति (आदिखण्डे ५८ । २६) ।

(२) याज्ञवल्क्यस्मृतौ (३।५१)—'स्थानासनविहारैर्वा योगाभ्यासेन वा तथा (दिनं नयेत्) ' इति ।

अत्र मिताक्षरा—

'स्थानासनरूपैः विहारैः । कश्चित्कालं स्थानं कञ्चित्कालमुपवेशनमित्येवं दिनन्नयेत्'—इति ।

मनुस्मृतौ—

(२।२४८)—'एतेष्वविद्यमानेषु स्थानासनविहारवान्' इति ।

तत्र मेधातिथिः—

स्थानासन एव विहारः तद्वान् । कदाचित् तिष्ठेत् कदाचिदासीत-एवं विहरेत् । अन्ये तु मन्यन्ते-स्थानाय स्वस्तिकादिना यदासनं ध्यानकाले तत् 'स्थानासनं,' विहारोऽन्यो भिक्षाचरणादिः इति ।

सर्वज्ञनारायणस्तु—

'स्थानम्' ऊर्ध्वावस्थानं नियतं, 'आसनं' उपवेशनं नियमेन, 'विहारा' भ्रमणम्—इत्येतैस्तयो र्विशेषग्रहणम् ।

(४) पुनर्मनुस्मृतौ—

(६।२२)—'स्थानासनाभ्यां विहरेत्' इति । तत्र मेधातिथिः—'स्थानासनाभ्यां' दिने, रात्रौ तु केवलस्थण्डिलशायितां वक्ष्यति—इति ।

(५) पुनर्मनुस्मृतौ—

(११।२२४)—'स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा' इति ।

तत्र मेधातिथिः—

उत्थित आसीन उपविष्टोऽथवा न क्वचिन्निषीदेत् । अशक्तौ अधः शयीत, न पर्यङ्के इति ।

(६) मनुस्मृति द्वितीयाध्यायगत १०२-१०३ श्लोकावधिकृत्य मेधातिथिनोक्तम्—

अत्र स्थानासने एवोपात्ते इति । श्लोकाविमौ च-
पूर्वां सन्ध्यां जपंस्तिष्ठन् नैशमेनो व्यपोहति ।
पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम् ॥
न तिष्ठति तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम् ।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः ॥ इति

अस्माच्च सन्दर्भाज्ज्ञायते यत् स्थानासनशब्दगतं स्थानं' प्रातस्सन्ध्याङ्गजपपरम् 'आसनं' च सायं सन्ध्याङ्गजपपरमिति ।

गौतमीये धर्मसूत्रे—

(२६।१।६)—'अथातः कृच्छ्रान् व्याख्यास्यामः ....तिष्ठेदहनि रात्रावासीत'—इति तत्र च भाष्यम्—'भोजनाद्यविरुद्धेषु कालेषु अहनि तिष्ठेत् रात्रावासीत । एवं च निद्राया अवश्यम्भावित्वात् आसीन एव निद्रां सेवेत—इति ।

(८) विष्णुधर्मसूत्रे—

(४६।१।४)—'कृच्छ्राणि भवन्ति । दिवा स्थितस्तिष्ठेत् रात्रावासीनः । कर्मणोऽन्ते पयस्विनीं दद्यात्,—इति ।

(९) वशिष्ठधर्मसूत्रे—

(२५।५)—'व्रतरूपाणि ···· स्थानासनशीलः' इति । तत्र टीकाकारः—'स्थान एव आसनं स्थितिः यस्य स वृथा भ्रमणवर्जीत्यर्थः' इति ।

एतेषां वाक्यानां पर्यालोचनया स्थितमेतत् यत् बौधायनोक्तं प्रायश्चित्तं कृच्छ्रव्रतरूपमेव स्थानासन पदेन विवक्षितमिति ।



१. परमगुरवः श्रीराजारामशास्त्रिमहोदयाः



२. महामहोपाध्याय-श्रीबालशास्त्रिमहोदयाः



३. श्रीमदाचार्य-दामोदरलाल गोस्वामिमहोदयाः



४. महामहोपाध्याय-डा० गङ्गानाथझा-महोदयाः

विवाहसम्बन्धे विचारः ।

लेखकः—

देशपूज्यो महामान्यो श्रीमदनमोहन मालवीय महोदयः

सर्वं प्रदेशीयानां ब्राह्मणानां क्षत्रियाणां वैश्यानां च स्वसमानजातीयैः प्रदेशान्तरीयैः सहोद्वाहसम्बन्धः शास्त्रमर्य्यादामतिवर्त्तते-ऽनुवर्त्तते वेति विचारे सवर्णाविवाहः सर्वासु स्मृतिषु प्रशस्तत्वेन कीर्त्तितः । तथाहि स्मृतिचन्द्रिकायां संस्कारकाण्डे कन्यालक्षणप्रकरणे—" साच (=कन्या च) सवर्णैव ग्राह्या । यदाह व्यासः—

ज्ञात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम् ।

मनुरपि "सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्म्मणि ।"

मिताक्षरायामाचाराध्याये विवाहप्रस्तावेऽपि " सवर्णः श्रोत्रियो वरः (याज्ञवल्क्यस्मृतौ १, ५५) इत्यनेन सवर्णा मुख्या दर्शिता " इति । " सवर्णा पुनः सर्वेषां मुख्या स्थितैव " इति च वर्णितम् ।

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्म्मणि ' इति मनुवचने " सवर्णा समानजातीयेति " मेधातिथिव्याख्यानम् ।

कुल्लूकेनापि " ब्राह्मणक्षत्रियवैश्यानां प्रथमे विवाहे कर्त्तव्ये सवर्णा श्रेष्ठा भवतीति " व्याख्यातम् ।

याज्ञवल्क्यस्मृतावाचाराध्याये ५७ तमश्लोकव्याख्यावसरेऽपरार्केण "सवर्णा पुनश्चतुर्थी मुख्या स्थितैवेति" स्वाभिप्रायः सुस्पष्टमाविष्कृतः । अत्र सवर्णायाश्चतुर्थीत्वं युगान्तरेऽसवर्णभार्य्याया अभ्यनुज्ञातत्वेन तदपेक्षया बोध्यम् ।

माधवाचार्य्येण पराशरभाष्ये आचारकाण्डे लिखितम्—

"उद्वहनीया कन्या द्विविधा । सवर्णा चाऽसवर्णा च । तयोराद्या प्रशस्ता । तदाह मनुः—

सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्म्मणि ।

कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः ॥ इति ।

अग्रे स्नातकस्य प्रथमविवाहे । दारकर्म्मणि अग्निहोत्रादौ धर्मे । सवर्णा वरेण समानो वर्णो ब्राह्मणादिर्यस्याः सा । यथा ब्राह्मणस्य ब्राह्मणी, क्षत्रियस्य क्षत्रिया, वैश्यस्य वैश्या, प्रशस्ता । धर्मार्थमादौ सवर्णामुद्वाह्य पश्चाद्रिरंसवश्चेत्तदा तेषामवराः हीनवर्णाः इमाः क्षत्रियाद्याः क्रमेण भार्य्याः स्मृताः । तथा च याज्ञवल्क्यः—

तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।

ब्राह्मणक्षत्रियविशां भार्य्या स्वा शूद्रजन्मनः ॥ इति ॥

मनुरपि

शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते ।

ते च स्वा चैव राज्ञः स्युः ताश्च स्वा चाग्रजन्मनः । इति ।

युगभेदेन व्यवस्था च स्मृत्यन्तरे स्पष्टीकृता—

असवर्णासु कन्यासु विवाहश्च द्विजातिभिः । इत्यादिकमनुक्रम्य "कलौ युगेत्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः । इत्युपसंहारात् ।" इति ।

एवं च कलियुगे असवर्णायाः पाणिग्रहणं प्रतिषिद्धम् तथा सवर्णाया विवाहो निरवद्यत्वेन सर्वथा निर्बाधः । सर्वप्रदेशीयाश्च ब्राह्मणाः परस्परं समानवर्णास्तेषु विभिन्नप्रदेशीयत्वेऽपि सजातीयेभ्यः कन्याया दानं प्रतिग्रहश्च न शास्त्रविरुद्ध इति पर्य्यवस्यति ।

ननु

भार्य्याः सजात्याः सर्वेषां धर्मः प्राथमकल्पिकः ।

इति वीरमित्रोदयधृतयमवचनेन समानजातीया एव विवाह्या इति प्रतीयते ।

सारस्वताः कान्यकुब्जा गौडमैथिलकोत्कलाः ।
पञ्च गौडा इति ख्याता विन्ध्यस्योत्तरवासिनः ॥
कर्णाटाश्चैव तैलङ्गा गुर्जरा राष्ट्रवासिनः ।
अन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः ॥

इति आनन्दभट्टकृतवल्लालचरिते शब्दकल्पद्रुमे वाचस्पत्ये च समुद्धृतायां स्कन्दपुराणीयवचनाभ्यां सारस्वतत्वादयो ब्राह्मणत्वावान्तरजातयः । यथा गोपत्वादयः शूद्रत्वावान्तर जातय इति प्रतिभाति । एवं सति यथा गोपनापितयोः समानेऽपि शूद्रत्वे अवान्तरजातिभेदात् परस्परमुद्वाहसम्बन्धो न भवति तथा सारस्वतकान्यकुब्जादीनामपि ब्राह्मणत्वे समानेऽपि परस्परमवान्तरजातिभेदादुद्वाहो नैव भवितुमर्हति । इदानीन्तनानां शिष्टानां व्यवहारोऽपि तादृशो दृश्यत इति चेत् ।

अत्र समाधीयते—

गोपनापितादीनां सत्यपि समाने शूद्रत्वे जन्मकर्मभ्यामवान्तरजातिभेदः शास्त्रमर्यादयाऽवगम्यते । तथाच पराशरः—

शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः ।
संस्कारात्तु भवेद्दासः असंस्कारात्तु नापितः ॥
क्षत्रियात् शूद्रकन्यायां समुत्पन्नस्तु यः सुतः ।
स गोपाल इति ज्ञेयः । इति—

(प० स्मृ० प्र० का० ११, २२—२३)

याज्ञवल्क्याचाराध्याये १, १६६ तमश्लोकव्याख्यानावसरे मिताक्षरायामप्युक्तम् ।

"गोपालो गवां पालनेन यो जीवति । नापितो गृहव्यापारकारयिता ।" इति ।

सारस्वतकान्यकुब्जादीनां ब्राह्मणानां पुनः सरस्वतीतटादिदेशविशेषवासनिबन्धनः संज्ञाविशेषो नतु वास्तवजातिभेदप्रयोजको जन्मकर्मभेदोऽस्ति । सर्वदेशीयानामेव ब्राह्मणानां वात्स्यगौतमवसिष्ठभरद्वाजप्रभृतय ऋषयो वंशप्रवर्त्तकाः समाना एव । तेषां संस्काराश्च समानाः कर्माण्यपि यजनयाजनादीनि शास्त्रविहितानि समानानि । एवं च सारस्वतादिषु तेषां पूर्वजानां जन्मदेशद्योतकसंज्ञाभेद एव नावान्तरजातिभेद इति पर्य्यवसितम् । तथाच सर्वदेशीयानां ब्राह्मणादीनां भिन्नदेशीयैः सजातीयैः स्वान्तर्गणाप्रविष्टैः ब्राह्मणोचितसदाचारसंपन्नैः सारस्वतकान्यकुब्जादिभिः शास्त्रोक्तसमानगोत्रप्रवरादिवर्जनपुरःसरं परस्परं विवाहसम्बन्धः सर्वथा धर्मशास्त्रानुमोदित एवेति प्रतिभाति । कालविपर्ययराज्यविपर्ययजन्यदोषैर्पीडिताः द्विजाः स्वल्पकालेन विभिन्नप्रदेशप्राप्तिप्रयोजकानां यानादीनामभावेन च दूरदेशेषु सम्बन्धं नाचरन्ति स्म । तदनुसारेण गतानुगतिकन्यायेनाधुनातना अपि सारस्वतकान्यकुब्जादयो ब्राह्मणाः परस्परं परिणयनसम्बन्धं नैव कुर्वन्तीति न तेन—

"स्नात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम्"
"उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्"

इत्यादि विधिवाक्यस्थं सवर्णापदं सङ्कोचमर्हति । स्वानुकूलश्रुतिस्मृत्योरभावे व्यवहारस्य निर्मूलत्वेन तेन विधिसङ्कोचस्यान्याय्यत्वात् । श्रुतिस्मृत्यविरोध एव शिष्टाचारः प्रमाणं नान्यथा । यदुक्तं भट्टपादैस्तन्त्रवार्त्तिके शिष्टाचाराधिकरणे ।

शिष्टं यावत् श्रुतिस्मृत्योस्तेन यत्र विरुद्ध्यते ।
तच्छिष्टाचरणं धर्मे प्रमाणत्वेन गम्यते ॥
यदि शिष्टस्य कोपः स्याद्विरुद्ध्येत प्रमाणता । इति ।

ईदृश्यां स्थितावपि "समानशीलव्यसनेषु" इति न्यायं स्वसदृशाचारेष्वेव कुलादिषु कृतः परिणयादिसम्बन्धः सुखोदर्को भवतीति स्वानुकूलसाचारादिकं सम्यगनुसन्धाय सम्बन्धो विधेयः । यद्यपि सारस्वतकान्यकुब्जादीनां ब्राह्मणानां देशान्तरीयैर्ब्राह्मणैरुद्वाहसम्बन्धः कर्त्तव्य एवेति नियमो नास्ति हेत्वभावात् तथापि येभ्य एतादृशः सम्बन्धो रोचते तैरीदृशि सम्बन्धे कृतेऽपि मुनिवचनविरोधो न भवतीति प्रतिभाति ।

कामशास्त्रीयो ग्रन्थविस्तरः ।

ले०—रामचन्द्रशास्त्री, कुशलः ।

[कामस्य स्वरूपादिनिरूपणं "कामः" इति शीर्षकेण निबन्धेन प्राक् कस्मिंश्चित् सुप्रभाताङ्के विहितम् । साम्प्रतं कामशास्त्रीयं ग्रन्थविस्तरमधिकृत्य किञ्चिल्लिख्यते ।]

इतरसूक्ष्मविषयाणामिव कामस्यापि यादृक् सूक्ष्मं विशकलनं गम्भीरं मननं च नः पूर्वैरात्मविदां वरिष्ठैर्महर्षिभिः कृतम्, न तादृगखिलधरणिमण्डलं केनापि कर्तुं पार्यते । आर्यशास्त्रकारैर्य एव विषयो विवेक्तुमुपात्तः स तथा निपुणं गम्भीरं विशदं चाऽनुसंहितो यथा स्वतन्त्रशास्त्ररूपतां गमितः । "कन्दुकतन्त्रम्" अत्र रमणीयं निदर्शनम् । केवलं कन्दुकक्रीडनमधिकृत्य तद्भेदप्रभेद—तत्प्रयोग परिपाटीप्रभृतेस्तथा वैशद्येन परिकल्पना कृता ; यथा कन्दुकतन्त्राख्यं पृथगेव शास्त्रं समुपन्नम् । कामस्तु पुरुषार्थान्यतमः इति तन्निरूपण-परिकल्पनायाः शास्त्रत्वं सुव्यवस्थितमेव । तदिदं कामशास्त्रमपि पुरुषार्थप्रतिपादकतया धर्मशास्त्रादीतरशास्त्रसमकक्षम् । नह्येतज्ज्ञानमन्तरेण कामाख्यतृतीयपुरुषार्थसार्थकीकरणं संभवि ।

अतएव आदौ तावत् सकलज्ञानविज्ञाननिधिना भगवता वेदेनैव जगतां हिताय कामशास्त्रीयो विषयः सूत्ररूपेण प्रकटीकृतः । तथाहि—

"कामस्तदग्रे समवर्तताधिमनसो रेतः प्रथमं यदासीत् ।" "स तपस्तप्त्वा मैथुनमैच्छत्" "सोऽनुवीक्ष्य नाऽन्यदात्मनोऽपश्यत् । स वै नैव रेमे । तस्मादेकाकी न रमते । स द्वितीयमैच्छत् । सहैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ । स इममेवात्मानं द्वेधाऽपातयत् । ततः पतिश्च पत्नी चाऽभवताम् । तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यः । तस्मादयमाकाशः स्त्रिया पूर्यत एव तां समभवत्ततो मनुष्या अजायन्त ।" (बृहदा० उप०)

" उपोप मे परामृश मा मे दभ्राणि मन्यथाः । सर्वाऽहमस्मि लोमशा गान्धारीणामिवाविका ॥"

"जायेव पत्य उशती सुवासाः ।"
यस्यामुशन्तः प्रहराम शेफम् ॥" (ऋग्वेद)

" योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद् यदुपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दाः स्फुलिङ्गाः ॥ तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति ।" (छान्दोग्योपनिषद्)

" योनिरुदूखलं···शिश्नं मुसलम् ।"

"अरत्निमात्राद्धि वृषा योपामुपशेते ॥"

"पश्चाद्वै परीत्य वृषा योपामधिद्रवति तस्यां रेतः सिञ्चति ।" (शतपथ ब्राह्मणे)

"तस्मात् पुमान् दक्षिणतो योपामुपशेते ।"

—जैम० उप

"ता उभौ चतुरः पदः संप्रसारयाव स्वर्गं लोके
प्रोर्णुवाथां वृषा वाजी रेतोधा रेतो दधातु"

इत्यादि (यजु० २३।२०)

ततो भगवन्तं वेदमुपजीव्य प्रजापतिना ; तमनु नन्दिश्वेतकेतुबाभ्रव्यादिभिराचार्यैः साक्षात्कृतसूक्ष्मातिसूक्ष्मतत्त्वैः सुपरिकल्प्य प्रोक्तं 'कामशास्त्रम्' सुबृहच्छास्त्ररूपतां प्राप्तम् । तदेव कालक्रमेण

त्सन्नकल्पतां गतं दृष्ट्वा मल्लनागाख्यो * वात्स्यायनमुनिः संक्षेपेण सप्तभिरधिकरणैः प्रति संस्कृतवान्। ततस्तदुपजीव्य तदा तदोपलभ्यमानानितरप्रबन्धांश्चाश्रित्य विद्वद्भिः परःशताः कामागमग्रन्था निरमीयन्त। तत्र इतरशास्त्राणामिव कामशास्त्रस्यापि भूयाँसः प्रबन्धाः करालकालकवलं प्राप्ताः। अवशिष्टाः प्रकाशिताः, अप्रकाशिताः, (तत्तद्ग्रन्थेषु नामग्राहमुदाहृताश्च) ये उपलभ्यन्ते, तेषां नामानि अधस्तात् प्रकाश्यन्ते-

(१) कामसूत्रम्—श्रीवात्स्यायनमुनिकृतम्, अद्यत्वे सकलकामागमस्य मूलभूतं मौलिभूतञ्च।

अनूदितमिदं यूरोपीयभाषास्वपि। अस्य यशोधरकृता जयमङ्गला भास्करनृसिंहकृता वृत्तिश्चेति टीकाद्वयं वर्तते।

(२) रतिरहस्यम्—श्रीकोक्कोकपण्डितकृतम्, श्रीकाञ्चिनाथकृतरतिरहस्य-दीपिका टीकायुतम्, रामचन्द्रबुधेन्द्रकृतरतिरहस्य-प्रकाशिकाटीकायुतं च। कामसूत्रादनन्तरमस्य स्थानम्। भारतीयकामागमसाहित्ये द्वितीयं पदमलङ्करोति ग्रन्थरत्नमिदम्। एतत्कर्तुः—श्रीकोक्कोकपण्डितस्यैव नाम्ना साधारणजनेषु कामशास्त्रस्य "कोकशास्त्रम्" इति संज्ञा प्रचारमापन्ना। यूरोपीयभाषास्वप्यस्यानुवादो जातः।

(३) नागरसर्वस्वम्—बौद्धभिक्षुणा श्रीपद्मश्रिया विरचितम्, अनेकैः कामसूत्रादिष्वनुपलभ्यमानैर्विषयैरनुगतम्, नेपालराज-श्रीजगज्ज्योतिर्मल्ल-कृतटीकया, श्रीतनुसुखरामत्रिपाठिकृतटिप्पण्या च सहितम्।

(४) पञ्चसायकः—श्रीज्योतिरीश्वरकविशेखरविरचितः। अस्याप्येका "पञ्चसायकविवृति" नाम्नी टीका विद्यते।

(५) अनङ्गरङ्गः—श्रीकल्याणमल्लकृतः। अस्यापीङ्गलिशभाषायामनुवादो जातः।

(६) शृङ्गारदीपिका—श्रीहरिहरकृता रतिरहस्यापराख्या (अन्तिमपरिच्छेदद्वयमपहाय सम्पूर्णा मुद्रिता)।

(७) रतिशास्त्रम्—श्रीनागार्जुनकृतम्।

(८) रतिमञ्जरी—श्रीजयदेवकृता।

(९) कन्दर्पचूडामणिः—श्रीवीरभद्रदेवनृपतिकृतः (अयं श्रीरीवांनरेशाज्ञया १९०८ खिस्ताब्दे भाषानुवादसहितः प्रकाशितोऽभूत)। अस्यैकं संस्करणं (मूलमात्रं) बम्बईतः "आयुर्वेदग्रन्थमालायाम्" प्रकाशितम्, अपरंच मोतीलाल बनारसीदास (पञ्जाब-संस्कृत-पुस्तकालय, सैदमिट्ठा बाजार, लाहौर) इत्यतयोरनुरोधात् विस्तृतटिप्पण्या सहितं मया संपादितम्।

(१०) रतिरत्न—प्रदीपिका—मैसूरराजश्रीदेवराजकृता।

*मल्लनाग इति सांस्कारिकी संज्ञा, वात्स्यायन इति गोत्रनाम। "कामसूत्रविन्यास इव मल्लनागघटितः" इति वासवदत्तायां विन्ध्यगिरिवर्णने श्लेषः। "मल्लनागेन मुनिविशेषेण पक्षे गजविशेषेण, घटितो रचितो युक्तश्च। "मल्लनागोऽभ्रमातङ्गे वात्स्यायनमुनावपि" इति विश्वः।" इति दर्पणाख्यायां तट्टीकायां शिवरामः।

(११) कुट्टिनीमतम्—श्रीदामोदरगुप्तकृतम्।

(१२) समयमातृका—क्षेमेन्द्रकृता।

(१३) धूर्तविटसंवादः—(भाणः) श्रीमदीश्वरदत्त-प्रणीतः। उल्लिखिताः सर्वे ग्रन्था मुद्रिताः। तत्रान्ते निर्दिष्टं ग्रन्थत्रयं (श्रव्य-दृश्य) काव्यरूपमपि कामशास्त्रीयमेव विषयं विशदीकरोतीति कामशास्त्रस्यैवान्तःपाति।

सम्प्रति ते ग्रन्था अधोनिर्दिश्यन्ते येऽद्यावधि मुद्रणं न प्राप्ताः, तत्रापि केचित्सम्पूर्णा उपलभ्यन्ते, केचित् खण्डिताः, केचिच्च कतिपयपत्रावशेषा एव), ये च तत्तद्ग्रन्थेषु प्रमाणत्वेन धृता अपि साम्प्रतं नोपलभ्यन्ते—

(१४) अनङ्गतिलकम्—(अज्ञात-कर्तृनामकम्)।

(१५) अनङ्गदीपिका (कर्तृनाम न ज्ञायते)। ग्रन्थस्यास्य एका हस्तलिपिः श्रीराजेन्द्रलालमित्रेणोपलब्धाऽभूत् (Bikaner Selection 531).

(१६) अनङ्गशेखरः।

(१७) कामसमूहः—अनन्तकविकृतः, नागरसर्वस्वटिप्पण्यामुदाहृतः।

(१८) कलावादतन्त्रम्—श्रीगौरीकान्तसार्वभौमकृतटीकोपेतम्।

(१९) कलाशास्त्रम्—श्रीकोक्कोककृतम्।

(२०) कामप्रकाशः।

(२१) कामप्रदीपः—श्रीगुणाकरकृतः।

(२२) कामप्रबोधः—एतन्नामकं पुस्तकद्वयमस्ति एकं बहरामपुरीयबाबूराधिकाप्रसादसेनसकाशात् अपरं च बीकानेरपुस्तक संग्रहात् (Bik. 532) श्रीराजेन्द्रलालमित्रेण लब्धम्। तत्राद्यं पुस्तकं श्रीमहाराजानूपसिंहधर्मपत्न्या रचितमाख्यायते। "इति श्रीमन्महाराजाधिराज श्रीमहाराजाऽनूपसिंह देवीये कामप्रबोधे बाह्यसम्भोगप्रकारविवेको नाम नवमः प्रकाशः। ग्रन्थोऽयं पूर्तिमगात्। संवत् १८९२। माघमासः।" इति तत्समाप्तौ लेखो दृश्यते। द्वितीयस्य तु कर्तृप्रभृति न ज्ञायते।

(२३) कामसारः—कामदेव कृतः, केवलं सप्तपत्रात्मकः। रतिकल्लोलिन्यां मनोजनिमनोभूप्रभृति शब्दैरुक्तः कामदेवः अयमेव वा अन्यो वेति न निश्चयः।

(२४) कौतुकमञ्जरी (नवीनाचरितकथनम्)—अस्यैका अत्यशुद्धा वङ्गाक्षरलिखिता १०६ श्लोकात्मिका हस्तलिपिः श्रीराजेन्द्रलालमित्रेण लब्धाऽभूत्। कर्तृनाम नोपलभ्यते।

(२५) पद्यमुक्तावली—श्रीघासीरामेण स्वीये रसचन्द्रे उदाहृतेयम्। अत्र कामशास्त्रसम्बद्धान्येव पद्यानि वर्तन्ते।

(२६) मदनसञ्जीविनी।

(२७) मदनार्णवः—अज्ञातकर्तृनामकश्रीराजेन्द्र—लालमित्रेण बीकानेरपुस्तकालये लब्धोऽभूत्।

(२८) मदनोदयः—कुट्टनीमतकृता १२३ आर्यायामुदाहृतः, कन्दर्पचूडामणिकृता च (१।२।१५)··· मदनोदय इत्थमाम्नातम्, इति प्रमाणत्वेनोपन्यस्तः। समनन्तरमेव च "श्रीमल्लक्ष्मणदेवः कथयति

तत्रैव न च वैशिष्ट्यम् ।" इत्युक्त्या श्रीमल्लक्ष्मणदेव एवैतत्कर्ता भवेत् । अस्मात् समुद्धृत एकः श्लोको राघवभट्टेन शाकुन्तलटीकायाम् (१।२६) ।

(२९) रतिरहस्यम्—श्रीविद्याधरकविकृतम् । अत्र ६४ पत्राणि १००० श्लोकाः सन्ति । दृश्यतामस्योल्लेखः—"Oudh VIII, २०" इत्यत्र ।

(३०) रतिरहस्यम्—शृङ्गारदीपिकापराख्यम्, श्रीहरिहरकृतम् । प्रथमः परिच्छेदः पूर्णः द्वितीयस्य केवलं ५६ श्लोका उपलभ्यन्ते, अस्यानेकाः टीकाः सन्ति ।

(३१) रतिरहस्यटीका । (Appert 6, 160) ।

(३२) रतिरहस्यव्याख्या—रामचन्द्रसूरिकृता ।

(३३) रतिविलासः—"तत्सिद्धयेरतिविलासमतोऽभिधास्ये" इति मल्लकोशे उक्तः ।

(३४) रतिसङ्ग्रहव्याख्या—(Appert 2777) ।

(३५) रतिसर्वस्वम्—अस्य ।

"एकवारावधिर्यामो रतस्य परमो मतः ।
चराऽशक्तिमतोर्यूनोरुत्कटकमवर्तिनोः ॥"

इति श्लोको मेघदूत व्याख्यायां श्रीमल्लिनाथेनोद्धृतः

(३६) रतिसारः—३७ पृष्ठात्मकः, ४०० श्लोकात्मकश्च ।

(३७) वाजीकरणतन्त्रम् ।

(३८) वात्स्यायन सूत्रसारः—श्रीक्षेमेन्द्रेण विरचितः, यस्याधोनिर्दिष्टः श्लोकस्तेनैव स्वकृतायाम् 'औचित्यविचारचर्चायामुद्धृतः—

"कामः कामं कमलवदनानेत्रपर्यन्तवासी
दासीभूतत्रिभुवनजनः प्रीतये जायतां वः ।
दग्धस्यापि त्रिपुररिपुणा सर्वलोकस्पृहार्हा
यस्याधिक्यं रुचिरतितरामञ्जनस्येव याता ॥" इति ।

(३९) वेश्याङ्गनाकल्पः—(Appert 6220)

(४०) वेश्याङ्गनावृत्तिः ।

(४१) शृङ्गारपद्धतिः—शार्ङ्गधरकृता (बीकानेर पुस्तकालये ५३४) (इयं शार्ङ्गधरपद्धतिरेव शृङ्गारपद्धतिर्भवेत्) ।

(४२) शृङ्गाररसदप्रदीपः ।

(४३) शृङ्गारमञ्जरी—तेलगूलिप्यां १०० पृष्ठात्मिका तंजोरराजस्य शाहजीनाम्नः शासनकाले (वैक्रम १८ शताब्द्याम्) निर्मिता ।

(४४) शृङ्गारसारिणी—श्रीचित्रधरकृता ।

(४५) समर (S) कामदीपिका—विष्णवंगिरःकृता, ३०० श्लोकात्मिका ।

(४६) सुरतोत्सवकामशास्त्रम् ।

(४७) स्त्रीविलापः—देवेश्वरकृतः १४५ पृष्ठात्मकः ।

(४८) स्मरतत्त्वप्रकाशिका—(५ श्लोकात्मकस्य स्मरतत्त्वाख्यपुस्तकस्य टीका) रेवणाराध्यकृता ।

(४९) स्मरदीपिका—रुद्रकृता, नागरसर्वस्वटिप्पण्यामुदाहृता ।

(५०) स्मरदीपिका—गर्गाचार्यमुनिकृता ।

(५१) स्मरदीपिका—मीननाथकृता, नागरसर्वस्वटिप्पण्यामुदाहृता ।

(५२) स्मररहस्यव्याख्या ।

(५३) कामप्राभृतम्—केशवकृतम् ।

(५४) कामानन्दः—वरदार्यकृतः ।

(५५) रतिचन्द्रिका—श्रीहरिहरकृता ।

(५६) रतिदर्पणः—श्रीहरिहरकृतः ।

(५७) पञ्चाङ्गयुद्धप्रपञ्चभाणः—कामशास्त्रीयविषयवर्णनोपनिबद्धः ।

(५८) रसरत्नाकरः । अस्मात्—

"प्रेमाभिलाषो रागश्च स्नेहः प्रेमा रतिस्तथा ।

शृङ्गारश्चेति सम्भोगः सप्तावस्थः प्रकीर्तितः ॥"

इत्यादि सार्धपद्यत्रयं श्रीमल्लिनाथेन (६।७१) किरातार्जुनीयटीकायामुद्धृतम् ।

(५९) कालिकान्ताकौतुकम् ।

(६०) मन्मथसंहिता—अस्या एका हस्तलिपिः 'डी.ए.वी.कालेज, लाहौर' सम्बद्धानुसन्धानविभागपुस्तकालये विद्यते ।

(६१) रसिकजनमनोल्लासिनी ।

(६२) शृङ्गाररतिलकभाणः ।

(६३) शृङ्गारामृतलहरी ।

(६४) कामशास्त्रम्—(माधवकृतायुर्वेदप्रकाशस्थः कामशास्त्राध्यायः) ।

(६५) मदनसाम्राज्यभाणः ।

(६६) रसिकसर्वस्वम् ।

(६७) विवेकविलासः—अस्मात्

"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।

तत्तद्दिष्टविधानेनानुकाल्यां स्त्री विचक्षणैः ।"

इति श्लोको नित्याचारदीपिकायामुदाहृतः ।

(६८) रतिकल्लोलिनी—सामराजदीक्षितकृता ॥

(६९) दीनालापनिकाशुकसप्ततिः—नागरसर्वस्वटिप्पण्यामुदाहृता । अत्र चतुरशीतिबन्धानां कामशास्त्रीयविषयान्तराणां च विस्तरेण वर्णनमस्ति ।

(७०) पञ्चसायकविवृतिः (पञ्चसायकस्य ज्योतिरीश्वरकृतस्य व्याख्या) ।

(७१) नागरवल्लभः ।

(७२) कादम्बरस्वीकरणसूत्रम् ।

(७३) कादम्बरस्वीकरणकारिका ।

(७४) नर्मकेलिकौतुकसंवादः ।

(७५) कामतन्त्रम्—महेश्वरकृतम् । पञ्चसायके निर्दिष्टम् ।

(७६) रतकरणम् ।

(७७) मदनविनोदः ।

(७८) रतिरञ्जनम् ।

(७९) रतितरङ्गः ।

(८०) भावाकोकसारमञ्जरी—हिन्दीभाषायां दोहादिच्छन्दोरचिता) आनन्दकविकृता । अस्या एकालिपिर्मदीये पुस्तकसंग्रहे वर्तते ।

(८१) विचित्रकाव्यम् सहेदिताहरनाम्ना कविना हिन्दीभाषायां दोहादिच्छन्दोभिरयं ग्रन्थो रचितः ।

अत्र विविधाः कामशास्त्रविषयाः विशदं निरूपिताः सन्ति । अस्यैका हस्तलिपिः कतिपयाद्यपृष्ठरहिता मदीये पुस्तकसंग्रहे वर्तते 'या केनापि कस्यापि शिवदत्ताख्यपुंगहितस्यार्थे १७३५ विक्रमाब्दे लिखितेति संवत् "१७४५ वर्षे चैत्र सुदि राम

नवम। भृगुवासरे वैशाख प्रविष्टे इति लिखितं पुरोहित शिवदत्तार्थम् ।' तत्समाप्तिलेखाज्ज्ञायते ।

(८२) प्रवाणसागराख्यभाषा (हिन्दी) काव्यगतं स्त्रीभेदचन्द्रकलाप्रभृतिवर्णनपरं कामशास्त्रीयं प्रकरणम् ।

(८३) कुचिमारसंहिता—इयमपि मुद्रिता अत्र कामशास्त्रीयोपनिषदिकप्रकरणसम्बद्धाः केचिद् योगाः सन्ति ।

(८४) गुणपताका—सत्प्रकृतीनां लक्षणमभिहितमधिकं च गुणपताकायाम् ।' (४।७) इति,

'उक्तं गुणपताकायामनुरागेङ्गितञ्चयत् ।" (४।२६) इति च

रतिरहस्ये प्रमाणत्वेनोपन्यस्तम् ।

(८५) कामावतारः—नागरसर्वस्वटिप्पण्यामुदाहृतः ।

एवं नन्दिबाभ्रव्यादिभिराद्यैः प्रोक्तानि कामशास्त्राण्यपि कामसूत्रादिषु तत्र तत्र प्रमाणत्वेनोपन्यस्तानि नाद्यत्वे लभ्यन्ते । तत्र बाभ्रवीयं कामशास्त्रं जयमङ्गलाकारेण दृष्टमिति तेन बाभ्रवीयश्लोकानां जयमङ्गलायाम् (२।१) (५।४ उद्धरणात् प्रतीयते । गोनर्दीयं कामशास्त्रं-मल्लिनाथसमये स्थितमिति रघुवंशस्य (१६।१६, २६,३२) कुमारसम्भवस्य (७।६५) च टीकायां तेन गोनर्दीयश्लोकानामुद्धारणाज् ज्ञायते । (नारायण पण्डितेनापि कुमारसम्भवविवरणे गोनर्दीयाः श्लोका उदाहृताः सन्ति) । जयमङ्गलाकारेण वैशिकप्रवक्तुः श्रीदत्तकाचार्यस्य वैशिकसूत्रमपि दृष्टमिति " आण्ड संप्लवे विशिष्टग्रहणम् इति दत्तकसूत्रस्पष्टार्थं सूत्रान्तरमाह-प्रतिमणिकानामिति । (६।३)" इति तत्कृतेन श्रीदत्तकसूत्रोद्धरणेनावगम्यते ।

"संक्षेपादिति नन्दिकेश्वरमतात्तत्वं किमप्युद्धृतम्, गोणीपुत्रकभाषितोऽयमधुनासंक्षिप्यते विस्तरः ॥"

(२।५)

इति रतिरहस्यकारस्य वचनात् तेन नन्दिप्रोक्तं गोणिकापुत्रीयं च कामशास्त्रं दृष्टम् इति ज्ञायते । अस्मादेव च नन्दिकर्तृककामसूत्रप्रवचनाख्यानं "महादेवानुचरश्च नन्दी…" इत्यादि (कामसूत्रारम्भे) काल्पनिकं न वस्तुसदिति केषाञ्चिदुक्तिः परास्ता भवति ।

"दृष्ट्वा मन्मथतन्त्रमीश्वरमतं………श्रीनन्दीश्वर-रन्तिदेवभणितं………तेनाऽकल्प्यत पञ्चसायक इति प्रीतिप्रदः कामिनाम् ।' इति पञ्चसायककारोक्तिरप्यत्रार्थे प्रमाणम् ।

कामसूत्रेनिर्दिष्टान्, रतिरहस्यादिनतत्तद्ग्रन्थकर्तृतया प्रसिद्धांश्च कामशास्त्रप्रणेतॄनपहाय महेश्वरमूलदेवरन्तिदेवपुरूरवोभरतदण्डियोगिराड्बादरायणचन्द्रमौलिकात्यायनकर्णीसुतलक्ष्मभागुरिमनोभूकुण्डभाष्यकारमुनीन्द्रराजपुत्राद्योऽन्ये कामशास्त्रप्रणेतारस्तत्तद्ग्रन्थेषु प्रमाणतया निर्दिष्टाः सन्ति, येषां कृतयोऽद्यत्वे नामतोऽपि न श्रूयन्ते । एषु महेश्वरमुनीन्द्रौ (३४ । २ । १-३) नागरसर्वस्वे (अयं मुनीन्द्रोवात्स्यायनाद्भिन्नः) मूलदेवरन्तिदेव (१।३) चन्द्रमौलयः (४।२) पञ्चसायके. कात्यायनः सम्पुटकलक्षणे जयमङ्गलायाम्, कर्णीसुतः (४।२१) रतिरहस्ये, लक्ष्मभागुरिमनोभूभाष्यकारकुण्डिनो रतिकल्लोलिन्याम्, भाष्यकारोऽयं कश्चिद्वात्स्यायनीयकामसूत्रभाष्यकारो वा अन्यकामशास्त्रभाष्यकारोवेति न निश्चयः, राजपुत्रः (७७ आर्यायाम्) कुट्टनीमते (अयं कस्यचित कलाशास्त्रग्रन्थस्यापि प्रणेता, स्मृतश्चायं पालकाप्यीये हस्त्यायुर्वेदे (३।८।६६), अवशिष्टाश्च श्रीदेवीदत्तपराजुलीत्याख्येन काशीमुद्रितस्यर.तरहस्यस्य भूमिकायां निर्दिष्टाः सन्ति ।

राजनैतिकी परिस्थितिः ।

(लेखकः—श्रीयज्ञनारायण उपाध्यायः एम. ए., एल्-एल्. बी., एल्. टी., काव्यतीर्थः)

संसारोऽयं कीदृग्विचित्राभिनयशाला, यत्र काले काले नैकानि नाटकान्यभिनीतानि । तस्यावस्था एकरूपेण न तिष्ठति । ह्यो राजनीतेरेकं रूपमद्य अपरं रूपम् । समस्तस्य भूमण्डलस्य कथा तु दूरमास्ताम्, केवलस्य भारतस्य शासनव्यवस्थायां यदि सिंहावलोकनं कुर्मः, तथापि विस्मयान्न विमुच्यामहे ।

प्राचीनतमसमये यदा कापि व्यवस्थानासीत् तदा बलिनो दुर्बलान् बाधेरन्नेव । सर्वे मनुष्याः स्वच्छन्दतया स्वाभिमतं कार्यं कुर्वन्त एव स्युः । न्यायशासनादीनामुत्तरदायित्वं कस्यापि शिरसि न निक्षिप्तं भवेत् । तस्यामवस्थायां बलिभिर्बाध्यमाना दुर्बला आत्मरक्षार्थं स्वीयसमाजरक्षार्थं च कमपि बुद्धिबलशालिनं स्वनायकं ध्रुवमाश्रयेयुः । पुरा आर्यावर्त्तप्रदेशे, आर्या ये भूतले सर्व प्रथमसभ्या भवन्ति, तेषु प्रथमम् इयं प्रथा प्रचचाल, यत् कुटुम्बस्य एकैके पुरुषास्तदधीश्वरस्य आदेशवशवर्त्तिन आसन् । कुटुम्बेषु शात्रवसौहार्दयोरवस्थितिः स्वाभाविक्येव । अतएव आवश्यकतायामुपस्थितायां बहवः कुटुम्बिनः प्रबलेन केनचिदेकेन स्थानान्तरवासिना रिपुणा पीड्यमानाः परस्परं संघट्य अभिषेणयन्तिस्म । इदमेव ग्रामसंघटनस्यापि बीजं भवितुमर्हति । गच्छता च कियता कालेन शासनसुव्यवस्थासम्पत्तये कंचन बलबुद्धिशालिनं नायकं निश्चिक्युरेव । सहकारावश्यकतायां केचन मन्त्रिणोऽपि नियुक्ताः । विभागानां बाहुल्याद् बहवो विभागाधिपतयोऽप्येवमेव अभूवन् । एवमेव च राजसभा प्रतिदिनमेधमाना प्रजासत्ता च हीयमाना भवेत् ।

रामायण-महाभारत-बौद्धकालीनेतिहासानुशीलनात् राजकीयशासनप्रणाली, तदीया बहवो विभागाश्च अवगम्यन्ते । यवनानां साम्राज्यकाले चलन्ती भारतीया राजव्यवस्था नष्टभ्रष्टैव समभूत्, यतस्ते देशाद् धनमपहृत्य, मन्दिराणि विनाश्य, धर्ममुपप्लाव्य, पुस्तकालयाँश्च निर्दाह्य, अहर्दिवमस्वास्थ्यमेव चक्रुः ।

यवनानां ह्राससमये च भारतस्य दक्षिणभागे विभागान्तरे च छत्रपतिशिवाजीप्रभृतयो राजानः समभूवन्, तेषां राज्यव्यवस्थापि प्रायेणसमीचीनैवासीत् । किन्तु तेषां राजव्यवस्थावर्णनविस्तराद् वयमिदानीमुदास्महे । भारतवर्षस्य आन्तरिककल-

हात्तदीयात्यधिकधनधान्यसम्पत्तिलोलुपत्वाच्च बहवः पाश्चात्यसङ्घाः व्यापारमपदिश्य इहाजग्मुः। किन्तु तेषु आंग्ला एव कृतकार्या बभूवुः। खृष्टस्य १८५७तमवर्षात्पूर्वं शासनव्यवस्था संघाधीनैवासीत्। ततो विद्रोहे प्रशमिते व्यक्तोर्जा प्रथमं सम्राट् पदमध्यरोहत्। तदा भारतीय-व्यवस्थासंचालनार्थं सपरिषद् भारतमन्त्री नियोजितः। अनेन क्रमेण एकोनविंशशतकोत्तरार्द्धे प्रशान्ते भारते, शिक्षायां प्रचारितायाम्, शासनसुधारान्दोलने समुज्जृम्भिते, १८८४-तमे संवत्सरे राष्ट्रीयमहासभाऽसर्जि। इदानीं देशे शासनप्रबन्धार्थं राजप्रतिनिधिः, तस्य सहायकाः, यत्र कुत्र कार्यकारिणी समितिः, नाममात्रेण व्यवस्थापकसभा चासीत्। लोकमतग्रहणार्थं कश्चिदपि प्रबन्धो नासीत्। १९०८-तमेऽब्दे व्यवस्थापकसभायाः कियान् संस्कारोऽभूत्, भारतीयानां सदस्यसंख्यापि वर्धिता। तदनन्तरं च योरपीयमहायुद्धावसाने १९१९-तमे वत्सरे भारतराज्यव्यवस्थानियमो रचितः, अथ च भारते बृहतो बृहतः प्रान्तस्य शासनार्थमेको गोवरनरः, तदधीना कार्यकारिणी समितिः, व्यवस्थापकसभा च कृता, यस्यां भारतीयानां संख्या अधिका मतग्रहणप्रबन्धश्च विस्तरेण निर्मितः प्रान्तीयविभागश्च हस्तान्तरितसुरक्षितरूपेण द्विधा कृताः। संरक्षितविभागे राजकरः, अकालनिवारणम्, राजपुरुषाः, कारागारप्रबन्धादयः, सार्वजनिकस्वास्थ्यम्, शिक्षा, कृषिजीविचिकित्सा, सहकारिसंस्था, राजपथादयः सन्ति। संरक्षितविभागाः कार्यकारिणीसदस्याधीनाः, हस्तान्तरितविभागाश्च मन्त्रिणामधीनाः। प्रत्येकं प्रान्ते च सदस्यानां संख्या नियता। यथा संयुक्तप्रान्ते यवनेतरेषां संख्याः षष्टिः, यवनानां च एकोनत्रिंशत्, पाश्चात्यानामेका, भूस्वामिनां षट्, प्रयागविश्वविद्यालयस्यैका, औद्योगिकसंस्थायाः त्रयः, राजकीयाः षोडश, विशेषश्रेणीनां सप्त, एवं १२३। इयं सभा प्रान्तस्य शासननियमं रचयति।

सम्पूर्णभारतार्थं परिषद्द्वयी, एका भारतीयव्यवस्थापिका सभा, यदीयाः सदस्याः १४०। द्वितीया राज्यपरिषद्, यदीयाः सभ्याः षष्टिः। अनयोः समस्ता भारतवर्षीयविषयाः प्रविष्टाः। यथा स्थलसेना, जलसेना, वाह्यतदितरदेशानां सम्बन्धः, लवणः, बाष्पयानम्, डाकतारविभागः, मनुष्यगणनादयः। राष्ट्रपरिषदं विहाय सर्वासां समितीनां नवीनप्रबन्धः प्रतितृतीयवर्षं भवति राष्ट्रपरिषदश्च प्रतिपञ्चमवर्षम्। एतेषां सुधाराणां प्रबन्धस्यायमभिप्रायो यद्देशस्य प्रबन्धो देशाभिमतानां प्रतिनिधीनां हस्ताधीनोऽस्ति। एतेषां सुधाराणां पुनरालोचनार्थं साइमनसमितिः समागतम्। यत्र नैकोऽपि भारतीयो वर्त्तत इति महद्देशस्य कृते खेदजनकम्। किमतोऽधिकं कष्टावहं यदेतस्य भारतवर्षस्य सुधारसंचालननिर्णयार्थं सङ्घः स्थापितः, यत्र एकोऽपि भारतीयो विद्वान् न निवेशितः, यो भारतीयानां हितकारि सत्परामर्शं दद्यात्। इत्यं पल्लविनेन घातिन्या भारतीयशासनव्यवस्थायाः प्रपञ्चस्य।

वृजभाषामहाकवेर्विहारिणः काश्चन सूक्तयः ।

ले०—भट्ट श्रीमथुरानाथ शास्त्री, साहित्याचार्यः ।

[व्रजभाषामहाकवेर्विहारिणः 'सप्तशती' कस्य वा काव्यरसज्ञस्य न स्याद्विदिता । व्रजभाषासर्वस्वमियं 'विहारि'-सूक्तिः सुरसरित्संमिलिता सूरतनयेव सुरसरस्वतीं समाश्रितापि सुधीभिः समधिकं समादरणीया स्यादिति सेयं सुबहोः समयात्पूर्वमेव संस्कृतसरस्वत्यां समवतार्यत मयका । 'दोहा'-सदृशे स्वल्पावकाशे च्छन्दसि विहारिमहाकविरेतादृशमसीमव्यङ्ग्यार्थमञ्जुलमपूर्वं कवयामासेति को वा प्रशंसामुखरमुखो हृदि स्थानं न दद्यात् । यद्यपि व्रजभाषायामक्षराणां लघुगुरूकरणं रूपान्तरकरणम्, इत्यादिरपभ्रंशप्रकार एव तत्र सुबहु सहायकः, परमेवं सौकर्याभावेऽपि प्रत्युत सन्धि-संयुक्ताक्षर-द्विवचनभेदादिसंकट-सहस्रसांमुख्येपि सेयं विहारि-सूक्तिः संस्कृतेप्यानेतुं शक्या न वेति चेतःप्रत्यय एव चापल्याय प्रचोदितवान् ।

यावदियं पृथक् प्रकाशयितुं न शक्यते तावत्-संस्कृतानुरागिणां मनस्तोषनिमित्तं 'विहारि-विलासः' इति शीर्षकं प्रदाय, पुस्तकाकारेण प्रकाशयिष्यमाणे मत्कविलासंग्रहेंऽशतः सेयं संगृहीता । अद्य तस्मादेवोद्धृत्य काश्चित्सूक्तयः श्रीमतां सेवायामुपस्थाप्यन्ते ।

अस्माकं सजातीयः कथंचित्सम्बन्धी च बुन्देलखण्डाभिजनो लल्लोपनामकः परमानन्दपण्डितोऽपि भारतेन्दु-हरिचन्द्रस्य समये विहारि-सप्तशतीं संस्कृतेऽनूदितवान् । परमस्मिन्ननुवादे भूयान् विवाद इव । व्याकरणनियमानां तु सोयं प्रत्यक्षमपवाद[1] एव । विहारि-सूक्तेरर्थसंवादेऽपि (संगतौ)

---

१ आत्मनेपदप्रयोगे स्वतन्त्रता यथा—"विरहाग्निना वभास ।" 'विन्दुमिषेण ववन्द ।' (दो. ८९) रसमपि बुध्यसि नैव (७८९) 'संगच्छतः सहैव ।' (१६१) 'सा जजम्भ भेजे पुनः' (२२६) 'पुनर्मिमिलतुः शिश्यतुः पुनरासतुः शयेपि' (२०४) इत्यादिः ।

'चरणौ विषमगतीव' (१९८) 'गगनमंशुमालीकरैः' (१४९) 'मिळनायाभिससार ।' (१४३) 'चातुरतया' (१४१) 'लसति ललाम' (४) 'कराङ्गुलिरैव पस्पर्श' (२८१) 'प्रदर्शयित्वा निजतनुम्' (४८०) इत्यादयः शतमन्यान्ये व्याकरण-नियमापवादाः ।

प्रायः प्रतिवाद एव दृश्यते । स्थाने स्थाने चपल-विप्र-वाद-एव भाषाप्रसिद्धः प्रवाद एव वाहुल्ये-नावलोक्यते । संस्कृतसरस्वत्यास्तमिममपवाद-मुन्मार्ष्टुमेवाहं सज्जोऽभवमित्यास्तामतिवादः । एष विषयो मत्कवितासंग्रहस्य भूमिकायां विस्तरेण विशदीकृतः । इदानीं यानि मयाऽक्षराणि योजितानि तानि श्रीमतां पुरतः सभयकम्पमुपस्थाप्यन्ते ।]

* श्रीकृष्णस्य शोभावर्णनम् *

राजति गुञ्जामालिका वक्षसि मुरमथनस्य ।
लसति निःसरन्ती बहिः, शिखेव दवदहनस्य ॥१॥

गोपरक्षायां पीतस्य दावानलस्य बहिर्निःसरन्ती ज्वाला इव भातीत्याशयः ॥ १ ॥

श्रवसि हरेः कुण्डलमिदं दीव्यति मकराकारि ।
हृदयसदनमविशत्स्मरो लसति केतनं द्वारि ॥२॥

मकरस्येव आकारो यस्य ईदृशं कुण्डलं हरेः श्रवसि (कर्णे) दीव्यति शोभते । कामरूपो नृपो हृदयरूपं सदनमविशत, द्वारे च राजचिह्नभूतं केतनं ध्वजो लसति । कामस्य मकरकेतनत्वात् । कर्ण-द्वारा तव रूपगुणकथां शृण्वतो ऽस्य कामसंचारोऽभवदिति शृण्वन्तीं नायिकां प्रति दूत्या उक्तिः ।

श्याममधुरमूर्तिर्हरिः पीतपटेन विभाति ।
उषसि नीलमणिशैल इव बालातपेऽभियाति ॥३॥

बालातपे अभियाति सति (प्राप्नुवति) प्रातः काले नीलमणिशैल इव, श्याममूर्तिः हरिः पीता-

सखि सोहत गोपालके उर गुञ्जनकी माल ।
बाहर लसत मनौ पिये दावानलकी ज्वाल ॥ १ ॥
मकराकृत गोपालके कुंडल सोहत कान
धर्यौ।मनौं हिय-धर समर, ड्यौढी लसत निसान ॥२॥
सोहत ओढें पीतपट, स्याम सलोने गात ।
मनो नील-मनि-सैल पर आतप पर्‌यो प्रभात ॥३॥

अर्थानुसन्धानविरहस्तु स्थाने स्थाने यथा—''डर न डरै नींद न परै हरै न कालविपाक । दिन छनदा छाकी रहत छुटत न छिन छवि छाक ॥'' इत्यस्यानुवादे ''न निद्रासि न बिभेषि सखि, नापैति च समयेन । तद्रूपासवमदोऽहो अहोरात्र-मदनेन ॥'' अत्रहि निद्रादिषु नायिकायाः कर्तृतां स्वीकुर्वन्नेव, सहैव 'नापैति च समयेन' इति रूपासवमदं कर्तृत्वसिंहासने स्थापयामास ।

'टटकी धोई धोवती चटकीली मुखजोति । लसत रसोई के वगर जगर मगर दुति होति ॥' इत्यस्यानुवादे 'विदलीकृत सूपस्य यत्परिमार्जनं करोति' इति सूपमार्जनं न जाने कुत आनीतवान् । ''लालन लहिपाये दुरै, चोरी सौंह करे न।'' इत्यस्यानुवादे—

'तस्करता शपथैरियं गुप्ता नहिं भवतीह' अहो नायकस्य कृते 'तस्करता' कियन्मधुरं चोचितं च प्रतीयते !!

'किती न गोकुलकुलवधू काहि न केहि सिख दीन । कोनै तजी न कुलगली ह्वै मुरलीसुरलीन ॥' इत्यत्र 'का न गोकुले कुलवधूः, का धर्मं न जहाति ।' अत्र कविताया जीवितायमानं बहुवचनं 'का हित केहि सिखदीन' इति मेरुदण्डा-मानमर्थं समूलमुन्मूलयामास । प्रत्युत धर्मं जहातीति कठोरं प्रयुयुजे । 'टटियां अँगुरिन फारि, अत्र 'सा गवाक्षनिहिता-ङ्गुली' इत्यस्वाभाविकं रचयामास । 'विविदतुः स्पर्शपरीक्षया मुमुदाते च सुखेन' एवंविधाश्छन्दोभङ्गास्तु प्रतिपदम् । 'सखि सोहत गोपालके उर गुंजन की माल ।' अत्र 'गुञ्जपुञ्जकृतमालिका' इत्याद्यनुवदन् अनुवादं 'लुञ्जपुञ्जमिव' चकार । अस्तु अयं स्थालीपुलाकन्यायः ।

स्वरेण विभाति। श्यामशरीरं नीलमणिस्थानीयम्, तदुपरि पीताम्बरं बालातपवत् मनोहारीत्युत्प्रेक्षाऽऽशयः। अत्रापि परमानन्दः "उष्णकर कोमलकरनिचयेन" इति उषःकालिकसूर्यार्थम् 'उष्णकर'-पदं प्रयुञ्जानः स्थूल एव ॥ ३ ॥

पीतपटाऽधरदृक्छटा-विच्छुरिता हरिताऽति।
अधरधृता हरिमुरलिका सुरपति-धनुरिव भाति ॥४॥

पीतपटस्य अधरस्य दृशोश्च छटया-शोभया मिलिता, स्वयं स्वभावतो हरितवर्णा हरेः मुरलिका, इन्द्रधनुषा तुल्या भाति। पीत-रक्त-श्यामच्छटाभिः संगता हरितवर्णा वंशी पञ्चरंगवर्णेन इन्द्रधनुषा तुल्या भातीत्याशयः। पटस्य पीतः, अधरस्य अरुणः, दृशोः श्यामो वर्ण इति नानाविधरङ्ग प्रतिबिम्ब इत्यर्थः। अत्रापि 'धनुः' स्थाने 'धनु'-सुन्दरहरिवंशिका' इत्याह परमानन्दः ॥ ४ ॥

शिरसि मुकुटमधिकटि ललित-पटो वेणुरधिपाणि।
मालोरसि तावकमिदं रूपं हृदि करवाणि ॥५॥

शिरसि मुकुटम्, अधिकटि (कट्याम्) ललितः नटधार्यत्वात्सुन्दरः पटः, अधिपाणि (पाणौ, करे) वेणुः, उरसि माला (वनमाला), इदं तावकं रूपं हृदये सदा करवाणि इति भगवन्तं प्रति भक्तस्य आशंसा परमानन्दस्तु 'मस्तकमण्डितमुकुटवर' इत्यादि सर्वसम्बोध्यस्यैव विशेषणीकुर्वन् 'रूपकम्' (बानिक) लुलुम्पेति किं सहृदयेषु ॥ ५ ॥

* मुखवर्णनम् *

राजति नीलपटान्तरितमेतन्मुखमवधेहि।
कलितकलानिधिरुल्लसति कालिन्दी सलिले हि ॥

नीलपटेन अन्तरितं किञ्चित्सव्यवधानम् इदं नायिकामुखं राजति, अत्र (दर्शनविषये) त्वम् अवधेहि सावधानो भव। अत्रोत्प्रेक्षते-कालिन्दी सलिले सुन्दरः कलानिधिः शोभते। इवस्याप्रयोगाद्गम्योत्प्रेक्षा।

तद्गृहमभितस्तिथिमहो पञ्चाङ्गादवयाति।
वदनविभाप्रतिभासतः प्रतितिथि पूर्णा भाति ॥७॥

जनः तस्या गृहम् अभितः (तद्गृहसमीपे), प्रतिपदादितिथिं पञ्चाङ्गात् अवयाति जानाति। मुखशोभायाः प्रतिभासतः (प्रकाशात् प्रत्येकतिथौ एव पूर्णिमा भाति। अत्रापि 'पञ्चाङ्ग'-स्थाने प्रस्तकपदं प्रयुञ्जानः परमानन्दो अर्थं दुरूहं चकार ॥७॥

* नेत्रवर्णनम् *

सूक्ष्मपटे चञ्चलनयनयुगं कान्तिमुपयाति।
मन्ये सुरसरिताजले मीनमिथुनमाभाति ॥ ८ ॥

सूक्ष्मपटे (पटेन किञ्चित्सव्यवधानमित्यर्थः)

अधर अरत हरिके परत ओठ-दीठि-पटजोति।
हरे बाँसकी बांसुरी इन्द्र धनुस सी होति ॥ ४ ॥
सीस मुकुट कटि काछनी, कर मुरली उर माल।
यह बानिक मो मन बसो, सदा बिहारी लाल ॥ ५ ॥

छप्यो छबीलो मुंह लसै, नीले अंचल चीर।
मनौ कलानिधि झिलमिलै कालिन्दी के नीर ॥ ६ ॥
पतराही तिथि पाइये वा घरके चहुँ पास।
नितप्रति पूनोही रहत आनन ओप उजास ॥ ७ ॥

चञ्चलं नयनयुगं निर्मले गङ्गाजले मीनयुगलमिव आभाति ॥ ८ ॥

कवयः कमलसमं जगुर्वेद्मि नयनमश्मेति ।
कथमनयोर्योगे द्वयोर्विरहकृशानुरुदेति ॥ ९ ॥

अन्ये कवयो नयनं कमलसमं प्रोचुः, अहं तु नयनम् अश्मा (पाषाणः) अस्तीति वेद्मि । अनयोर्द्वयोः । (नयनयोः) योगे सति विरहाग्निः कथं प्रोद्भवति । द्वयोः पाषाणयोरेव संघर्षेण वह्निरुदेति ततश्च नयनमपि अश्मेत्येव सचातुर्यमाह विहारी ॥ ९ ॥

* यौवनम् *

वधूवपुषि यौवनविभा यथा यथा समुदेति ।
सकलसपत्नीमुखविभा तथा तथा क्षतिमेति ।१०।

सपत्नीनां मुखकान्तिस्तथा तथा क्षीयते । नवयौवनायामस्यामेव प्रियोऽनुरज्येदिति भावः ॥ १० ॥

गता न शिशुता-द्युतिरितो यौवनमङ्ग मुपैति ।
द्विविधरङ्ग कौशेयमिव तनुराभ्यां रुचिमेति ।११।

शिशुताया द्युतिर्न गता, किञ्चिद्बाल्यं वर्तत इत्याशयः । इतः (पक्षान्तरे) यौवनम् अङ्गम् (कर्म) उपैति प्राप्नोति । 'उप' सम्बन्धेन यौवनस्य स्पर्श एव सूच्यते । तनुः (शरीरम्) आभ्यां बाल्ययौवनाभ्यां द्विवर्णं कौशेयम् (धूप छांह का रेशमी वस्त्र) इव शोभते । अत्रापि परमानन्दो 'द्विविधरागमम्बरमिव द्वैरूप्यं च दधाति' इति वैरूप्यमेव चकार ॥ ११ ॥

* वसन्तपवनः *

रणद्भृङ्गघण्टावलिः स्रवन्दानमधु भाति ।
कुञ्ज-मरुत्कुञ्जर इतो मन्दमन्दमायाति ।१२।

दानमधु स्रवन् भाति । एष कुञ्जपवनरूपः कुञ्जरः, इतो मन्दमन्दम् आयाति ॥ १२ ॥

चमचमात चञ्चल नयन बिच घूंघट पट झीन ।
मानौ सुरसरिता विमलजल उछरत जुग मीन ॥८॥

कहत सबै कवि कमल से मो मत नैन पखान ।
न तरक कत इन बिय लगत उपजत बिरह कृसान ।९।

देह दुलहिया की बढ़ै ज्यौं ज्यौं जोवन जोति ।
त्यौं त्यौं लखि सौतैं सबै बदन मलिन दुति होति ।

छुटी न सिसुताकी झलक झलक्यो जोवन अङ्ग ।
दीपति देह दुहून मिलि दिपति ताफता रङ्ग ॥११॥

रनत भृंगघण्टावली झरत दानमधु नीर ।
मंद मंद आवत चल्यो कुञ्जर कुञ्ज-समीर ॥ १२ ॥

॥ मातृभावना ॥

(ले०-नवरत्न-श्रीगिरिधरशर्म-काव्यालङ्कारः)

चिरञ्जीव्याच्चिरञ्जीयात्सुखी भूयादयम्बालः ।
दृढाङ्गः शक्तिसम्पन्नः सुधीर्भूयादयम्बालः ॥१॥ चि०

* *

महास्वस्थः सदास्वच्छः, प्रसन्नो निर्मलो दक्षः ।
सदाकारः सदाचारः, कृती भूयादयम्बालः ॥२॥ चि०

* *

विदां मोदाय वागस्य प्रिया भूयात्सुधासिक्ता ।
सतां तोषं वितन्वानः सदा जीयादयम्बालः ॥३॥ चि०

* *

जगन्नैरोग्यमातन्वन् वहन् द्रव्यं रसं स्नेहम् ।
सुधावाणी सुधापाणिः प्रियो भूयादयम्बालः ॥४॥ चि०

* *

पठन् वेदोपवेद स्यान् महान् धीमान् महाविद्वान् ।
कला बिभ्रत् कृतीः कुर्वन् भवेच्छ्रीमानयम्बालः ॥ ५ ॥

* *

भजन् सत्यं गिरीशं तं वहन् नित्य महोत्साहम् ।
जनान् मार्गं नयंल्लोके नमस्यः स्यादयम्बालः ॥ ६ ॥

* *

विशुद्धो दिव्यचैतन्यः सदानन्दः प्रबुद्धः सन् ।
स्वधर्मं पालयन् प्रीत्या महर्षिः स्यादयम्बालः ॥७॥

* *

प्रयोक्ता मन्त्रतन्त्राणां सुयन्त्राणां कलानाथः ।
हितैषी सर्वभूतानां महोच्चः स्यादयम्बालः ॥८॥ चि०

* *

प्रजानन् 'विद्ययाऽमृतमश्नुते' मन्त्रं वहन् विद्ये
भजन् वर्णाश्रमाचारं जयीभूयादयम्बालः ॥९॥ चि०

† हिन्दी भाषायां 'लोरी' इति गद्यते । ग़जलरूपेण गीयते ।

दुर्जन-दूषणम् ।

प्रणेता—महाकविगुमानी पन्तः

सम्पादकः—श्री । रादत्तपन्तः
साहित्याचार्यः, काव्य—व्याकरणतीर्थः

अयि सुजनेतर ! वक्तुं किमपि भवन्तं वचोऽधुना तथ्यम्
मानसमुत्सहते मे विजित्य कोपं तदाकलय ॥ १ ॥
हर्तुं वयो जनन्याः कर्तुंभवन्याः सुदुर्धरम्भारम् ।
क्लेशयितुमार्यलोकान् दुर्जन ! ते केवलं जन्म ॥२॥
तत्र पततु शतकोटिः शतकोटीनां सभं क्षणे यत्र ।
मातुस्त्वमधिपिचण्डं मूढ ! निषिक्तोऽसि तातेन ॥३॥
यद्गर्भ एव तप्त्वा न मृतो जातोऽपि नाहिना दष्टः ।
जीवसि सुखं दुरात्मन् ! दौर्भाग्यं तत्सतामेव ॥ ४ ॥
परुषैर्वचोभिरुग्रैः पुरुषान् महतस्तुदन्नधिक्षिपसि ।
ननु वद विश्वजनीनैः किन्तव कितवापराद्धन्तैः ॥५॥
क्षान्तिर्निगृह्य कोपं खलेषु शश्वत्कृतापराधेषु ॥
महतामयं निसर्गो जीवसि तेनेव मन्दात्मन् ॥ ६ ॥
अपराध्यसि गुणवद्भ्यः सद्भ्यः सारं न वेत्सि किं तेषाम्
यदि सक्रुधो भवेयुः सपदि जड ! त्वां दलयेयुस्ते ॥७॥
सद्भैरशुद्धिरेतैरसाधनैः साधुभिर्न साध्येति ।
माविद्धि मूर्ख ! तेषां निवसति सत्वे क्रियासिद्धिः ॥८॥
द्विष्टस्य सज्जनेन द्विषतोऽसज्जन तवोभयथा ।
असिकूष्माण्ड न्यायात् क्षयमुत्पश्यामि पापात्मन्॥९॥

त्वं परमत्सरवृत्तिः सततं सन्तोषवृत्तयः सन्तः ।
सामानाधिकरण्यं धूर्त ! कथन्तैस्तव ब्रूमः ॥ १० ॥
त्वं त्वं सुजनः सुजनः काचःकाचो मणिर्मणिः सत्यम्
यो यः स एव सः स्यात्, पापरते ! मत्सरः कोऽत्र ॥ ११ ॥
वर्तस्व धारणायां मा वैरायस्व दुर्मते ! सद्भिः ।
नोचेदुदर्कमस्य द्रागद्रक्ष्यसि कर्मणः सद्यः ॥ १२ ॥
वन्द्यान् गुणैरनिन्द्यान् महानुभावान् मुहुर्मुहुस्तुदतः ।
दुर्मुख ! तव कथमेका शतधा न विदीर्यते जिह्वा ॥ ३१ ॥
भीतिर्गता दिगन्ते, करुणा वरुणालये निमग्ना ते ।
याता रसातले ह्रीः, क्षुद्र ! जीवोऽसि तेनैव ॥ १४ ॥
सन्तं गुणिनमगुणिनं स्वमगुणवन्तं गुणाढ्यमितिवदतः
तव कद्वदने ह्यस्मिन्नवस्करः शौकरः[1] पततु ॥ १५ ॥
अफलजनिः खलजन इति जीवसि लोकैर्जगत्युपक्रुष्टः
असुधारणादमुष्माद् वराक मृत्युर्वरं भवतः ॥ १६
विरचय्य युक्तिभिस्त्वं सहसा सर्वापकारिणीं वाणीम्
कर्णेजपसि जनानां कर्णेजप ! कात्र ते सिद्धिः ॥ १७ ॥
सरलीकृतोऽपि यत्नात् त्वमात्मनस्तन्निसर्गनिष्पन्नम्
कौटिल्यं न विमुञ्चसि पिशुन ! शुनः पुच्छवत्कुटिलः १८
स्वल्पप्रदानतोऽपि प्रीतः प्रत्युपकृतौ समुद्युक्तः ।
त्वामप्रियं कृतघ्नं श्वाप्यतिशेते श्वपाकस्ते ॥१९॥
भारं वहन् परेषां दूर्वोत्कर-पुष्टविग्रहस्तुष्टः ।
हरतः परार्थसारं खल ! साधीयान् खरस्त्वत्तः ॥२०॥
आम्नायोदितमन्त्रैर्दिव्यौषधिभिः सवलनिर्ग्रहणः ।
वशमेति कालसर्पो दुष्ट ! पुनस्त्वं न वश्योऽसि ॥ २१ ॥
वन्यद्वीपि-मृगेन्द्रावप्यतिशेषे सुदुर्धरत्वेन ।
शक्यौ नियन्तुमेतौ त्वन्तु नियम्यो न दुर्बुद्धे ! ॥२२॥

सुकृती क्व सभ्यलोकः क्व दुष्कृती हन्त दुर्मनीषत्वम् ।
चक्राङ्ककरटयोरिव मन्ये वहन्तरं युवयोः ॥ २३ ॥
उष्णत्वमिव हिमांशौ शैत्यमिवार्के चलत्वमिव शैले ।
स्थैर्यन्नभस्वतीव त्वयि वञ्चक ! नास्ति सौजन्यम् ॥२४॥
साक्षादज्ञमभिज्ञं ननु कथयामः कथं भयेन त्वाम् ।
अघवन्नवेहि तथ्यं काकः काकः पिकस्तु पिकः ॥२५॥
दग्ध्वा स्वमत्सराग्निज्वालाभिः काममात्मधीरन्तः ।
अर्हसि कलामनर्हित ! न षोडशीमप्युदारस्य ॥ २६ ॥
विद्वद्भिर्जडबुद्धे ! श्रुतशीलाढ्यैरुदूढदोषस्य ।
स्पर्द्धितुमार्यजनैस्सह वालिश ! वद कोऽधिकारस्ते २
सम्पृक्तोऽप्यतिवेलं कुपुरुष ! सत्पुरुषैः स एवासि ।
चिरमग्नोऽपि पयोधौ काको न जहाति कृष्णत्वम् ॥२
आपाततः समक्षं मधुराकारोऽन्तरालतः क्रूरः ।
बुध्यन्ननु हतबुद्धे ! त्वमसिरसि क्षौद्रदिग्ध इव ॥ २९ ॥
तव मतमनीश्वरं वा जगदजनिर्वा मृतस्य परलोके ।
यदभीश्चरसि यथेच्छं त्वमनार्य ! त्यक्तमर्यादः ॥३०॥
स्वर्निरयं परिणतयोः फलश्रुतिः प्राह सुकृत-दुष्कृतयोः
अज्ञ वितथ इति मत्वा नूनं वितथे प्रवृत्तोऽसि ॥३१॥
नयतो गुरूनधस्तादथोपरिष्टाल्लघूँश्च सप्रसभम् ।
दण्डस्येह तुलायाः प्राकृत ! केयं तव प्रकृतिः ॥३२॥
अहमहमिकां विधातुं समीहमानः समं बुधैरबुधः ।
न विलज्ज ! लज्जसे किं स्वयं स्वकं नैव हृदयेन ॥३३॥
धिग् जन्म ते नराधम ! विफलमजायास्तनस्येव ।
न मनागपि सुकृतं यद्विहितमात्मनो भवता ॥ ३४ ॥
प्रागदुरितैस्त्वमिहेदृक् पापः पापैरमुत्र पापीयान् ।
भवितासि बन्धतोऽस्माद् बन्धुल ! ते दुर्लभा मुक्तिः ॥३
अघमाचरन्निह त्वं सुचिरं नरके पचिष्यसे क्लिष्टः ।

1—शूकर पुरीषमिति भावः—



१. महामहोपाध्याय-श्रीसुधाकरद्विवेद-महोदयाः



२. दैवज्ञवाचस्पतिः श्रीविनायकशास्त्रिवेताल-महोदयः

नावुध ! विभेसि बुध्यन् किं तव चेतोऽश्मसारमयम्३६
उद्दण्डकालदण्डात् भीतमघात्मन्बलादमन्वानः ।
नहि केवलमसि वाचा शूरस्त्वं चेतसा चापि ॥३७॥
क्रोशितवानसि कस्मा-त्वं बलदर्पादनागसः पुंसः ।
इतिभास्करिणा पृष्टः किं वक्ष्यसि तत्र सद्वैरिन् ! ॥३८॥
उद्यतकशैः सरोषं निगृहीतेन प्रसह्य केशेषु ।
याम्यैर्भटैस्त्वयाघः स्मरिष्यते स्वं तदा पाप्मन् ।३९।
इति कुत्सितोऽसि भूयः प्रतर्जितोऽसि प्रबोधितश्चापि ।
अथ किं कदर्य्य ! वच्मो यदहितं ते हितं कुर्य्यात्॥४०॥
मम गर्हया भवानपि मत्सम एवेति मां नु मा ब्रूयाः ।
तत्र लोकगर्हितस्य स्वरूपकथनं न गर्हासौ ॥४१॥
कर्तुं प्रहर्षवर्षं सताममर्षप्रकर्षमितरेषाम् ।
निरमात् कविर्गुमानी भुवि दुर्जन-दुषणं नाम ॥४२॥

इति गुमानीकविकृतं दुर्जनदूषणम् ॥

शरीर-मीमांसा

ले०—त्र्यम्बक विनायक सोहरिः ।

पाश्चात्यविपश्चिद्भिरेतादृशानि यन्त्राण्याविष्कृतानि सन्ति येषां साहाय्येन सूक्ष्मतममपि वस्तु प्रत्यक्षीक्रियते । तै रणुवीक्षणयन्त्रैरेतन्निदर्शितं यदिदं शरीरं सूक्ष्मतमैर्जीवाणुभिः संघटितं विद्यते । ते जीवाणवः 'सेलसे' त्युच्यन्ते । इदानीं वयं प्रथमं जीवाणूनां वर्णनं दद्मः; तदनन्तरं तैः कथमस्माकं शरीरं संघटितमिति दर्शयिष्यामः ।

एते जीवाणवो न केवलमस्माकं किन्तु पश्वादीनां तथा वृक्षाणामपि शरीराणि संघटयन्ति । यत् किंचित् प्राणिना क्रियमाणमुच्यते तत् तत्त्वतस्तैर्जीवाणुभिरेव क्रियते । इमे जीवाणवो यावत् सजीवाः सन्ति तावदेव नृणामायुः । यदा चेमे निर्जीवा भवन्ति तदा नराणामपि मृत्युर्भवति । एतैरेवास्माकं ज्ञान-कर्मेन्द्रियाणि मस्तिष्कहृदयादीनि सर्वाणि शरीराङ्गानि निर्मीयन्ते । एतेषामेव कारणात् हृदयस्य तथा मस्तिष्कस्य सर्वाः क्रियाः प्रचलन्ति । तेषां वर्णनं सुप्रभात-पाठकानां कृते वयमत्र कुर्मः ।

एते जीवाणवो बहुविधाः सन्ति; केचित् गोलाकाराः, केचिद्दण्डाकाराश्च । एते भोजनं विसर्जनं प्रजननं च कुर्वन्ति । किन्तु, एतेषां भोजनविसर्जनप्रजननपद्धतयोऽतीव संघटिताः सन्ति । यदि वयमेतेषां पार्श्वे किंचित् खाद्यं निवेशयामस्तर्हि तत् खाद्यमादातुं तेषामेकमभ्यन्तरतो बहिरागच्छति; तेनाङ्गेन च तत् खाद्यं परिवेष्ट्य पुनश्च तेन खाद्येन सह शरीरे लीनं भवति । यथा नरा नेत्रैः पश्यन्ति, श्रवणैः शृण्वन्ति, तथेमे न कुर्वन्ति । एतेषां सर्वं कर्म सर्वेण शरीरेण क्रियते । कस्यामपि दिशायामस्तु खाद्यमेते पश्यन्त्येव । एतेषां गमनपद्धतिरपि भिन्ना

वर्तते। शरीरार्धभागेनैव प्रथममग्रे संसरन्ति, तद-नन्तरं द्वितीयार्धभागेनेति सर्वमेतदणुवीक्षणयन्त्रेण प्रत्यक्षं भवति। इदानीं तेषां विसर्जन-कर्म कथं भवतीति कथयामः।

एतेषां शरीरे स्थानमेकं वर्तते। तच्च शून्यस्थानं कथ्यते यतस्तत्र तत् जीवद्द्रव्यं नैवैतेषां (प्रोटो-प्लेज़म्) नास्ति यत् खलु तेषां शरीरे सर्वत्रैव वर्तते। अनेन जीवद्द्रव्येनैवैतेषां सर्वा क्रिया भवति। तत् जीवद्द्रव्यमन्नात् जायते। अनेनै-तदपि स्पष्टं भवेत् यत् यदा नरोऽन्नं न गृह्णाति तदा स किमपि कर्तुं न शक्नोति। अतएव नराः, अन्नं भक्षयन्ति कार्यं च कुर्वन्ति। तस्मिन् जीव-द्द्रव्ये त्रीणि द्रव्यान्तराणि सन्ति। एतेषां द्रव्याणां वर्णनं वयं पश्चात् कुर्मः, प्रथमन्तु जीवाणूनां विस-र्जन-कर्म कथयामः।

पूर्वकथिते शून्यस्थाने जीवाणूनां मलमूत्रादि-विसर्जनं भवति। यदा तत् शून्यस्थानं मलद्रव्येण परिपूर्णं भवति, तदा तेजीवाणवस्तस्यैव द्वारा शरीरात्तन्मलद्रव्यं बहिः कुर्वन्ति। एतेषां प्रजनन-क्रिया तथा न भवति यथा नराणां भवति। नरेषु नरनारीसंयोगादपत्योत्पत्तिर्भवति किन्त्वेतेषु जीवा-णुष्वेकैनैव भवति। यथा—अयं जीवाणुः प्रथमं वृद्धिं याति, तदनन्तरं मध्ये क्षीणो भवति। यदा चास्यात्मा (न्युक्लिअस्) द्विधा भवति, तदा सोऽपि द्विधा भिद्यते। एतदेव तस्य प्रजननम्।

इदमेतेषां स्वल्पतरं वर्णनं किन्तु शरीर-मीमांसा कृते सुपर्याप्तम्। ये खल्वस्मिन् विषयेऽधिकं ज्ञातु-मभिलषन्ति ते तद्विषयकान् ग्रन्थान् पठन्तु। इदानी-मस्माभि गर्भप्रभृति शरीरसंघटनं निगद्यते।

शुक्रे तथा रजसि सन्ति केचित् जन्तवः। यदा शुक्रं गर्भाशये प्रविशति तदा तत्रस्थजन्तव रजो-जन्तुभिर्मिलितुं प्रयतन्ते, किन्तु प्रायः एक एव रजो-जन्तुना सह मिलति, कदाचित् द्वावपि द्वाभ्यां सह मिलतः। तयोर्मिलनेन गर्भस्थापना भवति। एतदे[illegible] कारणं यत् एकसमयेऽपत्यमेकं स्त्री सूते। यदा कदाचित् स्त्रीरपत्यद्वयं प्रसूते तदा द्वयोः शुक्रजन्तो रजोजन्तुभ्यां सहमिलनमभवदिति ज्ञातव्यम्। गर्भाशये जलमन्यच्च किंचिद् द्रव्यं गर्भपोष[illegible] विद्यते। तत्र तयोः जन्त्वोर्मिलनेनाण्डोत्पत्तिर्भवति तदण्डं दिने दिने वृद्धिं गच्छति। यदा च त[illegible] पूर्णविकासो भवति तदा तदण्डं द्विधा भिद्यते पुनश्च तद् विभागद्वयं वृद्धिं याति; विकासान[illegible] चैकैकं यथापूर्वं द्विधा भवति। पुनरपि तदण्डचतु[illegible] वर्धते भिद्यते च। एतान्यण्डान्यपत्याकारेण स[illegible] ज्ञानि भवन्ति। इमान्यण्डान्येवोपर्युक्ता जीवाणवः सन्ति। पञ्चमासाभ्यन्तरे तदपत्यं सावयवं त[illegible] न्तरं सुदृढं च भवति। नवमासानन्तरं तद् ब[illegible] रागन्तुमिच्छति। एकदिन आगच्छति च। त[illegible] तस्यापत्यस्य वृद्धिस्तथैव दत्तक्रमेण भवति। श[illegible] रस्था जीवाणवो यथा वृद्धिं यान्ति तथा नाशम[illegible] एतेषां वृद्धिनाशौ जन्मप्रभृत्येव प्रचलतः। [illegible] प्रथमार्धायुषि प्राधान्येन प्राणिनां वृद्धिर्भवति [illegible] यार्धायुषि च क्षयः। यदा शरीरस्थाः सर्वे [illegible] णवो मृता भवन्ति तदा नराणामपि मृत्युर्भवति

एतेषां नाशो विशेषतो विषमितपञ्चमहाभूतेभ्यो जीवनं चान्नात् जलात् वायुतश्च भवति। तस्मात् शरीरमिदं सदैवतेभ्यो पञ्चमहाभूतेभ्यो गोपनीयम्।

तदेतत् संवृत्तं यदिदं शरीरमेतैर्जीवाणुभिः संघटितं विद्यते। अत्रेयं शङ्का भवति यत् यदि सर्वे जीवाणव ईक्षणादिकं कर्म स्वशरीरेणैव कुर्वन्ति यद्यस्मासु त एव वर्तन्ते तत् कथमस्माकमपि शरीरं सर्वमपीक्षणादिकं कर्म न करोति किमर्थमस्मासु ज्ञानकर्मेन्द्रियाणि भिन्नानि सन्ति। अस्याः शङ्काया उत्तरमेवं दत्तम्। यदा सर्वे एते जीवाणवः शरीरे सम्मिलन्ति तदा तेषां केचिदीक्षाकार्यं केचित् च श्रवणकार्यं कुर्वन्ति। अनेनप्रकारेणेक्षणकार्यं-कुर्वाणानां श्रवणशक्तिः श्रवणकार्यं कुर्वाणानामीक्षणशक्तिश्च नष्टा भवति। यदि कस्यचित् नरस्येन्द्रियमेकं जन्मप्रभृत्येव न भवेत् तस्यापि तदिन्द्रियकार्यमिन्द्रियान्तरेण भवितुमर्हतीति विज्ञानविदो वदन्ति। एतै र्जीवाणुभिः कथमस्माकमिन्द्रियाणि संघटितानि सन्ति; कथमेतैः हृदयस्य तथा मस्तिष्कस्य क्रिया भवन्ति; अस्माकमन्ता रचना कथं विद्यत इत्यादि सर्वमग्रे कथयिष्यामः। इदानीमत्रैव विरमामः।

'शिवराजविजय'—विमर्शः।

निबन्धा—श्रीदीनानाथशर्मा शास्त्री सारस्वतः।

"पुराणमित्येव न साधु सर्वं
नचाऽपि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्याऽन्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः॥"

कालिदासस्य।

'शिवराजविजयो' नाम अर्वाचीनकालिकः सँस्कृत्रिम उपन्यासो भारतरत्नपण्डितश्रीमदम्बिकादत्तव्याससाहित्याचार्य्येण प्रणायि–इति नेदमपिहितं सँस्कृतगवीज्ञानां विज्ञानाम्. अस्य काव्यस्य नवीना सञ्ज्ञा 'उपन्यास' इति, प्राचीनकालिकी च 'आख्यायिका' इति व्यपदेष्टुं शक्यते।

तथा च श्रीविश्वनाथः—

"आख्यायिका कथावत् स्यात् कवेर्वंशाऽनुकीर्तनम्।
अस्यामन्यकवीनाञ्च वृत्तं पद्यं क्वचित् क्वचित्।
कथांशानां व्यवच्छेद आश्वास इति बध्यते॥
अन्याऽपदेशेनाश्वासमुखे भाव्यर्थसूचनम्'
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम्।"

(साहि० ६ प० ३३४-३३९ का०)

यद्यपि लक्षणमिदं 'शिवराजविजये' तथा न सङ्घटते, यथा 'हर्षचरिते'; तथाऽपि 'हर्षचरित'-मुद्दिश्य एतल्लक्षणनिर्माणादीपन्नदेऽपि 'शिवराजविजये' नाऽऽख्यायिकात्वाऽपायः। अस्मिन् हि उपन्यासे यद्यपि कविना स्ववंशाऽनुकीर्तनं नाऽन्वष्ठायि; नवाऽन्यकवीनां वृत्तं समदर्भि; तथापि निर्म्माणहेतूदाहारे द्वित्रकवीनां सामान्यसंस्तवो वितीर्ण्ण एव। केषां केषाञ्चित प्राज्ञानां पद्यान्यपि क्वचित् क्वचिदुद्धृतानि। कथांशानां व्यवच्छेदा अपि विन्यस्ताः। निश्वासमुखे अन्याऽपदेशेन भाव्यर्थसूचकाः श्लोका अप्युपात्ताः। आदौ पद्यैर्म्मङ्गलमप्याचरितम्। खलादेः सामान्यपरि-

घयोऽपि निरुक्तः । सरसं वस्तु गद्यैरेव च सन्दब्धम् । कथायां कथांशव्यवच्छेदका आश्वासा न भवन्ति, आख्यायिकायाञ्च भवन्तीत्यनयोर्भिदा । दण्डिमते त्वीदृक्षस्य काव्यस्य आख्या 'कथा' इत्यपि ।

'तत् कथाऽऽख्यायिकेत्येका जातिः सञ्ज्ञाद्वयाङ्किता'

"वक्त्रं चापरवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम् ।
चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि ।
आर्य्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः ।
भेदश्च दृष्टो लम्भादिरुच्छ्वासो वाऽस्तु किं ततः"

इति प्रघट्टकेन व्यपदिश्यते ।

किञ्च—एवं सत्यपि 'शिवराजविजयस्य' कथांशानां व्यवच्छेदाद् 'आख्यायिका' इत्येव नाम सौष्ठवं वहति; दण्डिनोऽपि नाऽत्र विप्रतिपत्तिः । यद्यपि 'साहित्यदर्पण'-कृता कथांशव्यवच्छेदस्य नाम 'आश्वास' इति, श्रीबाण-भट्टेन च 'उच्छ्वास' इति न्यधायि; तथापि व्यासमहोदयेन उच्छ्वासस्य शोकक्रोधाऽऽदौ वर्णनीयत्वेनाऽस्यारस्यपाताऽऽ-तङ्कात् ।

"प्रौढिप्रकर्षेण पुराणरीति-
व्यतिक्रमः श्लाघ्यतमः कवीनाम्"

इति प्रघट्टकेन सप्रौढि सा सञ्ज्ञा परिहृता, 'निश्वास' इत्यस्याऽपि शोक एवोपयोगात् 'श्वास' इति सञ्ज्ञा साध्वी ।

यद्यपि 'शिवराजविजय' इत्यत्र 'शिवराजस्य विजयमधिकृत्य कृतो ग्रन्थः' इति विग्रहग्रहे '(तद्) अधिकृत्य कृते ग्रन्थे ४ । ३ । ८७ पा०' इत्यर्थाऽधिकृतौ "वृद्धाच्छः ४ । २ । ११४ पा०' इति छाऽऽदिप्रत्ययप्रसङ्ग आपपति; तथाऽप्यसौ भूत्वाऽपि 'लुबाख्यायिकाभ्यो बहुलम्' इति वार्तिकेन लुप्यते । न च 'आख्यानाऽऽ-ख्यायिकेतिहासपुराणेभ्यश्च' इति वार्तिकेन पुनरपि ठक्प्रत्ययप्रासिद्धुर्वारैवेतिवाच्यम्; तत्र वार्तिके 'तदधीते तद्वेद (४ । २।५९ पा०' इत्यर्थस्यैवोपादानाद्; अत्र च तद्ग्रहणात्; शिवराजविजयाऽध्येतृषु एव च तस्याऽऽपादात् ।

अस्मिन् 'शिवराज विजये' द्वादश निश्वासाः, निश्वास-चतुष्काऽऽत्मकाश्च त्रयो विरामा वर्तन्ते । इह दक्षिणदेशाऽ-वतंसस्य महाराष्ट्रराष्ट्रस्वातन्त्र्यपोतकर्णधारस्य महाराष्ट्र-राष्ट्रचक्रवर्तिनः 'शिवाजी' ¶ इति ख्यातस्य विजय उदाहृतः, तेन चाऽसावेव धीरोदात्तो नायकः । उपनायकाश्च गौरसिंहरघुवीरसिंहादयोऽत्र । प्रतिनायकोऽवरङ्गजीवो विजयपुराऽधीशश्च । नायिकाऽत्र सौवर्णी । नच-नायकस्य शिवराजस्य स्त्रिया एव नायिकया भाव्यमिति-वाच्यम्; तत्स्त्रिया अत्र चरित्राऽनुपादानाद् । मुख्यचरितवत्या एव नायिकात्वाद् । अत्र प्राय एके वैदर्भीमत्र मुख्यां मन्वते । प्रसादगुणोऽत्र; क्वचित् क्वचिद् ओजोऽपि । वीररसोऽङ्गी, इतरेऽङ्गभूताः । अत्रत्यं गद्यं चूर्णकमुत्कलिकाप्रायमपि ।

* ग्रन्थकृतः सङ्क्षिप्त-परिचयः *

सामान्यतया काव्यपरिचयं निरुह्य सम्प्रति शिवराज-विजयकारस्य संस्तवो वितीर्य्यते—

राजपूतानाप्रान्तीयजयपुरसमीपवर्तिनि सानपुरनामनि एकस्मिन् ग्रामे ईश्वररामो गौडब्राह्मण ऊषिवान् । तत्प्रपौत्रश्च हरिरामो 'रावतजी की धूला' ग्राम उवास । हरिराम-तनूजनू राजारामो धूलाग्रामं हित्वा वाराणसीमशिश्रियत् । तस्य दुर्गादत्तदेवीदत्तेतिनाम्ना पुत्रद्वितयी जज्ञे । दुर्गादत्तो जातु जयपुरे, कदाचिच्च काश्यां न्यवात्सीद् । एतद्-द्वितीय-तनुजनुषोऽम्बिकादत्तस्य जन्म 'जयपुर' एव १९१५ वैक्रमे (१८५८ ई०) चैत्रवलक्षपक्षाऽष्टम्यामभूद् । दुर्गादत्तो भूयो वाराणसीमाययौ । अयमम्बिकादत्तो दशवर्षवयस्क एव हिन्दीसमस्यापूर्तिं कवनञ्च विधत्ते स्म । क्रमशोऽयं साङ्ख्य-योगवेदान्ताऽऽदिदर्शनशास्त्रेषु सङ्गीतसितारजलतरङ्गाऽऽदि-नानाविधवादित्रविद्यायाञ्च चातुरीमुवाह । १९३२ वर्षे गवर्नमेंटकालेजे † आङ्गलविद्यामपि पपाठ । स्वभगिनी-तितश्च चिकित्साग्रन्थानप्यध्यैष्ट । बङ्गभाषानिष्णातोऽप्यभि-द्यत । अनेन मिथिलामहाराजराज्यकाले सामवताख्यं वा-कर्मापि प्राणायि । अयम् १९३९ वर्षे काश्मीरिकसंस्कृत-कालेजं प्रविश्य स्वामिविशुद्धानन्दाऽध्यक्षतायां परीक्षां प्रादात् व्यासपदवीञ्चाऽलब्ध । १९३७ वर्षे साहित्याऽऽचार्यपदं

† काले जायते इत्यर्थे 'प्रावृट्शरत्कालदिवां जे' इति सूत्रेणाऽलुकसमासे कृते कालेज इति संस्कृत्रिमपदमध्यवसेयम्

क्षायामनायासेनैव प्राथम्यं भेजे। कलिकातायामस्य सनातन-धर्म्मविषयेऽष्टाविंशतिर्व्याख्यानानि जातानि। अयं चतुर्विंशत्यां कलासु (Minutes) शतश्लोकीनिर्म्माणक्षमतावत्त्वाद् 'घटिकशतक' पदेन सह रजतपदं महिष्ठश्लोकञ्च प्राप। १९४३-४९ वत्सरे जीविकां कृत्वाऽपि ऋणबाधित एवाऽवित्त। १९४८ वत्सरे 'बिहारीविहार' पुस्तकं व्यरचत्। १९५० देशाटनं कृत्वा भारतरत्न-भारतभूषण-शताऽवधानाद्यनेकोपाधींल्लेभे। पटना गवर्नमेंट कालेजे शिक्षक-(Professor) तां लब्ध्वाऽपि १९५७ वै० (१९०० ई०) वत्सरे नवम्बरस्य १९ एकोनविंशयां तिथौ द्विचत्वरिंशद्वर्षवयस्कतायां देहं तत्याज। अस्य तनूजो राधाकुमारव्यासः। स च युवाऽवस्थायामेव एकं पुत्रं विरहय्य मृतः। शिवराजविजयः साहित्याचार्य्य-महोदयेन कदाचिद् १७९९ख्रिस्ताऽब्दे निर्म्मितो भवेद्। एतस्य प्रथम संस्करणम् १९०१ ऐशवीये वर्षे चन्द्रप्रभायन्त्रालये काश्यां मुद्रितम्।

एतन्निर्म्मिता ग्रन्थाः।

अवतारमीमांसा, मूर्तिपूजा, विहारीविहारः, शिवराजविजयः; साहित्यनलिनी; सुकविसतसई, गद्यकाव्यमीमांसा, महाताशकौतुकपचासा, गुप्ताऽशुद्धिप्रदर्शनम्, क्षेत्रकौशलम्, रत्नाऽष्टकम्, उपदेशलता, ललितानाटिका, पुष्पवर्षा, कथाकुसुमम्, दुःखद्रुमकुठारः, धर्म की धूम, इत्यादयो ग्रन्था अनेन निरमायिषत।

शिवराजविजयाऽऽलोचना।

पण्डिताऽम्बिकादत्तव्यासेन 'शिवराजविजयं'* निर्म्माय संस्कृतजुषां विदुषां समाजे सत्यममरकीर्तिरासादिता। व्यासमहोदयस्य पुस्तकमिदं वीक्ष्य तस्य साहितीसंहतिप्रतिमा निर्विशङ्कं द्योतते। तेन शिवराजविजयीयप्रथमसंस्करणस्य १३८ पृष्ठे 'यशस्विसिंहमुखेनमहादेवपण्डितस्य या प्रशस्तिः कारिता; सा सत्यम् अस्मिन्नेव कविवरे घटते। तत्रत्यं गद्यमुद्धराम्यत्र—

"दूतवर! साधु। तव भाषणभङ्गीमत्यन्तं प्रशंसामि। न तव भाषणे गौरवमवगूर्य्यते, पदवैधुर्य्यं ध्रियते, प्रसादो निरस्यते, संशयाऽऽपादकपदप्रचयो वा प्रचीयते। विलक्षणं तव पाटवमालापेषु, गहनगहनैः कोमलकोमलैर्मधुरमधुरैर्वाचां विलासैर्मनो हरसि; यदेव वक्तुं प्रवर्तसे, तन्मूर्तिमिव पुरतो विलिखसि; यदेव वक्तुमीहसे, तदासारप्रसारैरिव परितः प्लावयसि। धन्यः शिवो यस्त्वादृशान् कल्पनाकेसरिणो दूतत्वे नियुनक्ति। त्वदुक्ति श्रवणविरिरंसैव न भवत्यस्माकम्" इति। अस्मिन् गद्ये 'दूतवर!' इत्यपसार्य्य 'पण्डितवर व्यास-महाभाग!' इति योज्यम्। 'दूतत्वे नियुनक्ति' इत्यत्र कवित्वे न्ययुङ्क्त' इति परिवर्त्यम्। तद् इदमेव सर्व्वं कविवराऽम्बिकादत्तव्यासे घटते। तेनाऽत्र उत्प्रेक्षास्वभावोक्त्याऽलङ्काराणां सीमा प्रदर्शिता। समासबहुलेऽप्यस्मिन् काव्ये न काठिन्यम्; प्रत्युत प्रसादपूरः पूर्ण एव चकास्ति। कविनेदं पुस्तकं सन्दृभ्य शिववीरचरितञ्च सङ्कलय्य महाराजशिवराजोऽपि सत्यं कृतार्थीकृतः।

अस्मिन् भारतवर्षीय-यवनकालिक-दुर्दशायां पर्य्याप्तः प्रकाशः कृतः। शिवराजयशस्विनोरालापश्च मनोमोदकरः। माल्यश्रीककर्तृकं परमात्मचिन्तनमपि रामणीयकं धत्ते। अत्र रघुवीरसिंहस्य गौरसिंहस्य च चरितं सर्वरसान् दधत् सत् पुस्तकस्य सुषमां परिपुष्णाति। तन्निध्यानेन विस्मयः, प्रसन्नता, उत्साहः, आवेशश्च यौगपद्येनैव प्रादुर्भवन्ति। सौवर्ण्याश्चरित्रमपि मनोमोहकरम्। अत्र अवरङ्गजीवस्य निर्दयता, कृतघ्नता, कपटपटुता, च सम्यङ् निदर्शिताः। क्रूरसिंहस्य क्रूरता हृदयं दन्दग्धि। शिवराजराजनीतिश्चाऽपूर्वमुल्लासं व्यनक्ति। किन्तु कथयामः; समालोचनशैलीशून्यानामस्माकं लेखनी अशक्ता कविवरगुणगणने; तत्पुस्तकं समीक्ष्य स्वयं तत्पाठका एव प्रमातुं क्षमेरन्नित्याशासा नो विद्ये। कानिचिच्च 'गच्छतः स्खलनं क्वाऽपि भवत्येव प्रमादत' इति न्यायेन स्खलनान्यत्र जातानि; परं तानि—"एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाऽङ्कः" इति नयेन न वैरस्यमापादयन्ति। इत्यलमतिप्रसङ्गेन।

---

* शिवराजविजयस्यैतिहासिकोपन्यासत्वाद् इहत्यः प्रायिकोदन्तस्त्वैतिहासिकः; क्वचित् क्वचिन्नियमाऽनुसारं स्वल्पतया कल्पितं वृत्तमपि सन्दृब्धम्।

सुप्रभातसारस्तवः

" प्राच्यादिशः " प्रकटयत् परमं महत्त्वं, सत्त्वं समेधयदुदार-मपारशोभम् ।
धीशुद्धिमादिश-ददोषपथं च नित्यं निर्दर्शयज्जयति किञ्चन " सुप्रभातम् " ॥ १ ॥

वीता"विमोह"रजनी, विपुलावकाशा "आशाः" प्रकाशमभजन् जनता "प्रबुद्धा" ।
विश्वत्र रागमयता प्रसृता, विभाति "भास्व"त्प्रभावकलिते भुवि "सुप्रभाते" ॥ २ ॥

"जाड्यं" विलीनमखिलं, "कमलं" विकास माधत्त चारुचतुरा"लि"विलासमूलम् ।
"दोषाकरो"च्छ्रयकथा गलिता, निरस्तमालस्यलास्य मुपसेदुषि "सुप्रभाते" ॥ ३ ॥

दुर्ज्ञेयतामुपगता"पदवी पुराणी" भूयोऽभजन्नयनगोचरतां चिरेण ।
लोकैः परस्परमबोधितरां "स्वरूपं" भाग्येन भारतभुवोऽञ्चति "सुप्रभातम्" ॥ ४ ॥

"दुष्टग्रहाः" प्रशमिता, स्तिमिरावलीढा "दृष्टिः" प्रसादमधिगम्य पुनः क्षमाभूत् ।
लब्धं मुहुः स्वविधिबोधबलं जनेन श्रेयस्करे जगति जाग्रति "सुप्रभाते" ॥ ५ ॥

निःसंशयं समभवत्सुलभावगाहा "प्राची" समुज्ज्वलरसाथ"सरस्वती" सा ।
सद्धर्म्मधारणधुराऽभ्युदगात्पुनश्च श्लाघ्यं स्वरूपमुपबिभ्रति "सुप्रभाते" ॥ ६ ॥

"सच्छाखिभि"र्विकसितं, भुवि "सौमनस्यं" किञ्चिन्मनोहरमुदित्वरतामयासीत् ।
लब्धः क्षणो बत "सदागमसेवनस्य" प्रोज्जृम्भणं भजति सम्प्रति "सुप्रभाते" ॥ ७ ॥

आशैकलक्ष्य ! सुखदर्शन ! "सुप्रभात" ! नोपैषि कस्य सुजनस्य नमस्यतां त्वम् ।
येन त्वया युगपदेव तमोऽपनीय "प्रोज्जीवनः" प्रतिदिशं प्रथितः प्रकाशः ॥ ८ ॥

इति सुप्रभातशुभसङ्गतोदयात्क्रमशः पुनः कलयतात्र चेतनाम् ।
गिरिधारिणाऽलवरवासिनात्मनः प्रमदाप्तयेऽरचि "प्रभातमङ्गलम् " (!) ॥ ९ ॥

भट्ट गिरिधारीशर्म्मा, "कविकिङ्करः"

अलवरीयः ।

---

(७) शाखिनो वेदा वृक्षाश्च, सदागमो वायुः श्रेष्ठशास्त्राणि च । (८) प्रोज्जीवनो नवीनजीवनाधायी, तत्त्वेन तुल्यत्वमुभयत्रापि ।

वसन्तविलासः ।

श्रीमन्! वसन्त! भवदागमनं विदित्वा
जम्बीर-नीप-बकुलार्जुन-चूतवृक्षाः ॥
सत्पल्लवांशुकमलं परिधाय सन्ति
प्रोत्तुङ्गमञ्जुलकरैरुपकर्त्तुकामाः ॥ १ ॥

तन्मञ्जरी-मधु-निपान-मदान्ध-भृङ्गाः
सञ्चालयन्त्यनुपलं शुभमञ्जरीस्ताः ॥
तद्वातवासितमहीपवनो न कुर्य्यात्
कान्ता-विहार-निपुणेष्वपि किन्तु तापम् ॥ २ ॥

मन्दानिलोऽपि मलयाचलसम्भवस्तान्
पूर्णेन्दु-पङ्कज-जयध्वज-पुष्पहारान् ॥
सर्वान् सहायकगणानवलम्ब्य तूर्णम्
सत्कर्त्तुमत्र भवतो नितरां विभाति ॥ ३ ॥

शृङ्गारमत्तवनिताधरपानलुब्धान्
कामाभिरङ्कनकोत्तमतल्पसुप्तान् ॥
नोद्वेजयन्त्यतिमनोहरशब्दवृन्दैः
किं कोकिलास्तव समागमनं विलोक्य ॥ ४ ॥

हारं निधाय कुचकुड्मलशीर्षभागे
काञ्चीं विरच्य विमलाञ्च नितम्बदेशे ॥
सन्नूपुरं निजपदे विनिधाय नेत्रे
नो कज्जलं स्मरसुखं किमु यान्ति नार्य्यः ॥ ५ ॥

उत्फुल्ल-चूत-विमलाङ्कुर-शातबाणो
गुञ्जद्द्विरेफ-निकुरम्ब-शरासनज्यः ॥
श्यामाऽबलारमणचित्तमलं विवेद्धुं
किं नागतः सबलधीर वसन्तवीरः ॥ ६ ॥

—श्रीजीतन झा शर्म्मणः

कमलाकर-सिद्धान्ते विशेषता ।

ले०—श्रीबलदेव मिश्रः, ज्यौतिषाचार्यः,—

गणकाग्रगण्यस्य कमलाकरस्य मते वह्नावेवोष्णत्वमस्ति; रवेः किरणेषूष्णत्वं नास्तिः यच्च रवेः किरणे उष्णत्वमस्मदादिभिरुपलभ्यते तत्तु वह्नेरेव न स्वतोऽर्कतेजसः, अर्क किरणाः पृथिवीस्थपदार्थेषु किल संलग्ना भवन्ति; तदा पृथिवीस्थवह्निरेव स्वस्थानतो बहिरागत्य अर्ककिरणेषूष्णत्वमुत्पादयन्तीति ।

भूस्थाम्बुमृद्वह्नियोग एव स्वत उष्णत्वं वर्त्तते अर्ककिरणयोगादुष्णता न भवति अतएव सूर्यकिरणयोगतोऽपि नक्षत्रगोले ग्रहगोले चोष्णताया न प्रतीतिः ।

रविरश्मेस्तथाग्नेर्योगाद्योष्णताऽनुभूयते; तत्रापि योष्णता सा चेद्रविरश्मेरेवेति कथ्यते; तन्न यतो यत्र गोले वह्नेरभावस्तत्र रविकिरणयोगसत्त्वेपि उष्णताया अभावात् सूर्यतेजसि उष्णत्वं नास्तीति निश्चयः ।

अस्मदादिभिरपि प्रत्यक्षतो दृश्यते केचित्पक्षिणो दूरे आकाश अटन्ति, परन्तु तत्र तेषां पक्षदाहो न संपद्यते, तथा रवितेजसोऽसह्यत्वात् पृथिवीसन्निधौ

नीचै रेव ते न भ्रमन्ति । विमानस्था अपीदानीन्तना परमोर्ध्वं गच्छन्त उष्णताया विशेषत्वं नानुभवन्ति । उच्चभूमौ, परमोच्चगिरेः शिखरे वा स्थितानामपि विशेषोष्णताया अनुभवो न भवति । आर्द्रभूमौ चैत्रवैशाखमासयोरपि हालिकैः कृषकैरत्यन्तोष्णताया: कष्टो नानुभूयते ।

न्यायवैशेषिकमतेऽपि तेजः पदार्थस्य परमाणावुष्णत्वं स्वीक्रियते; परन्तु तस्योपलब्धिस्तु उपाधिवशेन एव भवतीति कथ्यते अनेनापीदमेवावतरति, यत् सूर्यतेजस उष्णताव्यञ्जिकायाः पृथिव्याः सम्बन्धे तत्र तेजसि उष्णत्वमनुभूयते एवं तस्यैव सूर्यतेजसः शीतलचन्द्रबिम्बसंसर्गे उष्णताया अनुभवो न भवतीति ।

एतादृशस्य विचारस्यावसर एवं जायते, यच्चन्द्र गोलो जलमयस्तत्राग्निभागो न वर्त्तते तदा जलगोल इन्दुर्मृत्तिकया संयुतः पश्चादर्ककिरणैः संतप्तः सन् शैत्यं स्वीयगुणं परित्यज्य उष्णः कथं न भवतीति तथा च सिद्धान्त तत्त्वविवेके कमलाकरवाक्यानि-

"विनाग्निभागं जलगोलइन्दुर्मृद्भागमिश्रोऽर्ककरैः प्रतप्तः ।
मुक्त्वा स्वशैत्यं न कथं भवेत्त्वं शृणूत्तरं तत्वविवेक-विज्ञ ॥
नोष्णत्वमर्कस्य करेषु वह्नावेवास्ति तथ्येन कराः स्वभावात् ।
स्वस्थानतस्तेन तदुष्णतास्याद्रवौ तु सा नैव कथंचिदत्र ॥
भूस्थाम्बुमृद्वह्नियुतं किलोष्णं भवे[1] हजं ? नोऽर्ककरैरतोऽस्ति ।
अग्न्युष्णतांशुजयोगसिद्धा सार्कस्य रश्मेरिति ये वदन्ति ॥
न तन्मतं सत्प्रतिभाति नूनं वह्निं विनान्यत्र तदप्रसिद्धेः ।

एवमादर्शादौ तस्यैव विशेषः ।

आदर्शे दृग्रश्मिः पतति, दर्पणोदरं जलवन्निर्मलं तरलं च भवति तत्र तरल आदर्शोदरे पतितं दृग्रश्म्यग्रं स्थातुं न शक्नोति, न च घनात्मकं दृढमादर्शं विद्ध्वा बहिर्गन्तुं प्रभवति अस्मात्परावर्त्तितं भवति। येनैव पथा तस्य गमनं भवति तेनैव पुनः प्रत्यागमनं न भवति, अत्र गणितज्ञानामेष सिद्धान्तो यत्पतितपरावर्त्तितकोणौ मिथस्तुल्यौ भवतः अर्थाद्यदि कस्या अपि भित्तेरुपरि जवेनैकं प्रस्तरखण्डं निपात्यते तदा पुनस्तत्खण्डं प्रक्षेप्तु रेव हस्ते प्रत्यावर्त्तितं न भवति, किन्तु तत्खण्डं भित्तिधरातलोपरि पतनबिन्दुस्थ; लम्बरेखया पतन-समये यत्प्रमाणकं कोणं निर्माति; तत्तुल्यमेव कोणं तथा लम्बरेखया निर्माय निर्गच्छति च । प्रथमः कोणः पतित कोण इति संज्ञया द्वितीयश्च परावर्त्तित इत्यनेन व्यवह्रियते, कोणयोः साम्यं भवति । एतत्सिद्धान्तानुसारेण दृग्रश्म्यग्रं दर्पणोदरे यत्प्रमाणकं कोणं निर्माति तत्प्रमाणकमेव कोणं निर्मायनिर्गच्छंश्च यान् यान् पदार्थान् समाश्लिष्यति त एव तत्र दर्पणोदरे तस्मिन्नेव बिन्दौ प्रतिबिम्बिता भवन्ति, द्रष्टुः दृश्या च भवन्ति ।

नेत्ररश्मेर्यादृशी स्थितिरस्ति तथाविधैव सूर्यरश्मेरप्यस्ति । कस्या अपि भित्तेरग्रतो दर्पणं स्थाप्यम् । तदा सूर्यरश्मिस्तत्र पतितो भूत्वा पतितकोणतुल्यं परावर्त्तितकोणं विदधत् भित्तौ यत्र रुद्धो भवति तत्रैव चेत् दृष्टिः स्थाप्यते तदा दर्पणोदरे प्रतिबिम्बतः सूर्यो दृश्यते । अनेनेदमपि आद

[1] —मूललेखेऽपि पाठोऽयमशुद्धः प्रतिभाति

शक्यते यथा वयं तत्रस्थदृष्ट्या प्रतिविम्बितं सूर्यं पश्यामस्तथा भगवान् सूर्योऽपि तत्र दर्पणोदरे प्रतिविम्बितानस्मानपि द्रष्टुं शक्नोति। एवं दर्पणोदरवज्जलेऽपि प्रतिविम्बसिद्धान्तो ज्ञेयः। इत्यनेन इदमपि ज्ञायते यत्सूर्यरश्मिनेत्ररश्मिजात्योस्साजात्यमस्ति।

अत्र कमलाकर-निबन्ध-श्लोकाः—

"आदर्शादौ दृश्यते यश्च दृष्ट्या
वैचित्र्यं तद्दृष्टिजं च शृणु त्वम्।
दृग्रश्म्यग्रं यत्र लग्नं तदेव
दृश्यं नान्यद्दर्पणादौ तदग्रम्।
स्थातुं शक्यं नैव तत्राग्रतो वा
गन्तुं शक्यं त्वम्बुवन्निर्मलत्वात्॥
अग्रे मार्गस्यावरोधात्क्रमेण
तस्मात्तद् दृग्रश्मिसूक्ष्माग्रकं तु।
शक्त्या स्वस्याथो परावर्त्य चान्यद्
यद्दिक् स्थाने संविलग्नं भवेद्धि।
दृश्यं दृष्ट्यावश्यमादर्श-संस्थं
दृग्रश्म्यग्रस्थानसक्तं भवेत्तत्।
तन्निर्मलत्वाद्रविरश्मयोऽपि दृग्रश्मिरीत्यैव गतास्ततस्ते।
यत्र स्पृशन्त्येव तदस्य देशे लग्ना अपूर्वा इह भूस्थ-लोकैः॥
तत्रस्थदृष्ट्यैव हि दृश्यतेऽर्कः स्वादर्शगोऽपि प्रतिबिम्बरूपः।
एवं परावर्त्य गताद्द्युत्या रवौ विलग्नाश्च ततोऽर्कविम्बम्॥
आदर्शगं दृश्यत एव तद्वज्जलेऽपि यद्यत्प्रतिम्बितञ्च।
स्वल्पं मयोक्तं किल विस्तरोऽस्य महान् विचारस्य दृगुद्भवस्य॥
प्रायोऽर्करश्म्यंशकजातिजास्ते दृग्रश्मयो दृष्टिभवा नृणां तु।
भित्वाथ यद्वार्ककरा गतास्तं भित्वैव गच्छन्ति यतो दृगुत्थाः॥"

भट्ट श्रीक्षीरस्वामी।

लेखकः—

आचार्य-श्रीगिरिजाप्रसाद द्विवेदः, ज्यौतिषाचार्यः

भारतभूमिं विहाय विदेशेऽपि शिक्षितसमाजे श्रीमदमरसिंहप्रणीतोऽमरकोषः सर्वतो लब्धास्पदो विश्रुतश्चेति नेषदपि विचिकित्सावतारः। भारतवर्षे प्रथमं बाला अमुमेव ग्रन्थरत्नं सम्यगुद्घुष्य कण्ठाभरणीकर्तुं शिक्षकैर्नियोज्यन्ते। भूयिष्ठेष्वपि कोषग्रन्थेषु सर्वाङ्गस्यूतसौष्ठवमहिम्ना, विश्वजनीनतया चेतरानसारानिव विधेयतामापाद्य कृतमनेन चेतसि पदं संस्कृतप्रणयिनामिति विश्वतोमुखः सिद्धान्तः। अत एवामरसिंहो बौद्धधर्मदीक्षितोऽपि ब्राह्मणानां बौद्धानां जैनानां च सममेव मानस-सारसांम्राज्यासने प्रभविष्णुरभूत्। कथमन्यथा सुमतिचन्द्रबौद्धस्य, आशाधर-नाचिराजजैनयोस्तथा क्षीरस्वामिमल्लिनाथ-अप्पय्यदीक्षितप्रमुखानां ब्राह्मणविदुषां टीकाग्रन्था उपलभ्येरन्। किं बहुना, चीनतिब्बत-भाषास्वपि सांप्रतमधिगता अमरकोषानुवादाः। यथादेशकालं च प्रसिद्धेषु व्याख्यानिबन्धेषु महेश्वरभानुदीक्षितयोरेव बहुलः प्रचारः। भानुदीक्षितस्य 'व्याख्यासुधा' वस्तुतः शब्दार्थस्वारस्यसेविनः सुधामेव धाययन्ती स्वीयामन्वर्थतां द्योत-

यति। परं प्राचीनेषु भट्टक्षीरस्वामी स्वीयेऽमर-कोषोद्घाटने बहूनां प्राचामर्वाचां च व्याख्यातॄणां हृदयोद्घाटनपूर्वकमर्थात् स्थलविशेषेषु नामग्राहं तेषां मतान्यालोच्य, विसंवादांश्च परिहृत्य, स्वमत-मति प्रौढ्या व्याकुर्वन्, अनन्यसाधारणं निजं वैदुष्यं ख्यापयति।

इदममरकोषोद्घटानाभिधेयं व्याख्यानं पूनानग-रात् श्रीकृष्णजी गोविन्द ओक महाभागेन प्राचीन लिखित-पुस्तकाधारेण प्रस्तावना-परिशेष-शकसूच-निकादिभिर्महतायासेन परिष्कृत्य ईशवीये १६१३ वर्षे प्रकटीकृतम्। येन साधूपकृतः संस्कृतसाहित्य-संसारः।

अस्य समयः।

स्वामी निजटीकायां भोजं सस्मार, तथाचायं वर्धमानेन गणरत्नमहोदधौ च स्मृत इतीशवीयै-कादशशताब्द्याः परभागवर्ती प्रतीयते। किंच प्राच्य-प्रतीच्योदीच्यादिनामनिर्देशान्मध्यदेशीय इत्य-वगम्यते। राजशेखर-भोजयोः संपर्कोपलम्भा-त्तथा च व्याख्याने बहूनां हिन्दीतथोत्तरभारतीय-देशीभाषाशब्दानां प्रयोगादेतदूहनं तथ्यभूतं प्रती-यते। अयं स्वामी शैवागमदीक्षित इति मङ्गला-चरणेनान्यैश्च व्यख्यागतैस्तत्तदनुषङ्गैः स्फुटं नि-श्चीयते।

मङ्गलाचरणं यथा—

दिश्याच्छिवानि शिवयोस्तिलकायमान-
गोरोचनारुचिललाटविलोचनं वः।
अन्योन्यगाढपरिरम्भनिपीडनेन
पिण्डीभवन् बहिरिव स्फुटितोऽनुरागः॥

* * * *

अथात्मनो हृदयग्राहकं पाण्डित्यं प्रदर्शयति—
'सहजो यः समुल्लासः क्षीराब्धेः सोऽपि मंस्यते।
चान्द्र इत्यत्र किं कुर्मो गतानुगतिकं जगत्॥' इत्यादि

* * * *

कनौज—परिसरवर्ति-काकुपदस्थान-प्रतिष्ठित-क्षीरेश्वर सम्बन्धादस्य क्षीरस्वामीति नाम पप्रथे। इत्थमयं पूर्वदर्शित-सम्बन्धानुरोधात् मध्यदेशीय एव नतु दाक्षिणात्यः। भवतु नाम, प्राधान्येन प्रज्ञतत्व विमर्शका विचारयन्तु।

स्वामिना ये पूर्वतनाः कोषकृतः प्रमाणत्वेनो-पन्यस्तास्तेषां नामावलिः—

(१) कात्यः, (२) मुनिः, (३) भागुरिः, (४) माला तथा मालाकारः (५) निघण्टु (वैदिकः) (६) शाश्वतः, (७) अमरमाला (८) नाममाला, (९) अभिधानकारः, (१०) अभिधानशेषः, (११) अनेकार्थः, (१२) श्रीहर्ष (१३) दुर्गः, (१४) भोजः, (१५) रुद्रः।

प्राचीन-टीकाकाराः—

*(१) उपाध्यायः, (२) गौडः, (३ भोजः, (४) आचार्यः, (५) नारायणः, (६ टीका-सर्वस्वम्।

आयुर्वेदविदां प्रमाणाः।

(१) सुश्रुतः, सौश्रुतिः, (२) वैद्यः (प्राचे चरकः) (३) धन्वन्तरिः, तस्य निघण्टुश्च। (४

* श्रीनगेन्द्रनाथ वसु डाच्यविद्यामहार्णवसंकलिते 'वि कोष' कोषचूडामणौ अमरटीकाग्रन्थानां विपुला समुपलभ्यते।

वाहृतः वाग्भटः, (५) चन्द्रः, (६) इन्दुः, (७) चन्द्रनन्दनः, (८) धातुविद्, (९) निमिः, (१०) हरमेखलम्।

केशवः स्वीये कल्पद्रुमग्रन्थे कोषकारानित्थमभिधत्ते—

'कात्य-वाचस्पति-व्याडि-भागुर्यमरमङ्गलाः।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः॥'

यद्ययं नामोल्लेखक्रमः समयानुरोधेन यथोत्तरं निर्दिष्टस्तदा तु कात्यः सर्वेभ्योऽपि पूर्वभवः। किं चायं स्वामिना सबहुमानं प्रामाण्ये परिगणितस्तथा अमरसिंहादपि प्राक्तनत्वेनाध्यवसितः। एकत्र टीकायामुक्तम्—'हेमन्ताद्धि वत्सरस्यारम्भः।' अत्र पोषकं कात्यवचनमुदाहरति—

'आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुः स्मृतः।'

कालवर्गः, श्लो० २०

एवं मुनिरप्याहृतः, यो हि मुनिर्व्याडिः प्रतिभाति। तृतीयो भागुरिः, एषोऽपि अमरसिंहात्पूर्वोद्भूतः। इत्थं स्वामिमतेन भागुरि-मालाकारावपि प्राचीनावेव। व्याख्याने मालाकारमतं न केवलं भूयः प्रतिपादितं, किन्तु बहुत्र सम्यगालोचितमपि दरीदृश्यते।

शाश्वतः—अनेकार्थसमुच्चयाभिधेयोऽपूर्वो ग्रन्थोऽस्य कृतिषु प्रसिद्धः, परमयं कोषोऽमरसिंहीय नानार्थवर्गादतिरिच्यते। बहुत्रामरशाश्वतयोः श्लोकसाम्यं संलक्ष्यते। अयममरसिंहादधस्तनः। दुर्गभोजौ चापि नव्येषु परिगणितौ। अमरमालाविषये न किमप्यवधार्यते, कोऽस्य प्रणेतेति। वनौषधिवर्गे, विशेष्यनिघ्नवर्गे च किमप्यवतरणं क्षीरस्वामिना रुद्रकृतव्याख्यातः परिगृहीतमिति भानुजीदीक्षिता ब्रुवते। उपाध्यायाभिधेयो हि केषांचिन्मतेऽच्युतोपाध्याय आसीत् यस्य टीका व्याख्याप्रदीपनाम्नी स्मर्यते। भोज—आचार्य-नारायणादिव्याख्यातॄणां ग्रन्थानुपलम्भाद्विशिष्य विवेचनं दुष्करमेव।

आयुर्वेदवित्सु सुश्रुत-चरक-वाग्भट-धन्वन्तरीणां प्रमाणवचनानि वनौषधिवर्गे लभ्यानि। बहुत्र 'वैद्याः' इति लेखः प्रायेण चरकं स्मारयति। धन्वन्तरिर्हि अमरसिंहादतिप्राचीनः। वाग्भटः, वा, वाहतोऽहि वौद्धः यस्य शकवंशीयराजभिः सह संबन्धः परिदृश्यते। अष्टाङ्गसंग्रहोत्तरस्थाने ४९ अध्याये पठ्यते शकानां पलाण्डुप्रेम यथा—

'लशुनानन्तरं वायोः पलाण्डुः परमौषधम्।
साक्षादिव स्थितं यत्र शकाधिपतिजीवितम्॥
यस्योपयोगेन शकाङ्गनानां
लावण्यसारादिव निर्मितानाम्।
कपोलकान्त्या विजितः शशाङ्को
रसातलं गच्छति निर्विदेव॥'

एतेनाधुनिकैरितिहासज्ञैः ईशवीय द्वित्रशताब्दकाले वर्तमाने शकराजनि वाग्भटसमयोऽपि निर्णीतः। इतरेषां प्राणाचार्याणां चर्चा विषयान्तरसापेक्षिणीति त्यज्यते।

अमरसिंह समयो हि नाद्यावधि सप्रमाणं केनापि स्थिरीकृतः। पाश्चात्यैः पौरस्त्यैश्चाऽसकृदालोचितोऽपि प्रत्ययास्पदतां न लेभे। उज्जयिनीनायकस्य

श्रीविक्रमादित्यस्य नवरत्नेस्वन्यतम इति ज्योतिर्विदाभरणकर्तुः कालिदासस्य 'धन्वन्तरिक्षपणकामरसिंहशङ्कुः, इत्यादि पद्यं भारते पण्डितानां मुखरङ्गे नृत्यमानमपि तत्संग्राहकम्। बुद्धगया-परिसरे समुपलब्धे शिलालेखे 'वैक्रमीय-नवरत्न-सभाया अन्यतमेनोज्ज्वलरत्नेन श्रीअमरसिंहेनैतन्मन्दिरं निर्मापितम्' इति लेखलाभात् ईशवीयवर्षारम्भात् प्राक् प्रथमशतकेऽस्य स्थितिरनुमीयते, यतः स एव विक्रमकालः। भवतु नामामरसिंहो नवरत्नान्तर्गतः परमन्येषां वराहमिहिरादीनामुक्तश्लोकस्थं सामयिकत्वं नोपपद्यते, नवरत्नश्लोकोऽयं प्रतारणपरक एव। प्रमाणस्य पिष्टपेषणमनावश्यकम्।

वृद्धपण्डितमुखादाकर्ण्यते—विक्रमादित्यः शैवधर्मधुरंधर इति ग्रन्थारम्भे बौद्धदेवनमस्कृतिरूपमङ्गलाचरणेन क्रुद्धनृपतेः सन्तोषायायममरसिंहो नामग्राहं देवतानामानिर्दिश्य 'स' इति पदं व्यवहृतवान्। वङ्गदेशीयैः प्राचीनसूरिभिस्तु बौद्ध-शिवपक्षयोर्भेदमवलम्ब्य व्याख्यानभङ्ग्या बलाद् बौद्धपक्षीयोऽर्थ एव निगूहितः, परमेतदखिलमविचारविजृम्भितमेव। नहि श्रीमदमरसिंहः कपटबौद्धो धर्मकञ्चुकी वा प्रतिभाति। कथमन्यथा ब्रह्म-विष्णु शिवादीनां नामोल्लेखात्पूर्वमेव शाक्यसिंहं स्मरेत्। किंच गुणैकपक्षपाती विक्रमादित्यः किमिति तदुपरि कोपपरीतमानसः स्यात्। सेवतेस्म तत्सभां मितरेऽपि बौद्धपण्डिता इति।

अमरसिंहः सुप्रसिद्धशबरस्वामिसूनुः शूद्रागर्भाज्जनिं प्राप्येत्याभाणकमूलकेनाधस्तनश्लोकेन श्रुतिपथमागतम्—

ब्राह्मण्यामभवद्वराहमिहिरो ज्योतिर्विदामग्रणी
राजाभर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत्।
वैश्यायां हरिचन्द्रवैद्यतिलको जातश्च शङ्कुः कृती
शूद्रायाममरः षडेव शबरस्वामिद्विजस्यात्मजाः॥

प्रसिद्ध-मीमांसक-श्रीकुमारिलभट्टपादाद् बहोः कालात् प्राक् तत्रभवतः शबरस्वामिनः सत्ता तत्तन्मीमांसकनिबन्धानामालोचनेन स्फुटं प्रतीयते। अस्य विषये द्रश्यताम्—(The Pūrva Mimānsā system. by P. V. Kane M.A. LL. M. issued in thc Annals of the Bhandarkar Mstitrde for 1924-25 Vol Vi Part 1. Poona City) *

अमरसिंहः स्वसमयेऽतीव गौरवास्पदतां भेजे। बोपदेवः स्वीये कविकल्पद्रुमे प्रौढशाब्दिकेष्व… संमानितवान्। अस्य पाणिनिव्याकरणे… 'सभाराजामनुष्यपूर्वा' इति सूत्रमवधार्य—

'शालार्थापि परा राजामनुष्यार्थादराजकात्।'
(तृ० का० लिङ्गसंग्रहवर्गः, श्लो० २७)

इत्यादि श्लोकेषु बहुत्र सूत्रकोडीकरणेन ब… रत्नमेव। एतन्मूलिकैव प्रसिद्धिश्च—'अमरसिं… हि पापीयान् सर्वं भाष्यमचूचुरत्।' इति। श्रीध… दास-संगृहीते सदुक्तिकर्णामृतेऽस्य बहवः श्लो… उपलभ्यन्ते। तेनामरकोषादतिरिक्ता अपि के… ग्रन्था निर्मिता इति व्यक्तम्।

प्रत्नतत्वविमर्शकैरन्यदपि गवेषयित्वा प्रका… नीयम्। मयातु बहुकार्योपक्षिप्तमानसेन संक्षे… पाठकानां पुरस्कृतोऽयं संदर्भः।

* निबन्धस्यास्य संस्कृतानुवादः सुप्रभात-पाठ… प्रीतिलाभाय यथावसरं प्रकाशयिष्ये। लेखकः,


रेखावलोकन प्रकार-परिचयः।

श्रीकालिकाप्रसादमिश्रः, काशीराज-ज्योतिर्विद्।

सामुद्रिकपरिचयः, सामुद्रिक-विज्ञानञ्चेति निबन्धद्वयं पूर्वमेव प्रकाशितमासीत्सुप्रभातपाठक महोदयानां मनोरञ्जनार्थमिदानीन्तु करावलोकनप्रकारः प्रदर्श्यंते।

चित्राङ्कितरेखाणां फलानि।

१—प्रायो भवन्ति खलु मणिबन्धप्रदेशे रेखास्तिस्त्रः, तासु प्रथमा धनाख्या, द्वितीया शास्त्राभिधा, तृतीया भक्त्याह्वेति। एतासु रेखासु या रेखा स्वच्छ-सरला, गम्भीरा, स्निग्धा, अच्छिन्ना स्यात् सा तद्विषयस्योत्तमफलबोधिका। सर्वाः परिशुद्धाः सकल शुभफलान्विताश्च। तिसृभ्योऽधिकास्युश्चेत्तर्हि दैन्यदौर्भाग्यबोधिकाः—



४—इयमूर्ध्वरेखा यस्य मध्याङ्गुलेर्मणिबन्धावधि परिशुद्धा चेत्सोऽत्यन्तसौभाग्यशाली भवति। इयमेव "भाग्यरेखा" इत्युच्यते, एतद्द्वारैव भाग्यविनिर्णयो भवति, इयं यदि व्यक्ताऽविच्छिन्ना स्यात्तदाराज्य-मान-प्रतिष्ठादिभिर्नरं भूषयति "मध्याङ्गुलेर्या मणिबन्धमाप्ता राज्याप्तये सा च किलोर्ध्व रेखेति"। इयं यदि छिन्ना खण्डिता वा यत्रप्रदेशे स्यात् तत्रवर्षप्रमाणं तस्य पुरुषस्य स्त्री-धन-पुत्रादीनां दुःखं भवति। अनयैव जनानां सुखदुःखादिनिखिलं ज्ञानं भवति। एतस्याः सविस्तरं वर्णनं सचित्र-सामुद्रिकरहस्याख्ये ग्रन्थे कृतम्।

५—पितृरेखा मतान्तरेणायूरेखा कर्मरेखा वा। यदीयं पितृरेखा वियुक्ता स्यात्तदाऽयं जनो वर्णसंकर इति सूचयति। यदि द्वे अपि कुटिले, प्रलम्बे, ह्रस्वे, छिन्ने-भिन्ने च स्यातां तदा जनस्य मातृपितृसुखं

न भवति। यदा द्वे अपि मनोहरे तदापित्रोः सुखं प्राप्नोति। यस्मिन्वर्षप्रमाणे द्वे छिन्ने तस्मिन्वर्षे पित्रोर्वियोगो भवतीति लक्षणज्ञाः वदन्ति।

मतान्तरेणानयायुषोज्ञानम्।

दीर्घा स्पष्टा नातिसूक्ष्मा न वक्रा,
भग्ना चान्या रेखया नापि छिन्ना।
दीर्घायुष्मान् सच्चरित्रस्वभावो
मर्त्यो नित्यं मोदते सौख्ययुक्तः॥ ३॥

म्लाना छिन्ना भिन्नरूपा यदा सा,
मन्दप्रज्ञो दुर्बलोऽसौ विवादी।
गर्वैर्युक्तो दुर्भगो दुःखजीवी,
यस्मिन्माने जायते सा च भग्ना॥ ४॥

इत्याद्युक्तग्रन्थ एव द्रष्टव्यम्।

६—इयं मातृरेखा शिरोरेखा वेति। इयं सर्वतः परिशुद्धा स्यात्तदा जनो बुद्धिमान्, विचार निपुणः, प्रभावशाली, मानसशक्तियुक्तश्च भवति विपरीतायान्तु विपरीतफलम्।

७—कनिष्ठिकामूलादारभ्यतर्जनीमध्यमान्तरालगामिनीतिर्यगायुष्यरेखा, सैव हृदयादिपर्यायाद्यनेकरूपा भवति, यथा १ हीना, २ यवाङ्किता. ३ द्विभागा, ४ निधनान्तस्थानीयपद्मयुक्ता, ५ रज्जुरूपा, ६ शृङ्खलानुकारिणी, ७ जाह्नवीरूपेति सप्तविधा। इयं निर्मला, सूक्ष्मा, परिशुद्धा च स्यात्तदा मनुष्यः शान्तचित्तः कृपालुश्च भवति, विपरीतायान्तु विपरीतं फलम्।

८—इयं सरस्वतीरेखा पुण्यरेखा वा—
"पुण्या रेखा विलसति निजस्थान एवातिशुद्धा
धीजीवयाढ्यो द्रविणयशसोस्सद्व्ययी सर्वमान्यः॥
प्रत्युत्पन्ना मतिरिह भवेदर्थलाभोऽप्यकस्मात्।
कृत्स्ने कार्यं भवति सफलः शान्तचित्तो मनुष्यः॥१॥

इत्यादिनानाविधशिल्पदाक्षिण्यादिकला सद्धर्मादिविशिष्टा भवतीति॥

९—ललनारेखा यावत्संख्यापरिमिता भवेत्तावत्संख्यापरिमिताः ललनाः पुरुषस्य बोध्याः इति। मतान्तरेण मृगपुरुषस्य मनोहरकुशाग्ररेखया स्त्रीद्वयम्, द्वाभ्यां रेखाभ्यां स्त्रीत्रयम्, तिसृभी रेखाभि स्त्री पञ्चकमिति। तुरगपुरुषस्य त्वेकया रेखया द्वे, द्वाभ्यां रेखाभ्यामेका स्त्रीति विज्ञेयम्।

१०—इमाः भ्रातृभगिनीबोधकरेखाः। आयु रेखाया अधो मणिबन्धपर्यन्तं करभप्रदेशे ऽच्छिन्नमनोहरविशाला यावत्यो रेखाः, तत्संख्य परिमिताः भ्रातरः, यावत्यः स्वल्पास्तत्संख्य परिमिताः भगिन्य इति।

११—सन्तानरेखा।

अङ्गुष्ठमूले प्रसवस्य रेखाः
पुत्राः बृहत्यः प्रमदाश्च तन्व्यः॥
अच्छिन्नदीर्घाश्च चिरायुषान्ताः
स्वल्पायुषश्छिन्नलघुप्रमाणाः॥

१२—यवरेखाः—अंगुष्ठमूले यवश्चेत् सन्तानवान्भवति, उक्तश्च "सुतवन्तोऽप्यङ्गुष्ठ मूलगैश्चयवैः" इत्युक्तरीत्या अनया विद्यमानसन्तान विचारो भवतीति।

१३—अङ्गुष्ठोदरे यवरेखा फलमुक्तं जात भरणे—

विराजमानं यवलाञ्छनं चे

दङ्गुष्ठमध्ये पुरुषस्य यस्य ।

भवेद्यशस्वी निजवंशभूषा,

भूषाविशेषैस्सहितो विनीतः ॥ ३ ॥

इति मणिबन्धादारभ्य यवरेखान्तं त्रयोदश प्रधानरेखाणां दिग्दर्शनं कृतं विस्तरस्तूक्त-"सचित्र सचित्रसामुद्रिकरहस्यग्रन्थस्य विंशतिचित्रेषु-प्रायः समस्त-रेखाणां रूप-स्थान-फलादीनां निरूपणं कृतमस्ति तत्तु शास्त्ररसिका अवलोकयन्तु ।

अनया विधातृनिर्मितकरकुण्डल्याः प्राणिनां भूतभविष्यद्वर्तमानकालिकदुःखसुखादीनां यथार्थ-ज्ञानं भवति ।

प्राचीनाः महर्षय इमामेव प्रणालीमनुसृत्य स्वकीयानुभवं पुराणेषु प्रदर्शितवन्तः, तत्फलन्तु साम्प्रतमपि तथ्यमेव संघटते इति पुनर्यथा-वकाशं प्रकारान्तरं प्रदर्शयिष्यामि ।

पौराणिक-प्रणवे द्विजेतरस्याप्यधिकारः ।

श्रीयुत पं० राधाप्रसादशास्त्री, धर्मशास्त्राचार्यः

श्रीकाशीहिन्दूविश्वविद्यालयस्य

प्रायश्चानेकस्थले स्मृतिनिबन्धेषु विरुद्धानीव वाक्यानि लक्ष्यन्ते । तद्यथा पराशरमाधवीय-निबन्धे आचारकाण्डे राजप्रतिग्रहा-निन्दा-निन्दा च । (१९९–२००१)

राजप्रतिग्रहो घोरो मध्वास्वादो विषोपमः ।

पुत्रमांसं वरं भोक्तुं न तु राजप्रतिग्रहः ॥ १ ॥

ब्राह्मण्यं यः परित्यज्य द्रव्यलोभेन मोहितः ।

विषयामिषलुब्धस्तु कुर्याद्‌ राजप्रतिग्रहम् ॥ २ ॥

रौरवे नरके घोरे तस्यैव पतनं ध्रुवम् ।

वृक्षादावाग्निना दग्धाः प्ररोहन्ति घनागमे ॥ ३ ॥

राजप्रतिग्रहादग्धा न प्ररोहन्ति कर्हिचित् ।

छन्दोग-शाखायां प्राचीनशालादीन् महामुनीन् राज प्रतिग्रहे प्रवर्तयितुमश्वपति नामकेन राज्ञा दोषाभाव उक्तः—

न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।

नानाहिताग्निर्ना विद्वान्नस्वैरी स्वैरिणी कुतः ॥ १ ॥

अपि च नारदः—

श्रेयान् परिग्रहो राज्ञां नान्येषां ब्राह्मणादृते ।

ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ ॥ १ ॥

नैतयोरन्तरं किंचिद्‌ प्रजा-धर्माभिरक्षणे ।

शुचीनामशुचीनां च सन्निवेशो यथाम्भसाम् ॥ २ ॥

समुद्रे समतां याति तद्वद्‌ राज्ञां धनागमः ।

यथाग्नौ संस्थितं चैव शुद्धिमायाति कांचनम् ॥ ३ ॥

एवं धनागमात्सर्वे शुद्धिमायान्ति राजनि ।

स्मृतिचन्द्रिकायां संस्कारकाण्डे भोजनदिङ् नियमः—

आयुष्यं प्राङ् मुखो भुङ्क्ते यशस्यं दक्षिणा मुखः ॥

श्रियं प्रोदङ् मुखो भुङ्क्ते ऋतं भुङ्क्त उदङ् मुखः ॥१॥

यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणा मुखः ।

सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि गच्छति ॥ २ ॥

तत्रैव मातुलकन्या-विवाह-विषये—

मातुलस्य सुता मूढ्वा मातृगोत्रां तथैव च ।

समानप्रवरां चैव द्विजश्चान्द्रायणञ्चरेत् ॥ १ ॥

—व्यासः

अन्ये च मातुलकन्यापरिणयनं कामयमानाः संवादार्थं मन्त्रमिममुदाहरन्ति—

आयाहीन्द्र पथिभिरीडितेभिः
यज्ञमिमं नो भागधेयं जुषस्व ।
तृप्तां जुहुं मातुलस्येव योषा
भागस्ते पैतृष्वसेयी वपामिव ॥१॥ ऋ० अस्यार्थः—

"हे इन्द्र ? पथिभिर्मार्गैरीडितेभिः प्रशस्तैर्नः अस्माकमिमं यज्ञं आयाहि आगच्छ ! आगत्य चेदं दीयमानमस्माभिर्भाग धेयं जुषस्व सेवस्व यजमानास्तृप्तामाज्यादिना संस्कृतां वपां जुहुस्त्वक्तवन्तः । अत्र-दृष्टान्तद्वयम्:—यथा मातुलस्य योषा दुहिता दौहित्रस्य भागो भज नीया परिणेतुं योग्या, यथा च पैतृष्वसेयी पौत्रस्य तथायं ते तव भागो वपाख्यः ॥"

तेन श्रुतितः सिद्धं मातुलादिसुतापरिणयनम् ।

अयमेव विषयः तृतीय परिच्छेदे धर्मसिन्धौ (१८८ पृष्ठे) पराशरमाधव-आचारकाण्डे (२।६३ पृ०) प्रतिपादितः ।

शूद्रधर्मविचारे धर्मसिंधौ तृतीयपरिच्छेदे (२९९पृ०)

भारतपुराणश्रवणे स्त्री-शूद्रयोरधिकारो नत्वध्ययने । "श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ॥ शूद्रस्य पंचयज्ञ श्राद्धादिकर्मणि कातीयसूत्रानुसारेण मयूखेः—आगमोक्ता विष्णुशिवादिमन्त्राः नमोऽन्ता प्रणवरहिताः, पुराणादि श्रवणनिदिध्यासनादि कृत्वा ब्रह्मज्ञानमपि स्त्रीशूद्रैः सम्पाद्यम् ॥

वीरमित्रोदयस्याह्निक प्रकाशे ३८२ पृष्ठेः—

षोडशऋगात्मकस्य पुरुषसूक्तस्यप्रत्यृचमावाहनादि षोडशोपचारात्मके पूजाविधावुक्तं नृसिंहपुराणे ।

अनेन विधिना देवः पूज्यते मधुसूदनः ।
वेदज्ञैरेव नान्यैस्तु तस्मात् सर्वंहितं वद ? ॥इतिप्रश्नः
अष्टाक्षरेण देवेशं नरसिंहमनामयम् ।
गन्धपुष्पादिभिर्नित्यमर्चयेदच्युतं नरः ॥

इत्थमुत्तरयित्वा मन्त्रस्वरूपमेवाह:—

शुक्लवर्णं च ॐ कारं नकारं रक्तमुच्यते ।
मोत्कारं वर्णतः कृष्णं नाकारं रक्तमुच्यते ॥ १ ॥
राकारं कुंकुमाभन्तु यकारं पीतमुच्यते ।
णाकारमञ्जनाभन्तु यकारं वहुवर्षकम् ॥ २ ॥

एवं च नमःपदान्तोऽयं मन्त्र इति व्यामोहस्त्याज्यः याज्ञवल्क्य-मिताक्षरायां प्रायश्चित्त-प्रकरणेऽपि—

शूद्रोऽधिकारहीनोऽपि कालेनानेन शुद्ध्यति ॥
२६२ या० स्मृ०

यद्यपि शूद्रो जपाद्यधिकारहीनस्तथाप्यनेन द्वादश वर्षादिकालसम्पाद्येन व्रतेन शुद्ध्यति । शूद्रग्रहणं स्त्रीणां प्रतिलोमजानां चोपलक्षणम् । यद्यपि तस्य गायत्र्यादिजपा सम्भवस्तथापि नमस्कारमन्त्रजपो भवति । अतएव स्मृत्यन्तरेऽभिहितम्—

'उच्छिष्टं चास्य भोजनमनुज्ञातोऽस्य नमस्कारो मन्त्रः' इति । यद्वा वचनवलाद् जपादिरहितमेव व्रतं कुर्यात् । "तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम् । प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम्" ॥ इत्यंगिरस् स्मरणात् । तथापरमपि तेनैवोक्तम्—

शूद्रः कालेन शुद्ध्येत गोब्राह्मणहिते रतः ।
दानैर्वाप्युपवासैर्वा द्विजशुश्रूषया तथा ॥

इति ।

यत्तु मानवम्—

न चास्योपदिशेद्धर्मं न चास्मै व्रतमादिशेत् ।

इति शूद्रस्य व्रतोपदेशनिषेधपरं वचनम् तदनुपस शूद्रविषयम् । यदपि स्मृत्यंतरवचनम्—

कृच्छ्राण्येतानि कार्याणि सदा वर्णत्रयेण तु ।
कृच्छ्रेष्वेतेषु शूद्रस्य नाधिकारो विधीयते ॥

तत् काम्य कृच्छ्राभिप्रायम्—


अतः स्त्रीशूद्राणां प्रतिलोमजानां च त्रैवर्णिक व्रताधिकार इति सिद्धम् । यत्तु गौतमवचनम्—'प्रतिलोमा धर्महीना' इति तदुपनयनादिविशिष्टधर्माभिप्रायम् । अत पूर्व्या मिताक्षरा प्रदर्शिता ॥

मिताक्षरादिग्रन्थाः प्रदर्शिताप्रतीयमानविरोधा-वस्तुतोऽविरुद्धा एव । देशकालादिव्यवस्थापनादिभिः पक्षा ते च पक्षाः तत्र तत्र निवन्धेषु दर्शिताः— (क्रमशः

सुप्रभातम्



अभिनव-महाकविः श्री श्रीकृष्णराम-महोदयः ।



ब्रह्मर्षिः श्रीजनार्दनमिश्र-महोदयः ।

इतिहासज्ञानावश्यकता।

लेखकाः—
श्रीमहादेवशास्त्री, पाण्डेयः, साहित्याचार्यः,

श्रुत्वापि नाम बधिरो दृष्ट्वाप्यन्धो जड़ो विदित्वापि।
यो देशकालकार्यव्यपेक्षया पण्डितः स पुमान् ॥

भारतीयानां संस्कृत-विदुषां प्रायेणेतिवृत्तज्ञानाभावात्कीदृशी दुरवस्थेदानीमस्तीत्ययं प्रश्नो विबुधानां विचारकोटिमध्यारोहति । केचनेतिवृत्तज्ञानं कालानुक्रमणीज्ञानमात्रं निःसारमिति कृत्वा अस्मै ज्ञानसूच्यां लघुस्थानं वितरन्ति । परमस्माकं विचारेण तु कालानुक्रमणीज्ञानमपि अत्यन्तावश्यकतावहम् । कदा के आसन् ? कस्मिन् काले कीदृशी सामाजिकी व्यवस्थितिरासीत् ? कुत्र समये राजकीयनीतिव्यवस्था किंस्वरूपाऽभवत् विद्वांसः कं समयम् अलमकुर्वन् ? के राजानः कस्य समयस्याधिकारिणः ? के के देशाः केषामधिकारे कदा अवर्त्तन्त ?

इत्येवंविधा भूयांसः प्रश्नाः समयसूचीज्ञानमन्तरा कथमपि उत्तरदृष्टिपदवीं नावतरन्ति । एवमेव शास्त्रविषयाणां तारतम्यज्ञानं, पूर्वापरकालसमीक्षापि दुःशकमेव कर्त्तुम् । यथा साहित्ये, वेदे, वेदाङ्गे, वैद्यके, दर्शने, सङ्गीतशास्त्राद्यनेकविषये च बहवो ग्रन्था निबद्धा अस्मद्देशे सुप्रसिद्धाः सन्ति । परमयं निर्णयोऽस्मज्ज्ञानाद्दूरतम एवास्ति यत् के ग्रन्थाः कैराचार्यैः कस्मिन् विषये कदा निबद्धाः ? तत्र तत्परवर्त्तिभिराचार्यैः स्वस्वनिर्मितग्रन्थेषु तत्र तत्र विषये कियती नवीनता निर्मिता, देशकालानुसारेण के के च विषयाः सर्वथा नवीना एव सन्निवेशिताः ? यथा वेदेऽपि चिकित्साविषयस्य निवेशो दृश्यते । ततःपरं पूर्वपरकालीनैर्बहुभिराचार्यैरायुर्वेदे नैके ग्रन्था निबद्धाः । परमेतत्कथयितुं वयमसमर्था एव यत् के रोगा प्रधानभूताः कस्मिन् काले अभूवन् ? कीदृशैः संसर्गैस्तेषामुद्भवः ? कीदृशी चिकित्साप्रणाली तेषां निवारणाय उपयुज्यमाना आसीत् ? बहवः संक्रामकरोगाः अस्मद्देशे विदेशीयानां संपर्कादेव प्रचलिताः, तेषां रोगाणां निदानमाचार्यैः अस्मद्ग्रन्थेषु प्राचीनकालादेव निबद्धम् ? आहोस्वित् विज्ञाय लिखितम् ? उत वा पाश्चात्यग्रन्थेभ्यः संगृहीतम् ?

एवं तदीयचिकित्साविषयेऽपि बहवः परामर्शाः समुत्तिष्ठन्ते । यथा तुलसीदासोऽपि प्लेगव्याधिप्रपीडितः पञ्चत्वं गत इति जनश्रुतिः । अयंव्याधिः तुलसीदासात्पूर्वमस्मद्देशे आसीन्न वा, अथवा यवनानां सम्पर्कादेवायं व्याधिरस्मद्देशे प्रचलितः । यवनसाहाय्यादेव अस्य चिकित्सादिविषये अस्मद्देशीयैः शिक्षितं वा । धर्मशास्त्राण्यपि यथावस्थं

यथाकालं तत्तत्सत्यदयाधर्मनिष्ठैराचार्यैर्निर्मितानि दर्शनवत् विभिन्नरहस्यान्यपि विभिन्नोपक्रमबीजान्यपि यदेककालिकत्वेन ज्ञायन्ते सृष्ट्यारम्भकालिकत्वेन वा एकवाक्यतैव च सर्वत्र गवेष्यते तदत्र कोऽन्यो हेतुर्भवितुमर्हति इतिवृत्तबोधाभावात् । किमितोऽधिकमुच्यतां यदिदानीन्तनाः कुल्लूकभट्टादयोऽपि निबन्धारो धर्मसर्वस्वे प्रमाणभूता नाधुनिकास्तेऽप्यधिकविज्ञानवन्तो विद्वांसः । किमन्यत् "अङ्ग-वङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च । तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति" इत्यपि श्रुतिरिव स्मृतिः प्रमाणत्वेन अभ्युपगम्यते प्राचीनस्थितेरबोधात् । यावद् वलस्मृतिं प्रचलितधर्मशास्त्रनिर्माणप्रसार इदानीं सर्वज्ञाभावान्निरुद्ध इति महदुत्तरमद्यत्वे ।

व्याकरणं तत्तत्काले साहित्यं संस्कृतवाङ्मयव्यवहारं पूर्ववर्ति व्याकरणान्तरमुपजीव्य कृतनिर्माणमपि लक्षणैकलोचनतां समर्थयते चेत् पराजितमेव विवेकिभिः । शार्वरौषस-विश्राम-कालीनादयः शब्दा अपभ्रंशा एव तेषाम् । पाणिनिव्याकरणस्य पूर्णतां समर्थयमानैर्यथावद्बोधपथदूरपतितैः तत्रैव समयं जीवनं क्षपयद्भिः कीदृश्याहोपुरुषिका ऽरिताध्यैत इति तत्सभास्तारा एव जानन्ति । एवं वेदे, ब्राह्मणे, उपनिषत्सु, निरुक्ते, सूत्रेषु, स्मृतिषु, दर्शनेषु, पुराणेषु, व्याकरणे, ज्यौतिषे, आयुर्वेदे, संगीतादिशास्त्रेषु च कालसम्बन्धिपौर्वापर्यज्ञानमन्तरा असम्भव एव निर्णयकृते, यत् कस्मात्परं किं विरचितम्, कुत्र नवीनता कुत्र च ह्रासः कृतः, कुत्र समयस्य तदानींतनसमाजस्य च कियान् प्रभावः पतित इति । अनेनैव कारणेन पाश्चात्या अन्ये च ऐतिहासिकविद्याविदः कथयन्ति यत् संस्कृतस्य सत्यपि एतावति गाम्भीर्ये विस्तरे च इतिवृत्तचर्चाया अभावात् अपूर्णतैव महती जागर्त्तीति ।

एवं च इतिवृत्तबोधस्यावश्यकतायामुपस्थितायां कथं तज्जायतामिति प्रश्नेऽस्माकं दृष्टिरापतति । यत्पाश्चात्याः, तिलक-भाण्डारकर-वैद्य प्रभृतयो दक्षिणात्याः, वङ्गीयाः, श्लाघनीयचरिता रामावतारशर्मप्रभृतयो विद्वांसोऽत्र विंशशतके इतिहासविषये महतीं गवेषणां कृतवन्तः । शिलालेखादीनां सङ्कलनेन भूगर्भविद्याविकासेन च वेदादीनां बौद्धकालिकस्थितेश्च भूयान् परिचयः कृतोऽवलोक्यते । अत्रत्यासु महाराष्ट्री—गुर्जरी-वङ्गी-हिन्दीभाषासु देशान्तरीयासु जर्मन-फ्रेञ्च-आङ्ग्लगवीषु निबद्धग्रन्थेषु अन्यान्यपत्रपत्रिकादिषु च इतिहासो महता संरम्भेण समुपन्यस्तः । उपजीव्य चैतानि नवीनं च कियदपि विभाव्य इतिहासस्य निबन्धाः शक्यन्ते गीर्वाणवाण्यां निर्मातुम् । यतो भारतवर्षस्य महान् कलङ्कः प्रमार्जितुं शक्यः, हिमालयादामार्यन्तरीपं यावत्, आगुर्जाराद् वङ्गदेशपर्यन्तं प्रतिग्रामं निवसतां संस्कृतपण्डितानां हृदये जाज्वल्यमानमितिहासज्योतिः समुदीपितं स्यात् भगवान् सनातनधर्मश्च सत्यतो विज्ञातः परित्रातश्च यथावस्थितं समाजं स्थापयन् भारतं समृद्धिसम्पन्नं क्रियादिति शिवम् ।

भारतभामिनीनां सुरभारतीं प्रतीति-कर्तव्यम् ।

लेखिका-श्रीमती सुशीलादेवी, विदुषी, हल्दौर, बिजनौर

धार्मिकं साहित्यं हि कस्यापि राष्ट्रस्य संस्कृतेः परं निदानम् । वैदिकधर्मस्य साहित्यं गीर्वाणगिरा गुम्फितमिति सुविदितमेव विदुषाम् । तेन भारतीयानां पूर्वपुरुषाः प्राणपणेनापि परिपालयामासुः सुरवाणीम्, ते सर्ववैभवविवर्जिता अपि देववाणीसेवनं न विस्मारयामासुः । "अपि च एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गेलोके च कामधुग् भवति ।" "पितरोऽस्य स्वर्गेलोके महीयन्त" इत्याद्यनुशासनानि श्रद्दधानास्ते सुरसरस्वतीसेवां परमधर्मं मन्यन्ते स्म । जगतीतले न विद्यते कापि भाषा, या देववाणीवदाधुनिकैतिहासिकानां मतेऽपि न्यूनातिन्यूनं वर्षाणां पाञ्चसाहस्र्याः वर्षिष्ठा वर्तते । तस्याः निस्वार्थसेवका एव तां परःशतोपप्लवेभ्यः पात्वाद्यावधि जीवितां ररक्षुः ।

यदा दैवदुर्विपाकेन विजेतृविजितराष्ट्रयोः संस्कृत्योः परस्परं संघर्षो जायते, तदा विजितराष्ट्रस्य संस्कृतेः प्राणसंकटमापद्यते । विजितराष्ट्रस्य संस्कृतिर्विजेतुः संस्कृतेर्गर्भे विलयोन्मुखी धावति । "यथा राजा तथा प्रजा" इति न्यायेन शासिताः शासकानां प्रत्येकं गतिं मतिं भाषां भूषां वेषञ्चानुकुर्वन्ति । हंसगतिमनुकुर्वाणः काकः स्वगतिमपि विस्मरतीति लोकोक्त्या परानुकरिष्णवो विदेशीयदास्यमङ्गीकृतवन्तः कापुरुषाः निजपरंपरागताचारमपि परित्यजन्ति । निजमातृभूमिगौरवस्वरूपायाः स्वमातृभाषाया अपि विमुखाः भवन्ति । तेषां केऽपि स्वधर्मस्वदेशमानैकधनाः पुरुषर्षभा एव स्ववाण्याः संवर्धनायां बद्धपरिकरास्तिष्ठन्ति । सर्वस्वव्ययेनापि तां संपन्नसत्वां स्वस्थाञ्च परिरक्षन्ति ।

इयमेवावस्था वृद्धभारतस्य सनातनसभ्यतां तत्प्राणस्वरूपां सुरवाणीञ्च प्रति मोहम्मदीयानां भारते पदार्पणादारभ्यापतिता । पञ्चशतवर्षव्यापकमोहम्मदीयदुर्दान्तशासने जनसाधारणेषु शासकानां वेषभाषाभूषादिस्वीकुर्वाणेष्वप्यकिंचना अपि विद्यावैभवाः ब्राह्मणाः सुरवाणीरक्षाव्रतपराः बभूवुः । सनातनवैदिकधर्मे तत्प्रतिपादकसंस्कृतसाहित्ये च तेषां श्रद्धैव तद्रक्षव्रतस्य प्रेरिका । परमधुना श्वेतद्वीपीयश्वेताङ्गप्रभूणां शासने प्रवृत्ते देववाणीरक्षापरंपरा देशांतरं प्रापत् । मोहम्मदीयराज्याद्भारतस्य विभिन्ना परिस्थितिरेवात्रहेतुः । स्वमताग्रहग्रहिला वैदिकधर्मदलनोद्यता धर्माचारप्रचारपरिपन्थिनः प्रजोत्पीडनपरा अपि तेऽत्रैव कृतनिवासाः स्वदेशीयाः संवृत्ताः । तेन प्रजाया धनानि तैरपहृतान्यपि तेषां लाम्पट्ये समाधिमन्दिरनिर्मापणेऽपव्ययितानि पुनरावृत्य प्रजागणमेव जग्मुः । स्वदेशाद्बहिर्विदेशं न निर्ययुः । फलतो भारतीयाः प्रजा दासीभूता अपि अन्नवस्त्राभावं नानुबभूवुः । "बुभुक्षितः किन्न करोति पाप" मिति कृच्छ्रस्याविषयाणां तेषामास्था धर्मान्न विचचाल । परमद्यतनाः श्वेतद्वीपीयवैदेशिकशासकाः भारते दुर्दण्डशासनं संस्थाप्यापि भारतभुवं स्वावासभूमिं नैव विदधुः, निजाङ्गलाभिजने स्थिता एव भारते शासनदण्डं संचालयन्ति । भारतप्रजायाः प्राप्तकरद्रव्येण स्वदेशसंवर्धनमेव तेषां परमोद्देशः । अपरञ्चाङ्गला अत्र वणिग्रूपेणागता, पश्चाद्भाग्यचक्रेणैतद्देशस्य शासनधुरामधिगता अपि तेऽद्यापि वणिग्वृत्तिमेव धारयन्ति । एकस्मिन्हस्ते शासनदण्डधारिणोऽपि तेऽपरहस्तेन तुलां गृह्णन्ति । अथवा तेषां न्यायतुला वणिक्तुला चैकैव । भारतराज्यमपेक्ष्याङ्गलभूमौ निर्मितवस्त्रादिवस्तूनां व्यापारवृद्धिरेवाङ्गलप्रभूणामधिकतममभिमता । तेन प्रजानां धनं कररूपेण विदेशीयवस्तुमूल्यरूपेण च सततं विदेशं गच्छति । अस्मद्देशीयधनधाराया निरन्तरं बहिःप्रवाहेण देशोऽयं तथा निर्धनः संवृत्तः, यथा विदेशीयवस्तूनां मूल्यं रूप्यकेण दातुमशक्नुवन् अयं तत्र स्वदेशीयसस्यसंपदार्पयितुं विवशो भवति; येन भारतीयानामुदरदरीपूरणार्थमप्यन्नमत्र नावशिष्यते । अत्रत्या जनाः श्ववृत्त्याख्यपरसेवादीनि परःशतानि पातकानि कुर्वाणा अपि वपुःपरिपोषणाय पर्याप्तमाहारमाप्तुं नालम् । भारतीयानामधिकांशो वर्षं यावदहोरात्रमेकाहारेणैव कथं-

चित् प्राणधारणं करोति। तेनाद्योदरज्वाला तेषां ध्यानम्, स्वधर्मस्य स्वसभ्यतायाश्च संरक्षणाद्धयावचर्य बुभुक्षाशमनप्रयत्नायैवाकर्षति। तदूयां कृच्छ्रावस्थां भारतसभ्यताद्याधिगता। न सातः पूर्वं मोहम्मदीयराज्ये तामाचक्राम। भरतसभ्यतायाः प्रधानाङ्गस्य संस्कृतस्य ह्रासमये मोहम्मदीयराज्ये भारतभूभालतिलकायमाना रसगङ्गाधरादिगण्यमान्यग्रन्थानां प्रणेतारः प्रसादमाधुर्यस्य धाराधराः पण्डितराजजगन्नाथाः, गीतगोविन्दगायका ललितोद्गारगुरवः श्रीजयदेवाः, अन्ये च शतशो विश्वविश्रुता विविधविद्यावारिधयः पण्डितप्रकाण्डाः प्रादुर्बभूवुः। येषां कृतीनां रसमास्वादमास्वादं जना न तृप्तिमायान्ति, तेषां कक्षामप्याधुनिका विद्वांसो नावगाहन्ते। किन्तु शोच्यमतः परं यत्सांप्रतिकानां पितृपर्यायेण संस्कृतानुशीलनपराणां वाराणस्यादिसुरसरस्वतीराजधानी—वास्तव्यानां पण्डितप्रवराणामपि कुलाङ्कुरा आदिभाषां देवभाषां विहाय विदेशीयाङ्गलवाणीं संसेवन्ते। सुरवाणीप्रकाश्यां काश्यां पण्डितपुत्र इति सुप्रयोगोऽपशब्दे परिणत इति जनापवादः श्रूयते। देशेऽस्मिन्नधुना यत्किञ्चित् संस्कृतस्य प्रचारो दरीदृश्यते, तत्पल्लवग्राहिपाण्डित्यमेव। अगाधवैदुष्यस्य गन्धोऽपि तस्मिन्नास्ति। पुराकालीनमगाधसुरसरस्वतीसरोवरमद्य स्वगभीरतामपहाय विस्तृते भूप्रदेशे प्रसृत्य गाधं संवृत्तमित्यनुमीयते। अद्यत्वे दृश्यमानः संस्कृत-प्रसारोऽप्याजीविकोपार्जनमभिलक्ष्यैवास्ति। यदि स्कूलकालिजाभिधराजकीयपाठशालास्वध्यापकपदप्राप्तिप्रलोभनं न स्यात्, तर्हि विरला एव संस्कृतमधीयीरन्।

यथा पूर्वं, प्रतिपादितं, सुरवाण्यै श्रद्धाया एवावलम्बः। सा च श्रद्धाद्य पाश्चात्यशिक्षादीक्षाप्रभावेण पुरुषेभ्योऽपसारिता भारतीयभामिनीनां हृदयमन्दिरे प्रतिष्ठिता विराजते। वस्तुतो विश्वस्मिन् कोमलभावानां निलयाः कोमलाङ्ग्य एव श्रद्धायाः परमाधाराः, विश्वासस्य च प्रधानभूमयः। सर्वे धर्मास्तासां मानस-मुकुरेषु प्रतिविम्बिताः प्रकाशमानाश्च स्वज्योतिभिर्जगदुज्ज्वलयन्ति। पाश्चात्यचाकचिक्यान्धीकृतज्ञानचक्षुषि कलिमलविहतचेतसि विषयभोगप्रवणे भारतीयमनुजसमाजे भारतीयभामिनीनां सरलस्वान्तमेव धार्मिकश्रद्धायाः शरणम्। तास्वेव सनातनाचाराणां स्थितिः। संप्रति ताभिरेव सर्वाधिकमभ्यस्ता सुरवाण्या बाह्यशरीरभूता नागरीलिपिः प्राणिति। अद्यहि पञ्चनदप्रदेशे संयुक्तप्रान्ते च पारसीकाङ्गलादि पाश्चात्यभाषानुशीलनपरवशाः विचाराचारैर्विदेशीयकल्पाः पुरुषाः नागरलिप्यां लिखितानि निजगृहलक्ष्मीणां पत्राणि पठितुं नागराक्षराणामभ्यसने बलान्नियुज्यन्ते।

परं केवलं नागरीलिपिमात्रस्य ज्ञानं भारतीयस्त्रीणां विचारोन्नतये बुद्धिवैशद्याय वा नालम्। तासां धार्मिकशिक्षा सुरभाषाभिज्ञतामपेक्षते। संस्कृतसाहित्यज्ञानमन्तरा तासां मातृभाषायाः परिमार्जितोच्चहिन्दीभाषाया अपि शिक्षा संपूर्णतां नेयात्। संस्कृतानुशीलनाय च तासां पर्याप्तः समयोऽपि विद्यते। यतस्ताः पुरुषा इवाजीविकार्जनायाङ्गलादिविदेशीय-भाषाभ्यसने विवशा न भवन्ति। भारते हि पुरुषा एव स्वपरीवारपोषणद्रव्योपार्जनस्य भारवाहिनः सन्तस्तदाश्रिताः स्त्रियस्तद्भारात् स्वतन्त्राः सन्ति। तेन भारतीयभामिनीनां शिक्षासरणिस्तथा विधेया, यथा तस्यां मातृभाषया हिन्दीभाषया धार्मिकदेववाण्या च साधारणव्यावहारिकज्ञानं धर्माचरणज्ञानञ्च यथासंख्यं सम्यक् संभवेत्। योग्यतानुसारं यथावकाशञ्च प्रतिभाशालिन्यो भारतपुत्र्यो मातृभाषायाः संस्कृतस्य चोच्चशिक्षा अपि लभेरन्। तासां शिक्षाविधौ जननीदुहितृसंबन्धविशिष्टयोर्द्वयोरेव भाषयोर्विधानत्वात् तयोस्तासां पारंगतिः सुलभेव। भारतीयेभ्यः भारताभिजना सुरवाणी, पारसीकाङ्गलादिविदेशीयभाषा अपेक्ष्य सुगमा। तस्याः शब्दसंपत्तौ प्रतिशतमशीतिशब्दाः मातृभाषाहिन्दीभाषया समाकारतां भजन्ते। भावप्रदर्शनप्रकाशवाणीव्यवहाराश्च समरूपाः सन्ति। विचारधारा भारतीयत्वादेकैव। तेन यदि सुरसरस्वतीसुरक्षा समपेक्षिता स्माकम्, तत्प्रत्येकेन सुरसरस्वतीश्रद्धालुना तथा प्रयतनीयम् येन गृहे गृहे सर्वासां भारतीयकुलकन्यानां जिह्वाग्रेषु सनातनी सुरसरस्वती विलसेत्। भारतीयगगनमण्डलञ्च तत्प्रतिशब्दैः

प्रतिध्वन्येत, प्रक्रमेच्च तद्गौरवेण गौरवान्वितेयं मेदिनी। वैदिकधर्मस्य वैदिकसभ्यतायाश्च साम्राज्यं सकलविश्वमण्डले संस्थाप्येत। संप्रति सुरसरस्वत्याः संवर्धनं संरक्षणञ्च भारताभिजनाभिमानिनीनां भारतभामिनीनामधीनम्। तस्याः संरक्षाविधौ विहितप्रयत्नास्ताः स्ववंशगौरवाणां गार्गीसुलभादीनां ब्रह्मवादिनीनां विश्वव्यापिनीं कीर्तिमक्षुण्णां संस्थापयेयुः। तेनेदानीं संस्कृतसाहित्यानुशीलनं भारतीयमातुर्मूर्द्धिममूर्धन्यानां भारतमहिलानां मुख्येतिकर्तव्यम्।

अहो अस्माकं समाजः!

कदा नु खलु सुप्रभातं भविष्यति?

ले०—श्रीनरदेव शास्त्री, वेदतीर्थः

(१)

"सर्वे धर्मा राजधर्मे प्रविष्टाः" इति महाभारतवचनं स्मारं स्मारं नितरां विषीदति नश्चेतः। क्वास्ति सोऽस्माकं राजधर्मो यः पुरा जगत्पालयतिस्म यथावच्चालयतिस्म च। नष्टे राजधर्मेऽस्माकं समाजोऽपि भस्त्राऽऽध्मायितमिव सन्नपि न जीवति,-अहो बत! अस्माकं समाजः "समज" इव संवृत्तस्तिष्ठति स्व-राज्याश्रयविहीनः, हीनः, दीनः मलिनः पराधीनः।

(२)

"सर्वे धर्मा राजधर्मे प्रविष्टाः"—कथमिति? एतच्च विस्पष्टमुपवर्णितमस्माकं प्रमाणभूतेऽर्थशास्त्रे कौटिल्याचार्यनिर्मिते

१—सुखस्य मूलं धर्मः
२—धर्मस्य मूलमर्थः
३—अर्थस्य मूलं राज्यम्
४—राजस्य मूलमिन्द्रियजयः
५—इन्द्रियजयस्य मूलं विनयः
६—विनयस्य मूलं वृद्धोपसेवा—

इत्यादीनि चाणक्यसूत्राणि किमु बोधयन्ति?

(३)

स्वधर्मपोषके रक्षके वर्द्धके च स्वराज्याश्रयाभावे धर्मो नाम कथं जीवतु,-धर्मवृक्षः कथं च नाम प्ररोहतु, अधर्मवृक्षस्य समूलोच्छेदो नाम कथं भवतु। "कोऽयं धर्मः कुतो धर्मः" इति विषयकान् प्रश्नान् धर्मजिज्ञासवः कथं च परिपृच्छन्तु—

अहो, सर्वमधरोत्तरं संवृत्तं राज्याश्रयाभावादिति इदानीन्तनानां शासकानामस्माकञ्च धर्मपन्थाः सर्वथा विभिन्नः, अस्माकं धर्मग्लानौ तेषामभ्युदय एव नास्त्यत्रसंदेहलवोऽपि ते किमपेक्ष्य नो धर्मं नः समाजं च रक्षिष्यन्ति? एतेऽस्माकं धर्मं परिपालयिष्यन्ति इति दुराशामात्रम्।

(४)

स्वराज्याश्रयाभावाद्वर्णाश्रमाणां वर्णाश्रमधर्माणाञ्च प्रतिदिनं ह्रासोऽत एवोपहासः। खञ्जो धर्मो यथातथा इतस्ततो महता प्रयासेन कतिचित्पदानि प्रचलितुं शक्नोति इति नाविदितं प्रेक्षावताम्—"पूर्वं धर्मः पश्चात् स्वराज्यम्" इति केचनामनन्ति परं "पूर्वं स्वराज्यं ततो धर्मः ततश्च सर्वमभीप्सितम्" इति नो राद्धान्तः—दण्डभयादेव प्रजाः धर्मपालने प्रवृत्ता भवन्ति स च दण्डो सर्वथा राज्याधीनो राजाधीनो वा, एतर्हि राजा च अन्यत्र धर्माद्दण्डं पातयति, स च स्वधर्मे तत्परो न चास्माकं धर्मरक्षणहेतुः। अस्ति राज्याधिकारिणां प्रजाधर्मतो विभिन्नो स्वधर्मः, स्वराज्यञ्च,-अत एवैतद् राज्याधिकारिणाम् प्रजानाञ्च मिथो धर्मसम्बन्धः हितसम्बन्धश्च पृथगेवाऽस्ति, अत एव तेषां हितमस्माकमहितं भवति एतच्च दिवा दिवाकरप्रकाश इव सुप्रकाशम्—

(९)

"कालो वा कारणं राज्ञः
राजा वा कालकारणम्"

इति पृष्टे भीष्मपितामहेन किमुत्तरितमित्यप्यवधेयं सुधीभिः—

"कालो वा कारणं राज्ञः,
राजा वा कालकारणम् ।
इति ते संशयो मा भूत,
राजा कालस्य कारणम्" ॥

यदि "राजा कालस्य कारणम्" यदि वा "सर्वे धर्मा राजधर्मे प्रविष्टाः" इति सत्यं, तर्हि किमिति पण्डितसमाजो राजकारणतः उदासीन इव तिष्ठति; तेषामौदासीन्यमपि धर्मनाशहेतुः प्रजापीडनहेतुरिति किमु वदामः—

(६)

स्वराज्याश्रयाभावे धर्मो खञ्जो लुञ्जश्च तिष्ठतीति किमु पडितसमाजो न वेत्ति ? मुमूर्षुर्धर्मोऽस्मानेव मारयति इति किं ते न विदन्ति ? वेदत्रयी संकटापन्ना, शास्त्राणि संकटाकीर्णानि, ब्राह्मशक्तिः ह्रासोन्मुखी, क्षात्रशक्तिश्च विनाशोन्मुखी इति किमविदितं तेषाम् यथेदानीमस्य समाजस्य व्याकरणादिशास्त्राणामागमकाले स्वाध्यायकाले प्रवचनकाले व्यवहारकाले च सुमहान् प्रयत्नस्तथा स्वराज्य प्राप्तिः कथं नेत्येव न विद्मः ।

(७)

अस्मिन् राज्ये पाश्चात्यप्रभवाणामाविष्काराणां चमत्कारस्तु सर्वत्र दरीदृश्यतेऽनुभूयते च; परं धर्मस्तु सर्वथा ग्लानिमापन्नः—मद्यपानादीनि व्यसनानि परितो वर्द्धमानानि प्रजोत्पीडनमेव कुर्व्वन्ति, प्रतिदिनमेधमानाः कर-भाराः प्रजा दारिद्र्यगर्तं बलान्नयन्ति,कदा नु खलु पण्डितसमाजः स्वाक्षीणि समुद्घाट्य वस्तुस्थितिं च विलोक्य जनतात्मनां हिताय प्रयतिष्यते, यथा पाश्चात्यशिक्षाप्रभावितानां राजकार्ये प्रयत्नस्तथैव पौरस्त्यशिक्षासमेतानां प्रयत्नाः स्युस्तर्हि शोभन एवोदर्क इति बोध्यम्-परं "किमस्माकमनेन व्यापारेण" "कोऽपिनृपः स्यादस्माकं का हानिः दास्यं च विहाय न वयं महिषीस्थानं प्राप्तुं शक्नुमः" इत्यादि प्रतिदिनं प्रतिक्षणं चारटमानः पण्डितसमाजोऽक्षरपाण्डित्यं विहाय किमु कुप्यति-

"गता वेदविद्या गतं धर्मशास्त्रम्
इदानींन्तनानां जनानां प्रवृत्तिः
सुबन्ते तिङन्ते कदाचित्कृदन्ते"

इत्यस्योदहरणीभूतः पण्डितसमाजः सुनिपुणं विचारयेत् किन्तस्य कर्त्तव्यमिति—

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः
स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते

इति च न विस्मरणीयं पण्डितसमाजेन एतर्हि "अन्धेनैव नीयमाना यथान्धाः" इतिवत् पण्डितसमाजोऽप्यन्धप्रवर्तकाश्चेति किमु वक्तव्यमस्माभिः ।



वैद्यप्रवरः श्रीकृष्णराम कविः ।

ले०-पुरुषोत्तमशर्मा चतुर्वेदः, साहित्याचार्यः ।

आसीन्मेदपाटीयभट्टाह्वजातीयो महीसुरप्रवरः पण्डितप्रकाण्ड आयुर्वेदागमप्रवीणः 'कुन्दनजी' त्युपनामकः श्रीचैनराम भट्टः । यः खलु जयपुर-राजकीय-संस्कृत-पाठशालायाः प्रारम्भे जयपुरपुरन्दरेण श्रीरामसिंहवर्मणा सादरं समर्पितमायुर्वेदविद्यायाः प्रथमाध्यापकपदमतितरामलञ्चकार । तस्य तनयद्वये ज्येष्ठः सर्वविधगुणगणैर्जयपुरजनतायाः परमप्रेष्ठश्च पण्डितश्रेष्ठः श्रीश्री कृष्णरामशर्मा भिषग्रत्नमभूत् । चैनरामशर्मणः क्रमशः परिणीते पत्नीद्वये प्रथमायामेष कुशाग्रधिषणः पञ्चोत्तरैकोनविंशति शततमे (१९०५) विक्रमवत्सरे कृष्णजन्माष्टम्यां जन्म लेभे । अस्यैव च वैमात्रेयः कविमल्ल-श्रीहरिवल्लभशर्माऽऽसीत्, येन 'जयपुरपञ्चरङ्गा'दयोऽनेके काव्यप्रवन्धा निरमीयन्त ।

बाल्य एवासौ मेधावी स्वपितुरेव समधिगतव्याकरणायुर्वेदाद्यागमः सुप्रसिद्धगुरूपनाम्नः श्रीजीवनाथशास्त्रिणः साहित्यशास्त्रम् , आयुर्वेदाचार्याद्यनेकोपाधि विभूषितस्य श्रीलक्ष्मीरामस्वामिनो दीक्षागुरुतः श्रीचन्दनदाससाधुतश्च च्छन्दशास्त्रमधिगतवान् तदेतत् तेन स्वयमेव प्रत्यपाद्यत सर्वेष्वपि स्वप्रणीतप्रबन्धेषु । तथाहि ।

येनाशिक्षि सजीवनाथगुरुतः काव्यप्रकाशाशय-
श्छन्दश्चन्दनदासतः सगणितं, वैद्यागमस्ताततः ।
सूते गन्धकजारणावधिकृता येन क्रिया नैकशः
सोऽहं नूतनकाव्यपञ्चककृतिः श्रीकृष्णरामः कविः ।

ततश्च लब्धसर्वविधविद्यो द्वात्रिंशदुत्तरैकोनविंशति शततमे (१९३२) विक्रमवर्षे स्वपितृपरम्परया प्राप्त संस्कृतपाठशालायामायुर्वेदाध्यापकत्वमुररीकृतवान्; अध्यापितवांश्च चिकित्सकचूडामणिश्रीश्यामलालजी वैद्यराजमहोदयम्, जयपुरराजकीय-संस्कृत-पाठशालामिदानीन्तनमायुर्वेद प्रधानाध्यापकं श्रीलक्ष्मीरामस्वामिनम्, तथाविधानपरांश्च महायशसः स्वशिष्यान् । काव्यायुर्वेदोभयाध्यापनविषये तस्यातीव प्रावीण्यमासीदित्यद्यापि संगिरन्त एव तदीया अन्तेवासिनः । तारस्वरसंपन्न एष महात्मा यदाऽध्यापयतिस्म, तदा सर्वाऽपि पाठशाला तदीयेन स्वनेन परिपूर्यतेस्मेत्यपि श्रूयते ।

सोऽयं भिषग्वरः श्रीजयपुरमहीपतेर्लब्धग्रामस्य स्वपितुर्धनसम्पदमुपभुञ्जानः सर्वविधसौख्यसंपन्नः, अतएवाऽदीनस्वभावः सुतरां विलासी चाऽऽसीत् तदेदं विधगुणगणरमणीयायामतएवात्युर्वरायामस्य नैसर्गिक-प्रतिभापृथिव्यां सहृदयहृदयाह्लादिनी कवितालता तथा कुसुमिता बभूव, यथा

सर्वोऽपि भारतभूमिभागः सुधीजनसुरभिणा सौरभेण संप्रत्यपि सुतरामामोदमानसो भवति ।

एवंविधस्य कवेर्हृदयं कवितायां प्रतिबिम्बितं भवती त्यन्यत्सर्वमप्युपेक्ष्य तत्प्रणीतकाव्येभ्यः कानिचिद्रुचिररुचिराणि पद्यानीहोद्धरामः, येन विद्वांसः स्वयमेव तत्स्वभावादि परीक्षेरन् कविताऽमृतंचाऽऽस्वादयेयुः । तथा हि—

कच्छवंशमहाकाव्ये स कविः समिच्चमत्कृतिमोजोऽभिव्यञ्जकया कया रचनया वर्णयतिस्मेति निरीक्ष्यताम्—

अलं ज्वलत्खड्गघटाझलत्कृतिः
क्षतस्रवच्छोणितसिक्तपद्धतिः ।
समुच्छलत्कच्छविमुक्तहुङ्कृतिः
प्रचण्डतां प्राप समिच्चमत्कृतिः ।
सप्तमसर्गः १२६

एवमेव मानसिंहमहीपतेर्युद्धोपक्रमे प्रतिनृपतिंप्रति वागारम्भवर्णनमप्यमुं गुणं कीदृगभिव्यञ्जयतीत्यपि परीक्ष्यताम्—

रोषयोषवशाद्‌ बद्धभ्रुकुटिर्माधवाग्रजः ।
खड्गमुष्टौ दधन्मुष्टिं स्पष्टमित्थमुवाच तम् ।
सप्तमसर्गः ११२

तस्मिन्नेव काव्ये जयपुरवर्णनेऽनुप्रासोत्प्रेक्षोदात्तस्वभावोक्तीनां प्रसादगुणस्य च चमत्कारोऽपि विलोक्यताम्—

प्रांशुप्राकार-धवल केतुचीनांशुकाञ्चलैः ।
कुर्वाणमिव मेघेषु बलाकावलिवल्गनम् ।
सदोपकण्ठवलित-वनमालामनोरमम् ।
गोविन्दमन्दिरोद्द्योतं विडम्बयदिवै स्फुरत् ।
दशमसर्गः ८३४-३५

मरन्दलुब्धमधुपश्यामीकृततरूत्तराः
दधत् प्राकारमभितः पुष्पवाटीपरम्पराः ।
दशमसर्गः ८३७

मुक्तकमुक्तावल्यां कविनाऽनेन प्रावृषोरजकीरूपणं कीदृग् व्यधीयतेत्यपि श्रूयताम्—

चञ्चलविद्युल्लतया विरचितघनकृत्तिपात्रजलसेका
प्रावृड्रजकी परितः प्रक्षालनमम्बरस्य विदधाति ।

(तत्रैव) प्रावृष्यप्यवग्रहमवलोक्य कविना कीदृक् तन्निदानमन्विष्टमित्यप्यवलोक्यताम्—

पापं केऽपि जगु, र्निदानमनलं प्राहुः परे मारुतं
नक्षत्रं कतिचिज्जजल्पुरितरे दुर्दैवमूचुर्नृणाम् ।
यत्तु प्रावृषि वैपरीत्यमधुना लोके समुज्जृम्भते
तत्सुप्ते जगदीश्वरे जलमुचामन्याय उन्नीयते ।

अस्य कवेः सर्वाण्यपि फलान्यतिशय्य रसालफले भूयानासीदनुरागः; तत्तत्पक्षपातमालम्ब्य कथमभिभावितानितराणि फलानीत्यप्यवेक्ष्यताम्—

श्रुत्वा चूत ! तव श्रियं भुवि धृतो जम्ब्वा रुषा कालिमा
कालिङ्गं त्रपयेव लीनमवनौ दीर्णं शुचा दाडिमम् ।
मृद्वीका मृदुतां दधार पनसं रोमाञ्चितं भीतितः
संतापादिव नारिकेलजठरे जातं जलानां भरैः ।

व्रजभाषायां 'कावत्त' इति प्रसिद्धेनच्छन्दसा संस्कृतभाषायां वर्णनमनेनैवोपक्रान्तम् । कीदृग्विधैश्च प्रसादपदैर्जयनगरनरेन्द्रः श्रीरामसिंहोऽत्र वर्णित इत्यप्यलोक्यताम्

'सूत ! रथमेहिदेहि बाणगणमाशुमेहि,
मित्र धृतिमत्र धेहि संगरमहामहे ।
वर्म कुत्र चर्म कुत्र भयं वृथा मास्मकृथाः,
छिन्धि भिन्धि धावधाव सहे नास्य नाम !
इतिस्फुटं भवद्विषां शैलगुहास्वापञ्जुषां,
विलापयुग्वचो वयं समुपलभामहे ।
वैरिकुलवृन्दकाल ! चन्द्रसित-कीर्त्तिजाल !
कण्ठलोलरत्नमाल ! महीपालरामहे !

एवमेव 'दोहा'च्छन्दसाऽपि मधुरविशदैः पदैः श्रीगङ्गाजल वर्णनमाकर्ण्यताम् ।

शिवशेखरशशिचन्द्रिकासंचयचारुमहांसि ।
ददतु मुदं मन्दाकिनीतरलतरङ्गपयांसि ।

अनेनैव छन्दसा हरेर्हृदयस्थलवीक्षितयोर्वर्णनमप्यवेक्ष्यताम्—

कमलामलमनुरागि बहु करुणारसपरिणामि ।
हृदयस्थलमिव वीक्षितं हरेरहं प्रणमामि ।

यश्चाऽस्य यमकादिष्वप्यधिकार आसीत्, स हि जयपुर विलासादिषु स्थाने स्थाने, विशेषतस्तु जयपुरविलासस्य प्रथमोल्लासे, स्पष्टमेवाऽवलोक्यत इति न तदुदाहरणानी-होद्ध्रियन्ते ।

यथाऽयं कविः संस्कृतभाषायां कवने प्रावीण्यमलभत, तथैव व्रजभाषायामप्यासीदस्य पाटवमितिताद्दशमप्यस्य पद्यमेकमाकर्ण्यताम् ।

माधव धराधवके प्रबल प्रयान होत
तुरग तयार होत पौन पद-पात में ।
कुञ्जर चलान होत नाद होत वीरन के,
रनको वितान होत जैसे तम रातमें ।
कहैं कवि "राम" और कालीके सुकाल होत,
मुण्डन की माल होत हरजू के हात में ।
रिपु-कुल हारेजात, जिनघर जारेजात,
पकरि निकारेजात और ही बिलात में ।

सेयं दिगुपदर्शिता । अतःपरमनेन कविना यानि काव्यानि निरमीयन्त, तेषु कतिचन चमत्कृतिचारूण्यकारादिक्रमेण सविषयवर्णनमधस्तादुपन्यस्यन्ते । तथाहि—

१—**आर्यालङ्कारशतम्**—अत्र भगवत्याः स्तुतिः प्रतिश्लोकमेकेनोङ्कारेण वर्णिताऽस्ति । तदेतदप्रकाशितमेव विद्यते ।

२—**कच्छवंशमहाकाव्यम्**—अस्मिन्नासन्नविंशैः सर्गैः सुरुचिरैरनुष्टुप्प्रधानैर्वृत्तैर्जयपुरनरेन्द्रवंशावलीवर्णनमस्ति । परमेतदिदानींयावन्न केनाऽपि प्राकाश्यत । यदि जयपुरराज सभासदस्याः (मेम्बर आफ् केबिनेट) अस्य प्रकाशनविषयेऽवदधीरंस्तर्हि जयपुरवंशऽस्य कवेश्च कीर्ति-कौमुदी सर्वतः प्रसरेदित्यस्माकमस्ति मतिः । अत्र चाऽनेन कविना भूयः परिश्रम्य कुतश्चिल्लब्धानि न केवलं जयपुरनरेन्द्राणामेव, किन्तु यवनसम्राजामपि जन्मपत्राणि वर्णितानि सन्ति, सर्वासां राजपत्नीनां तत्पुत्राणाँ च नामानि निश्शेषतो निर्दिष्टानि । तदिदं प्रकाशितं सन्न केवलं साहित्यविदाम्, अपित्वैतिहासिकानामपि केषुचन विषयेषूपकारि स्यादिति नो विश्वासः ।

३. **काव्यमालाप्रशस्तिः**—इदमल्पीयः काव्यं 'काव्यमाला' नाम्न्याः पुस्तकमालायाः प्रशंसायामलिख्यत । मुद्रितं चैतत् काव्यमालायां मुक्तकमुक्तावल्यां च ।

४. **काशीनाथस्तवः**—अत्र भवतः शिवस्य, काशीनाथनाम्नः कस्यचन द्रविड़पण्डितस्य च श्लेषे वर्णनमस्ति । एतदप्यप्रकाशितम् ।

५. **गद्यसमाधानम्**—अत्र हि काश्चन प्रहेलिकास्तथोपन्यस्ताः सन्ति, याः प्रेक्ष्य मतिर्दोलयेत्; परं समाधानमतीव सरलं स्यात् । अप्रकाशितम् ।

६. **गोपालगीतम्**—गोपालस्तुतिरत्र वर्णिता । अप्रकाशितम् ।

७. **गोविन्दभट्टभङ्गम्**—इदमल्पीयः काव्यं दायभागादौ विगृह्णतः पितृव्यस्य निन्दायां विलिख्य कविनैव प्रकाशितमासीत् । एतेनाऽस्य प्रतिद्वन्द्विभयङ्करत्वमुच्छृङ्खलत्वं च प्रतीयते; परं नात्युपयोगि ।

८. **छन्दोगणितम्**—अत्र प्रस्तारादिषट् क्रियासहितानां सर्वविधवृत्तानां विशिष्टं वर्णनमस्ति; परममुद्रितम् ।

९. **जयपुरमेलककुतुकम्**—अत्र जयपुरे विजयदशम्यादिषु यानि मेलकानि (मेला) भवन्ति, तेषां साम-

यिकं वर्णनमस्ति। अस्य कियानंशः सिद्धभेषजमणिमालायामुद्धृत।

१०. **जयपुरविलासम्**—तदेतत् सुप्रसिद्धं तेनैव कविना प्रकाशितं च काव्यं न परिचयमपेक्ष्यते; परमिदानीं वीतपुस्तकतया पुनर्मुद्रणमपेक्ष्यते।

११. **पलाण्डुराजशतकम्**—इह पलाण्डोर्दिग्विजयस्य तथा वर्णनमस्ति, यथा स साहित्यविदां सुखदो भिषजां चोपयोगी स्यात्। प्रकाशितमेतत्।

१२. **माधवपाणिग्रहोत्सवः**—इह तदानीन्तनस्य जयपुरनरेन्द्रस्य श्रीमाधवसिंहस्य जयपुर एवाऽऽनीतया सूर्यया सह विवाहोत्सवस्य वर्णनमस्ति।

१३. **मुक्तकमुक्तावली**—अत्र कविना स्वीयानि सुन्दर-सुन्दराणि पद्यानि संगृहीतानि सन्ति। सैषा जयपुरविलासेन सह संमुद्रिताऽस्ति।

१४. **सम्राट्सुताभिनन्दनम्**—अत्र 'प्रिन्स आफ वेल्स' संज्ञया भारते समायातस्य सम्राड्जार्जमहोदयस्य वर्णनमस्ति।

१५. **सारशतकम्**—इह रघुवंशादीनां पञ्चमहाकाव्यानां शार्दूलविक्रीडितच्छन्दसा प्रतिश्लोकमेकैकसर्गकथावर्णनमस्ति। एतदपि जयपुरविलासेन सह मुद्रितमस्ति।

१६. **सिद्धभेषजमणिमाला**—अत्र वैद्यवरेणाऽनेन स्वानुभूतानि प्राक्तनग्रन्थेष्वनुपलभ्यमानानि भूयांस्यौपधानि संगृहीतानि सन्ति, यानि भिषजामतीवोपयोगीनि। विप्रकीर्णोऽयं संग्रहस्तन्निधनानन्तरं तत्प्रियशिष्येण पूर्वोक्तप्रशस्तिकेन श्रीलक्ष्मीरामस्वामिना संपाद्य टिप्पण्या च संयोज्य प्रकाशितस्तद्विदामुपकरोतीति न तिरोहितम्। सैषा द्वितीयावृत्तौ मुद्रिता आचार्यपरीक्षायां पाठ्यत्वेन नियताऽस्ति।

१७. **होलोत्सवः**—अत्र होलासमयसमुचितानि कानिचिदश्लीलवर्णनपराणि पद्यानि सन्ति।

अयं कविर्भङ्गाभक्तो विचारशीलः परमरसिकश्चासीत्। निधनात् किञ्चित्पूर्वमेवैतेन महाभागेन 'संस्कृतचिकित्सालयः' समुद्घाट्यत, यत्र नानाविधैरौषधैरचिकित्स्यन्त जनाः। आयुर्वेदप्रसिद्धायां रसप्रक्रियायामस्य महाकवेर्महन्नैपुण्यमासीत्। सर्वेपि च रसा अनेन निजहस्तेन निरमीयन्तेत्यपि तदन्तेवासिवृन्दमुखाच्छ्रूयते। प्राचीनपुस्तकसंग्रहेऽप्यस्य महानासीदनुरागः, अतएव यान्यायुर्वेदादिपुस्तकान्यन्यत्र नोपालभ्यन्ते, तान्यप्यस्य गृहे साधुसंगृहीतानि विहितानुक्रमाणि चाऽऽसन्। परमिदानीं तानि तथा न रक्ष्यन्त इत्यस्ति नः खेदः। इदानीमस्य महाकवेर्वंशे तत्तुल्यगुणगणस्य दैवादकालमृत्युं प्राप्तवतः सुतस्य पण्डितप्रकाण्डश्रीगङ्गाधरभट्टस्यसुतः श्रीनृहरिशर्मा सुतादिसौख्यमनुभवन्नास्ते। अनेनैव महात्मना आयुर्वेदाचार्यश्रीनन्दकिशोरशर्मसु निश्चस्य 'कच्छवंश' महाकाव्यमस्मभ्यमदर्शयत।

हा हन्त! स एष कविकुलरत्नमायुर्वेदागमपारावारीणः श्रीकृष्णरामकविश्चतुष्पञ्चाशदुत्तरैकोनविंशतिशततमे विक्रमवर्षे वैशाखकृष्णप्रतिपद्यूनपञ्चाशवर्ष एव करालेन कालेन कीर्तिशेषतां नीत इति भूयस्यो विचारपरम्परास्तेनैव सहाऽऽलीयन्तेति खिद्यमानमानसा वयं विरमामोऽस्मादुपक्रमात्।

१—अस्मिन् जीवनचरितलेखनविषये पूर्वोक्तप्रशस्तिकैः श्रीलक्ष्मीरामस्वामिभिश्चिकित्सकचूडामणिश्रीश्यामलालजी महोदयानां तनुजन्मभिरायुर्वेदाचार्यश्रीनन्दकिशोरशर्मभिः पुस्तकादिदानेन, श्रमं स्वीकृत्यापि सर्वविधसाहाय्यसंपादनेन चातीवोपकृतमित्येतल्लेखपाठकैरेषामेव महाभागानामुपकारः स्मरणीयः।—लेखकः



स्वर्गीय-स्मृतिः

ब्रह्मर्षयः श्रीजनार्दनमिश्राः ।

साम्प्रतयुगे भारतवर्षस्य यादृग्वातावरणं समालोक्यते, तेन चास्माकं धार्मिकी स्थितिर्यादृशी दुरवस्थिता वर्तते; नैतदविदितचरं संस्कृत-हृदयानां सहृदयानाम् । दम्भपूर्णा धर्मश्रद्धा तु प्रायोऽवलोक्यते; परं वास्तविकी क्रियात्मिका धार्मिकता यत्रकुत्राप्येव यस्मिन् कस्मिन् वा लालक्ष्यते । विद्वत्त्वपाण्डित्यम्, तत्रापि क्रिया एते नैकत्रसुलभा भवन्ति कालेऽस्मिन् विकराले कलौ । तथापि काश्यां दृश्यन्ते इदृशाः कर्मकाण्डनिष्ठा विद्वांसः केचन; परन्तु क्रमशस्तेषां ह्रास एवालोक्यते । पश्यतामेवास्माकं द्वित्राः पवित्राः पण्डितमौलिमणयः कथाशेषतां भजन्ते । साम्प्रतमेव वेदमूर्त्तयोऽस्माकं परमाराधनीयाः पूज्यपादाः श्रीजनार्दनमिश्रमहोदयास्तस्यामेव श्रेण्यामलङ्करणभूता आसन् । ये खलु अस्मिन्नेव १९८४ तमे वत्सरे फाल्गुनशुक्लप्रतिपदि शिवसायुज्यं भजमाना अस्मान् शोकसागरे निमग्नानकुर्वन् ।

इमे खलु मुलतान (प्रह्लादपुरी) नगराभिजना आसन् । एतेषां पूज्यपादास्तातपादाः श्रावलीराममिश्रमहोदया बालान्धा आसन् । तेषां विवाहश्च, श्री १०८ वल्लभाचार्यसम्प्रदायान्तर्गतस्य श्रीलालजीश्रीप्यारीजीमन्दिरस्याध्यक्षाणां गोस्वामिश्रीकृष्णजीमहोदयानां कन्यया सह समभूत् । तस्या गोलोकगमनानन्तरम्, तदनुजानां गोस्वामिश्रीरामाजी महोदयानां कन्ययासह पुनः परिणयो बभूव । इमे खलु प्रज्ञाचक्षवोऽपि रुद्री-सप्तशती-शुद्धिविवेक-सहस्रनाम-गालाप्रभृतिग्रन्थानधीतवन्तः । सर्वदा सत्यभाषणनिरताः, स्व-कर्मपरायणाः, भगवद्भक्ता आसन् । त्रिकाल-गङ्गास्नानपरिपूतात्मनामेतेषां धर्मपत्नी पुत्रचतुष्टयं सुषुवे । तेषु ज्येष्ठाः श्रीराजेन्द्र (राजन्जी) मिश्राः साङ्गं वेदमधीत्य कलिकातानगरे वैदिकेषु विद्वत्सु परां प्रतिष्ठामासादयाञ्चक्रुः । अपरे श्रीगोपीनाथमिश्रास्तद्वदेव स्व-पितामहस्थाने मुलताननगरे महतीं कीर्तिवल्लरीमारोपयामासुः । तत्र नगरे प्रधानाः कर्मकाण्डिनो वैदिक-प्रवरा एत एवासन् । तृतीयपुत्राश्चास्माकमिमे परमश्रद्धेयाश्चरितनायकाः श्रीजनार्दनमिश्रमहोदयाः काश्यामेव पितृकुलप्रतिष्ठां समवर्धयन् ।

एभिः श्रीमतां वैदिकाचार्याणां आपाजीमहोदयानां सकाशात् शुक्लयजुःसंहिता, सोमसौत्रामण्ययाजिनो दीक्षित श्रीगोविन्दजी अग्निहोत्रिणः सविधे श्रौत-स्मार्तसूत्रादयः कर्मकाण्डग्रन्थाः, नागर-कुलभूषणेभ्यः श्रीकृष्णजीमहोदयेभ्यः शतपथब्राह्मणञ्चाधीतम् । शतपथब्राह्मणस्याभ्यसने कण्ठस्थीकरणे चासन् काश्यां सुप्रसिद्धा इमे । रात्रिन्दिवं स्नान-सन्ध्या-स्वाध्यायैः श्रीमन्त इमे—'वेदमेवाभ्यसेन्नित्यम्' 'अहरहः सन्ध्यामुपासीत', 'स्वाध्यायोऽध्येतव्यः' इत्यादिविधीन् सनियममक्षरशः सार्थकीकुर्वन्तो जीवनं सफलतां नयन्तश्चास्मिन् काले महर्षीणामादर्शमस्थापयन् ।

इमे परमशिवभक्ताः सर्वदा भस्मोद्धूलितविग्रहा रुद्राक्षावृतकलेवरा स्वाध्याय-प्रवचनपरा एवादृश्यन्त । काश्यां सुप्रसिद्धस्य ज्योतिर्लिङ्गस्य श्रीवीरेश्वरस्य परमभक्ता आसन् । वयसो विंशतितमाद्वर्षादेव आत्मावीरेश्वरमन्दिरे प्रतिप्रदोषे

लघुरुद्राभिषेकमकुर्वन् । १९९३ तमे वत्सरे पत्नीवियोगः समजनि । ततः प्रभृति श्रीमतां जीवनं सर्वथा निवृत्तिमयं तपोमयञ्चाभूत् । धारण-पारणाव्रतमेभिः कृतम्, गोमूत्र-सिक्तानां यवानां पिष्टम्, मुद्गसूपञ्चेत्येतदेवैतेषामाहाराय समभूत् । वीरेश्वरमन्दिरे रुद्राष्टाध्याय्याः पाठचतुष्टयञ्च प्रात्यहिकमेवासीत् । पशुपतीश्वरमन्दिरेऽपि कियत्कालं यावत् पाठः प्रचलतिस्म ।

बहुवारं काश्यामवग्रहे सति भूयोभिर्ब्राह्मणैः सह केवलं जनता तापापहाराय यावज्जलवर्षणं अतिरुद्र-महारुद्रादीनि कृतानि वृष्टिश्चाभवदिति प्रत्यक्षमेवावलोकितं नैकशोऽस्माभिः । इमे सर्वदा उपकारनिरता एव आसन् । तदर्थं मानापमानयोरपि नासीदेतेषां क्वाचन चिन्ता । सर्वदाव्रतोपवास-स्वाध्यायादिभिस्तपोभिरेतेषां मुखे ब्राह्मं ज्योतिः प्रकाशतेस्म । मरणावधि छात्रेभ्यो वेदाध्ययनं कारयन्तिस्म । गतेषु दिवसेषु फाल्गुनेमासि तृतीयायां बुधे आतुरसन्यासमेतैर्गृहीतम् । तस्मिन्नाश्रमे तेषां **परमहंस परिव्राजकाचार्य श्रीसच्चिदानन्दस्वामीति** संज्ञा समजनि ।

फाल्गुनशुक्लप्रतिपदि बुधे च प्रातरेव ब्रह्मीभूता इमे । सनातनधर्मस्य सजीवो महानादर्शोऽद्य वाराणसीं वियोगविकलां व्याकुलयतीति कस्य वा चेतो नो दोदूयतेतरां सनातनधर्माभिमानवतः । मरणसमये ८० वर्षात्मकं वय आसीदेतेषाम् ।

एतेषां गङ्गासमाधिरपि महता समारम्भेण सम्पन्ना । अस्मिन् समये नगरस्य सुप्रसिद्धा विद्वांस आसन् । यथा- पण्डित-प्रकाण्डाः श्रीमन्तः पद्मनाभशास्त्रिणः, महामहोपाध्यायाः श्रीमन्तो लक्ष्मणशास्त्रिणः, श्रीविश्वनाथज्योतिर्विदः, श्रीमदनमोहनशास्त्रिणः, अन्ये च श्रीसेलहटजी—श्रीपुरुषोत्तमदासजी—भक्तवर श्रीरामसरणदासजी-प्रभृतयो गुरु-भक्ताः सहस्रावधिकाः पुरुषाः, स्त्रियः, बालाः, वालाश्च सम्मिलिता आसन् । समाधिसमये अन्नपूर्णा ब्रह्मचर्याश्रमस्य, श्रीविश्वनाथब्रह्मचर्याश्रमस्य च शतशो ब्रह्मचारिणो वेदध्वनिमकुर्वन् । रात्रौ तत्रैव श्रीदत्तमन्दिरे (मणिकर्णिकायाम्) आराधनम्, पूजनम्, अभिषेकः, जागरणमित्यादिकं विविधमभूत् । दशदिवस-पर्यन्तञ्च प्रत्यहं विविधशाखासहितानां वेदानां पाठः, दशोपनिषदाञ्च क्रमशः सार्थं प्रवचनम्, अन्यानि पुण्यानि मङ्गलकृत्यानि चाभवन् । ततश्च तेषां सुपुत्रैः श्रीमन्दिर्दीक्षित-गङ्गाधरमहोदयैः समस्तकाशीस्थविदुषां दक्षिणासभा, शतशः साधूनां ब्राह्मणानां भोजनमन्यानि च दक्षिणा वितरणादीनि कृत्यानि सप्ताहपर्यन्तं महता समुत्साहेन कृतानि । अत्र कालिदासीयं पद्यं स्मृतिपथमधिरोहति—

'अकरोत्स तदौर्ध्वदेहिकं पितृभक्त्या पितृकार्यकल्पवित् ।
नहि तेन पथा गतैषिणस्तनयावर्जितपिण्डकाङ्क्षिणः ॥'

धन्योऽसौ महर्षिकल्पो पुण्यवान् महात्मा पिता । धन्यश्चायं श्रीमान् विद्वदग्रेसरो भक्तिप्रवण उदारचेतास्तत्पु द्वितयमपि साम्प्रतिके सुधाग्युगे दुर्भिक्षकाले च स्वप्नसदृ मेव । एतेषां तनयद्वयं विद्यते—(१) श्रीमोनूदीक्षित-गङ्गाध मिश्रोऽग्निहोत्रिमहोदयः (२) श्रीमानम्बिकाचरण मि महोदयश्च । अस्माकं श्रद्धास्पदाः श्रीमन्तो गङ्गाधरमि महोदयाः काशीस्थ विद्वन्मण्डले मान्याः प्रतिष्ठिताश्च ना रिकाः सन्ति । इमे ज्योतिष्टोमयाजिनः सन्ति । एतेषां त यत्रयं विद्यते । श्रीमान् अमरनाथमिश्रः शास्त्री, (२) श्रीम पद्मनाभशर्म्मा, (३) भिषग्वरः श्रीमान् विश्वनाथ श कविराजः । तदस्माकं प्रियसुहृदः श्रीअमरनाथ शास्त्रि शेखावाटी-संस्कृत-कालेजे प्रधानवेदाध्यापकाः सन्ति । श्री द्मनाभ शर्म्मा पितृसेवायां याजमान्ये च निपुणः । तृ योऽस्माकमनुजकल्पः श्रीविश्वनाथकविराजश्चिकित्सा- विद्यते । त्रयोऽपि परम-पितृभक्ताः, कुलमर्यादापाल परमास्तिकाः, विनम्राः, सुशीलाश्च सन्तीति भगवान् विश्व तेषां कल्याणं समुन्नतिञ्च भूयोऽभ्यर्थयामहे ।

—सम्पादकः

भिषक्प्रवराः श्रीमदर्जुनमिश्रमहोदयाः ।



काशीस्थेषु सुप्रसिद्धेषु चिकित्सकधुरन्धरेषु श्रीमतामर्जुनमिश्रमहोदयानां स्थानं परमोन्नतमासीदिति नाविदितं संस्कृतविदुषाम् । आसन् खलु पञ्चाम्बुप्रदेशान्तर्गतहोसियारपुरमण्डले वडीवासीग्रामवास्तव्याः सदाचार-परायणाः सारस्वतकुलोद्भवाः श्रीठाकुरदत्तशर्म्माणः पण्डितमहोदयाः । तेषां गृहे ब्रह्मनिष्ठा वेदान्ताचार्याः श्रीपण्डित भानुदत्तशर्म्माणो जनिं लेभिरे । तैः काश्यामागत्य स्थितिः कृता । तेषामेव महानुभावानां गृहेऽस्माकं चरितनायकाः, प्रातःस्मरणीयचरणाः, पदवाक्यप्रमाण-पारावारपारीणाः, आयुर्वेद-मर्त्तण्डाः श्रीमदर्जुनमिश्रमहोदयाः, १९१० तमे वैक्रमेऽब्दे वैशाखशुक्ल-पञ्चम्यां जनिमलभन्त । बाल्यकालमतीत्य श्रीमन्तो गुरुचरणाः, विंशतिवर्षवयो यावत् महामहोपाध्याय श्रीदामोदरशास्त्रि-महामहोपाध्याय-श्रीतांत्याशास्त्रि-महामहोपाध्याय-श्रीगङ्गाधरशास्त्रि—श्रीलक्ष्मीनाथशास्त्रप्रभृतिभिः समं पूज्यपादानां परमगुरुवराणां बालसरस्वतीत्युपाधिकानां महामहोपाध्याय-श्रीबालशास्त्रिणां चरणेषु महाभाष्यान्तं सम्पूर्णं व्याकरणशास्त्रमधीतवन्तः । ततश्च काश्मीराधिपतेराश्रितेभ्यः भिषक्प्रवरेभ्यः सप्तवर्षाणि यावत् कृत्स्नमपि आयुर्वेदशास्त्रमधीतवन्तः, ततश्चौषधनिर्माणक्रिया-कौशलञ्च सम्यगधिगत्य लोके पीयूषपाणित्वमधिगतवन्तः । तदनन्तरञ्च शनैः प्रथितप्रभावा इमे स्वीयया सर्वविजयिन्या प्रतिभया काश्यामायुर्विज्ञानवित्सु सर्वप्रथमश्रेण्यां स्थानमासादयन्तः श्रीमत्काशिराजप्रभोः प्रधानचिकित्सक पदमवाप्तवन्तः । यावज्जीवञ्च ते समाजोपकारे लौकिककार्येषु च प्रणिहितचित्ता आसन् । सत्यामपि प्रचुरतरायां धनसम्पत्तौ निष्प्रत्यूहे च यशःसमृद्धौ रङ्के राजनि च सम-व्यवहारा अभूवन् ।

किं वच्मि तेषां साहित्यज्ञतां रसिकताञ्च । सङ्गीतशास्त्र-मर्मज्ञास्ते वीणावादने परां नैपुणीमध्यगच्छन् । सङ्गीतशास्त्रे तैः पुस्तकमपि लिखितमेकम् । सङ्गीतगुणज्ञेष्वपि काश्यां तेषां प्रधान मासनमासीत् ।

कियत् कालानन्तरं गार्हस्थ्य-जीवितफलस्वरूपं पुत्ररत्नमप्येकमप्यधिगतमासीत्तैः । परं दुर्दैवदुर्विपाकेनाष्टादशवर्षदेशीय एव स गुरुचरणानपारे शोकसागरे निमग्नानकरोत् । इतः परमपि किं विधुरं गुरुप्रवराणाम् । उक्तमेव—

> ब्रह्महत्याश्वमेधाभ्यां न परं पापपुण्ययोः ।
> पुत्रजन्म-विनाशाभ्यां न परं सुख-दुःखयोः ॥

एवं शोकसन्तप्ताः श्रीमन्तो हिन्दूकालेजीयायुर्वेदविभागे प्रधानाध्यापकपदं कियन्तमेव कालमल-

ङ्कृत्य तत्र स्वशिष्यवरं श्रीरामलालशर्म्ममहोदयं नियोजितवन्तः ।

तदनन्तरञ्च निर्विगणनया सर्वमपहाय आयुर्वेद प्रचाराय १९०१ तमेशवीये वत्सरं तैः "श्रीआयुर्वेद-विद्या प्रवेधिनी पाठशाला" संस्थापिता । तत्रानेक-देशादागतैश्छात्रैरायुर्वेदोपदेशं प्राप्तवद्भिः साम्प्रत-मपि दोदृश्यते यत्र तत्र देशेषु विजयवैजयन्ती । तेषु-स्व० पं० रामलालशर्म्माणः, हिन्दूविश्वविद्या-लयीयायुर्वेदविभागाध्यापकाः श्रीपुरुषोत्तमशर्म्मा-णः, लवपुरस्थाः श्रीनानकचन्द्रशर्म्माणः, प्रधानभूताः सन्ति । ततश्च १९१७ तमेशवीये वत्सरे पाठशाला सञ्चालनाय समितिः संस्थापिता, राजकीयनियमा-नुसारं राजेष्टिता च पाठशाला । अस्याः सम्यक् सञ्चालनार्थमेकलक्षाधिकं स्वीयं चराचरात्मकं सम्पत्तिजातं समर्पितम् । अन्तिमे च समये विद्या-लयप्रबन्धकर्तॄणां कार्यमसन्तोषजनकं विज्ञायात्मी-यामवशिष्टां सम्पत्तिमन्यान्येषु धर्मकार्येष्वर्पितवन्त इति पाठशालाया महती हानिः सम्वृत्ता ।

१९२३ तमेशवीये वत्सरे च सन्यस्यात्मानं कैलासवाससुखमन्वभवन् । तदीयौर्ध्वदेहिकी सर्वाऽपि क्रिया तदाज्ञयैव तदीयधर्मपुत्रेण सजाती-येन गुरुवर-कृपा-विशेषभाजनेन मयैव विहिता ।

श्रीविष्णुदत्तशर्म्मा, आयुर्वेदाचार्यः ।

एषा पाठशाला साम्प्रतमपि प्रचलति । औषधालय औषधवितरणमपि भवति । विशेषवृत्तस्तु नावगम्यतेऽस्माभिः ।

—सम्पादकः

" कविवराः श्रीमेधाकर शर्म्माणो " " बहुगुणाः "

एते खलु कविवेराः श्रीहिमालयोपकण्ठवर्ति गढवालाख्यजनपदभूषणभूतामलकनन्दातटस्थ श्रीनगराभिधां पुरीं निजजन्मनाऽलञ्चक्रुः । पङ्क्ति-पावनगौडवंशावतंसानामेतेषां बाल्यएव काऽपि नवनवोन्मेषशालिनी धीः समजायत; ययाऽचिरादेव पूज्यपाद स्वपितृचरणेभ्यः सुगृहीतनामधेयेभ्यः श्रीचण्डीदासशर्मभ्यः सर्वशास्त्राणामनर्गलं ज्ञान-मलभन् ।

तदानीं गढनरेशस्य चन्द्रवंशप्रदीपस्य श्रीप्रदीप शाहमहाराजस्य राजधानी श्रीनगरमेवासीत् । (सम्प्रति तद्वंशीयानां राजधानी भागीरथ्यास्तटे " टिहरी " इतिसंज्ञकं नगरं भूषयति) महाराजः कविवराणामल्पीयस्येव वयसि तादृशीं विलक्षण प्रतिभां दृष्ट्वा सुतरां प्रसन्नः सप्रश्रयं कविवरान् राजद्वारे सदा समागमनाय प्रार्थयामास । एते च महाभागास्तदनुसारं प्रत्यहं राजद्वारे गत्वा स्वसु-धासूक्तिभिर्विविधाभिश्च कविताभी राजसभां रञ्ज-यन्तिस्म । तदानींयावत्, राजगुरुपदं तत्पितृचरणा एवालङ्कर्वन्तिस्म । एवं याते बहुतिथेकाले, गतवत्सु च दिवं पितृचरणेषु, महात्मानः एते राजगुरुपदं राजसभाप्रधानपण्डितस्थानं, धर्माधिकारिपदञ्च समभूषयन् । गार्हस्थ्यसुखोपजीवनी पुत्रपौत्रा-दिका सम्पदपि सुयोग्या समुन्नता चाभूदेतेषाम् । एवं सतीष्वप्यखिलास्वभिमानसम्भारासु नाऽ

त्कलयाप्येतेष्वभिमानः। सुतरां सरलसरला स्वच्छा चासीदेतषां प्रकृतिः। निर्ममेषु निरहङ्कारिषु, निस्पृहेष्वेते प्रथमा अभूवन्

एकदा श्रीबदरीशयात्रार्थमागतो जयपुराधीशोऽतिष्ठद् द्वित्रिदिनं श्रीनगरे। तत्र च कविवराणां तादृशीं योग्यतां समवलोक्याऽऽप्रार्थयत, यद्भवन्तोऽस्मद्राजद्वारस्य प्रधानपण्डितस्थानमङ्गीकुर्वन्तु, ततश्चैकविंशतिग्रामाधिपत्यं (जागिर) भवद्भ्यः समर्पयिष्यते। परमत्यन्तं लोभविमुखाः परदेशगमनपराङ्मुखास्ते तथा नाङ्गीकुर्वन्। तेषां तां प्रतिभाविच्छित्तिं परामद्वैतनिष्ठाञ्च विलोक्य जयपुराधीशो बहुधा तांस्तदा समुपश्लोकितवान्।

ततः पण्डितवर्य्याणां तादृशं वृत्तमाकर्ण्य तन्निस्पृहतायाञ्च परं विस्मितोऽतिहृष्टश्च गढनरेशः श्रीप्रदीपशाहः सानुनयं विद्वद्वरेभ्यो ग्रामद्वयाधिपत्याङ्गीकरणायाऽभ्यर्थनामकरोत्। तैश्च राजाप्रसादमिति गत्वा तथाङ्गीकृतम्। सम्प्रत्यपि तद्वंशप्रभूतानां तत्राधिपत्यं विद्यते।

कविवर्य्यैश्च स्वप्रतिभापरिचयः स्वनिर्मित काव्येषु साधु दत्तः। पूर्वं तैः स्वपूर्वजपण्डित ज्योतिषरामशर्मकविनिर्मित—-मनोदयाख्यकाव्यस्य पूर्तिः कृता। ततः सरल-सरलया निकाममधुरया वाचा सद्भावरीत्यलङ्कारादिविलसितं सप्तकाण्डपरिमितं श्रीरामायणप्रदीपाख्यं काव्यं व्यरचि। सभाविलासाख्यश्चातिरसिकं सहृदयहृदयानन्दजनकं काव्यमपूर्णविंशति.वर्षावस्थायामेभी रचितमासीत्। एवं स्वतन्त्राः कविता अपि बह्व्यः सन्ति। उक्तकाव्यत्रयमस्मत्पार्श्वे विद्यते। परममद्यावध्यमुद्रितमेवास्ति। सम्प्रति तन्मुद्रणार्थं यतामहे।

तदानीं परमामभिख्यामापन्ना एते बहुभिर्महाराजैराद्दृता बहुमानिताश्च। तेषां प्रमाणपत्रेषु प्रायः "जयति जयति वाणी कापि मेधाकरीया" इति पुण्यश्लोकमुपलभ्यते।


एतेषां विशिष्टं जीवनं तथा कविताश्च प्राप्तेऽवसरे पाठकानां मनोरञ्जनाय सुप्रभाते प्रकाशयिष्यते। इत्यलम्।

—सत्यप्रसादशर्मा "बहुगुणः"
ओरिएण्टल कालेज लाहौर।

शिवगीतम्

विलसतु, मानसमनिशमुमेशे। ध्रु०—
अधिसुविशालभालतलमनुपललसितशरत्कुमुदेशे।
भृशममरेश-मुरारि-विरञ्चिभिरादरणीयनिदेशे ॥ १ ॥ विलसतु०
विततवीचिमयसुरसरिदतिशयशोभितजटाप्रदेशे।
गजवदनाऽऽननचुम्बनचञ्चलहैमवतीकसदेशे ॥ २ ॥ विलसतु०
नीलकण्ठतलविलसितवासुकि-वलयीकृतभुजगेशे।
श्वशुरतया प्रणयातिशयादनुरज्यति सततमगेशे ॥३॥ विलसतु०
परममुदारभावमुपगतवति भक्तिभराद्सुरेशे।
प्रबलवैरिदलदलनविनोदितसततविभीतसुरेशे ॥४॥ विलसतु०
मानसमृदुलभावभरभावितसौहृदवश्यधनेशे।
"भूप" कवेर्धिहृदयसरोरुहमुदितवतोव दिनेशे ॥५॥ विलसतु०

श्रीभूपनारायणझा शर्मा व्याकरणाचार्यः
साहित्यारत्नम्



पण्डित-परिचयः

१—परमगुरवः श्रीमद्राजारामशास्त्रिमहोदयाः ।

इमे खलु महानुभावाः काशीस्थ-सुप्रसिद्धविदुषां विश्वविख्यात-यशसां श्रीगङ्गाधर-श्रीशिवकुमार-श्रीदामोदर-श्रीतांत्याशास्त्रि-प्रभृतिविदुषां पितामहगुरवः, जगद्विख्यातप्रकाण्डपाण्डित्य-प्रभावानां श्रीमतां पूज्यपादानां बालसरस्वतीत्युपाधिभाजां महामहोपाध्याय-श्रीबालशास्त्रिणाश्च गुरव आसन् ।

एतेषां संक्षिप्तं जीवनचरितं पूज्यपादैर्महामहोपाध्यायैरस्माकं परमगुरुभिः श्रीमद्भिर्गङ्गाधरशास्त्रिमहोदयैः प्रकाशितं विद्यते । तदग्रे तदेव प्रकाशयिष्यामः ।

* * *

१. महामहोपाध्याय-श्रीबालसरस्वती-महोदयाः

पते खलु काशीस्थ-विदुषां समाराध्यपादाः परम-पावननामानो महामहोपाध्यायाः श्रीमद्बालशास्त्रिमहोदयाः ।

एतेषामपि विस्तृतं जीवनचरितं तैरेव शास्त्रिभिः प्रकाशितम् विद्यते । एतेषां प्रधानशिष्येषु केषाञ्चन नामानि । यथा—

सर्वतन्त्रस्वतन्त्राः पण्डितसम्राजो महामहोपाध्याय-श्रीशिवकुमारशास्त्रिणः, पदवाक्य-प्रमाण-पारावारपारीणाः पण्डित-सार्वभौमाः महामहोपाध्याय-श्रीगङ्गाधरशास्त्रिणः (सी० आई० ई० महामहोपाध्याय श्रीदामोदर शास्त्रिणो वैयाकरण-शिरोमणयः, महामहोपाध्याय श्रीतांत्याशास्त्रि-महोदयाः, आयुर्वेदमार्तण्डाः श्रीमदर्जुनमिश्र-महोदयाः, दैवज्ञवाचस्पतयः स्वधर्मधुरन्धराः श्रीविनायकशास्त्रिणः, महामहोपाध्यायाः श्रीदे-देवमिश्रमहोदयाः ।

इमे, एतेषां गुरवः, एतेषां शिष्याश्च सर्वे स्व-स्वकाले वस्तुत अद्वितीया एवासन्निति न कश्चन सन्देहावसरः ।

* * *

३—महामहोपाध्यायाः श्रीसुधाकरद्विवेदाः

एतेषां परिचयः खलु सूर्यस्य दीपदर्शनमिव । संस्कृतविद्वत्सु द्विवेदमहोदयानां परमोन्नतं स्थानमासीत् वरीवर्त्यस्माकं मनसि महद्गौरवम् । गणित-विज्ञाने नैता

कोऽपि संस्कृतज्ञो विद्वानिदानींतनेष्वभवत्, यस्य खलु मदोन्मत्ताः गणितविज्ञानपारदृश्वानः पाश्चात्या अपि मुखावलोकनं कुर्युः। न केवलं गणिते; संस्कृत-साहित्ये व्याकरणादिशास्त्रेष्वप्यप्रतिहतगतय इमे आसन्। संस्कृत-कविता अप्येतेषामद्भुता सवतिस्म। हिन्दीभाषायास्तु प्रधानस्तम्भेष्वन्यतमा आसन्। अभिनवहिन्दी-भाषाप्रणालीविधायकेषु, कविवरेषु चैतेषां प्रधानमासनमासीत्।

ज्योतिःशास्त्रे एभिर्नवनवा आविष्काराः, कठिनविषयेषु चोपपत्तयः, शतशो ग्रन्थानां परिष्करणम्, संस्करणम्, सम्पादनञ्च कृतमासीत्।

साम्प्रतमेतेषां पुत्ररत्नत्रये प्रथमपुत्राः श्रीअच्युतप्रसाद-महोदयाः 'तहसीलदार' पदे वाराणस्यां कार्यं कुर्वन्तिस्म। साम्प्रतं लब्धावकाशाः सन्ति।

द्वितीयतनयाः श्रीमन्तः कमलाकरद्विवेदाः, 'डिप्टीकलक्टरपदे' कार्यं कुर्वन्ति।

तृतीयपुत्राश्च श्रीपद्माकरद्विवेदाः ज्यौतिषाचार्याः काशीस्थराजकीयकालेजे स्वपितुः स्थान एवाध्यापयन्ति। इमेऽपि गणितविज्ञाने भारते प्रधानाः सन्ति। परं खेदस्थानमस्माकं यदिमे स्वकीयैरभिनवैर्गवेषणापूर्णैर्विचारैः प्रबन्धैश्च वैदेशिक-भाषामलङ्कृत्य सरस्वतीं वञ्चयन्तीति।

---

४. दैवज्ञवाचस्पतिः श्रीविनायकशास्त्रिमहोदयाः

इमेऽपि खलु काशीस्थविद्वत्सु प्रथितकीर्तयः श्रीमतां बालशास्त्रिणां सविधे लब्धव्याकरणसाहित्यादिशास्त्रव्युत्पत्तयः, महामहोपाध्याय-श्रीबापूदेव-शास्त्री, सी० आई० ई० महोदयेभ्यो लब्धज्योतिःशास्त्राः, तत एव ज्योतिष्पारदृश्वेति लब्धोपाधिकाः, प्रखर-प्रतिभा-शालिनो विद्वद्वरा आसन्। इमे ज्योतिःशास्त्रे वस्तुतो गणितविज्ञानावताराणां श्री बापूदेवशास्त्रिमहोदयानां सुशिष्या एवासन्। व्याकरणे, कवितानिर्माणे, वास्तुविद्यायाम्, हिन्दी-भाषालेखने, संस्कृत-लेखने, अन्येषु च विषयेषु पूर्णा विद्वांस आसन्। उदयपुरादिराजधानीषु राजमान्या विविध-लौकिककार्यकर्तारश्चासन्। एतेषां विस्तृतं जीवनं पुनः प्रकाशयिष्यामः। एतेषां ज्येष्ठसूनवः श्रीनाथशास्त्रिणो ज्योतिर्विदः, कनिष्ठाश्च श्रीअनन्तराम शास्त्रिणः, साहित्योपाध्यायाः, सुकवयश्च सन्ति।

५. श्रीमदाचार्य-श्रीदामोदरलाल-गोस्वामिमहोदयाः।

श्रीमन्मध्वसम्प्रदायाचार्याः, तर्करत्न-न्यायरत्न-साहित्याचार्यप्रभृति-विविधोपाधिधारिणः, परमपूज्यपादाः श्रीमन्तः श्रीदामोदरलालगोस्वामि-महोदयाः, सर्वतन्त्रस्वतन्त्र-प्रतिभाजुषाम्, विश्वविदितानां, महामहोपाध्याय-श्रीमद्गङ्गाधर-शास्त्रि-सी० आई० ई०-महोदयानां शिष्याः, कविचक्रवर्त्ति-साहित्यवारिधि-कविरत्नादिविविधपदवीविराजितानाम्, निखिलदर्शनाध्यापकानाम्, अस्माकं पूज्यपादानां महामहोपाध्याय-श्रीदेवीप्रसादकविचक्रवर्तिमहोदयानां गुरवश्च सन्ति। सर्वतन्त्र-स्वतन्त्रा इमे खलु आचार्यचरणाः काशीस्थविद्वत्सु-सर्वमान्याः, प्रधानाः, निखिलशास्त्रानध्यापयन्ति। मनोहरञ्च स्वरूपं वर्वर्ति। एते परमभक्ताः, विविधदर्शनग्रन्थानां टीकाकाराः, मर्मज्ञाः विद्वांसः सन्ति। समाजे, लौकिकेषु च कार्येषु नितरां बद्धादराः, नवयुवकानामादर्शभूताः काशीस्थ-विद्वन्मण्डले विजयन्तेतमाम्।

६. महामहोपाध्यायः श्रीगङ्गानाथ झा, एम०ए०, डी० लिट्०

एते खल्वस्माकं श्रद्धास्पदाः परमहितैषिणः प्रोत्साहका नवयुग-प्रवर्तकाश्च प्राच्य-पाश्चात्य-विज्ञान-धुरन्धराः सुप्रसिद्धा विद्वांसः सन्ति। काशीस्थविदुषां परमश्रद्धा-स्नेहभाजनभूता इमे संस्कृत-साहित्ये, हिन्दी-साहित्ये च प्रधानस्तम्भभूता विजयन्तेतराम्। प्रथममिमे प्रयागविश्वविद्यालयस्य प्रधानसंस्कृताध्यापका अभूवन्। ततश्च कियन्ति हायनानि यावत् काशीस्थराजकीय-संस्कृतकालेजे 'प्रिन्सिपल' पदे, 'रजिस्ट्रार' पदे चासन्। एतेषां समये कालेजस्य, परीक्षायाश्च महती समुन्नतिर्जाता। साम्प्रतमिमे प्रयागविश्वविद्यालयस्याध्यक्षपदे (वाइसचान्सलर) कार्यं कुर्वन्ति।

सम्पादकीयम्

नवीनो वत्सरः, विशिष्टांकश्च ।

अस्माकं विविधान्दोलनपूर्णोऽयं चतुर्थो वत्सरः सानन्दं स-साफल्यञ्च सम्पूर्ण इति सुप्रभातं पाठकान्, ग्राहकान्, अनुग्राहकांश्च सहर्षं सप्रणयञ्च प्रणमति । धन्यवादान् साधुवादाँश्च ददाति ।

एतस्मिन् वत्सरे बहवो विघ्नाः समुपस्थिताः, तथापीदं ग्राहकानां कृपया स्वातन्त्र्येण, स्नेहेन, श्रद्धया, सत्येन, स्वार्थराहित्येन च साफल्यं लब्धवान् । एतस्मिन् साफल्य-सम्पादनेऽर्थकष्टं दूरीकुर्वतां मध्ये मध्ये ऋणं दत्वा प्रथमत एवास्मान् कार्यक्षेत्रे सस्नेहं सानुरोधञ्च प्रवर्तयताम्, पूज्यपादानां सनातनधर्मस्वरूपाणां विद्यावयोवृद्धानां गुरुवराणां श्रीमतामनन्तरामशास्त्रिणामनन्तानुपकारान् न कदाचिदपि विस्मर्त्तुं शक्नुमः ।

ततश्च सम्पादन-कार्यं सर्वाधिकं साहाय्यं दत्तवताम्, सुप्रभात-निरीक्षकाणामस्माकं जीवनभूतानामादर्शविदुषां परमाराध्यचरणानां गुरुवराणां महामहोपाध्यायश्रीदेवीप्रसाद शुक्ल कविचक्रवर्तिमहोदयानां विषयेऽस्माकं कथनं तु शोभत एव नहि । एवमेवास्माकं प्रियसुहृदामाधुनिक-विद्वत्समाजे नवजीवनसञ्चारकानां समाजस्य प्रधानमन्त्रिणां श्रीमतां गोपालशास्त्रिणामपि महती सहायता विद्यतेऽस्य सम्पादने । एवञ्चान्येषां केषाञ्चन छात्राणामप्यस्य सम्पादनकार्ये महत् साहाय्यं वरीवर्ति । तदेतेषां सर्वेषां कृतज्ञता, उपकारश्च नास्माभिर्विस्मर्त्तुं शक्यः ।

एतद्वर्षचतुष्टयस्य साफल्यमनुभूय, तस्मा देवनिमित्तात् पञ्चमवर्षस्यायं प्रथमोऽङ्को विशिष्टाङ्क रूपेण प्रकाश्यते । एतस्मिन् विशिष्टाङ्के लेख-प्रेषकानां विद्वद्धुरीणानां वयं भृशमुपकारमुररीकुर्वन्तः सत्रपं तान्निवेदयामो यत्ते स्थानाभावादप्रकाशितानां स्व लेखानामप्रकाशनेनास्माकमुपरि मा कुप्यन्तु । वयं तान् लेखान् यथाक्रमं 'विशिष्टाङ्कलेख'-इति शीर्षकं दत्वा सविनयं सादरञ्च प्रकाशयिष्यामः । क्षाम्यन्तु लेखकमहानुभावाः ।

विशिष्टाङ्कप्रकाशने ज्येष्ठमध्याहने अहरहो यन्त्रा लये कार्यं कुर्वन्तो वयं सत्यमेव रुग्णाः संजाताः अस्मिन् ग्रीष्मावकाशे शान्तिमिच्छतामस्माकं शि सि महानयं भारो दुर्भरः समभूदिति वयम बहुत्र स्खलिताः । तदस्माकमेतत्स्खलितं सप्रण सकृपञ्च मर्षयिष्यन्ति महानुभावाः ।

वयमत्र नितरां परिश्रान्ताः बहिर्गच्छामः तदग्रिमाङ्कस्य प्रकाशनमस्माकं ज्यायांसो भ्रात प्रियसुहृदः श्रीविन्ध्येश्वरीप्रसादशास्त्रिणः सूर्योद सम्पादकाः करिष्यन्तीति वयं तेषामिमामुपकृ शिरसा वहामः ।

संस्कृत-साहित्य-सम्मेलनम् ।

अस्माकं सर्वेषामपि भारतीयानां संस्कृतज्ञानामियमेकैव महती सभा सम्मेलनाभिधा । इदानीं यावदस्याः १३ अधिवेशनानि कथमपि जातानि । अस्य सम्मेलनस्य यादृशं महत्त्वमपेक्षितम्, यावांश्च समारम्भोऽस्यावश्यकस्तदपेक्षया तु नास्ति किमप्यस्य महत्त्वम् । अतएवास्माकं विद्यते महती दुरवस्था यद्वयं न स्वीयां संघशक्तिमुत्तेजयितुं सबलीकर्त्तुंश्च प्रभवामः । बहवस्तु संस्कृतज्ञा नामाप्यस्य न जानन्ति । कर्णपुरेऽस्य त्रयोदशतमाधिवेशनं किमपि महत्वपूर्णमासीत् । तत्र केचन प्रतिनिधयोऽपि समागता आसन्—प्रधाननगरेभ्यः। ततः खलु कलिकात्तास्थवङ्गीय-संस्कृत-साहित्य-परिषदधिकारिभिः संघीभूय सम्मेलनस्य प्रधानकार्यालयस्तत्रैव परिषदवेक्षणे नीतः । एतस्मिन् कार्ये सुप्रसिद्धाः संस्कृतकार्यकर्तारः स्वर्गीय-श्रीपशुपतिनाथशास्त्रिणः, स्वर्गीयः श्रीगीष्पतिरायचतुर्धुरीण महाशयश्चेति द्वौ प्रधानावास्ताम्। परमेकवर्षं यावत्तत्रापि परिषदः कार्याधिक्येन वा, अन्येन केनापि कारणेन वा सम्मेलनस्य कार्येषु न काचन समुन्नतिरभूत् ।

सुरभारत्या दुर्दैवशाद्दिवं प्रयातेषु श्रीमत्पशुपतिनाथ शास्त्रिमहोदयेषु, शिथिलतां गतेषु च प्रधानमन्त्रिषु गीष्पतिमहोदयेषु चतुर्दशतममधिवेशनं कांगडीस्थ-गुरुकुल-विश्वविद्यालये निमन्त्रितमपि न संजातम् । समाकर्णितञ्च पश्चाद्यद् गीष्पतिमहोदया अपि वस्तुतो गीष्पतित्वमापन्ना इति ।

एवंविधे महति व्यतिकरे सम्मेलनस्य महती दरीदृश्यते दुर्दशा । एतत्सम्मेलनमद्य यावत् तत्संस्थापकानां विद्वद्धुरीणानां महामान्यानां महामहोपाध्यायश्रीगिरिधरशर्म्मचतुर्वेदमहोदयानां प्रबल-परिश्रमस्य फलभूतम् । तैरेवाद्यावधि यथाकथमपि सम्मेलनस्यास्य सञ्चालनं कृतम्- क्रियते च । परन्त्वेतस्मिन् सर्वभारतीये कार्ये कथमेकः सर्वं कर्त्तुं शक्नुयात् । तत्रापि चतुर्वेदमहोदया विविध-कार्य-व्यस्ता जयपुरराज्यान्तर्गताश्च सन्ति । तेऽपि स्वातन्त्र्येण किमपि विशिष्टतया कर्तुं न पारयन्ति । तत्रापि ते जयपुरे निवसन्ति कार्यालयश्च परिषदि कारागार इव कलिकातायां मञ्जूषापिहितस्तिष्ठति । तदेतत्सर्वथा दुर्भाग्य-विलसितमेव जानीमो वयं सुरभारत्याः । न चैष कालः स्वापस्य । तद्वयं सम्मेलनस्य प्रधानकार्यकर्तॄन् माननीयश्रीचतुर्वेद-महोदयांश्च सादरं विनिवेदयामो यदस्य सम्मेलनस्य चतुर्दशतममधिवेशनमत्र वाराणस्यां संस्कृत-साहित्य-समाज-प्रबन्धेन महता समारम्भेण च भवेत् । तत्रैव चास्मिन् महत्वपूर्णविषये विचारोऽपि भवेत् । येन सम्मेलनस्येयमवस्था दूरीभवेत् । तच्च भारते वास्तविकं कार्यं विधाय स्वीयोद्देश्यपूर्तावग्रेसरं भवेदन्यथा तस्य स्थितिरेव व्यर्था स्यात् । आशास्महे, यत् सम्मेलन-प्रधाना अस्मिन् विषये विमर्शयिष्यन्ति, समाज-मन्त्रिणा सह वार्तालापं विधाय कार्यस्यास्य स्वरूपं वास्तविकं विधास्यन्तीति ।

सुप्रभातमिदं सम्मेलनकार्याय सर्वथा सर्वदा च सन्नद्धमास्ते ।

* * * *

विद्वत्-सम्मेलनम् ।

काशीस्थ-सनातनधर्मपण्डितसभाधिकारिणः, साम्प्रतिकं धार्मिकं सामाजिकञ्च विप्लवमालोच्य, एतस्मिन् विषये सुदृढविचाराय मतैक्यसम्पादन-द्वारा सर्वत्र भारते सामूहिकरूपेण विद्वन्निर्धारितस्वरूपस्य सनातनधर्मस्यैकरूपेण प्रचाराय च संस्कृतविद्याप्रधानकेन्द्रभूतायामस्यां वाराणस्यामखिलभारतवर्षीय-विद्वत्सम्मेलनं कर्तुंकामयन्त इति समाकर्ण्य वयं परं प्रमोदमाप्नुमः । तेषामिममभिलाषञ्च सहर्षं सानुरोधञ्च समर्थयामः । अद्यत्वे परिदृश्यमाने महति विप्लवे सनातनधर्मस्य वास्तविकं स्वरूपं तिरोहितमिव विद्यते । सहस्रशो मतानि सन्ति । लक्षशश्च सनातनधर्मनेतारः सन्ति । सर्वेऽपि सर्वान्निन्दन्ति, विनाशयितुमीहन्ते । एवमेव प्रत्यहं प्रतिक्षणं ह्रासमासादयति भगवान् सनातनो धर्म इति नूनमिदं संस्कृतविदुषां ब्राह्मणानां प्रधानं कर्तव्यं यत्ते सावेगं सोत्साहञ्च स्वीयामवस्थामलोच्य

कामपि व्यवस्थां निर्धारयन्तु। ये च शास्त्रानभिज्ञा मूर्खाः सनातनधर्मं पैतृकसम्पत्तिं मन्यमानाः स्वार्थसाधनाय पण्डितान् जनतांश्च प्रलम्भयन्ति, ते कर्णौ धृत्वा निःसारणीयाः।

अन्यच्च—अलीगढ—प्रभृति द्वित्रनगरेषु केचन व्यापारिणो परीक्षादिविविधव्यापारसञ्चालनद्वारा निजोदरदरीं पूरयितुम् अखिलभारतीयानि विद्वत्सम्मेलनानि, पण्डितसम्मेलनानि, संस्कृतसम्मेलनानि च संस्थाप्य जनताः प्रवञ्चयन्ति। केऽपि विद्वांसस्तेषां नामान्यपि न जानन्ति, तेषां व्यापारिणां विरोधोऽपि जनताहिताय नितरामावश्यकः। एतदपि कार्यमनेन सम्मेलनेन विहितं स्यात्। अस्माकं देशे विदुषां व्यापकं सम्मेलनमपि नास्ति सैषा त्रुटिरपि निरस्ता भवेदिति सर्वे भारतीया विद्वांसोऽत्र विषये विचाराय प्रार्थयन्ते।

* * * *

कृतज्ञताप्रकाशः।

विशिष्टाङ्कप्रकाशने विशिष्टं चित्रादिसाहाय्यं दत्तवतामस्माकमनुग्राहकानां नितान्तमुपकारं सादरमुररीकुर्म्मः। कृतज्ञताप्रकाशनपूर्वकं सधन्यवादं तेषां नामानि प्रकाशयामः।

श्रीमान् पं० पद्माकरद्विवेदमहोदयाः

" " लक्ष्मीधरपन्तः धर्म्माधिकारी

" " श्रीनाथशास्त्री वेतालः

" " श्रीविष्णुदत्तमिश्रवैद्याः

" " श्रीगौरीनाथपाठकाः साहित्याचार्याः

व्यङ्ग्यचित्रस्यापि प्रबन्धः कृत आसीत्, परं समयाभावात् तन्न प्रकाशितम्। व्यङ्ग्यचित्रद्वयदाने अस्माकं प्रियसुहृदो भ्रातुः श्रीमोहनलालमहतो 'वियोगी'-महाशयस्य नितान्तमुपकारं बिभृमः। तत्प्रेरकत्वेन च प्रियभ्रातुः श्रीमतः शिवपूजनसहायस्य हिन्दीभूषणस्याऽपि भृशमुपकृताः स्मः।

अन्यैरपि यैरस्माकं मित्रैः, सुहृद्भिः छात्रैश्चास्मिन् विषये वयमुपकृतास्तेषामपि उपकारं कृतज्ञताप्रकाशनपूर्वकं स्वीकुर्मः।

लेखका अवश्यमवदधतु।

मुलताननगरस्थेन दीनानाथशास्त्रिणा "शिवराजविजयविमर्श"—शीर्षको लेखः सुप्रभाते प्रकाशनाय प्रहित आसीत्, अस्माभिः स लेखः विशिष्टाङ्के प्रकाशितः। साम्प्रतमेव सूर्य्योदये प्रूफदर्शनेनास्माभिर्ज्ञातं यत् स लेखः सूर्य्योदयेऽपि लेखकेन प्रहित इति। तदानीम् सुप्रभातेऽप्यस्य लेखस्य मुद्रणं जातमासीत्। श्रीमता दीनानाथपण्डितेन सुप्रभाते सूचनामदत्वा अस्माकञ्चास्वीकृतिसूचनामलब्ध्वा च यन्महत् साहसिक्यमनैपुण्यं बालत्वञ्च समाचरितम्, तदिदं महदनुचितमस्माकं मनसि, प्रियसुहृदां सूर्य्योदय-सम्पादकानाञ्च हृदये भृशमसन्तोषं खेदञ्चावहति। एवमेव महात्मभिरेतैः "क्षते प्रहारा निपतन्त्यभीक्ष्णमिति" शीर्षकलेखस्य कियानंशः सूर्योदये प्रकाशितः, स पुनरपि लवपुरीय उद्योते प्रकाशितो दृष्टः। सैषा लेखकधुरन्धरस्य शास्त्रिमहोदयस्य निन्दनीया नीतिः कस्य वा सहृदयस्य चेतसि न खटखटायिता भवेत्। वयं तु विशिष्टाङ्के तं लेखं प्रकाश्य खिद्यमानाः स्मः। साम्प्रतं वयं श्रीमतां शास्त्रिपादानां लेखान् न प्रकाशयिष्यामः। सूर्य्योदयसम्पादकानामपि ध्यानमत्र विषये सानुरोधं समाकर्षयामः।

अन्येभ्योऽपि लेखकेभ्यः साञ्जलि प्रार्थयामहे यत्तेऽप्यत्र विषये दत्तावधाना भवन्तु, पूर्वमप्येतस्मिन् विषये सम्पादकीयटिप्पण्यां निवेदितमस्माभिः। एतदधिकृत्य साम्प्रतिकानां साहित्यज्ञानां समाजे लेखकानां सम्पादकानाञ्च परामप्रौढताम्प्रख्यापयति।

सुप्रभात-नियमाः ।

(१) सुप्रभातमिदं सौरमासस्यान्तिमे सप्ताहे प्रकाशितम्भविष्यति ।

(२) एतस्य वार्षिकम्मूल्यम्—समाजनियमानुसारं माननीयेभ्यः—१२) मुद्राः, सहायकेभ्यः—३) मुद्राः, छात्रेभ्यश्च १॥) मुद्रा—भविष्यति ।

(३) अग्रिममासस्य प्रथमे पक्षे यस्य ग्राहकस्य सविधे पत्रं न गच्छेत्, तेन नूनं पत्रालये समन्विष्य कार्यालये पत्रं प्रहेयम् । तदा 'सुप्रभातं' प्रेषितं स्यात् । यदि ग्राहकाः पत्रं न प्रेषयिष्यन्ति, तदा कार्यालयो नोत्तरदायी भवेत् ।

(४) पत्र-प्रेषण-समये ग्राहक-सङ्ख्या नूनं लेखनीया । अन्यथा पत्रमवलोकितमेव न स्यात् ।

(५) अग्रिम-मूल्यमन्तरा सुप्रभातं न प्रदीयते, ग्राहकैर्धनादेशद्वारा (मनिऑर्डर) मूल्यं प्रेषणीयम् स्वीयः पूर्णसङ्केतश्च लेख्यः । वी० पी० द्वारा प्रेषणे तेषामेव समधिको व्ययः स्यात् ।

(६) पत्रोत्तरमभिलषद्भिश्चटिका नूनं प्रेषणीयाः । अन्यथा पत्रोत्तरं न दीयेत ।

(७) लेखकैरतिसरलभाषायां लेखाः प्रेषणीयाः, येन सर्वेऽपि पठितुमवगन्तुञ्च प्रभवेयुः ।

(८) लेखाः पत्रस्यैकस्मिन्नेव पृष्ठे पार्श्वयोः स्थानं विहाय, सुस्पष्टैः, सुवाच्यैः, सुन्दरैरक्षरैर्लिखित्वा प्रेषणीयाः । अन्यथा न तेषां प्रकाशनं स्यात् ।

(९) विवादग्रस्ताः, व्यक्तिगताक्षेप-पूर्णाः, ...पूर्णाः, पुस्तक-रूपाः, लेखा न प्रेषणीयाः । प्राचीनपुस्तकानां, सामयिकपुस्तकानां वा प्रकाशनं भवेत् ।

(१०) छात्राणां लेखाः, संस्कृत-समाचाराः, विज्ञान-समाचाराः, नूतन-वार्ताः सादरं प्रकाश्येरन् ।

(११) लेखानां प्रकाशने, अप्रकाशने, परावर्तने, अपरावर्तने वा सम्पादकस्यैवाधिकारः । को लेखः कदा प्रकाशितो भविष्यतीति सम्पादकाधीनमेव ।

(१२) सुप्रभाते सरल-सरसाः, भावपूर्णाः, अतिमनोहराः, कविताः प्रकाशिताः स्युः । साधारण-कविता-प्रेषणे लेखकैर्व्यर्थश्रमो न विधेयः ।

(१३) लेखाः, परिवर्तनार्थं समालोचनार्थञ्च पत्राणि, पुस्तकानि, 'सम्पादकः—सुप्रभातम्, काशी' अनेन सङ्केतेन; प्रबन्ध-विज्ञापनादि-विषयकानि पत्राणि च, 'व्यवस्थापकः—सुप्रभात-कार्यालयः, काशी' इत्यनेन सङ्केतेन प्रेषणीयानि ।

(१४) सुप्रभातस्य प्रचारो भारतस्य सर्वत्र प्रान्तेषु प्रचुरसङ्ख्यायां विद्यते । एतस्मिन् विज्ञापनदानेन महत्साफल्यं भवेत् । मुद्रिताः विज्ञापननियमाः कार्यालयतः पत्रं प्रेष्य, ग्रहीतव्याः ।

सर्वतन्त्रसिद्धान्त पदार्थ-लक्षणसंग्रहः ।

गौरीशङ्करभिक्षुकृतः, द्वितीयावृत्तिः । मूल्यम्-।।।)

वेदवेदाङ्गदर्शनस्मृतिकाव्यादिशास्त्रीय-पदार्थानां २७०० लक्षणवर्णनात्मकग्रन्थो नाद्यावधि प्रकाशितः । उपयोगित्वविषये—

'ये सन्ति विषयाश्चास्मिन् ते न दृष्टाः, परत्र वै ।
अत्र चैव समावेश्य सर्वसिद्धान्तलक्षणम्' इति

काशी-मद्रासादिस्था ८६ विद्वांसो मुक्तकण्ठमुद्घोषितवन्तः ।

सङ्केतः—मनभरी, पुट्ठी, जमालपुर, हिसार ।

Reg. N. 1348 A.

सचित्रम् सामुद्रिक रहस्यम् ।

ले०—श्रीकालिका प्रसादशर्म्मा, राजज्योतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथानवीनमेव । एतेन हस्तरेखानां गुरुं विनैव सम्यक् परिचयो भवति। मूल्यम् १।) मुद्रा ।

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि कोक्कोक विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनी-प्रभृतयः स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि,तेषां संयोगाः, अलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते। एतस्यैका प्रतिः सर्वैरपि स्वसविधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्यः ।

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद्‌ व्याकरणम् पठनीयम् । एतेन हिन्दी भाषायां निबन्धलेखन-अनुवादादिज्ञाने महत्सौकर्यं त मूल्यम्—आणकाष्टकम् । मार्गव्ययः—=)

सूर्यचरितम् वा ऋतुचरितम् ।

ले०—तारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः।

गोलविद्या-विषयकं नूतनं महाकाव्यम् ।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः । गोलविषये नूतनं संस्कृत महाकाव्यम् । सर्वथा द्रष्टव्यम् । मूल्यम्—(मार्गव्ययः पृथक् ।

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-ती

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया बालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृत काव्येषु नाटकेषु पुराण-पु केषु च समागतानां देशानां नदीनां स्थानानां प तानाञ्चाधुनिकी स्थितिस्तेषां नामानि च सलि सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् ॥) आण

महाकवि बाणभट्टः ।

लेखकः—सुप्रभात-सम्पादकः श्रीकेदारनाथ श

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र भट्टस्य जीवनविषये महत्वपूर्णा, मननीया च षणा वरीवर्ति । छात्राणां कृते नितरामुपकार निबन्ध-बन्धः । मूल्यम् =) मार्गव्ययः -)

सर्वेषां प्राप्तिस्थानम्

मैनेजर, सुप्रभात कार्यालय, बनारस सिटी ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौर ज्येष्ठः, १९८५ वैक्रमाब्दः

पञ्चमवर्षे Vol:. 5

June 1928.

द्वितीयसङ्ख्या No. 2

मह्रारा

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिमुदस्यदू मेदुलारा विलुम्पन्, नयदधिसुरभाषाभाषि जागर्तिभावम् ।
विबुध-विहग-वादैराह्वयद् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती, साहित्यवारिधिः

सम्पादकः—
श्रीकेदारनाथशर्म्मा सारस्वतः

व्यवस्थापकः—
श्रीगिरीशशुक्लः, न्यायाचार्यः ।

वार्षिकम्मूल्यम्—३)
सालनीयेभ्यः—१२)
अस्याङ्कस्य मूल्यम् ।)
छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

लेख-सूची ।

सुप्रभात-ग्राहका विज्ञाप्यन्ते ।

विशिष्टाङ्कश्चिरान्मुद्रितो विद्यते य खलु विशिष्टाङ्कमप्राप्य कार्यालये तदर्थं पत्राणि प्रेषयन्ति । ते खलु विशिष्टाङ्कस्य विशिष्टं साहाय्यमाणकचतुष्टयं ।) चिटिकाद्वारा, वार्षिकमूल्येन वा सह सत्वरं संप्रेष्य विशिष्टाङ्कमासादयन्तु । तेषां विशिष्टाङ्कः सुरक्षितो विद्यते । तैर्न कापि चिन्ता कर्तव्या । मन्यामहे, बहुभिर्ग्राहकैरेषा सूचना न पठितेति वारं वारं विशिष्टाङ्ककृते पत्रं प्रेषयन्ति । साम्प्रतमुत्तरं न दास्यामः ।

—व्यवस्थापकः

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रं संस्कृत-मासिक-पत्रम् ।

पञ्चम-वर्षे | सौर—ज्येष्ठः । १९८५ वैक्रमाब्दाः | द्वितीय-संख्या

अभिभाषणम् । *

(अवशिष्टांशः)

(२) अथेदानीं साहित्यापरपर्यायस्य काव्यस्य यत्किञ्चिदपि स्वरूपं चिन्त्यते । सुधियामेतद्विदितप्रायं यत् काव्यस्वरूपमीमांसाया अलङ्कार-गुण-रीति-रस-ध्वनिगुणीभूत-व्यङ्ग्यरूपाः षड्ध्वानः । तत्र केचन प्राञ्चः सालङ्कारयोः शब्दार्थयोरेव काव्यत्वमिच्छन्ति । किन्तु तेषां मते—

"हारो नारोपितः कण्ठे मया विश्लेषभीरुणा ।
इदानीमावयोर्मध्ये सरित्-सागर-भूधराः ॥"

"सद्यः पुरीपरिसरेषु शिरीषमृद्वी
गत्वा जवात्त्रिचतुराणि पदानि सीता ।
गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥"

इत्यादीनां कथं काव्यत्वं स्यादिति त एव जानन्ति । 'हारोनारोपित' इत्यादौ शब्दालङ्कारः, शिरीषमृद्वीत्यत्रार्थालङ्कारश्च वर्तत एवेत्यसदुक्तकाव्यलक्षणं नाव्याप्तमिति चेत्, अनयोः श्लोकयोश्चमत्कारजनकतावच्छेदकः अलङ्कारविशेषः, अन्यः कोऽपि धर्मो वा, इति निर्णये सचेतसः स्वचेतसि एव

(*संस्कृत-साहित्य-समाजस्य चतुर्थाधिवेशने सभापतिपदमलङ्कुर्वतां श्रीमदाचार्यआनन्दशङ्करबापूभाई ध्रुव [एम्० ए० एल्एल्० बी०, प्रो०—वाइस चांसलर हिन्दू विश्वविद्यालय, काशी] महोदयानाम्)

प्रमाणीकुर्वन्तु । अस्माकं चेतसि तु नात्रालङ्कारश्चमत्कृतिं जनयति । तस्मात् शब्दार्थयोरनलङ्कृतित्वेऽपि काव्यत्वं न हीयते, अपितु अलङ्काराभावेऽपि कविता-रमणी-' इयमधिक-मनोज्ञा वल्कलेनाऽपि तन्वी' इति प्रतिभाति । एतेन—

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलङ्कृती ॥

इति काव्यप्रकाशकारिकामाक्षिपन् चन्द्रालोकस्तेजः सामान्याभावे निक्षिप्तः । ''अनलङ्कृती'' इति कारिकांशस्य स्फुटालङ्कारविरहेऽपि न क्षतिरिति व्याख्यां विदधद् वृत्ति-कारः कारिकाकाराद् भिन्न इत्यन्यदेतत् ।

एवं गुणादीनामपि काव्यत्वमिच्छद्भिः—

ततः कुमुदखण्डाभो निर्मलं निर्मलोदयः ।
प्रजगाम नभश्चन्द्रो हंसो नीलमिवोदकम् ॥
स[हनूमान्] ददर्श, ततः सीतां पूर्णचन्द्रनिभाननाम् ।
क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव ॥
वियूथां सिंहसंरुद्धां बद्धां गजवधूमिव ।
चन्द्ररेखां पयोदान्ते शारदाभ्रैरिवावृताम् ।
क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् ।
संघातमिव शोकानां दुःखस्योर्मिमिवोत्थिताम् ॥

इत्यत्र उपमालङ्कार एव चमत्कारजनक इति कथमपल-पितुं शक्यते । अत्र रससत्त्वेऽपि ध्वनिसत्त्वेऽपि च चमत्कार-जनकतावच्छेदकस्त्वलङ्कार एवेति सहृदयहृदयसाक्षिको निःसन्देहोऽनुभवः ।

'वक्रोक्तिः काव्यजीवितम्' इतिवदन्तोऽपि प्रष्टव्याः ।

'आलक्ष्यदन्तमुकुलाननिमित्तहासै—
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।'
'अनियतरुदितस्मितं विराजत्—
कतिपयकोमलदन्तकुड्मलाग्रम् ।

इत्यादि बालाकृतिस्वभाववर्णने का वक्रोक्तिरिति ।

एवमेव—

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

इति श्लोकत्वमागतः शोकः रामायणस्य बीजत्वमा-पन्नोऽपि न स एव रामायणम् । राम-भरत-लक्ष्मण-सीता-रावण-मन्दोदरीप्रभृतीनां चारित्र्यगुणोल्लेखने, सरित्कानन-मुनिनिवासाश्रमादिवर्णने च या प्रतिभा, या च कला-सन्निवेशचातुरी प्रकटीकृता आदिकविना साऽपि रामायणस्य काव्यत्वे हेतुः । इति काव्यतत्त्वस्य ध्वनिमात्रत्वं वा कथं प्रतिपाद्येत । अपि च—

इह समदशकुन्ताक्रान्तवानीरवीरु-
त्प्रसवसुरभि-शीतस्वच्छतोया वहन्ति ॥
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥

इत्यत्र कोलङ्कारः ? को ध्वनिः ? को वा रसः ? अस्तु वा सर्वत्र सरित्काननादिवर्णने शान्तरसोद्दीपनविभावत्वम् । रसः शान्तः, तस्योद्दीपनं चेति विप्रतिपत्तिविषयत्वमेतदित्या-क्षेपोऽप्यास्तां तावत् । शान्तस्य रसत्वासम्भवस्य विवाद-ग्रस्तत्वात् । एतावदेव विमृश्यताम्—यत्, विभावादी[illegible] रसोद्बोधकत्वे रसरूपोद्बोधितपदार्थस्य काव्यत्वावच्छेदकत्वम् तदुद्बोधकविभावादीनां वा ? । प्रथमे कल्पे सर्वेषां काव्य[illegible] भवन्मते सरसत्वारोपामभ्यर्हितत्वे तारतम्याभावापत्तिः [illegible] द्वितीये कल्पे विभावादीनामेव काव्यत्वावच्छेदकत्वम् [illegible] नतु रसस्य । एवं सति 'रमणीयार्थप्रतिपादकः श[illegible] काव्यम्'—इति पण्डितराजोक्तिरेव विजयतेतराम् । [illegible] किं नाम रमणीयत्वमिति प्रश्नस्य किमुत्तरम् ? चमत्[illegible] रूपो लोकोत्तराह्लादविशेष इति चेत् ; एतादृशाह्लाद[illegible] कस्य शब्दस्य काव्यत्वमस्तु । किन्तु कीदृशः शब्द आ[illegible] जनयतीति प्रश्नोऽनुत्तरित एव स्यात् ।

तस्मादलङ्कार-गुण-रीति-वक्रोक्ति-रस-ध्वन्यादीनां का[illegible] ङ्गत्वेऽपि न काव्याङ्गित्वम् । 'एतावानस्य महिमा ततो[illegible] यांश्च काव्यपूरुषः'—इति सञ्चिन्त्य विरम्यते ।

❀ स्नातक-शिक्षा ।

भो भोः स्नातकसज्जनाः ! क्षणमहं
यत्किञ्चिदावेदये
ज्ञात्वा शास्त्रसमुद्धृतं तदखिलं
श्रोतव्यमत्यादरात् ॥
किं तत्पापमलापहारनिपुणं
गाङ्गं पयो निर्मलं
सश्रद्धं न निपीयते बुधजनै-
श्चेत्काचकूपीगतम् ॥ १ ॥
धृत्वा ब्रह्मविधिं, गुरून् कठिनया
संतोष्य शुश्रूषया
ध्यात्वा मोहतमोऽपहारचतुरा
देवीं गिरामीश्वरीम् ॥
यत्किञ्चित्प्रथमाश्रमे श्रमपरै-
र्ज्ञानं तपः संचितं
माभूत् कामवशाद्भयादपि पुन-
स्तत्र प्रमादो मनाक् ॥ २ ॥
सद्वंशात् सुकुमारसुन्दरतनुं
दत्तां प्रसन्नां शुभां
साध्वीं कोमलभाषिणीं निजगृह-
व्यापारपट्वीं दृढाम् ॥
सेवायां निरतां सदा श्वशुरयोः
सौभाग्यचिह्नान्वितां
कान्तां संपरिणीय धर्मविधिना
गार्हस्थ्यमाश्रीयताम् ॥ ३ ॥
सन्मार्गेणार्जितं द्रव्यं धर्मकार्ये नियोज्यताम् ।
तोष्यन्तां ब्राह्मणा गावः स्त्रियो मित्राणि बान्धवाः ४
पाठ्यन्तां बालकाः सर्वे विद्यां विज्ञानमेव च ।
ब्रह्मचर्यप्रभावश्च शिक्षणीयः प्रयत्नतः ॥ ५ ॥
बाल्यकालोपयमनं मत्वाऽनर्थस्य कारणम् ।
सर्वस्मिन् भारते विज्ञाः ! कार्यं तस्य निवारणम् ॥६॥
वृद्धानामपि यत्र स्याद्विवाहो भयदायकः ।
तत्र रोधो विधातव्यो बोधश्चेत् फलवान् नवः ॥७॥
बाल्यकालविवाहेन जायते बलसंक्षयः ।
मेधा तेजश्च विद्या च समेधन्ते न कर्हिचित् ॥ ८ ॥
वृद्धकालविवाहेन नरस्य मरणं ध्रुवम् ।
वैधव्यं च भवेन्नार्यास्तस्माद्घोरतरो हि सः ॥९॥
नाशिक्षिताः स्त्रियः कुर्युः सम्यग् गार्हस्थ्यसंविधाम् ।
नारीशिक्षाप्रचारार्थं तस्माद्यत्नो विधीयताम् ॥१०॥
दुर्बलस्य न संमानो दुर्बलस्य न जीवनम् ।
बलसंचयकारित्वाद्व्यायामः सुमहान् गुणः ॥११॥
अश्लीलगीतादथ मार्गभुक्ते-
रलभ्यभावो वितातिं भजेत ।
तस्मात्त्वेतत् परिवर्जनीयं
न वर्जनीयः सुगुणः कदाचित् ॥ १२ ॥
ये च धर्मद्रुहः केचित् केवलं बलमाश्रिताः ॥
उन्नतौ कण्टकीभूतास्छेत्तव्यास्ते ध्रुवं ध्रुवम् ॥ १३ ॥
संघभावेन सिद्ध्यन्ति कार्याण्यस्मिन् कलौ युगे ।
तस्मात्संघविधानेन साध्यं साध्यं सुबुद्धिभिः ॥१४॥
धर्मसंरक्षणेनैव सर्वं स्याद्रक्षितं ततः ।
रक्षणीयः सदा धर्मः स्मर्तव्यं भीष्मभाषितम् ॥१५॥

* जयपुरविश्वविद्यालयस्य, उपाधिवितरणमहोत्सवे दत्ता ।

"इदं च ते सर्वपरं ब्रवीमि
पुण्यं पदं तात महाविशिष्टम् ॥
न जातु कामान्न भयान्न लोभाद्
धर्मं त्यजेज्जीवितस्यापि हेतोः"

श्रीसूर्यनारायणशर्मा आचार्यः
जयपुरम्

इन्द्रजाल-मञ्जूषा ।

(शेषांशः)

लेखक-श्री पं० मंगलदेव शास्त्री, एम० ए०, पी-एच्० डी०

एवमेव गच्छति काले कस्मिंश्चिद् वासरे सततमेवं मिथ्यावचोभिः स्वकर्णमापूरयतस्तानखिलान् कर्णेजपान् समाहूय—" नित्यं युष्माकं वचांसि शृण्वन्नहं सञ्जातोऽस्मि खिन्नचेताः । अद्य तद्गृहमेत्य सर्वेषामभिमुखं तामिन्द्रजाल-मञ्जूषामीक्षिष्ये "—इत्येवमब्रवीद् भूपतिः । जाताः सर्वेऽपि सज्जाः । राजा च समादाय तानखिलान् साकमात्मना समुपस्थितस्तस्यामात्यस्य गेहम् । सच बहुमानपुरस्सरं धन्यंमन्यः स्वागतमतिमात्रं महीपतेरन्वतिष्ठत् ।

अथ तेन सत्कृते समुपविष्टे च बहुमूल्यासनोपरि राजनि, अन्येषु च यथायोग्यमासनमधिष्ठितेषु तयो राजमन्त्रिणोरेव उक्तिप्रत्युक्तिरूपः संवादः संवृत्ते ।

राजा—आर्य ! साम्प्रतमेव मया सार्द्धमास्थानमण्डपमेतु भवान् । अस्ति कस्मिंश्चिद् विषये मन्त्रणीयम् ।

मन्त्री—देव ! प्रसीदति चेद्भवाँस्तर्हि रहसि किञ्चित्क्षणं निर्धार्य भवतां पुरस्तादुपतिष्ठामि ।

समेप्येतदाकर्ण्य परस्परमिङ्गितं विदधुः ।

राजा—मन्त्रिन् ! कार्यस्य गुरुतया सपदि गन्तव्यमित्येव मदीय आदेशः ।

मन्त्री—[सवितर्काशङ्कम् सविनयञ्च] महाराज ! क्षणं यावद्गहसि गन्तुमनुजानातु ।

राजा—[विविधविकल्पेषु निमज्जन्] रहसि किं निमित्तं गमनम् ?

मन्त्री—देव ! क्षणं यावदेव प्रकोष्ठे गत्वा साकमार्येण परिषत्प्रासादं यामि ।

[सर्वेऽप्यधिकारिणः पुलकितवदना बभूवुः]

राजा—अस्तु । गच्छतु प्रकोष्ठे परं मद्द्वितीयो भवान् ।

मन्त्री—(सभयम्) भगवन् ! मावाक्षीद् भवान् कष्टम् । नैष प्रकोष्ठो भवतो गमनाय समुचितः । यत इहास्ते मामकीना मुख्या सम्पद् । साच भवतो दृष्ट्यातिलघ्वी ।

राजा—(नूनमयमिन्द्रजालिक इत्यवितथो लोकप्रवाद इति मन्यमानः) मन्त्रिन् ! नूनं मयापि नियतमेव प्रकोष्ठाभ्यन्तरे गन्तव्यम् ।

मन्त्री—भवतु—यथाभिरोचते श्रीमते ।

अथ राजा सहान्यैर्निजाधिकृतवर्गैरन्तः प्रविवेश ।

तत्रहि प्रकोष्ठे नासीदासनम्, नापि काचिदलङ्करणसामग्री, न चापि बहुमूल्यं किञ्चिदन्यत् । केवलं भित्तिनिखातालयेषु पुस्तकान्यासन् संस्थितानि । एकतश्चत्वारो वेदाः । एकतो ब्राह्मणानि । अन्यतो ह्युपनिषन्निबन्धाः । अपरतो नाटकाख्यानकथादर्शनप्रभृतिप्रबन्धाः । मध्येभागं चैका रजतमयी मञ्जूषा स्थिता आसीत् । अनुयायिभिः ससङ्केतं बोधितो राजा तदुद्घाटनाय समादिष्टवान् । राजादेशानुसारं च यावदेव सोद्घाट्यते तावदेव स तस्यां मलिनानि छिन्नानि च चीवराणि वीक्ष्य साश्चर्यं सभयं चाह " किमेतत् ?" इति ।

मन्त्री—देव ! पुरातनानीमानि मे दारिद्र्यावस्थावासांसि एतदर्थञ्च सुगूढं संरक्षितानि मया "यदहमहरहः वीक्ष्यैतानि पुरातनीं मामकीनामवस्थां स्मरेयम् ।

च न विस्मरेयम् । पुरा कीदृशोऽहमासमिति । सभायां नित्यमेवमुपस्थानात् प्राक् क्षणमहमेतानि पश्यामि । कदाचित् परिदधाम्यपि । कीदृश आसमहम् ? किं भवत्यैश्वर्ये ? किं जायते दारिद्र्ये ? केवलमेतावत्स्मरणार्थमेव सयत्नमेतानि स्थापितानि !"

सत्यमयमेवाभ्युपायो येन क्षणक्षयिणि सापाये भोगे रज्यन्ति मानवाः, सम्पत्तिस्सद्भावेऽपि च "कोऽर्थान् प्राप्य न गर्वितः" इतिसाधारणनियममुल्लङ्घ्य अनुत्सेकस्तेषां दृश्यते । एतानेवोद्दिश्य महामतेर्भर्तृहरेः सुभाषितम्—

'अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः ।
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥'

राजा च साश्चर्यं सस्नेहञ्च तद्वचो निशम्य, सभायामेत्य, सर्वांस्तान् पिशुनांस्तिरश्चक्रे भर्त्सयामास च । अनन्तरं च स्वबन्धूनब्रवीत् । उदतेजयन्त हि मां भवन्तः सर्वदा तत्ताडनाय । अद्य दास्येऽहं तस्मै दण्डम्, तच्चैतत् यत् अद्यप्रभृति स मे प्रधानामात्यः सञ्जातः । अत ऊर्ध्वञ्च यदपि किञ्चित्स आदिशति तन्मदीय एवादेश इति कृत्वा सर्वैरङ्गीकर्तव्यम् ।

अयं भावः—यदुन्नतिपदाभिलाषिभिः स्वीया पूर्वावस्था नहि विस्मर्त्तव्या । अथवा-एतदेव महात्मनां लक्षणम्, यत्

धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ॥

ये दीनेषु दयालवः स्पृशति यानल्पोऽपि न श्रीमदो
व्यग्रा ये च परोपकारकरणे हृष्यन्ति ये याचिताः ।
स्वस्थाः सन्ति च यौवनोन्मदमहाव्याधिप्रकोपेऽपि ये
तैः स्तम्भैरिव सुस्थितैः कलिभरक्रान्ता धरा धार्यते ।

इति

मुद्राराक्षस-परीक्षणम् ।

लेखकः—'श्रीहरि-भाऊ', काशी-विद्यापीठस्थः ।

१ रचनाकाल :—

नाटकमिदं विशाखदत्तकविना विरचितमस्ति । अस्य पितुर्नाम पृथुदत्त आसीत् । अयं कविः कस्यापि सार्वभौमभूपतेः सकाश आसीदिति नाटकाज्ज्ञायते । यथा हि, प्रस्तावनायाम्, "आज्ञापितोऽसि परिषदा" अन्यत्र च, "काव्यविशेषवेदिन्यां परिषदि प्रयुञ्जानस्य ममापि चेतसि सुमहान् परितोषः प्रादुर्भवति" इति लिखितमस्ति । कः खलु स सम्राडासीदिति प्रश्नः समुद्भवति । नाटकस्य भरतवाक्यस्य "सश्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः" इत्यवतरणेन तु स्पष्टं भवति यच्चन्द्रगुप्त एवायं सम्राडिति । किन्तु कोऽयं चन्द्रगुप्तः? । इतिहासाज्ज्ञायते यच्चन्द्रगुप्तनाम राजत्रयमासीदिति । आदिमश्चन्द्रगुप्तमौर्यो योऽस्य नाटकस्य नायको विद्यते । अयमीशवीयशतकात्प्राक् चतुर्थे शतके आसीत् । तत्समये नाटकस्यास्य रङ्गभूम्यवतरणमसम्भवनीयम् । द्वितीयश्चन्द्रगुप्तः खिष्टाब्दस्य चतुथ शतकेऽभूत् । किन्तु नास्य राज्यं विस्तीर्णम्, न वाऽस्य काचिद्विद्वत्परिषदासीत् । तदस्य कवेरेतस्य पार्श्वेऽस्तित्वं कथं सम्भवति । तृतीयश्चन्द्रगुप्तो विक्रमादित्येति नाम्ना प्रसिद्ध आसीत् । अयं खिष्टाब्दस्य पञ्चमे शतके बभूव । तस्यासीदेका विद्वत्सभा यस्यामयं कविर्विशाखदत्तोऽविद्यत । नाटक एव प्रमाणमेकं दृश्यते यत् "म्लेच्छैरुद्वेजमाना

भुजयुगमधुना पीवरं राजमूर्तैः" इतिहासविदां विदितचरमेव यच्चन्द्रगुप्तादस्मात् पूर्वं हूणादीनां भारतवर्षस्योपर्याक्रमणं भवतिस्म । अयं च चन्द्रगुप्तस्तस्याक्रमणस्य प्रतिकारं करोति स्म । पद्यस्थ 'म्लेच्छ' शब्दो हूणादिपरकीयानां निदर्शको, 'राजमूर्तिश्च' चन्द्रगुप्तविक्रमादित्यस्य । अतो ज्ञायते यदयं कविः पञ्चमे शतके विक्रमादित्यस्य सकाश आसीदिति । तस्यैव परिषदि नाटकमिदं विरचितं दर्शितं च । शिवभक्तोऽयं कविरासीदिति मङ्गलाचरणाज्ज्ञायते ।

२ कथाविषयः—

खिष्टाब्दात्प्राक् चतुर्थे शतके मगधदेशे नन्दपतिर्भूपतिर्बभूव । तस्य कुसुमपुरं पाटलिपुत्रं वा राजनगरमासीत् । एतन्नगरं शोणनदीतीरे वर्तते । अधुना 'पटना' नाम्ना च द्योतते । नन्दराज्यं साम्राज्यमासीत् । तत्र विद्वांसोऽतीव पूज्यन्ते स्म । एकदा काबुल-कन्दहारतः कश्चिद्विद्वान् ब्राह्मणस्तत्र समायातः । तस्य विद्यानिपुणतामवलोक्य राजा बहु तुतोष । सर्वे विद्वांसश्च स्वपदापहरणशङ्काशङ्किताः सन्तस्तं ब्राह्मणं विद्विषन्ति स्म । एकस्मिन्दिवसे राजभवने श्राद्धमासीत् । तदर्थं ब्राह्मणस्यैकस्यावश्यकता बभूव । सर्वे ब्राह्मणास्तं ब्राह्मणमवमन्तुं सुसन्धिमिमां मत्वा तमेव निमन्त्रयाञ्चक्रुः । स आगत्य पात्र उपविवेश । विरूपं तं पितृस्थानोपविष्टं दृष्ट्वा राजा भृशं चुक्रोध, तं च दूरंचकार । तेन क्रुद्धो ब्राह्मणः स्वशिखां मुक्त्वा प्रतिज्ञामकरोत् यदहमिमां शिखां न तावन्निबध्नामि यावन्नन्दान्मूलतो नोत्पाटयामीति । अकिञ्चनस्यास्य ब्राह्मणस्य प्रतिज्ञया मादृशभूपतेः किमिति विचिन्त्य स राजा निःशङ्कोऽभवत् । ब्राह्मणस्तत्स्थानं त्यक्तवान् ।

अयं ब्राह्मणः चाणक्याभिधानः स्वकुशलतया नन्दस्य वृषलीपुत्रं चन्द्रगुप्तं सज्जीकृत्य तस्मै नन्दराज्यं दातुं निश्चितवान् । बहवो जनास्तेन सहासन् । स तेषां विष्णुशर्मणे क्षपणकवेषं दत्त्वा तं जीवसिद्धिनाम्ना नन्दानां राक्षसनाम्नः प्रधानमन्त्रिणः सकाशे निवेशयामास । राक्षसो नन्दानाममात्य आसीत् । राज्ञा सह तस्य मतवैचित्र्यमासीत्, तस्मात् स निकटवर्तिभूपतेः पर्वतेश्वरस्य मन्त्री बभूव । स राक्षसो नन्दपार्श्वे पुनरप्यागतवान् । एतदेव कारणं यतः पर्वतेश्वरस्य कुसुमपुरपतिभिः सह वैरं समुत्पन्नम् । चाणक्येनार्द्धराज्यप्रदानाशया स नन्दविरुद्धसहायार्थं निमन्त्रितः । तस्य पर्वतेश्वरस्य मलयकेतुना पुत्रेणात्मनः सुमित्रस्य भागुरायणस्य मैत्रीमकारयत्, मलयकेतोः सहचारी शिखरसेनो नामासीत् । तस्य भद्रभट-हिङ्गुरात-पुरुषदत्त-बलगुप्त राजसेनादिभिः सहातीव बुद्धिचातुर्येण साहचर्यमकारि । सिद्धार्थकनामानं स्वकीयं गुप्तचरं राक्षसमित्रस्य चन्दनदासस्य सकाशे पूर्वमेव निवेशितवान् । एतैर्गुप्तचरैः स्वकार्यं गुप्तरीत्या कृतम् । तेनहि चाणक्योऽन्ते सफलयशा बभूव ।

पुनश्च तेन शक-यवन-किरात-काम्बोज-पारसीकादीनां म्लेच्छराजानां नन्दविरुद्धं साहाय्यं गृहीतम् । स्वयं च स सहपर्वतेश्वरः कुसुमपुरमरुणत् । तदा राजा नन्दोऽपि स्वपितृव्यपुत्रं सर्वार्थसिद्धिं राज्येऽधिष्ठाप्य राक्षसं च दुर्गरक्षणाय निवेश्य स्वयं च ससैनिकः सह-भ्रातृगणै

संग्राममवातरत् । क्रमशस्तस्य राज्ञः सर्वे परिजना हता बभूवुः । तदनन्तरं विजयी चन्द्रगुप्तो महता समारोहेण पाटलिपुत्रं प्रवेष्टुमैच्छत् । सर्वार्थसिद्धिर्निर्विण्णो भूत्वा गुप्तमार्गेण तपस्यायै वनमियाय । स्वामिवंशनाश-पीड़ितहृदयश्चान्द्रगुप्तप्रतिशोधकृतनिश्चयः परममित्रचन्दनदासगृह-निवेशितपत्नीपुत्रः सुरङ्गमार्गेण नगरान्निःसृत्य पर्वतेश्वरं च गत्वा तस्मै सम्पूर्णकुसुमपुरराज्यं दातुं निश्चित्य तेन सह सन्धिमकरोद्राक्षसः । स चन्द्रगुप्तस्य नाशार्थं विषकन्यामप्येकां जीवसिद्धिद्वारा प्राहिणोत् । किन्तु जीवसिद्धिश्चाणक्यचर आसीदित्यतः स चाणक्यः सर्वं षड्यन्त्रं ज्ञातवान्, तयैव विषकन्यया च पर्वतेश्वरं जघान । अन्यच्च भागुरायण-द्वारा मलयकेतुं कथयामास यदर्धराज्यदानप्रसङ्गभयेन चाणक्येन घातितस्त्वज्जनकः, न जाने त्वामपि किमयं कुटिलः करिष्यतीति । अनेकवारकथनेन सोऽपि कुसुमपुरात्पलायितः । चन्द्रगुप्तस्य राज्यं निष्कण्टकं चाभवत् ।

तदनन्तरं वैरोधकनाम्ना राज्यार्द्धप्रतिवचनलुब्धेन पर्वतेश्वरबन्धुनासह चन्द्रगुप्तो हस्तिन्येक उपविष्टः पताकादिभिः सुशोभितं पुष्पपुरं प्रवेष्टुकामो द्वारदेशमागतः तस्मिन्स्थाने राक्षसेन चन्द्रगुप्तस्य वधार्थं कूटयन्त्रमेकं कारितम् । तस्मिन्कर्मणि च दारुवर्मादयो नियुक्ता आसन् । किन्तु राक्षसस्य दुर्दैवदुर्विपाकात्तद्यन्त्रद्वारा वैरोधकहतकस्य मृत्युरभवत् । सर्वार्थसिद्धिस्तु वन एव चाणक्येन गुप्तचरैर्घातितः । अनया रीत्या हतरिपुश्चन्द्रगुप्तो नन्दराज्येऽभिषिक्तः, तर्ह्यपि राक्षसस्त्यक्तप्रयत्नो नाभूत् ।

राक्षसस्येष्टसिद्ध्यर्थमिदानीं मलयकेतुरेवाशातन्तुः । मलयकेतवे “कुसुमपुरराज्यप्रदानं सुचिन्त्य तमागत्य च सोऽब्रवीत्, यदहं नन्दानामृणमपनेतुं कामये, न राज्यम् । नन्दध्वंसकानां प्रतिशमो हि मेऽभिमतः, राज्यं तु भवदर्थमेव । प्रजा अप्यस्मानिच्छन्ति, ताः साहाय्यं दास्यन्ति । कुटिलमतेश्चाणक्यस्य चन्द्रगुप्तस्य च हननमेव मेऽभीष्टम् । अनेनैव कुटिलमतिना चाणक्येन विषकन्यया ते पिता घातितः ” इति । मलयकेतुरुद्यतो बभूव । किन्तु राक्षसस्य दौर्भाग्यात्सर्वाण्यपि कर्माणि विफलानि बभूवुः । चाणक्यस्य च सदैव विजय एवाभवत् । अन्ते राक्षसश्चन्द्रगुप्तस्यामात्यपदमलमकरोत् । तदा चाणक्योऽपि राक्षसस्य “चन्द्रगुप्तो नन्दस्य वृषलीपुत्रः अतएव नन्दकुलाङ्कुर ” इति कथनेन समाधानं चकार । नाटकेऽस्मिन्नस्योल्लेखस्तु नास्ति । अनेन प्रकारेण चाणक्यस्य नन्दोत्पाटिनी चन्द्रगुप्ताय निष्कण्टकराज्यदायिनी प्रतिज्ञा पूर्णा बभूव । मुद्रया राक्षसः परिगृहीतस्तस्मादस्य नाटकस्य ‘मुद्राराक्षसम्’ इति नामाकारि विशाखदत्तेन कविना । एतावानेव विषयो नाटके प्रतिपादितः ।

(अपूर्णम्)

अमूल्यान्यश्रूणि ।†

लेखकः—श्रीशिवपूजनसहायः, हिन्दीभूषणम् ।

अश्रु हि नाम महदमूल्यं पवित्रं च किमपि वस्तु—यदि तद्विशुद्ध-हृदयादुत्पन्नं भवेत् । यस्य हि नरस्य नयने नयनाम्बुभिर्न पवित्रिते तस्य नयने मयूरपिच्छे चन्द्रकाणीव दर्शनीये एव । यस्य नयनयोः भक्त्याः, करुणायाः, वात्सल्यस्य, पश्चात्तापस्य, प्रेम्णः, आनन्दस्य वा अस्राणि नोद्भवन्ति, तस्य नेत्रे केवलं शोकाश्रुवर्षणायैव सुरक्षिते तिष्ठतः । धन्यं तस्य जीवितम्, येनैतादृशानामस्राणामविरल-वर्षैः सफलिते नयने ।

अश्रूणि प्रवाहितान्यासन् श्रीरामकृष्णपरमहंसेन—अखण्डभक्त्या समाधौ । अश्रूणि प्रवाहितान्यासन् स्वामिना रामतीर्थेन—एकान्ते स्थित्वा भगवद्वियोगे ।

पुनः, अश्रूणि प्रवाहितान्यासन् महात्मना गान्धिना-चौराचौरी-हत्याकाण्डे पश्चात्तापं कुर्वता । तथा अश्रूणि प्रवाहितान्यासन् महामनसा पूज्यपादेन मालवीयेन-जलियाँवागे नर-पिशाचस्य डायरस्य वह्निवर्षेण भृष्टानां निःशस्त्रभारतीयानामुपरि ।

अन्यच्च—अस्राणि मुञ्चन्ति लक्षशः असहायाः प्रपीडिता हिन्दुविधवाः-भारतीय-पुरुष-समाजस्य हृदयहीनतायाम्, स्वार्थपरतायाम्, नृशंसतायाम्, क्लीवतायाम्, मूर्खतायाञ्च । अस्राणि प्रवाहयन्ति वराक्यः असहाया गावः-गोरक्षादम्भिनां सनातनधर्मं त्यक्तवतां धर्मध्वजानां हिन्दूनामुपरि ।

पुनः, अस्राणि प्रवाहयति स्वदेशीयवस्त्रम्-गोवलालितानां विदेशीयवस्त्राणां पक्षपातिषु-बाबू'पद'-वाच्येषु क्लीवेषु । अश्राणि प्रवाहयति वृद्धभारतम्-कलहप्रियाणां स्वार्थान्धानां देशनेतॄणां शुष्क-तर्क-शक्तौ ।

ओम्, अश्रूणि मुञ्चन्ति धर्मशास्त्राणि-स्वदेशस्य वास्तविक-परिस्थितिमूढानामजगरावताराणां पण्डितानां स्थूलबुद्धौ । अस्राणि मुञ्चन्ति आँग्लशास्त्रकाः (ग्रेजुएट्)–आङ्ग्लशिक्षाया निष्फलत्वे ।

अधुना, अस्राणि प्रवाहयिष्यन्ति हतबुद्धयो भारतनेतारः—देशप्रेमोन्मत्तैर्नवयुवकैर्निकटभविष्यत्येव नेतृत्वाधिकारस्य गृहीतत्वात् । अश्रूणि प्रवाहयिष्यन्ति वेदशास्त्रज्ञाः पण्डिताः–सामाजिकक्रान्तिकारिणामदम्यशक्तौ, अचिन्तनीयायाञ्च सफलतायाम् । अश्रूणि मोदयन्ति-चौकामार्गिणो हिन्दवः अस्पृश्यानां दलितानाञ्च जातीनां विधर्मप्रवेशद्वारा हिन्दुधर्मविनाशाय संनद्धतायाम् ।

प्रियपाठकाः ! भवन्तोऽप्यश्रुमोक्षणं कुर्वन्तु एतेषूपर्युक्तेषु नयनाम्बुप्रवाहकेषु प्रवाहिनीषु च ।

---

† सुप्रभातस्य विशिष्टाङ्ककृतेऽयं लेखः परमसुहृदा शिवपूजनसहायेन हिन्दी-भाषायां प्रेषित आसीत् । सोऽयमद्य मया संस्कृतेऽनूद्य प्रकाशितः— सम्पादकः

❀ भगवन्तं प्रति भारतस्य विनयः ❀

(गज़लगीतिः)

हे गणेय¹गुणावधे ! करुणानिधे ह्यवधीयताम् ।
दृष्टिरुज्ज्वलभारते तव आ-रते विनिधीयताम् ॥१॥
एष भूवलये विशेषविधोऽस्ति देशवरश्चिरात् ।
सर्वसभ्यसमाज एष विभाति यद्रमणीयताम् ॥२॥
किं तु कोऽपि निदर्शयेद्बत देशमीदृशमुन्नतम् ।
यस्य वाङ्मयमावहेन्निगमागमैस्तुलनीयताम् ॥३॥
यत्र कुङ्कमकेसराः कलयन्ति कामपि सुच्छविम् ।
देश ईदृश ईक्ष्यते किमिहापरोऽपि विचीयताम् ! ॥४॥
रत्नराशिरलुण्ठि लुण्ठनतत्परैर्बहुधा परैः ।
किन्तु साम्प्रतमप्यसौ वहते परं महनीयताम् ॥५॥
कूटनीतिनियन्त्रणैः परतन्त्रता नाभूयदा ।
देश एष दधौ तदा तव देव ! दुर्दमनीयताम् ॥६॥
अस्य खड्गतले बलेन परैः शिरो नमितं पुरा ।
काममद्य कठोरनीतिपरैः परैर्बत जीयताम् ॥७॥
किन्तु सभ्यवराः ! समेत्य भवद्भिरेव विचार्यताम् ।
एकतामवलम्ब्य कार्य-पथे यथावदुदीयताम् ॥८॥
वक्तृतां परिहाय संप्रति कर्तृतां कलयेम चेत् ।
उन्नतिः स्वयमावृणीत मनागिदं परिचीयताम् ॥९॥
निर्मले यमुनातटे, निकटे कदम्बमहीरुहाम् ।
अत्र वै विहरन् हरिर्विदधे महाकमनीयताम् ॥१०॥
किन्तु सैव विहारभूरपहारभूर्जनिताऽधुना ।
हेलयापि दयानिधान ! दयादृगत्र विधीयताम् ॥११॥
तावकीं करुणामुपेत्य न वेत्स्यसौ हृदि वेदनाम् ।
धार्मिकेषु दयावता भवता द्रुतं समुदीयताम् ॥१२॥
गीयते निगमागमैर्गुणगौरवं तव सर्वदा ।
नाथ ! संप्रति मञ्जुनाथगिरा कियद्बत गीयताम् ? ॥

भट्ट श्रीमथुरानाथशास्त्री [साहित्याचार्यः]
[प्रोफ़ेसर, महाराजा-कालेज, जयपुर]

१ 'गणनीयं तु गणेयम्' अमरः । उज्ज्वला या सा तस्यां रते सन्मार्गाधिष्ठिते इत्यर्थः ॥ १ ॥ विभाति जानाति ॥ २ ॥ वक्तृतां वचने कर्तृतां विहाय कार्यं प्रति कर्तृभावं चेत्कलयामस्तर्हि उन्नतिःस्वयं वरणं कुर्यादित्याशयः ॥ ९ ॥ अपहारस्य विलुण्ठनस्य भूमिः ॥ ११

२

पौराणिकप्रणवे द्विजेतरस्याप्यधिकारः ।

[ले०—श्रीराधाप्रसादशास्त्री, धर्मशास्त्राचार्यः]

(पूर्वतोऽनुवृत्तः)

२७६ पृ. निर्णयसिन्धौ—

अत्र केचिद् इत्युपक्रम्य वैदिकमन्त्रो विप्रेण पौराणस्तु शूद्रेण पठनीय इति प्रतिज्ञाय पाद्मपुराण-वचनं प्रमाणत्वेनोपन्यस्तम्

नहि वेदेष्वधीकारः कचिच्छूद्रस्य विद्यते ।
पुराणेष्वधिकारो मे दर्शितो ब्राह्मणैरिह ॥

तत् खण्डनं च तत्रैव कृतम् । नाध्येतव्यमिदं शास्त्रं वृषलस्य तु सन्निधौ—इति कौर्मपुराणनिषेधं प्रस्तुत्य इदं वचनम्—

अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेण च
श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचन ॥
श्रौतं स्मार्तं च वै धर्मं प्रोक्तमस्मिन्नृपोत्तम ।
तस्माच्छूद्रैर्विना विप्रं न श्रोतव्यं कदाचन ॥
इति पुराणाधिकारे भविष्योक्तिः ।

पृ० २३४ पृ० २३५ निर्णयसिन्धौ यमः—

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः ।
न केनचित् समसृजत् छन्दसा तं प्रजापतिः ॥

व्यासः—

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च,
नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ॥
कर्णवेधो व्रतादेशो वेदारम्भः क्रियाविधिः,
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ॥
त्रेताग्निसंग्रहश्चैव संस्काराः षोडश स्मृताः,,

इत्युक्त्वा आह—

नवैताः कर्णवेधान्ता मन्त्रवर्जं स्त्रियाःक्रियाः,
विवाहे मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश,,

मरीचिः—

अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते,

इयंपरिभाषा सर्वार्था तेन शूद्रधर्मेषु विप्रेण मन्त्रः पठनीयः। सोऽपि पौराण एव एवं स्त्रीणामपि- उपरिष्टात्सर्वत्रामन्त्रतः इति स्थले वेदमन्त्रवर्ज- मित्यर्थः। मन्त्र इति पौराणिको मन्त्रः सोऽपि स्वयं शूद्रेण न पठनीयः किन्तुविप्रद्वारैव[1] एवं पठनवि- षयेऽनधिकारवतः प्रतिष्ठायामपि शूद्रादीनां नाधि- कारः स्त्रीणामनुपनीतानां शूद्राणाञ्चजनेश्वरस्थापने नाधिकारोऽस्ति विष्णु र्वा शंकरस्य वा, स्थापने इत्यत्र स्पर्शने इत्यपि पाठः तेन तैः स्पर्शोऽपि न कर्तव्यः । शूद्रसंस्कृतप्रतिमायाः प्रणमने दोष- मप्याह—

यः शूद्रसंस्कृतं लिङ्गं विष्णुं वापि नमेन्नरः,
इहैवात्यन्तदुःखानि पश्यत्यामुष्मिके किमु,, ॥
शूद्रो वा ह्युपनीतो वा स्त्रियो वा पतितोऽपि वा
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते"

इत्थं विरुद्धान्यपि वाक्यानि दृश्यन्ते ।

२३६ पृष्ठे निर्णयसिन्धौ कृत्यकल्पतरूः

चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्य सुखार्थिभिः,
भैरवोऽपि चतुर्वर्णैरन्त्यजानां तथा मतः ",
मातरः सर्वलोकैस्तु स्थाप्याः पूज्याः सुरोत्तमाः"
लिङ्गं गृही यतिर्वाऽपि संस्थाप्य तु यजेत्सदा ",

शिवसर्वस्वे भविष्ये—

यस्तु पूजयते लिङ्गं देवदेवञ्जगत्पतिम्,
ब्राह्मणः क्षत्रियो वैश्यः शूद्रोऽपि मत्परायणः '
तस्य प्रीतस्तु दास्यामि शुभाँल्लोकाननुत्तमान्

तिथितत्त्वे स्कान्दे—

शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये,
तस्याहमर्चां गृह्णामि चन्द्रखण्डविभूषिते ॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थश्च सुव्रते,
एवं दिनेदिने देवं पूजयेदम्बिकापतिम् ॥
सन्यासी देवदेवेशं प्रणवेनैव पूजयेत् ,
नमोऽन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ॥ इति

स्त्रीशूद्राधिकारप्रदर्शनंपुराणप्रसिद्धजीर्णलिङ्ग पूजाविषयं निषेधविषयं च नूतनस्थापितप्रतिमा- विषयम् ", इतिव्यवस्था ॥ ॐकारसहितेऽष्टाक्ष मन्त्रोपदेशो वीरमित्रोदये प्रदर्शितः तद्विरुद्धं व पराशरमाधवीये ॥

त्रैवर्णिकमात्राधिकारा हि श्रुतिः प्रसिद्धा, ॐका श्चतथाविधः ।

सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति
नृसिंह ता० १—३ इति श्रुतेः

लक्ष्मीमिति श्रीबीजमित्यर्थः । स्मृतेरपि न

पतितयोरितिविष्णुः, तयोः समीपे न वेदाध्ययनं कार्यम् ॥ प्रणवेस्वपि वेदादित्वात्तदध्ययनमपि तैर्न कार्यम ॥ अतएवाचार्यैः प्रपञ्चसारेऽभिहितम् ॥

अस्य तु वेदादित्वात् सर्वमनूनां प्रयुज्यते ह्यादौ इति । अतएव ग्रन्थारम्भे महर्षिभिः पौरुषेयग्रन्थेषु सर्वत्र ॐकारस्थाने अथ शब्दः प्रयुज्यते । तद्यथा

अथातोब्रह्मजिज्ञासा—अथातो धर्मजिज्ञासा-अथातो हिमशैलाग्रे देवदारुवनालये इत्यादि ॥

मङ्गलापरपर्यायाथशब्दसमानार्थक ॐकारः प्रयोक्तव्यः । नच प्रयुज्यते ततो व्यज्यते श्रुत्यादौ ॐकारस्य प्रयोगः पौरुषेयग्रन्थस्य चादावथशब्दस्य माङ्गलिकत्वञ्चोक्तमुभयोः शिष्टवचनेन—

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणो मुखात् ॥
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

व्यवस्था चात्रेत्थम्-सर्वानुरोधेन कार्य्या ।

वेदाध्यनविषये स्पष्टमेवानधिकारः । तदर्थज्ञाने तदनुष्ठाने तच्छ्रवणे च । तथा केवलप्रणवोपदेशेच तस्य वेदसारत्वात् । तथा चोक्तं तैत्तरीयोपनिषदि-

यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्योध्यमृतात्सम्बभूवेत्यादि ।

यः ॐकार श्छन्दसा वेदानां मध्य ऋषभः श्रेष्ठः सर्ववेदेभ्योऽमृतात्–अमृतमयेभ्यस्सारभूतो बभूव। दध्नः सारभूतं नवनीतमिव । अतो वेदे शूद्राणामनधिकारित्वात् केवले प्रणवेप्यनधिकारः । परन्तु-ऋग्यजुषां स्वयमृक्त्वेऽपि यजुर्मन्त्रपाठात् यजुर्वेदत्वव्यपदेशेन पूर्वमीमांसायामुपांशूच्चारणमुपांशु यजुषेति बोधितं व्यपदिष्टम् । यथा तत्र यजुर्धर्म उपांशुधर्मः ऋचि क्रियते, तथात्र पुराणश्रवणे पुराण द्वारा वेदार्थज्ञाने तदनुष्ठाने सप्रणवपुराणतन्मन्त्र श्रवणे च शूद्रस्याप्यधिकारः । तथा चोत्तरमीमांसायां प्रथमाध्यायस्य तृतीयपादे ३८ सूत्रे तद्भाष्ये चोक्तम्-तथाहि—

श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च । ४८ ।

इतश्च न शूद्रस्याधिकारः । यदस्य स्मृतेर्वेद श्रवणप्रतिषेधो वेदाध्ययनप्रतिषेधस्तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधः शूद्रस्य स्मर्यते । श्रवणप्रतिषेधस्तावत्—“ अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् । पद्युहवा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यमिति च । अतएवाध्ययनप्रतिषेधः । यस्य समीपेऽपि नाध्येतव्यं भवति, स कथमश्रुतमधीयीत, भवति च वेदाध्ययने जिह्वाच्छेदो धारणे शरीरभेद इते । अतएव च अर्थात्–अर्थज्ञानानुष्ठानयोः प्रतिषेधो भवति न शूद्राय मतिं दद्यादिते द्विजातीनामध्ययनमिज्यादानमिति च । येषां पुनः पूर्वकृतसंस्कारवशाद्विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न शक्यते फल प्राप्तिः प्रतिषेद्धुं ज्ञानस्यैकान्तिकफलत्वात् । श्रावयेच्चतुरोवर्णान् इति चेतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात् । वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितम् । इति शांकरभाष्यम्–मनुरप्याह—

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः ॥
प्रब्रूयाद्ब्राह्मणस्तेषां नेतराविति निश्चयः ॥

इदं स्मृतिवचनं किं त्रैवर्णिकानां वेदाध्ययनं विधत्ते-आहोस्वित् वेदातिरिक्ताध्ययनमिति । सामान्यत उभयोरध्ययनविधानं युज्यते कर्मविशेषा-

श्रवणात्-इति यदुच्यते तन्न, वेदाध्ययनविधिस्त्रैव-र्णिकानां वेदग्रहणार्थं पूर्वमेव द्वितीयाध्याये; कथितः। गृहीतस्य वेदस्य विस्मरणमपि दर्शितम्।

स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि
दैवे कर्मणि युक्तो हि बिभर्तीदं चराचरम्॥३।७५॥

तथा च दशमाध्याये पुनरध्ययनविधिः। अधीयीरन्निति न युज्यते। अप्राप्तप्रापको हि विधिः। अयंहि पूर्वतः प्राप्त एव तर्हि तदस्तु वेदातिरिक्त विषयाध्ययनविषयविधिः। तदपि न, तथाहि सति अदृष्टं स्वीक्रियेत वेदाध्ययनवत् काव्य-नाटकाद्यध्ययनेष्वपि ब्रह्मचारिनियमाचरणं स्यात्। (आख्यातोपयोगे) इति पाणिनिसूत्रेण तदध्यापयितुरपादानत्वमपि स्यात् इष्यते च नटस्य गाथां शृणोति-इतिवत् देवदत्तस्य काव्यनाटकादीन् शृणोति नियमपूर्वकाध्ययने तदपादानत्वस्योदाहरणमुपाध्यायादधीते। इति वेदाध्ययनविषय एवेष्यते। अतः अश्रुतमपि कर्म वेद इति योग्यतया संबध्यते। तत्र विधिर्न युज्यते पूर्वमेव-तत्प्राप्तेः तेनानुवादोऽयम्। स चानुवादः संकीर्णजातौ वाच्यायां तस्याश्च वर्णभ्य उत्पत्तेः। युज्यते एव ततः पूर्वम्। निष्कर्षस्तु वेदातिरिक्तपुराण नाटकाध्ययनं गुरोः सकाशात् श्रवणरूपम् वेदानधिकारिणः शूद्रादयोऽपि कुर्युरिति। इममेव निष्कर्षं दशमाध्यायस्य शूद्रवृत्तवर्णनावसरे स्ववृत्या जीवनमपि धर्म इति धर्मप्रसंगात् अन्यदपि किञ्चिद् शूद्रविषये मनुर्बोधितवान्—

न शूद्रे पातकं किञ्चित् न च संस्कारमर्हति।
नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनम्

अस्यार्थः—लशुनादिभक्षणेन शूद्रे न किञ्चित् पातकं न ब्रह्मवधादावपि। अनेन वचनेन शूद्रस्य न किञ्चित् पातकं भवति इति वक्तुमुचितम्। तत्र तस्य प्रायश्चित्तोपदेशात्। उपनयनादिसंस्कारं नार्हति, अमन्त्रतः संस्कारान् शूद्रजातीये निर्दिष्टं श्चार्हति

अस्य शूद्रस्य धर्मे स्नानोपवासदेवतार्चनादौ न नित्योऽधिकारः, तेनाकरणे न प्रत्यवैति येषु स्नानोपवासव्रतादिषु नित्याधिकारो नास्ति अकरणे प्रत्यवायाभावस्ताद्दृशेभ्यो धर्मेभ्यो न प्रतिषेधः॥

तथा अन्यदपि—मनु० १२७—

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तमनुष्ठिताः।
मन्त्रवर्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥

प्रकृतत्वात् शूद्रा इतिविशेष्यमध्याहर्त्तव्यम्। मन्त्रवर्जमिति पुराणादिश्रवणे न दुष्यन्ति इति सूचयति तच्छ्रवणं प्रत्युत प्रशस्तमिति बोधयति। तथा अपरमपि मनुवचनं तत्रैव—

यथा यथा हि सद्वृत्तमातिष्ठत्यनुसूयकः।
तथा तथेमं चामुञ्च लोकं प्राप्नोत्यनिन्दितः,

अस्यार्थः—परगुणानिन्दकः शूद्रो द्विजात्याचार निषेधरहितं यथा यथानुतिष्ठति, तथा तथा जनैः निन्दितः इह लोके उत्कृष्टः स्मृतः स्वर्गादिलोकं च प्राप्नोति, तस्मात्तेषामुत्कर्षेऽमत्सरैर्द्विजैर्भाव्यम् धार्मिके लौकिके वा शास्त्राविरुद्धे। परन्तु एत वास्माभिरवसेयम्, यत्

अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्नतु,

अस्याः स्मृतेरुदाहरणं वक्तव्यं तथा च धर्ममपि लोकविद्विष्टं यथा न भवेत् तथोपदेष्टव्यम्

उपदेश्यैरपि जनताऽविरोधेनैव शास्त्रसम्मत उपदेश्य आचरणीयः। अन्यथा लोकविद्विष्टस्य धर्म्यस्याप्याचरणेऽस्याः स्मृतेर्निर्विषयता स्यात्तच्च नेष्यतेऽस्माभिः स्मृत्यादरवद्भिः श्रद्धालुभिरास्तिकैः। अतो विविच्य सदसच्छूद्रानुपसन्नानुपसन्नान् धर्मोपदेशाय यतितव्यम् ॥

आयुर्वेदसामर्थ्यम् ।

[ले०—श्रीजगन्नाथशर्मा वाजपेयी, आयुर्वेदाचार्यः]

यस्याङ्गमेकमभवगस्य शिवः स्वतन्त्रः,
सिद्धः समादिशदनुत्तमसूततन्त्रम् ।
ज्ञानाश्रयः स भगवानवनाय सम्यग्,
वेदोज्ज्वलञ्जयतु नित्यमथायुषोऽयम् ॥१॥

श्रीमन्तो माननीया वाचकमहानुभावाः ।

अस्त्येतन्निवेदनीयमायुर्वेदसामर्थ्यवर्णनात् प्रागेव यदस्यादिमब्रह्मदक्षाश्विदेवेन्द्रभरद्वाजाग्निवेशधन्वन्तरिसुश्रुतप्रभृतयो देवदेवर्षिब्रह्मर्षिराजर्षयः सेवकाः (आचार्याः) विख्यातास्तस्य सामर्थ्यङ्कथमपि न मादृशेनाल्पज्ञेन शक्यते सन्दर्शयितुम्, किन्तु तस्यैव द्वित्राणि सूत्राणि विलिखामीति वाचनश्रमोऽवश्यमूरीकार्यः ।

प्रकृतिसिद्धा सुखावाप्तिदुःखानवाप्तिसमीहा समेषाञ्जनानाम् । तपःस्वाध्यायविधूतकल्मषा मुमुक्षवो योगिनोऽप्यात्यन्तिकदुःखनिवृत्तिलक्षणमोक्षरूपं सुखमेवाभिलषन्ति ।

तल्लक्षणञ्च व्यावहारिकमायुर्वेद एवोपलभ्यते यदुक्तम्—

"सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ।"

नैतल्लक्षणं केषाञ्चिदप्यरुचिकरम्, यतो ह्यारोग्यमेव धर्मार्थकाममोक्षरूपपुरुषार्थचतुर्वर्गसाधनम्, यदुक्तं चरके—

"धर्मार्थकाममोक्षाणामारोग्यम्मूलमुत्तमम्

एतादृगारोग्यरूपसुखोत्पत्तिरक्षणविधिविज्ञापनार्थमेव परमकारुणिकैर्महर्षिभिः सश्रममभिगम्योपदिष्ट आयुर्वेदः—

यदुक्तञ्चरके—

'प्रयोजनञ्चास्य स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य विकारप्रशमनञ्चेति'

महर्षिकणादेनापि प्रकारान्तरेणारोग्यमेव निदर्शितम्मूलमभ्युदयनिःश्रेयसयोः,

यथा चोक्तन्तेन पूर्वम्—

'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' तदनु—

'तस्माद्धर्मप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यान्तत्वज्ञानान्निःश्रेयसाधिगमः' ।

कीदृग् वैशिष्ट्यम्वैशेषिकस्य धर्ममुपदिशन् द्रव्यगुणादीनां साधर्म्यवैधर्म्याभ्यान्तत्वज्ञानमुपदिदेश । अत एवानुमीयते यदयमपि ज्ञानपूर्वकस्वधर्मसेवनविधर्मपरिवर्जनमेवोपदिशति ।

एतदेव वैशिष्ट्यम्वैशेषिकदर्शनाद् दृश्यत आयुर्वेदे स्पष्टतया—

यदुक्तञ्चरके—

महर्षयस्ते ददृशुर्यथावज्ज्ञानचक्षुषा ।

सामान्यञ्च विशेषञ्च गुणान् द्रव्याणि कर्म च ।
समवायञ्च तज्ज्ञात्वा तन्त्रोक्तं विधिमास्थिताः ।
लेभिरे परमं शर्म जीवितञ्चापि निर्गदम् ।

सर्वतोभावेन सास्यस्यपदार्थविनिश्चयविषयेऽ-आयुर्वेदस्य वैशेषिकेण, यतस्तत्रापि षट्पदार्थाः द्रव्यगुणकर्मसामान्यविशेषसमवायरूपाः, अत्रापि-त एव । केवलन्तन्त्रोक्तस्त्विधिमास्थिता इत्येतत् स्पष्टीकरणमेव विशिष्टम् ।

एवमारोग्यस्य धर्मार्थकाममोक्षसाधकत्वे निर्णीते कथन्तत्प्राप्यते संरक्ष्यते वेति सुतरां सञ्जायते जिज्ञासा । अतस्तन्निर्दिश्यते । तथा च वाग्भटे ।

कालार्थकर्मणां योगो हीनमिथ्यातिमात्रकः ।
सम्यग्योगश्च विज्ञेयो रोगारोग्यैककारणम् ॥

अयम्भावः—कालार्थकर्मणां हीनमिथ्यातिमात्रको योगो रोगैककारणम्, तेषामेव सम्यग्योग आरोग्यैककारणमिति । चरके सम्यग्योग एव सुखकारणमित्युक्तम् । तथा हि—

"सुखहेतुर्मतस्त्वेकः सम्यग्योगः सुदुर्लभः" । इत्थञ्च सुखहेतुः सम्यग्योगोऽपि दुर्ज्ञेयस्तस्य सम्यक्तया प्रतिपादनमायुर्वेद एव कृतमितीहायुर्वेदलक्षणमेव निर्दिश्यते, तद्यथा चरके—

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥

अयम्भावः—यस्मिन् शास्त्रे हितमायुरहितमायुःसुखमायुर्दुःखमायुस्तथा तस्यायुषो हिताहिते मानञ्च लक्षणतो यत्रोक्तन्तदायुश्च स आयुर्वेद उच्यते, तत्र पूर्वमायुषो लक्षणम् यथा—

शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम् ।
नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते ॥

इत्थं शरीरेन्द्रियसत्वात्मनां संयोग एवायुःशब्देनोच्यते । ततो हितमायुर्निरुच्यते, सामान्यतस्तु यदायुर्हिते कर्मणि परोपकृतिगुरुवृद्धार्चनादावुपयोगमवाप्नोति तदेव हितम्, यदुक्तं चरके-

"हितैषिणः, पुनर्भूतानां परस्वादुपरतस्य, सत्यवादिनः, शमपरस्य, समीक्ष्यकारिणोऽप्रमत्तस्य, त्रिवर्गस्परस्परेणानुपहतमुपसेवमानस्य, पूजार्हसम्पूजकस्य, ज्ञानविज्ञानोपशमशीलवृद्धोपसेविनः, सुनियतरोषरोगेर्ष्यामदमानवेगस्य, सततं विविधप्रदानपरस्य, तपोज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य, लोकमिमञ्चामुञ्चावेक्षमाणस्य, स्मृतिमतिमतोहितमायुरुच्यते अहितमतो विपर्ययेण ।"

अतो यथाहितमेव भवेदायुस्तथा प्रयतितव्यमिह चामुष्मिंश्चाभीप्सता पुरुषेण ।

सुखमायुः पुनस्तत्रैव—

"शारीरमानसाभ्यां रोगाभ्यामनभिद्रुतस्य विशेषेण यौवनवतः, समन्वागतबलवीर्ययशःपौरुषपराक्रमस्य, ज्ञानविज्ञानेन्द्रियार्थबलसमुदाये वर्तमानस्य, परमर्द्धिरुचिरविविधोपभोगस्य, समृद्धसर्वारम्भस्य, यथेष्टविचारिणः, सुखमायुरुच्यते । असुखमतो विपर्ययेण ।"

कृतेऽनेन लक्षणेन समन्वये भारतीयानामसुखमेवायुरधिकैरंशैरुपलभ्यत इतिसुखायुर्निर्वर्तनाय विधेयो यत्नो विशेषेण, स च यत्न आयुर्वेदोपदेशश्रवणपूर्वकन्तथानुष्ठानमेव, यदुक्तं वाग्भटेन—

आयुः कामयमानेन धर्मार्थसुखसाधनम् ।

आयुर्वेदोपदेशेषु विधेयः परमादरः ॥

तत्रायुष्याण्यनायुष्याणि च द्रव्यगुणकर्माणि समग्रेणोच्येत शास्त्रेण, ततश्च कानिचित्सारतयोपदिष्टानि विलिख्यन्ते, तद्यथा—

आयुष्यम्भोजनञ्जीर्णे वेगानाञ्चाविधारणम् ।
ब्रह्मचर्यमहिंसा च सद्वृत्तस्यानुवर्तनम् ॥

सूत्ररूपेणत्वस्मिन्नेवैकस्मिन् श्लोके समाप्यते सर्वमायुष्यन्द्रव्यगुणकर्मादि, तद्व्याख्यानञ्च । तथाहि पूर्वस्मिन्नन्ने भुक्ते जीर्णे एव भुञ्जीत । पूर्वान्नजीर्णता परिज्ञानञ्च वाग्भटतः कार्यम् । तथाहि—

प्रसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे,
विशुद्धे चोद्गारे क्षुदुपगमने वातेऽनुसरति ।
तथाग्नावुद्रिक्ते विशदकरणे देहे च सुलघौ,
प्रयुञ्जीताहारं विधिनियमतः कालः स हि मतः

इत्थं काले भोजनमायुष्याणाम्प्रथमम् । तदनु- वेगानाम्मूत्रपुरीषादीनामविधारणम् । वेगावरोधेनोदावर्तशूलहिक्कादिसहिता राजयक्ष्मसदृशा जायन्ते प्राणवर्धनानामुत्कृष्टतया" अहिंसाबलन्तु भारती-दुष्टा रोगाः । राजयक्ष्मणस्तु प्रथमो हेतुर्वेगावरोध एव, यथा चोक्तम्—

वेगरोधात्क्षयाच्चैव साहसाद्विषमाशनात् ।
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥

तस्माद्वातमूत्रादीनां वेगः कदापि नावरोद्धव्यः । क्रोधलोभादीनान्त्ववश्यन्धारणीयो वेगः, यथा चोक्तम्—

धारयेत्सततं वेगान् हितैषी प्रेत्य चेह च ।
लोभेर्ष्याद्वेषमात्सर्यरागादीनां जितेन्द्रियः ॥

तृतीयोहेतुर्ब्रह्मचर्यं स्त्रीषु संयमो, वेदाध्ययनश्च परस्परमेतद्द्वयमभिसम्बन्धि, यतो हि विद्यायाः फलं विनयः, यदुक्तं केनचित्—

विद्या ददाति विनयमित्यादि । स च ब्रह्मचर्येणैवाप्यते । यथा चोक्तम्

जितेन्द्रियत्वं विनयस्य कारणम्,
गुणप्रकर्षो विनयादवाप्यते ।
गुणाधिके पुंसि जनोऽनुरज्यते,
जनानुरागात् खलु सर्वसम्पदः ॥

न केवलं विनयोपपादकमेव ब्रह्मचर्यङ्किन्तु प्रधानं शरीरधारकम्, यदुक्तं वाग्भटेन

आहारशयनब्रह्मचर्यैर् युक्त्या प्रयोजितैः ।
शरीरन्धार्यते नित्यमगारमिव धारकैः ॥

इत्थं ब्रह्मचर्यम्प्रधानतममायुष्याणाम् ।

साम्प्रतिकमल्पायुष्ट्वमल्पेनैव कालेन यथा भवेत् तिरोहितं ब्रह्मचर्योपासनेन तथा प्रयतितव्यमखिलैर्मानवैः ।

चतुर्थमायुष्यङ्कर्माहिंसा । यदुक्तम्-"अहिंसा प्राणवर्धनानामुत्कृष्टतया" अहिंसाबलन्तु भारतीयानाञ्चिरपरिचितं सम्यगभ्यस्तञ्चेति साम्प्रतमप्यहिंसाबलमेवास्त्य हीनशक्तिकैरपि भारतीयैरेतादृश्याः वृटिशराज्यसत्ताया विरोधः कर्तुं शक्यते ।

पञ्चमं कारणं सद्वृत्तानुष्ठानम्, तद्ध्यनुष्ठानं युगपत्सम्पादयत्यर्थद्वयम्-आरोग्यमिन्द्रियविजयञ्च । तत्र सतां वृत्तं सद्वृत्तन्तच्च तैराचरितमुपदिष्टम्वा । तत्राद्यन्त्वितिहासाद्यनुशीलनरूपेण महताऽयासेन शक्यतेऽवगन्तुमतोद्वितीयमेव सुगमम् ।

तस्यैवैकम्परमोपयोगिनमंशन्निर्दिशामि । तद्यथा-देवगोब्राह्मणगुरुवृद्धसिद्धाचार्यानर्चयेत्, सर्व-

प्राणिषु बन्धुभूतःस्यात्, नानृतं ब्रूयात्, न कुर्यात्पापम्, न पापेऽपि पापी स्यात्। (पाप कर्तुः साहाय्यङ्कृत्वा पापभाङ् न भवेदित्यर्थः),

ब्रह्मचर्यज्ञानदानमैत्रीकारुण्यहर्षोपेक्षाप्रशमपरश्च स्यादित्यादि ।

सद्वृत्तमेतदनुष्ठीयमानमवश्यमापादयति दीर्घमायुः। सद्वृत्तानुष्ठानमेवाल्पायुष्ट्वकरम्, यदुक्तमानवे धर्मशास्त्रे—

अनभ्यासेन वेदानामाचारस्य च वर्जनात्।
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥

तस्मात्सद्वृत्तं सर्वं सर्वैः स्मृतिमास्थाय सर्वदानुष्ठेयम् ।

इत्थञ्चैकैकोऽप्युपदेशः सम्यगनुष्ठितः सकलवाञ्छासिद्धिप्रदो भवितुं शक्नोति। सकलस्यायुर्वेदस्य सामर्थ्यं वक्तुं कः शक्नोति। नचायुर्वेदस्यास्ति पारमपि, यथा चोक्तं चरके—

न चैव ह्यस्त्यायुर्वेदस्य पारम्, तस्मादप्रमत्तः शश्वदभियोगमस्मिन् गच्छेदित्यादि अतएव नायुर्वेदः परिसमाप्यते केवलं संस्कृतभाषामयेष्वेव ग्रन्थेषु, किञ्च तस्य व्यापकलक्षणेन सञ्जायते सर्वासां चिकित्सानामवरोधः ।

एतादृशस्यायुर्वेदस्य सामर्थ्यमाश्रित्यैवामरेश्वरादिपदवीमुपगतवन्तोऽस्याचार्याः। आधुनिकेतिहासावलोकनेनापि प्रत्यक्षीकर्तुं शक्यते आयुर्वेद माहात्म्यम् ।

समृद्धस्यैतादृशस्य वृटिशराज्यस्य संस्थापकावपि द्वौ हैमिल्टनबाउटननामकावांग्लवैद्यावेवास्ताम्, तयोश्चिकित्सया सन्तुष्टेन यवनेश्वरेण जहांगीरेण दत्तोऽधिकारोऽवाधव्यापारस्य वङ्ग-देशे ईष्टइण्डिया कम्पनीनामकाँग्लसमित्यै। रूसराज्यकान्तावप्यासीद्विशेषेण साहाय्यन्तत्रत्यवैद्यानाम् ।

परञ्चैतादृक् सर्वमपि श्रेयः सद्वैद्यैरेवसम्यगवाप्तुं शक्यते न केवलन्नामधारिभिः यदुक्तम्—

प्रयोगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः।
जीविताभिसरास्ते स्युर्वैद्यत्वन्तेष्ववस्थितम् ॥

इत्थमायुर्वेदज्ञानपूर्वककर्मकरणेन न केवलमैहिकमपि च मोक्षरूपम्पारलौकिकमपि श्रेयः सुलभम्। तस्मात्सर्वैः शमिह चामुष्मिंश्चाभीप्सुभिरवश्यमध्येयोऽनुष्ठेयश्चेति ।

प्राप्तपत्राणि ।

निवेदनम् ।

अस्यां गीर्वाणवाण्यां पत्रप्रकाशनेन संस्कृतज्ञानपि लौकिकान् चिकीर्षवः सम्पादक-महोदयाः। भुवि कदाचित् इतस्ततः पर्यटन्तो बहवो माननीयाः सत्पुरुषाः (हुयेन सांगप्रभृतयः) यदा विश्वजनीनं भारतं समागताः, तदा वर्णाश्रमधर्मसाहाय्येन परमत्यागिनां विद्वद्वराणां ब्राह्मणानां नेतृत्वे संगच्छन्तीं भारतीयसुसंस्कृतिमवलोक्य चकिताः साश्चर्यं जगदुः "एषैव सभ्यता जगत्सु अनुकरणीयेति"; परञ्च सत्सु धुरंधरेषु बहुषु विद्वद्वरेषु द्विजेषु साम्प्रतं भारतीयानामहरहो नैतिकं, सामाजिकञ्च पतनं दृष्ट्वा दोदूयते चेतः, तत्र पारतन्त्र्यात् नैतिकपतनस्य स्वराज्यमन्तरा न काऽपि अमोघा युक्तिः, तदर्थं बहव आधुनिका ऋषिदेशीया नेतारः प्रयतन्ते। परञ्च सामाजिकपतने हेतुत्वन्तु एषां धर्माचार्याणामेव। अस्माकं

पुण्यभूमिषु (तीर्थेषु) उपासना गृहेषु (देवालयेषु) गृह कृतिषु (विवाहादिसंस्कारेषु) केवलं ब्राह्मणकुलोद्भवा, अशिक्षितत्वाच्छास्त्रदृष्ट्या अब्राह्मणाः, छद्मिनश्च ते धर्म-व्याजेन (गया-जगन्नाथ-प्रभृतिषु तीर्थेषु) पितृणामुद्धाराय मोक्षाय च, ग्रामीणप्रजाभ्यः, असंख्यवित्तं संगृह्य वेश्या-मदिरा-द्यूतप्रभृतिनिकृष्टकर्मसु तोयवत् प्रक्षिपन्ति, तन्निषेधे न विदुषां सुधीः प्रस्फुरति । किन्तु येनकेनोपायेनोदरं पालयन्तः, प्रसुप्ता इव कालं यापयन्ति, यदाकदाचित् समयपटुभिराधुनिकैर्देशभक्तैर्नेतृभिः कस्यचित् सामाजिक-दुर्बन्धनस्य दूरीकरणाय सदुद्योगः क्रियते, यथा इदानीन्तने, प्रजाप्रतिनिधिविचारालये (एसेम्बली) वालविवाह निषेधाय, द्वादशवर्षवयस्का कन्या, षोडशवर्षवयस्कः कुमारो विवाहार्ह इति प्रजाहितैषिभिः प्रतिनिधिभिः समुपस्थापितमस्ति, तदा गृह्यसूत्रादिधर्मग्रन्थेषु इत्थं निर्णये सत्यपि धर्मस्तम्भरूपा अहरहो मनुस्मृत्यादिषु तामसदानं विगर्हितम्, विद्याविक्रयः सर्वथा निन्द्य इति पठन्तः, पाठयन्तस्तत्कर्तुमक्षमा अपि आत्मानं धर्माचार्यं मन्यमानाः, एतच्छास्त्रमर्यादाविरुद्धं कदाऽपि न करणीय-मिति स्थाने स्थाने प्रस्तुवन्ति, एतद् महदनिष्टकरं खलु भारतीयानाम् । अतः सविनयं प्रार्थये, यत् निजपत्रद्वारा विदुषां, सामाजिकदुर्बन्धनानां वालविवाह-वृद्धविवाहा-दीनाम् तीर्थेषु पुरोहितानाम् (पण्डा) अशिक्षित ब्राह्मणद्वारा वा कर्मकाण्ड-विधानादीनां निराकरणे प्रयत्नीयम्, येन महान् देशोपकारः यात् ।

भगवानदीनमिश्रः

(बहराइचवास्तव्यः)

—❧—

संस्कृतसमाचाराः

विद्यावैजयन्ती ।

सुविदितमिदं भवादृशां यत्साम्प्रतम्प्राचीनसंस्कृतनिबन्धानां कटुकीटपटलदंशनेन वा, निलयानलकीलकवलनेन वा, पाथःपृषतपातेन वा विलोपः क्रमादवलोक्यते । क्वचन प्रकाशिता अपि ते मूल्यवाहुल्यात्, यावदभिलषितकलावैकल्याच्च न सन्तोषमुपजनयन्ति मानसेषु प्रणयिनाम् । अनुपपत्तिसन्ततिमेतादृशीमनुसन्धाय विदूयमानमानसैः कृतिवरैरसकृदुत्साहिता हिन्दूविश्वविद्यालयवेदान्त-प्रधानाध्यापकाः ख्यातवैदुष्याः श्रीबालकृष्णमिश्र-महाशयाःपुरोदीरितत्रुटिविघटनाय ''*विद्यावैजयन्ती*'' समभिधानाया मासिकपत्रिकाया विकस्वरानुकपाभिः सम्पादनभारं स्वीचक्रुः । महाभाग्यमिदं यत्सुरसरस्वतीं समुन्नेतुमिमे कार्यावरुद्धसमया अपि बद्धपरिकराः समभूवन् ।

अथैवमपि पत्रिकायाः प्रकाशस्तदा स्यात्, यदि भवन्तस्तत्रानुग्राहकतया ग्राहकतया वा सहायतां सहर्षं दर्शयेरन् । अस्याश्च सकललोकसौलभ्यार्थं रूप्यकत्रयमेव वार्षिकं मूल्यम् । मञ्जुलतायां तु 'क्रिया केवलमुत्तरमि'ति नास्ति तस्यामिदानीं विशेषतो वक्तव्यमिति निवेदयन् विरमति—

स्थानम्—
संस्कृतसाहित्यसेवासदनम्,
हिन्दूविश्वविद्यालयः, काशी ।

हरिशङ्करशास्त्री
(वेदान्तविशारदः)
रघुनाथशास्त्री
(तर्कतीर्थश्च)

संस्कृतच्छात्रसङ्घस्य विशिष्टाधिवेशनम् । ❋

चैत्रशुक्लप्रतिपदि (२२ मार्च, २८) स्थानीय-'टाउनहाल' नाम्नि नगरसभामण्डपे सायं चतुर्वादनतः संस्कृतच्छात्रसङ्घस्य विशिष्टाधिवेशनं प्रभूतानां संस्कृतच्छात्राणां समारम्भे सम्पन्नम् । यद्यपि सभापतेरासनं महामहोपाध्यायैः श्रीदेवीप्रसादशुक्लकविचक्रवर्तिमहोदयैः समलङ्करणीयमासीत्, तथापि विलम्बात् श्रीमन्तः श्रीदामोदरशास्त्रिगो भिषगाचार्याः, साङ्ख्य-सर्वदर्शनतीर्थ-विद्याभूषण-महोदयाः सभापतेरासनमलमकुर्वन् । ततश्च मङ्गलान्तरं छात्रसङ्घस्य प्रधानमन्त्रिणा श्रीमता केदारनाथशर्मणा सङ्घस्यावश्यकताविषये, उद्देश्यानां विवरणे च सुदीर्घम्, हृदयङ्गमम्, मर्मस्पृक् भाषणं प्रदत्तम् । ततश्च सभापतिमहोदयैः प्रथमोऽयं प्रस्तावः समुपस्थापितः—

१—एष खलु संस्कृतच्छात्रसङ्घः, साम्प्रतमेवाकस्मिकरोगैरकाल एव कालकवलितानां संस्कृतच्छात्राणामकालमरणे हार्दिकं शोकं प्रकटयति, तथा तेषां कुटुम्बिभिः सह समवेदनां सहानुभूतिञ्च प्रदर्शयति ।

२.—एष संस्कृतच्छात्रसङ्घः, काशीस्थ-राजकीयसंस्कृतपरीक्षाधिकारिणः साग्रहमनुरुणद्धि यत् आगामिवर्षमारभ्य परीक्षायां प्रतिदिनमेकैकमेव प्रश्नपत्रं तिष्ठतु । यतः सततं सप्तघण्टापर्यन्तं लेखनम्, भिन्नभिन्नानां ग्रन्थानां युगपदेव संधारणम्, परीक्षायां हानिकारकं भवति । कुत्रापि संस्कृताँगलहिन्दीभाषादिपरीक्षासु नास्तीदृशः कुप्रबन्धः । अन्यच्च— संस्कृतदृष्ट्या परीक्षाकालोऽपि प्रातः सप्तवादनतो १० वादनं यावद्भवतु, येन छात्राः प्रातः विशुद्धस्य स्वमस्तिष्कस्य सदुपयोगं कुर्वन्तु । अन्यथा वर्तमानव्यवस्थया छात्राणां शारीरकी मानसिकी च हानिर्भवति ।

प्रस्तावकः—हीरावल्लभपन्तः

समर्थकः—श्रीकेदारनाथशर्म्मा. सारस्वतः

३—एष छात्रसङ्घः, संस्कृत-परीक्षाधिकारिणः अस्मिन् कृत्ये सन्तोषं प्रकटयति, यत् तैः छात्राणां प्रार्थनायां ध्यानं दत्वा परीक्षासमये वृद्धिः कृता इति । तथाताननुरुणद्धि च यत् ते साम्प्रतमास्तरणादीनां विविधपरीक्षात्रुटीनामपाकरणे च दत्तावधाना भवन्तु, छात्राणां कृते सर्वविधं सौलभ्यञ्च सम्पादयन्तु—इति ।

प्रस्तावकः—श्रीहरिचरणशर्म्मा ।

समर्थकः—श्रीमहादेवशास्त्री, साहित्याचार्यः ।

४—एष संस्कृतछात्रसङ्घः सर्वान् संस्कृतच्छात्रान् साग्रहं सानुरोधञ्च प्रार्थयते, यत् ते समाधिक—संख्यायां संस्कृतच्छात्रसङ्घस्य सदस्याः भवन्तु भावयन्तु चान्यान् । सङ्घस्य प्रस्तावानामुद्देश्यानाञ्च सार्वत्रिकं प्रचारं विधाय संयुक्तप्रान्तीय-संस्कृतच्छात्रसम्मेलनं सत्वरं संस्थापयन्तु । येन छात्राणां सङ्घशक्तिः सबला समुन्नततरा च भवेदिति ।

प्रस्तावकः—श्रीकेदारनाथशर्म्मा सारस्वतः

समर्थकः —श्रीलालनाथस्वामी

❋ च्छात्रसङ्घस्य सर्वमपि कार्यजातं हिन्दीभाषायामभूत् । अत्र खलु तद्विवरणमनूद्य प्रकाशितम् ।—छ० सं० ।

गढ़देशस्य विद्वत्समाजस्य प्रथमाधिवेशनम् :—

चतुराशीत्यधिकैकोनविंशतिशततमे वैक्रमेऽब्दे चैत्रकृष्णाष्टम्यां बुधवासरे गढ़देशे श्रीनगरे लक्ष्मीनारायणनाम्नि मन्दिरेऽभूत् महता समारोहेण । तत्र जनसमूहस्योपस्थितिरधिकाऽऽसीत् । गढ़देशस्थमान्यविद्वत्सु:—

डिम्मरसंस्कृतपाठशालायाः प्रधानाध्यापक व्याकरणाचार्याः पं० वासवानन्दशर्माणः, ऊषामठसंस्कृतपाठशालायाः प्रधानाध्यापकाः धर्मभूषण पं० महिमानन्दशर्माणः, देवप्रयागसंस्कृतपाठशालायाः प्रधानाध्यापकाः कविरत्न पं० भोलदत्तशास्त्रिणः, उत्तरकाशीकीर्तिसंस्कृतपाठशालायाः प्रधानाध्यापकः पं० सत्येश्वरानन्दशास्त्रिणः, श्रीनगरनिवासिनो राजकीयशालायाः संस्कृताध्यापकाः पं० भैरवदत्तशास्त्रिणः, अन्येऽध्यापका आङ्गलच्छात्राश्च पं० ललिताप्रसादशर्माणः पं० विश्वेश्वरानन्दशर्माणः, पं० केदारदत्तशर्माणः, पं० तुङ्गेश्वरानन्दशर्माणः, पं० भोलादत्तभट्टशर्माणः, पं० दुर्गाविलासशर्माणः, पं० गोपालविलासशर्माणः, अन्ये प्रतिष्ठिता नागरिकाश्च भूयांसो विद्वांसः प्रधानब्राह्मणक्षत्रियादयश्चासन् ।

पूर्वं पं० बालमुकुन्दशर्मणा सभापतिनिर्वाचनार्थमवतरणिका विहिता । तत्र श्रीमतां लालामनोहरलालमहोदयानां सभापतित्वे समभूद्वार्षिकमधिवेशनं विद्वत्समाजस्य । तत्र प्रथमं संस्कृतपरीक्षादित्सुभिश्छात्रैरीश्वरस्य स्तुतिर्विहिता । अन्यैः कतिपयैश्छात्रैर्विद्यादिविषयेषु प्रदत्तं भाषणं देवभाषायाम् । धर्मभूषणैः श्रीमद्भिः पं० महिमानन्दमहोदयैश्च तदाशयो हिन्दीभाषायां श्चावितश्छात्रनियमाः सभोद्देश्याश्च विशदीकृताः । तदनन्तरं मुम्बापुरनिवासिनां सांप्रतं गुप्तकाशीस्थानमलङ्कुर्वाणानां श्रीमतां योगिदेवशर्मणां हिन्दुजातिसंस्कृतभाषाविषये जातं प्रभावशालि व्याख्यानम् ।

सर्वसम्मत्याऽधस्तनाः प्रस्तावाः स्वीकृताः ।

प्र० नं (१) प्रतिवत्सरे गढ़वालविद्वत्परिषदोऽधिवेशनं श्रीनगरे परीक्षासमय एव भवेत् ।

प्र० नं (२) गढ़देशीयानां संस्कृतपाठशालानां निरीक्षणार्थं डिष्ट्रिक्टबोर्डसभापतिः प्रार्थनीयः ।

प्र० नं (३) यत्र शालानामतः केवलं याचनया धनमुपार्जयन्ति विद्यार्थिनश्च परीक्षायां नो प्रवेशयन्ति, तत्र समुन्नतये संयुक्तप्रान्त (यू० पी०) संस्कृतपाठशालानां संस्कृताध्यक्षाः (इन्सपेक्टरमहोदयाः) प्रार्थनीयाः ।

अन्ते च श्रीमद्भिः पं० भैरवदत्तशास्त्रिमहोदयैः सभापतिमहोदयैश्च सर्वेभ्यः साधुवादाः धन्यवादाश्च प्रदत्ताः । एवमधिवेशनं समाप्तिमगमत् ।

३-४-२८ } निवेदकः विद्वत्समाज-मन्त्री—
बालमुकुन्द शर्मा

सम्पादकीयम्

मिस् मिलर-शुद्धिः ।

साम्प्रतं सर्वत्र भारते मिसूमिलर-शुद्धिविषये महदान्दोलनं सञ्जातमिति जानन्त्येव प्रायः सर्वेऽपि शिक्षिता भारतीयाः । एतस्मिन् विषये केचन शुद्धिपक्षपातिनो नितरां मोमुद्यमानाः, तद्विरोधिनश्चात्यन्तं दुःखिताः सन्ति । हिन्दुसभयाऽपि तस्य

सहर्षं समर्थनं कृतमिति समाचारपत्रेषु पठितम् । वयमत्र विषये नितरां विरोधमाचरामः । नैषा शुद्धिः, शुद्धिः । यद्यपि वयं वर्तमानां समाज-दुरवस्थामालोच्य हिन्दुसमाजच्युतानां संस्कार्याणां पतितानां शास्त्रसम्मत-प्रायश्चित्तद्वारा पुनः संशोधनम्, तेषां च पृथग्जातिनिर्माणं सहर्षं समर्थयामस्तथापि नैतादृशीं शास्त्रविरुद्धाम्, समाज-विरुद्धाम्, नीति-विरुद्धाञ्च शुद्धिं समर्थयामः । यद्यपि रात्रिन्दिवं वेश्या-मद्यादिजघन्यकृत्य-निरता अकर्मण्या विलासवासनानिरता भारत–धर्म–कलङ्कभूताः केचन राजानः पाश्चात्यदेशेषु पिशाचिनीभिः पाश्चात्य-विलासिनीभिः सह विहृत्य नैकशो मुखे कालिमानं लापयन्ति, परं नैतादृशम् हृदनुचितं समाज-विघातकम्, धर्मध्वंसकरं दुरभिनयं कृत्वा हिन्दुसमाजस्य मुखे मसीलेपनं कुर्वन्ति । साम्प्रतमिमे कुकामिनो मुक्तद्वारं स्वच्छन्दं यतस्ततः कामुकीराद्य शुद्धियन्त्रे संशोध्य यथेच्छमत्याचारं विधास्यन्ति । येन वर्णसङ्करता नृपतिसमाजे पदं न्यस्य भारतीयं गौरवम्, आर्यनरपतीनां महत्त्वं सर्वमपि विनाशयिष्यति । शनैः शनैः पाश्चात्यजातीनामिव सततविशुद्धेयमार्यजातिर्नजाने किं बीभत्सरूपं धारयिष्यति । चार्वाकशिरोमणयोऽस्माकं शास्त्रकास्त्वस्माकमेतादृशं पतनमभिलषन्त्येव । कामवासनापूर्त्यै जघन्यमिदं कार्यं हिन्दुसमाजस्य चिरलब्धितं गौरवं विनाशयितुमलमिति वयं सर्वदृष्ट्या शुद्धिमिमां विरोद्धव्यामाकलयामः । शुद्धिकारणाच्चेदृशं बालिशत्वमुच्छृङ्खलत्वञ्च न कदाचिदपि मर्षयितुं प्रभवामः । नैतेन हिन्दूधर्मस्य समृद्धिः सम्भवेत् ; प्रत्युत विनाश एव स्यात् ।

*　　*　　*

विलम्ब-विनिवेदना ।

सुप्रभातस्य विशिष्टाङ्कप्रकाशने भूयान् विलम्बः समजनीति विदितमेव पाठकानाम् । तस्मिन् परिश्रान्तैर्विश्रान्तिमभिलषद्भिरस्माभिरपि सुप्रभाताध्यक्षेभ्यो विराम-ग्रहणं कृतमासीत् । अस्माकं मान्याः प्रणयिनः श्रीमन्तो व्यवस्थापक-महोदया अपि ग्रीष्मावकाशे परिभ्रमणार्थं गता आसन् । प्रियसुहृदः सूर्योदयसम्पादकाश्च मध्ये मध्ये विशिष्टकार्यव्यापृता आसन्निति ज्येष्ठाङ्को महता विलम्बेन सम्पन्नः, पाठकानां सविधे समुपसर्पतीति पाठकैर्ग्राहकैरनुग्राहकैश्च क्षन्तव्यम् ।

*　　*　　*

सम्पादकः, लेखकाश्चावदधतु ।

सुप्रभातस्य विशिष्टाङ्कः प्रायः सर्वेषां पत्रसम्पादकानाम् , लेखकानाम् , विदुषाञ्च सेवायां सादरं प्रेषितो विद्यते । कैश्चन विद्वद्भिः पत्रसम्पादकैश्च तस्य समालोचनम् , तद्विषये च स्वीयमभिमतं प्रकटीकृतम् । यैश्च नाद्यावधि स्वीया सम्मतिः प्रकटीकृता, ते रवश्यं सत्वरञ्च स्वीयेषु पत्रेषु, अथवा स्वतन्त्रतयाऽस्माकं सविधे स्वीयाममूल्यां सम्मतिं संप्रेष्य सुप्रभातं नूनमनुगृह्णन्तु । वयं तेषां सम्मतिमवश्यं प्रकाशयिष्यामः ।

*　　*　　*　　*

जगद्गुरुः ।

हिन्दी भाषायां संस्कृत विदुषां संस्कृतप्रचाराय, सनातनधर्म-प्रचाराय च नास्ति किमपि समीचीनपत्रमिति आवणीतः काशीस्थविदुषां हिन्दीभाषामयं जगद्गुरु-नामकं पत्रं प्रकाशमेष्यति । तस्य 'आदर्शाङ्कः' साम्प्रतं गुरुपूर्णिमायामेव प्रकाशितो विद्यते । एकानकस्य चिटिकां प्रेष्य ग्राहकत्वमभिलषद्भिरनभिलषद्भिर्वा तत्पत्रं गृहीत्वाऽवश्यमेवाऽवलोकनीयम् । अस्य खलु जगद्गुरोर्गौरवं महत्त्वं वैचित्र्यञ्च दर्शनेनैव प्रतीतं स्यात् । वस्तुतोऽयं जगद्गुरुरेव । अस्य निर्भीकता, स्पष्टवादिता, सत्यता, धार्मिकता, मनोहरता चावश्यं सुप्रभातपाठकैरेकवारमेकानकेनैव दर्शनीया । अस्य वार्षिकमूल्यम्-मुद्रा द्वयम् । प्राप्तिस्थानम्—सुप्रभात-कार्यालयः, काशी ।

सुप्रभात-नियमाः ।

(१) सुप्रभातमिदं सौरमासस्यान्तिमे सप्ताहे प्रकाशितम्भविष्यति ।

(२) एतस्य वार्षिकम्मूल्यम्—समाजनियमानुसारं माननीयेभ्यः—१२) मुद्राः, सहायकेभ्यः—३) मुद्राः, छात्रेभ्यश्च १॥) मुद्रा—भविष्यति ।

(३) अग्रिममासस्य प्रथमे पक्षे यस्य ग्राहकस्य सविधे पत्रं न गच्छेत्, तेन नूनं पत्रालये समन्विष्य कार्यालये पत्रं प्रहेयम् । तदा 'सुप्रभातं' प्रेषितं स्यात् । यदि ग्राहकाः पत्रं न प्रेषयिष्यन्ति, तदा कार्यालयो नोत्तरदायी भवेत् ।

(४) पत्र-प्रेषण-समये ग्राहक-सङ्ख्या नूनं लेखनीया । अन्यथा पत्रमवलोकितमेव न स्यात् ।

(५) अग्रिम-मूल्यमन्तरा सुप्रभातं न प्रदीयते, ग्राहकैर्धनादेशद्वारा (मनिऑर्डर) मूल्यं प्रेषणीयम् स्वीयः पूर्णसङ्केतश्च लेख्यः । वी० पी० द्वारा प्रेषणे तेषामेव समधिको व्ययः स्यात् ।

(६) पत्रोत्तरमभिलषद्भिश्चटिका नूनं प्रेषणीयाः । अन्यथा पत्रोत्तरं न दीयेत ।

(७) लेखकैरतिसरलभाषायां लेखाः प्रेषणीयाः, येन सर्वेऽपि पठितुमवगन्तुञ्च प्रभवेयुः ।

(८) लेखाः पत्रस्यैकस्मिन्नेव पृष्ठे पार्श्वयोः स्थानं विहाय, सुस्पष्टैः, सुवाच्यैः, सुन्दरैरक्षरैर्लिखित्वा प्रेषणीयाः । अन्यथा न तेषां प्रकाशनं स्यात् ।

(९) विवादग्रस्ताः, व्यक्तिगताक्षेप-पूर्णाः, अपूर्णाः, पुस्तक-रूपाः, लेखा न प्रेषणीयाः । प्राचीन-पुस्तकानां, सामयिकपुस्तकानां वा प्रकाशनं भवेत् ।

(१०) छात्राणां लेखाः, संस्कृत-समाचाराः, विज्ञान-समाचाराः, नूतन-वार्ताः सादरं प्रकाश्येरन् ।

(११) लेखानां प्रकाशने, अप्रकाशने, परावर्तने, अपरावर्तने वा सम्पादकस्यैवाधिकारः । को लेखः कदा प्रकाशितो भविष्यतीति सम्पादकाधीनमेव ।

(१२) सुप्रभाते सरल-सरसाः, भावपूर्णाः, अतिमनोहराः, कविताः प्रकाशिताः स्युः । साधारण-कविता-प्रेषणे लेखकैर्व्यर्थश्रमो न विधेयः ।

(१३) लेखाः, परिवर्तनार्थं समालोचनार्थञ्च पत्राणि, पुस्तकानि, 'सम्पादकः—सुप्रभातम्, काशी' अनेन सङ्केतेन; प्रबन्ध-विज्ञापनादि-विषयकानि पत्राणि च, 'व्यवस्थापकः—सुप्रभात-कार्यालयः, काशी' इत्यनेन सङ्केतेन प्रेषणीयानि ।

(१४) सुप्रभातस्य प्रचारो भारतस्य सर्वत्र प्रान्तेषु प्रचुरसङ्ख्यायां विद्यते । एतस्मिन् विज्ञापनदानेन महत्साफल्यं भवेत् । मुद्रिताः विज्ञापननियमाः कार्यालयतः पत्रं प्रेष्य, ग्रहीतव्याः ।

सर्वतन्त्रसिद्धान्त पदार्थ-लक्षणसंग्रहः ।

गौरीशङ्करभिक्षुकृतः, द्वितीयावृत्तिः । मूल्यम्-।।।)

वेदवेदाङ्गदर्शनस्मृतिकाव्यादिशास्त्रीय-पदार्थानां २७०० लक्षणवर्णनात्मकग्रन्थो नाद्यावधि प्रकाशितः । उपयोगित्वविषये—

'ये सन्ति विषयाश्चास्मिन् ते न दृष्टाः, परत्र वै । अत्र चैव समावेश्य सर्वसिद्धान्तलक्षणम्' इति काशी-मद्रासादिस्था ८६ विद्वांसो मुक्तकण्ठमुद्घोषितवन्तः ।

मनभरीदेवी, पुट्ठी, पो० जमालपुर, जि० हिसार ।

Reg.N. 1348 A.

सचित्रम् सामुद्रिक रहस्यम् ।

ले०—श्रीकालिका प्रसादशर्म्मा, राजज्योतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम् अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्. संस्कृते सर्वथानवीनमेव । एतेन हस्तरेखाणां शुरुं चिनैव सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

रतिरहस्यम् (कोकशास्त्र)

एष प्राचीनो ग्रन्थः श्रीमहाकवि कोक्कोक विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी चित्रिणी-हस्तिनी-प्रभृतयः स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि,तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वस्वनिधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्यः ।

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दी भाषायां निबन्धलेखन-अनुवादादिज्ञाने महत्सौकर्य स्यात् । मूल्यम्—आणकाष्टकम् । मार्गव्ययः—=)

सूर्यचरितम् वा ऋतुचरितम् ।

ले०—तारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः ।

गोलविद्या-विषयकं नूतनं महाकाव्यम् ।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः । गोलविषये नूतनं संस्कृत-महाकाव्यम् । सर्वथा द्रष्टव्यम । मूल्यम्—१) मार्गव्ययः पृथक् ।

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-तीर्थः

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया बालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृत काव्येषु नाटकेषु पुराण-पुस्तकेषु च समागतानां देशानां नदीनां स्थानानां पर्वतानाञ्चाधुनिकी स्थितिस्तेषां नामानि च सन्ति । सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् ॥) आणकाः ।

महाकवि बाणभट्टः ।

लेखकः—सुप्रभात-सम्पादकः श्रीकेदारनाथ शर्म्मा

हिन्दीभाषायामभयमपूर्वो निबन्धः । अत्र बाणभट्टस्य जीवनविषये महत्वपूर्णा, मननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारकोऽयं निबन्ध-बन्धः । मूल्यम् =) मार्गव्ययः -)

सर्वेषां प्राप्तिस्थानम्—

☞ मैनेजर, सुप्रभात कार्यालय, बनारस सिटी ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

पञ्चमवर्षं Vol: 5

सौराषाढश्रावणौ, १९८५ वैक्रमाब्दः

July, August 1928.

तृतीयचतुर्थौ खण्डौ No. 3, 4.

सुप्रभातम्

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिसमुद्यद् भेदतारा विलुम्पन्, नयदधिसुरभाषाभावि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती, साहित्यवारिधिः

सम्पादकः—

श्रीकेदारनाथशर्म्मा सारस्वतः

व्यवस्थापकः—

श्रीगिरीशशुक्लः, न्यायाचार्यः ।

वार्षिकम्मूल्यम्—३)

माननीयेभ्यः—१२)

छात्रेभ्यः—१॥)

वैदेशिकेभ्यः—६)

अस्याङ्कस्य मूल्यम् ।)

लेख-सूची ।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रं संस्कृत-मासिक-पत्रम् ।

पञ्चम-वर्षे | सौर—आषाढ श्रावणौ । १९८५ वैक्रमाब्दाः | तृतीय-चतुर्थ संख्ये ।

भारतीया वास्तुविद्या ।*

ले०—श्रीसूर्यनारायण शास्त्री, आचार्यः ।
[महाराजा कालेज, जयपुर]

(विशिष्टाङ्क-लेखः)

मान्या विद्वांसः !

अद्य मयैतस्यां सुमहत्यां विद्वत्सभायां भारतीवास्तुविद्यायाः प्राक्तनत्वविषये सर्वाङ्गसंपन्नत्वविषये चातिसंक्षेपेण किञ्चिन्निवेदयितुमिष्यते । प्रयागविश्वविद्यालयस्य संस्कृतमहोपाध्यायेन एम. ए., पी. एच. डी., डि. लिट्. पदविभूषितेन पण्डितप्रकाण्डेन श्रीप्रसन्नकुमाराचार्यमहोदयेन भारतीयवास्तुविद्याविषये मानसारशिल्पशास्त्रानुसारमाङ्गलभाषयैको ग्रन्थो निर्मितस्तमुपजीव्यैव मयाऽप्ययं निबन्धो विरचितः । एष सुप्रसिद्धो विद्वान् स्वग्रन्थे वास्तुविद्यायास्तानि तान्यङ्गानि प्रतिपाद्यैव कृतकृत्यतां नाऽमन्यत; प्रत्युतास्या विद्यायाः सुदृढप्रमाणपरिपुष्टमितिहासं वास्तुशास्त्रव्यवहृतीनां पारिभाषिकशब्दानां कोषं चाप्युपनिबद्धवान् । एतस्य ग्रन्थस्य परिशीलनेन यथासमयं भारतभूमि-

* जयपुरविश्वविद्यालय-उपाधिवितरणमहोत्सवे पठितो निबन्धः ।

मङ्गीकृतवतां प्राचीनानां विदुषां तत्तच्छास्त्रपाण्डित्यवत् तत्तत्कलाविज्ञानवैदुष्यमपि गम्भीरतरमवधार्य यथा समतुष्यं तथा ततोऽप्यधिकतरं चास्माकं ब्राह्मणानां संकुचितहृदयतया शिल्पशास्त्रस्य सर्वथैव विलोपमवगत्य सानुशयोऽप्यभवम् । सर्वस्मिन् वाङ्मये केवलमस्माकमेव स्वतन्त्रोऽधिकारो भवेन्नान्यस्य, विशेषतः शूद्रजातीयस्य तत्र चञ्चुमात्रप्रवेशोऽपि संभवेदिति स्वार्थदोषदूषितं नियमं धर्मस्वरूपे विपरिणमय्य शूद्राणां न केवलं वेदाध्ययनमेव निषिद्धमपि तु संस्कृतभाषामात्राध्ययनमपि वर्जितम् । भवद्भिः क्षणमवधीयतां यच्छिल्पशास्त्रं तर्कादिशास्त्रवन्न केवलं श्रवणमननादिसापेक्षमपि तु ग्रन्थतत्त्वावगमवत् प्रयोगसापेक्षमपि तत् । अस्माकं देशे तु महानयं विप्रतिषेधः समापतितो यद् ये वाक्यविन्यासदक्षा भाषातत्त्वविदो ब्राह्मणा आसँस्ते प्रयोगात्मकशिल्पोपजीवनेन स्वप्रतिष्ठाह्रासं मन्वानाः क्रियात्मकं शिल्पं नाभ्यस्तवन्तो ये च शूद्राः शिल्पमात्रमुपाजीवँस्तेषां शास्त्रस्य भाषामात्रस्यापि नाज्ञानाभावः समपद्यत । ततश्च ब्राह्मणाः प्रयोगात्मकेषु विषयेषु ग्रन्थान् निर्मातुमक्षमाः सन्तो मध्यकाले केवलं काव्यग्रन्थान् बाहुल्येन व्यरचयन् । शिल्पोपजीविनः शूद्राश्च प्रत्यहमुपयोगवशात्तासां तासां कलानां नवनवानि तत्त्वान्यधिगच्छन्तोऽपि ग्रन्थरचनाचातुर्याभावान्न तान्युपनिबबन्धुः । ततश्च शिल्पसंबन्धिनां ग्रन्थानां रचनायाः सर्वथा विराम एवाभवत् ।

एवं च परिचितान्यपि तत्त्वानि लेखनिबद्धत्वाद् बाहुल्येन लयमेवोपगतानि । शिल्पशास्त्रप्रसारः प्रतिरुद्धः । शिल्पग्रन्थास्तु नामतोऽपि नालिख्यन्त । अस्तु । किमिदानीमनुशोचनया । यद्यस्माकं शिक्षाविभागाध्यक्षमहोदयः शिक्षासचिवमहोदयश्चास्यां पाठशालायां न्यायव्याकरणादिशास्त्राध्यापनव्यवस्थावच्छिल्पशास्त्राध्यापनव्यवस्थामपि कुर्यात्, तर्हि सुमहदुपकृतं स्याल्लोकानां शास्त्राणां चापि । भवतु प्रकृतमनुसरामः ।

मन्त्रेषु वास्त्वङ्गोल्लेखः—

वेदमात्रप्रचारकाले तात्कालिका जना वास्तुशिल्पमजानन् ते न गुहास्वेव प्रत्युत सुनिबद्धेषु गृहेषु न्यवसन्निति च न केवलं मन्त्रेषु गृह-धामपस्त्य-हर्म्यादिपर्यायमात्रप्रयोगेणावगम्यते, अपि तु द्वारस्तम्भाद्युपाङ्गनामोल्लेखादप्यवधार्यते । अथर्ववेदे गृहनिर्माणस्य निर्देशस्तु वर्तते, परन्तु तदङ्गोपाङ्गादिविवरणं नितान्तमेवाल्पमस्ति । एकत्रैतत् संकेतितमस्ति यत्तस्मिन्काले सभान्तरे संस्थापितेषु चतुर्षूपमितिनाम्ना व्यवहृतेषु स्तम्भेषु प्रतिमित्‍नाम्ना निर्दिष्टानि काष्ठफलकानि न्यधीयन्त, तानि तदग्रभागस्थापितैः परिमितिनाम्ना वर्णितैः प्र... भिर्वंशफलकैः समायोज्यन्ते । छदिश्च पलालतृणै... रमीयत । मध्ये मध्ये चेष्टकायोजनमक्रियत । ए... गृहमनेकशालासमलङ्कृतमभवत् ।

एकत्र चात्रेः शतद्वारे यन्त्रगृहेऽग्नौ संभृष्टो ... त्विति भावेनासुरैः प्रक्षेप उपवर्णितोऽस्ति, व... विषये च, स त्रिधातुशरणं निर्मातुमैच्छदिति व... मुपलभ्यते ।

एकत्र चैकः सम्राट् पाषाणादिधातुनि... सहस्रस्तम्भे प्रासादे निषसादेति विवरणं दृ...

मित्रो वरुणश्चाप्येकस्मिन् सहस्रस्तम्भे सहस्रद्वारे च प्रासादे न्यवसतामिति कथ्यते ।

कल्पसूत्राङ्गभूतेषु सुल्वसूत्रेषु च सोमादिमहायज्ञानुष्ठानाय वैज्ञानिकसिद्धान्तानुसारिणी वेदिरचना सुप्रतिपादिता दृश्यते ।

तैत्तिरीयसंहितायां विविधमानानां वेदीनां रचनाप्रकारः परिनिर्दिष्टो वर्त्तते । बौधायनापस्तम्बयोरग्निचितापद्धतिः स्पष्टीकृताऽस्ति ।

ऋग्वेदादिषु च ग्रामनगरदुर्गादिनिर्देशोऽप्यधिगम्यते । मन्त्रार्थचिन्तनशीलैर्विद्वद्भिरिदं सिद्धान्तरूपेण स्वीकृतं यद्वेदमन्त्रप्रचारकाले लोकाः पाषाणदुर्गाणां प्राकारपरिवेष्टितानां नगराणां, पाषाणबद्धगृहाणाम्, उत्कीर्णप्रस्तराणां प्रयोगविषये च नापरिचिता आसन् ।

बौद्धसाहित्येषु वास्तुसंवादः ।

महात्मनो बुद्धस्य समये तन्मतानुसारिषु संयुक्तप्रान्तेषु विहारदेशे च ग्रामरचनाप्रकारो वस्तुतः समानरूप एवाऽऽसीत् । ग्रामेषु गृहाणां संघातः संकुचितरथ्यामात्रपृथक्कृतो व्याख्यातः । प्रायः प्रतिगृहमेव च तत्संबद्धा वृत्तवाटिकाऽपि प्राप्यतेस्म । ग्रामेषु च सर्वत्र सार्वजनिकी धर्मशाला सभामन्दिरं चाप्यभवत् । किंच तेषु रथ्यानां मध्ये गामाद्ग्रामान्तरप्रयाणपथा अपि परिष्कृता अक्रियन्त । मध्ये मध्ये च यथास्वमुद्यानान्यप्यासन् । ग्रामवासनव्यवस्थाक्रमो यद्यपि पूर्णो नोपलभ्यते; तथापि प्राकारपरिखादिसहिता ग्रामाः, पुराणि चासन्निति शतशो वर्णनैरधिगम्यते ।

गिरिव्रजनाम्ना प्रसिद्धं शैलदुर्गं-यस्य परिधि अध्यर्द्धक्रोशद्वयात्मकोऽस्ति-महागोविन्दनाम्ना प्रसिद्धेन शिल्पिना निर्मितम् । बिम्बिसारेण राज्ञा च राजगृही निर्मापिताऽभवत् । गिरिव्रजो भारतस्य विद्यमानेषु पाषाणमयवस्तुषु पुरातनतमोऽस्ति ।

किंच तेषां तेषां प्रदेशानां मापनार्थं विनियुक्तानां शिल्पिनां नामान्यप्युल्लिखितानि दृश्यन्ते, यथा—

दन्तपुरं कालिङ्गानमस्सकानां च पोतनम्
माहिस्सती अवन्तीन् सौवीरानञ्च रोसकम् ।
मिथिला च विदेहान् चम्पा अङ्गेषु मापिता
वाराणसी च कासीनम् एते गोविन्दमापिताइ-ति ।

एकत्र महात्मना बुद्धेन स्वभिक्षुकेभ्यो निवासार्थमिमे पञ्च सुखावासा अनुज्ञाताः—विहारः, अर्द्धयोगः, प्रासादः, हर्म्यम्, गुहा चेति । एवंविधानां गृहाणां निर्माणाय यावान् कालः समपेक्षितोऽभवत् तेनैव तेषां विस्तारादिकं विज्ञातुं शक्यम् । यथाः-विहारार्थं पञ्च वा षट्, अर्द्धयोगार्थं सप्त, प्रासादार्थं दशवर्षाण्यपेक्षितान्यासन् ।

विहारादिनिर्माणार्थं भूसंग्रहोऽपि प्रौढेन विधिनाध्यधीयत तथा चोक्तम्–विहारो ग्रामान्नातिदूरो नचात्यासन्नः, गमनप्रत्यागमनयोर्मार्गसौकर्यवान्, ये तत्र गन्तुमिच्छन्ति, तैः सुखेन परिचेयः, यत्र दिनेऽपि नात्यन्तं जनसंमर्दो भवेद्रात्रौ च ग्रामकलकलात् सर्वथा वर्जितो भवेत् । इति

अस्त्वेतेनैतत्सिद्धं यद्बौद्धमत-प्रचार-कालेऽपि वास्तुविद्याया समीचीनं ज्ञानमासीद्भारतीयानाम् ।

रामायणेपि तत्रतत्राभ्रंलिहादिप्रासादानां, देवायतनानां, सभामण्डपानां प्रपाणामारामाणां च विस्तृतं वर्णनं दृश्यते ।

महाभारतेऽपि धर्मराजाय मयदानवे या सभा विरचिता सा सुप्रसिद्धैव ।

वायु-स्कन्द-मत्स्य-विष्णु-भागवत-पद्म-गरुड-अग्नि-ब्रह्म-शिव-नारद-मार्कण्डेय-वराह-लिङ्ग-कूर्म-ब्रह्माण्ड-ब्रह्मवैवर्त-भविष्य-पुराणेष्वपि प्रसङ्गवशान्मन्दिर-प्रासादादिनिर्माणविधिरङ्गोपाङ्गैः सहितो वर्णितः ।

किं च दक्षिणदेशे तन्त्रादिवच्छिवशक्तिसमुपासनविधिप्रतिपादनप्रधानोद्देशा आगमनाम्ना प्रसिद्धा ग्रन्थाःसन्ति, तेष्वपि सर्वाङ्गसंपन्नं वास्तुशास्त्रं दृश्यते । ते यथा—

कामिकागम-सुप्रभेदागम-योगजागम-चिन्त्यागम-करणागम-अजितागम-दीप्तागम-सूक्ष्मागमादयोऽष्टाविंशतिः ।

बृहत्संहितायां तु वराहमिहिराचार्येण सम्यक् स्पष्टीकृत एव वास्तुविषयः ।

मानसारे प्रतिपादितानां विषयाणां सूचीमात्रेणैव भवद्भिर्विज्ञायेत यत्कीदृशी परिपूर्णा तत्रैषा कला प्रतिपादितास्ति —

संग्रहः, मानोपकरणविधानम्, वास्तुभेदप्रकरणम्, शङ्कुस्थापनम्, पादविन्यासः, बलिकर्मविधानम्, ग्रामविधानम्, नगरविधानम्, भूमिलम्बविधानम्, गर्भन्यासविधानम्, उपपीठविधानम्, अधिष्ठानविधानम्, स्तम्भलक्षणम्, प्रस्तरविधानम्, संधिकर्मविधानम्, विमानविधानम्, एकभूमिविधानम्, द्विभूमिकाद् द्वादशभूमिकप्रासादविधानम्, प्राकारविधानम्, परिवारप्राकारविधानम्, गोपुरविधानम्, मण्डपविधानम्, शालाविधानम्, गृहमानस्थानविन्यासः, गृहप्रवेशविधानम्, द्वारस्थानम्, द्वारमानविधानम्, राजगृहविधानम्, राजाङ्गलक्षणम्, भूपाललक्षणम्, रथकर्मविधानम्, शयनविधानम्, सिंहासनलक्षणविधानम्, तोरणविधानम्, मध्यरङ्गविधानम्, कल्पवृक्षविधानम्, अभिषेकलक्षणम्, भूषणलक्षणम्, त्रिमूर्तिलक्षणम्, विविधाः प्रतिमाः, मुनिप्रतिमा, भक्तप्रतिमा, वाहनप्रतिमा, दशतालमानम्, मध्यमदशतालमानम्, देवप्रतिष्ठाकर्म । अस्मिन्नेव विषये गन्नमाचार्यस्य मयमतमिति, काश्यपस्य अंशुमद्भेद इति नाम्ना प्रसिद्धौ ग्रन्थौ स्तः । विश्वकर्मशिल्पमपरमप्येकं पुस्तकमस्ति ।

विस्तरभयान्नात्र मया बहवो विषयास्तेभ्यस्तेभ्यो ग्रन्थेभ्यः समुद्ध्रियन्ते । केवलं विदुषां सेवायामिदं निवेद्यते—

शिल्पैस्तुल्यमिहास्ति नैव किमपि प्रायेण वृत्तिप्रदं
तस्मात्तत्परिरक्षणाय विबुधैः कार्यः प्रयत्नो ध्रुवम् ।
बाधा कापि महीयसीह विषये काप्यस्तिदूरं न चेत्
सा नीयेत कदाचिदेव भवतां यत्नो न साफल्यभाक् ॥
ये विद्यानिधयो वसन्ति भवतां देशेऽर्थबोधक्षमा-
स्तेषामस्ति रुचिर्मनागपि तु नो शिल्पे प्रयोगात्मके ।
येषामस्ति च जीवनं बहुविधैः शिल्पैः प्रयोगात्मकै-
स्तेषां पाठनमेव हन्त ! भवतां देशे निषिद्धं चिरात् ॥

तस्माद् यदि तत्रभवद्भिः शिल्पोपजीविनां का[illegible] कुम्भकार-रथकारप्रभृतीनां शूद्राणां पठन-पाठने सर्वथा नैव प्रवर्तनीये तर्हि शिल्पकलाप्रतिपादकानां तेषां तेषां पुरातनानां ग्रन्थानामभ्यासं कृत्वा तत्तत्प्रतिपादितशिल्पप्रयोगप्रदर्शनाय स्वयं कार्यादिकं समारब्धव्यम् । अथ चेद् भवतां तत्र गौरव-धर्मादि-हानिवशात्संकोच आलस्यम्, औदासीन्यं च तर्हि शास्त्रेषु, शिल्पिषु, देशे, समाजे च दयां कुरु[illegible]

शिल्पोपजीविनीर्जातीरपि संस्कृतभाषां संपाठ्य संस्कृतभाषोपनिबद्धेषु ग्रन्थेषु व्याख्याताः कलाः पाठयत । येन तासां प्रयोगो भवेत् । प्रयोगेण याथार्थ्यज्ञानं भवेत् । याथार्थ्यज्ञानेन प्रचारो भवेत् । प्रचारेण परिरक्षणं परिवृद्धिश्च भवेत् । प्रयोगात्मकस्य शिल्पस्य ज्ञानं तस्य पुरुषस्य, यः प्रयोगरूपेण तस्य व्यवहारं न करोति सर्वथा निष्फलम् । यस्तु केवलं प्रयोगरूपेण शिल्पं व्यवहरति, न तु तस्यागमं सिद्धान्तमुपपत्तिश्च वेत्ति तस्यापि तज्ज्ञानं हीनं, वृद्धिरहितं, स्वाविष्कृतनवतत्त्वसंरक्षणपरिवर्धनविहीनं च ।

तस्मान्न्यायादिकं यद्वत् पाठशालासु पाठ्यते ।
शिल्पशास्त्रमिदं तद्वत् पाठनीयं प्रयत्नतः ॥

शुभम् ॥

गृहागमनम् ।

(अ०—बहादुरचन्द्र गुप्तः, शास्त्री)

(कवीन्द्ररवीन्द्रकृतायाः एकतमस्याः कथाया अनुवादः)

[विशिष्टाङ्कलेखः]

स्फटिकचक्रवर्ती ग्रामस्य माणवकेष्वधिनायक आसीत् । एकदा तस्य मनसि कश्चिन्नवीनमेवोपद्रवमुद्भावयितुं विचार आविर्बभूव । नदीकच्छोपकण्ठे नावः कूपकायैको महान् दारुखण्डः पतितस्तस्थौ । स चेत्थं विचारयाञ्चकार, यत्, सर्वेऽपि बाला युगपौरुषेण तं दारुभित्तमुत्तोल्य दूरमपवाहयितुं प्रयतेरन् । येन तस्य दारुणः स्वामी कुपितश्चकितश्च स्यात्, तच्च तेषां कृते समीचीनो विनोदः स्यादु इति । अथ प्रत्येकं तस्येमं प्रस्तावमनुमोदयामास । तदित्थं सर्वसम्मतया प्रस्तावः संपेदे ।

परन्तु समारप्स्यमान एव विनोदे स्फटिकस्य कनीयान् भ्राता मक्खनो वाचंयमः परिभ्रमन् पश्यतामेव तेषां सर्वेषां तस्मिन् काष्ठभित्ते निषसाद । अथ माणवका मुहूर्त्तं किंकर्तव्यविमूढा बभूवुः । अनन्तरमेकतमस्तेषां कातरभावेन तं नुनोद; व्युत्थातुञ्च व्यादिदेश । किन्तु मक्खन एकान्तं मुक्तसङ्गोऽवतस्थे । सहि क्रीडानां वैयर्थ्यं तर्कयन् बालतार्किक इव ललक्षे । तदालोक्य स्फटिको भृशं चुक्रोध, चुक्रोश च—'मक्खन ! एष उज्जासयामि ते सद्यश्चेन्नोत्तिष्ठसि' इति

मक्खनस्तु केवलं भूयोऽपि सुखावस्थितये किञ्चित्ससर्प ।

सम्प्रति, स्फटिकेन जनताभिमुखं यदि स्वकीयो नायकोचितः प्रभावः स्थापनीयोऽभविष्यत्तर्हि नूनं स स्विन्नं तर्जनं कार्यं पर्यणमयिष्यदिति विशदमासीत् । किन्तु प्राप्ते विषमावसरे तस्योत्साहो भङ्गमापेदे । तथापि प्रतिभाशालिनि तस्य मस्तिष्के सहसा काचिदभिनवा युक्तिरुन्मिमेष; या तस्य कनीयांसं पराभवितुमनुचरांश्च बहुतरं रञ्जयितुमलंभविष्णुरासीत् । अथ स मक्खनसमेतमेव दारुखण्डं परिवर्तयितुं शशास । मक्खनः शासनं शुश्राव, तत्रोपश्लेषणमेव चात्मगौरवं मेने । किन्तु विषयान्तरेषु लौकिकीं कीर्तिमभीप्सुभिस्तुल्यं स तत उत्थविष्यन्तीमापत्तिमुपेक्षांचक्रे ।

अथ माणवकास्तं काष्ठखण्डमपसारयितुं विचक्रमुः, पूर्णं बलमादधुः, चुक्रुशुश्च—'एकम्, द्वे, त्रीणि, याहि !' याहि शब्दोच्चारणसमकालमेव काष्ठखण्डो ययौ ; सममेव च मक्खनस्य तर्को गरिमा सर्वस्वञ्च ययुः ।

अथेतरे बाला हर्षातिरेकेण तुमुलं शब्दायांचक्रिरे, किन्तु स्फटिकः किञ्चिद्बिभयांचकार । स हि विदांचकार किमापिपतिषतीति । नासौ मिथ्याऽनुममौ, मक्खनो हि पुरुषभाग्यवदन्धः सन् मूर्तिमान् संरम्भ इव संह्रादमानः पृथिवीमातुरङ्का दुत्तस्थौ, श्येनपातं च स्फटिके पपात, तस्य मुखं संततक्ष, तमाजघान, तं पदाजघान च, ततश्च क्रन्दन् गृहं जगाम । इत्थं नाटकस्य प्रथमोऽङ्कः समाप्तिं जगाम ।

अथ फटिकः स्वमुखं प्रोञ्छाञ्चकार, नदीतीरोपकण्ठं मग्नार्धभागाया एकस्या नौकायाः कूलमध्यासीनश्च तृणाग्रं कर्तितुमारेभे । अत्रान्तरे काचिदितरा तरणिस्तटमभिजगाम, एकः पक्वत्रयाः पलितमुण्डोऽसितश्मश्रुः पुरुषश्च तटभुवमवततार । स तं तथाऽऽसीनमकिञ्चित्कुर्वाणं माणवकं वीक्षाञ्चक्रे पप्रच्छ च-' ननु भोः ! चक्रवर्तिनः कुत्र वसन्ति ? ' इति । स्फटिकस्तृणं कृन्तन्नेव बभाषे-' तत्र वै ' इति, परं ' स कां दिशमभिसङ्केतयाञ्चकार ' इति निर्देष्टुमसंभवमासीत् । आगन्तुकस्तं पुनः पप्रच्छ । स स्वे जानुनी नावः पार्श्वे परिधुन्वन् व्याजहार- गत्वा गवेषय भोः ! ' इति दर्भशूकनिकर्तनञ्च यथापूर्वमनुबबन्ध ।

किन्तु तस्मिन्नेव मुहूर्ते, गृहादेकः सेवकः समाजगाम स्फटिकमाचचक्षे च-'माता त्वामाकारयति' इति । स्फटिकश्चलितुं विप्रतिपेदे । परन्त्वस्मिन्नवसरे सेवकः स्वामी बभूव । असौ प्रसह्य स्फटिकमुज्जग्राह, मोघसंरम्भेन पादौ विक्षिपन्तं विचेष्टमानञ्च तं गृहं चकर्ष ।

यदा स्फटिको गृहं विवेश, तस्य माता तं ददर्श, सकोपं चुक्रोश च-' आः ! पुनरपि मक्खनमाहंस्येव ? '

स्फटिकः सरोषावेशमाचष्ट-' नैवम्, नाहमाहतवान् , कस्त्वामाख्यद् यदाहतं मयेति ? ' इति

तदम्बा जुघोष—' माऽनृतं वादीः ! आहतं त्वया । ' इति

स्फटिकः ससंभ्रमं बभाषे—' ननु ब्रवीमि, नाहतं मया । मक्खनं पृच्छ ' इति किन्तु मक्खनः ' प्राक्तने कथने दृढेन भाव्यम् ' इत्येव साधिष्ठं मेने । ततः स व्याजहार—' आम् मातः ! स्फटिक आवधीन्माम् ' इति

स्फटिकस्य धैर्यं सद्यश्चिक्षाय । न स एतमन्यायं मर्षयितुं शशाक । स मक्खनमभिदुद्राव ' गृहाणेदम्, इदञ्च, इदञ्च मिथ्याभाषणाय ' इत्येवङ्कारञ्च संह्रादमानस्तस्मिन् मुष्टिवृष्टिं ववर्ष

तस्य माता तत्क्षणं मक्खनस्य पक्षं जग्राह, तुल्यबलांश्च मुष्ट्याघातान् प्रत्यर्पयन्ती मक्खनं दूरमपवाहयांचकार । स्फटिकस्तामेकतो विचिक्षेप । सोच्चैश्चक्रन्द—' आः पाप ! दुरात्मन् !! जननीं स्वित् ताडयितुं धृष्णोषि ? '

अस्मिन्नेव विषमे क्षणे स पलितमुण्ड आगन्तुकः समुपस्थे । स जिज्ञासांचक्रे 'किंजातम्' इति । स्फटिकः संचुकोच, जिह्रयांचकार च । अथ यावत् तस्य माता किञ्चिदपससार, आगन्तुकञ्च वीक्षाञ्चक्रे, तदा तस्याः कोपो विस्मये परिणनाम । सा हि स्वीयं भ्रातरमभिजज्ञे । ततश्च साऽभिदधे—'अये ! कुतस्त्वमायातः ?' इति

तथाऽभिभाषमाणा सा, आभूमेः प्रणिपपात तस्य, पादौ च पस्पर्श, तस्या भ्राता विश्वम्भरः स्वसुः परिणयानन्तरमेव विप्रकृष्टकं गतवान् आसीत्, मुम्बापुर्याञ्च व्यापारमारब्धवानासीत् । प्रवसत एव तस्य सा पत्या वियुयाव । सम्प्रति विश्वम्भरः कलिकातां प्रतिनिवृत्त आसीत्, सद्यश्च भगिन्या उदन्तं विजिज्ञासमानोऽवात्सीत् । यावत्स बुबुधे 'क्वास्ते सा' इति तावत्स तां दर्शकस्तत्वरे ।

अथोत्तराः कतिपये दिवसा आमोदपूर्णा व्यतीयुः । भ्राता पप्रच्छ—'कथङ्कारं कुमारयुगलस्य परिपोषणं भवतीति । तद्भगिनी प्रत्यूचे-स्फटिकस्तु शाश्वती वेदनाऽस्ति । स हि तन्द्रालुः, अनाश्रवः, किरातश्च अस्ति । मक्खनः पुनः कनकवत्कमनीयः, छगलक इव प्रश्रितः, सुतरामध्ययनप्रियश्चास्ति ।' इति । विश्वम्भरः सदयं शशंस—'कामो मे स्फटिक इतो मया सार्धं गच्छेत् कलिकातायाञ्च मदात्मजैः सह शिक्षां गृह्णीत' इति तच्च विधवा माता झटित्यनुमेने । स्फटिकस्य मुदो न ममुः, यदा तं मातुलः पप्रच्छ—'अपि जिगमिषसि मया सह कलिकाताम्' इति । स आचचक्षे—बाढम् मातुल !' तस्य वाचा स्फुटं प्रतीये-सगन्तुमभीयेषेति ।

स्फटिकादतिमुक्तिं माता परां निर्वृतिं मेने । सा तनये मत्सरमादधे, द्वयोः सोदरयोश्च प्रीतिश्चिक्षाय । सा प्रत्यहं विभयाम्बभूव-मास्म स्फटिको जातुचिन्मक्खनं नद्यां मज्जयत्, शिरो वा तस्य कदाचिद्विग्रहे भञ्जयत्, विपदं वा कामपि तं नैषीदिति । सममेव च सा स्फटिकस्य गृहोज्झनाय तीव्रामुत्कण्ठां निध्याय किञ्चिदाकुलीबभूव ।

यदा सर्वं निश्चिक्ये ततःप्रभृति स्फटिकः प्रतिक्षणं मातुलं संपृच्छमान आसाञ्चक्रे 'कदा प्रस्थास्यावहे ?' इति । आदिवसं स औत्सुक्यात्कण्टकानिवाधिशिश्ये, सकलां रात्रीं च प्रायो जाग्रदेव निनाय । मत्स्यवेधनं, विपुलं पतङ्गकं, प्राय

गुलिकाश्चेति निखिलां स्विकां सम्पत्तिं स मक्खनं प्रति शाश्वताय कालाय विततार । यत्सत्यं प्रस्थानकाले मक्खनं प्रति तस्यौदार्यं सीमानमतिचक्राम ।

अथ यदा तौ कलिकातामासेदतुः, स्फटिकः प्रथमं वारं मातुलानीं मिमेल । निजकुटुम्बेनैतमनावश्यकं योगं विभाव्य सा भृशं विषसाद, अन्यतरं कमप्यनादायैव स्वकीयस्यैवाप-त्यत्रयस्य पोषणं तस्यै सुपर्याप्तमासीत् । तस्य च ग्राम्यस्य चतुर्दशहायनस्य माणवकस्य तेषां मध्य आनयनं नितरा मुद्वेजकं बभूव । अस्य अविवेकस्याऽऽचरणात्प्रागेव विश्रम्भ-रेण नूनं विचिन्तनीयमासीत् ।

(क्रमशः)

गौतमीय-न्यायदर्शनालोचनम् ।

[ले०—श्रीसीताराम शास्त्री, विद्यामार्तण्डः] ।

अथेदं विचार्यते यदिदं गौतमीयं न्यायदर्शनं तत्किं यावज्जगदवलम्बनवस्तुविवेचनपरमुतैकदेशि यत्किञ्चिद्वस्तु विवेचनं विद्या-विशेष एवेति ।

तत्रैतावन्निश्चिनुमो यदिदं कस्मिंश्चिदेकस्मि-न्विषये विवदमानयोर्द्वयोर्वादिप्रतिवादिनोरेकस्येन्द्र-नयनकरी अपूर्वेयं विद्येति, नतु निखिलजग-त्कारणतत्व-प्रबोधन-परा काचित्परमा विद्येति ।

यद्यपि स्व-प्रतिपाद्य-प्रमाणादिपदार्थतत्त्वज्ञानेन निःश्रेयसाधिगम उक्त आचार्येण, तदपि अस्य तादृश-शास्त्रान्तरोपोद्बलकत्वेन, न तु स्वातन्त्र्य-णेति ज्ञातव्यम्' यतः प्रमाण-प्रमेय-संशय-प्रयो-जन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानि-इति यावन्तोऽपि पदार्था उद्दिष्टास्तत्र नैकोऽप्येतादृशः पदार्थो निर्दिष्टो येन जगन्निर्माणे काचिद् बुद्धिर्जन्येत, यथा सांख्ये—

'प्रकृतिः, महान्, अहंकारः, मनः, पञ्चज्ञाने-न्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्च-शब्द-स्पर्श-रूप-रस-गन्धाः, पृथिव्यादीनि भूतानि, पुरुषश्चेति पञ्च-विंशतिस्तत्वानि' इत्युक्त्यैव प्रतीयते—एवं संभ-वति जगदुत्पत्तिः, अवश्यं चैतत्तत्त्वज्ञानेन भवेत्कै-वल्यमिति ।

यथावा, वैशेषिके— 'द्रव्य—गुण-कर्म—सामा-न्य—विशेष—समवायाभावाः सप्तपदार्थाः' इति कथनेनैवावगम्यते एतावती जगदुत्पत्तिसामग्री, भविष्यत्येव साकल्येनैतत्पदार्थज्ञाने निःश्रेयसमिति । येन हि दुर्गप्रवेशमार्गो विदितो नूनं तेन निर्गम मार्गोऽपि विदित इति । प्रवेशनिर्गममार्गयोर्गृहा-दिषु समानत्वस्य दर्शनात् । नह्युदाहृतयोः शास्त्र-योः प्रविशतां प्रथममेव प्रमाणजिज्ञासा समुत्तिष्ठते ।

किञ्च, भवेदपि प्रमाणप्रमेयादिद्वित्रपदार्थ-ज्ञानस्य कथंचिन्निःश्रेयसाधिगमे उपयोगो जल्प-वितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां बहूनां पराजयहेतूनां न गुरुशिष्य-प्रयोजने संवादे किञ्चित्प्रयोजनं—कः कस्य निग्रहं कुर्यात्; पराज यं वा गुरुर्वा शिष्यस्य गलग्रहं कुर्याच्छरणागतस्य, उत शिष्यः सदुपदेशदक्षिणां तथा कुर्याद्गुरोः । नहि पुराणेतिहासादिषु-जिज्ञासाकथायामेतादृगुदा-हरणं क्वापि लभ्यते ।

यः खलु निःश्रेयसार्थी भवति न तस्य गुरोः सन्निधौ छलजात्यादिना तादृशं साध्यं साध्यता-

मियात्, प्रत्युत; शान्तो दान्त उपरतस्तितिक्षुः समाहितमना एव भक्तिभावनम्रः परित्यक्त-कौटिल्यादिपरिपन्थिभावो लब्धुमर्हति तत्त्वज्ञानं गुरुमुपाश्रितः। यथोक्तं वेदान्तसारे—

"प्रशान्तचित्ताय जितेन्द्रियाय
प्रक्षीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत्सकलं मुमुक्षवे॥" इति

तथाच तत्रैव—

"अयमधिकारी जननमरणादिसंसारानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति। तद्विज्ञानार्थं सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिः। स गुरुः परमकृपया अध्यारोपापवादन्यायेनैनमुपदिशति।

"तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय येनाक्षरं पुरुषं वेदसत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इत्यादि श्रुतेरिति।

श्रीमद्भगवद्गीता चात्र भवति—

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति" इति।

बह्वन्येवैतादृशानि शास्त्रेषु वाक्यानि उपलभ्यन्त किमतिविस्तरेण।

इदमुक्तं निःश्रेयसाधिगममुपलक्ष्य, अपरं तूच्यते सूत्रोक्त-पदार्थानां परस्परं संप्लवनमुद्देश्यानुद्देशनं चालोच्य तत्र मिथः संप्लवनं यथा तावत्प्रमाणानि प्रत्यक्षादीनि उत्तरस्मिन्प्रमेयेऽथ संमिलन्ति। इन्द्रियाणि हि प्रत्यक्षप्रमाणानि तानि इन्द्रिये प्रमेये, व्याप्तिज्ञान-सादृश्यज्ञान-पदज्ञानरूपाणि चानुमानादीनि बुद्ध्यात्मके प्रमेये समानरूपत एव प्रविशन्ति। तान्येव च सर्वाणि प्रथममेव प्रमाणपदार्थे समभिसंभवन्ते।

अहो प्रमाण-प्रमेययोरैक्ये लक्ष्य-शरयोरिवाभिन्नयोः साफल्यं तत्र भगवत आचार्यस्येति। इदं च भवति-उद्देश्यानुद्देशनमनुद्देश्यानां चोद्देश इति। यदयं प्रमाण प्रमेयाख्ये द्वे विधे-उद्दिश्य, प्रमाता प्रमाचेति द्वे परित्यजति। प्रमाण-प्रमेयान्तर्गतान् बहु-संशयादींश्चोपादत्ते-इति। न खलु प्रमातुरुपयोज्यानि प्रमाणादीनि कथमपि प्रमातारमन्तरा सफलीभवितुमर्हन्ति। यदस्ति च प्रमाणं, विद्यते च प्रमेयं जायते च तयोः संबन्धस्तथापि यदि न प्रमा नाम किञ्चित्किंतेन तेन स्यात्।

यद्युच्यते प्रमेयगणे बुद्धिरुद्दिष्टा, तथापि न प्रमेयेण प्रमास्थानं पूर्यते भेदात्। उचितन्तु प्रमाप्रमेययोः पृथक् स्थानम्।

किञ्च, पृथिव्यादीनि महाभूतानि सर्वतन्त्र-सिद्धान्तविषयतामुपगतान्यपि न क्वापि षोडशसु पदार्थेषु मध्येऽन्तर्भवन्ति, न प्रमाणे न प्रमेये इति महत्येव त्रुटिः प्रधानोद्देशे। अपरं च तस्मान्नेयं विद्या समीचीनक्रमोद्देशा, नापि शास्त्रान्तरवत्स्वान्त्र्येण निःश्रेयसाधिगमे हेतुतां नितरामेव व्रजति।

भाष्यकारोऽप्यस्या लौकिकविद्यात्वमेवप्राधान्येन स्वीकरोति यथा—"इमास्तु चतस्रो विद्या (त्रयीवार्ता दण्डनीतिरान्वीक्षिकी चेति) पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या, तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः, तेषां पृथक् वचन

मन्तरेणाध्यात्मविद्यामात्रमियं स्याद् यथोपनिषदः" इति ।

किञ्च—प्रमेयसूत्रभाष्ये—आत्मादिद्वादशविधं प्रमेयं व्याख्याय अन्ते "अस्त्यन्यदपिद्रव्यगुणकर्मसामान्यविशेष समवायाः प्रमेयं तद्भेदेनचापरिसंख्येयम् । अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात्संसार इत्यत एतदुपदिष्टं विशेषेणेति" इति स्पष्टमेवोक्तं प्रमेयगणनाया अपूर्णत्वमिति । तस्मादस्य शास्त्रस्य प्रथमोद्देशसूत्रस्थपदार्थसामर्थ्यात्लौकिकत्वमेव प्राधान्येनेति निश्चयः ।

ज्ञान-भैषज्य-मञ्जरी ।

महाकवि श्रीगुमानी-प्रणीता ।

सम्पादकः—श्रीतारादत्तपन्तः, साहित्याचार्यः ।

मङ्गलम्—

जयति पतिर्जानक्याः शिवम्प्रयच्छन् भवाभिभूतेभ्यः ॥
धन्वन्तरिरिव साक्षाद् वितरन्नगदं गदार्तेभ्यः ॥ १ ॥

मोहे वातज्वरे च—

भक्तिर्विभाव्यमाना विधुनोति श्रद्धयान्विता मोहम् ॥
अनिलज्वरमिव शुण्ठी क्वथिता मधुधारयोपेता ॥ २ ॥

भवतापे पित्तज्वरे च—

सदसद्विवेक एकः प्रकृष्ट-भवतापवारणः प्रथितः ॥
पित्तज्वरापहारी केवल इव पर्पटक्काथः ॥ ३ ॥

संसारदुःखे कफज्वरे च—

शमयति शमः समेतः सन्तुष्ट्यां सन्ततं भवक्लेशम् ॥
क्वाथः कलिद्रुमोत्थः कफज्वरं सोपकुल्य इव ॥ ४ ॥

तापत्रये त्रिदोषज्वरे च—

विद्या विरक्तियुक्ता त्रितापतापं क्षणादपाकुरुते ॥
अमृताऽन्विता बृहत्या ज्वरमिव दोषत्रयोद्भूतम् ॥ ५ ॥

संसृतौ विषमज्वरे च—

उपरतिरसङ्गगर्भा यदि हि समुत्सारयेन्न संसारम् ॥
विषमज्वरं न जरयेत्तर्हि शिवा क्षौद्रसम्पन्ना ॥ ६ ॥

हृदयग्रन्थौ जीर्णज्वरे च—

न महावाक्यपदार्थज्ञानादन्यच्छिनत्ति हृद्ग्रन्थिम् ॥
न च गोपयोजफेनादपरं जीर्णज्वरं हन्ति ॥ ७ ॥

संसार-प्रवाहे अतिसारे च—

तत्त्वं यदैक्यभानं भवप्रवाहान् बहून्निवारयति ॥
कुटजेन्द्रजाम्बुपानं यद्वद् विविधानतीसारान् ॥ ८ ॥

ममत्वे अर्शरोगे च—

ज्ञानं सशान्ति-धैर्यं ममत्वमपहन्त्यदो न यदि सत्यम् ॥
हन्त्यर्शः ससितावनमग्निशिखं नेदमपि सत्यम् ॥ ९ ॥

अविद्यायां संग्रहण्यां च—

श्रवणेन यात्यविद्या मननंनिदिध्यासनाऽनुपातेन ॥
अपि च कपित्थमहौषधयुतेन तक्रेण संग्रहणी ॥ १० ॥

आत्मबोधे अजीर्णे च—

कथमौपनिषदशास्त्रं वितनोत्यात्मप्रबोधमनधीतम् ॥
कथमुदराग्न्युदयं तत् करोत्यभुक्तं त्रिकटुचूर्णम् ॥ ११ ॥

दुरितक्षये कृमिरोगे च—

स्मृतिरेव राघवीया दुर्धरदुरितोच्चयक्षपणयोग्या ॥
कृमिजालपातनार्हा यवानिका पारसीकैव ॥ १२ ॥

भवकृच्छ्रे रक्तपित्ते च—

कृपया सह रघुतिलक,—प्रसाद उच्चैर्भिनत्ति भवकृच्छ्रम् ॥
स च हन्ति रक्तपित्तं सितया सह वासकस्वरसः ॥ १३ ॥

संसारे क्षये च—

इह योगधारणाभिः पञ्चभिरुच्छेदमेति संसारः ॥
क्षय इह सितोपलात्वक्-क्षीरीकृष्णात्वगेलाभिः ॥ १४ ॥

संसृतिचक्रे नासारुधिरप्रवाहे च—

रघुवर्यसौमनस्यात् संसृतिचक्रप्रवृत्तिरिह न स्यात् ।
दाडिम-केसर-नस्यात् नासारुधिरस्रुतिर्न स्यात् ॥ १५ ॥

संसारे कासरोगे च—

लघु भृष्टधीविचारो न तथा सद्यतिश्छिनत्ति संसारम् ॥
लघुभृष्टकण्टकारी-स्वरसः सकणो यथा कासम् ॥ १६ ॥

अहम्मतौ हिक्कायाञ्च—

अद्वयतत्त्वाकलना-दहंमतिच्छेदि साधनं नान्यत् ॥
सैन्धवजलाच्च चान्याच्छिक्काधिकारदं नस्यम् ॥ १७ ॥

अर्थसन्देहे श्वासे च—

सामर्थ्यजुः ससुत्थे सारे विदिते कुतोऽर्थसन्देहः ।
मासनिशोषणजाते धूपे पीते कुतः श्वासः ॥ १८ ॥

दुर्दमपापे स्वरभेदे च—

श्रीरामनाम्नि कण्ठ-स्थिते सपाप्मा ससुदुर्दमः क इव ।
क इव दृढस्वरभेदः पुष्करमूले सुखान्तःस्थे ॥ १९ ॥

मिथ्यादृष्टौ अरुचौ च—

रामार्चनात्सहार्दान्मिथ्यादृष्टिर्विलीयते यादृक् ।
अरुचिर्नश्यति तादृक् समक्षिकादार्द्रकस्वरसात् ॥ २० ॥

अहङ्कृतौ छर्दिरोगे च—

आत्मज्ञानादपरं किमहङ्कृतिनिकृन्तनं बृहत्करणम् ।
चाम्पेयाच्च किमन्यच्छर्दिगदोन्मर्दि भैषज्यम् ॥ २१ ॥

भ्रमे अपस्मारे च—

न मृषा यद् गुरुवाक्यं प्रज्ञायते सावधारणं भ्रमजित् ।
सत्यं च यत्सतैलं लशुनमपस्मार-विध्वंसि ॥ २२ ॥

भवतृष्णायां कामलायां च—

ध्याते रघुपतिरूपे भवमृगतृष्णाक्षयस्तु किं वस्तु ।
नागरपयसि च पीते किं चित्रं कामला नश्येत् ॥ २३ ॥

भवदोषे आमवाते च—

अद्भुतमिदं यदेका, बुद्धिर्विमला लुनाति भवदोषम् ।
चित्रमिदं पुनरेका, यदामवातं हरति शुण्ठी ॥ २४ ॥

क्लेशभये वातरक्ते च—

सस्नेहमार्यसङ्गं क्लेशभयार्त्ता भजन्तु सौख्याय ।
गुग्गुलकषायकन्तु क्षौद्रयुतं वातरक्तार्ताः ॥ २५ ॥

जन्मग्रहणे शूलरोगे च—

जन्मी भजेत्सदार्ढ्यं विरागविज्ञानभावनाभ्यासम् ।
शूली तु सोष्णनीरं बलिटङ्कणशुण्ठिकाक्षोदम् ॥ २६ ॥

विषयरसे उदावर्ते च—

शान्तिर्दान्तिसमेता विषयरसं किं न सन्निवारयति ।
त्रिवृता सितान्विता किं नोदावर्तं निवारयति ॥ २७ ॥

दुष्कृतदुःखे मूत्रकृच्छ्रे च—

आहोदुष्कृतदुःखात् धर्म्मः सन्त्रायते दयोपेतः ।
द्रुतमूत्रकृच्छ्रकृच्छ्रात् द्राक्षा ससिता यवक्षारः ॥ २८ ॥

प्रमाददोषे प्रमेहे च—

सारः श्रुतेः सबीजो निषेवणीयः प्रमाददोषघ्नः ।
स्वरसोऽथवा गुडूच्याः समधुर्मेहामयध्वंसी ॥ २९ ॥

शोके शोथे च—

अनुचितमिदं शमाढ्यो हा सन्तोषो न शोकनाशकः ।
इदमप्यनर्हमार्द्रकरसो गुडाढ्यो न शोथहरः ॥ ३० ॥

भवक्लेशे व्रणरोगे च—

गुरुशास्त्रजोपदेशः समर्हणीयः सदा भवक्लिष्टैः ।
व्रणिभिस्तु माननीयो गुग्गुलनिम्बोद्भवो लेपः ॥ ३१ ॥

पापे अम्लपित्ते च—

नभियं समेति पङ्कात् प्रणिधानब्रह्मचर्ययुक्तात्मा ।
न बिभेति चाम्लपित्तात् सैन्धवसर्पिर्निघृष्टात्मा ॥ ३२ ॥

हृदयसंशये उपदंशे च—

हृत्संशयो न शाम्यति सानुभवं शास्त्रजं बोधम् ।
उपदंशोऽपि विना सौ सगुग्गुलं त्रैफलं क्वाथम् ॥ ३३ ॥

जाड्यदोषे कुष्ठरोगे च—

जाड्यवतां सनिदानो बोधश्चैविद्य एव समभीष्टः ।
कुष्ठवतां मधुजुष्टः क्वाथो माञ्जिष्ठ एवेष्टः ॥ ३४ ॥

दुर्वृत्ते कुनखे च—

दुर्वृत्तो बुधबोधनसंस्कृतवृत्तो न कः सुवृत्तः स्यात् ।
कुनखः सृङ्क्णचूर्णस्थगितनखः को न सुनखः स्यात् ॥ ३५ ॥

विकर्मदोषे तारुण्यपिटके च—

प्रतिपक्षो यमनियमप्रभवः क्षेमो विकर्मदोषाणाम् ।
वैरी सर्षपलोध्रकलेप स्तारुण्यपिटकानाम् ॥ ३६ ॥

पापतायां विपादिकायाञ्च—

किञ्चान्द्रायणकृच्छ्रव्रतैः प्रयोगान्न पापिता यस्य ।
किं घृतसिक्थकगैरिक-लेपान्न विपादिका यस्य ॥ ३७ ॥

आत्ममौढ्ये इन्द्रलुप्तेच—

मैवं यदात्ममौढ्यं धीशुचिभावो न निर्धुनोतीति ।
मैवं यदीन्द्रलुप्तं गुञ्जालेपो न हन्तीति ॥ ३८ ॥

वाग्विवादे अरूषिकायाञ्च—

किं साध्वसमधकोट्यामतिशोधनपुण्यकर्मनष्टायाः ।
किं भवमरूषिकाया महिषीदधिबिल्वतष्टायाः ॥ ३९ ॥

ऊतौ कण्डूरोगेच—

अपि सम्भारवियुक्तं न राघवीयाहर्णं किमूतिघ्नम् ।
गन्धक-विरहितमपि किं सर्षपतैलं न कण्डूघ्नम् ॥ ४० ॥

जाड्यदोषे चर्मकीलरोगे च—

कः कथयति गुरुतोषो न जाड्यदोषं हिनस्तीति ।
को वक्ति तुत्थलेपो न चर्मकीलं छिनत्तीति ॥ ४१ ॥

शोके मस्तकरोगे च—

दाक्ष्यस्थैर्यविवेचनविभाविते चेतसि शुक्रा ।
कुटजमहौषधकाञ्जिकलिप्ते शिरसि स्थिता रुक्रा ॥ ४२ ॥

कामक्रोधयोः सूर्यावर्तद्धिभेदे च—

करणादूधैर्यक्षमयोः कामः क्रोधश्च गच्छति प्रलयम् ।
नस्यात् कुङ्कुमसितयोः सूर्यावर्तद्धिभेदश्च ॥ ४३ ॥

कुमतौ नेत्ररोगे च—

वीक्ष्योदिता गुणाढ्या विद्यामेकां पलायते कुमतिः ।
दृष्ट्वाऽञ्जितां जलार्द्रां कस्तूरीं दृग्व्यथा द्रवति ॥ ४४ ॥

दुर्मतौ नक्तान्ध्ये च—

दौर्मत्यविपिनभेदि श्रेष्ठवचःशास्त्रधारणकुठारम् ।
नक्तान्ध्यविपिनभेदि श्रुतिमलमरिचाञ्जनकवचम् ॥ ४५ ॥

दुःखे नेत्रपुष्पे च—

विधृते हृदि रघुनाथे न दुःखनाशः क्षणेन तदसत्यम् ।
निहितेऽक्ष्णि सिन्धुफेने न पुष्पनाशस्तदप्यनृतम् ॥ ४६ ॥

प्रज्ञामान्द्ये बाधिर्ये च—

रघुरत्नवाचि नाम प्रज्ञामान्द्ये स्मृतः परोपायः ।
अपि बिल्वपाचितैलं श्रुतिबाधिर्ये महोपायः ॥ ४७ ॥

हृद्यमृगतृष्णायां कर्णरोगे च—

सगुणसुजनकुलसङ्गो हृन्मृगतृष्णानिशीथिनीग्रहराट् ।
ततस्वरसरविपत्रस्वरसः श्रुतिरुङ्मृगीमृगराट् ॥ ४८ ॥

लोभे नासिकारोगे च—

लोभं निराकरिष्णुः स्थैर्यं सन्तोषवृत्तिजं धत्ताम् ।
नासामयमसहिष्णुः जीरसितानस्यमाधत्ताम् ॥ ४९ ॥

हिंसाबाधके कर्णप्रवाहस्तम्भे च—

बुद्धागमोक्तवाक्यं हिंसाविधिबाधकं यदा भवति ।
शम्बूकमांसतैलं श्रुतिस्रुतिस्तम्भनं न कथम् ॥ ५० ॥

गुणानां रसधर्मत्वम् ।

(ले०—जयपुरराजगुरु-कथाभट्टवंश्य-श्रीनन्दकुमारनन्दकिशोर-साहित्याचार्यौ) ।

तमोगणविनाशिनी सकलकालमुद्योतिनी
धरातलविहारिणी जडसमाजविद्वेषिणी ॥
कलानिधिसहायिनी लसदलोलसौदामनी
मदन्तरवलम्बिनी भवतु कापि कादम्बिनी ॥ १ ॥

अयि निखिलशास्त्रापारपारावार-विगाहन-समधिगतचातुरीकाः, विद्याकल्पलतारसास्वादनलोलुपसत्तचञ्चरीकाः, समागतानेकप्रतिष्ठितगरिष्ठविद्वद्वरिष्ठशिरोमणिप्रघृष्टचरण—नखमयूखसंतोषित-चन्द्रचन्द्रिकाप्रणयिचकोराः श्रीमन्तः ! अपारेऽत्र कविविरञ्चिप्रपञ्चे काव्यं नाम सकलसहृदयाह्लादकं, निखिल जगद्वशीकारकं, उद्विग्नोद्वेगहारकम्, असन्दानन्दसन्दोह प्रदायकं, विबुधजनसौमनस्य-विधायकं, निखिलसंस्कृतसाहित्ये सरलसरण्या व्युत्पादकं, अशेषसान्द्रविशेष–सौहित्यनिधायकं, प्राचीनार्वाचीन विविधलोकव्यवहारविहार संदर्शकं, कुटिलकामिनीजालनिमग्न-मानवपीडैकनिवारकं, सकलशास्त्रापारससार-संसारैकप्रकाशकं, समग्रसंस्कृतानुरागिहृदयान्धकारतिरोधायकं, प्रभाकरतेजोवत्प्रदीपकं, बुधजनहृदयविद्योतकं, विद्यते, विद्योतते च ।

तत्र कवयितृकर्मणि काव्यप्रकाशकारास्तावद् व्यासज्यवृत्त्योभयगतचमत्कारसारविलोकनात् "तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि" इत्यादिना काव्यस्य शब्दार्थोभयविषयत्वं प्रतिपेदिरे, मेनिरे च ।

मयकापि च तेषां मतानुसारेणैव—

"आस्वादबोधकतया पठितं च काव्यं
बुद्धं च काव्यमिति सार्वजनीनवृत्तेः ।
आचार्यमम्मटवराः कविकर्मशब्दं
शब्दार्थतत्परमनारतमामनन्ति ॥ १ ॥"

इत्यादि काव्यविमर्शाख्ये महानिबन्धे निरूपितम् । रसगङ्गाधरकारास्तु 'रमणीयार्थप्रतिपादकः शब्दः काव्य'मित्यादिना काव्यविषयकशब्दवृत्तितां स्वीचक्रिरे । अन्ये च ग्रन्थकारा यथायथमुभयत्रैवान्तर्गताः । अस्तु नाम—

नैतत्तावदस्माकं विचारास्पदम्, प्रकृतमाक्षिपामः—शब्दकाव्यतावादिमते, शब्दार्थोभयगतकाव्यतावादिमते च यद्यपि समानमेवेदं यद् 'रस आत्मा, शब्दार्थौ शरीरम्, गुणाः शौर्यादिवत्, अलंकाराः कटक-कुण्डलादिवत्, रीतयोऽङ्गसंस्थान विशेषवत्, दोषाश्च बधिरतादिवत्, इति । यथा च मया तस्मिन्नेव निबन्धे निबद्धम् ।

हारादिवदलङ्कारा दोषा बधिरतादिवत् ।
गुणाः शौर्यादिवद्रीतिरङ्गसंस्था-विशेषवत् ॥

तथाप्यत्र तावत्स्थले केचिद्विवादग्रस्ता इत्थं प्रत्यवतिष्ठन्ते । यथा च ते आचक्षीरन्—

गुणास्तावन्नहि रसधर्मा, किन्तु; शब्दार्थयोरेव यदिनाम-केचिद् रसधर्मत्वं ब्रूयुस्तर्हि तेषां रसधर्मत्वे किं मानम्, यतः प्रत्यक्षानुमानयोस्तत्रानुपयुक्तत्वात् । तथाहि—

यथा—दाहादिकार्येणाग्निगतोष्णस्पर्शत्वस्य भिन्नतया संवित्तिः, तथैव द्रुत्यादिरूपेषु रसेषु न हि द्रुत्यादिरूपाणां गुणानां पार्थक्येन ज्ञानम्, येन विविक्ततया तेषामवस्थितिरङ्गीक्रियेत ।

अत्र श्रृङ्गारादावियं द्रुतिः रसकार्या वा माधुर्यादिगुणसंपाद्या इति भिन्नतयानुभयं कः प्रेक्षावान् प्रतीयात् । किंच-माधुर्यादिगुणविशिष्टानां श्रृङ्गारादिरसानां द्रुत्यादिकारणकत्वात्कारणतावच्छेदकतया गुणानामनुमानम्, इति चेन्न । श्रृङ्गारत्वादिरूपेणैव रसानां द्रुत्यादिकारणत्वोपपत्तौ तदन्यगुणकल्पने गौरवात् । न च श्रृङ्गारकरुणशान्तानां माधुर्यवत्त्वेन द्रुतिकारणत्वे श्रृङ्गारकरुणशान्तत्वादिरूपेण द्रुत्यादिकारणत्वकल्पनापेक्षया लाघवम्, इति वाच्यम् । मधुरतरादिगुणानां पार्थक्येन द्रुततरत्वादिकार्यतारतम्यप्रयोजकतया स्वीकारात् माधुर्यत्वस्वरूप-सामान्यकार्यकारणभावो निष्फलत्वाद् गडुस्थानापन्न इति । विशिष्यप्रयोज्य-प्रयोजकभावेनैव निर्वाहे किमर्थंसामान्यकार्यकारणभावः स्वीक्रियताम् । इति भावः । अपि च—आत्मा तावन्निर्गुणः इति वेदान्तिनः, ततश्चात्मस्थानापन्नस्य रसस्य माधुर्यादयो गुणा इति कथं कीदृङ् मनोहरम् । एवं च गुणाः शरीरभूतयोः शब्दार्थयोरेव धर्मा इति पर्यवसन्नम् ।

अत्रेदमुच्यते—

यदि नाम गुणानां शब्दार्थधर्मतां स्वीकुरुषे; न रसधर्मतां-तदा तावत् "तत्र टवर्गवर्जितानां वर्गाणां प्रथमतृतीयैः शर्भिरन्तःस्थैश्च घटिता, इत्यारभ्य, अवृत्तिर्मध्यवृत्तिर्वा रचनानुपूर्व्यात्मिका माधुर्यस्य व्यञ्जिका" इत्यादिना काव्यप्रकाशमनुसंदधता कथनेन कथं तावत् शब्दार्थव्यञ्जकतां नाम प्रतिपादयसि । अयं भावः—

शब्दरचनादयो गुणव्यञ्जका न तु गुणाधाराः, ये व्यञ्जकाः, न ते आधाराः, यथा च प्रत्यक्षे—घटव्यञ्जको दीपोऽस्ति । तत्रच व्यञ्जके दीपे न घटावस्थानं किन्तु भूतल एव, इत्थंच ये व्यञ्जकास्ते कथमाधाराः इति ।

यच्चोक्तम् 'अग्नेर्भिन्नमुष्णस्पर्शत्वं तत्राह—

अग्निस्तावत्कः पदार्थ इति तत्त्वगवेषणायां कृतायां पृथिव्यादिपञ्चतत्त्वान्तर्गततेजःपदार्थाभिन्नत्वमवसीयते । तेजसो लक्षणं तु उष्णस्पर्शवत्त्वम्, इति मन्यन्ते नैयायिकाः, इत्थं चाग्नेर्भिन्नमुष्णत्वमितिकथं वक्तुं शक्यते ।

किं च गौरवान्नानुमानमित्यपि नैव स्वीकार्यम्, मधुरत्वादिरूपसामान्यकार्यकारणभावस्वीकारेण निर्वाहे निष्पन्ने किं तावद् गौरवम् । न च मधुरमधुरतरादिगुणानां पार्थक्येन द्रुत-द्रुततरादिकार्यतारतम्यप्रयोजकत्वेन विशिष्यैव प्रयोज्यप्रयोजकभावो गौरवम्" इति वाच्यम् । प्रातिस्विककारणतादिनां मतेऽपि द्रुतद्रुततरत्वादौ सामान्यविशेषभावः स्वीक्रियते एवेति समानोऽयं पन्थाः ।

अस्तु नाम तावत् गौरवे सत्यपि न गुणा सिद्धिः । यच्चोक्तम् नहि रसेषु 'इमेरसाः" "इमे च गुणाः' 'इति पृथक् कर्तुं शक्यते द्रुत्यादिरूपैककार्यकत्वात् । तदपि न । सुकुमारपदरचनादिव्यक्तमाधुर्यादिजन्या द्रुतिरन्या, अन्या च रस-जन्या, इति नाविदितं विदुषाम् ।

एवं च यथा—आत्मनः शौर्यादयस्तथा माधुर्यादयो रसस्य, गुणा इति मन्तव्यम् ।

यथा च ध्वन्यालोके—

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत् ॥ १ ॥
शृङ्गार एव मधुरः परः प्रह्लादनो रसः
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥ २ ॥

तथैव च काव्यप्रकाशेऽपि, शौर्यादिव्यञ्जकाकृतिमहत्त्व विलोकनात् 'आकृतिरेवास्य शूरा, इत्यादि व्यवहारात्, अशूरेऽपि स्थूलाकृतिदर्शनेन 'शूर, इति' कुत्रापि कृशाकृति दर्शनेन 'शूरेऽपि' अशूर इति यथा लोका व्यवहरन्ते, तथैव काव्येऽपि माधुर्योपयुक्तसुकुमाररचनातो माधुर्यव्यवहारदर्शनात्, सुकुमाररचनादर्शनमात्रेण अमधुरेऽपि वीरादौ माधुर्यं, क्वाऽपि शृङ्गारादिरसोपकारकं वर्णानामोजः प्राचुर्येण मधुरेऽपि शृङ्गारादौ माधुर्याभाव इति रसान्तविश्रान्त-प्रत्ययभ्रान्ता व्यवहरन्ते । अतएव माधुर्यादयो रसधर्माः समुचितैर्वर्णैरभिव्यज्यन्ते; न तु वर्णमात्राश्रया, इति सविस्तरमुपपादितं मम्मटाचार्यैः । इत्थंचैवं सत्यपि शौर्यादयो न हि तावदात्मधर्माः किन्तु शरीरधर्मा इति मन्यसे तदा कथं मृतशरीरेऽपि तेषामवस्थानं न स्वीकुरुषे, कथं च मूर्तिलाघववति पुरुषेऽपि शूरत्वव्यवहारं कुरुषे । किं च दृश्यन्ते, श्रूयन्ते चेतादृशो वृत्तान्ता यद्दर्शने दुर्बलाश्च युद्धक्रियायां चाद्वितीया विक्रमैकरसाः । यथा नलराजेन ऋतुपर्णरथे संयोजितास्तुरंगमा दर्शने कृशकाया अपि गमने धावने च 'आत्मोद्धतैरपिरजोभिरलङ्घनीयाः, इत्यादि सूक्तीनां प्रधानलक्ष्यभूता इति पुराणतोऽप्यतिरोहितम् । न तु 'मधुरावर्णाः, इति लोक व्यवहाराद् वर्णधर्मत्वम्, उक्तं च वर्णधर्मत्वं वामनादिभिरपि, इति कथमन्यां सरणिं समाश्रयसि । इति चेन्न । अभियुक्ता वामनादयस्त्वौपचारिकं वर्णधर्ममादाय वर्णाः, इति व्यवाहार्षुः । भ्रान्तास्तु तं व्यवहारमपश्यन्तो 'मधुरा वर्णाः, इति व्यवहरन्ते । उक्तं चालङ्कारिकैरपि—

'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता, इति ।

तथा च काव्यानुशासने हेमचन्द्राचार्योऽपि-

रसस्योत्कर्षापकर्षहेतू गुणदोषौ भक्त्या शब्दार्थयोः, रसो वक्ष्यमाणस्वरूपस्तस्योत्कर्षहेतवो गुणाः, अपकर्षहेतवस्तु दोषाः । ते च रसस्यैव धर्माः, उपचारेण तु तदुपकारिणोः शब्दार्थयोरुच्यन्ते, इत्यादि, इत्यन्वयव्यतिरेकाभ्यां गुणदोषयो रस एवाश्रय इतिपर्यन्तमुक्तवान् ।

अपिच—रसानुत्पत्तिकालेऽपि 'काव्यस्यात्मारीतिरिति तस्य धर्मा गुणाः, 'इतिवैदर्भमार्गस्य प्राणा दशगुणा मताः, इति प्रथमपरिच्छेदे दण्डिकाव्यादर्शतोऽप्यवधेयम् ।

किंच 'चन्द्रालोकेऽपि सहित्यदर्पणकाव्यप्रकाशादिवत् ।

'अमी दश गुणाः काव्ये पुंसिशौर्यादयो यथा, इत्यादिना यथा ह्यात्मधर्मा गुणा शौर्यादयस्तथा रसधर्मा माधुर्यादयो गुणा इत्येव निर्णीतम् ।

अस्तु नाम तथापि गुणानां साक्षादुपकारकत्वम् अलंकाराणां त्वङ्गद्वारेण, तत एवच—

"रसभावतदाभासभावशान्तिनिबन्धनाः।
चत्वारो रसवत्प्रेयऊर्जस्विच्च समाहितम्" ॥

इत्येवमादीनामलंकाराणां साक्षादुपकारकत्वाभावात्, शब्दार्थालंकारत्वन्नालंकारत्वं किन्त्वौपचारिकमलङ्कारत्वमिति नियमः कथं स्वीक्रियते ।

तस्माच्च जानीमो वयं ये साक्षादुपकारकास्ते गुणाः, ये चाङ्गद्वारा रसोपकारकास्तेऽलङ्काराः । अयमेव च भेदो भेदहेतुर्वा यद् विभिन्नाश्रयत्वं नाम द्वयोः । यदि गुणालङ्कारयोर्द्वयोरेव शरीरसमवस्थानं भवेत्तदा 'द्वयोः शरीरद्वारा काव्यशोभाकारकत्वा दैक्यं प्रसज्यते । यथा च मयापि—

जानन्तु साहित्य-कला-प्रवीणाः ।
शब्दार्थ धर्मा न गुणा मता मे ॥
मान्तं तु बोध्यं रसधर्मतायाः
मलं कृतेः स्याद् गुणतो न भेदः ॥ १ ॥

इत्याद्यन्यत्राभिहितम्—

नच 'काव्यशोभायाः कर्तारो धर्मा गुणाः तदतिशयहेतवस्त्वलंकाराः, इति प्राचीनाचार्यकृतो भेदः संगच्छते तावदिति वाच्यम् ।

तथाहि—'रीतिरात्माकाव्यस्य, सा च पदसंघटनात्मिका त्रिविधा वैदर्भी, गौड़ी, पाञ्चाली च । तत्र सर्वगुणव्यञ्जकवर्णवती वैदर्भी, प्रसादौजोव्यञ्जकवर्णवती गौडी, माधुर्यप्रसादवदक्षरयुता पाञ्चाली । तत्र रीतिधर्मा गुणाः, शब्दार्थोभयरूपं काव्यं शोभयन्ति । शब्दार्थाश्रयाश्चालंकारास्तच्छोभाया अतिशयं कुर्वन्तीत्युक्तम् ; तत्र वैदर्भ्यां माधुर्यस्य प्रसादस्य च सत्वेन संभोगशृङ्गारादौ लेशत ओजः सत्वेऽपि क्षत्यभावेन सैव काव्यस्यात्मा स्यात्, न तु गौडी, पाञ्चाली च । तत्र माधुर्याद्यभावेन समस्तगुणाभावाच्छोभाया अनुत्पत्तेः । अत एव काव्यप्रकाशेऽपि यदि समस्तै गुणैः काव्यव्यवहारस्तदा कथं तावत 'असमस्तगुणा गौडी, पाञ्चाली च रीतिः काव्यस्यात्मेत्युक्तम् ।

यदि च कतिपयैर्गुणैरपि काव्यत्वव्यवहारस्तदा कथं 'शुष्कोवृक्षस्तिष्ठत्यग्रे, इत्यत्र ।

अद्यावत्र प्रोज्ज्वलत्यग्निरुच्चैः प्राज्यप्रोद्यन्नुल्लसत्येष धूमः-इत्यत्रचौजःसत्वेपि कथं न काव्यत्वं स्वीक्रियते । एवं च 'काव्यशोभायाः कर्तारो धर्मा गुणाः, इत्यनुपपन्नम् ।

न च'गुणाहितशोभाया अतिशयकर्तारो धर्मा अलङ्काराः, इत्यपि मन्तव्यम् । तथात्वे सति—

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ॥ १ ॥

इत्यत्र दिव्यदेहरूपैकगुणहानिकल्पनया सुखदायकत्वादिरूपसमस्तगुणदार्ढ्यकल्पनायाः सत्वात विशेषोक्तिः । उपमेयस्याधररसस्य चोपमानभूतसुधारसापेक्षयाऽऽधिक्योक्तेर्व्यतिरेकः ।

एतावलंकारौ गुणानां निराकाङ्क्षतयैव काव्यव्यवहारहेतुशोभाजनकौ । भवन्मते तु माधुर्यादिव्यञ्जकवर्णाभावेन, ओजसश्च प्रकृतविरुद्धत्वेन गुणाहितशोभाया अभावे गुणाहितशोभातिशयकारित्वरूपालंकारलक्षणस्योपर्युक्तालंकारलक्षणद्वयेऽतिव्याप्तेः काव्यत्वाभावः प्रसक्त इति गुणालंकारयोर्लक्षणमनुपपन्नम् ।

इत्थं च गुणानां रसधर्मत्व एव माधुर्यादयो गुणाः शौर्यादय इवात्मनि रसे च समवाय सम्बन्धेन, उपमादयो हारादय इव शरीरे शब्दार्थयोः संयोगसम्बन्धेनोपकुर्वन्तीतिभेदः संगच्छते नाम । यच्चोक्तम् 'आत्मा तावन्निर्गुणः" इति वेदान्तिनः । तेनात्मस्थानीयस्य रसस्य धर्मा माधुर्यादयो गुणाः कथमुपपद्यन्ते, । तदपि विचाराक्षमम् ।

तथाहि, वेदान्तिनस्तावद् व्यावहारिकमात्मानं नहि निर्गुणं निष्क्रियं च मन्यन्ते, किन्तु य आत्मा पारमार्थिकः स एव निर्गुणः । यदि नाम व्यावहारिकोऽयमात्मा निर्गुणो निष्क्रियश्च भवेत्तदा, हन्त ? सन्तोऽपि प्राणिनः सर्व एवामूलचूड़मुच्छिन्ना भवेयुः । सर्व एव संसारो निष्क्रियत्वात्पाषाणवद् भवेत् । एवं च परमार्थिक एवात्मा निर्गुणो न तु व्यावहारिकः प्रातिभासिकश्च । अत्र च 'रस आत्मा, इत्यादि

व्यावहारिको जीवात्मैव दृष्टन्तविधयोपन्यस्यते । यथाच जीवात्मानं नैयायिकाः 'प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाप्रयत्नाश्चात्मनो लिङ्गानि" इति (वै०द०३।२।४) 'इच्छाद्वेषप्रयत्नसुखदुखज्ञानान्यात्मनोलिङ्गम्" इति (न्या० द० १।१।१०) प्रतिपादयांबभूवुः । यदिनाम पारमार्थिक एवात्मा दृष्टान्तस्तदा मृतशरीरे शौर्याद्यभावान्मनसि यथा शौर्यादयोगुणा गण्यन्ते, तथा च काव्ये मनःस्थानापन्नः कःपदार्थो येन तत्र माधुर्यादयो गुणा उपादीयेरन् । ननु मनःस्थानापन्नो हि स्थायिभावः स्वीक्रियतां, तत्रैव च गुणागण्यन्तामिति का नोहानिरिति चेन्न । भवतैव 'गुणे गुणान्तरानौचित्यादिति प्रतिपादितत्वात । किं च "रसो वै सः" इत्यादिश्रुतीनां सगुण-ब्रह्म-प्रतिपादनात्, ब्रह्मसादृश्येऽपि ब्रह्मतस्तत्त्वान्तरं रस इति स्वीकरणाच्च, गुणा रसधर्मा एव । अपिच काव्यप्रकाशलक्षणखण्डनावसरे 'शौर्यादिवदात्मधर्माणां गुणानां हारादिवदुपस्कारकाणामलङ्काराणां शरीरघटकत्वानुपपत्तेश्चेति, प्रतिपादयतां भवतां मतेऽपि गुणानां रसधर्मत्वं शिरस्यापततीति भवद्भिरेव मध्ये स्थेयम् एवं युक्तियुक्तेन कथनेन, लौकिक परीक्षकाणां बुद्धिसाम्यं प्रदर्शयता दृष्टान्तेन, प्रमाकरणेन प्रमाणेन च गुणानां रसधर्मत्वं सिद्धम्, अन्यथा तु गुणालंकारयोरविशेषेणैव काव्यशोभाधायकत्वात् तयोरैक्यं प्रसज्यते इति रसधर्मतापक्ष एव वरीयान्, इति समनोनियोगं कर्णेहत्य विभावनीयम् । अन्ते चेदमाशास्यते—

अज्ञानाद् विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां विज्ञैः प्रमोदध्वं सुधीवराः ॥ १ ॥
श्रीमज्जयपुराधीशकृपादृष्टिप्रभावतः ।
गुणानुगुणसगुणितो निबन्धोऽयं विपश्चितः ॥ २ ॥

सुरभारतीप्रणयिनां कर्तव्यम् ।

निबन्धा—श्रीदीनानाथशर्म्मा शास्त्री सारस्वतः ।
(मुलतानस्थ-सनातनधर्म्म संस्कृतकालेजाऽध्यापकः)

" ॐ यां मेधां देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाऽग्ने ! मेधाविनं कुरु स्वाहा "
—यजुः ३२ । १४

अयि सुरसरस्वतीप्रणयिनो महाभागाः ! नेदं निह्नुतं श्रीमताम्; यद्—आस्माकीना भारतभारती एव सर्वाभ्यो वर्तमानभाषाभ्यः सर्वाऽङ्गीणं कार्त्स्न्यं, प्राचीनताञ्च सर्वपथीनां कलयति । परम् अद्यत्वे-अमुष्या यादृशी दुरवस्था वरीवर्ति; मन्ये साऽपि नाऽतिक्रामेद् भवदीयदृग्-विषयताम् । सुरभारत्या ह्रसिम्ने तदरातयस्तु चेष्टन्तामेव; परं विषादस्याऽयं व्यतिकरो यद्—एतदीया अकृतज्ञाः संस्कृतज्ञा बन्धवोऽपि अदसीये ह्रसिम्नि सहायभूताः सन्ति । अन्यथा—विचार्य्यताम्—सत्यपि तदितरभाषीय-समाचारपत्रभूम्नि कथं स्यात् तदीयविविधपत्राणामभावः; भावेऽपि तदीयग्राहकनैयून्यम् ।

अस्माकं कर्तव्यं त्वेतदासिद्; यत्—सुरभारतीं वयं प्रतिगेहं प्रचारयिष्यामः सर्वे प्रतिज्ञाणं संस्कृतभाषिणोऽभविष्यन्; मित्रादिभिः साकं पत्रव्यवहृतौ किलाऽमुष्या एवोपयोगोऽभविष्यद्; एतस्या दैनिक-साप्ताहिक-पाक्षिक-मासिकपत्राणि प्रचार्य्य तद्ग्राहकभूयस्त्वाय चेष्टाऽभविष्यत्; परमधुना तत्प-

स्यनीकतैव विभाव्यते। कोऽधुना परस्परं गीर्व्वाणवाण्यां सँल्लपति। यो विदधीताऽप्येवम्; तत्र सोत्प्रासा उक्तयो वितन्यन्ते। पत्रव्यवहारकाले तु सुरसरस्वत्युपयोगे लेखन्येव कदाचिज्जिहेति। सुरसरस्वतीसन्दृब्धसमाचारपत्राऽऽनायने च द्रविणस्य कालस्य वाऽपव्ययो विभाव्यते। यदि केचित् स्वाऽनुरागाटोपप्रदर्शनाय आनाययन्त्यपि संस्कृतपत्राणि; तानि तथैव बद्धानि तिष्ठन्ति; दर्शनस्य तु कैव कथा आस्ताम्। अहह! चेतस्ताम्यति; लेखनी स्रंसते; परं शत्रूणां कृते प्रमोद-मोदकाः। हन्त !!!

एतस्मिन् महति विषमविषमये समये क्रियासमभिहारेण इतस्ततो विधीयमानानामाक्षेपाणां सन्निधौ सत्यपि महाविद्वांसो मौनमश्नुवते। ते वर्तमानसंस्कृतपत्रादिषु स्वकीयाशयकुशेशयनिबद्धनिबन्धाऽर्प्पणे भारतभारतीप्रचारनिष्पादकविविधविधोपदेशे वा निजलघिमानमिवाऽऽकलयन्ति। विपश्चितो धर्म्मविषये मर्म्माविधो वचोराशीन् प्रयुञ्जते; प्राचीनसंस्कृतग्रन्थाँश्च दूषयितुम् आपार्ष्णिमस्तकं स्वेदस्रावं कुर्व्वन्ति; परं महान्तस्तूष्णीकामुपासते। लघवः किं कर्तुं क्षमेरन्। तेषां प्राचीनग्रन्थाऽवलोकनाऽलङ्कर्म्मीणतायां न प्रौढत्वम्; न च जागत्कानुभवाऽऽतिशय्यम्; महाप्राज्ञानाञ्च तटस्थता; एवङ्कारं कारंकारं भविष्यत्येव विपक्षाणामानन्दसन्निधिः, भविष्यति च तत्सन्नियोगेन गीर्व्वाणवाण्या धर्म्मस्य च ह्रसिमा। भाषामूलक एव धर्म्मो भवति। तस्य प्रचारो वक्तृतया लेखेन वा भवितुमर्हति यदि महापण्डिताः सँस्कृतपत्रेषु विपश्चिद्वितीर्णाऽऽक्षेपान् समादधतः स्युः, तदा दृश्यताम्—कीदृगुन्नतिः स्याद् धर्म्मभाषयोः। मया बहुशो दृष्टं संस्कृतपत्रेष्वपि; यद्धर्म्मखण्डकास्तु लेखा प्रकाश्यन्ते; तन्मण्डकाश्च वीथीषु विकीर्य्यन्ते। किमयमेव आर्य्यत्वाऽभिमानः? मम घोषणेयम्—संस्कृत प्रसारोऽपि यदि धर्म्मोपजीवको न भविष्यति; तर्हि विधर्म्मवृद्धिसहाय एव सेत्स्यति। तेन संस्कृतपत्रेष्वपि केवलं काव्यानाटकाऽऽदिसम्बद्धा विषया एव न निवेशेरन्; प्रत्युत धार्म्मिकाणामपि लेखानामादरो विधीयेत नाऽत्र व्यतिकरे भीतैर्भाव्यं तत्तत्पत्रसम्पादकैः।

अन्यदिदमपि निवेदनम्—सँस्कृतपत्रसम्पादकानामयमप्याग्रहो दृश्यते, यद्-अत्यन्त सुगमैर्लेखकैः! प्रहीयेरन्; न ज्ञायते-कोऽस्याऽभिसन्धिः कदाचिदयं स्याद्; यद्-विद्याऽर्थिषु पत्रप्रचारो [illegible] स्याद्। अभिप्रायोऽयं स्तुत्यः। परं तत्र निवे[illegible] मदः; यत्संस्कृतपत्रेषु विविधा लेखाः प्रका[illegible]रन्। कुत्रचिदर्थगरिम्णा भाव्यम्; क्वचिच्छा[illegible]ऽऽडम्बरेणाऽपि। कुत्रचिद् यमकाऽनुप्रासश्लेषा[illegible]दोषाऽऽदिच्छटा स्यात्; क्वचिच्चाऽर्थाऽलङ्कारा[illegible] एवमेव सति संस्कृतप्रसारव्याजेन छात्राणाम[illegible]षामपि उन्नतिर्भवितुं शक्यते। केवलसौक[illegible]विन्यासे प्राचीनसाहित्ये शीघ्रं प्रवृत्तिरेव न भवि[illegible] शक्येत, साहित्योन्नतिमभिलाषुकाणां विद्याऽर्थिना[illegible] आशासे सम्पादका अत्राऽवधास्यन्ति विषये।

'ग्रामं गच्छंस्तृणं स्पृशती'ति नयेन एतदुक्त[illegible] अनुचितञ्चेत् क्षमणीयम्। कथनस्येदमेवाऽऽकूतं[illegible] यया कयाऽपि विधया सर्व्वैः सुरभारती-प्रणयि[illegible]

'सुरभारत्याः' प्रचारणे बद्धपरिकराः स्युः । तस्या अर्थकरित्वविधाने राजपुरुषाणां साहाय्यं गृह्णन्तु । व्यावहारिकशब्दानां संस्कृतपदानि गवेषयित्वा प्रचारयन्तु । तदैव भवेत् क्रमशो जागतच्याः 'सुरभारत्याः' 'सुप्रभातम्' सौभाग्य-'सूर्योदय'श्च । अनन्तरमेव च सत्फल 'सहस्रांशो' र्भासमान 'उद्द्योतः' स्यात् ।

तथाऽपि हर्षस्याऽयमवसरो यत्—काशिकः कोविदकुलाऽऽकुलः 'संस्कृत प्रसाराय भगीरथप्रयत्नं विदधदास्ते । अदस्सदः—सदस्सदश्च तत्कृते 'सुप्रभातं' नाम मासिकं पत्रमप्याविर्भावयन्ति । तदेव 'सुप्रभात' मिदं धनाऽल्पत्वेऽपि सुरसरस्वतीसेविनो निषेवमाणमेवाऽऽस्ते । समये २ विशिष्टाऽङ्कप्रकाशनमपि विधत्ते । अधुना विद्वद्वैदुष्याणां सुरभारती-प्रणयिनामपि कर्तव्यमेतद्; यत्, तेऽस्य यथाशक्ति धनसाहाय्यम् एवञ्च लेखसाहाय्यं विदध्युः; येन सुरभारतीयमहरहरुन्नतिशिखरं प्राप्नुयाद्; एतत्सञ्चालकाश्चाऽपि सोत्साहाः सन्तो गीर्वाण-वाणीप्रसारे सुदृढं चेष्टन्ताम् इति कृतं निरर्गलवल्गद्राघिम्णा ॥


नारी-समाजः ।

(ले० म० म० देवीप्रसाद कविः)

या सर्वलोकविदिता चितिशक्तिरास्ते ।
तस्या विभूतय इमा विलसन्ति नार्यः ॥
आसामतः किल कलाविहभारतीयैः ।
सर्वात्मना समुचिताऽपचितिर्विधेया ॥

आर्तपालः शिवभूपालः

लेखकः—श्रीशेषशर्मा हेब्बालकरः,



हं पंकर उषःकालः, प्रसन्नानि हरिदन्तराणि, विकच-कुसुम-सुगन्ध-वाही शीतलो मारुतः संचरतिस्म मन्दं मन्दम् । शार्वरं तमो गह्वरेषु चण्डकरकर-निकर-संस्पर्श-भीतमिव निलीनं जातम् । तुहिनकिरणस्तारकागणश्च प्रभा-विहीनोऽभूत् । तदनु भगवानम्बर-मण्डल-मण्डनः कमलिनीवल्लभोऽपि पूर्वाचलमलं चकार । आनन्दमयेऽस्मिन् समये कुन्देन्दु-रदन-वदना, सौन्दर्य-जित-सुराङ्गना, समुदयद्यौवना काचन महाराष्ट्रललना सिन्धाद्धः श्रीसमर्थरामदासाऽऽदिनिषेवितं विमलमधुरनीरं सरोवरं गच्छतिस्म दासीदासाभ्यां साकम् । तत्क्षणमेव तत्समासाद्य सा समुद्युक्ता किल स्नातुम् । "अस्याः स्नानसमये मदवस्थानमनावश्यकमिति तदनुचरः समाश्रयत समीपतरच्छायातरुम् । प्रावर्तत निजनायिकावसनसेवनेऽपरा दासी । एतस्मिन्नेव काले करकलितकरालकरवालाः सबलाः स्थूलकलेवराः श्मश्रुभयंकराश्चत्वारः पुरुषाः सहसैव समाययुस्तत्सरस्तीरम् । ततो मल्लिकाप्रसूनकोमला महाराष्ट्रमहिला, इमे मोहमदीया एवेति भयविह्वला मूर्छां प्राप । तदनु दासीविहितशीतलोपचारलब्धचेतना सा "क्वाऽस्तिमामकः सेवकः" इति परितः समीक्षांचक्रे । नयनसरणिमेव नैवाऽऽरूढः परंपरिपठितपलायनसूक्तःसोऽनुचरः । सेयं सुन्दरी किंकर्तव्यतामूढा तदानीं चित्रलिखितेवाऽऽसीत् । अयि आर्याः! पाठकमहोदयाः! सैनिका ननु समागता एते यवनाः श्रीमतो बीजापुर बादशाहस्य । कपटयतिवेषधराः सुन्दर-योषान्वेषणतत्परा श्चारा इमे बादशाह-नियुक्तकार्यपराङ्मुखाः स्वच्छन्द-

सरन्तिस्म । एषां प्रभुस्तु रहिमानखाननामा । क्षुधार्तेनेव पायसपात्रं दरिद्रेणेव महानिधिः समीक्षिता किलमहाराष्ट्र-युवतिरेतैः । अनन्तरमेव समुदियाय खानमहोदये तत्सीमन्तिनी समपहरणदुरभिलाषः । ततस्ते पुनः पुनः समाज्ञप्ता मासुरनङ्गरंगाय तामङ्गनाम् । सोहमदीय-दुरुक्तिसमाकर्णनेन-समुपविष्टा सा समुदतिष्ठत् । तदनु तान् भर्त्सयांचक्रे नीचोक्तिभिः । अनुचकार स्वामिनीं स्वीयामेव दासी । माननीया मित्रमणयः ! मानविहीनाः स्मरान्धा नराः किं दुर्वचोऽभ्यस्मपन्ते? । अपिच ते स्वीकुर्वन्ति सन्दस्मिताः समादरा इवाऽवधीरणा-फणितिम् । खानस्तेषामेव कोटिमवजगाहे । एवंस्थिते-व्यतीताः कतिचन घटिकाः । ततः खानकिंकरौ—(पुरतः समागत्य) भोः प्रभो ! महाराष्ट्र-वनिता एता नूनं बालिश शिरोमणय एव । अयोऽप्यस्मदीयप्रार्थनया सुकुमारतरं भवेत्, नचाऽऽसां हृदयानि । किं बहुना, इमाः स्त्रियः स्वस्वमन्दिरेषु दारिद्र्यमेव समनुभवन्ति, न हि महावैभवं सन्तोष्य भवादृशवीरवरान् । समवलोकिताःकिलाऽस्माभिरीदृशः कामिन्यः साराऽसारविचारहीना वल्लयः । ललनामणिरियं बाल्यात्परस्मिन् वयसि पदं निदधाना, परमरक्षका, लावण्यनिधिश्च । एवं सत्यप्यस्याः स्वान्तस्याऽविकारतां दर्शं दर्शं हास्याङ्गनाऽऽश्लिष्टवक्षसो भवामः । किमेतन्मूढानां विचारणया । समादिशन्तु किलेतःपरमावाम् बीजापुरं नेष्यावो जीवग्राहमिमाम् ॥

तदुक्तिमेवाऽन्वमोदत युवतिलावण्यमोहितः खानोऽपि । ततःसुन्दरीसमुपकण्ठमगमतां तौ किंकरौ । महाराष्ट्र सुन्दरी—(साऽणुक्षेपं) रे क्षुद्राः ! पुरतः पादान् यदि विक्षिपेयुः, क्षणादेव परेतरक्षकभक्षिता भवेयुः । भवन्तु भवन्तो जागरूकाः ॥

खानः—मन्मनश्चकोरचन्द्रिके ! जीवितेश्वरे ! प्रिये ! मृग्या मृगेन्द्र इव कोमलाङ्ग्या कुरङ्गाक्ष्या त्वया मदीयभटकेसरिणोऽपिहिंस्येरन् । येनाऽपि कोमलकुसुमेन विनश्येयुःप्राणिनस्तर्हि शस्त्राऽऽदीनां तूपभोगः क्व ? तव सतर्दंजल्पनैर्न वयं भवेम कान्दिशीकाः । हे सुमुखि ! क्षिप्रं विक्षिप कटाक्षकुसुमबाणान्" ॥ इति प्रजल्पिते खाने भृत्यास्तदीयाः पुरतः प्रययुः स्प्रष्टुं महाराष्ट्राङ्गनाङ्गम् । सुकुमारतरशरीरायां तस्यां राक्षसानां तेषां करस्पर्शात् संत्रस्य पश्चादपसरन्त्यां, कोऽपि—(सो पस्) हे शान्ते माभैषीः । त्वद्रक्षणदक्षिणः खलु महाराष्ट्रीयोऽयं जनः । रे रे मूढाः, परास्तशथ मदीयनिशितनिस्त्रिंश-प्रहारं विपद्य तस्याः कलेवरम् ॥ "

ततः खानस्तत्सेवकाश्च परितः प्रेक्षिष्यन्ते, एकः शक्तिमान् धनुष्मान् महामहोमहितवपुष्मान् महाराष्ट्रतरुण आसीत् । संप्रेक्ष्य तंच रोषकषायितनयनः खानः खड्गधरः "चतुःसंख्यैरस्माभिरेव विजयश्रीः समालिंग्यते, न चैकेन तेनेति" मनसि निर्णीय बभूव युद्धसंनद्धः ।

वाचकवरेण्याः ! परं महाराष्ट्रयुवाऽपि, नासीत् निर्बलः पुरुषः । खाननिशाननेकानपि हिनस्तिस्म सलीलम् । महाराष्ट्रवीरोऽपि कोपांगारितांगः स्वीकृततीक्ष्णकौक्षेयकश्च समासन्नोऽभवत् । उभयस्मिन् घोरतरे समरे संप्रवृत्ते चिच्छेद युगपदेव करं वामेतरं महाराष्ट्रशूरः खड्गाघातैरेकैरेव किलाऽहमहमिकासमेतस्य यवनवीरस्य खानस्य, । पपात कृपणो वसुन्धरायाम् । समागमन् ननु हन्तुं महाराष्ट्रीयं तदनु तदनुयायिनः सकलाः । सोऽपि तैर्विग्रहमारचय्य प्रापयामास खलु सर्वान् कृतान्तनिशान्तम् । दर्शयामासापलायनपथमेकस्मै, ततः खाने करवालमाकलय्यैकेनैव हस्तेन समागते समायोद्धुं तमप्यनुचरानुसृतमार्गमभिमुखीचकार । एवमेवबहुलेकाले पावनं तत्सरोवरं तत्संहारजातरुधिरनिर्झरं जातम् । अथ महाराष्ट्रतरुणो विजयहर्षरोमांचप्रपंचांचितगात्रः सहार्दंप्रैक्षत मानिनीमणिं ताम् । साऽपि कार्तज्ञ्येन तं निपीय नेत्राभ्यां निर्निमेषं "प्रभाविनोऽस्याऽनागमने नूनं मां वशीकरिष्यन्तिस्म यवनाः । करुणाऽकूपारः परमेश्वरो, हर, एव, आपन्नार्तिहर, इति भगवन्तमनावीत् । कुशलधिषणाः सुप्रभातपाठकधीराः ! प्रायशो भवन्तः "कोऽयमस्यास्तरुण्या रक्षक" इति विचाराक्रान्तस्वान्ता भवेयुः । प्रियमहाशयाः सोऽयं महाराष्ट्रवीरपुंगवः शिवराजस्य दक्षिणः पाणिरिव स्थितः पीडितजनपालकः "पालकरे" त्युपपदांकितो नेताजीनाम । स शिवाजिसंदर्शनायशिवनेरिदुर्गमितो वनश्रीशोभाविलोकनाय समायात आसीत् । नेताजिवीरस्य सरः समीपागमनं तस्य यवनेभ्यो यवनबलात्करणं च काकतालीयमिवाऽभूत् । भारतीयांस्त्रातुं साक्षात् सुजनसुखंकरः शंकर एव शिवराजरूपेण

समवतीर्ण आसीत् । तत्सहायका अपि तद्व्रतमेवांगयकार्षुः । अतएवनेताजीपरिपालयामास यवनेभ्यो महाराष्ट्रवरवर्णिनीम् । समायातेषु खानप्रभृतिषु कश्चन महाराष्ट्रसुन्दरीकिंकरः समाशिश्रिये छायातरुमिति पूर्वोक्तं विस्मृतं न भवेत् पाठक महाभागैः । सोऽनुचरो यवनानां भयानकं विलोक्य रूपं भीतः क्रन्दन्नेव पलाय्य शिवनेरिदुर्गं स प्राप शिवाजिवासागारम् । विस्मितास्तमेव पश्यन्तिस्म दुर्गवासिनो जनाः । तदानीं भोजनायसमुद्युक्तः शिवप्रभुः । तदनु शिवभूपालः समाकर्ण्यार्तनादं भक्तप्रार्थनयेव भगवान् सहसा बहिरागत्य पुनः पुनः प्रलपन्तं प्रणमन्तं तमद्राक्षीत्, किंवृत्तमित्यप्राक्षीच्च, । अनुचरः—(सदीनाक्षरम्) अयि महाराष्ट्रकुलजलधिकलानिधे ! स्वामिनी मदीया सोहसदीयैरवस्कन्दिता वर्तते । भवन्तोऽत्र प्रमाणम् ॥ ततः क्षुधितासासमाकुलोऽपि शिवाजिनृपालः करवधरः शिरोधृतोष्णीषश्च संप्राप तत् सरोवरं जवजितकुरंगं तुंगतरं तुरंगमारुह्य कतिभिः सादिभिरारोहैः । सहोदयाः ! न गणयतिस्म प्रजापालनायस्वप्राणानपि श्रीमान् शिवाजीप्रभुः । अतएव धन्यः शिवराजन्य इति श्लाघयन्तिस्म लोकाः । आकस्मिकेन समागमेन शिवराजस्य, मयूरइव नीरदागमेन, चकोर इव हिमकरोदयेन, नितरां प्रमुदितो नेताजी साष्टांगं प्रणनाम प्रजावत्सलंशिवाजिभूपालम् । महाराष्ट्रवनिताऽपि सप्रश्रयं तं प्राणंसीत् । निवेदयामास तदनु नेताजी भूतपूर्वमुदन्तं सर्वम् । शिवप्रभुः—(सहर्षम्) हे आयुष्मन्! भवान् मम पाणिर्दक्षिण इव मत्कार्यसहायको वर्तते । नूनं धन्यवादार्होऽस्ति । यावज्जीवं विधाय देशसेवां विधेहि सुकृतपात्रं भावत्कं गात्रम् ॥ इत्यवसर एव पीराजीनाम कश्चन सिवनेरिदुर्गस्थः पूज्यपादो वृद्धः शिवराजान्तिकमेत्य—भो महाराज ! पिताकिलाऽहमस्याः कुमार्याः (शान्तायाः) । यः पुण्यश्लोकस्तनयामेनां मदीयां संजुगोप यवनेभ्यः । स एव मद्दुहितृपाणिपीडनार्हः ॥ श्रीमन्तः पाठक महाभागाः ! महाराष्ट्रयूनो तदानीन्तन प्रमोदमभ्यूहन्तु भावुकाग्रेसरा भवन्त एव । श्रीमान् वीरवरः शिवच्छत्रपतिः स्वयमेव तयोर्विवाहोत्सवमकार्षीत् । आर्तजनपालनाय "शिवराज" स्तदनुयायिनश्च बद्धप्रतिसरा इति निवेदयितुमिवाऽद्यापि कर्णकुहरं भिनत्ति कीर्तिभेरी नन्वस्माकमिति सर्वं शिवम् * ॥

* कस्याश्चन कर्नाटकपत्रिकायाः कथाभागः संगृहीतः, ।

शास्त्रव्यवसायिनां कुत्सितं कर्म !

लेखकः—"प्रणवः"

इदमिह विदाङ्कुर्वन्तु लौकिकाः परीक्षकाश्च प्रेक्षावन्तः सज्जनाः, यदुत कथमियं मातृभूरस्माकं सर्वथा पराधीनत्वं चिरादनुभवति । अहो ! अपारे खलु भारत-महार्णवेऽत्र निवसतोऽगणितानस्मानेव सर्वतः खादन्तो जयन्ति कतिपये वैदेशिकाः श्वेतजन्तव इति कल्पनयापि कम्पते नूनमस्माकं हृदयम् ! अतः सम्प्रति सर्वं विहाय देशस्य स्वातन्त्र्यमेव विद्यते भारतीयानां साध्यं वस्तु । किञ्च सङ्घे शक्तिः कलौ युगे" इत्यालोचयतां देशनायकानां राष्ट्रसंघटनेनैकत्वमेव वर्त्ततेऽतितरां समीहितम् । हिन्दु-संघटनादिना शक्तिसञ्चयमभिलषतां साम्प्रदायिकानामपि नितरामेकतैव विद्यते विरामभूमिः । अत एव यथा मिथोविवादो माभूत् तथा सर्वदा यतन्ते नेतारः । किन्तु हन्त ! अद्यापि केचन कलहप्रियाः स्वार्थपरायणा वा शास्त्रव्यवसायिनः स्वभावं न जहति । ते हि छिद्रमन्विष्यन्तस्तथाऽवसरं प्राप्य स्वकार्यमेव साधयन्ति, न पापाद् बिभ्यति, नापि लोकान्मनागपि लज्जन्ते । एतादृशानां देशस्य समाजस्य वा कृते न भवति किमपि कर्त्तव्यम् । सर्वथा शास्त्रविरुद्धमेव कार्यं कुर्वाणा अपि इन्द्रियारामा उदरम्भरयः किलैतेऽन्येभ्यः शास्त्रीयामेव व्यवस्थां ददतीति चित्रमेतत् ! एतादृशानामेव

हस्ताक्षरैर्दूषितं व्यवस्थापत्रमेकं पौषस्य पूर्णिमायां जाते "सूर्योदये" प्रकाशितं दृश्यते । व्यवस्थापत्रमेतद् गोस्वामिनां यज्ञोपवीताधिकारविरोधार्थमेव प्रस्तुतमिति सकृदनुवाचनेनैव विज्ञायते । व्यवस्थापत्रमिदं येषां विदुषां हस्ताक्षरैरनुगृहीतं विद्यते, तेषामन्यतमः प्रधानश्च म० म० श्रीलक्ष्मणशास्त्री द्रविड एवेति तत्रत्यसम्पादकीयटिप्पणेन स्फुटं प्रतीयते । अस्तु, तदुत्तरन्तु व्यवस्थापकानां विदुषां संक्षिप्तजीवनवृत्तान्तेन, गृहरहस्योद्घाटनेन, कुलाचारालोकनेन, जातिविमर्शेन च सहैव नातिचिरादेव पुस्तकाकारं प्रकाशिष्यते । यद्यपि तादृशानामुपेक्षैव भवति, साधुतरम्, तथापि बहूपेक्षयापि दुर्जनत्वमेधत एवेति लोकसेवकोऽप्यहमनिच्छन्नपि दुर्वादिशिक्षणकर्मणि प्रवृत्तः । उत्तरपुस्तकं त्वरितमेव निर्यास्यति, पाठका अवसरं प्रतीक्षन्ताम् । एतर्हि तु चित्राः प्रश्ना एव क्रियन्ते, श्रीलक्ष्मणशास्त्रिभिरुत्तरं "सुप्रभात" एव देयम् ।

१—भवद्भिः स्वयमेव व्यवस्थापत्रं विधाय तत्र हस्ताक्षरोऽपि विहितः, उत केनचिल्लिखिते व्यवस्थापत्रे शुल्कमादाय हस्ताक्षरमात्रमेव कृत्वा तदीयो महन्निन्दामहापातकभारः स्वशिरसि निहितः ? आद्ये कथमेवा गोस्वामिकुत्सायां भवतां कुप्रवृत्तिः ? न च गोस्वामिनां त्रैवर्णिकत्वाभावेन यज्ञोपवीतादावनधिकारादिति वाच्यम्, त्रैवर्णिकगुरूणामेषां वर्णविचारचिन्तायां ब्राह्मणेष्वपि श्रेष्ठत्वेन तदधिकारस्याक्षुण्णत्वात् । विभिन्नप्रान्तेषु गोस्वामिनां शिष्या ये त्रैवर्णिका अद्यापि सन्ति, तेषां कियतां पूर्णसङ्केतसमन्वितां सूचीं पूर्वोक्तोत्तरपुस्तकान्ते नियोजितामचिरादेव द्रक्ष्यन्ति श्रीमन्तः । तस्मादविमृश्यकारिणामतएवाप्रतिपाद्यमेव प्रतिपादयतां प्रेक्षावद्भिरुन्मत्तवदुपेक्षणीयानां भवतां का नाम स्यादवधेयवचनता जनतायाम् ? अन्त्ये शुल्कमधिगत्य शास्त्रव्यवसायं कुर्वतां शास्त्रमर्यादामतिक्रम्य धर्ममवधीर्य च व्यवस्थां ददतां भवादृशानां हस्ताक्षरस्य कियदस्ति मूल्यमिति रहसि हृदि हस्तं निधाय स्वयमेव विभावनीयम् ।

२—द्विविधा हि ब्राह्मणाः साम्प्रतमत्र भारते श्रूयन्ते । एके पितामहादय यावदविच्छिन्नसन्ताना वंशपरम्परयैव विशुद्धाः । अपरे च सम्प्रति आर्यैः शुद्धिं विधाय ब्राह्मणत्वङ्गमिता इव यवनादयः श्रीशङ्कराचार्यैरन्यैश्च राजभिः समये २ यथाप्रयोजनं संस्कृत्य ब्राह्मणीकृता अनार्याः । तत्र के भवन्तः, प्रथमे, द्वितीया वा ? आद्ये किमस्ति विश्वासयोग्यं प्रमाणम् ? अन्त्ये-भवतामेव व्यवस्थया गोस्वामिनां यज्ञोपवीताधिकारविरोधः कथमिव शोभते ?

हंहो बत ! स्वयं सीसकभवने निवसन्तोऽपि भवन्तः परेषामुपरि पाषाणखण्डं निक्षिपन्तीति महदिदं भवतां साहसिक्यं नश्चेतसि चमत्कारमाविष्करोति !

यदि सर्वे भवन्तः सम्प्रति ब्रह्मसन्तानत्वेनैवात्मानं ख्यापयन्तो व्यवहरन्ति, लोका अपि भवतस्तथैव जानन्त्यतो नास्ति भवतां कोऽपि कृत्रिमो ब्राह्म… इत्युच्येत, तर्हि तत्रापि कः प्रत्ययः ? दृश्यन्ते हि साम्प्रतमार्यसमाजिकैः संशोध्य ब्राह्मणपदवी… मापादिता यवनादयः, कियत्कालानन्तरं तेषामपि पुत्रादयः साक्षाद् ब्रह्मणः पौत्रत्वादिनैवात्मानं ख्यापयन्तः सद्ब्राह्मणानेवाधरीकरिष्यन्ति, लोका…

अपि तान् तथैव मंस्यन्ते । को हि नाम तदानीं तेषां यवनमूलतां शङ्कितुमपि शक्ष्यति !

३—श्रीमन्तः शास्त्रमर्यादारक्षकाः सन्ति । किन्तु समाजे नहि सर्वे भवादृशाः संभवन्ति । केचन वेश्यामभिसरन्ति, केचिदगम्यागमनं कुर्वन्ति, बहवो गर्भं पातयन्ति, भूयांसो ब्रह्महत्यां सम्पादयन्ति, कतिपये मद्यमपि पिबन्ति ब्राह्मणा अपीति नास्ति तिरोहितं भवताम् । तादृशैः सह साक्षात् परम्परया वा विवाहादिसम्बन्धं भोजनादिव्यवहारं च कुर्वन्ति न वा धर्मभीरवो भवन्तः ?

४—श्रीमतां मतौ समुद्रयात्रादिकार्यमपि धर्मशास्त्रविरुद्धमेव विद्यते । किन्तु धृष्टः समाजस्तु भवतामेकमपि न शृणोति ! समुद्रयात्रां विदधात्येव । ये नापि तथा कुर्वन्ति, तेऽपि तथाविधैः सहागत्या केनापि प्रकारेण संबद्धा एव सन्ति । अतः श्रीमन्तः प्रागुक्तदिशा दूषिते समाजे तिष्ठन्ति न वा ?

५—आचारवन्तो भवन्तः कदाचिद् वाष्पयानमारोहन्ति न वा ? यतः सहयानमारूढा यवनादयो वीटिकां नीपीय धूममुदरे निगीर्य पुनरपि बहिरुद्गिरन्ति । वान्तः खलु धूमः सहसा सहचराणां-मुखकर्णनासिका-विवरैरन्तः प्रविश्य धर्मं धुनोति ! तत्रावस्थानं भवादृशानां धर्मधुरीणानां कथं सम्भवति ? किञ्च गवां चर्मादियोगेन सर्वथा हिन्दुसन्तानैर्हेयानि वैदेशिकानि वस्तूनि, स्यात्, भवन्तो न स्पृशन्ति ?

६—श्रीमन्तस्तु धर्मावतारा एव जयन्ति । किन्तु हन्त ! भवतां समक्ष-मेव सनातनधर्मो बराकः शुद्धि-अस्पृश्योद्धार-विधवाविवाहादिभिः प्रसभं हन्यते । तदर्थं किं कुर्वते दयामया भवन्तः ?

७—गोस्वामिनां यज्ञोपवीतधारणरूपं दुष्कर्म दृष्ट्वा चिन्ताकुलाः श्रीमन्तः सुमेरुमिव दन्तेन भूद्वारा व्यवस्थापत्रेणैव गोस्वामिवंशं-चेष्टन्ते खनितुमित्यत एव भवतां लोकोत्तरधार्मिकत्वमनुमीयते । परन्तु प्रत्यहं यवनादयो गाश्छिन्दन्ति, मन्दिराणिभिन्दन्ति, मूर्त्तीः खण्डयन्ति, हिन्दुरमणीरपहरन्ति, बालकानपि चोरयन्ति-चेति सर्वं भवन्तः पश्यन्ति, शृण्वन्ति, जानन्ति च । तदर्थं किं विदधति ?

८—आभीरादयोऽपि यज्ञसूत्रं धारयन्ति, क्षत्रियत्वेनात्मानं ख्यापयन्तः स्वधर्मं प्रचारयन्ति च । तेषामिदं कर्म शास्त्रविरुद्धं मन्यन्ते न वा भवन्तः ? आद्ये तादृशमधार्मिकं कृत्यं समालोचयन्तोऽपि नेत्रे पिधाय कर्णयोस्तैलञ्च निधाय कथं तूष्णीं शेरते भवन्तः ? अन्त्ये तु सदैव वयमपि श्रीमतो धन्यान् वदामः !

९—न संस्कारच्युतिमात्रेणैव पातित्यं भवति, किन्तु स्वकर्मत्यागात्-कर्मान्तरपरिग्रहाच्चापि । इत्थं प्रायेण बहवः पतिता इव दृश्यन्ते । तेषां ब्राह्मणत्वमप्यूरीकुर्वन्ति न वा भवन्तः ? आद्ये धन्याः खलु महात्मानः शास्त्रविधिमनुवर्त्तमानाः । अन्त्ये कथं न ते समाजबहिष्कृता भवद्भिः क्रियन्ते ?

शुद्ध्यर्थमैतिहासिकानि प्रमाणानि

लेखकः—धर्म्मदेव वर्म्मा शास्त्री, वाराणसी

ॐ उतदेवा अवहितं देवा उन्नयथा पुनः ।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ॥ ऋग्

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नाऽस्तितु पञ्चमः ।

मनुः—

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥

—मनुः १०।४३।

देशभङ्गे प्रवासे च व्याधिषु व्यसनेष्वपि ।
रक्षेदेव स्वदेहादि पश्चाद्धर्म्मं समाचरेत् ॥

पराशर ७।४२।

अयि पाठकाः निरुक्तसंक्षिप्तश्रुतिस्मृतिप्रमाणेषु शुद्ध्युपोद्बलकेषु सत्सु 'इतिहासः पुराणञ्च पञ्चमो वेद उच्यते' इति वचनादेव मामकोऽयमैतिहासिकप्रमाणोदाहृत्युपन्यासरूपः प्रयासः, यद्वाश्रुतिस्मृतीरितकर्त्तव्यताकस्य समयोचितस्य शुद्धिरूपस्य कार्य्यस्याऽऽकृतिरस्माकम्पूर्वजानां कथं सम्भाव्येतेति वार्त्ता स्फुटीकर्त्तुं वा मेऽयं प्रयत्न इति सुधीभिर्ज्ञेयम् । पूर्वं हि यथासमयमास्माकीनाः पूज्याः पूर्वजा ब्राह्मणा क्षत्रिया वाऽकुर्वन्नेवशुद्धिमित्यर्थम्प्रमाणानि दास्यन्ते—

(१) कण्वेन हि सरस्वत्याज्ञया दशसहस्रसंख्याका म्लेच्छाः संस्कृत्य पूर्वं शूद्रवर्णाय-पश्चात् वैश्य वर्णाय-केचन च क्षत्रियवर्णायाऽक्रियन्त इति भविष्यत् पुराणे प्रतिसर्ग-पर्वणि खं० ४३।२२ इत्यत्र समागात्-तथाहि—

"सरस्वत्याज्ञया कण्वो मिश्रदेशमुपाययौ,
म्लेच्छान् संस्कृत्य चाऽऽभाष्य तदा दशसहस्रकान् ॥ १६ ॥
वशीकृत्य स्वयं प्राप्तो ब्रह्मावर्त्ते महोत्तमे ।
ते सर्वे तपसा देवीं तुष्टुवुश्च सरस्वतीम् ॥ १७ ॥
पञ्चवर्षान्तरे देवी प्रादुर्भूता सरस्वती ।
सपत्नीकांश्च तान्म्लेच्छान् शूद्रवर्णाय चाकरोत् ॥ १८ ॥
कारवृत्तिकराः सर्वे बभूवुर्बहुपुत्रकाः ।
द्विसहस्रास्तदा तेषांमध्ये वैश्या बभूविरे १८ ॥ इत्यादिकम् ।

(२) मौहम्मदराज्ये मन्दिरेषु मञ्जितीभूतेषु आर्य्येषु च मौहम्मदीभूतेषु वैष्णवधर्म्मानुयायिभिः कृष्णचैतन्याऽन्तेवासिभिर्यथागुरुवादेशान्ते प्राग्वत्स्वस्ववर्णं प्रापिता:—यथाच-"रामानन्दस्य शिष्यो वै चायोध्यायामुपागतः ।
म्लेच्छास्ते वैष्णवाश्चासन् रामानन्दप्रभावतः ।
आर्यांश्च वैष्णवा मुख्या अयोध्यायां बभूविरे"

(३) वल्लभाचार्य्यमतस्य ख्यातासु, २५२ वैष्णवानान्तथा ८४ वैष्णवानां वार्त्तास्वपि-"अलाखानमुख्याः पठानजातीया मौहम्मदा मानवा आचार्य्येण कण्ठी-तिलकादिकं योजयित्वा वैष्णवा व्यधायिषत, पूजायाञ्चाधि-कारमार्पिता" इति लिखितम् ।

(४) महात्मबुद्धप्रचारेण त्रिंशत्सहस्रसंख्याका आर्य्या अनार्या अभूवन्-ते च समेऽपि श्रीस्वामिशङ्कराचार्यैः शङ्खध्वनिनैव शोधिता इति शङ्करदिग्विजये प्रकटरूपतया लिखितमास्ते ।

(५) (क) अजामिलोऽत्यन्तपापोऽपि सकृद्विष्णु-नामग्रहणेनैव शुद्धइति सर्व्वैं विदितम् ।

(ख) शिवपुराणेचाऽजामिलतोऽप्यधिकः पापी गुणनिधिनामा दुष्कर्म्मा शङ्करकृपाकटाक्षेण शुद्ध इति लिखितम् । ऋषिसदृशश्चाऽभूत् ।

(६) सिकन्दरेण सार्धमायाता बहवो ग्रीकजातीया आर्य्यत्वेन परिणताः ।

चन्द्रगुप्तेन सल्यूकसनाम्नः कन्यया सार्धं विवाहो व्यधायि ।

(७) पुष्करस्य पुरातन इतिहासे लिखितं यत् श्री... भिर्निरीतिनामा राक्षसः शोधितस्तथा वैदिक धर्मे मेलि...

(८) पार्सी जातीया हि-अद्यावध्यपि गोरम्नेश्वपूजका विद्यन्ते-नित्यं प्रातःस्नानं संध्याञ्च विदधति । तेन तदीयं प्राक्तनं हिन्दूत्वं प्रतीयते ।

(९) शालिवाहनस्य १०२८ शकसंवत्सरस्य शिलालेखेन "मगजातीयानां" (ये अधुनाऽपि पर्शिया, सीरिया, एशियामायनर, रोमदेशेषु विस्तृता विद्यन्ते) ब्राह्मणवर्णप्राप्तिवार्ता लिखितास्ति ।


(१०) इतिहासेषु हि एतादृशानि शतशः प्रमाणानि दृश्यन्ते तथा च—

" मार्डनरिव्यू " इत्यत्र एको लेखो मुद्रितः यत् अवरङ्गजेबीय सेनया " नेताजीपालकर " नामा चरवारः मौहम्मदीकृतः—

कतिचिद्वर्षानन्तरं समागतोऽपि पुनरसौ पेशवीकृत इति ।

(११) 'बाजीराव निंबालकरः, बीजापुरनृपते र्न्यायालये निवसतिस्म, सचकेनाऽपि केनचनाऽपराधेन योजितः विपद्गतो निम्बालकरोऽधर्म्मदीक्षामग्रहीत्, तदनन्तरं स स्वकीय "फलटन", नाम्नि सम्पत्तिस्थाने समागात, कतिचिद्दिनानन्तरं शिवाजीत्यनेन तन्मात्रा-'जीजीबाई, इत्यनयाचाऽसौ स्वपुरोहित "पण्डितरावीय व्यवस्थातः शोधितः ।

इत्यादीनि प्रमाणानि बहूनि सन्ति । आशासेऽशुद्धिम्परिहृत्य स्वीयमन्तः करणं शोधयित्वा, मामकीं लेखाऽशुद्धिमपि शुद्धित्वेन परिणतां कुर्व्वन्तो विद्वांसोऽवश्यमेव शुद्धिकार्य्ये दत्ताऽवधानाः स्वार्थहीना देशोपकारं विधास्यन्ति । व्यर्थ-कोलाहलञ्च त्यक्ष्यन्ति । दुष्टत्वे मल्लेखस्य परिहारमेव, स्वयुक्तियुक्तायुक्तीर्वा मुद्रापयिष्यन्ति ।



गंगा-गीतम्

—⁂—

प्रणेता—श्रीकविश्रेष्ठ परमानन्दभट्टाचार्यः

सम्पादकः—श्रीपीताम्बरभट्टाचार्यः (छात्रः)

काव्य-पुराण-भूषणः, राज्य अजयगढ़, (मध्यभारत)

" ग्रन्थकर्तुः संक्षिप्त परिचयः "

(१) एते खलु पूज्यपादानां, विश्वविदितयशसाम्, कविश्रेष्ठानाम् श्रीब्रजचन्द्रभट्टाचार्याणाम् आत्मजा अपि कवीश्वर-दानाध्यक्ष-धर्माध्यक्ष-राज्याचार्य-राज्यपौराणिक प्रभृतित्रिविधोपाधिधारिणः परमानन्देति अभिधया बुन्देलखण्ड-मण्डलान्तर्गतामजयगढाभिधाम् राजधानीम्, १८७२ तमे विक्रमवत्सरे माघशुक्ल प्रतिपदायाम् भौमवासरे निजजन्मनाऽलञ्चक्रुः ॥

(२) एतेषां गुरवः श्रीमदाचार्याः श्री १०८ मुकुन्दलाल भट्टाचार्याः, एतेभ्यः सकाशात् एभिः श्रीपरमानन्द-भट्टाचार्यैः षट्शास्त्राणि अधीतानि—

(३) एभिःनिर्मिता ग्रन्थास्त्वेते —

(१) श्रृङ्गार-सप्तशती (२) राजवंश-प्रस्तारः (३) " गङ्गातरङ्ग नाटकः " (४) प्रतापमार्तण्डः (५) वेदान्तसारः (६) श्रृंगारतिलकः (७) नवरस-दर्पण

(८) कविप्रमोदः (९) रसगंगाधरः (१०) महीपति-भूषण (११) माधवविलासः (१२) राजवंश-कल्पद्रुमः (१३) सन्तमिलापः (१४) कवित्तबंध रामायण (१५) राधानखशिखवर्णन (१६) राजनीतिदर्पणः (१७) वेदस्तुति-दर्पणः (१८) एकमुखी-हनुमत-पचासा (१९) पंचमुखी-हनुमत-पचासा (२०) हनुमत-पचीसी

(४) एभिः कृताः सन्ति स्वतन्त्राः स्फुट-सवैया, कवित्वादयः बहुधाहिन्दी भाषायाम्

(५) एतेषामुपर्युक्तानाम् ग्रन्थानामेकां शृंगारसप्तशतीं विहाय शेषाः अद्यापि अमुद्रिताः । अस्मत् पुस्तकागारे येन केन प्रकारेण संरक्षितास्सन्ति, तेषां मुद्रणार्थं यतामहे (द्रव्याभावोहि प्रधानकारणम्)

(६) उपर्युक्त साहित्य ग्रन्थरत्नानामेकस्मात् "गंगा-तरंगनाटकात्" कानिचिद् चिराणि पद्यानि सुप्रभातपाठकानां मनोरञ्जनायात्रोद्धरामः

(क) सुचन्द्र चूड चूडिका चलत्तरंग रंगभू,
विहारि वारि वारिद स्फुरत्प्रवर्ष हर्षद-
त्रिविक्रमक्रमाक्रमाद्विशीर्णनीरसंभवं,
सदा मुदेस्तु स्वर्नदि त्वदीय ताण्डवं शुभम् ॥१॥

(ख) सुमेरुपर्वताश्रयात्पतत्पुरारिपर्वता,
क्रमाद्विशेष विक्रमं प्रदर्शयन् शिवे शिवम् ।
ततस्त्रिलोकमण्डलप्रशंसनीयपावनं,
भगीरथानुगामिनि त्वदीय ताण्डवं शुभम् ॥२॥

(ग) मिलत्सरस्वती सखी कलिन्दकन्यका द्वये,
प्रयागयाम मण्डले त्रिवेणितां ततो गतम् ।
ततः सुविंध्यवासिनीविलासलासभूचलत्-
प्रकाशि काशिकापुरी निवासि ताण्डवं शुभम् ३॥

(घ) सहस्रवारिधारया स्फुरत्प्रभाविशेषक-
द्विलोलवीचि वल्लिका भुजप्रबन्धबन्धुरम् ।
समुद्र संगमागमे पुटप्रभेदसंभव
स्वनिपतान् मर्त्त्यबालयाखण्डि ताण्डवम् ४॥

(ङ) तट द्वये नटन्महा मुनीन्द्रनारद-
प्रभृत्यशेषशेषशेखरैः स्तुतं नतं प्रपूजितम् ।
पुरन्दरादिवृन्दवन्द्यदेवसुन्दरीलसद्विमान
क्षुद्रघण्टिका रणत्कलापि ताण्डवम् ।।५॥

(च) सुचारुचन्द्रमण्डलप्रभाकरप्रदीपिका,
प्रकाशवत्त्रिलोकरंगभूमिचित्रचत्वरम् ।
उपेन्द्रसत्पदारविन्दसूत्रधारधारितानुराग-
रागरागिणि त्वदीयताण्डवं शुभम् ॥ ६॥

(छ) नरेन्द्रजह्नुकन्यकानटी पटीयसी
चलत्तटी तटीषु रेणुराशि तूलिका पटी ततम् ।
सदांससांभ्रमभ्रमत्समुत्थफेनफेणिका
विनोदमोदहासवद्विलासिताण्डवं शुभम् ॥७॥

(ज) परास्तदण्डधृक् पुरि प्रचण्डपातकाकुल-
प्रतापताप शान्ति कृत्सवासित बारि निर्मलम् ।
पिबन्ति ये मुदा सदा लभन्ति ते पदाम्बुजं
त्रिविक्रमस्य भक्तिदं त्वदीय ताण्डवं शुभम् ॥८॥

पाणिनीय प्रकाशः ।

परेछ्व्यस्परेनान्तस्य पदस्य द्विरुर्भवेत् ।
प्रशानित्यस्य शब्दस्य नत्वित्युक्तं महर्षिणा ॥ ६१ ॥
विसर्गस्य सकारस्स्यात्परे खरिसतिध्रुवम् ।
शार्ङ्गिंश्छिन्धि महद्दुःखं शार्ङ्गिंश्छिन्धि सदा रिपून् ॥६२॥
चक्रिंस्त्रायस्व मां चक्रिंस्त्रायस्व कृपया द्रुतम् ।
पदस्येति विनिर्देशाद्धन्तीत्यादौ न दुष्टता ॥ ६३ ॥
अम्परे चेति निर्देशात्सन्त्सर्वादौ न दुष्टता ।
अप्रशानिति निर्देशात्प्रयोगेषु न दुष्टता ॥ ६४ ॥

प्रशान्तनोत्यादिकेषु बोध्यमेतद्बुभुत्सुभिः ।
नॄनित्यस्य भवेद्रुर्वा पकारेतु परे सति ॥ ६५ ॥
विसर्गस्य कवर्गे च पवर्गेच परे सति ।
जिह्वामूलीयस्तथोप-ध्मानीयो भवति क्रमात् । ६६॥
पक्षान्तरे विसर्गोऽपीत्युक्तं पाणिनिना स्फुटम् ।
नॄँ ᳵ पाहि शिव नॄँ ᳶ पाहिं विष्णो नॄः पाहि भास्कर॥
नॄँः पाहि देवि नॄन्पाहि गणेशेति सदा जप ।
कानित्यस्य नकारस्य रुःस्यादाम्रेडिते परे ॥ ६८ ॥
उत्तरस्य विसर्गस्य कस्कादिकगणेत्विणः ।
षकारो भवति स्थाने सकारश्च ततोऽन्यतः ॥ ६९ ॥
कस्कः कौतस्कुतोभ्रातुष्पुत्रोऽहस्करभास्करौ ।
अयस्कान्तो यजुष्पात्रं सद्यस्कालस्तथै वच ॥ ७० ॥
सद्यस्कीश्चैव साद्यस्कः काँस्कान् वहिष्पलं तथा ।
मेदस्पिण्डस्तथा सर्पिष्कुण्डिकाच वहिष्पलम् ॥७१॥
धनुष्कपालमपि च शुनस्कर्णस्तथैव च ।
अयस्काण्डस्तमस्काण्ड इति कस्कादयस्स्मृताः ॥७२॥
तथाऽऽकृति गणः प्रोक्तो मुनिभिर्महितैरयम् ।
काँस्कान्निहन्ति कस्कोऽयं कांस्कान्नेतिविलोकय ७३
परेसतिच्छकारेतु ह्रस्वस्य स्यात्तगागमः ।
संहितायां यथा भाति शिवच्छाया निरन्तरम् ॥७४॥
परेसतिच्छकारे स्यादाङ्माङोर्हि तुगागमः ।
लोकानाच्छादयत्यस्य कीर्त्तिस्तां माच्छिदद्भवान् ॥
परे सतिच्छकारे स्याद्दीर्घस्य हि तुगागमः ॥
चेच्छिद्यते महापापान्यपि संस्मरणं हरेः ॥ ७६ ॥
दीर्घस्य स्यात्पदान्तस्य च्छे परे वा तुगागमः ।
लक्ष्मीच्छायाऽवताल्लक्ष्मीछायामे मङ्गलं क्रियात् ॥७७॥

॥ इति हल्सन्धिः ॥

श्रीकृष्णनाम प्रचारकसमितेः विशिष्टाधिवेशनं

अस्मिन् सम्वत्सरे भाद्रपदकृष्णे श्रीकृष्ण-जन्माष्टम्याम् श्रीकृष्णनामप्रचारकसमितेः विशिष्टाधिवेशनम् श्रीभट्टमुरलीधरजी तैलङ्गानाम् सभापतित्वे महता सम्भारेण सम्पत्स्यते । तस्मिन्नेवावसरे सनातनधर्मप्रचाराय श्रीकृष्णनामप्रचाराय छात्राणां संग्रथनाय विदुषां आंग्लछात्राणाम् हृदयाकर्षकानि विचित्राणि व्याख्यानानि भविष्यन्ति । अतः साञ्जलिप्रार्थयामहे सर्वमान्याः सनातनधर्मप्रधानकेन्द्रश्रीकाशीस्थाः विश्वविदित-यशसः विद्वांसः ३१ अगस्त पर्यन्तम् सर्वजन-हितकरान् सरलान् लेखान्नुल्लिख्यप्रे षयेयुः ।

	निवेदकः—
अजेयगढ	श्रीकृष्णनामप्रचारकसमिति-
(सी० आई०)	प्रधान मन्त्री—
	श्रीपीताम्बर भट्टाचार्यः

श्री सनातन धर्म सभा चूरू ।

चूरूस्थश्रीसनातनधर्म-परिषदोऽष्टादशवार्षिकोत्सवो भाद्रपद शुक्ल १०-११-१२ तिथिषु महता समारम्भेण सम्पत्स्यते । अत्रावसरे श्री वेद भगवतः शिविकाऽपि, अति समारोहेन निस्सरिष्यति । सनातनधर्मस्य च प्रकाण्ड पण्डितानां मनोहरप्रभावोत्पादकभाषणानि भविष्यन्ति । अतः सर्वेषामुपस्थितिः प्रार्थनीया ।

स० मंत्री स० ध० सभा ।	निवेदको
चूरू B. S. Ry.	बी० जोशी "विशारदः"

स्त्रीणां संस्कृत-शिक्षा ।

ले०-श्री महादेवशास्त्री पाण्डेयः, साहित्याचार्यः

विश्रूयन्ते यतो वेदे मन्त्रपश्या वराङ्गनाः ।
समाधिभाजां महतामृषीणां समशक्तयः ॥ १ ॥
शास्त्रार्थे कृतबुद्धीनां वादिनामूर्ध्वरेतसाम् ।
विजेत्री स्त्री श्रुता गार्गी बृहदारण्यके यतः ॥ २ ॥
वाल्मीकिपार्श्वादायान्ती निगमाधिजिगांसया ।
अगस्त्यतोऽधिलिखिताऽऽत्रेयी यद्‌ भवभूतिना ॥ ३ ॥
द्रौपदी, विदुला, कुन्ती, दमयन्त्यादयस्त्रियः ।
वैदुष्येऽभिहिता यस्मात् पुराणेषु मुहुर्मुहुः ॥ ४ ॥
गृहे विहरमाणानां बालानां देशसम्पदाम् ।
शिक्षा विनिहिता सर्वा यस्मात् स्त्रीष्वेव नैत्यिकी ॥ ५ ॥
आयुष्याहारसम्पत्तिः प्रबन्धो गृहसम्पदाम् ।
शिक्षितास्वेव योषित्सु स्थिरं यस्मादहर्निशम् ॥ ६ ॥
विदुषां वीर्यसम्पत्तिजुषां काले शुभेऽशुभे ।
कार्यानुष्ठानसम्पत्तौ स्त्रीषु शिक्षा यतो ध्रुवा ॥ ७ ॥
ज्ञानजन्ये परामोदे सर्वानुभवसाक्षिके ।
योग्यता सत्त्वसम्पत्तावधर्म्या च पृथक्कृतिः ॥ ८ ॥
पाश्चात्यभाषाणां शिक्षा प्रकृतीनां गिरां तथा ।
दीयते दास्यते यत्नात् सर्वस्त्रीभ्यो यतो द्रुतम् ॥ ९ ॥
अतोधर्म्यात् प्रधानत्वात् देशसम्पत्तियोगतः ।
पाश्चात्यभाव-संस्कार-वैमुख्यात् सुखवृद्धितः ॥ १० ॥
सौकर्य्याच्चाथ संवादात् सर्वसद्व्यवहारतः ।
सर्वाः कुमार्यः शिक्षन्तां दैवीं संस्कृत्रिमां गिरम् ११
विद्वद्भिश्चैव सर्वैश्चच्छात्रैः पाठालयैः शुभैः ।
वाराणस्यां विशेषेण यदियं संस्कृता पुरी ॥ १२ ॥
भवन्तः परमेशश्च भावनां नो हृदि स्थिताम् ॥
पूरयेयुरिसामन्ते प्रार्थयामः पुनः पुनः ॥ १३ ॥

धारा यन्त्रम् ।

तिपू तिपू तिपेति स्वनितं वितन्वत्
आगन्तुकानां नयनानि कर्षत् ।
रौप्याः शलाका इव तोयधारा
उच्चैर्विमुञ्चच्छविमेति यन्त्रम् ॥ १ ॥
चित्तं नराणामिव कामनाभि—
र्धाराभिरूढं मुहुरुच्छलन्तम् ।
क्रमेणपार्श्वं परिवर्तयन्तं
तं कन्दुकं भो ! अवलोकयध्वम् ॥ २ ॥
जाता अभिन्ना ऋजवः समाना
धारा इमा यन्त्रमुखात्स्रवन्ति ।
किन्तून्नतिं प्राप्य पृथग्भवन्त्य—
आशासु शीर्णा शतधा पतन्ति ॥ ३ ॥
आलोकसम्पर्कसमुज्ज्वलाभाः
कीर्णाः समन्तान्निपतन्त्यधस्तात् ।
व्यस्ता निपाने जलविन्दवः किं
मुक्ताफलानामुतवृष्टिरेषा ? ॥ ४ ॥
धाराः कणा बुद्बुदशीकराश्च
इत्येवमासाद्य तु नामरूपम् ।
जलं जले संमिलदेतदाह
जीवः कथं ब्रह्मणि यात्यभेदम् ॥ ५ ॥

उत्पद्यमाना जलबिन्दुपातं
ध्मातोदराः सुन्दरमुल्लसन्तः ।
क्व बुद्बुदा यान्ति नु पश्यतां नो
हा हन्त ! वस्तुक्षणभङ्गुरत्वम् ॥ ६ ॥
विस्तारयन्बर्हमतीवहृष्टः
पर्जन्यवर्षामवयन्वराकः ।
धाराप्रपातोद्भव-चारुशब्दं
शृण्वन्नयं नृत्यति मत्तबर्ही ॥ ८ ॥
इन्द्रेण पृथ्वी परिषिच्यते यत्
यन्त्रं तदेवर्णमपाचिकीर्षत् ।
वेगेन धारा उपरि प्रकीर्य
मार्गं सुराणां प्रतिषिञ्चतीव ॥ ८ ॥
कर्णाय गीतं नयनाय शीतं
चित्ताय शातं मतये प्रसादम् ।
उदारमुत्सर्जयते कलाय
यन्त्राय तुभ्यं स्पृहयामि नित्यम् ॥ ९ ॥

(बहादुरचन्द्रः शास्त्री)

रामोलक्ष्मणमब्रवीत् ।

एकदा कश्चिद्रामानुयायी (*वैरागी) छात्रो नगरे भ्रमन् कस्यचित्पण्डितस्य मुखात् "रामो लक्ष्मणमब्रवीत्" इति वाक्यमश्रृणोत् । स वराकः स्वमनसि बहुधा विचारयन्—निरुक्तवाक्यात "रामः-रामचन्द्रस्यार्थकः, लक्ष्मणः-लक्ष्मणदेवरस्य बोधकः–इति शब्दार्थं निर्धारितवान् । पर 'मब्रवीत्' इत्यस्य किमर्थो भविष्यतीति चिन्तयन्निजसहपाठिवर्गस्य समीपं जगाम, पप्रच्छ च तान् 'मब्रवीत्' इत्यस्यार्थम् । सर्वे ते परस्परं बहुतर्क-वितर्कैः 'मब्रवी इति दीर्घ-ईकारान्तः सीताया नाम साधितवन्तः । परं 'त्' कारस्यार्थो नाद्यापि ज्ञातः । अतस्ते परमोद्विग्नमानसा निजाचार्यचरणानामुपकण्ठेऽगमन् । अकथयंश्च—

भगवन् ! 'रामो लक्ष्मणमब्रवीत्' इति वाक्ये- रामः, लक्ष्मणः, सीता, इति नामानि ज्ञातानि, परन्तु 'त्' कारस्यार्थो न ज्ञायते कृपया स्फुटीक्रियताम् ।

आचार्यपादाः—भो मूर्खाः ! एतावान्समयो ममोपकण्ठेऽतिवाहितः, किमद्यापि न ज्ञायते; पुच्छयुक्तस्य तकारस्यार्थः । बालिशाः ! 'त्' कारोऽत्र लाङ्गूलिनं हनुमन्तं द्योतयति । तज्ज्ञातम् !

छात्राः—आः भगवन् ! ज्ञातम् । धन्या गुरवो धन्याः ! यैः पुच्छयुक्तस्य तकारस्यार्थो हनुमानिति निर्दिष्टः, हूँ, हुँ, धन्या गुरवो †धान्या गुरवश्चेति शिरः चालितवन्तः ।

चक्रधरशर्म्माबहुगुणः ।

* विरागिणः प्रायः शब्दानामर्थं स्वेच्छया निरर्गलं स्वाभिमतं कुर्वन्ति ।

† तेषामन्ते धन्यधान्ययोरपि विशेषो न स्यात ।

सूचना ।

सौराषाढश्रावणयोः सुप्रभातं विलंबेन प्रकाशितं, तत्र सर्वेषां संपादकादीनां शरीरास्वास्थ्यं हेतुः । सत्वरमेव भाद्राङ्को यास्यति भवतां सविधे । —सम्पादकः

वैदिकर्षीणां समुद्रज्ञानम्

(लेखकः—पं० कृष्णदत्तभारद्वाजः शास्त्री, बी. ए.)

सम्प्रति खल्वाङ्गलदेशीया विद्वांसो वेदानधीत्य भारतीयानां प्राचीन-सभ्यताविषये यल्लिखन्ति तन्न सर्वथा निर्दोषम्। संस्कृत-साहित्य-निष्णातेन आर्थर ए. मैकडॉनल नाम्ना महोदयेन वेदानां पौरुषेयत्वं[1] प्रतिपाद्य "ऋग्वेदसमये आर्य्याः समुद्रेण परिचिता नासन्" इत्युक्तम्। स्वमतपोषरो तेनेमा युक्तय उपन्यस्ताः।

प्रथमन्तावत् सिन्धु-(नदी)-सागर-सङ्गमे सिन्धोरनेकविभागानां वर्णनं वेदे नास्तीतिहेतोर्ज्ञायते यत् तेषामृषीणां सागरज्ञानन्नासीत्।

द्वितीयम्, आधुनिकजनैरुपसागरं यथा मत्स्यमारणमनुष्ठीयते तथा ऋग्वेदे वर्णनं न कृतम्। यद्यपि बहूनां पशूनां विहङ्गमानाञ्च नामोल्लेखो विहितस्तथापि मत्स्यशब्दस्य केवलमेकवारमेव प्रयोगः। अतः समुद्रोऽज्ञात एवासीत्।

तृतीयम्, ऋग्वेदे समुद्रोपमाऽभावः। अतो ज्ञायते यत्ते वैदिका ऋषयोऽज्ञातसागरा अभूवन्।

चतुर्थम्, ऋग्वेदप्रयुक्तेन समुद्रपदेन सिन्धुसरिदेव व्यज्यतेऽतो हेतोर्मुनीनां समुद्रस्य ज्ञानन्नाऽऽसीत्।

पञ्चमम्, समुद्रे गमागमौ नासीत्, जलयात्रा-नावद्या मेव प्रचलितत्वात्।

एतासा मुक्तीनां सन्तीमाः प्रत्युक्तयः।

(१) ननु सिन्धो रनेक विभागवर्णनस्य वेदेऽदर्शनात्प्राचीना आर्य्याः समुद्रेण परिचिता नाऽऽसन्निति न। वेदे निखिलपदार्थानां वर्णनस्याशक्यत्वाद्विशिष्टानामेव वस्तूनामुल्लेखः। अर्वाचीनजनमतानुसारं लवणप्रधाने पञ्चनदप्रदेशे ऋषिभिर्निर्मिते ऋग्वेदे लवणस्योल्लेखमदृष्ट्वा किमिदं वचो युक्तं स्याद् यद् वैदिका ऋषयो ऽलवणमेव खाद्यमाहुः ? नहि, एतादृग्वचो नितान्तं भ्रान्तमेव स्यात्।

(२) ननु समुद्र-सञ्जात-मत्स्यमारणस्य ऋग्वेदे ऽनुल्लिखितत्वादार्य्याः समुद्रं न जज्ञिरे इति न। परिसंख्यावाक्यैर्जीवानां नैसर्गिकीं मांसभक्षण-प्रवृत्तिं निरोधयति वेदे मत्स्यमारणवर्णनस्य वीक्षणेच्छाऽऽकाशकुसुम-लाभ-कामना-तुलामधिरोहति।

(३) ऋग्वेदे समुद्रोपमाऽभाव इति वचनमपि न युक्तम्। समुद्रपदपर्यायः खलु अर्णव-शब्दः। महामहाजलाशयत्वादेव समुद्रोऽर्णव इति कथ्यते। क्वचित्तु वेदे अर्णवशब्दः समुद्रस्य विशेषणमस्ति, क्वचिच्च स स्वतन्त्ररूपेणाऽपि प्रयुक्तोऽवलोक्यते—यथाऽघमर्षणसूक्ते "ततः समुद्रो अर्णवः समुद्रादर्णवात्" इत्यत्र विशेषणतया प्रयुक्तः। तथा "महान्केतु रर्णवः सूर्यस्य" इत्यस्मिन्पदे स्वतन्त्रतया प्रयोगः। अर्णवः अर्थात् सागरः इव विस्तृतश्चलो वा सूर्यस्य केतुः। अत्र समुद्रेण सह उपमा विशदैव।

(१) लेखकमते तु वेदानामपौरुषेयता।

(४) ननु समुद्र-पदेन सिन्धुनदे व्यज्यमाने सागरज्ञानमृषीणान्नाऽभूदिति चेन्न । सन्ति भूयिष्ठा ऋचो यत्र समुद्रशब्देन सागर एव ध्वन्यते—उदाहरणार्थम्

" समुद्रार्था याः शुचयः पावकाः
ता आपो देवीरिह मामवन्तु "

अर्थात् येषां सागर एव प्राप्तव्यं स्थानम् तानि सलिलानि मा पालयन्तु । अत्र समुद्रपदात् सिन्धु-नदी-ग्रहणे मानाभावात्सागर एव वाच्यः । स्वयमुक्तमहोदयेनापि

" समुद्रज्येष्ठाः सलिलस्य मध्यात्
पुनाना यन्त्यनिविशमानाः "

इति मन्त्रव्याख्यावसरे " Having the *occan as iheir chief* अर्थात् सागरो यासामपां प्रधानम् " इति प्रोक्तम् । अतः स्पष्टमेव वदतोविरोधः । सिद्धमेव सारूप्यं वैदिकर्षीणां समुद्रज्ञानम् ।

(५) ऋषीणां समुद्रज्ञाने सिद्धे, वेदे च नौकादिशब्देषु विद्यमानेषु कथंकारं कोऽपि वक्तुं समर्थो यत्ते समुद्रे जलपथेन यात्रान्नाऽकार्षुरिति । वेदतस्तु ऋषीणां कूप-सरः-सरित्-सागरादिकानां विविधानां जलाशयानां ज्ञानं सिध्यतीति निश्चयः । प्रमाणं चात्रायम्मन्त्रः—

" या आपो दिव्या उत वा स्रवन्ति
खनित्रिमा उत वा याः स्वयंजाः
समुद्रार्था या शुचयः पावकास्ता
आपो देवी रिह मा मवन्तु " (ऋ० ७,४९,२)

तथा च :—

" दृतिं न शुष्कं सरसी शयानम् " ७।१०३।२
" सरो न पूर्णमभितो वदन्तः " ७।१०३।७
" आर्ष्टिषेणो होत्र मृषिर्निषीदन्दे-
वापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो
दिव्या असृजद्वृष्ट्या अभि " ॥

" समुद्रः कस्मात् ? समुद्रवन्त्यस्मादापः, समभिद्रवन्त्येनमापः, सम्मोदन्तेस्मिन्भूतानि समुदको भवति, समुनत्तीति वा " निरुक्तम् ॥ इति

—०००—

॥ पृथिवीशयनम् ॥

(ले०—श्री विन्ध्येश्वरीप्रसादपण्डेयः, ज्यौतिषाचार्यः, ज्यौतिषतीर्थः)

यद्यपि महर्षिप्रणीतेषु प्राचीन-ग्रन्थेषु पृथिवी शयनविषयमवलम्ब्य न कुत्राऽपि विचारः समुपलभ्यते तथापि अर्वाक्त्सु—

" प्रद्योतनात् पञ्चनगाङ्कसूर्य-नवेन्द्र षड्विंशमितानि भानि । शेते मही नैव गृहं विधेयं, तड़ागवापीखननं न शस्तम् " ॥

इति मन्यते । सूर्यनक्षत्रात् पञ्चमेसप्तमे नवमे, द्वादशे, एकोनविंशतौ, षड्विंशतौ च दैनिके चान्द्रे भे मही शेते । तत्र च तड़ागवापीकूपादि-

खजनं, गृहनिर्माणं च न कार्यम् इति पद्यार्थः ।

नव्यास्तु—"एतदाधुनिक विदुषां कपोलकल्पनामात्रम् । अन्यथा यदिशास्त्र संमतं चेत्तर्हि निखिलशास्त्र-विषयपारगाः प्रतिभाशालिनो महर्षयः अवश्यमेवास्मिन्विषये स्वमतं स्वग्रन्थेषु प्रकटीकुर्युः ।' इति वदन्ति ।

वयन्तु भवतु नाम 'पृथिवीशयन'संज्ञा कल्पिता । तात्पर्यं तु एषां ऋषिसंमतमेव । यतो हि पृथिवीशयने शुभकार्य निषेधे एवैषामभिप्रायः । तच्च महर्षिमतसंमतमेव । तेऽपि अद्यतन विद्वन्मतानुसारेण पृथिवीशयनसमयत्वेन गृहीतेषु नक्षत्रेषु शुभकार्यनिषेधं मन्यन्ते एव ।

यथाह वराहः—

"सूर्यो द्वादशमृक्षं षष्ठं गुर्ववनिजस्तृतीयंतु ।
संलक्षयति दिवाकरपुत्रोऽष्टमस्तृतः पादैः ॥" इति ।

एतेन सूर्य नक्षत्रात् द्वादशो दैनिको नक्षत्रो ऽनिष्टः शुभकार्यायेतिस्पष्टः । तच्चोपर्युक्तविद्वन्मतानुसारि । एतस्यफलमपि तत्रैव—

"खेलैत्ता वित्तहरी नित्यंक्रौजी विनिर्दिशेन्मरणंम् ।
चान्द्री नाशं कुर्यात् चौधी नाशं वदत्येव"॥ इति ।

नारदोऽपि—

"भूकम्पः सूर्यभात सप्तमर्क्षे विद्युच पञ्चमे-
शूलोऽष्टमे नवमेऽशनिरष्टादशे ततः ।
केतुः पञ्चदशे दण्डश्चोल्का एकोनविंशते-
निर्घातपातसंज्ञश्च ज्ञेयः सनवपञ्चमे"॥

इति । एभिः सूर्यर्क्षात् चान्द्रः पञ्चमः, सप्तमः, नवमः, द्वादशः, एकोनविंशश्च शुभाय नेति प्रतिपादितम् ।

अपि च—

"सूर्यभात् गणयेचान्द्रं सप्तभिर्भागमाहरेत् ।
एवं पञ्च च चत्वार आड़लो याति निश्चयात्
त्रिपट्के भ्रमणं शेषे द्वौ सप्तम्यान्महाड़लः" इति

अनेन पृथिवी शयनस्य सर्वाणि नक्षत्राणि संगृहीतानि ।

अस्य फलं वशिष्ठो यथाह—

"एकविंशन्महादोषास्त्वेते ब्रह्म मुखोदिताः
कदाचिन्नैवसीदन्ति गुणानां कोटिकोटिभिः ।—
विवाहे विधवा नारी, मरणं व्रतवन्धने-
प्राणनाशः प्रतिष्ठायां सीमन्तेगर्भनाशनम् ।
नवान्नभोजने मृत्युः कृषौ तत्फलनाशनम्-
कर्तुर्नाशो गृहारम्भे प्रवेशे पतिनाशनम् ।
यात्रायां कर्तृनाशः स्यात् युद्धकाले विशेषतः
लभ्यते सुमहत्पुण्यमेषु श्राद्धादिकर्मभिः ॥ इति—

एवं चैषु श्राद्धंकुर्यात् तदेव पुण्यकरं न शुभकृत्यम् ।

अपि च—

"यात्रायां च हलप्रवाह समये चौर्ये च संधौ तथा,
कूपारामतड़ागवन्धनविधौ पापर्द्धिदुर्गगृहे ।
अश्वेभोष्ट्ररथादिरोहणकृतौ त्याज्यं सदैवाड़लम् ।
यत्नादत्र शुभेषु कञ्ज विधौदोषो न तस्य क्वचित् ॥ इति

एतदपिफलनिर्देशकम् । प्रायः पूर्वपद्यार्थसंमतम् । एवञ्च-उपरिनिर्दिष्टपद्यैः प्राचीना महर्षयः येषु येषु भेषु शुभकार्यनिषेधः उक्तः तान्येव' पृथ्वीशयनसमयेन नव्यैरपि गृहीतानि । तेषु शुभकार्यनिषेधश्चोक्तः । इत्थं तात्पर्यविरोधाभावात् इमे नाऽऽक्षेपार्हाः । मन्तव्यं चैषांमतम् महर्षिमतानुसारि । संज्ञा च लाघवार्था । यदि च संज्ञयैव विरोधस्तदा तद्विषये न हस्तक्षेपः किन्तु पृथिवीशयनेन निर्दिष्टं विषय

मपि कपोल कल्पनामात्रमित्याक्षेपस्तु महानुचित इति विदुषामग्रे निवेदयामः ।

—॥०१०॥—

सेठिया-विद्वत्समाजः ।

छविदितमस्तु विदुषां यत्खलु वीकानेर- नगरे 'सेठिया-जैन-पारमार्थिक-संस्थासु' सेठिया-विद्वत्समाजो नाम विदुषां गोष्ठी आषाढस्य शुक्लायां द्वितीयायां समपद्यत । अस्य समाजस्य स्थायि संग्रन्थनमपि जातम् । प्रति-प्रतिपदस्य समाजस्य साधारणमधिवेशनं सुनिश्चितम्, तत्र विदुषां निबन्धाः, समस्या-पूर्तयः, कविताश्च सव्यवस्थं पठ्येरम् । अपि च, वार्षिकेऽधिवेशने सर्व-श्रेष्ठो निबन्धः सादरं पुरस्कृतः स्यात् । छात्राणामुत्साह-प्रदानाय तु प्रतिपक्षं-पुरस्कार-नियमः सञ्जतः ।

सम्भाव्यतेऽनेन समाजेन संस्कृत-भाषायाः साहित्यस्य च महती समुन्नतिः । तदेतत्सर्वमपि श्रीमतां श्रीभैरोदान श्रेष्ठिनां विपुलेन दानेन सम्पद्यत इति तत्कृते नैकशो धन्यवादाः ।

—किशोरीदास वाजपेयी शास्त्री.

संस्कृतच्छात्रसम्मेलनम् ।

हर्षस्य विषयः यदत्रमोदफलपुरीयछात्रनिकरैरेकं "संस्कृत छात्रसम्मेलनम्" स्थापितं । यत्र च सुमधुरं भावगर्भितं संस्कृतोत्थानकारकं छात्राणाञ्चातिलाभकरं व्याख्यानं संस्कृतमध्ये-तृभिश्छात्रैः संस्कृतविद्भिर्देवाग्घितैषिभिर्विद्वद्भिश्च प्रदीयते । सम्मेलनस्यास्य चतुर्थमधिवेशनं माघशुक्लवसंतपञ्चम्यां (तथा २७-१-२८) दिने विशिष्टप्रकारेण श्रीमत्पण्डित शिवचन्द्रमिश्रमहोदयानां आयुर्वेदाचार्य्याणां वैद्यकुलके-सरिणां संस्कृतोन्नत्यैकस्वभानां सभापतित्वे समजनि । यत्रापरेषामपि विदुषां लालित्यमयं भाषणं गीर्वाणवाण्यां समभवत् । सभापतिमहोदयानाञ्चान्ते छात्राणामुपदेशरूपं संस्कृतमातुरुद्धारकं व्याख्यानं समभूत् । यस्यप्रभावः छात्रेषु पूर्णतः समजायत । आशास्यते यद्येवं सर्वत्र संस्कृतमातुरुन्नत्यै यत्न क्रियते तर्ह्यचिरादेवेयं देवभाषापरितः विलोक्येत ।

निवेदक—

मंत्री—मोदफलपुरीय संस्कृत-छात्र सम्मेलनस्य

समालोचनम्

विद्या ।

हिन्दीमासिकी पत्रिका । सम्पादकः गोपीवल्लभ उपाध्यायः । मालवविद्यापीठ-गुरुकुलस्य मुख-पत्रिका, तत एव प्रकाश्यमाना । प्राप्तिस्थानम्—मालवविद्यापीठः, राऊ इन्दौर । वार्षिकं मूल्यम्—२) ।

अस्याः पत्रिकायाः द्वितीयं वर्षम् प्रचलति । पत्रिका सुसम्पादिता, सुरुचि-सम्पादिता च वर्तते । लेखाः समुन्नताः, अभिनव-विषयका जीवन-पूर्णा भवन्ति । भाषाऽपि सजीवा । एषा साफल्यमनुव्रजेदिति कामयामहे ।

रामः ।

सञ्चालकः—रामानुग्रहशर्म्मा कथावाचकः । हिन्दी-मासिकम् । सम्पादकः-पं० जगन्नारायणदेव शर्म्मा, विशारदः, साहित्यशास्त्री । वार्षिकी पूजा-३) प्राप्तिस्थानम्—ढिगवस कोठी, पो० लङ्का, काशी ।

पत्रमिदं रामभक्तानां कृते नितरां स्पृहणीयम् । सम्पादकोऽस्य साहित्यज्ञ इति साहित्यसम्बन्धिनो लेखाः, कविताश्च तिष्ठन्ति, समाजसंशोधकमिदम्, अन्यत् सर्वं रमणीयम् ।

हिन्दी-गल्प-माला ।

कथामयी हिन्दी मासिकी पत्रिका । सम्पादकः-अम्बिकाप्रसादगुप्तः । प्रकाशकः—हिन्दी-ग्रन्थ-भाण्डारः, काशी, मूल्यम्—२॥)

पत्रिकायामस्यां प्रतिमासं सुमनोहराः हृदयहारिण्यः पञ्चषाः कथास्तिष्ठन्ति । यद्यपीयं महान्तं साहित्यस्याङ्गं पूरयितुं प्रवृत्तास्ति । तथापि नास्याः स्थितिः समीचीना । अस्याः समुन्नतिं कामयामहे ।

१६८५

वर्षेऽस्मिन् आरा-विद्वत्समिति-संस्कृतोपाधिपरीक्षासु प्रविष्टानाम्परीक्षार्थिनाम् परीक्षाफलम्

आयुर्वेदशास्त्री

द्वि० श्रे०

(१) जगलाल मिश्र, सरवट, गया ।

(२) चन्द्रशेखरदत्त मिश्र, अरवल, गया ।

न्यायशास्त्री

द्वि० श्रे०

(१) देवनारायण मिश्र, बहोरनपुर, शाहाबाद

व्याकरण-विभूषण ।

द्वि० श्रे०

(१) धनेश्वरोपाध्याय, ब्रह्मनौली, बलिया ।

(२) केशवोपाध्याय, सोनदिया, शाहाबाद ।

आयुर्वेद-विभूषण ।

द्वि० श्रे०

(१) गङ्गापति पाठक, बलिया ।

(२) गङ्गाधर पाठक, बलिया ।

(३) रामनरेश पाण्डेय, जितौरा, बलिया ।

(४) इन्द्रदेव पाण्डेय, कुरेजी, बलिया ।

(५) भागवत शर्मा, कसाप, शाहाबाद ।

ज्यौतिष-प्रवेश ।

द्वि० श्रे०

(१) रामेश्वर पाण्डेय, कुरेजी, बलिया ।

(२) रूपधारी द्विवेदी, वेलाउर, शाहाबाद ।

व्याकरण प्रवेश ।

प्र० श्रे०

(१) शिवकुमार पाण्डेय, धनौती, बलिया ।

(२) शालिग्राम ओझा, बन्धा, शाहाबाद ।

द्वि० श्रे०

(१) रामधारी उपाध्याय, ब्रह्मनौली, बलिया ।

(२) हरिहर त्रिपाठी, बैजलपुर, बलिया ।

(३) वाराणसी पाण्डेय, अरक, शाहाबाद ।

(४) विष्णुदत्त शर्मा, रमाला, मेरठ ।

(५) चन्द्रभानु शर्मा, ननदी, सहारनपुर ।

(६) सुखलाल शर्मा, पालीवाल, नयागांव, होशंगाबाद ।

(७) सुरेन्द्र शर्मा, ललुआनगरा, बदायूँ ।

(८) आशाराम शर्मा, हरिद्वार, सहारनपुर ।

(९) होशियारसिंह वर्मा, ढिकोली, मेरठ ।

(१०) लीलापति शर्मा, पावटी, विजनौर ।

(११) शुकदेव शर्मा, पजाऊ, गढ़वाल ।

(१२) देवराज शर्मा, हरिद्वार, सहारनपुर ।

(१३) नारायणदत्त शर्मा, बांदली, शिमला ।

(१४) नित्यानन्द शर्मा, तुसरड, नैनीताल ।

(१५) रेवतराम शर्मा, सीम, गढ़वाल ।

(१६) लक्ष्मणदत्त शर्मा, ग्वालियर ।

(१७) सुमेरसिंह वर्मा, ढिकौली, मेरठ ।

(१८) अम्बिकादत्त शर्मा, सोमना, अलीगढ़ ।

(१९) कुञ्जविहारी शर्मा, पिडसरा, मैनपुरी ।

(२०) रामजीवन द्विवेदी, कणसर, शाहाबाद ।

(२१) तारकेश्वर पाण्डेय, चौसा, शाहाबाद ।

(२२) कपिलदेव पाण्डेय, कुरेजी, बलिया ।

(२३) श्रीराम पाण्डेय, „ „

(२४) हरिप्रसाद द्विवेदी, वेलाउर, शाहाबाद।
(२५) शिवकुमार पाण्डेय, लक्ष्मणछपरा, बलिया।
(२६) देवकुमार पाण्डेय, तेघरा, शाहाबाद।
(२७) रामजन्म त्रिपाठी, छोटससरांव, शाहाबाद।

प्रकाशकः—

विद्वत्समिति: आरा | श्रीयुगलकिशोर झा शर्मा उपमन्त्री।

सुप्रभात में विज्ञापन छपाने के नियम।

१—नीचे लिखा भाव स्थाई समझना चाहिये। रियायतके अभिलाषी सज्जन पत्रव्यवहार करनेका कष्ट न उठावें।

२—विज्ञापन दाताओं को यह भी लिखना चाहिये कि—"यह विज्ञापन इतने इश्रमें तथा एक अथवा दोनो कालममें दिया जावै"।

३—मूल्य सर्वथा अग्रिम आना चाहिये

४—साल भरके विज्ञापन दाता अपने विज्ञापनके निबन्धको ३ महीने बाद बदल भी सकते हैं पर साइज वही रहेगा।

५—जो विज्ञापन-दाता १०) से अधिक निम्न निर्दिष्ट रेटके अनुसार एक साथही भेजेंगे उनके लिये प्रति रूपये पर -) एक आना छोड़ दिया जायगा।

	टाइटिल	अन्दर
१ पृष्ठ (प्रतिवार)	७)	५)
" "	४)	३)
" "	२॥)	२)
" "	१।)	१)

६—साधारण विज्ञापनकी (क्रोड़ पत्र की) बंटाई १०) होगी।

अतीत—१९८१·८२·८३·८४ सम्वत्सराणाम्

सुप्रभातम् ।

प्रथमवर्षस्य—१९८१

शोभनबन्धैः पुस्तकाकृत्या निबद्धम् । मूल्यम्—६) षण्मुद्राः । मार्गव्ययः पृथक्नास्ति

द्वितीयवर्षस्य—१९८२

प्रथमाब्दवदतिमनोहरबन्धबद्धम् । मूल्यम्—५) पञ्चमुद्राः । मार्गव्ययः पृथङ्नास्ति ।

तृतीयवर्षस्य—१९८३

पूर्ववत् बद्धम् । मूल्यम् २॥) सार्द्धमुद्राद्वयम् । मार्गव्ययः पृथक्

चतुर्थवर्षस्य—१९८४

अतिमनोहरमिदम् निबद्धम् ।

मूल्यम् २॥) सार्द्ध मुद्राद्वयम् । मार्गव्ययः पृथक् ।

प्रकीर्णाङ्काः

प्रकीर्णाङ्काः स्वल्पा एव विद्यन्ते । येषांपार्श्वे कस्यचनाङ्कस्याभावो भवेत्ते नूनं शीघ्रतां कुर्वन्तु ।

प्रथमवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणकचतुष्टयम् । अङ्काः—आदर्शः, १, ४, ९, ११, १२,

द्वितीयवर्षस्य—प्रत्येकाङ्कस्य मूल्यम्—≡) आणकत्रयम् । अङ्काः—२, ३, ५, ६, ७, ८, ९, ११, १२.

तृतीयवर्षस्य प्रत्येकाङ्कस्यमूल्यम्—=) आणकद्वयम्, अस्यसर्वेप्यङ्काः सन्ति ।

चतुर्थवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणकचतुष्टयम् । अस्य सर्वेप्यङ्काः सन्ति ।

जिघृक्षुभिस्त्वराकार्या । पत्रव्यवहारसङ्केतः—

व्यवस्थापकः—

सुप्रभातकार्यालय, काशी

(Benares City)

सुप्रभात-ग्राहका विज्ञाप्यन्ते ।

१९८५ वैशाखीय विशिष्टाङ्कश्चिरान्मुद्रितो विद्यते, ये खलु विशिष्टाङ्कमप्राप्य कार्यालये तदर्थं पत्राणि प्रेषयन्ति । ते विशिष्टाङ्कस्य विशिष्टं साहाय्यमाणकचतुष्टयं ।) चिटिकाद्वारा, वार्षिकमूल्येन वा सह सत्वरं प्रेसंष्य विशिष्टाङ्कमासादयन्तु । तेषां विशिष्टाङ्कः सुरक्षितो विद्यते । तैर्न कापि चिन्ता कर्तव्या । मन्यामहे, बहुभिर्ग्राहकैरेषा सूचना न पठितेति वारं वारं विशिष्टाङ्ककृते पत्रं प्रेषयन्ति । साम्प्रतमुत्तरं न दास्यामः ।

—व्यवस्थापकः

सुप्रभात-नियमाः ।

(१) सुप्रभातमिदं सौरमासस्यान्तिमे सप्ताहे प्रकाशितम्भविष्यति ।

(२) एतस्य वार्षिकम्मूल्यम्—समाजनियमानुसारं मान्यभ्यः—१२) मुद्राः, सहायकेभ्यः—३) मुद्राः, छात्रेभ्यश्च १॥) मुद्रा—भविष्यति ।

(३) अग्रिममासस्य प्रथमे पक्षे यस्य ग्राहकस्य सविधे पत्रं न गच्छेत्, तेन नूनं पत्रालये समन्विष्य कार्यालये पत्रं प्रहेयम् । तदा 'सुप्रभातं' प्रेषितं स्यात् । यदि ग्राहकाः पत्रं न प्रेषयिष्यन्ति, तदा कार्यालयो नोत्तरदायी भवेत् ।

(४) पत्र-प्रेषण-समये ग्राहक-सङ्ख्या नूनं लेखनीया । अन्यथा पत्रमवलोकितमेव न स्यात् ।

(५) अग्रिम-मूल्यमन्तरा सुप्रभातं न प्रदीयते, ग्राहकैर्धनादेशद्वारा (मनिऑर्डर) मूल्यं प्रेषणीयम् स्वीयः पूर्णसङ्केतश्च लेख्यः । वी० पी० द्वारा प्रेषणे तेषामेव समधिको व्ययः स्यात् ।

(६) पत्रोत्तरमभिलषद्भिश्चिटिका नूनं प्रेषणीयाः । अन्यथा पत्रोत्तरं न दीयेत ।

(७) लेखकैरतिसरलभाषायां लेखाः प्रेषणीयाः, न सर्वेऽपि पठितुमवगन्तुञ्च प्रभवेयुः ।

(८) लेखाः पत्रस्यैकस्मिन्नेव पृष्ठे पार्श्वयोः स्थानं विहाय, सुरूपष्ठैः, सुवाच्यैः, सुन्दरैरक्षरैर्लिखित्वा प्रेषणीयाः । अन्यथा न तेषां प्रकाशनं स्यात् ।

(९) विवादग्रस्ताः, व्यक्तिगताक्षेप-पूर्णाः, पूर्णाः, पुस्तक-रूपाः, लेखा न प्रेषणीयाः । प्राचीन-पुस्तकानां, सामयिकपुस्तकानां वा प्रकाशनं भवेत् ।

(१०) छात्राणां लेखाः, संस्कृत-समाचाराः, विज्ञान-समाचाराः, नूतन-वार्ताः सादरं प्रकाश्येरन् ।

(११) लेखानां प्रकाशने, अप्रकाशने, परावर्तने, अपरावर्तने वा सम्पादकस्यैवाधिकारः । को लेखः कदा प्रकाशितो भविष्यतीति सम्पादकाधीनमेव ।

(१२) सुप्रभाते सरल-सरसाः, भावपूर्णाः, अतिमनोहराः, कविताः प्रकाशिताः स्युः । साधारण-कविता-प्रेषणे लेखकैर्व्यर्थश्रमो न विधेयः ।

(१३) लेखाः, परिवर्तनार्थं समालोचनार्थञ्च पत्राणि, पुस्तकानि, 'सम्पादकः—सुप्रभातम्, काशी' अनेन सङ्केतेन; प्रबन्ध-विज्ञापनादि-विषयकानि पत्राणि च, 'व्यवस्थापकः—सुप्रभात-कार्यालयः, काशी' इत्यनेन सङ्केतेन प्रेषणीयानि ।

(१४) सुप्रभातस्य प्रचारो भारतस्य सर्वत्र प्रान्तेषु प्रचुरसङ्ख्यायां विद्यते । एतस्मिन् विज्ञापनदानेन महत्साफल्यं भवेत् । मुद्रिताः विज्ञापननियमाः कार्यालयतः पत्रं प्रेष्य, ग्रहीतव्याः ।

सर्वतन्त्रसिद्धान्त पदार्थ-लक्षणसंग्रहः ।

गौरीशङ्करभिक्षुकृतः, द्वितीयावृत्तिः । मूल्यम्-।॥)

वेदवेदाङ्गदर्शनस्मृतिकाव्यादिशास्त्रीय-पदार्थानां २७०० लक्षणवर्णनात्मकग्रन्थो नाद्यावधि प्रकाशितः । उपयोगित्वविषये—

'ये सन्ति विषयाश्चास्मिन् ते न दृष्टाः, परत्र वै ।
अत्र चैव समावेश्य सर्वसिद्धान्तलक्षणम्' इति

काशी-मद्रासादिस्था ८६ विद्वांसो मुक्तकण्ठमुद्घोषितवन्तः ।

मनभरीदेवी, पुट्ठी, पो० जमालपुर, जि० हिसार ।

सचित्रम् सामुद्रिक रहस्यम् ।

ले०—श्रीकालिका प्रसादशर्म्मा, राजज्योतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथाऽर्वाचीनमेव । एतेन हस्तरेखाणां गुप्तं चिह्नं सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि कोकोक विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनी-प्रभृतयः स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि, तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वस्वविधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्यः ।

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दी भाषायां निबन्धलेखन-अनुवादादिज्ञाने महत्सौकर्यं स्यात् । मूल्यम्—आणकषट्कम् । मार्गव्ययः—=)

सूर्यचरितम् वा ऋतुचरितम् ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः ।

गोलविद्या-विषयकं नूतनं महाकाव्यम् ।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः । गोलविषये नूतनं संस्कृत-महाकाव्यम् । सर्वथा द्रष्टव्यम् । मूल्यम्—१) मार्गव्ययः पृथक् ।

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-तीर्थः

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया बालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृत काव्येषु नाटकेषु पुराण-पुस्तकेषु च समागतानां देशानां नदीनां स्थानानां पर्वतानाञ्चाधुनिकी स्थितिस्तेषां नामानि च सन्ति । सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् ॥) आणका

महाकवि बाणभट्टः ।

लेखकः—सुप्रभात-सम्पादकः श्रीकेदारनाथ शर्मा

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र बाणभट्टस्य जीवनविषये महत्वपूर्णा, मननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारको निबन्ध-बन्धः । मूल्यम् =) मार्गव्ययः -)

सर्वेषां प्राप्तिस्थानम्—

☞ मैनेजर, सुप्रभात कार्यालय, बनारस सिटी ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौरभाद्रपदः १९८५ वैक्रमाब्दे

पञ्चमवर्षे Vol. 5

September 1928.

पञ्चमी सङ्ख्या No. 5

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिमुदस्यद् मन्दतारा विलुम्पन्-नवदधि सुरभाषाभाषि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती, साहित्य-वारिधिः

सम्पादकः—

दर्शनकेसरी श्रीगोपालशास्त्री त्रिपाठी "साहित्याचार्य्यः"

व्यवस्थापकः—

श्रीगिरीशशुक्लः, "न्यायाचार्यः"

वार्षिकम्मूल्यम्—३)
माननीयेभ्यः—१२)

अस्याङ्कस्य मूल्यम् ।)

छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—९)

लेख-सूची ।

सुप्रभात-ग्राहका विज्ञाप्यन्ते ।

१९८५ वैशाखीय विशिष्टाङ्कश्चिरान्मुद्रितो विद्यते, ये खलु विशिष्टाङ्कमप्राप्य कार्यालये तदर्थं पत्राणि प्रेषयन्ति । ते विशिष्टाङ्कस्य विशिष्ट साह्यमाणकचतुष्टयं ।) चिटिकाद्वारा, वार्षिकमूल्येन वा सह सत्वरं सम्प्रेष्य विशिष्टाङ्कमासादयन्तु । तेषां विशिष्टाङ्कः सुरक्षितो विद्यते । तैर्न कापि चिन्ता कर्तव्या । मन्यामहे, बहुभिर्ग्राहकैरेषा सूचना न पठितेति वारं वारं विशिष्टाङ्ककृते पत्रं प्रेषयन्ति । साम्प्रतमुत्तरं न दास्यामः ।

—व्यवस्थापकः

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रं संस्कृत-मासिक-पत्रम् ।

पञ्चम-वर्षे | सौर—भाद्रपदे । १९८५ वैक्रमाब्दीये | पञ्चमी संख्या ।

स्तब्धः श्वेतकेतुः ।

ले०—केशवात्मजः श्रीमूलशङ्करशास्त्री (मोड़ासा)

आरुणिः—(स्वगतम्) हन्त, पुत्रेण न किमप्यधीतम् । सोऽद्य द्वादशेन वर्षेण संवर्धते । किं करवाणीति ?

(ततः प्रविशति श्वेतकेतू रममाणः)

श्वे०—मम चक्रिका भग्ना । द्वितीयां ददातु मे ।

आ०—(शिरस्युपाघ्राय) ददामि वत्स, किन्तु न त्वं किमप्यधीषे । धावन् कूर्दन् खेलन्नेव तिष्ठस्यहर्निशं, तत् किं शोभनम् ?

श्वे०—किं तदयुक्तं नाम क्रीडनं बालानाम् ? सवयस्का मे सर्वेऽप्येते कुमारा रमन्त एव ।

आ०—रन्तव्यं खलु, उताहो पठितव्यमपि । आवश्यकं तद् बालानां, तत्र न मे प्रतिषेधः । किन्तु क्रीडासक्तचेतसस्ते न पश्यामि स्वापाशनयोरप्यवकाशः । तदेव मे मनो व्यथयति । पश्य, इतरे ते सुहृदो यथावकाशं रमन्तेऽधीयते च । अस्माकं महति महीयसि गोत्रे न कोऽप्यपण्डितः समुत्पन्नोऽद्य यावत् ।

श्वे०—तात, अहमप्युत्सहे पठितुम् । तातो द्रक्ष्यति मामल्पेन कालेन विद्वांसम् । प्रेषयतु मां गुरुगृहम् ।

आ०—यद्येवं तदतीव मे रोचकम् । अद्यैव त्वां प्रेषयामि गुरुकुलम् ।

(गुरुकुले श्वेतकेतुः)

श्वे०—गुरुर्मां श्लाघते । समपाठानामहमग्रणी-स्तेषु लब्धकीर्तिश्चास्मि । मन्ये नास्ति मादृशो-ऽन्यः कृतविद्यः । पिता मां प्राग् निरभर्त्सयत । सोऽपि द्रक्ष्यति ममाप्रतिहतप्रसरं पाण्डित्यम् । समतीतानि पठतो मे चतुर्विंशतिहायनानि । अथाऽऽचार्यानुज्ञया गृहं यायाम् ।

—:०:—

(पितृगृहे पण्डितंमन्यः स्तब्धः श्वेतकेतुः)

आ०—वत्स, सुस्नातोऽसि युवा सम्प्रज्ञश्च । कि-मिति स्तब्ध इव तिष्ठसि ? न च किमपि मन्त्रयसे ? ब्रूहि, केषु केषु विषयेषु पाटवं प्राप्तं त्वया ?

श्वे०—(सावेगम्) किमित्यनल्पजल्पनेन ! कीदृशो-ऽहं पण्डितो जात उपाध्याय एव जानाति तत् ।

—आ०(सान्त्वयन्) सत्यं तत्, अपि तु ज्ञातव्य-मस्माभिरपि । त्वं तु न सम्भाषसे कञ्चिदपि किञ्चित् । कथं जानीमो वयम् ।

श्वे०—(साटोपम्) किं ज्ञातेन, न गृहे कोऽपि जानाति मया सह वर्तितुम् ; न भवान् नाम्बा न भ्रातरो न च स्वसारः । न केषुचिद्विवेकं विनयं वा पश्यामि !!

आ०—जात, नार्हसि मानमपेक्षितुं समस्नेहानुवर्तिषु स्वकीयेषु । इयं हि सरणिः कौटुम्बिकी यद् यत्र हृदयैक्यं न तत्र वाह्याचारापेक्षा ।

श्वे०—किं ? कुटुम्बिनो मत्पदवीं चिन्तयितुं नार्हन्ति यतस्तेषामहं वरिष्ठः । मम प्रखरपाण्डित्यस्य मूल्यं न जानन्ति स्वाः ।

आ०—वत्स, प्रमाद एवैष ते । को नाम न जाती विज्ञोऽस्मदन्ववाये ? यथा त्वया तथा सर्वैः प्येवमेव यथाशक्ति प्राप्ता विद्या । को दर्पस्तत्र । तज्ज्ञास्ते नाम लोकेऽस्मिन् दृप्ता ये न भवन्त्यहो । अमृतं नाम विज्ञानं मृत्युर्येन प्रतीर्यते ॥

श्वे०—आः किं ब्रवीति तातः ? किमहमन्यसाधारणो विद्वान् ? मन्येऽहं विद्यानां पारदृश्वा ! किं सर्वा अप्यङ्गुलयो भवन्ति समाः ? सर्वेषामङ्गानां किं न वरीवर्ति शीर्षण्यो मूर्धा ?

आ०—अपि नाधिगतं त्वया मूर्ध्नः स्थितिरन्यैः सर्वैः, सर्वेषां वा मूर्ध्ना ? परस्परमबाधमानाः स्वं स्वं व्यापारं यथायथं कुर्वन्तस्ते शारीरिकीं स्थितिं निर्वहन्ति । तत्रास्ति सर्वैः सर्वं प्रयोजनमवयवानाम् ।

श्वे०—भवतु नाम, यथाकथञ्चित्स्यात् । म पदव्यामतो न कापि क्षतिः । न तातस्यापि परिचयो मे पाण्डित्यस्य ।

आ०—यद्येवं, तर्हि मम प्रश्नानां प्रत्युत्तराणि दास्यति वत्सः ?

श्वे०—आः किमेवमुच्यते ?

आ०—वद वत्स, येनैकेन विज्ञातेन सर्वं विज्ञातं भवति, येनाश्रुतं श्रुतं भवति, किन्तदेकम् ?

श्वे०—(विस्मयं प्राप्य)—एवं स्याच्चेन् न कोऽप्यधीयीत । अशक्यं तत् ।

आ०—कथं नामाशक्यं तत् ? शृणु । यथा ज्ञातेनैकेन मृत्पिण्डेन सर्वे मृण्मया ज्ञायन्ते पदार्थाः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" । यथा चान्यैर्लोहसुवर्णादिभिः ...

लाकटकादयः । एवमिदमखिलं कथं न ज्ञायत एकेन ?

श्वे०—एवंविधं न किमपि गुरुणाऽहमनुशासितः कदाचन सोऽपि न जानीयात्; नो चेत् स्निग्धस्य शिष्यस्य स कथं न ब्रूयात् ।

श्रा०—वत्स नात्र दोष उपाध्यायस्य । न सर्वमपि भवति पुस्तकगम्यम् । न हि वा कोऽपि भवति विज्ञः शालायामेवाधीत्य समुत्तीर्णः । विशालेयं जगतपाठशाला । तत्र प्रकृतिमनुभूयमानः सुधीर्भवति विज्ञः । क्रमेण गच्छति पूर्णताम् । सुधीस्तु यावज्जीवं भवति विद्यार्थी विनीतो वृद्धोपसेवी च ।

श्वे० –(पादयोर्निपत्य)—क्षम्यताम् क्षम्यताम्, प्रमाद एवायं मम । "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् " ।

श्रा०—प्रीतोऽस्मि वत्स । हन्त कथयिष्यामि ते यन्मया पृष्टम् । शृणु संक्षेपतः, तदेकं वस्तु "सत्", यस्मादिदं सर्वमाविर्भूतम् । तेन ज्ञातेन सर्वं ज्ञायते ।

श्वे०—(सानन्दं) अहो बत, सम्प्रत्येव मम हृदयग्रन्थिश्छिन्ना ! निःसंशयं विवेकभानुप्रकाशेन निरस्तनिःशेषसन्तमसं मे स्वान्तमधुना मां कर्तव्यपथे प्रेरयति । निगमागमानां तत्त्वमद्यैव मया सम्प्राप्तं सर्वाश्च सञ्जाता विद्याः सफलाः । "गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः" एतत्सनातनं सत्यं मयाऽद्यैव ज्ञायते ।

"वारिदान्योक्तिः"

रचयिता—कुलानन्द शर्मा, (शारदाभवनम्, नवानी)

(१)

रे ! वारिवाह, यदि वारिणि तेऽस्ति सत्यम्
सत्त्वन्तदाऽधिमरु मुञ्च तथा न वा चेत् ।
व्यर्थन्तवाऽस्ति प्रथितम्भुवि वारिदत्वम्
किन्नन्धदत्वमभियात्यपि गन्धवाहः ॥

(२)

तोयम्प्रयच्छसि गिरौ बहुशो, न देशे,
पात्रेऽथवा जलनिधौ किमु युक्तमेतत् ?
एवं स्थितेऽपि यदमुत्र नियोजितस्त्व-
न्देवाधिपा नहि किमद्य विवेचयन्ति ॥

(३)

त्वय्यागतेऽत्र विषये दधते पदानि
नाद्य द्विजा द्विजवरस्य कथैव कास्तु ।
कृत्येक्षणक्षणहृतानि मनांसि येषाम्
तेऽयुक्तितो जगति शासति भूभृतीव ॥

—:०:—

श्रीकृष्ण-जन्माष्टमी

(ले०—गिरिजादत्त त्रिपाठी काशी हिन्दु-विश्वविद्यालयस्थः)

अहो ! परम-कारुणिकस्य सकल-लोकानुरञ्जकस्यावनितलभ्रमणलोलुपानां मानवजात्यलंकारभूतानामाधारभूतस्य चराचरजीवलोकोपकारकस्य

जीव-ब्रह्म-विवेकहेतोर्न पुनर्मानवानामेव अपि तु सोमवाय्वादित्यप्रभृतीनामप्युपकारकमस्य व्रजाङ्गनाविहारिणो गोपिकाकुलललामहेतोः श्रीकृष्णस्यायं जन्मदिवसः । धन्योऽयं मासः, यस्मिँश्च जगदुपादानस्य परमात्मन आविर्भूतिः, अत एवेयं तिथिरपि धन्या, मासोऽप्यत एवान्वर्थतामाप्नोति भाद्रमास इति। भद्र एव भाद्रः स चासौ मासश्चेति व्युत्पत्त्या, भद्रशब्दस्य कल्याणार्थकताया दृष्टत्वात्। अस्य च किल गोपिकावल्लभस्य विषये गाढाज्ञानान्धकार-प्रलिप्तचेतसो बहुधा प्रलपन्ति यद् यस्य षष्टिसहस्राणि गोप्यो वशंवदास्तत्र कथमपि स्वप्नेऽपि जितेन्द्रियत्वं न सम्भाव्यते । परमयं ज्ञातुरपराध एव, नावगतमिदं यत् पूर्वावतारे दत्तशापो मदनोऽनेन यत् "भविष्यति विह्वलात्वत्कृतिः श्रीकृष्णावतारे", इयतीनां गोपरमणीनां मध्ये विलासपूर्वकं विचरतापि जितेन्द्रियत्वं पालितम्, सूक्ष्मेक्षणेन शास्त्रादि-पर्यालोचनया च विचारणे न कोऽप्यन्य एवंभूतो जितेन्द्रियः प्रतिभाति सहृदयान् । इत्थमेवाज्ञानिनोऽस्मिन् विषये दोषोद्भावनमाकल्प्य भक्तिमार्गात् विमुखा भवन्ति, परं दृश्यताम्, विचारपरायणानामपारशेमुषीकाणां भगवतां चाणक्यानामुक्तिः

"येषां श्रीमद्यशोदासुतपदकमले
नास्ति भक्तिर्नराणां ।
येषामाभीरकन्या-प्रियगुणकथने
नानुरक्ता रसज्ञा ॥
येषां श्रीकृष्णलीलाललितरसकथा-
सादरौ नैव कर्णौ ।
धिक् तान् धिक् तान् धिगेतान्
कथयति सततं कीर्तनस्थो मृदङ्गः ॥१॥

पण्डितप्रवरश्रीजयदेवप्रणीतं गीतगोविन्दकाव्यमवलोक्य बहुशो दोषानुत्क्षिपन्ति "नास्त्ययं श्रद्धेय" इति, परं नैतदपि समीचीनम् । एवं विलासपरे वर्त्मनि पादौ दधतोऽपि इत्थं वशित्वमिति महत् श्रद्धास्पदम् । भिन्नरुचित्वाल्लोकस्य सर्वैरुपायैः परमात्मोपास्य इति प्रयोजनकमेव तद्वचनं, केचन भक्तिमार्गेण गच्छन्ति विष्णुसन्निधौ, केचिच्च शृङ्गार-प्रधानबुद्ध्या । पूर्वमेवात एवोक्तं श्रीजयदेवेन

"यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम्
मधुर-कोमल-कान्त-पदावलिम्
शृणु तदा जयदेवसरस्वतीम् ॥ २ ॥

आदिकवयस्तत्र भवन्तो भवन्तो व्यासाः स्वरचितश्रीमद्भागवते स्पष्टमुक्तवन्तः

" जयात तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि ।
दयित ! दृश्यतां त्वांवि चिन्वते
दिक्षु तावकास्त्वयि धृतासवः ॥३॥

रमणविरहप्रयुक्तक्लेशविधुराया राधिकाया वचनमिदम् । पूर्वतो विजयमानोपि व्रजः त्व जन्मग्रहेण अधिकं जयति, सर्वोत्कर्षेण वर्तते, त्व च लोकमाता इन्दिरापि अनिशं सेवते, त्वयि विन्य समर्पितप्राणाः तव भक्ताः त्वां दिक्षु इतस्तत विचिन्वते एवंभूतो राधाहृदयानन्दवर्धनः व्रजाङ्ग नाहृदयमानसहंसः, अवनीतले हंस इव विराजमान

श्रीकृष्ण इन्दिरयापि सेवमान आसीत्। तस्य विषये बहुधा एवमपलापः धूलधूसरितलोचनानामेव कृते शोभनः, यः कौरवपाण्डवमहायुद्धे पुरतः समुपस्थितान् स्वज्येष्ठानाचार्यप्रभृतीनवलोक्य युद्धात् विरमन्तमर्जुनं प्रोत्साह्य विराड्रूपं च दर्शयित्वा ज्ञानोपदेश-प्रदीपेनाज्ञानं तमोऽपहृत्य युद्धार्थं प्रेरितवान्, द्यूतात् पराजिते पाण्डवे दुःशासनेन चीरापहरणसमये द्रौपद्याऽऽहूतः स्वीय-शक्ति-रूपेण प्राविश्य रक्षितवान् द्रौपदीम्। नात्र भिन्नबुद्धिः कर्तव्या। एकोऽयं ब्रह्मविष्णुमहेश्वररूपेण त्रिधा विभक्तः सर्गस्थितिसंहारव्यवहारहेतुः जगतः कार्यनिचयान् निर्वाहयति, पृथ्वीमाहृत्य पातालं प्राप्ते कनकलोचने देवगन्धर्वादिस्तुतिभिर्वशंवदः उद्दिधीर्षया वाराहरूपं प्रकल्प्य शेषालयं प्रविश्योद्धारितवान्। अथ सैवानन्दकन्दः सम्प्रदायभेदेन बहुधा उपास्यते, यथा शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कपिलानुवर्तिनः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलानुयायिनः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, यावदुक्तोपपन्न इति नैयायिकाः, लोकव्यवहारसिद्ध इति चार्वाकाः एवमेव कश्चन राम इति कृत्वा उपासनां करोति। कश्चिच्च कृष्ण इति, कश्चिच्च माधव इति, नास्त्येतद्विषये शङ्काकलङ्कलेशोऽपि। एतावता प्रबन्धेनापि यदि कश्चन हीनमतिर्न संतुष्याच्चदा तस्य विषये "मनुष्यरूपेण मृगाश्चरन्ति" इत्येव कथनं शोभनम्। अतएवोक्तं श्रीमदुदयनाचार्येण कुसुमाञ्जलिग्रन्थान्ते।

इत्येवं श्रुति-नीति-संप्लवजलैर्भूयोभिराक्षालिते।
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः॥
किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः।
काले कारुणिक! त्वयैव कृपया ते भावनीया नराः ४
अस्माकन्तु निसर्गसुन्दर! चिराच्चेतो निमग्नंत्वयीत्यद्धाऽऽनन्दनिधौ,तथापि तरलं नाद्यापिसन्तृप्यते।
तन्नाथ! त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः ५

श्रीमद्भागवते प्रदर्शितं व्यासेन यत् यमुनातटे प्रेरितवंशीरवं श्रुत्वा भक्तितो धावमाना आभीरकन्या वहव्यश्च तत्र प्रापुः। काश्चन स्वगृहवासिभिरवरुद्धा गन्तुमक्षमाः प्राणान् तत्यजुः। कयापि दृष्ट्या दृश्यतां सर्वतो भावेन श्रीकृष्णस्य नैर्मल्यं तस्य विषये ब्रजाङ्गनानां भक्तिप्रादुर्भावश्च स्पष्टमुपलक्ष्यते इति। श्रीकृष्णार्पणमस्तु

बलिरपेद्यते।

(ले०—बहादुरचन्द्र शास्त्री)

कालस्तोकमत्यगाद्, अहं वाष्पयानेन दिल्लीतो लवपुरमयासिषम्। मध्येमार्गं केनचित्प्रौढवयसा भद्रवेषेण पुंसा साकं मे वाकोवाकः समवर्तत। तस्य सारांशमिहोद्धरामि।

सः—कुतः समेषि भोः?

अहम्—दिल्लीतः श्रीमन् !

सः—अथ क गम्यते ?

अहम्—लवपुरम् ।

सः—तत्र किं क्रियते ?

अहम्—अध्ययनम् ।

सः—किमधीयते ?

अहम्—संस्कृतभाषा ।

सः—(साश्चर्यम्) संस्कृत भाषा ?

अहम्—आम, संस्कृतभाषामधीये ।

सः—अद्यत्वे ? अस्मिन्देशे ? अथ कं लाभं लप्स्से तदध्ययने ?

अहम्—इतरभाषाऽध्ययने को लाभः ?

सः—जीविकां सुखमाप्नुमः ।

अहम्—तत्किं भवानवैति संस्कृतेऽधीती कृच्छ्रं जीवतीति ?

सः—अथकिम् । (सावेगम्) कस्य गुप्तमिदम् ? को भवदीयाँस्तीर्थान् आचार्यान् शास्त्रिणोऽलङ्कारान् वाऽर्घति । कस्तान्पृच्छति ? कियद्वा ते लभन्ते ? अहन्तु तान् सदा सीदत एव प्रेक्षे । किम्पुनश्छात्राणां दुर्गतिः ! वराकाः क्षेत्रेषु भुञ्जते । भूमौ शेरते चीराणि वसते । किञ्च प्रकृत्या तामसा भवन्ति स्तोकेन लोहितायन्ते । न तेषां वचनपाटी, न व्यवहारकौशलम् । तेषां जडतामन्ये हसन्ति...

अहम्—(आहत इव) ननु के तेऽन्ये ? वयं स्वयमेव ताँस्तथाऽवजानीमः । कृत्स्नस्यैतस्य पतनस्य वयं स्वयमेव कारणं स्मः

सः—(अक्षिविस्फारम्) कथं कथम् ?

अहम्—कुतः कथम् ? (सोपालम्भमिव) कस्मान्नाधीते भवान् संस्कृतभाषाम् ? कस्मात्स्वसन्ततिं तामध्यापयति ?

सः—(सासूयम्) अथ भोजनं क्षेत्रेषु कुर्वीमहि ?

अहम्—कथं क्षेत्रेषु ?

सः—अथ पुनः कुतः ?

अहम्—पौरुषात्, परिश्रमात्, न खलु दास्यात् । (तीव्रम्) 'सुखं जीविकामाप्नुम' इतीतरभाषा अधीमहि । धिङ्मान्द्यमस्माकम् ।

सः—(शिक्षयन्निव) यौवनोत्तरङ्गमेवं ब्रवीषि भोः । भूतार्थं न वेत्सि । यस्य स्कन्धे धूः पतति, स एव वेत्ति कथमुह्यत इति । सौम्य ! 'कथं निर्वहेम' इत्येव नः प्रधानं प्रश्नः, अस्य पूर्तिरेव च प्रथमः कल्पः ।

अहम्—सर्वमेतद्रुतम् । परं कुक्कुरजीवं कस्माज्जीवेम । केवलमुदरभरणार्थमेवात्मानमधो नयेम । धर्मकर्मभ्यस्तिलाञ्जलिं दिशेम । भवानेव कथयतु यद्यहं मिथ्या वदामि । कोनु अस्मासु अद्यत्वे स्वकं धर्मं तत्त्वतो विजानाति ? सम्प्रति यथापूर्वमात्मगौरवेण वयं स्वानि वक्षांस्याध्मातुं योग्याः किमु ? तथोन्नतकन्धरं प्रेक्षितुं क्षमामहे वा ? धिगस्मान् ! नामतो वयं हिन्दवः शिखातिलकयज्ञोपवीतादीनि लाञ्छनानि गणयामः । गीतागायत्रीजपादिकं मुधा समयनाशं मन्महे । दूरमास्तां तीर्थस्नानं देवपूजनं वा ।

सः—तत्किं सकलाया अस्या अवनतेः संस्कृतभाषाऽनध्ययनमेव निदानं मन्यसे त्वम् ?

अहम्—अथकिम् । (मूर्च्छन्निव) यावत्पुत्रो गर्भादपि नोदेति तावदेवास्य पितरौ निश्चिनुतः यत्तं तथाभूतं (दासं) विधास्यामहे येनासौ स्वल्पेनैव वयसा पुष्कलं धनमाहरिष्यति इति । जातमात्रं तं शुकपाठं पाठयतः "हाउ विल् हि कट् इट् विदाउट् एभर् ए नाइफ् । हाउ विल् हि मैरि, विदाउट् एभर् ए वाइफ् इति ।" पित्रोः परा कामना भवति यन्नौ वत्सः क्षिप्रमाङ्गलभाषामधीयीत । यथाऽल्पेनैव तेजस्वी दासो भवेत् इति ।

सः—आङ्गलभाषायै भृशमीर्ष्यँल्लक्ष्यसे ।

अहम्—नाहमीर्ष्यामि । परिदेवे खलु । (स्वगतम्) अरण्ये रोदिमि नु (प्रकाशम्) अहन्तु स्वयं तां पठामि । अन्येऽपि पठेयुरित्यपि वाञ्छामि । किन्तु यथाकालम् । तद्यथा, आपञ्चविंशवर्षं बाला विद्यामेव पाठ्येरन् । तत्र प्रथमं संस्कृतभाषैव पाठ्येत । स्वधर्मश्च शिक्ष्येत । ततः कामं तास्ता भाषा अपि तेऽधीयीरन् । तथा सति ध्रुवन्ते धर्मनिष्ठाः सन्तः स्वकं गौरवं सुरक्षन्तो जीविकामपि सुखमाप्नुयुः ।

अथवा क्षुद्रतेयं तुच्छतेयं यद्ध धनलाभमुद्दिश्य कश्चिद्विद्यां पठेत् । "कुल्यां खनामः केदारान् सिञ्चेमेति नतु स्वयं स्नायाम तदम्बु पिबेम वा । अथ यद्वयं जातु तत्र स्नामः पिबामो वा तत्कुल्याया आनुषङ्गिकं फलं, न प्रधानम् ।" एवमेवाज्ञानमलक्षालनमेव विद्याया मुख्यं प्रयोजनम् । तदाश्रयेण धनप्राप्तिस्तु तस्या आनुषङ्गिकं फलम् । यदि वयं मुख्यं प्रयोजनं लक्ष्यीकृत्य विद्यामधीमहि तदेय-

मुक्तिः—'जीविकां सुखमाप्नुम इत्याङ्गलभाषामधीमहे'—नितान्तमपास्यते । संस्कृतभाषामधीत्य धनं न लभामहे' इत्ययं दोषश्चापि न स्पृशति । विद्या हि ज्ञानाय कल्पते । धनार्जनार्थमन्यतरानुपायानाश्रयेत । यदि कश्चिद्द ग्रहिलो धनार्जनार्थं केवलमाङ्गलभाषाऽध्ययनमेवसाधीयांसमुपायं मन्येत तर्हि यथाकालं तदाचरेत् । आकौमारं कर्त्तव्यमिति विद्यां पठेत् । ततो वित्तं विचिनुयात् संचिनुयाद्वा ।

सः—परमेतत् सम्प्रति न सुकरम् । विरला एव सन्ति लोके ये धननिरपेक्षं संस्कृतगिरमधीयीरन् । अयमुद्धारो भूरि बलिमपेक्षते .....

एवमालपतोरावयोस्तस्य गन्तव्यं पत्तनममृतसरो नाम प्रापत् । अथासौ हस्तस्पर्शं नमोविधिं विधाय अकाण्डवार्ताविच्छेददीनं मामौज्झत् । अधुनाऽहं स्वाँस्तरुणान् वयस्यान् पृच्छामि किं भो ? अपेक्षितं बलिं दातुं समर्थाः स्थो नवा ? भाविनीं स्वकां सन्ततिं समर्थां करिष्यथ न वा ? इति । ईश्वरस्तत्सम्पादयितुं नो बलं दद्याद्दद्यात् ॥ शम् ॥

—:०:—

ब्राह्मणाः पण्डिताः ।

ले०—रामोदारः (सांकृत्यायनः) काशिकः लङ्काप्रोषितः ।

धनैश्वर्य-बलविरहिता अपि ब्राह्मणा इतिहासोषःकालत एव भारत-तदन्वयदेशेषु जनमानसेऽसाधारणप्रतिष्ठास्थानं लेभिरे । मध्यकालेऽपि माहम्मदराहुग्रस्यमानायामार्यसंस्कृतौ ब्राह्मणा एवोपस्तम्भदातारोऽभवन् । उदीच्यामनुभूतमाहम्मददुःशासनतया

अधिगतनवप्रतिभा ब्राह्मणा एव विजयनगर-महाराष्ट्रसाम्राज्यस्थापकाः । ब्राह्मणप्रतिभास्रोतस्तदापि नासीच्छुष्कम् । अन्तरायोऽभूत्केवलं गतेर्मान्द्यम् । या गम्भीरप्रतिभाऽऽभीर-गुर्जर-शक-यवनविजेतॄणां विजयेऽमोघशक्तिरिवाभासत । यस्याः संमुखे "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय" इति नीतिं चरितार्थयन्तः कति नु शतसहस्रविजना आर्यसंस्कृतिगंगाम्भसि विलीनाः स्वजना न संवृत्ताः ? शकाद्यशताब्दीभवोऽवन्तिराजनहपानस्य जामाता ऋषभदत्तः (उसभदात्तो) शिलावक्षसि समुत्कीर्णयति—(पालीभाषायाम्)

" रजो खहरातस खतपस नहपानस जा [म] तरा [दि] न [क] प्रतेन उसभदातेन तिगोसतसहस [दे] ण नदिया बाणासाया सुवणतथकरेन ब्राह्मणान च सोलसगामदेन " ।......

यत्र हि ब्राह्मणेभ्यः षोडश-ग्रामगोशतसहस्रदानादि समुत्सृज्यायं शकवंशजो विश्वामित्रवदेव ब्रह्मबलस्य दुर्जयत्वमूरीकरोति ।

सत्स्वप्यनेकेषु प्रमादेषु पूर्वतनानां ब्राह्मणानां गुणभारः शिरसाऽऽवह्यत एवानागतार्य्यसन्ततिभिः । इत्थं अतीतं सर्वतोमुखेनातिधवलं, तथाप्यनागते किं स्थानं तैरादेयमिति मीमांस्यम् । ब्राह्मणशब्दो ह्यार्यसंस्कृतिज्ञानशेवधिभूतगीर्वाणवाङ्मयानन्योपासकभूसुरवृन्दपरः । इतरजनपदेष्विवात्रापि चिरन्तनसंस्कृतप्रवाहरक्षणमेव संस्कृतविद्वत्समुदायस्य प्रथमेतिकर्त्तव्यता । तुल्यकालिकपाश्चात्यपुरोहितव्रजेन तुलनायां, अत्र पण्डितसमुदाय उदाराशय एवातिष्ठत्तराम् । नात्र भूगोल-भूभ्रमण-मन्त्रद्रष्टारो 'गेलेलियो'वत् अविद्याहुताशशलभीभूताः । अद्यप्रभृत्येवास्माकं संस्कृतिरुन्मुक्तप्रवाहातिष्ठदिति नास्ति तिरोहितं मंत्र-ब्राह्मणोपनिषत्सूत्र-स्मृति-पुराणक्रमानुसारिणाम् । तथाप्यद्य चिरघनतिमिराच्छन्ननिशावसाने स्वच्छन्दतोपरागारुणकिरणशोभिनीं प्राचीं निरीक्ष्य कापि स्तब्धेव, उन्मनस्केव प्रतीयते पण्डितपरिषद्ध । न चैतदस्ति तस्याः पूर्वगौरवानुरूपम् । पुरा कदाचित् अभिषेककाले ब्राह्मणा आहुः—

आसां विशां त्वं राजा, सोमोऽस्माकं ब्राह्मणानां तु । कालान्तरे पण्डिताः बाण-बिल्हण-श्रीहर्ष-नागेशवत् प्रभुस्तवनपरा बभूवुः । पुरातनकालोपयुक्तापीयं प्रक्रियेदानीं दूरेऽपास्या । एकांशिनाधस्त्विकी प्रवृत्तिः पुनरप्याद्यं आत्मगौरवपरायणतामूलकं पन्थानं पुरः स्थापयति ।

उपनिषत्कालादेव प्राक्षु वाराणसी विख्यातकीर्तिः विद्यादिप्रगतिषु । एतावत्तस्याः तत्स्थानं अक्षुण्णम्, ऋते देशकालानुरूपप्रक्रियापरिवर्त्तेभ्यः । अनागतेऽशक्या साऽक्षुण्णता तथा स्थापयितुम् । कतिपयेष्वेव वर्षेषु राष्ट्रे भविष्णु महद्ध राजनैतिकं परिवर्तनम्, सर्वे हि धर्मा राजधर्मे निविष्टाः । अथ कथं औदासीन्यमत्र कार्यकरम् ? न जातु अक्षिनिमीलनेन कपोतो मार्जारखरनखरप्रहारसुरक्षितः स्यात् ? इदानीमपि पण्डिता एकांगिनीमेवालौकिकीं व्युत्पत्तिं समनुसरन्ति । नास्ति साऽसमीचीना, परं केषाम् ? अलुब्धानां अकामानां न्यस्तसर्वपरिग्रहाणाम् । इतरेषान्तु आत्मप्रणाशकल्पा । लोकोपयोगि ज्ञानमत्यावश्यकम् ।

गणतंत्रयुगः क्रिलायम् । आत्मावसादोऽत्यन्तमहापातकान्यतमः सदैव परावमानोपि । समस्तो-

पन्यासो व्यवहारे प्रदर्शनीयः । इहापि परिडतानामग्रेसरता नाभिलक्ष्यते, सन्ति केचनाधुनापि 'नृषु सन्त्यधमा अपीति' सम्मोहपरायणाः छुन्द (वोट) युगेऽस्मिन् कथमुत्सहेरन्नेवं चिन्तितुमपि? नातिदूरं सार्वजनीनश्छन्दाधिकारः । भारतप्रभूणां राष्ट्रे आस्त्रीभ्यो विसृष्टोऽयमधिकारः । स एव क्रमोऽत्रापि भविता, किमित्ययं मनोभावः परिडतानां कीर्त्यावहः ? अनेका रूढ़यो दैनंदिनं स्वयमेव शैथिल्यमापद्यमाना दृश्यन्ते । इहैव वाराणस्यां नलिकाजलव्यवहारं प्रति जुगुप्सा भूयसी शैशवेऽनेकैर्दृष्टा, अस्ति किमिदानीमपि तथा? कालो हि बलीयान् । शैले शिरोघट्टनमिव भवितव्यानां सार्वजनीनानां मार्गावरोधप्रयत्नः । हिमवत्प्राकारसमुद्रपरिखावेष्टितोऽप्ययं देशः, वहुशतवत्सरपूर्वमपि परानपवारयितुं न शशाक, किमिदानीं गगनविहरणपरायण-वहुसहस्रविमानजालेन रसातलं प्रापितेषु मेरुशिखरेषु, ससाट्टालिकामनोहरजङ्गमनगरकल्पैः महाप्रवहणैः अहर्निशं विदार्यमाणे सागरोदरे, अजस्रं योजनसहस्रवास्तव्यस्वपरजन–वचन–वदन-प्रतिबिम्ब-दानादाननिरतेषु अतन्तुतारयन्त्रेषु, उपहासास्पदं गलितव्युषिताप्रगतिशीलात्मवञ्चनमीदृशम् ? द्विपान्तरेषु प्रवर्त्तमाना लोकप्रवृत्तयो नात्र केनापि वारयितुं शक्याः? वहुशतावरोधवनविहारिणां माहम्मदनृपगजयूथपानां वंशे जातायापि अपगानधरणीभृते स्वधर्मबहिर्मुखं एकपत्निव्रतं क आदिशत्? माहम्मदधर्मातिप्रतिकूलमप्यवगुण्ठनोत्सारणं विधाय पत्या सह स्वच्छन्दविहारिणी अपगाननृपपत्नी केनाक्रियत? किमिदं बालिशत्वम्? अधुनापि केचन शिशुपरिणयप्रतिषेधव्यवस्थाविरोधिनः । नूनं लोकदृष्टौ भारतीयानां, वर्वरत्वप्रख्यापनायैव तेषामयं प्रयासः, इत्थमेव 'कैथरायिनस्यो'-सदृशच्छिद्रान्वेषिभ्यः परेभ्य आर्यापकीर्तिप्रसारणसामग्री प्रस्तूयते । इत्यज्ञानकञ्चुकाऽच्छन्नान्तरङ्गानामेव न गोचरीभूतम् । स्वातंत्र्यसुप्रभातेऽस्मिन् लोभेन मोहेन वा न किमपि तथा विधेयम्, येन चिरप्रशस्तं स्वकीर्तिललाटतटं शाश्वतकलङ्ककालिमाकलुषितं सम्पद्येत ।

श्रीशगीतिः ।

[रचयिता—कालीप्रसाद शास्त्री " श्रीकरः "]

परमेश ! भारतेऽस्मिन् परमा दया विधेया ।
भगवन् ! कदापि कोपादरुणा न दृक् प्रदेया ॥
श्रद्धा न तेऽस्ति देशे बद्धादरेऽधुनाऽस्मिन् ।
पदवी न भारतीयैरधिगम्यते सुगेया ॥
आर्ता रुदन्त्यसंख्या ज्वलनेन जाठरेण ।
अधुनापि रङ्कता किं देशस्य नानुमेया ?
आच्छादनैर्विहीना लज्जाकुला पतन्ती ।
गर्ते विलज्जतायाः कृष्णापि कृष्ण ! हेया ॥
यस्याः सुधासमुद्रैः पूर्णा वसुन्धराऽभूत् ।
सा धेनुरद्य हिंस्रैर्हा ! हन्यते ऽविगेया ॥
पुण्यस्थली विदग्धा वैमत्यवह्निनेया ।
"श्रीकर"! सुधीजलैः किं शमिता कदाप्यजेया ॥



अभिनन्दनम् ।

कल्याणी यस्य कीर्त्तिः किल कलितकला नाथसाम्याऽतिकाम्या ।
आस्यन्ती दिक्षु सर्वास्वनवरतमलं गीयते वन्दिवृन्दैः ॥
सोऽयं श्रीपालसिंहक्षितिपतितनयो नीतिसद्रीतिशाली ।
श्रीमान् राजेन्द्रसिंहो जगति विजयते यौवराज्याभिषिक्तः ॥ १ ॥

नेत्रेभनन्दविधुसंमितवैक्रमाब्दे माघेऽसिते शिवतिथौ शशिसूनुवारे ।
युक्तप्रदेशवरशासकवर्यमान्त्रस्थानं समाश्रयदयं जनतानुरोधात् ॥ २ ॥

अस्मिन्राजेन्द्रसिंहे सकलगुणगणारीणभूभृद्धुरीणे ।
श्रीयुक्ते मन्त्रिभावं भजति मतिमतामर्हतामर्हणीये ॥
युक्तप्रान्तीयदेशोन्नतिरतिमहती याऽभवत्सम्पदाढ्या ।
कस्तां लोकप्रशस्तामिह जगति जनो ध्वस्तदोषां न वेत्ति ॥ ३ ॥

कृषिशिल्प-विभागयोरयं, कृतवान्याद्दृशमुन्नतिम्पराम् ।
किमुताद्दृगभूत्कदापि सा भविता वा पुनरप्यहो न वा ॥ ४ ॥

अभूतपूर्वां खलु भूतपूर्वो युक्तप्रदेशाधिपतिः प्रयागे ।
स्वस्यां महासंसदि हृष्ट कण्ठं मुदाऽकरोदस्य गुणप्रशंसाम् ॥ ५ ॥

भारत-दशापरीक्षा-समिति-सदस्येषु भारतीयानाम् ।
असमावेशादेतद्देशावज्ञां सुविज्ञाय ॥ ६ ॥

अत्यनुचितमचिकीर्षुस्तत्सहयोगं महामानी ।
भारतभूमीलज्जा-रक्षामखदीक्षितोऽयमभूत् ॥ ७ ॥

वर्षे बाणगजाङ्कभूपरिमिते श्रीविक्रमार्कोद्भवे ।
कृष्णे मासि शुचौ षडाननतिथौ वारे शनौ सन्नुतः ।
कृत्याकृत्यविचारचारुचतुरप्रज्ञः प्रतिज्ञावन-
प्राज्ञो मन्त्रिपदं सहर्षमजहाद्राजेन्द्रसिंहोऽसकौ ॥ ८ ॥

हिन्दीभाषाऽङ्ग्लभाषाभ्यां देशसेवां करोति यः ।
स श्रीराजेन्द्रसिंहोऽयं चिरं जीवतु नन्दतु ॥ ९ ॥

म० म० श्रीदेवीप्रसादशुक्लः "कविचक्रवर्ती"

मुद्राराक्षस—परीक्षणम् ।

[ले०—" हरि-भाऊ " काशी विद्यापीठस्थः ।]

(अवशिष्टांशः)

अङ्कागत-कथा-विषयः ।

प्रथमाङ्के नन्दैकनिष्ठं सेवकं राक्षसं वशीकर्तुं तेन च चन्द्रगुप्तस्य साचिव्यपदं स्वीकारयितुं, चाणक्यः किं कर्तुमिच्छतीति बीजरूपेण प्रक्षिप्तम् । द्वितीयाङ्के चाणक्यप्रयुक्तप्रयत्नान् विफलीकर्तुं, चन्द्रगुप्ताच्च कुसुमपुरराज्यं ग्रहीतुं राक्षसः कथमयशस्वी भवतीति निदर्शितम् । पुनश्च स किं कर्तुमभिलषतीति कथितम् । तृतीयाङ्के चाणक्यचन्द्रगुप्तविरोधार्थं राक्षसकृतोपायाः कथं सफलीभवन्तीत्यस्य निदर्शनमस्ति । चतुर्थाङ्के चाणक्य-प्रयुक्तभागुरायणः कुसुमपुर-विषयक-राक्षसचार-संवादस्य विपरीतमर्थं कृत्वा पर्वतेश्वरपुत्रस्य मलयकेतोर्मनसि राक्षसविषये शङ्काबीजं प्रक्षिपति । पञ्चमाङ्के चाणक्यनीतिबीजस्य फलं राक्षसेन स्वानुकूलं हि कथं मोक्तव्यं, कथं च तस्य सर्वाश्चेष्टाः सुहृन्नाशाय, न पुना रिपुविनाशाय भवन्ति, कथं च तस्य नैराश्यं जायते, कथं मलयकेतू राक्षसं चन्द्रगुप्तस्य वशीभूतं मत्वा त्यजति, इति निदर्शितम् । अपि च—

चतुर्थाङ्के वर्णितमलयकेतुकालुष्यमत्र परिणमति । राक्षसस्य न कोऽपि साहाय्यकर्ता विद्यते । स कुसुमपुरस्थं मित्रगृहं गन्तुमिच्छति, इत्यस्य वर्णनमस्ति । षष्ठाङ्के राक्षसः कुसुमपुरोद्याने पुरुषमेकमात्मत्यागिनं पश्यति । तं चात्मत्यागकारणं पृच्छति । तदा तस्य सुहृच्चन्दनदासो वधस्थानं नीत इति ज्ञानं भवति । अत्रैवायमेतदपि जानाति यच्चन्दनदासो राक्षसस्य पत्नीपुत्रौ चाणक्याय न ददात्यतः स चाणक्यहतकेन हन्यते । तदनन्तरं स राक्षसो वधस्थानमागच्छति । अनेन प्रकारेण चाणक्यस्य प्रयत्नाः सफलिता भवन्ति । सप्तमाङ्के राक्षसस्य साचिव्यपदस्वीकरणं, मित्रस्य संरक्षणं चाणक्यराक्षसयोर्मेलनं निर्दर्शितमन्ते च भरतवाक्यमिदं दत्तम्—

"राक्षसेन समं मैत्री राज्ये चारोपिता वयम् ।
नन्दाश्चोन्मूलिताः सर्वे किं कर्तव्यमतः परम् ॥

नाटकस्यालोचना—

यथा पूर्वकवयः पौराणिकं विषयमधिकृत्य-काव्यरचनां नाटकरचनाञ्च कुर्वन्तिस्म तथाऽयं विशाखदत्तकविर्न कृतवान् । अनेन नाटकस्यास्य कृत ऐतिहासिको विषयो निर्णीतः ।

नाटकेऽस्मिन्नादित एव राजशास्त्रं ('पॉलिटिक्स' इत्याङ्ग्लभाषायाम्) कूटनीतिश्च ('डिप्लोमसी') दृश्येते । अत्र शृङ्गाररसस्य प्रेमालापस्य नामापि न श्रूयते । अतो वयं तत्र किमपि स्त्रीपात्रं न पश्यामः । केवलमन्तिमाङ्कप्रारम्भे चन्दनदासस्य आर्या सपुत्रा वधस्थानमागच्छति तत्रैव स्त्रीपात्रनिदर्शनमस्ति । परं तत्र प्रेमोच्छृङ्खलयति । किन्तु स्वार्थत्यागं निदर्शयति कर्तव्यं च ज्ञापयति । नाटकपद्धतिर्विषयानुरूपा । अत्र माधुर्यसौन्दर्यादीनां स्थानं कर्तव्यरत्या परिगृहीतं विद्यते । शृङ्गारैकरसाभिरुचेर्नाटकेऽस्मिंच्छृङ्गाराभावान्न रतिर्भवति । राजशास्त्रनिपुणस्य त्विदं नाटकं रतिसर्वस्वं विद्यते ।

इदानीं पर्यन्तं नाटकविषये लिखितम्, अधुना तु पात्रविषये लिख्यते। अत्र सन्ति त्रिंशद्द्वात्रिंशद्वा पात्राणि। किन्तु तेषां द्वे पात्रे प्रमुखे स्तः, एकं चाणक्यः द्वितीयं राक्षसः च। अयं चाणक्यो विद्वान्, बुद्धिमान्, आत्मविश्वासी, चतुरश्चासीत्। अस्य विषये तु लिखितमिदमस्ति—

"औशनस्यां दण्डनीत्यां ज्योतिःशास्त्रे च पारगः।
नीतिशास्त्रप्रणेता यश्चणकस्तस्य नन्दनः।
चाणक्य इति विख्यातः श्रोत्रियः सर्वधर्मविद्॥"

इति। अनेन प्रथमं स्वविधेयं विनिश्चितं यन्नन्दानामुन्मूलनं करणीयं, चन्द्रगुप्ताय राज्यं देयं, राक्षसद्वारा चन्द्रगुप्तस्यामात्यपदमलङ्कारणीयमिति। तत्कृते तेन कायेन मनसा बुद्ध्या च प्रयत्नो विहितः। पात्रमिदं कूटनीत्या परिपूर्णं विद्यते।

राक्षसस्य पात्रत्वं वीरपुरुषोचितगुणादिभिः समलङ्कृतं विद्यते। अयं राजनीतिपटुरासीदित्यस्मिन्न सन्देहस्थानम्। तथैव स मृदुहृदयोऽपि नाटके आदितोऽन्तपर्यन्तं तस्य दोष एक एवासीद्यदयं न ज्ञातवान्यत्तस्य विश्वासभूमयो जनाश्चाणक्यस्य गुप्तचरा आसन्निति। अनेनैव दोषेण तस्य राक्षसस्य सर्वमपि कर्म निष्फलमभूत्। अयं खलु स्वामिभक्तिपरायणो मित्रकार्यदक्षश्चासीत्। अस्य विषये समधिगतमिदम्—

"दण्डनीतिप्रवीणः स षाड्गुण्यप्रविभागवित्।
शुचिः शूरतमो लोकैर्मान्यो ब्राह्मणवंशजः॥ इति।"

चाणक्यचन्द्रगुप्तध्वंसततपरोऽयं राक्षसः स्वामिनः शत्रूनुन्मूलयितुं निश्चितवान्; किन्तु प्रतिपक्षिणः कौटिल्येन स्वदोषेण चायं यशो नाधिगतवान्। अनेन मित्ररक्षायै स्वप्रतिज्ञानानुरूपमपि साचिव्यपदं स्वीकृतम्। षष्ठाङ्कान्तर्गतेन राक्षसस्य स्वगतभाषणेन तस्य चरितं विस्पष्टं भवति।

चाणक्यराक्षसयोः कोऽप्युच्चनीचो नास्ति। द्वावपि राजशास्त्रे कूटनीत्यां च समानपदवीमधिरोहतः। नाटकस्य नायकोपनायकौ चन्द्रगुप्तमलयकेतू स्तः। चन्द्रगुप्तः प्रभावशाली राजपुत्र आस। स स्वभावेनोदार आसीत्। तस्य स्वसचिवे चाणक्ये अत्यन्तं विश्वास आसीत्। अयममन्यत यद्यत्किञ्चिच्चाणक्य आचरति तन्मम हितायैव। मलयकेतुरपि राजपुत्र आस। स त्वविचारी संशयी बाल इव तस्मिन् प्रभावस्याभाव आसीत्। अस्य विश्वासाविश्वासभूमयोऽनुचिता नरा बभूवुः।

अन्यान्यपि सन्ति बहूनि पात्राणि येष्वपि विद्यन्ते प्रशंसनीया गुणाः। चन्दनदासो मित्रप्रेम मूर्तयति, मित्रस्य कृते सोऽसूनपि त्यक्तुमुद्यतो बभूव। हृदयस्पर्शि चित्रमेतदन्तिमाङ्के दृश्यते। कविनाऽयं 'शिवि' शब्देन सम्बोधितः। स्वामिकार्यदक्षतादिगुणप्रतीकत्वेन भागुरायणोऽस्माकमग्र आगच्छति।

कविना षष्ठाङ्कस्य सप्तमाङ्कस्य च प्रारम्भे भावनाप्रधानविषयो वर्णितः। तत्र करुणरसस्य प्राधान्यं वर्तते सहृदयानां वाचकानां प्रेक्षकाणां च दृश्यमिदमतीवदुःखं हर्षं च जनयति।

यदा चाणक्यस्तस्य प्रयत्नान् श्रावयति तदा तस्मिन्नैतिकभावोऽतीवस्वल्प आसीदिति मतिर्भवति अन्यच्च धर्मचारिणो राक्षसस्य च पराभवं विलोक्य तद्विषये पाठकप्रेक्षकहृदयेऽनुकम्पा जायते। पाठकानां मनस्तु तत्सरलस्वभावमभिमन्तुमभिलषति। चाणक्यस्य कौटिल्यं दृष्ट्वा तद्विषये क्रोधो भवति। चाणक्यबुद्ध्यनुसारिणी चन्द्रगुप्तस्याभिलाषाऽऽश्चर्यं जनयति। मलयकेतोः परायत्तवृत्तित्वं दुःखीकरोति चेतः। मित्रकार्यस्य कृते आत्मत्यागं कर्तुमुद्यतश्चन्दनदासः सर्वैः पाठकप्रेक्षकैरभिमन्यते। एतादृक्छिरोधार्य-विभूति-चरणरजःस्पर्शोऽस्मान्पापादुद्धरेदिति शम्।

॥ समाप्तम् ॥

सम्पादकीयम्

श्रीकृष्णावतारः ।

"एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्"।

पूर्णावतारस्य कर्मयोगिनो वशीकृतमायस्य लीलागृहीतवपुष आनन्दकन्दस्य भगवतः श्रीकृष्णस्य विषये इदानीं जनसमाजे बहवो विरुद्धवादाः दरीदृश्यन्ते। तेषु प्रधानत्वेन रासलीलाकरणमेव महाकलङ्कास्पदं गीयते। तस्य समाधानन्तु एवमपि सम्भवति यत् गोप्यस्तु अन्तःकरणस्य वृत्तयः श्रीकृष्णो भगवांस्तु साक्षीचेतनस्तत्र सर्वासां वृत्तीनां निरोध एव गोपीनां तत्पार्श्वे धावनमित्यादिरूपकेणापि मनोरमेण। तथापि अत्र विषये ममैतावानेवाल्पीयान् वक्तव्यो विषयोऽस्ति यत् यस्मिन् सनातनधर्मे स भगवान् पूर्णावतारत्वेन गीयते तस्मिन्नेव धर्मे पूर्णस्य पुंसो वर्णनमेवमुपलभ्यते। तथाहि—

"बाले बालो विदुषि विबुधो गायके गायकेशः
शूरे शूरो निगमविदि चाम्नायलीलागृहं वै।
मूर्खे मूर्खो युवतिषु युवा वाग्मिषु प्रौढवाग्मी
धन्यः कश्चित् त्रिभुवनजयी योऽवधूतेऽवधूतः॥"

अतो यदि भगवता कृष्णेन सर्वमपि लोकातिगमेव कर्म कृतञ्चेत्तस्य तु पूर्णावतारस्य भूषणमेव न तु दूषणम्। अपरश्चावतारवादस्येदमेव रहस्यं यत् सत्त्वरजस्तमोमयेऽस्मिञ्जगति यदा यदा तमसो भवति सुतरां वृद्धिस्तया च वृद्ध्या पराजिते भवतः सत्त्व-रजसी तदैव भगवान् मायाकञ्चुकं परिधायावतरतीति। तथाहि गीतायाम्—

"यदा यदाहि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥"

इत्यतो विज्ञानसिद्धमिदं यत् तमसो वृद्धौ जायमानायां "पतनान्ताः समुच्छ्रया" इति नयेन तत् परिभवितुं सत्त्वोद्रेको भवति। तदैव सत्त्वाधिक्यमादाय भवति कस्यचनैवंभूतस्य भूतस्याविर्भावो। योहि तमोबहुलान्प्राणिनोऽभिहत्य सत्त्वबहुलाञ्जीवान् वर्धयतीति। तदानीञ्च शिशुपाल-कंस-जरासन्ध-रुक्म-दुर्योधन-दुःशासन-शकुनि-कर्ण प्रभृतयः प्रादुर्भूता आसन् तमोबहुला जीवा भगवतो लीलाभुवमुपद्रवन्तः सर्वानेव सत्त्वबहुलान् सत्वान् बाधमानाः प्राकृतिकीं सृष्टिमाघ्नन्तः श्रीभगवतो वैदिकनियमानुल्लङ्घन्ते स्म। तदा स एव पूर्णब्रह्मस्वरूपो भगवान् मायां वशीकृत्य सत्त्वं विवर्धयिषुस्तमश्चाभिभावयिषुरवततार कृष्णरूपेण वसुदेवसद्मनि। स च तावदेव कर्तव्यं विधाय स्वलीलाविग्रहं संवरयामास यावच्चापेक्षितमासीत्तदानीम्। अतः स बालकालत एवारभ्याद्भुतं कर्म कुर्व-

न्ते महाभारतयुद्धे सर्वतोऽवशिष्टान् तमोबहुलान् राज्ञः प्रतिभटमिषेण एकपद एव विध्वंसयामास । तदुपरि च मद्यपरायणान् स्वबान्धवानपि यादवान् परस्परं कलहयित्वा विनाश्य स्वलीलाविग्रहं संकोचितवानिति तदीयचरितसंक्षेपः ।

एवंभूताद्भुतलीलाव्यसनिनो भगवतः श्रीकृष्णस्य चरितमेव पुरुषधौरेयदुरधिगममस्ति नह्येतत्साधारणपुरुषत्वममस्ति कृत्यं । यद्बाल्य एवाद्भुतपराक्रमाणां पूतना-केशि-बक-शकट-धेनुक-चाणूर-मुष्टिकप्रभृतीनां नाशनम् , असंख्यातानां गोपीनां कामवासनातर्पणेन स्वात्मनिलयनम्, स्वेन चावरूद्धसौरतत्वेन मनसो निर्विकारत्वेन च कामपराजयकरणमिति । अत्र तु रहस्यं पौराणिकमिदमस्ति यत्कदाचन कामस्य भगवता सह युद्धं कर्तुमभिलाषः समजनि । कृष्णावतारे तवायमभिलाषःपूर्णो भवितेति भगवता प्रतिज्ञातमासीत्तस्यैव वचसः पालनमिषेण श्रुतिरूपाणां पूर्वकल्पे मुनिरूपाणाञ्च गोपीनां जन्मान्तर-सञ्चितवासनानां स्वात्मनि लयकरणेन तासां मोक्षसम्पादनमित्यादि बह्वद्भुतं कृत्यमेकपद एव स साधितवान् भगवानिति ।

तस्मिन् काले स पौगण्डावस्थायामेवासीत्तदनन्तरं गुरुकुलेऽध्येतुमगात् इति भगवति कामोद्रेकस्य तु कथैव नास्ति । लोकदृष्ट्यापि लोकविरोधि परस्त्रीहास्यभाषणाङ्गस्पर्शनादिकृत्येनापि आनन्दाब्धौ तस्मिन्न कोऽपि कामविकारसम्भावना कर्तव्या । यतोहि सच्चिदानन्दकन्दस्य तस्यानेन विषयानन्देन सम्बन्धाभावात् " तस्यैवानन्दस्य मात्रामुपजीवन्ती ति " श्रुतेः।

यद्यपि गोप्यस्तु जारबुद्ध्यैव भगवन्तमाश्रिताः परन्तु जितमन्मथो भगवान् तेनैवाऽध्वना ता उद्दिधीर्षुः तासां कृते तमेवाऽध्वानं रोचयामास । पूर्णस्य तस्य तु सर्व एवाध्वा प्रशस्तः । तस्य निरहङ्कारित्वात्—पुरुषाणां कृते तु तदनुकरणं निषिद्धमेव । तथाहि भा० १० स्कन्धे—

"नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ।
विनश्यत्याचरन्मौढ्याद् यथा रुद्रोऽब्धिजं विषम् ॥
कुशलाचरितेनैषामिह स्वार्थो न विद्यते ।
विपर्ययेण वाऽनर्थो निरहंकारिणां प्रभो ॥
किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसाम् ।
ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥
यत्पादपङ्कजपरागनिषेवतृप्ता-
योगप्रभावविधुताखिलसत्वबन्धाः ।
स्वैरं चरन्ति मुनयोऽपि न नह्यमाना-
स्तस्येच्छयात्तवपुषः कुत एव बन्धः ॥

इदानीन्तु रासलीलामर्मानभिज्ञा दाम्भिकाः शठा रासलीलामिषेण व्यभिचारं जनसमुदाये प्रवर्तयन्तो हेया एव । ते तु उभयतो भ्रष्टाः स्वयं पतन्तोऽन्यानपि पातयन्त्येव । एवञ्च "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते " इति नैव विगीताविगीतोभयविधशिष्टाचारविषयकं वाक्यम्; किन्तु अविगीतशिष्टाचारविषयकमेवेति सङ्कोचविधिनैव सन्तोष्टव्यम् । एतस्मृतिमूलभूतं श्रुतिवाक्यमपि अमुमेवार्थं विवृणोति । "यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि" इति । इदानीन्तनानां पुरुषाणां प्रवृत्तिस्तु दोषानुकरणे यादृगुन्मुखी दृश्यते न तादृग्गुणानुकरण इति । पश्यन्तु, पूर्व

परम्परया प्राप्तमपि शक्रमखमनावश्यकं ज्ञात्वा
तन्निरुद्ध्य तस्मिन् कालेऽत्यावश्यकं गोवर्द्धनमखं
प्रवर्तितवान् भगवान् । परन्तु अद्यतु समाजध्वं-
संकारिणीमपि कुप्रथां त्यक्तुं न वाञ्छन्ति जनाः ।
तेनैव भगवता स्वेनैव गीतायां श्रीमद्भगवद्गीताया
मुपवर्णितमपि "क्लैव्यं मास्मगमः पार्थ नैतत्त्वय्यु-
पपद्यते" इत्यादिना पुरुषकर्तव्यम् नानुतिष्ठन्ति ।
प्रत्युत तदीयविग्रहं शृङ्गार-प्रधानं विधाय सर्वमपि
समाजं शृङ्गारमयमाचरन्ति—इत्यहो भगवतः
श्रीकृष्णस्य चरितच्छद्मना दाम्भिकानां स्वदुष्ट-
वासनातर्पणम् ? (पुनरन्यत् कदाचनाग्रिमाङ्के)

*　　*　　*　　*

विज्ञप्ति-शब्दद्वयम् ।

अयि सहृदया विद्वांसोऽन्तेवासिनश्च वर्तमान-
प्रगतिपरिचिताः ! जानन्त्येव भवन्तो यदिदानीं
समाचारपत्रबहुलेऽस्मिञ्जगति स एव समाजः सैव
जातिरुन्नतिपथमधिरोहति यत्र चास्ति किञ्चित्स-
माचारपत्रम् यद्द्वारा तस्य समाजस्य तस्याश्च जातेः
सर्वेऽपि विमर्शिणो विद्वांसः स्वीय-हृदयभाव-
माविष्कृत्य सर्वेषामपि पुरस्तात् स्थापयन्ति समये
समये च स्वसमाज-जात्युन्नतिकरोपायप्रदर्शनेनानु-
गृह्णन्ति च परस्परम् । सर्वतोऽपि स्वसमाजजाति-
गतस्त्रीपुरुषाणां सङ्घं सम्पाद्य "सङ्घे शक्तिः कलौ
युगे" इति नियमं चरितार्थयन्तः यदेवाभिलषन्ति
तदेव स्वयं कुर्वन्ति अन्यैश्चापि कारयन्ति । निदर्श-
नमत्र मुष्टिमेया गौरण्डजातिरेव ।

अस्तु, इति विमृश्यैव काशीस्था देशकालज्ञाः
स्वार्थनिःस्पृहाः कतिपये स्वनामधन्याः संस्कृतवि-
द्वांस इमां भारतभारतीं समेधयितुं तत्सेवकान्
संस्कृतज्ञान् विदुषश्छात्रांश्च तदीयदीनावस्थातः
परिचितान् विधातुं सं० सा० समाज-मुखपत्ररूपेण
पत्रमिदं सुप्रभातम् व्ययाधिक्यतो बिभ्यतो मासिकं
सञ्चालयामासुः सत्यामपि साप्ताहिक-दैनिक-समा-
चारपत्र-प्रकाशनावश्यकतायामिति । एवमुत्साहै-
कधना यथाकथञ्चित् वर्षचतुष्टयं चालयन्तः
पत्रमिदं कियत्कष्टभाजस्तेऽभवन्निति गतवैशा-
खमासीय सुप्रभाताङ्केचतुर्थवार्षिकविवरणतोऽवगत-
मेव स्यात्पाठकप्रवराणां । तत्र यावत्सुप्रभातायेन
सुप्रभातपोषणमकुर्वतः संस्कृत-साहित्य-समा-
जस्य दशां विपन्नामपाकृत्य तं विवर्द्धयितुमी-
हमाना एव त आसन् तावदेव "दीपमुद्योत-
येद्यावन्निर्वाणस्तावदेव सः" इति न्यायानुकल्पं
'सुप्रभात-दुर्दैव-दुर्विपाकेन सं० सा० समाज-
सदस्य-संख्यान्यूनतया वा ज्येष्ठमासीयविशिष्टाङ्क-
प्रकाशन-विहारोत्कलसंस्कृतएसोशिएशनपरीक्षाफ-
लप्रकाशनादि-व्ययबाहुल्यकीलपातेन सञ्चूर्णितो-
ऽस्य समाजस्य सञ्चितोऽपि कोष इति विषण्णव-
दनो दीनमना अयं समाज उर्ध्वस्वासमुच्छ्वसन्
मासद्वयं मूर्च्छित इवासीत् । अत एवाऽषाढ-श्राव-
णमासयोः सुप्रभातप्रकाशनेऽपि विलम्बो जातः ।

अस्तु, पुनरपि स्वसञ्चालकानामदम्योत्साहबलात्
सुप्रभातपाठकानाञ्च हस्तावलम्बाऽशालतामाश्रित्य
कथमप्युत्थितः समाजोऽयम् स्वमन्त्रणासमितौ
किमपि परिवर्तनमादधन्ममोपरि सुप्रभात-सम्पा-
दनभारं मम प्रियसुहृदि पं० केदारनाथशर्म्मसारस्वते
प्रधानमन्त्रित्वभारञ्चासञ्जयत् ।

अहञ्चात्मानमसमर्थमप्याकलयन् केवलं विदुषां
लेखकानां लेखवलं, स्वमान्यमित्राणां मन्त्रणासमिति-

सदस्यानां तथा स्वसहकारिणः " साहित्यशास्त्रिणः " पण्डित श्रीसरयूप्रसाद पाण्डेय (द्विजेन्द्र) " काव्यतीर्थ-विशारदस्य " साहाय्यबलञ्च संस्कृत्य सारमिममङ्गीकृतवान् । गृहीतत्तद्वारोऽहमभ्यर्थये सुप्रभातपाठकान् यत्ते महोदयाः सदस्यसंख्यां सुप्रभातग्राहकच्छात्रसंख्याञ्च वर्द्धयन्तो यथासमयं सुस्पष्टाक्षरं संस्कृतोपकारिणं सुलेखं प्रेषयन्तः स्वामूल्यसम्मतिञ्च प्रददतोऽवश्यमनुग्रहीष्यन्तीति । इत आरभ्य सुप्रभातश्च तेषां सेवां कर्तुं प्रतिसौरमासान्तिमतिथिं यावदवश्यमुपस्थास्यति तदन्तिके, तैश्च द्वितीयसौरमासस्य सप्ताहं यावत् सुप्रभातप्राप्ति प्रतीक्ष्य स्वनगर-पत्रवाहकप्रश्नानन्तरं कार्य्यालये सूचना प्रहेलिमेति ।

* * * *

ब्राह्मण-महासम्मेलनम् ।

अयि संस्कृतज्ञा देशकालात्मविदो विद्वांसः ! अत्र वाराणस्यां भाविनोऽखिलभारतीय-ब्राह्मणमहासम्मेलनस्याऽभ्यर्थना-प्रश्नावली-नियमाश्चाविकला एव मया प्रकाशिताः सन्त्यन्यत्र, तेषां विषयाणामुपरि साधु विमर्शं विधाय भूयस्यां संख्यायामुपतिष्ठन्ताम् सम्मेलने विद्वांस इत्यस्माकमाकांक्षा, यद्यपि इत्थंभूतानां विषयाणां न केवलं ब्राह्मणैरेव सम्बन्धः किन्तु द्विजमात्रेणैव, तथापि तेषु ब्राह्मणानामभ्यर्हितत्वात् शास्त्रमूलतत्त्वज्ञत्वाच्च तैः कृतो निर्णयोऽपरेषां स्वीकार्य एव । सम्मेलनसाफल्यमीहमानैश्च सर्वप्रान्तीय-चातुर्वर्ण्य-व्यवस्थायामपि दृष्टिपातो विधेय एव । यथा—गुर्जर-प्रान्ते, दाक्षिणात्य-प्रदेशे, बङ्गभूमौ च केवलं ब्राह्मण-शूद्रावेवोपलभ्येते, विहार प्रान्ते तु बहुत्र ब्राह्मणक्षत्रियशूद्राणामेवोपलब्धिरिति । एवं सति व्रात्यादि-पातित्यावधि विचारावसरे—आपत्कालादि--विमर्शनेन पुनः संस्कारादि-नियम-विधानेनापि दृढीकर्तव्या चातुर्वर्ण्य-व्यवस्थितिः । यतो वै व्यवस्थित एव चातुर्वर्ण्य-व्यूहे सनातनधर्म-मर्यादा-रक्षणमभ्युन्नतिरपि भारतस्येति सततं विमर्शनीयम् ।

* * * *

धर्मे प्राचीनप्रणाल्याञ्च कुठाराघातः ।

मुद्रित-प्राये सुप्रभाते, एतच्छीर्षकम् मोदफलपुरस्थ—(मुजफ्फरपुर) ब्राह्मणसभाया मन्त्रिणः श्रीत्रिलोकीनाथझा-महाशयस्य मुद्रितमेकं विज्ञप्तिपत्रमधिगतम्मया । यस्याशयः संक्षेपतोऽयमेवास्ति यत् " काश्यां भाविनि ब्राह्मणमहासम्मेलने साइमनसप्तकस्य (साइमनकमीशनका) स्वागतं भविता अपरञ्च सम्मेलन-संचालकाः स्वार्थवशतो भूमिहारब्राह्मणानपि ब्राह्मणकोटौ प्रवेशयन्तीति । तत्र प्रथमविषये त्वहं सम्भावयामि यदियमसम्भवकल्पनैव विज्ञप्ति-प्रकाशक-महाशयस्य नैव सम्भाव्यते यद्गुयस्य साइमन-सप्तकस्य चाण्डालचर्मकार-सभात आरभ्य राष्ट्रिय-महासभां यावद् स्वागतविरोधः समजनि । तस्यैव सर्वेषामपि मूर्द्धस्थानीयेन ब्राह्मण-महासम्मेलनेन स्वागतमनुष्ठितं स्यादिति ? यदि च केनापि प्रकारेण सम्मेलनेनानेन विधायिष्यमाणमिदमनुचिततरं गर्हितं कर्म प्रकाशीभवेत्तदा वाराणसेया विद्वद्धौरेयाः सर्वतोऽप्यस्य सम्मेलनस्य वहिष्कृतिं विधास्य-

न्त्येव । वहिस्था अपि विज्ञा विद्वांसो नैव समुपस्थास्यन्ते सम्मेलनमिदमिति निश्चप्रचम् । हा ? हन्त ? क एवमिदानीमधन्यः स्याद्यो राष्ट्रिय-हित-विघातकं भारत-वसुन्धरा-मान-मर्दकं कर्म कर्तुं मनसापि संकल्पयेदिति । एवं सम्भावनयापि तु भवति "विलुप्तगर्वो गरिमा गरीयसाम्" "निराश्रया हन्त ? मनस्विता हता" । "विहन्यते ब्राह्मणनेतृभावः" इति । द्वितीयविषये तु वर्णाश्रम-व्यवस्था-परिपोषकाः पण्डिता ब्राह्मणत्वेन प्रख्यापयतो भूमिहार-ब्राह्मणान् कुत्रान्तर्भावयेयुः ?

यद्यपि इदानीं न्यायिब्राह्मण-जांगिरा-ब्राह्मण-विश्वकर्मब्राह्मण-प्रभृतयोऽपि प्रावृषेण्य-मण्डूकवदुत्तिष्ठन्त एव निरन्तरं येन वर्णव्यवस्थिताविदानीं विषमसमस्योपस्थिता । एवम्भूते विषये ब्राह्मण-पण्डितानां कोऽपि स्वार्थोऽस्तीतीयमसत्कल्पना तु व्यथयति । चेतः अयि भोः —

"आविर्भूत-ज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयोऽभूत् ।
सिद्धा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतां व्याहरन्ति ॥"

तेषामेव सन्तान कोटि-प्रविष्टा ब्राह्मणपण्डिताः स्वार्थेनाकार्यं करिष्यन्तीति दूरीकुर्वन्तु चेतो भ्रमम् ।

पश्यन्तु, यत्र सर्वेऽपि भारतीयाः पाश्चात्य-सभ्यतासमेधिन्या इङ्गलिश-भाषाया अध्ययनाध्यापने रता वैदेशिकाचारव्यवहारपरायणाः सोदरभरणमात्रकार्या न गणयन्ति भारतमानापमाने तत्रैव ब्राह्मण-पण्डिताः स्वार्थं विहाय भारतीय-सभ्यतासमेधिकायाः संस्कृतभाषाया अध्ययनाध्यापनादि स्वल्पतरायप्रदायकं कष्टतरजीवन-निर्वाहकमपि स्वसन्ततिष्वविच्छिन्नं चालयन्तीति किमविदितं भवताम् ?

पत्र-प्रेषणसमये ग्राहक-सङ्ख्या नूनं लेखनीया, अन्यथा पत्रमवलोकितमेव न स्यात् ।

प्रश्नः ।

ननु भगवता पाणिनिना प्रणीतायामष्टाध्याय्यां बहुत्र सूत्राणां पौर्वापर्यव्यतिक्रमो दृश्यते ? यथा-पतञ्जलिना "तस्यादित उदात्तमर्धह्रस्वम् १-२-३२" इत्यस्य भाष्ये "एकश्रुतिदूरात्सम्बुद्धौ १-२-३३" इत्यारभ्य "उदात्तस्वरितपरस्य सन्नतरः १-२-४०" इत्यन्तः सूत्रभागोऽष्टाध्यायीपरिसमाप्तौ पठनीयः इति । "शात् ८-४-४४" इति सूत्रान्तरमेव "अनुस्वारस्य ययि परसवर्णः" इत्यारभ्य "शश्छोऽटि" इत्यन्तं सूत्रभागं पठित्वा तदनु "यरोऽनुनासिकेऽनुनासिको वा ८-४-४५" इत्यादि सूत्रपाठः पठनीयः

इति भाष्ये तत्र तत्र ध्वनितम् । एवम् प्रथमाध्याये द्वितीय-तृतीय-पादयोरपि व्यत्यासः कर्त्तव्यः । तथा-हि प्रथमाध्याये द्वितीयपादस्थाने—

"भूवादयो धातवः । १-३-१ । इत्यादिसूत्रात्मकस्तृतीयपादः पठनीयः । तृतीयपादस्थाने च "गाङ्कुटादिभ्योऽञ्णिन्ङित् । १-२-१ । " इत्यादिसूत्रात्मको द्वितीयः पादः पठनीय इति । येन "भूवादयो धातवः" इत्यनेनभ्वादिगणे निर्दिष्टे "गाङ्कुटादिभ्योऽञ्णिन्ङित्" इत्यनेन निर्दिष्टः कुटादिगणो निराकाङ्क्षतया निरायासेन च सुविदितो भवेदिति अन्यथा—प्रथममेव कुटादिगणज्ञानं साकाङ्क्षं दुष्प्रत्ययमभवति । एवं परिवर्तने को दोष इति प्रकाशयन्तु सहृदया विद्वांसः ।

प्रष्टा—जयपुर-राजगुरु-कथाभट्टवंश्यः—

श्रीनन्दकिशोरशर्मा, साहित्याचार्यः,

(आदिविश्वेश्वरः, काशी)

अखिल-भारतवर्षीय-ब्राह्मण-महासम्मेलनम्

काश्याम्

(का० कृ० नवमीतो दिनत्रयम् ६-११-२८।८-११-२८)

अभ्यर्थनम् ।

महानुभावाः !

समालोच्येषु शुद्धि-विवाह-जातिपरिवृत्त्यादिषु, प्रश्नावली मुद्रापिता पण्डितप्रवराणां श्रीमतां सविध उपस्थाप्यते, यस्या उत्तराणि समालोचयितं तत्तद्दर्शीयानां विशिष्टानां पण्डितानामुपसमितिरेकाऽचिरेण संघटयिष्यते ।

उपसमितिश्चेयं सम्मेलनात्पूर्वं कार्तिककृष्णप्रतिपदमारभ्य २७-१०-२८ कार्तिककृष्णाष्टमीपर्यन्तं सर्वेषामुत्तराणां सप्रमाणं विचारविनिमयेन तत्त्वविनिर्णयबुद्ध्या विमर्शनेन प्रारप्स्यतइत्यपि कार्यनिर्वाहकसमित्याज्ञयोपक्षिप्यते आशास्यते च पण्डितप्रवराः सत्वऽश्वाश्विनकृष्णाष्टमीतः पूर्वम् (६-१०-२८) स्वीयानामुक्तप्रश्नावल्युत्तराणां सदयं प्रेषणेनानुग्रहीष्यन्तीति । अन्ते पुनरिदं सप्रश्रयं प्रार्थ्यते, यदुत्तरसंग्रहावसरे निबन्धकाराद्दृतमीमांसापद्धतिरेव यद्यवलम्ब्यते, तर्हि महाननुग्रहः स्यात् ।

प्रश्नावल्या अस्याः समालोचनं ये कुर्वन्ति ये च न, तेषां सर्वेषां महासम्मेलनावसरे विचारसभावसरे वा समुपस्थाय कार्येषु सहयोगं दित्सवः तत्तत्सभाद्वारा, तत्तद्विद्यालयद्वारा, तत्तत्संस्थानद्वारा, स्वयं वा स्वनामधामाद्यचिरेण प्रेषयन्त्विति सप्रश्रयमभ्यर्थ्यत इति ।

प्रश्नावली ।

१—स्त्रीणां पुंसां वा विवाहकालः कियदवधि कुत आरभ्य शास्त्रसम्मतः ?

२—तत्र वर्तमानपरिस्थित्यनुसारेण, शास्त्रानुसारेण च नियमनं कियदवधि योग्यम् ?

३—रजःप्रवृत्त्यनन्तरं विवाहस्य मुख्यत्वमुत गौणत्वमाहोस्वित् आपत्कल्पत्वम् ?

४—ऋतुदर्शने वृषलीत्वबोधकानां वचनानां तात्पर्यं किम् ?

५—ब्राह्मणादिजातिषु आवान्तरश्रेणीनां परस्परं विवाहसम्बन्धः शास्त्रसम्मतो न वा ?

६—धर्मज्ञाः केवा कीदृशं वा धर्मपरिवर्तनं कर्तुमर्हन्ति ? (किं सङ्कोचनाख्यम् उत प्रवर्तनाख्यं धर्मपरिवर्तनम्) ।

७—विधवाविवाहो दम्पत्योर्विवाहमोचश्च शास्त्रदृष्ट्या योग्यः, उत विरुद्ध आहोस्विन्नन्यः ?

८—अस्पृश्यानामस्पृश्यत्वं जातितो वा कर्मतो वा ?

९—म्लेच्छानामन्त्यजानां च स्पर्शविषये सभाप्रवेशविषये कूपोदकग्रहणविषये देवालयप्रवेशविषये चान्येभ्यः तारतम्यरक्षणं योग्यं न वा ? यदि योग्यं तदा कीदृशं तारतम्यं रक्षणीयम् ?

१०—भागवतधर्मदीक्षाजात्युत्कर्षप्रापिका वा न वा ?

११—यवनादिजातिः किं कर्मकृता, उत जन्मसिद्धा ?

१२—भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धको वा न वा ?

१३—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यं किमङ्गीकरणीयमुत न ?

१४—कियदवधि म्लेच्छसंसर्गेण प्रायश्चित्तीयता ?

१५—संवत्सरपर्यन्तं म्लेच्छसंसर्गिणां तदधिककालं यावत् म्लेच्छसंसर्गिणाश्च प्रायश्चित्तविषये व्यवहार्यताविषये च किमैकरूप्यमुत वैरूप्यम् ?

१६—व्रात्यसंस्कारः कियत्परम्परापर्यन्तं शास्त्रसिद्धः ?

१७—जातिसामान्यमैहिककर्मकृतमव्यवस्थितमुत जन्मकृतं व्यवस्थितं च ?

ब्राह्मण-महासम्मेलन-नियमाः—

(१) निबन्धपर्यन्तधर्मग्रन्थप्रामाण्याविरोधेनैव विचारो भवितुमर्हति ।

(२) मीमांसापद्धतिरेव विचारावसरेऽवलम्बनीया ।

(३) सनातनधर्मावलम्बिनो ब्राह्मणपण्डिता एव प्रतिनिधयो विचारकाश्च भवितुमर्हन्ति ।

(४) चत्वारो वर्णा अपि दर्शकपदमर्हन्ति ।

(५) विना प्रवेशपत्रं केषामपि सभायां न प्रवेशः ।

(६) यैः खलु यस्मिन्विषये विचारः करिष्यते, तद्विषये स्वीयमतप्रकाशको निबन्धः सम्मेलनदिनस्यैकमासतः पूर्वं सम्पादकसविधे यथासंभवं प्रेषणीयः ।

(७) इतो मासद्वयाभ्यन्तरे प्रतिनिधीनां नामानि संख्या च तत्तद्देशीयसनातनधर्मसंस्थाभिः प्रेषणीयानि, येषां नाम्ना प्रवेशपत्रं यथावसरं प्रेष्येत ।

अधिक श्रावण शुद्धतृतीयायाम् शनिवासरे । (१८-८-२८)

विधेयतमः—
श्रीपञ्चाननतर्करत्नभट्टाचार्यः ।

संस्कृत-समाचाराः

विचित्रोऽभियोगः ।

अमेरिकादेशे कस्याश्चनमहिलायाः प्रथमाद्द्वितीयाच्च पत्युरष्टादश प्रजाः समुत्पन्नाः, तासु च त्रयोदश जीवन्ति साम्प्रतम् । तया तु किमपि प्रार्थनापत्रं न्यायाधिकरणके समुपस्थापितं, यत्र अशक्यत्वादितःपरं प्रसूतिकष्टाऽक्षमाहम्, अतो वै यथा मे स्वामी इतःपरं मयासह संयोगन्न विदध्यात् तथा चाज्ञाप्रदेयेति सा प्रार्थयति न्यायाधिपतिम् । पतिस्तु तस्या अहं पञ्चाशत्प्रजानां पिता भवितुं वाञ्छामीति न्यायाधिकरणकेऽवोचत् । वैद्या अपि नेयमितःपरं प्रसवकष्टसहनक्षमा, तथात्वे तु म्रियेतेयमिति वदन्ति न्यायालये च पत्युस्स्वेच्छया पत्न्यां सन्तानोत्पादनस्याधिकारोऽस्ति न वा, पत्न्यामशक्तायां तस्यास्संरक्षणस्य कोऽप्युपायश्शासनेष्वस्ति न वा ? इत्ययं प्रश्नः समुपस्थितो विद्यते, इति विचित्रोऽयं नूतनोऽभियोगो लक्ष्यते ।

* * * *

विद्वत्सु हर्षविज्ञप्तिः ?

श्रीमन्तः पूज्यपादारविन्दाः प्रातस्स्मरणीयनामानो महामहोपाध्यायाः पण्डितप्रवराः श्रीशिवदत्तशास्त्रिदाधीमथमहोदयाः कीदृक् संस्कृत-साहित्यस्योपकारं कृतवन्त इति न तिरोहितं संस्कृत-साहित्यविदुषाम् । ते च साम्प्रतं "काशीमेवाधितिष्ठन्तीति जानन्तु "सुप्रभात" पाठका इति सूचयति—

श्रीगोपालदत्त त्रिपाठी
दर्शन-विद्यालयच्छात्रः (काशी)।

श्रीसनातनधर्म-सभा ।

श्रीमतो मोहान्त-जगन्नाथदास-वैष्णव-महोदयस्य समुद्योगेन छपरामण्डलान्तर्गतपिपराख्यमठे सनातनधर्म-सभा महता समारोहेण भाद्रकृष्णप्रतिपदि द्वितीयायाञ्च तिथ्योः सुसम्पन्नाभूत् । काशीस्थेषु श्रीमान् पण्डित श्रीगोल-शास्त्री दर्शन-केसरी श्रीमान् पण्डितनन्दकिशोरशर्मा महोपदेशक पं० अवधेशप्रसादशर्म्मा महोपदेशकश्चेमे समुपस्थिता आसन् । प्रथमदिने तत्र सनातनधर्म-महत्व-वर्णव्यवस्था-मूर्तिपूजा-पातिव्रत्यादि-विषयकं व्याख्यानमभूत् । गुरयाकोठी-हाईस्कूलप्रधानपण्डितस्य, श्रीमतः पण्डितराजाराम त्रिपाठिमहोदयस्य, हिन्दुमहासभाया महोपदेशकस्य श्रीलक्ष्मीनारायणमिश्रमहोदयस्य, पं० महेन्द्रपाण्डेयस्य कवीन्द्रस्य च भाषणं संजातम् । जनसहस्रद्वयस्योपस्थितिरासीदेवं सनातन-धर्मस्य जागर्तिजनकमिदम् । अन्ते च सधन्यवादं सभाविसर्जनमभूत्

निवेदकः—
अयोध्याप्रसाद त्रिपाठी
जगन्नाथ सं० पो०-लक्ष्मीगञ्ज, सारन।

सचित्रम् सामुद्रिक-रहस्यम् ।

ले०—श्रीकालिकाप्रसादशर्मा, राजज्योतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथा नवीनमेव । एतेन हस्तरेखाणां गुरुं विनैव सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि कोक्कोक विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनी-प्रभृतीनां स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि, तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वस्वनिधौ नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्यः ।

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दी भाषायां निबन्धलेखन-अनुवादादिज्ञाने महत्सौकर्यं स्यात् । मूल्यम्—आणकषट्कम् । मार्गव्ययः—=)

सूर्यचरितम् वा ऋतुचरितम् ।

ले०—तारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः ।

गोलविद्या-विषयकं नूतनं महाकाव्यम् ।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः । गोलविषये नूतनं संस्कृत महाकाव्यम् । सर्वथा द्रष्टव्यम् । मूल्यम्—१ मार्गव्ययः पृथक् ।

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-तीर्थः

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया वालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृतकाव्येषु नाटकेषु पुराण-पुस्तकेषु च समागतानां देशानां नदीनां स्थानानां पर्वतानाञ्चाधुनिकी स्थितिस्तेषां नामानि च सन्ति । सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् ॥) आणका

महाकवि बाणभट्टः ।

लेः—भू०पू० सुप्रभात-सम्पादकः श्रीकेदारनाथ शर्मा

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र बाणभट्टस्य जीवनविषये महत्वपूर्णा, मननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारको निबन्ध-बन्धः । मूल्यम् =) मार्गव्ययः -)

सर्वेषां प्राप्तिस्थानम्—

मैनेजर, सुप्रभात कार्यालयः, बनारस-सिटी

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौराश्विने: १९८५ वैक्रमाब्दे ।

पञ्चमवर्षे Vol. 5

October 1928.

षष्ठोऽङ्कः No. 6

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिमुदस्यद् भेदतारा विलुम्पन्-नयदधिसुरभाषाभावि जागर्तिमुच्चैः ।
विबुध-विहग-वादैरान्वयद् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती, साहित्य-वारिधिः

सम्पादकः—

र्शनकेसरी श्रीगोपालशास्त्री त्रिपाठी "साहित्याचार्य्यः"

व्यवस्थापकः—

श्रीगिरीशशुक्लः, "न्यायाचार्यः"

वार्षिकम्मूल्यम्—३)
माननीयेभ्यः—१२)

छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

अस्याङ्कस्य मूल्यम् ।)

लेख-सूची ।

पण्डितान्प्रति प्रश्नः ।

अद्यत्वे संस्कृतज्ञा विद्वांसोऽपि सनातन-धर्माभ्युन्नत्यै बद्धपरिकरा दृश्यन्ते, तत्र किं स्वरूपं सनातनधर्मस्येति प्रथमत ऐकमत्येन प्रकाशयन्तु ।

यथा—खिष्ट-मोहमद-धर्मयोरन्यधर्मावलम्बिनां भवति प्रवेशः । सनातनधर्मे सम्भवति न वा सम्भवति चेत्तेषां कुत्र वर्णे प्रवेशः ? नो चेत् छन्द-(वोट) युगेऽस्मिन् सर्वथा वर्द्धमानायामन्यधर्मणां संख्यायां कथमस्माभिः स्वात्मानं गोप्तुम्पार्यते ?

चित्रकूट पाण्डेयः प्र० अ० सारण्य सं० विद्यालयस्य

उपदेशकानां कृते सूचना ।

वीकानेरस्थ-ब्रह्मचर्याश्रमस्य यज्ञाऽनुष्ठानमहोत्सव-सम्मेलनसमये कपिलक्षेत्रे कार्तिकशुक्लदशमीमारभ्य भविता । श्रीसनातनधर्म-सौभाग्यभाजो महानुभावा उपदेशकास्तत्र सम्प्रार्थ्यन्ते । [illegible] महानुभावाः कृपया मार्गव्ययं गृहीत्वाऽत्र समेत्य महोत्सवं सफलयन्तु सनातन-धर्मस्य आश्रमस्य च गौरवं समुल्लासयन्तु । तथा निजागमनस्य शुभसूचनां दत्वा शीघ्रमनुगृह्णन्त्विति सूचयति-

—चन्द्रशेखर मिश्रः

मन्त्री-ब्रह्मचर्याश्रम, वीकानेर ।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रं संस्कृत-मासिक-पत्रम् ।

पञ्चम-वर्षे | सौर—आश्विने । १९८५ वैक्रमाब्दीये | षष्ठोऽङ्कः ।

भव्याभिलाषः ।

[रचयिता—प्यारेलालशर्मा, प्रधानाध्यापकः]
(ज्ञानिशाला, वृन्दावनम् ।)

पीताम्बरो नूतननीरदाभः ।
पर्यङ्कशेषाऽहिविलक्षणाभः ॥
पद्माढ्य-गङ्गा-यमुना-जलाभः ।
पुष्णातु पुण्यं भुवि पद्मनाभः ॥ १ ॥
सौवर्ण-वर्णाम्बर-सुप्रभातम् ।
सारस्वताशा-सुमनःप्रभातम् ॥
प्रोद्यत्सुधी-सूर-कर-प्रभातम् ।
भव्याय भूयाद्भुवि "सुप्रभातम्" ॥ २ ॥

नाम-धाम-गुप्तिः ।

[रचयिता—उत्तरमध्यगाक्षरगुप्तः]

किं नाम स्यान्मुरारेः, सरसिजजनुषो वाहनस्याभिधानं
को वा सूनुर्मघोनो, जनिसमयदशां वीक्ष्य को वक्त्युदर्कम्
ईहन्ते मानुषाः किं हिमगिरि-दुहितुर्वल्लभः को मतः स्यात्
को वा देवर्षिरिष्टः, किमु सदृशपदं भाववाच्यस्य नूनम् ।
धीयन्ते कानि युद्धे, ननु रजतसुवर्णादिधातोः खनिः का
किं शास्त्रं भार्गवस्य, श्रुतिमधुर-रणत्पादभूषा किमु स्यात्
किं स्यान्निर्मन्थ्यदारु क्रतुविधिविहितं पाठका उत्तराणि ।
मध्यैर्वर्णैर्ब्रुवीरन् रचयितुरभिधास्थानयोर्वाचकानि ॥ २ ॥

स्वागतम् *

लेखकः—पं० श्यामदत्तः पन्तः (साहित्य-शास्त्री)

योगाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियम् ।
ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु ते ॥
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरम् ।
कालिन्दी-पुलिनेषु यत्किमपि तन्नीलं महो धावति ॥

अयि परमकरुणानिधे ! दीनवत्सल!! कृष्ण !!!

पुनरपि समागतस्त्वदीयो जन्मदिवसः । तत्त्वरितमनुगृहाणास्मान्, देहि दर्शनम् । चिरंसंचित-पापध्वंसविधौ पटीयसे दर्शनायोत्कण्ठिताः इमो वयम्, विमलीकुरु कलुषित-हृदयाना मज्ञानान्धकारतच्चेतसाञ्चेतांसि, दर्शय सन्मार्गम्, स्थापय स्वचिह्नानि, अवलोकय देशव्यवस्थाम्, अपनय दुःखान्यत्रत्यानि, कीदृशी दशा विद्यते पुण्यभूमेर्भारतस्येदानीम् ? कियानत्याचारो भवति विमलेऽस्मिन्नार्यावर्त्ते ? यत्र पुरा व्यास-वाल्मीक्यादयो महर्षयोऽभूवन् तत्राधुना दुष्टचेतसामकारुणिकानां पाश्चात्यानां यवनानाञ्च 'निवासो विलोक्यते, अतः कुतोऽस्माकं सुखम्, अयमेवावसरो भवदीयशुभागमनस्य । यतस्त्वमेवालम्बनमस्माकम्, त्वमेवानुभविता परमदीनानां विषमार्त्तेः, कियत्कालपर्यन्तं दुराचारिणामकारुणिकानां मध्ये स्थातव्यमस्माभिः ? न स्मर्यते ? यत्पूर्वमिहागत्य सर्वाण्यपि दुःखानि दूरीकृतवान् भवान् ? किं प्रतिज्ञातं भवता कौरव-पाण्डवानां युद्धे ? तत्कथं चिरयसि ? अस्मद्भागधेयस्य वैपरीत्येन स्वतः प्रतिज्ञातं वाक्यमपि यद्विस्मृतं त्वया तन्महच्चित्रम् ! यतोऽवलोक्यापीमां भारतस्य महतीं विपत्तिं क्षणमपि न करोषि दृष्टिपातम् । वयं सर्वदा त्वामवलोकयितुं त्वदीये जन्मदिवसेऽहोरात्रं परमकारुणिकं मन्यमाना भजामो भवन्तम् । भवति गृहे गृहे महोत्सवः, दृश्यन्ते सञ्जात–कौतुका जनाः, किन्तु भवदीय-कृपाकटाक्षा नावलोक्यन्ते । कथं भवदाश्रितानामप्यस्मदादीनां भवति विपत्तिकलाप-जन्यमरण्यं रोदनम् ? किमर्थं वोक्तं श्रीमता भगवद्गीतायाम्—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत!
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।"

इति ? युक्त एव प्रतिभाति किं यवनानां दुराचारो भवन्तम् ? उचित एवास्ति किं सदैव त्वामेव भजन्तीनामप्यसहायानामबलानां चीत्कारः ? किं वा विचार्य विलम्ब्यते भवता ? किमर्थमुक्तं पुराणेतिहासादिषु यदा भारते वर्षे दुराचारिणो भवेयुस्तदा तेषां नाशाय जगन्नियन्ता पुराणपुरुषोत्तमो भूलोकेऽवतरिष्यतीति महर्षिभिः ? किं सर्वेऽपि तेऽस्मान्वञ्चयितुं निर्मिताः सन्ति ? नो चेद्देहि स्वकीयं मनोहरं जनसन्तापनाशकं दर्शनम् ? शीघ्रमेवानुकम्पयास्मान् ? वयं तु कलुषित-हृदयानां विषमव्यवहारतो बहिर्गन्तुमपि न शक्नुमः । किम्बहुना, त्वमेव सर्वेषां दीनाऽदीनानां रक्षको नाशकश्चासि । अतस्त्वमेव शरणमस्माकम् ।

* लेखोऽयं भाद्रे स्थानाभावादत्र प्रकाशित इति
—सम्पादकः ।

हे कारुणिक ! एहि, आगत्य च विस्तारय स्वकीय-कृपाजाल-चमत्करणानि, अकारुणिकेभ्यो वैदेशिकेभ्यो मोचयाऽस्मान् द्रुतम् ? तथ्यं कुरु स्वकीयं दुर्वृत्तसन्तापकं वाक्यम् । तथाहि—

"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म-संस्थापनार्थाय संभवामि युगे युगे ॥"

अतोऽद्य त्वदीयं स्वागतं कुर्मः । आशासे, प्रार्थनामिमां स्वीकृत्य भवद्दर्शनोत्सुकानामहर्निशं भवन्तमेव भजमानानां भक्तानामाशा-पल्लवं स्वकीयागमनेनाभिवृष्य स्वनामाङ्कितमेव "श्रीकृष्ण-जन्माष्टमी-व्रतं" सफलयिष्यसीति शम् ।

(समस्या-पूर्तिः)

"धाताऽपि भग्नोद्यमः" *

(१)

यो नित्यं परस्त्रभ्रवीक्षणपरो हालाहलं यन्मुखे ।
वक्रा यस्य गतिर्जलाशयचरोऽजस्रं द्विजिह्वोऽपि यः ।
नित्यं पाययितुः पयोऽपि दशति प्राणानहो दुष्टधी-
र्मन्ये दुर्जन-चित्तवृत्तिहरणे "धाताऽपि भग्नोद्यमः ॥"

—किशोरीदास वाजपेयी ।

(२)

संसारे नरदुर्लभः परहितः सेवा तु तस्मादपि ।
यस्मात्साऽस्तिसुयोगिनामपिमताऽगम्यस्वरूपाध्रुवम् ।
धीरा हा ! इहलोकसेवनपरे मार्गे तथापि स्थिताः ।
साधूंस्तन्नियमाध्वनश्चलयितुं "धातापि भग्नोद्यमः ॥"

—इन्द्र विद्यार्थी "न्यायतीर्थः"

(३)

मारीचेन विभीषणेन महता श्रीकुम्भकर्णेन वा ।
धीरेणापि हनूमताऽथ बहुधा सम्बोधितो रावणः ।
श्रीमद्रामविरोधमेव कृतवान् तस्मादहं निश्चितम् ।
मन्ये दुर्जनचित्तवृत्तिहरणे "धाताऽपि भग्नोद्यमः ।"

(४)

श्रीकृष्णद्रुपदादिभिः सविनयं सम्बोध्यमानो भृशम् ।
दुर्नीतिप्रचुरप्रयोगनिपुणोऽतिक्रान्तसन्धोऽनृजुः ॥
द्रुह्यन् पाण्डुसुतेभ्य ईषदपि नो दुर्योधनोऽदाद्धनम् ।
मन्ये दुर्जनचित्तवृत्तिहरणे "धातापि भग्नोद्यमः ॥"

(५)

"श्रीगङ्गाधर"-"गोखले"-प्रभृतिभिःप्रेक्षाक्षमाशालिना
श्रीमद्गान्धिमहात्मना च बहुधा स्वाराज्यमभ्यर्थितः ॥
प्रत्यूहं जनयन्नयंश्च समयं दत्ते न तच्छासको
मन्ये स्वार्थजडस्य मार्गनयने "धाताऽपि भग्नोद्यमः ॥"

—पण्डित रमाकान्तजी ।

किं तत्त्वज्ञानादस्माकमवनतिः ?

ले०—त्र्य० वि० मोहरीरः (काशीविद्यापीठस्थः)

भारतीयतत्त्वज्ञानादस्माकमवनतिरभूदिति केचिन्मन्यन्ते । ते तु प्रायो नवशिक्षादीक्षिताः सन्ति । ते ऐतिहासिकप्रामाण्येन निदर्शयन्ति यदस्माकमियं दुर्दशाऽकर्मण्यतया संजाता, सा चाकर्मण्यता तत्त्वज्ञानात्समुत्पन्नेति । यथा हि, अद्वैतसिद्धान्तेन, दयादाक्षिण्यादिगुणविपाकेन, परलोकादिविमर्षणेन च शत्रुभिर्हतेष्वपि दारेषु, हतेष्वपि बालेषु, अपहृतेष्वपि धनेषु न वयं तान् प्रत्यपकुर्मः ।

* बीकानेरस्थश्रीसेठिया विद्वत्समाजस्य पाक्षिकाधिवेशनसमये पठिताः । (प्रेषकः)

यद्यपि वयं पश्यामो यदियं पत्यक्त्रीरिव दस्युभिरुपभुज्यमाना, दुःशासनाकृष्यमाणपाञ्चालराजतनयेव विगलितावयवा, हठादुपभुक्तस्त्रीरिव चेखिद्यमाना, वैधव्यविक्लवा नववधूरिव शोकोपहतहृदया वसुन्धरा रोदितीव तथापि तस्याः कृते न किमपि वयमाचरामो यत इयमस्माकं भावना वरीवर्ति यत् स्वयं हि भगवानागत्यागत्य तदुद्धारं करिष्यतीति। इयमस्माकमकर्मण्यता तत्त्वज्ञानात्संजायते-ऽतस्तदेवास्माकमवनतेर्मूलकारणमिति ते वदन्ति।

वयमपि स्वीकुर्मो यदस्माकमवनतिरकर्मण्यतया अभूदिति यत एतत्पूर्वेतिहासात्प्रसिद्धम्। किन्तु, इयमकर्मण्यता तत्त्वज्ञानात् संजाता, इत्यस्माकं नाभिमतम्। वयन्तु मन्यामहे यदेतत्कथनमज्ञानमूलकमिति। न तेषां तत्त्वज्ञानस्य सम्यग्ज्ञानम्। ते न जानन्ति यदस्माकं तत्त्वज्ञानं हि कर्मपथ-विचलितान् जनान् सत्कर्मणि प्रवर्तयतीति। यदा खलु जना मायामोहवशा भवन्ति तदा ते कर्म-पथाद्विचरन्ति। यदाऽर्जुनो युद्धभूम्यां योद्धुकामान् स्वबान्धवान् दृष्टवांस्तदैते मरिष्यन्तीति भीत्या मोहाविष्टोऽभूत् कर्मपथाच्च विचचाल, तदा श्रीकृष्णस्तस्याज्ञानमूलकं मोहमपनेतुं कर्मणि च तं प्रवर्तयितुं भगवद्गीतामुक्तवान्, इति जानन् गीतया अकर्मण्यता संजातेति कथं मन्येत। मोहाविष्टोऽर्जुनोऽन्ते स्वयमेव कथयति, यत्—

"नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत !
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव" इति।

अयं गीताया एव परिणामः। सा च गीतास्तत्त्वज्ञानविषयकानामुपनिषद्ग्रन्थानां सारसर्वस्वमिति। तथाहि—

"सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीताऽमृतं महत्"

इत्यस्माद्वचनात् सिद्धमेव।

सेयं भगवद्गीता विचलितकर्मपथानां जनानामज्ञानमूलकं मोहं ज्ञानयोगेनापनयन्ती, कर्मयोगेन च तान् निष्कामकर्मणि प्रवर्तयन्ती,—

'अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥'

इत्युपदिशति। तत्कथं वयं मन्यामहे यदुपनिषदुक्त-तत्त्व-ज्ञानादस्माकमकर्मण्यता संजातेति? अस्यास्तु भिन्नं हि कारणं स्यात्।

नवशिक्षा-दीक्षिता वदन्ति यत्तत्त्वज्ञानमेवास्याः कारणम्। यद्येतत् सत्यं तर्हि त्वेतत्तत्त्वज्ञानमुपर्युक्ताद् भिन्नतरं वा भवेदथवा उपर्युक्ततत्त्वज्ञानविषयकमज्ञानम् स्यात्। उपनिषत्तत्त्वज्ञानात् यदि भिन्नतरं तत् तर्हित्वस्मत्तत्त्वज्ञानादस्माकमवनतिरभूदिति वक्तुं न शक्यते, यत उपनिषत्तत्त्वज्ञानमेव केवलमस्माकं तत्त्वज्ञानं यतस्तदेकमेवाद्वितीयं ब्रह्म विवृणोति तद्द्वारा च निष्कामकर्मणि प्रवर्तयति। ईशावास्योपनिषद इमौ द्वौ श्लोकौ अस्यैवार्थस्य प्रमाणम्। तथा हि:—

"ॐ ईशावास्यमिदꣳ सर्वम्
यत्किंच जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः
मा गृधः कस्यस्विद्धनम्॥ १॥

जगदिदं सर्वव्यापिना तेन ब्रह्मणा व्याप्तमस्ति। अतः सर्वाण्यपि वस्तूनि समानानि सन्ति। एतेषां जगद्वस्तूनां सच्चिदानन्दस्वरूपं ब्रह्म न नश्यति किन्तु शब्दरूपमयी माया सदैव परिवर्ततेऽन्ते

नश्यति । अतस्त्यक्तेन भावेनार्थादसक्तबुद्ध्या तामुपभुञ्जीथाः । तत्र कस्यापि वस्तुनः परिग्रहणं मा कुरुष्व । अर्थात् "असक्तो ह्याचरन् कर्मेति" भगवद्गीतोक्तिः—

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

अस्मिञ्जगति कर्ममार्गेण विनाऽन्यो नास्ति मार्गः । यः खलु तानि कर्माण्युपर्युक्तरीत्या अर्थात् असक्तबुद्ध्या करोति, स तेन कर्मणा न लिप्यते । एवं स वर्षशतं जीवितुमिच्छेदिति भावः ।

ये खल्वर्थमिमं सम्यग् न जानन्ति, ते यदि वदेयुर्यदुपर्युक्ततत्त्वज्ञानमकर्मण्यतामुपदिशतीति, तन्नाश्चर्यम् ? किन्तु जानन्तोऽपि केचित् 'महाजनो येन गतः स पन्था,' इति बुद्ध्या महाजनस्यैकदेशीयमप्यर्थमन्धेन नीता अन्धा इवानुसरन्ति, इति खेदस्थानम् ? अनेन त्वस्मत्तत्त्वज्ञानस्य वैशिष्ट्यमपनीतं भवति । अस्मत्तत्त्वज्ञानन्तु इह कथं जीवेमेति दर्शयति । वयं पश्यामो यत् केचिज्जना ज्ञानेनाऽज्ञानेन वा कर्म न कुर्वन्ति यतस्ते मन्यन्ते यत्कर्मैव जन्मनो मूलं, जन्म च दुःखात्मकमतस्त्वद्धेयमिति । किन्तु न वयं मन्यामहे यज्जन्मनो मूलं कर्मेति । अस्माकं मत्या तु जन्मनो मूलमिच्छैव । तदैच्छत् बहुस्याम् प्रजायेय इति । बह्व्यः कथाः अस्मद्धर्मग्रन्थेषु पुराणेषु वा दृश्यन्ते, याः कथयन्ति यदस्य मरणसमये कामेच्छा जाताऽतोऽस्यागामिनि जन्मनि शुनो जन्माऽभूत्, अन्यस्य मृत्युकालेऽस्य रामनामस्मरणमभूत्, अतोऽयं परे जन्मनि भक्तो जात इति । सदिच्छा सज्जन्मनः प्रेरिका, असदिच्छाऽसज्जन्मनः । इच्छाऽभावस्तु जन्माऽभावस्य जन्म दुःखात्मकत्वाद्धेयम् । अत इच्छापि तन्मूलकत्वाद्धेयैव । अत्र तु केचिन्मन्यन्ते यदिच्छाभावात् कर्मप्रवृत्तिर्न सम्भवति । एतत् सत्यम् । किन्तु कर्मप्रवर्तिकेच्छा जन्मनो मूलं नहि । अत एव भगवान् वदति यत् 'असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः । 'कर्मभिर्न स बध्यते ।' 'मामेति सोऽर्जुन' इति । एतदस्माकं तत्त्वज्ञानम् । तत्तु निष्कामकर्मणि प्रवर्तयति । तत्कथमियमकर्मण्यता तस्माज्जाता इति ? एतत्तु सम्यग् ज्ञायते यदियमकर्मण्यता तत्त्वज्ञानविषयकादज्ञानात् सम्भूता इति । *   (पुष्पाञ्जलितः)

* अत्र काश्यां 'काशीविद्यापीठनाम्नि राष्ट्रियमहाविद्यालये पुष्पाञ्जलिनामतश्चैका संस्कृतपत्रिका हस्तलिखिता प्रतिमासं प्रकाशिता भवति । तत एवोद्धृतोऽयं लेखो लेखकेनैव ।   (सम्पादकः ।)

पत्र-प्रेषणसमये ग्राहक-सङ्ख्या नूनं लेखनीया, अन्यथा पत्रमवलोकितमेव न स्यात् ।

विजया-गीतिः ।

[रचयिता—" साहित्य-शास्त्री " श्रीसरयूप्रसाद पाण्डेयः (द्विजेन्द्रः) " काव्यतीर्थः "]

रघुनाथ ! हे दयालो !
द्रुतमेहि भारतेऽस्मिन् ॥ ध्रुवम् ॥

(१)

अयि भो प्रभो ! शरण्य !
सततं सुराग्रगण्य !
अवनीसुता-वरेण्य !
शुभ-राम-नाम-धारिन् !
द्रुतमेहि भारतेऽस्मिन् ॥ रघु० ॥

(२)

जगदीश ! जन्मदातः !
निज-भक्तजात-पातः !
अखिलेश ! हे विधातः !
जन-दुःख-दैन्य-दारिन् !
द्रुतमेहि भारतेऽस्मिन् ॥ रघु० ॥

(३)

जनताप तापहारिन् !
खल-खर्व-गर्वदारिन् !
भव-चाप-खण्डकारिन् !
छलभृत्-समाजकेऽस्मिन् !
द्रुतमेहि भारतेऽस्मिन् ॥ रघु० ॥

(४)

कलिकाल-चक्रधारिन् !
'सरयू'-तटे विहारिन् !
समयेऽवतारधारिन् !
समयं किमीक्षसेऽस्मिन् ?
द्रुतमेहि भारतेऽस्मिन् ॥ रघु० ॥

(५)

सुर-गो-'द्विजेन्द्र'-पाल !
भगवन् ! विशाल-भाल !
दशभाल-काल-काल !
विजयाभिधे दिनेऽस्मिन् ।
द्रुतमेहि भारतेऽस्मिन् ॥ रघु० ॥

गृहागमनम् ।

(ले०—बहादुरचन्द्र शास्त्री)

(अवशिष्टांशः)

नास्त्यस्मिन् संसारेऽन्यत्किमपि कष्टतरं वस्तु चतुर्दशवर्षवयस्कान्माणवकात् नचायमलङ्करिष्णुर्भवति नाप्युपयोगी । लघुतरबालकवत्तस्मिन् स्नेहनिषेकोऽसंभवः स पुनः सर्वदाऽन्तरायते । यदि स बालकवदस्फुटं भाषते तदा स शिशुः कथ्यते, अथ यदि प्रौढं वक्ति तदा धृष्टोऽभिधीयते, यत्सत्यं सर्वविधमपि तस्य भाषणं विजुगुप्स्यते, स हि तदा समुपचीयमानमकमनीयं वयः पद्यते । अति-दुर्विनीतया त्वरया स निजानि वस्त्राण्यतिक्रामति, स्वरस्तस्य कर्कशीभवति, विशीर्यति कम्पते च, वदनञ्च तस्य सहसा त्रिकोणं जायते विरूपञ्च भवति । आदौ बाल्यकाले तु सर्वाणि स्खलितानि सुक्षमा-

णि भवन्ति, चतुर्दशहायने माणवके पुनरपरिहार्या अपि त्रुटयः सुदुर्मर्षा भवन्ति । इदञ्चारुन्तुदं यदसौ दत्तमन्यः संवर्तते, ज्यायसा जनेन संलपन्नस्थानेऽग्रतःसरो भवति, तथा वाऽनुचितमपत्रपिष्णुः संजायते यथा स्वस्मादप्यस्तित्वात्स ह्रीणः संलक्ष्यते ।

तथापीदमस्मिन्नेवायुषि संद्रश्यते यत् तरुणः कुमारः कीर्तिं प्रीतिञ्चाभिलष्यतितमाम् यः कोऽपि तस्मै भावं विवृणोति तस्यासौ भक्तिमान् दासः सम्पद्यते । परं न कोऽपि तेन सह प्रकाशं प्रीतिं कर्तुमुत्सहते, तद्धि निन्दितं व्यसनं गणयेत, ततश्च माणवकाय तदवरं भवेत् । तेनैव यत्किञ्चित्तर्जनभर्त्सनेन स विहीनप्रभुणा वम्भ्रम्यमाणेन शुनाऽतिसद्रशो भवति ।

चतुर्दशाब्दस्य माणवकस्य स्वकीयं गृहमेव स्वर्गमस्ति । अपरिचिते सद्मन्यपरिचितैः पुरुषैः सह निवसनं तत्कृते परं पीडाकरमस्ति, अयं पुनः सौभाग्योपचयस्तस्य; यदि महिलानां कृपाद्रष्टि-लाभः स्यात्तिरस्कारविरहश्च भवेत् ।

फटिकस्य कृते तु स्वस्या मातुलान्या अशुभागमनप्राघुणिकीभवनं नितान्तं व्यथाकरमासीत् । स हि तया गरीयस्या योषिताऽनवरतं कुत्सितो विमानितश्चाभवत् । यदि सा कदाचित्तं किमपि कर्तुमादिदेश तदा स निरतिशयं हर्षं लेभे यत्स्तत्यं तस्य हर्ष उपोद्वलितः संललचे, तदा च सा तमावक्ते-'माऽतिमूढो भूः, गत्वा पाठं पठ इति ।

एवं नैरन्तर्येण विडम्ब्यमानः फटिकः परं निर्वेदमापेदे, ववाञ्छ च कञ्चन विवृतं प्रदेशं गत्वा स्वच्छेन वायुना कण्ठं संतर्पयाणीति । परं नासीत्तत्र कश्चिद्विवृतः प्रदेशो गन्तुम् । समन्तात्कालिकातैर्भुवनैः कुड्यैश्च परिवेष्टितः स प्रतिनिशं निजग्रामगृहस्य स्वप्नं ददर्श तत्रैव प्रतिगन्तुञ्चाचकाङ्क्ष । सस्पृहं स आदध्यौ 'क्वासौ रमणीया शाद्वला भूमिः, यत्राहमादिवसं पतङ्गोत्पातनरतो व्यहरम्, क्व च त उदारा नदीतीरपरिसराः यत्राहं-सानन्दं गायं-गायं नादं-नादं च भ्रमं-भ्रमं च दिवसमनयम्, क्वासौ तन्वी सरिद्व यत्राहं यथेच्छम-मज्ज मप्लवे च ' इति स तस्य बालसखानां संघस्यापि चेतयामास यस्योपरि तस्योच्छृङ्खलमाधिपत्यमासीत् किम्बहुना नृशंसायाः शासिकायाः, मत्सरिण्या मातुः स्मरणमपि दिवानिशं तस्य मनः संकुलयाम्बभूव पशुप्रेम-निर्विशेषः कश्चित्प्रेमविशेषः, कापि प्रियजनसंदर्शनलालसा, अनीर्वचनीया वियोगकालिकी काप्युत्कण्ठा, सायंकाले वत्सस्य संरूतिरिव अन्तरतमस्य हृदयस्य मातरं प्रति निभृता काप्याहूतिः, सर्वथा पाशवीं वृत्तिमनुकुर्वत्किमपि भावान्तरमस्य लज्जापरवशस्योत्कण्ठितस्य तनुकस्य मन्दस्य कुरूपस्य पोतस्य मनस्तरलयांचक्रुः । नैतत्कश्चिदपि विदांचकार परन्त्वैनत् तस्य मानसं निरन्तरं कदर्थयांचकार ।

नासीत्कृत्स्नेऽपि विद्यालये फटिकात्परः पठने जघन्यतरो माणवकः । यदा तदाऽध्यापकेन कमपि प्रश्नं पृच्छ्यमानः स आस्यं व्यादाय तूष्णीं तस्थौ सर्वविधाश्च प्रतिपादितां ताडनापरम्परामतिभाराभिभूत इव रासभः सधैर्यं विषेहे । अन्येषु बालेषु बहिः क्रीडत्सु स गवाक्षान्तः स्थितः परमौत्सुक्येन विप्रकृष्टानां गृहाणां छर्दींषि निर्वर्णयाम्बभूव । अथ दैवयोगाद्व यदि स उपरितनेषु विवृतेषु

छदिःपटलस्थलेषु बालान् संक्रीडमानान् आलुलोके तदा तस्य हृदयं लालसातिशयादुद्विविजेतराम् ।

अथैकदा स प्रयत्नेनोत्साहमास्थाय मातुलं पप्रच्छ—'माम ! कदाहं गृहान् गच्छेयम्' इति । तस्य मातुलः प्रत्युवाच—'प्रतीक्षस्व यावदवकाशाहा उपयन्ति' इति ।

परन्त्ववकाशाहा यावदक्तूबरमाससमागमेलिमा नासन् । तदित्थं दीर्घः कालः प्रतिपालनीय आसीत् ।

एकदा फटिकस्य पाठपुस्तकं क्वापि प्रणनाश । अन्यदीयपुस्तकानां साहाय्येनापि तत्कृते पाठाभ्यसनाधिगमनं सुदुष्करं संववृते । तदपीदानीमसंभवं जज्ञे । दिने दिने अध्यापकस्तं वेतसताडं निर्दयं ताडयामास । तस्य दशा तथा दयनीया शोचनीया च संवृत्ता यथा तस्य मातुलसूनवोऽपि तदीयबन्धुत्वाभ्युपगमाल्लज्जामापेदिरे । ते तं तथोपहसितुमवहेलयितुश्चारेभिरे यथेतरेऽपि बाला न दधृषुः । अन्ते स मातुलानीमुपसंगम्य निवेदयामास —'पुस्तकम्मेऽनास्ति' इति ।

अथासौ निरतिशयघृणाप्रकाशनपुरःसरं स्फुटन्तीव व्याजहार—'आः ! पामराधम ! ग्राम्य गर्दभ ! कथङ्कारं त्वहं मासस्य पञ्चकृत्वः पुस्तकानि क्रीत्वा तुभ्यं दातुं शक्नुयां यावत्स्वकीयमपि कुटुम्बं मया पालनीयमस्ति ?' इति ।

तस्यां रात्रौ विद्यालयात्प्रतिनिवर्तमानः फटिकोऽध्वनि शिरःशूलं वेपथुञ्च भेजे । स उपजिगमिषुं ज्वरावेगमनुबभूव । एष पुनस्तस्य महीयाञ्ज्वरव्यतिकर आसीद् यद् 'माऽहं मातुलानीकृते-शल्यं भूवम्' इति

परेद्युः प्रातः फटिकः क्वापि न ददृशे । प्रतिवेशदेशेषु गवेषणा मोघा बभूव । पर्जन्यः सकलां शर्वरीं मुसलधारं ववर्ष । ये च बालकाः विचिकीषवो विनिर्जग्मुस्ते सर्वे त्वक्क्लेदं चिक्लिदुः । अवसाने विश्वम्भरो राजपौरुषं साहाय्यं ननाथ ।

निशामुखे राजपुरुषाणामेका शकटी गृहद्वारमाससाद । पर्जन्यः साम्प्रतमपि प्रवर्षतिस्म रथ्याश्च सर्वा आप्लाविता आसन् । द्वौ राजपुरुषौ बाहुभिरुद्वहन्तौ फटिकं विश्वम्भरस्य पुरतो निदधतुः । स आ च पादात् आचशिरसः परिक्लिन्नः पङ्के समाकीर्णश्चासीत् । वदनं तस्य ज्वरावेगेन शुशोण गात्राणि च विवेपिरे । विश्वम्भरस्तं बाहुभ्यामुदु गृहान्तरन्निनाय । तत्पत्नी तं तथाभूतमालोक्य सविक्षोभमुदीरयाञ्चकार—'धिक् कियदद्य का काष्ठामयं माणवकोऽस्मान्नीतवान् । नूनमेनं गृहा प्रेषयितुमर्हति भवान्' इति ।

फटिकस्तस्यास्तद्वचनं श्रुत्वा सहिक्कं प्रोच्चैश्च क्रन्द—'माम ! गृहानेव खलु प्रस्थितोऽहं तैर्बलादि समाकृष्टोऽस्मि !'

अथ ज्वरः सवेगं ववृधे, समग्रां रात्रिं च बालो वीतसंज्ञस्तस्थौ । विश्वम्भरश्चिकित्सकमानायया मास । फटिको नेत्रे उन्मीलयामास पटलमुदीक्ष माणश्च शून्यं बभाषे—'माम ! किमिदानीमव काशाहा आगताः ?' इति ।

विश्वम्भरस्तस्याक्षियुगलादश्रूणि ममार्ज ज्व लन्तौ च फटिकस्य तान्तौ पाणी आत्मीयाभ्यामाद तदन्तिकमासीनश्च निखिलां त्रियामां निनाय । अथ माणवकस्याधरोष्ठं स्फुरितुमारेभे तस्य स्वर क्रमेण चीत्कारतामापेदे । स चुक्रोश—'मा, मा मातः ! मैवं मां मारय । नन्वम्ब ! तथ्यं ब्रवीमीति

अथान्येद्युः फटिकः स्तोककालाय चेतन आस्त । आगारद्वारेणेषु चक्षुषी चारयन्कस्याप्यागमनं सम्भावयमानो बभाषे । अन्तेऽभिव्यक्तनैराश्यं तस्य शिरः पुनः शिरोधाने विलिल्ये । सुदीर्घनिःश्वासपुरस्सरं स निजाननं कुडयाभिमुखं चकार ।

विश्वम्भरस्तस्य मनोभावानवजगाम । आत्मीयमुत्तमाङ्गञ्च नमयन्ननीचैः शशंस—' आकारितवानस्मि तव मातरं फटिक ! ' इति ।

दिवसश्चिक्षाय । चिकित्सकः सखेदं बभाषे—' अतिविषमा वर्तते बालस्य दशा ' इति ।

फटिकः शब्दायितुमुपचक्रमे—" अङ्कान् अनुगाहत्रयम् । अङ्कान् अनुगाहचतुष्टयम् । अङ्कान् अनु–" इति । तेन हि बहुकृत्वः सिन्धौ वाष्पिकेषु सर्वेषु मानरज्जोरङ्कानभिदधाना नाविकाः श्रुतपूर्वा आसन् । सम्प्रति पुनः स स्वयमप्येकमगाधं समुद्रं परिमातिस्म ।

दिवाऽपराह्णे फटिकस्य माता वात्याऽऽवेशं निकेतनमाविवेश, इतस्ततः पार्श्वतः पार्श्वं परिघूर्णमाना च परिदेवयितुं संक्रन्दितुञ्च प्रावर्तत ।

विश्वम्भरस्तां सान्त्वयितुं प्रयेते, परं सा शय्यायां विनिपत्य करुणं चुकूज—' फटि३क ! पुत्रक३ ! मम वत्स ! हा ! ' इति ।

फटिकः क्षणाय तरलां चेष्टां विरमयामास । तस्य पाणी उपर्यधोऽधमनाद्विरेमतुः । ततः स सपीडमूचे—' अहह ! ' इति ।

माता पुनः संचक्रन्द—' फटिक ! हा ममजीवित ! मम सर्वस्व ! ' इति मन्दं मन्दं फटिकस्य चक्षुषी चचक्षतुः, परं न स शयनं परितः स्थितान् जनान् वीक्षितुं पारयामास । अवसाने स मन्दमुदीरयामास—' मातः ! अवकाशाहाःसमागताः ' इति । समाप्ता चेयं कथा ।

उरगजिह्वस्य (औरंगजेब) स्वपुत्रपार्श्वे प्रहितम् पत्रम् *

[ले०—पं० अवधप्रसादशर्म्मा काव्यतीर्थः राघवपुरस्थः ।]

हे हे पुत्र ! समागतो मम पुनः कालो बलीयानिह,
द्रष्टुं वांछति मे मनश्चिरमहो त्वामेव हा ! साम्प्रतम् ।
जातं मे शिथिलं वपुश्च नितरां प्राप्तं तथा क्षीणता-
मायाता विषमा बलक्षयकरी कष्टा जरा-जीर्णता ॥

(१)

एकाकीह यथाऽऽगतोऽस्मि भुवने हा ! कर्मबद्धोऽवशः,
एको हन्त ! तथैव यामि विकलो लोकादितोऽकिञ्चनः ।
मूढः पान्थ इवात्र हन्त ! विहितो वासो मयाऽज्ञेन हा,
स्वार्थान्धेन विलोकितो नहि चिरात्पन्थाः पुनःश्रेयसः

(२)

कस्याप्यत्र हितो मया न विहितोऽज्ञानादहो ! गर्वतः
स्वच्छन्दं निजशासनं क्षितितले विस्तारितं सर्वदा ।
न ज्ञातं किल लेशतोऽपि चिरतो दुःखप्रदं किल्विषम्,
दुर्दैवात्क्षणमप्यहो नहि मया स्वात्मापि हा ! चिन्तितः

(३)

सन्मार्गं नयति स्म मां प्रतिदिनं चेतश्चिरेणादरात्,
अज्ञानान्मतिरेव किन्तु विषमा जाता तदानीं मम ।

* संस्कृत जिज्ञासूनां छात्राणां कृते श्रीमैथिलीशरणगुप्तरचित–"पत्रावली–" पुस्तकतः संस्कृत-भाषायामनूदितम् ।
—(रचयिता ।)

लोभेनैव मदेन चापि विमला दृष्टिर्मदीयाऽऽवृता,
येनाद्यापि कृतो मया न कुधिया स्वात्मावबोधः किल

(४)

शोचाम्यद्य यथा तथा निजकृतं सर्वं पुनर्दुष्कृतम्,
चेतो हन्त ! यथा तथा ज्वलति मे धैर्यं विहायाऽधुना ।
क्व स्थानं मम विद्यते हि विषयाऽऽसक्तस्य दुश्चारिणः
ध्यात्वैतद्विलपामि हा ! मम कृते शेषं किमस्ति क्षितौ

(५)

यद्यप्यत्र तु केऽपि सन्ति भुवने हा ! नामरा मानवाः
नीचोऽहं मरणात्तथापि नितरां भीतोऽस्म्यहो ! चिन्तया।
दृश्यन्ते हि यमस्य भीषणतरा दीर्घाश्च दण्डाःपुरः,
प्राप्नोमीह चिरस्य हन्त ! विषमां हा ! नारकीं यातनाम् ॥

(६)

दैवाधीनमहो ममास्ति विषमं सर्वं भविष्यत्फलम्,
हा ! हा ! संप्रति दृश्यते हि तमसाच्छन्नो नु मार्गः पुरः ।
राज्यं हन्त ! मया न पालितमहो मोहाद्धिया शुद्धया,
तत्प्राप्तिः किल दुर्लभात्र नितरां जाताऽधुना पूर्ववत्

(७)

यद्यप्यस्ति दयार्णवो हि भगवान् सर्वेश्वरः श्रीधरः,
विख्यातो भुवने परन्तु समदृग्न्यायी निरीहो विभुः ।
मय्यस्ते कथमप्यहो ! यदि भवत्येषा क्षमाशा यदा,
हा ! चैनामपि नाशयत्यचिरतः पापस्य चिन्ताऽधुना

(८)

देहस्यास्य विनश्वरस्य च कृते नो कोऽपि भोगोमया
त्यक्तोऽत्रैव विभाति हन्त ! विमुखो मत्तोऽधुनासोऽप्यहो
अस्य प्राप्तमिदं मया प्रतिफलं युक्तं नु दुष्कर्मणो-
रे रे मोह ! जनेन कारयसि हा ! सर्वं शुभं वाऽशुभम्

(क्रमशः)

अद्वैतरत्नोपलब्धिः ❋

[ले० योगीन्द्रस्वामी शास्त्री, प्रयागीय-महानिर्वाण-वेदविद्यालयस्थः ।]

(गुरुराह्वयति स्वशिष्यान्)

भो भो महानिर्वाण-वेदविद्यालयस्थाश्छात्राः ! ऐषमस्तने द्वादशे वार्षिकोत्सवे सभापतेरासनं स-भाजयन्तं साक्षान्मिथिलाधिपतिगोष्ठीगरीष्ठब्रह्मर्षि-याज्ञवल्क्यसदृशं तत्रभवन्तं किन्न जानीथ, यस्या यशोराशिरादिगन्तं वितानायते ? अतो यूयं त भवतां समक्षं दार्शनिकविचारेणोपस्थिताया ज तायाः कर्णपालीं पुनीत ।

रक्तविरक्तनामानौ छात्रावागच्छतः—

(अन्योऽन्यं वीक्ष्य) प्रथमः कोऽयं पुरो मित्रमिव दृश्यते ।

द्वितीयः—यथा जानासि ।

प्र०—तत्र भवन्तं विज्ञवर्य्यं मित्रमणिमभिवाद यते रक्तशर्म्माऽयम् ।

द्वि०—प्रणमामि भोः प्रणमामि, किमिति चिर न्मद्विलोचनतिथिरभव; उन्मना इव च कथं वीक्ष्यसे

प्र०—न जानासि निखिलप्राणिनां वडिशमिव जगद्बन्धनम् ।भवानपि तु किमिति यथा पूर्वमि न दृश्यते ?

❋ प्रयागस्य दारागञ्जस्थ श्रीमहानिर्वाण-वेदविद्यालयस्य वार्षिकोत्सवे द्वाभ्यां छात्राभ्यामभिनीतोऽभिनयोऽयम्—

द्वि०—तव इव मम तु उत्खातदंष्ट्रोरगवदिदं मनागपि भीतिं न जनयति जगत्, तथापि मत्तः परोऽस्य चिरसंचितस्याद्वैतरत्नस्य कश्चन ग्रहीता न वर्तत इति कष्टम् ।

प्र०—नहि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्तत इति किं तस्याद्वैतरत्नस्य फलं स्वरूपञ्चेत्युच्यताम्, ततो बहवो ग्राहका भविष्यन्तीति किं कष्टम् ?

द्वि०—अद्वैतस्वरूपं तु स्वस्वरूपमेव, स्वस्वरूपे ज्ञातेऽद्वैतस्वरूपं ज्ञातं भविष्यति, फलं तु तस्य ब्रह्मभावापत्तिरिति सर्वोपनिषदां सिद्धान्त इत्यवेहि ।

प्र०—इह जगतीतले को न जानाति स्वस्वरूपं सर्वोऽपि कथयति-स्थूलोऽहम्, गौरोऽहम्, श्यामोऽहमिति । न कश्चनापि ब्रह्मभावं प्राप्नोति प्रत्युतेहैव तुन्दिं परिमार्जयन् खट्वां त्रोटयतीति ।

द्वि०—अहो महान् व्यामोहो यदनात्मनि देहादावात्मभ्रम इति ? अयमेव भ्रमो महाननर्थकर इति अस्यैव च निरासाय सर्वं वेदान्तशास्त्रं गर्जति ।

प्र०—किं भो मित्र ! यदि अद्वैतमेव स्वस्वरूपं तर्हि तत्र कोऽनुरागः ? द्वैते सत्यनुरागो जायते । नाद्वैते । तदुक्तं चापि श्रुतौ—

" तस्मादेकाकी ना रमत स द्वितीयमैच्छत् "

द्वि०—सत्यमेवं यथा वदसि, परमिदमिह सम्प्रधार्यताम् । अन्यस्मिन् यत् प्रेम तत् कस्य कृते, स्वस्यैवेति चेत् तर्हि स्फुटा परमप्रेमास्पदता आत्मन इति, परमियमद्वैतवासना सर्वैर्दुरापा । तदुक्तम्-

"ईश्वरानुग्रहादेषा पुंसामद्वैतवासना ॥ महाभयकृतत्राणा द्वित्राणां यदि जायते" इति । अपरञ्च—

क्षुरस्य धारा निशिता दुरत्यया, दुर्गं पथस्तत्कवयो वदन्ति 'तस्मादद्वैतमेव स्वस्वरूपं तदेव च परमप्रेमास्पदमिति

प्र०—भगवन् ! यद्यपीयता प्रबन्धेनाद्वैतमेव मम स्वरूपमिति सुनिरूपितं भवता तथापि नास्मदीयहृदय आस्पदमादधाति, किमत्र करोमि ?

द्वि०—शृणु भोस्त्वं शैलसारहृदयोऽसि । यतः-

" इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते ।
येषां नास्पदमादधाति हृदये ते शैलसाराशयाः " ।

प्र०—ब्रह्मन् ! किमिति मामधिक्षिपसि शैलसारहृदयोऽसीति । तथापि हृदये किमद्वैतं स्वरूपं चकास्ति ?

द्वि०—नितरामनभिज्ञोऽसि, नहि त्वमिवाहं यतः—

" तस्मिन्मे तु निसर्गसुन्दरतमे चेतो निमग्नं चिदानन्दज्ञाननिधौ शिवेऽतितरलं नाद्यापि सन्तुष्यते । "

प्र०—ब्रह्मन् ! तथापि मम चित्ते नयात्मद्वैत रत्नम् ।

द्वि०—शृणु ब्रह्मबन्धो ! ब्रह्मद्वेषजनितपातकदूषितान्तःकरणोऽसि ।

प्र०—भगवन् ! शाधि मां यथास्मिन्नद्वैताध्वनि मच्चित्तं प्रविशेत् ।

द्वि०—शृणु वत्स, ईश्वरप्रसादकं देशोपकारं भूतानुग्रहं विधत्स्व । यत उक्तम्—

"भूरात्मासर्वभूतानि भद्रपूजापदानि मे" भा० स्क० ११, "नहि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति"

प्र०—ब्रह्मन् ! किमिति वत्सेति सम्बोधयसि । यतो नाहं वत्सः, किन्तु वृद्धोऽहम् ।

द्वि०—न ते पलितं शिरः । पश्यामीति वृद्धोऽहमिति वदतस्तव व्याघातः ।

प्र०—नहि भगवन्!

"न तेन वृद्धो भवति येनास्य पलितं शिरः।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः"॥

किञ्च ब्रह्मन्! ईश्वर-प्रसादकरं सर्वभूतहित-चिन्तनं सर्वदा कर्तुमशक्यं विषयस्वार्थाक्षिप्तचित्तत्वात्।

द्वि०—अरे बालिश! विषयेषु स्वार्थसाधकेषु दोषं पश्य। यत उक्तम्—

"इन्द्रियार्थेषु वैराग्यमनहंकार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥"

प्र०—ब्रह्मन्! एतेषां मध्ये ममैकमपि साधनं नास्ति, सुगममुपायं वद।

द्वि०—शृणु वत्स, लौकिकं वैदिकं यत्कर्म तत्सर्वमीश्वरार्पितं कुरु। यत उक्तम्—

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥"

नातः परं सुगममुपायान्तरमस्ति।

प्र०—भगवन्! तत्तत्कर्मजन्यस्वर्गादिकामनाक्षिप्तमनस्तया फलमनुद्दिश्य तत्तत्कर्मजातमपि नाहं कर्तुमुत्सहे।

द्वि०—अरे! नूनमूषरात्मासि त्वम्।

प्र०—भगवन्! किं बहव आत्मानस्तवमते यन्मामूषरात्मेति सम्बोधयसि।

द्वि०—शृणु रे ब्राह्मणडिम्भ! एकमपि ब्रह्म मायाभिः परिच्छिन्नमनेकमिव भवति। तदुक्तम्—

"एकं रूपं बहुधा यः करोति" इत्यविद्यावस्थाया ऊषरात्मा त्वं निगद्यसे।

प्र०—नाहमुपेक्षणीयो भगवन्, यतः सर्वभूतानुकम्पायास्त्वमिवाङ्गीकारात् कदाचिदहमपि तवानुग्रहेण समदमादिसाधनसम्पन्नो मुक्तो भविष्याम्येव।

द्वि०—शृणु वत्स, तर्हि मदुक्तप्रकारेण भगवदर्पणेन कर्माणि कुरु।

प्र०—भगवन्! एवं करिष्यामि, आविर्भूतं मम चित्ते विषयेषु दोषदर्शनम्। संप्रति शुद्धस्वान्तः संवृत्तोऽस्मि, शाधि मां किमतः करवाणि?

द्वि०—शृणु वत्स! ज्ञाननिधिगुरुकुलोपसदनं कुरु। यत उक्तम्—

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"।

प्र०—भगवन्! तर्हि क्व गच्छामि, शाधि मामुपसन्नं करुणानिधे!

द्वि०—अहो महान् खेदोऽस्ति, न जानासि! महानिर्वाण-वेदविद्यालयं दारागञ्ज-प्रयागे। संन्यासिमहोदया इतो द्वादशवर्षतः पूर्वमेव समुद्घाटयामासुरिति तत्रैव गच्छ।

प्र०—भगवन्! केन पथा गच्छामि, भ्रान्तोऽस्मि।

द्वि०—आगच्छ, दर्शयामि।

(इति निष्क्रान्तौ)

परोपकारः।

ले०—लक्ष्मीचन्द्रो वजाजः (रतनगढीय-ऋषिकुलस्थः)

मान्याः! सत्स्वपि बहुषु धृतिक्षमादमास्तेयादिषु धर्माङ्गेषु परोपकारस्यैव प्राधान्यमाक-

लयन्ति विद्वांसः । परेषां हितानुष्ठानम्, हीनेषु दुःखितेषु दयनम्, अत्याचारैर्निपीडितानां साहाय्याचरणं मनुष्यस्य परमो धर्मः । एतदेव शब्द-भेदेनैवं प्रतिपाद्यते ।

"अष्टादशपुराणानां व्यासस्य वचन-द्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ।"

योहि मानवो जन्मजरामरणसङ्कुले सुखदुःखादिद्वन्द्वोपसृष्टेऽस्मिन् जगति जन्मासाद्यास्मादसारात्क्षणभङ्गुरात् कायात् परोकृतिरूपं सारमाहरति, वस्तुतः स एव साधुः स एव महात्मा तस्यैव सुजीवनम् ।

"उत्पद्यन्ते विलीयन्ते संसारे कोटिजन्तवः ।
परोपकारव्रतिभिराकल्पान्तन्तुजीव्यते ।"

जगन्नियन्तुर्जगदीश्वरस्य सृष्टिक्रमे विचार्यमाणे चित्तभूमिकामासदयन्ति तदुपादानभूतानि पृथिव्यादिपञ्चभूतानि, यैः केवलं परार्थमेव स्वस्वरूपं धार्यते ।

नहीयं गन्धवती पृथ्वी स्वयमेव स्वीयं गन्धमाजिघ्रति, नचाप्याप आत्मनैव रसं रसयन्ति, नैव तेजांसि आत्मदीप्त्यात्मानं दीपयन्ति, न वा वायुः स्वार्थमेव वाति नचाप्याकाशोऽवकाशं स्वकीयमात्मने समुपयुंक्ते । सत्येवं पञ्चभिर्महाभूतैर्भावितात्मनोऽस्य भूतात्मनः परोपकार एव अन्तरङ्गमखिलेषु धर्माङ्गेषु ।

"रविश्चन्द्रो घना वृक्षा नद्यो गावश्च सज्जनाः ।
एते परोपकाराय युगे दैवेन निर्मिता ॥
परोपकार-शून्यस्य धिङ्मनुष्यस्य जीवितम् ।
जीवन्तु पशवो येषां चर्माऽप्युपकरिष्यति ॥"

परोपकारमेव लक्षीकृत्य लीलाविग्रहो भगवान् विष्णुः समये-समये दशावतारान् गृह्णाति । परोपकारिणां चित्तेषु अयं निजः परो वेति नैव कक्षाविभाग उदारतायाः । यथा ते निजेषु पुत्रादिषु दयां कुर्वन्ति तथैव दीनेषु, आर्तेषु च । परोपकारिणो यत्र कुत्रापि दुःशासकेन पीड्यमानान् दारिद्र्येण दार्यमाणान्, रोगेण रुज्यमानान् पश्यन्ति, तत्रैव तानुद्धर्तुं सहस्रैरुपायै श्चेष्टन्ते । तेहि करुणाक्रान्तहृदया अन्धान् मूकान् क्षुत्पिपासार्दितान् शीतवातातपैर्वाधितान् दृष्ट्वा अन्तःकरणे विद्रवन्ति यथाशक्ति तेषां साहाऽय्यमारचयन्ति च । ते हि अज्ञानान्धकारेणाच्छादितान् स्वकर्तव्यविमुखान् असत्पथप्रवृत्तान् निरीक्ष्य विद्यादानव्यवस्थया शिक्षितान् कुर्वन्ति ।

संसारेऽस्मिन् तादृशानामपि मानवानामभावो नास्ति । ये हि—

"यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥"

इत्यादिकान् सिद्धान्तान् संसाध्य परोपकारसदृशं गुणमपि निन्दन्ति, प्रयतन्ते च तदर्थं प्रवृत्तिमपि स्वार्थमूलिकामेव साधयितुम् । तानेतादृशानेव भगवान् श्रीकृष्णो गीतासु आसुरीं योनिमापन्नान्निर्दिश्य—

"तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥"

इति शास्ति । को हि नाम व्याघ्रादिहिंस्रजन्तूनपि स्वसन्तानार्थं प्राणान् त्यजतो विलोक्य मनुष्याणां हृदयेषु परोपकारादि-गुणानां प्रवृत्तेर्मूलं केवलं स्वार्थमेव निर्दिशेत् । वस्तुतो ज्ञानवन्तो महात्मानः

सर्वभूतस्थमात्मानमनुभवन्तस्तस्यैवोपकारार्थं सर्वदा चेष्टन्ते । अत एव बृहदारण्यके योगी याज्ञवल्क्यः स्वधर्मपत्नीं मैत्रेयीम् —

"आत्मनस्तु कामाय सर्वं प्रियं भवति, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"

इत्याद्युपदिदेश । आस्तां नाम चेतनानामियं कथा जडेऽपीयं परोपकारप्रवृत्तिः स्वाभाविकी विलोक्यते, । अत एवोक्तं केनचिन्महाकविना—

"पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकाशयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥"

अयं परोपकारस्योच्चतमो निष्काम आदर्शः । यदि एतादृशं उच्चभावं विहाय सामान्यदृष्ट्या विचार्यते तथात्वेऽपि परोपकारो मानुषस्य परमो धर्मः सिद्ध्यति । न खलु मनुष्यः पश्वादिवत् कचिदेकाकी तिष्ठति । अयं सामाजिकः प्राणी समाजे प्रायः सर्वविधैरेवेतरैर्मानवैः संगच्छते संव्यवहरति च । एवं सति यदायं न केषांचिदुपकारमादधीत न वा केषांचित् साहाय्यमातन्वीत तर्हि कोऽन्योऽमुं प्रत्युपकुर्यात्, को वा विपत्तौ समाश्वसयेत् । परन्तु यथार्थतया प्रशंसनीयस्तु स एव निष्काम-परोपकारः । अत एव भर्तृहरिणोक्तम्—

"एके सत्पुरुषाः परार्थ-घटकाः स्वार्थं परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
ते वै मानव-राक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥"

यद्यपि परोपकारिणां मार्गेऽनल्पा विपत्तयः समापतन्ति, अनेके च क्लेशाः समागच्छन्ति, तथापि ते न कथंचिद्विचाल्यन्ते ।

"परोपकरणं येषां जागर्ति हृदये सताम् ।
नश्यन्ति विपदस्तेषांसम्पदस्तु पदे पदे ॥"

एतादृशस्यैव परोपकारस्य कृते महर्षिर्दधीचिः स्वकीयान्यस्थीन्यपि याचमानाय इन्द्राय ददौ, राजर्षिः शिविश्च स्वशरीरस्य मांसमपि उत्कृत्य कपोतस्य रक्षार्थमुत्ससर्ज ।

"कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि, किमदेयं महात्मनाम् ॥"

अतो मान्याः पाठकमहाभागाः काम्य
उभयोर्लोकयोः सुखन्तर्हि परोपकारोऽवश्यमे
समनुष्ठेयः ।

——:o:——

विजयादशमी ।

ले० नारायणशर्मा दाधीचः (जयपुरीय संस्कृत विद्यालयस्य

मान्या भारतहितैषिणो विपश्चित्प्रवराः
आनन्दमयो विजयादशमीमहोत्सवः समागच्छति
अत्रार्य्यमातुः श्रीदुर्गादेव्याः पूजनं भविता धर्मा
मानिनः सर्वेऽपि मानवाः सुन्दराणि प्रायोऽपि
त्राणि विदेशीयवस्त्राणि परिधास्यन्ति । साम्प्र
भारतीयानां पार्श्वे यदि कश्चिदिमं प्रश्नं कुर्वीत
का नाम विजयादशमी ? कस्तावदस्या अर्थः
अस्या वार्ताया भारतवासिन उत्तरं दद्युरित्यसा

तु संदेहः । यदि कतिपया मानवाश्चोत्तरं दद्युस्त-र्ह्येवं वदिष्यन्ति । रुचिकरभक्ष्य-पदार्थानां भक्षणं सुन्दरवस्त्राणां परिधानमेवास्माभिर्विजयादशमी मन्यते । तेषामेतज्ज्ञानं सर्वथा भ्रान्तिमूलमस्ति । यस्मिन् शारदीयनवरात्रे विष्णुमहेशादिदेवानां तेजसोत्पन्ना या महाशक्तिः इदं भूमण्डलमवतीर्य देवारेरसुरराजस्य महिषासुरस्य विनाशं विधाय देवप्रतिष्ठां स्थापयामास, यस्यां विजयादशम्यां भगवान् रामचन्द्रः परितः समुद्रैर्वेष्टितां यमराज-पुरीमिवोल्लासमानां लङ्कां प्रतस्थे । यस्यां विजया-दशम्यां पाण्डवैरज्ञातवासं परिसमाप्य दुष्टदुर्योधनेन निपीड़ितस्य विराटराजस्य गोधनस्य रक्षाऽक्रियत, अग्रे चानेनैव युद्धक्रमेण सर्वान् कौरवान् विनाश्य धर्मराज्यमस्थाप्यत, यस्यां विजयादशम्यां प्राक्-तनाः क्षत्रिया विजयार्थं प्रस्थानमकुर्वन्, यस्यां विजयादशम्यां पवित्रतमेयं भारतभूमिः सुगृहीत-नाम्ना भगवता बुद्धेन जन्मनाऽलङ्क्रियत, यस्य ज्योतिरखिलजगति प्रसृतं यस्य मतानुयायीनोऽद्या-प्यस्मिन्संसारे सर्वेभ्योऽधिकतराः सन्ति । तस्यशा-रदीयनवरात्रोत्तरगां विजयादशमीमेवं रीत्या मान-यित्वा वयं संतुष्टा भवामश्चायमेवास्माकं पतितताऽव-स्थायाः पर्याप्तपरिचयः । अस्माकं प्राकृतना भार-तीया आश्विनशुक्लदशम्यां विदेश-विजयार्थं शत्रु-संहारार्थञ्च यात्रामकुर्वन् । तेषां शौर्येणैवास्या-स्तिथेर्विजयादशमीति नाम प्रथितम् । वयं तेषामेव सन्तानाः स्मः । अस्माकं शरीरेऽद्यापि रामकृष्णा-र्जुनादीनां सांप्रतिकवीराणां प्रतापशिवाजीप्रभृति-प्रथितशूराणां राज्ञां शोणितमुपस्थितं वर्तते । हन्त ! तथापि तादृशा ना स्मः । ते स्वाधीना आसन्, वयं पराधीनाः स्मः । ते विदेशविजयिनो, वयं गृह एव पराजिताः, ते शक्तिमन्तो, वयं बलहीनाः, ते धर्माय स्वप्राणानपि मोक्तुं शक्ता, वयं धर्माय केवलं रोदिमः किम्बहुना, तैरेव विजयादशमीनाम सार्थकं कृतम् । साम्प्रतं वयं खल्वस्य नाम्न उपहासं कार-यामः । पुनरपि वयं तेषां संततयो, वयमपि तत्सदृशा भवितुं शक्नुमः । यदि वाञ्छामो यदि च तेषां मार्गोऽस्माभिरवलम्बितः स्यात्

पुरा खल्वभूत् शक्ति-पूजा दुर्गापूजा वा । अयं महोत्सवो नास्त्यद्यतनः किन्तु; भगवतो रामचन्द्रा-दपि प्राक्कालिको वर्तते । किन्त्वतीतायां वर्तमा-नायां च पूजायां महदन्तरमस्ति । ते दुर्गापूजां शक्त्यर्थमकुर्वन्, जगन्माता भगवती दुर्गाऽपि तेभ्य आत्मीयां शक्तिमदात् । अधुनापि तां शक्तिं प्राप्तुं शक्नुमः परश्चास्माभिः पूजाप्रकारः परिवर्तनीयः । अस्माकं पूर्वजा मृण्मयीं भगवत्या मूर्तिं विदेशीय-वस्त्रैर्मिथ्याभूतैर्मनःशिलादिधातुभूषणैरलङ्कृत्य नि-रपराधानजान् दुर्गामूर्त्याः समक्षे हत्वा स्वचेतसि ईदृशीमिच्छामुत्पादयन्जगन्माता भगवती संतुष्य अस्मभ्यं कंचिद्वरं दास्यति येनास्माकं वस्तु, स्वज-नकष्टश्च दूरी भवेत् । अयं पूजाविधिरज्ञानान्तरितो वर्तते । अज्ञानपूजया कोऽपि लाभो भवितुं नार्हति । पूजा सज्ञाना करणीया, अस्माकं प्राक्तनाः सज्ञानां पूजां कुर्वन्तिस्म । चित्तैकाग्र्याय तेष्यावश्यकतानु-सारं द्रव्यमूर्तिं निर्माय पूजायां संलग्नचेतसोऽ-भूवन् । सा मूर्तिः परितः शुद्धा वेदमन्त्रैश्चपूताऽ-भूत् परञ्च तेषां ध्यानं भावना चास्याः स्थूलमूर्त्याः कलेवरतोऽप्यग्रेसराऽविद्यत । ते हि महाशक्त्या वा-स्तविकं स्वरूपं मर्म चाजानन् । येन ईश्वरीयतेजसा

या महाशक्तिः प्रादुर्भूता तामेव सर्वतः पवित्रतमया तपश्चर्यया प्राप्तुं प्रयतन्ते स्म । भगवत्याः पार्श्वद्वये सरस्वतीलक्ष्मीगणेशानां मूर्तिं पश्यामः, सरस्वती कला तथा विद्याऽस्ति विघ्नराजो विज्ञानमूर्तिश्चेति । पूर्णशक्त्युपासकैर्विद्यायास्तथा कलाया विज्ञानस्य चोन्नतिः करणीया । अथ तावद्देशस्य सुखसमृद्धये श्रीमहालक्ष्मीमूर्तेर्भावसाधनं कर्तव्यम् । इदमेव शक्तिपूजाया मुख्यरहस्यम् शक्त्युत्पादनस्य साधनश्चास्ति । तेषामनुष्ठानं शारदीयनवरात्रे महिषासुरमनोविकाराणां विनाशनेऽजायत । इदमेव शारदीयनवरात्रस्य महत्वमप्यस्ति । पुराऽमन्यतास्माकं पूर्वजैरपि विजयादशमी, अस्माभिरपि साम्प्रतं मन्यते । तैर्वास्तविकी विजयादशमी मन्यते स्म। सांप्रतमस्माभिस्तस्याः प्रतिविम्बमात्रमपि मानयितुं न शक्यते । अद्य वयं विजययात्राया वार्तामपि ध्यातुं न शक्नुमः । यतो वयं निर्बलाः स्मः । विजययात्रा निरन्तरं न भवति । किन्तु शक्तेरावश्यकताऽत्रास्ति । यतोऽनया विनाऽऽत्मरक्षामपि कर्तुं न कोऽपिशक्तः । साम्प्रतमस्माभिरप्यात्मरक्षा कर्तुं न शक्यते । एतत्प्रत्यक्षम् । वयं बलशालिनो भवेम इति विजयादशमी मानयितव्या । प्राक्काले विजयादशम्यां परस्परं मिलनस्य व्यवस्थाऽसीत्, सांप्रतमपि कतिपुचित् स्थानेष्वेवमेवास्ति । वयमपिमिलामोऽधुना विभिन्नैः परिवारैः सम्बन्धिभिश्च । विजयादशमी केवलं पारिवारिकमहोत्सवो नास्ति किन्तु राष्ट्रमहोत्सवोऽयं हिन्दूजात्याः सर्वासां व्यक्तीनामन्तर्गतानां विभिन्नसंप्रदायानां च परस्परं मिलनस्य व्यवस्था कर्तव्या । विजयादशम्याः सङ्गमे स्पृश्यास्पृश्यभेदोऽपि दूरीभवति विन्ध्याचलादिषु बहुत्र देव्यालये सर्वेऽपि स्पृश्यास्पृश्याः प
सङ्घर्षमाचरन्तो देवीमर्चन्ति ।

हिन्दुजातौ संमिश्रणेन शक्त्युत्पन्न
अस्योत्सवस्य सृष्टिर्जाता । यस्यभग्नावशेष प
कुत्रचनोपलभ्यते । अधुनापि हिन्दुराजानां स
एतः सर्वेषां क्षत्रियाणामयं महोत्सवः क्षात्र
भावं प्रकटयति । प्रायोऽत्र खड्गस्य पूजा
मल्लयुद्धस्यायोजनं जायते, व्यायामालयस्य
खाड़ा) व्यवस्था क्रियते । किन्तु साम्प्रत
कार्याणि नष्टप्रायाणि दृश्यन्ते । किं बहुन
सार्वजनिकरूपं च नष्टमभूत् हिन्दुजातिः धर्म
जातिः किन्तु धर्मत्राणाय देशरक्षार्थं च वी
रप्यासीदिति । अतः खल्वस्या अन्यगुणानां
वश्यकताऽस्ति, तथैवास्या जातेर
स्याप्यावश्यकताऽस्ति । बहुधा पश्यामो
खलु हिन्दुयुवका यवनानां पैगम्बरोत्सवे (त
यवनव्यायामस्थाने गच्छन्त्यन्योन्यं बाहुयु
यामञ्च कुर्वन्ति । तस्मिन्समये यवनदेव
रपि यवनैःशिल्पकार-काम्बविक-लोहका
हिन्दुयुवका यवनमतावलम्बिनः क्रियन्ते ।
प्रतिव्यक्ति नियमोऽयं कृतोऽस्ति यत स्वजी
हिन्दवो यवनमते कर्तव्याः । मान्या भार
अतोऽयंदशमीमहोत्सवः श्रीमद्भिः पुनरपि
स्थापनीयः पुनरपि श्रीदुर्गा देवी शुद्धैः स्वदेश
शक्तिसञ्चयायैव पूजयितव्या वयंतु मन्यामहे
वमेव भारते पुनरपि बलवृद्धये प्रतिग्रामं
शालाप्रभृतयो विनिर्मेया येन स्यात् पु
भारत-वसुन्धराया इति निगद्य विरमा
विधेयः ।

सम्पादकीयम्

व्यवस्थापिकासभायामनधिकारचर्चा

इदानीं व्यवस्थापिकासभायां श्रीहरिसिंह गौडमहाशयेन श्रीहरविलासशारदा महोदयेन च क्रमशो विवाहसम्बन्धविच्छेदविषये विवाहकालनियमविषये च नियमौ निर्मापयितुं प्रस्तावद्वयमुपस्थापितम् यदाशयश्च क्रमश एवं विद्यते—

तत्र प्रथमे यदैव दम्पत्योर्मध्ये कश्चन विवाद उपतिष्ठेत् उत कोऽपि दोषः स्त्रिया पुरुषे उपलक्षितश्चेद् आहो पुरुषेण स्वपत्न्याः कश्चनामर्षणीयो दोषो दृष्टश्चेत्तर्हि उभाभ्यामपि यथेच्छं विवाहसम्बन्ध-त्यागः परस्परं कर्तुं पार्य्यते । तत्र राजनियमतस्ताभ्यामन्योऽन्यसम्बन्धत्यागं कृत्वा स्त्रिया च पुरुषान्तरेण पुरुषश्च स्त्र्यन्तरेण पुनः सम्बन्धः कर्तुं पार्य्यत इति ।

द्वितीये च—चतुर्दशवर्षतो न्यूनवयस्कायाः कन्यायाः परिणयं कर्त्ता कारयिताऽनुमोदकस्तत्संस्कारकर्ता पुरोधाश्च, एवमष्टादशवर्षतो न्यूनवयसो वालकस्य परिणयं कर्त्ता कारयिता तत्संस्कारकश्च पुरोहितोऽर्थदण्डेन कारागारवासदण्डेन च दण्डिता भविष्यन्तीति ।

अत्र विषये ममेयानेव वक्तव्यो विद्यते यत् क इमे एवंभूतानां नियमानां निर्मातारः प्रस्तावका वा यतो हि भारतमहाराज्ञ्या श्रीव्यक्तोर्जया (विक्टोरिया) देव्या त्वेवं प्रतिज्ञातमस्ति 'यन्नाहमार्य्यधर्मे हस्ताक्षेपं करिष्यामि, नापि मदुत्तराधिकारिण इति' एवं सति मध्ये मध्ये व्यवस्थापिकासभायां श्रीगौड-श्रीशारदामहाशय-प्रभृतीनां धार्मिकविषये नियमादिनिर्मापणप्रयासोऽनधिकृतिचर्चैव प्रतिभाति । नियमोऽयं समीचीनोऽसमीचीनो वेति विचारणायामपि प्रथमनियमस्तु भारतीय-संस्कृति-विनाशक एव । यतो हि आर्य्यधर्मे दाम्पत्यबन्धनं हि धार्मिकं बन्धनम् । न केवलमैहिकोपभोगायैवार्य्याणां भवति विवाहबन्धनम् । किन्तु संसारयात्रापारमासादयितुं वैदिककर्मकाण्डादिविधानयोग्यतालाभायैवेति । अपरञ्च लौकिकविचारेणापि दाम्पत्यप्रेम्णः स्थैर्य्यं यथा सम्बन्धाविच्छेदनियमे भवति न तथा, सति सम्बन्धविच्छेदनियमे पश्यन्तु पाश्चात्यदेशेषु प्रतिदिनमीदृशैरेवाभियोगै र्न्यायालयाः सम्भृता भवन्ति । तत्र तु गार्हस्थ्यसुखं दुःखबहुलमेव भवति ! पत्नी कथयति यत् मम पतिर्मे हस्ते मोदकमदत्वा ममाग्रे निहितवानतोऽहम् पत्यन्तरं करिष्यामि । एका कथयति यन्मम जन्मदिनोत्सवे मे पति र्मह्यं किञ्चिदुपायनं बहुमूल्यं नादादतोऽहं तं विहाय पत्यन्तरं करिष्यामि । इत्यादि । किमिमामेव दशामत्रापि द्रष्टुमिच्छति गौडमहोदयः ? श्रूयते प्रस्तावोऽयं

स्थगितो भूदिति । अहो भारतभाग्यत एव प्रस्तावोऽयन्नोपस्थितः संसदि, नो चेदेकतो विलुप्तगौरवस्यास्य देशस्यायं द्वितीयो गण्डस्योपरि विस्फोटकः सम्वृत्तः स्यादिति ।

द्वितीयः शारदीयः प्रस्तावस्तु उपस्थित एवास्ति संसदि । सोऽपि तु महानर्थकारी । यद्यपि आधुनिकीं बालविवाहप्रथां दर्शं दर्शं तु सर्वेऽपि विज्ञा देशकालविदस्तत्समर्थका एव । परन्तु नायं पन्था बालविवाह–निरोधस्य साधीयान् । एवन्तु अनर्थपरम्परैवोदेष्यति । यतोहि आधुनिकी शासनपद्धति र्नास्माकं कल्याणमीहते, अपि तु स्वहस्तप्रसारमेव । एवं कृते तस्या एव बलवृद्धि र्भवति इदमस्त्रप्रदानेन । अस्त्रमिदमासाद्य सास्माकं धार्मिककृत्येऽपि पादं प्रसारयिष्यति । तत्रापि उत्कोचादिदानादाने प्रचलिष्यतः, येन दैनन्दिनं भारतस्य नैतिकबलह्रासश्चरित्रपातश्च स्यादेवेति । आश्चर्य्यन्तु मामिदम्प्रतिभाति यत् स्वराज्याभिलाषुकाः ‘ लाला ’ ‘ लाल ’ प्रभृतयोऽपि नियममिमं राजतः प्रचालितमभिलषन्ति । अयि महात्मानोयदि भवन्तो बालविवाहं निरोद्धुमिच्छन्ति चेद् व्यवस्थापिकासभातो निःसृत्य जनतासु कार्य्यं कुर्वन्तु । तत्तज्जातीय, तत्तद्धर्मीय-सभाभिः प्रस्तावमिमं स्वीकार्य्यं प्रचालयन्तु, जनान् सुबोधयन्तु । यावान् प्रयासो भवतां तत्र वाग्युद्धे भवति, ततोऽणुरपि प्रयास एतादृशेषु विषयेषु जनतामध्ये समये समये कृतश्चेन्महान्स्याल्लाभोऽस्य देशस्येति । किम्बहुना एवंभूता विषयाः सनातनधर्म-सभाहिन्दुसभा-प्रभृतिष्वेवोत्थापनीयास्तथा तद्द्वारैवेषां जनतासु प्रचारो विधेयो न राजसभयेति विमृशन्तु स्वपारतन्त्र्यपाशदार्ढ्यम् कथं गज निमीलिकया व्रजन्ति भवन्तो दी[...] पश्यन्तु मा ह्रस्वं परं पश्यन्तु मा परम् ’ ।

भारतीयजनता धर्मदण्डतो यथा बिभ्यति [...] तथा राजदण्डत इति निश्चितं विदन्तु । अतो ध[...] सभाभिः स्वीकारिते बालवृद्धविवाहनिषेधे भ[...] त्येव ताः स्वीकरिष्यन्ति । राजसभया तुशिरस्फोट[...] नापि तत् कारयितुं न पार्य्यते यच्चानायासेनै[...] धर्मसभाभिः साधितं स्याद्दिति ।

* * *

सनातन-धर्मोदयः ।

एतन्नामकं पाक्षिकं राष्ट्र-भाषा-(हिन्दी) प[...] श्रीकाशी-सनातनधर्म-पण्डित-सभायाः मुखपत्ररू[...] श्चेत: काशीतो निःसरति पत्रमिदमचिरेत्वे बहूपका[...] ष्यति सनातनधर्मजनतायामित्यस्माकं धारणा[...] यच्च, इदानीं सर्वेऽपि पत्र-पत्रिका-सम्पादका वर[...] वृद्धं सनातनधर्ममेवाभिक्रामन्ति । तेषां मुखमर्द[...] विदधत् स्ववर्गे च चिरकालतः प्रवृत्तां कुरी[...] कुप्रथां कुसंस्कारमुन्मूलयत् श्रुति-स्मृति-सदाचा[...] प्राप्तं देशकालोपयुक्तं च नियमजातं सर्वेषां पुर[...] प्रस्थापयत् किङ्कर्तव्यविमूढश्च विद्वत्समाजं कार्य[...] क्षेत्रेऽवतारयत् सर्वतो विप्लुतश्च धार्मिकं सम[...] नियमयच्चिरञ्जीव्यादिति श्रीकाशीविश्वेश्वरमभ्य[...] यमानोऽहमस्याभ्युदयं शाश्वतिकं कामयेऽनुरुन्धे[...] सनातनधर्मसमाजमन्यधर्माणश्च यदस्य ग्रहणेन वि[...] ङ्करोत्वखिलधर्म-रहस्यं शास्त्रनिर्दिष्टं स्वीयं कर्तव्[...] ञ्चेति । अस्य प्रवर्त्तकाः पूज्यपादाः पण्डि[...] सम्राजो महामहोपाध्यायाः श्रीप्रमथनाथ तर्कभू[...]

महोदयाः सन्ति । सम्पादकाश्च त एव भवतां परिचिता भूतपूर्व-सुप्रभात-सम्पादकाः श्रीमन्तः पण्डित-केदारनाथशर्माणः सारस्वताः । काशीस्थानाञ्च बहुश्रुतानां विदुषां महामहोपाध्यायपदभाजामत्र लेखास्तिष्ठन्तीत्यपि सुवर्णे गन्धसमवायः । मूल्यं वार्षिकम् २) प्राप्ति-स्थानम्—

व्यवस्थापक-सनातनधर्मोदय, टेढीनीम,
बनारससिटी

* * * *

वाढनगेर सतीत्वपरिणामः ।

सर्वेषामेव समाचारपाठकानां विदितमिदम् । यद् वाढ़नगरे काऽपि सती स्त्री स्वपतौ मृते तच्छरीरमादाय चितामारुह्य स्वीयमपि नश्वरं शरीरमग्नौ हुत्वा भारतीयोज्वलं रत्नं सतीत्वं पुनरपि भारतेऽस्मिन् कलौ प्राचीकशत् । परन्तु तदीयबान्धवानां तत्सतीत्वानुज्ञादानापराधे पाटलिपुत्रन्यायालयतः सपरिश्रमः कारागारे वासोऽभूत् । तत्रैव न्यायपतेर्विचारपद्धतेरालोचनया कतिपयानाम् विहारप्रान्तीयनेतॄणां 'जगत्लाल'-'सर्चलाइट्'-सम्पादक-महोदयानामपि तस्मिन्नेव गृहे सपरिश्रमो वासो जातः । वृत्तमिदमाकर्ण्य कस्यच सनातनधर्मंहितेच्छोर्हृदयं क्रोधेन शोकेन च न क्षुभ्येत । परन्तु केऽपि धर्मशास्त्राचार्य्या अत्र विषये स्वमुखमुद्रां न विघटयन्तीत्येतदेवाश्चर्य्यम् । इदानीं वङ्गीय-ब्राह्मणसभयाऽखिलभारतवर्षीय-ब्राह्मणानां महासम्मेलनं विधातुमुपक्रान्तम् तयैवम्भूतानां विषयाणां विचारो यदि कृतः स्यात्तर्हि स्यादपि तस्याः साफल्यम् । केवलं कोलाहलमात्रेणैव विरतायां तस्यां न भविष्यत्यस्माकं सन्तोषः । अतो वयमनुरुन्धमहे तत्संयोजकान् यदेवम्भूतानां विषयाणां विचारन्तेऽवस्यं कुर्य्युः । पश्यन्तु भारतीयसभ्यताया हृदयं सतीत्वं विद्यते । तस्य रक्षणं यदि भवतामभीष्टञ्चेत्पुनरपि सतीत्वप्रथायाः प्रचाराय यतन्ताम् । तद्विषयकं राजकीयं निरोधनियमञ्चापसारयन्ताम् नो चेत् एकतः सतीत्वनिरोधोऽपरतश्च पुरुषबहुविवाहानिरोधोऽन्यतश्च कामवासनावृद्धिकरवैदेशिकसभ्यता-प्रचारोऽपरतश्चभवदनुमोदितपुंस्त्वविघातकबालविवाहवृद्धविवाह-प्रसार इत्येते समुदिताः कारणकलापा आर्य्यनारीणां चरित्रगौरवं हठाद्विनाश्य व्यभिचारमुत्कर्षयन्तो भ्रूणहत्यादिमहापापान् समेधयन्तो यवनसंख्यां वर्द्धयिष्यन्त्येवेति शृण्वन्तु सत्यमप्रियम् ।

समालोचनासारः ।

स्तुति-कुसुमाञ्जलिः—

श्रीमज्जैनाचार्य श्रीदेवचन्द्र सूरिभिर्विरचितेयं स्तुतिः पार्श्वचन्द्रसूरीश्वराणां हेमचन्द्रसूरीश्वराणाञ्चाष्टकप्रयुक्ता अतीव सरससरलैः भावभूषितैः पदैरलंकृता सर्वैरेव तदुपासकैरन्यैश्चापि सज्जनैरवश्यं द्रष्टव्येति । तत्प्राप्तिस्थानम्:—

श्रीहेमचन्द्रसूरि,
जैन-पुस्तकालय, बीकानेर (राजपूताना)

या महाशक्तिः प्रादुर्भूता तामेव सर्वतः पवित्रतमया तपश्चर्यया प्राप्तुं प्रयतन्ते स्म। भगवत्याः पार्श्वद्वये सरस्वतीलक्ष्मीगणेशानां मूर्तिं पश्यामः, सरस्वती कला तथा विद्याऽस्ति विघ्नराजो विज्ञानमूर्तिश्चेति। पूर्णशक्त्युपासकैर्विद्यायास्तथा कलाया विज्ञानस्य चोन्नतिः करणीया। अथ तावद्देशस्य सुखसमृद्धये श्रीमहालक्ष्मीमूर्तेर्भावसाधनं कर्तव्यम्। इदमेव शक्तिपूजाया मुख्यरहस्यम् शक्त्युत्पादनस्य साधनश्चास्ति। तेषामनुष्ठानं शारदीयनवरात्रे महिषासुरमनोविकाराणां विनाशनेऽजायत। इदमेव शारदीयनवरात्रस्य महत्वमप्यस्ति। पुराऽमन्यतास्माकं पूर्वजैरपि विजयादशमी, अस्माभिरपि साम्प्रतं मन्यते। तैर्वास्तविकी विजयादशमी मन्यते स्म। सांप्रतमस्माभिस्तस्याः प्रतिविम्बमात्रमपि मानयितुं न शक्यते। अद्य वयं विजययात्राया वार्तामपि ध्यातुं न शक्नुमः। यतो वयं निर्बलाः स्मः। विजययात्रा निरन्तरं न भवति। किन्तु शक्तेरावश्यकताऽत्रास्ति। यतोऽनया विनाऽऽत्मरक्षामपि कर्तुं न कोऽपिशक्तः। साम्प्रतमस्माभिरप्यात्मरक्षा कर्तुं न शक्यते। एतत्प्रत्यक्षम्। वयं बलशालिनो भवेम इति विजयादशमी मानयितव्या। प्राक्काले विजयादशम्यां परस्परं मिलनस्य व्यवस्थाऽऽसीत्, सांप्रतमपि कतिषुचित् स्थानेष्वेवमेवास्ति। वयमपिमिलामोऽधुना विभिन्नैः परिवारैः सम्बन्धिभिश्च। विजयादशमी केवलं पारिवारिकमहोत्सवो नास्ति किन्तु राष्ट्रमहोत्सवोऽयं हिन्दूजात्याः सर्वासां व्यक्तीनामन्तर्गतानां विभिन्नसंप्रदायानां च परस्परं मिलनस्य व्यवस्था कर्तव्या। विजयादशम्याः सङ्गमे स्पृश्यास्पृश्यभेदोऽपि दूरीभवति विन्ध्याचलादिषु बहुत्र देव्यालये सर्वेऽपि स्पृश्यास्पृश्याः परस्परं सङ्घर्षमाचरन्तो देवीमर्चन्ति।

हिन्दुजातौ संमिश्रणेन शक्त्युत्पन्नार्थमेव अस्योत्सवस्य सृष्टिर्जाता। यस्यभग्नावशेष एवायं य कुत्रचनोपलभ्यते। अधुनापि हिन्दुराजानां साधारणतः सर्वेषां क्षत्रियाणामयं महोत्सवः क्षात्रधर्मस्य भावं प्रकटयति। प्रायोऽत्र खड्गस्य पूजा भवति, मल्लयुद्धस्यायोजनं जायते, व्यायामालयस्य (अखाड़ा) व्यवस्था क्रियते। किन्तु साम्प्रतमिमानि कार्याणि नष्टप्रायाणि दृश्यन्ते। किं बहुना, एषां सार्वजनिकरूपं च नष्टमभूत् हिन्दुजातिः धर्मप्रधाना जातिः किन्तु धर्मत्राणाय देशरक्षार्थं च वीरजातिरप्यासीदिति। अतः खल्वस्या अन्यगुणानां यथावश्यकताऽस्ति, तथैवास्या जातेरस्त्रबलस्याप्यावश्यकताऽस्ति। बहुधा पश्यामो वहवः खलु हिन्दुयुवका यवनानां पैगम्बरोत्सवे (ताजिया) यवनव्यायामस्थाने गच्छन्त्यन्योन्यं बाहुयुद्धं व्यायामञ्च कुर्वन्ति। तस्मिन्समये यवनदेवलकैरन्यैरपि यवनैःशिल्पकार-काम्बविक-लोहकारादिभिः हिन्दुयुवका यवनमतावलम्बिनः क्रियन्ते। यवनैश्च प्रतिव्यक्ति नियमोऽयं कृतोऽस्ति यत् स्वजीवने दश हिन्दवो यवनमते कर्तव्याः। मान्या भारतीयाः! अतोऽयंदशमीमहोत्सवः श्रीमद्भिः पुनरपि स्वहृदे स्थापनीयः पुनरपि श्रीदुर्गा देवी शुद्धैः स्वदेशजैर्वस्त्रैः शक्तिसञ्चयायैव पूजयितव्या वयंतु मन्यामहे यद्येवमेव भारते पुनरपि बलवृद्ध्यै प्रतिग्रामं व्यायामशालाप्रभृतयो विनिर्मेया येन स्यात् पुनर्विजयो भारत-वसुन्धराया इति निगद्य विरमति भवतां विधेयः।

सम्पादकीयम्

व्यवस्थापिकासभायामनधिकारचर्चा

इदानीं व्यवस्थापिकासभायां श्रीहरिसिंह गौडमहाशयेन श्रीहरविलासशारदा महोदयेन च क्रमशः विवाहसम्बन्धविच्छेदविषये विवाहकाल-नियमविषये च नियमौ निर्मापयितुं प्रस्तावद्वय-मुपस्थापितम् यदाशयश्च क्रमश एवं विद्यते—

तत्र प्रथमे यदैव दम्पत्योर्मध्ये कश्चन विवाद उपतिष्ठेत् उत कोऽपि दोषः स्त्रिया पुरुषे उपलक्षितश्चेद्वा आहो पुरुषेण स्वपत्न्याः कश्चनामर्षणीयो दोषो दृष्टश्चेत्तर्हि उभाभ्यामपि यथेच्छं विवाह-सम्बन्ध-त्यागः परस्परं कर्तुं पार्य्यते । तत्र राजनियमतस्ताभ्यामन्योऽन्यसम्बन्धत्यागं कृत्वा स्त्रिया च पुरुषान्तरेण पुरुषश्च स्त्र्यन्तरेण पुनः सम्बन्धः कर्तुं पार्य्यत इति ।

द्वितीये च—चतुर्दशवर्षतो न्यूनवयस्कायाः कन्यायाः परिणयं कर्त्ता कारयिताऽनुमोदकस्त-त्संस्कारकर्ता पुरोधाश्च, एवमष्टादशवर्षतो न्यून-वयसो बालकस्य परिणयं कर्त्ता कारयिता तत्सं-स्कारकश्च पुरोहितोऽर्थदण्डेन कारागारवासदण्डेन च दण्डिता भविष्यन्तीति ।

अत्र विषये ममेयानेव वक्तव्यो विद्यते यत् क इमे एवंभूतानां नियमानां निर्मातारः प्रस्तावका वा यतो हि भारतमहाराज्ञ्या श्रीव्यक्तोर्जया (विक्टो-रिया) देव्या त्वेवं प्रतिज्ञातमस्ति यन्नाहमार्य्यधर्मे हस्तक्षेपं करिष्यामि, नापि मदुत्तराधिकारिण इति' एवं सति मध्ये मध्ये व्यवस्थापिकासभायां श्रीगौड-श्रीशारदामहाशय-प्रभृतीनां धार्मिकविषये नियमादिनिर्मापणप्रयासोऽनधिकृतिचर्चैव प्रति-भाति । नियमोऽयं समीचीनोऽसमीचीनो वेति विचारणायामपि प्रथमनियमस्तु भारतीय-संस्कृति-विनाशक एव। यतो हि आर्य्यधर्मे दाम्पत्यबन्धनं हि धार्मिकं बन्धनम् । न केवलमैहिकोपभोगायैवा-र्य्याणां भवति विवाहबन्धनम् । किन्तु संसारया-त्रापारमासादयितुं वैदिककर्मकाण्डादिविधान-योग्यतालाभायैवेति । अपरञ्च लौकिकविचारे-णापि दाम्पत्यप्रेम्णः स्थैर्य्यं यथा सम्बन्धाविच्छेद-नियमे भवति, न तथा, सति सम्बन्धविच्छेदनि-यमे पश्यन्तु पाश्चात्यदेशेषु प्रतिदिनमीदृशैरेवा-भियोगै र्न्यायालयाः सम्भृता भवन्ति । तत्र तु गार्ह-स्थ्यसुखं दुःखबहुलमेव भवति । पत्नी कथयति यत् मम पतिर्मे हस्ते मोदकमदत्वा ममाग्रे निहितवा-नतोऽहम् पत्यन्तरं करिष्यामि । एका कथयति यन्मम जन्मदिनोत्सवे मे पति र्मह्यं किञ्चिदुपा-यनं बहुमूल्यं नाददतोऽहं तं विहाय पत्यन्तरं करि-ष्यामि । इत्यादि । किमिमामेव दशामत्रापि द्रष्टुमिच्छति गौडमहोदयः ? श्रूयते प्रस्तावोऽयं

स्थगितो भूदिति । अहो भारतभाग्यत एव प्रस्तावोऽयन्नोपस्थितः संसदि, नो चेदेकतो विलुप्तगौरवस्यास्य देशस्यायं द्वितीयो गण्डस्योपरि विस्फोटकः सम्वृत्तः स्यादिति ।

द्वितीयः शारदीयः प्रस्तावस्तु उपस्थित एवास्ति संसदि । सोऽपि तु महानर्थकारी । यद्यपि आधुनिकीं वालविवाहप्रथां दर्शं दर्शं तु सर्वेऽपि विज्ञा देशकालविदस्तत्समर्थका एव । परन्तु नायं पन्था वालविवाह-निरोधस्य साधीयान् । एवन्तु अनर्थपरम्परैवोदेष्यति । यतोहि आधुनिकी शासनपद्धति र्नास्माकं कल्याणमीहते, अपि तु स्वहस्तप्रसारमेव । एवं कृते तस्या एव वलवृद्धि र्भवति इदमस्त्रप्रदानेन । अस्त्रमिदमासाद्य सास्माकं धार्मिककृत्येऽपि पादं प्रसारयिष्यति । तत्रापि उत्कोचादिदानादाने प्रचलिष्यतः, येन दैनन्दिनं भारतस्य नैतिकवलह्रासश्चरित्रपातश्च स्यादेवेति । आश्चर्य्यन्तु मामिदम्प्रतिभाति यत् स्वराज्याभिलाषुकाः 'लाला' 'लाल' प्रभृतयोऽपि नियममिमं राजतः प्रचालितमभिलषन्ति । अयि महात्मानोयदि भवन्तो वालविवाहं निरोद्धुमिच्छन्ति चेद् व्यवस्थापिकासभातो निःसृत्य जनतासु कार्य्यं कुर्वन्तु । तत्तज्जातीय, तत्तद्धर्मीय-सभाभिः प्रस्तावमिमं स्वीकार्य्य प्रचालयन्तु, जनान् सुवोधयन्तु । यावान् प्रयासो भवतां तत्र वाग्युद्धे भवति, ततोऽणुरपि प्रयास एतादृशेषु विषयेषु जनतामध्ये समये समये कृतश्चेन्महान्स्याल्लाभोऽस्य देशस्येति । किम्बहुना एवंभूता विषयाः सनातनधर्म-सभाहिन्दुसभा-प्रभृतिष्वेवोत्थापनीयास्तथा तद्द्वारैवेषां जनतासु प्रचारो विधेयो न राजसभयेति विमृशन्तु स्वपारतन्त्र्यपाशदार्ढ्यम् । कथं गज निमीलिकया व्रजन्ति भवन्तो दीर्घं पश्यन्तु मा ह्रस्वं परं पश्यन्तु मा परम् ' ।

भारतीयजनता धर्मदण्डतो यथा विभ्यति न तथा राजदण्डत इति निश्चितं विदन्तु । अतो धर्मसभाभिः स्वीकारिते वालवृद्धविवाहनिषेधे झटित्येव ताः स्वीकरिष्यन्ति । राजसभया तु शिरस्फोटने नापि तत् कारयितुं न पार्य्यते यच्चानायासेनैव धर्मसभाभिः साधितं स्यादिति ।

* * *

सनातन-धर्मोदयः ।

एतन्नामकं पाक्षिकं राष्ट्र-भाषा-(हिन्दी) पत्रं श्रीकाशी-सनातनधर्म-पण्डित-सभायाः मुखपत्ररूपेणैतः काशीतो निःसरति पत्रमिदमग्रत्वे बहूपकरिष्यति सनातनधर्मजनतायामित्यस्माकं धारणा । यच्च, इदानीं सर्वेऽपि पत्र-पत्रिका-सम्पादका वराकं वृद्धं सनातनधर्ममेवाभिक्रामन्ति । तेषां मुखमर्दनं विदधत् स्ववर्गे च चिरकालतः प्रवृत्तां कुरीतिं कुप्रथां कुसंस्कारमुन्मूलयत् श्रुति-स्मृति-सदाचारप्राप्तं देशकालोपयुक्तं च नियमजातं सर्वेषां पुरतः प्रस्थापयत् किङ्कर्तव्यविमूढश्च विद्वत्समाजं कार्यक्षेत्रेऽवतारयत् सर्वतो विप्लुतश्च धार्मिकं समाजं नियमयच्चिरञ्जीव्यादिति श्रीकाशीविश्वेश्वरमभ्यर्थयमानोऽहमस्याभ्युदयं शाश्वतिकं कामयेऽनुरुन्धे च सनातनधर्मसमाजमन्यधर्माणश्च यदस्य ग्रहणेन विद्वाङ्करोत्वखिलधर्म-रहस्यं शास्त्रनिर्दिष्टं स्वीयं कर्तव्यञ्चेति । अस्य प्रवर्त्तकाः पूज्यपादाः पण्डितसम्राजो महामहोपाध्यायाः श्रीप्रमथनाथ तर्कभूषण-

महोदयाः सन्ति । सम्पादकाश्च त एव भवतां परिचिता भूतपूर्व-सुप्रभात-सम्पादकाः श्रीमन्तः पण्डित-केदारनाथशर्माणः सारस्वताः । काशीस्थानाञ्च बहुश्रुतानां विदुषां महामहोपाध्यायपदभाजामत्र लेखास्तिष्ठन्तीत्यपि सुवर्णे गन्धसमवायः । मूल्यं वार्षिकम् २) प्राप्ति-स्थानम्—

व्यवस्थापक-सनातनधर्मोदय, हैढीनीम,

बनारससिटी

* * * *

वाढनगेर सतीत्वपरिणामः ।

सर्वेषामेव समाचारपाठकानां विदितमिदम् । यद् वाढ़नगरे काऽपि सती स्त्री स्वपतौ मृते तच्छरीरमादाय चितामारुह्य स्वीयमपि नश्वरं शरीर मग्नौ हुत्वा भारतीयोज्वलं रत्नं सतीत्वं पुनरपि घोरेऽस्मिन् कलौ प्राचीकशत् । परन्तु तदीयबान्धवानां तत्सतीत्वानुज्ञादानापराधे पाटलिपुत्रन्यायालयतः सपरिश्रमः कारागारे वासोऽभूत् । तत्रैव न्यायपतेर्विचारपद्धतेरालोचनया कतिपयानाम् विहारप्रान्तीयनेतॄणां 'जगत्लाल'-'सर्चलाइट्'-सम्पादक-महोदयानामपि तस्मिन्नेव गृहे सपरिश्रमो वासो जातः । वृत्तमिदमाकर्ण्य कस्यच सनातनधर्महितेच्छोर्हृदयं क्रोधेन शोकेन च न क्षुभ्येत । परन्तु केऽपि धर्मशास्त्राचार्य्या अत्र बिषये स्वमुखमुद्रां नविघटयन्तीत्येतदेवाश्चर्य्यम् । इदानीं वङ्गीय-ब्राह्मणसभयाऽखिलभारतवर्षीय-ब्राह्मणानां महासम्मेलनं विधातुमुपक्रान्तम् तयैवम्भूतानां विषयाणां विचारो यदि कृतः स्यात्तर्हि स्यादपि तस्याः साफल्यम् । केवलं कोलाहलमात्रेणैव विरतायां तस्यां न भविष्यत्यस्माकं सन्तोषः । अतो वयमनुरुन्ध्महे तत्संयोजकान् यदेवम्भूतानां विषयाणां विचारन्तेऽवस्यं कुर्य्युः । पश्यन्तु भारतीयसभ्यताया हृदयं सतीत्वं विद्यते । तस्य रक्षणं यदि भवतामभीष्टञ्चेत्पुनरपि सतीत्वप्रथायाः प्रचाराय यतन्ताम् । तद्विषयकं राजकीयं निरोधनियमञ्चापसारयन्ताम् नो चेत् एकतः सतीत्वनिरोधोऽपरतश्च पुरुषबहुविवाहानिरोधोऽन्यतश्च कामवासनावृद्धिकरवैदेशिकसभ्यता-प्रचारोऽपरतश्चभवदनुमोदितपुंस्त्वविघातकबालविवाहवृद्धविवाह-प्रसार इत्येते समुदिताः कारणकलापा आर्य्यनारीणां चरित्रगौरवं हठाद्विनाश्य व्यभिचारमुत्कर्षयन्तो भ्रूणहत्यादिमहापापान् समेधयन्तो यवनसंख्यां वर्द्धयिष्यन्त्येवेति शृण्वन्तु सत्यमप्रियम् ।

——

समालोचनासारः ।

स्तुति-कुसुमाञ्जलिः—

श्रीमज्जैनाचार्य श्रीदेवचन्द्र सूरिभिर्विरचितेयं स्तुतिः पार्श्वचन्द्रसूरीश्वराणां हेमचन्द्रसूरीश्वराणाञ्चाष्टकप्रयुक्ता अतीव सरससरलैः भावभूषितैः पदैरलंकृता सर्वैरेव तदुपासकैरन्यैश्चापि सज्जनैरवश्यं द्रष्टव्येति । तत्प्राप्तिस्थानम्:—

श्रीहेमचन्द्रसूरि,

जैन-पुस्तकालय, वीकानेर (राजपूताना)

प्रश्नोत्तरी—

इयं हि परिव्राजकाचार्य्य जगद्गुरु श्रीमच्छङ्करा-चार्य्यपादैर्विरचिता ।

वेदान्तविषयविबोधिनी सा सान्वय-हिन्दीभाषाविभूषिता प्रश्नोत्तरी सर्वैर्मुमुक्षुभिः साधुभिः संसारसागर-निमज्जद्भिर्जनैश्चावश्यमेव द्रष्टव्या । अस्याः सम्पादकष्टीकाकारश्च 'साहित्य-शास्त्री, पं० श्रीसरयूप्रसाद पाण्डेयः (द्विजेन्द्रः) काव्यतीर्थ विशारदः' । समुचितया टिप्पण्या बहुमूल्यतामधिगतवत्या अप्यस्याः मूल्यं सुतरां न्यूनतरं पणषट्कमेव । अतो ग्रहेप्सुभिरधोलिखितेन संकेतेन गृहेलिमा । प्राप्तिस्थानम्ः—

मास्टर खेलाड़ीलाल, संस्कृत-बुकडिपो, काशी ।

—श्रीशिवकुमार शास्त्री ।

हिन्दू-पञ्च ।

साप्ताहिक-पत्रस्यास्य श्रीकृष्णजन्मोत्सवोपलक्षे प्रकाशितोऽतीव मनोहरः सहृदय-हृदयानन्द-सन्दोहजनकः सम्पादन-कलाकलितो रसिकजनमनोरञ्जको विविध-विषय-विभूषितो गद्य-पद्यपुष्पितो हृदयहार इव सचित्रोऽयं श्रीकृष्णाङ्कः श्रीकृष्णाङ्कं विभूषयतीति हर्षास्पदं राष्ट्रभाषाऽभिज्ञानां सहृदयपाठकानाम् ।

अस्य च स्तम्भगा लेखाः कविताश्च सर्वाः सर्वेषां सहृदयानां सन्तोषमावहन्तीति सम्पादक-पाटवविलसितम् । अङ्कस्यास्य मूल्यमपि स्वल्पमेवाष्टाणकमात्रम् । अतो वै सर्वैं राष्ट्रभाषोदयाभिलाषुकैरयमङ्को द्रष्टव्य इत्यस्माकमभीप्सितम्—

—'द्विजेन्द्रः' (स० सम्पादकः) ।

संस्कृत-समाचाराः

[१९२९ तमे खिस्ताब्दे पुनर्युद्धम्]

विचित्रा गणना ।

भारतवर्षे किमपि महायुद्धमागामिनि १९२९ तमे खिस्ताब्दे भविष्यतीति कश्चिद्दैवज्ञः प्रोक्तवान् । युक्तयश्च तेनैवं प्रोक्ताः—१८५७ तमे खिस्ताब्दे भारतवर्षे किमपि युद्धं प्रावर्ततेति सर्वेऽपि जानन्ति । तत्संवत्सरीय-संख्याङ्कानां १+८+५+७=सङ्कलने २१ एकविंशतिर्भवति । अस्याश्च संख्यायाः १८५७ संख्यया योगे १८७८ भवति, तिस्मन्वर्षे वङ्गप्रदेशे किमपि युद्धमभूत् । अथ चैतत्संख्यागताङ्कानां १+८+७+८=योगे २४ लभ्यते । पूर्वसंख्ययास्या योगे १९०२ भवति । अस्मिंश्चापि वर्षे वङ्गेषु प्रजानां राज्यशासक-विरूद्धमान्दोलन मुद्भूतं वङ्ग-विच्छेदमूलकम् । अथ त्वैतत्संख्यागताङ्कानां सङ्कलने १+९+०+२=१२ लभ्यन्ते, पूर्वसंख्ययास्य योजने १९१४ भवति । अस्मिन्वर्षे ब्रिटिशराज्य-शासकानां पाश्चात्यमहायुद्धे योगः कर्त्तव्यो ऽभूत । अथैतत्संख्याङ्कानां सङ्कलने १+९+१+४=१५ । लभ्यन्ते । अस्य तु पूर्वसंख्यया योजने १९२९ भवति । अतो वै पूर्वानुभव-संगृहीतव्याप्त्यनुरोधेन तस्मिँश्च वर्षे युद्धमवश्यं भावीति गम्यते । ततश्चापि परं १९५० तमे वत्सरे भवितुमर्हति । १+९+२×९=२१ संख्यायाः १९२९ संख्यया योजने १९५० लभ्यते । इतित्ववगन्तव्यम् ।

—*—

सिर्फ १२) में रसवैद्य

शीघ्रता कीजिये! रसयोगसार नया ग्रन्थ खरीदिये!

निर्माता—वैद्य पं० हरिप्रपन्नजी शर्मा

इस ग्रन्थमें तमाम रस-प्रयोगोंका संग्रह है और सरल हिन्दी भाषानुवाद है। कठिन स्थलों पर टिप्पणी दी गयी है। इसके उपोद्घातमें आयुर्वेदका सम्पूर्ण इतिहास है, उसके साथ २ पाश्चात्य शरीर विज्ञानकी तुलना भी की गयी है। उपोद्घात-सहित पृष्ठ संख्या १००० के लगभग है। इस ग्रन्थ में १०८ ग्रन्थोंसे (हस्तलिखित ५५ मुद्रित ५३) रस-प्रयोगोंका संग्रह किया गया है। इसका ३०० पृष्ठोंका संस्कृत और अंग्रेजीमें लिखा हुआ उपोद्घात वैद्य डाक्टरोंके लिये तो बड़ा ही उपयोगी है। अतः इस ग्रन्थको अवश्य प्रत्येक मनुष्योंको अपने पास एवं सार्वजनिक पुस्तकालयों में रखना चाहिये॥ बढ़िया जिल्द होने पर भी कीमत १२) डाक खर्च अलग। चतुर्थांश मूल्य पेशगी भेजना चाहिये।

मिलने का पता :—
वैद्य पं० हरिप्रपन्नजी,
श्रीभास्कर-औषधालय, तीसरा भोईवाड़ा, बम्बई।

अतीत—१९८१-८२-८३-८४ सम्वत्सराणाम्

सुप्रभातम्।

प्रथमवर्षस्य—१९८१

शोभनबन्धैः पुस्तकाकृत्या निबद्धम्। मूल्यम्—६) षण्मुद्राः। मार्गव्ययः पृथङ्नास्ति

द्वितीयवर्षस्य—१९८२

प्रथमाब्दवदतिमनोहरबन्धबद्धम्। मूल्यम्—५) पञ्चमुद्राः। मार्गव्ययः पृथङ्नास्ति।

तृतीयवर्षस्य—१९८३

पूर्ववद् बद्धम्। मूल्यम् ३॥) सार्द्धमुद्रात्रयम्। मार्गव्ययः पृथक् ।≡)।

चतुर्थवर्षस्य—१९८४

अतिमनोहरमिदम् निबद्धम्। मूल्यम् ३॥) सार्द्धमुद्रात्रयम्। मार्गव्ययः पृथक् ॥)

प्रकीर्णाङ्काः

प्रकीर्णाङ्काः स्वल्पा एव विद्यन्ते। येषाम्पार्श्वे कस्यचनाङ्कस्याभावो भवेत्ते नूनं शीघ्रतां कुर्वन्तु।

प्रथमवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणकचतुष्टयम्। अङ्काः—आदर्शः, १, ४, ९, ११, १२।

द्वितीयवर्षस्य—प्रत्येकाङ्कस्य मूल्यम्—≡) आणकत्रयम्। अङ्काः—२, ३, ५, ६, ७, ८, ९, ११, १२।

तृतीयवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—=) आणकद्वयम्, अस्य सर्वेऽप्यङ्काः सन्ति।

चतुर्थवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणकचतुष्टयम्। अस्य सर्वेऽप्यङ्काः सन्ति।

प्रकीर्णाङ्कानां मार्गव्ययो निर्धारितमूल्यतः पृथगेव। जिघृक्षुभिस्त्वरा कार्या। पत्रव्यवहारसङ्केतः—

व्यवस्थापकः—

सुप्रभात-कार्यालयः, काशी

(Benares City)

सचित्रम् सामुद्रिक-रहस्यम् ।

ले०—श्रीकालिकाप्रसादशर्म्मा, राजज्योतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथा नवीनमेव । एतेन हस्तरेखाणां गुरुं विनैव सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि कोक्कोक विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनी-प्रभृतीनां स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि, तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वस्वविधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्य्यः

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दीभाषायां निबन्धलेखनेऽनुवादादिज्ञाने महत्सौकर्यं स्यात् मूल्यम्—आणकषट्कम् । मार्गव्ययः—=)

सूर्यचरितम् वा ऋतुचरितम् ।

ले०—तारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः।

गोलविद्या-विषयकं नूतनं महाकाव्यम् ।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः । गोलविषये नूतनं संस्कृत-महाकाव्यम् । सर्वथा द्रष्टव्यम् । मूल्यम्—१) मार्गव्ययः पृथक् ।

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-तीर्थः

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया बालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृतकाव्येषु नाटकेषु पुराण-पुस्तकेषु च समागतानां देशानां नदीनां स्थानानां पर्वतानाञ्चाधुनिकी स्थितिस्तेषां नामानि च सन्ति । सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् ॥) आणकाः ।

महाकवि बाणभट्टः ।

लेः—भू०पू० सुप्रभात-सम्पादकः श्रीकेदारनाथ शर्मा

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र बाणभट्टस्य जीवनविषये महत्वपूर्णा, अननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारकोऽयं नवन्ध-बन्धः । मूल्यम् =) मार्गव्ययः -)

सर्वेषां प्राप्तिस्थानम्—

मैनेजर, सुप्रभात कार्यालयः, बनारस-सिटी ।

Published by Gaurinath Pathak and prin ted bs Rameshwar Pathak at the Tara Printing Works, Benares.

सौरकार्तिके १९८५ वैक्रमाब्दे ।

पञ्चमवर्ष Vol. 5

November 1928.

सप्तमोऽङ्कः No. 7

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिमुदस्यद् भेदतारा विलुम्पन्-नयदधिसुरभाषाभाषि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती, साहित्य-वारिधिः

सम्पादकः—

दर्शनकेसरी श्रीगोपालशास्त्री त्रिपाठी "साहित्याचार्य्यः"

व्यवस्थापकः—

श्रीगिरीशशुक्लः, "न्यायाचार्यः"

वार्षिकम्मूल्यम्—३)
माननीयेभ्यः—१२)

छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

अस्याङ्कस्य मूल्यम् ।)

इत्थमिह प्रतिविधीयते—

अत्र तावत्तर्कतीर्थमहोदयेनाकाण्ड एव स्वतार्किकतां परिचाययता प्रसिद्धत्वेन विषयमननुमित्सोरपि वाक्ये न्यायत्वमारोप्याप्राप्तकालत्वेन परं निजिघृक्षुणाऽऽत्मैव निरनुयोज्यानुयोगेन न्यग्राहीति प्रथमग्रासे मक्षिकापातमनुहरति,

प्रसिद्धिश्च सहस्रनामस्तवघटकनामनिष्ठवाचकताया मूलकारस्यैव तृतीयपरिच्छेदेऽधिकारिनिरूपणे "यतस्तद्विषया मतिः" इत्युपक्रम्य; "हरेर्नामपदैस्तद्वाचकैः शब्दैः" इत्युपसंहारादरैः; टीकाकृतश्चारम्भ एव "षष्ठ्या च संबन्धवाचिन्या वाचकत्वम्" इति वाक्येन; अभिधायकनामानुशासनपरकोशादिघटकविष्णुनारायणकृष्णादिपदेषु भगवद्वाचकतायां कस्याप्यविमतेर्निष्प्रत्यूहैवेत्यपि सुधिय एव विचारयन्तु,

यत्तु प्रथमकिञ्चेत्यादिना-अवाचकत्वमननूद्य; कृतमबोधकत्वानुवादमाक्षिपता तीर्थेनानावश्यकव्याप्तिज्ञताहेवाक आरब्धः सोऽपि प्रेक्षावद्वासाक्ष्पदमेव—

शब्देष्वर्थबोधकतायां शक्तिलक्षणाऽन्यतरप्रयुक्तत्वस्य सर्वतन्त्रसिद्धान्तसंमततायां; स्तवादिघटकनाम्नां लक्षणाया भगवद्बोधकतायाः श्रुतिस्मृतिपुराणादिभिरननुमोदिततायां च तेषां तदबोधकत्वंतदवाचकत्वापर्यवसायीति कथंकारमनुन्मत्तोऽङ्गीकुर्यादित्यस्मिन्नर्थे किं साक्षित्वे पाठका मूकायिष्यन्ते ?

यत्तु-द्वितीयकिंचेत्यादिना—छलप्रक्रियाशरणीकरणेनात्माऽऽयास्यते स्म तीर्थेन; तत् किमर्थमिति न वयं जानीमः,

अत्र हि टिप्पणीस्थं "तेषां नाम्नाम्" इति पदद्वयं त्यक्त्वा; स्वकल्पितव्याप्त्याभासमवलम्ब्य नमस्मदीयव्याप्तित्वेन प्रख्याप्य साधु तीर्थताया आदर्शो दर्शितः,

यत उपक्रमोपसंहारादिग्राहिततात्पर्यज्ञानादि घटितसामग्रीनिबन्धनबोधेच्छयोच्चारितशब्दात्तादृश बोधानुत्पादे. तादृशशब्दस्य वैयर्थ्यं दुर्निवारमेव

न हि लोके प्रयोजनसामान्याभावमेवोपलभ्य व्यर्थशब्दो व्यवह्रियते "न हि बीजप्रयोजनार्थां विना" इत्यादिन्यायेनासंभवात्; किन्तु स्वाभिमत प्रयोजनाभावज्ञानात्; तस्मात्प्रकृते विशेषतात्पर्ये प्रयुक्ते व्यर्थशब्दे; सामान्यतात्पर्येण प्रत्यवस्थानं छल रूपमसद्‌ वर्त्म नातिक्रामस्यति,

भवति च भगवद्विषयकबोधजनकत्वतात्पर्ये प्रयुक्ते सहस्रनामस्तवघटकनाम्नि तदबोधकत्वं वैयर्थ्यव्याप्यम् ,

यदपि तृतीयकिंचेत्यादिना-स्तवघटकनाम्नां भगवद्बोधकत्वमुपगम्योच्चारणमात्रेणादृष्टद्वारा पा पनाशकत्वादिकथनं; तदपि शास्त्रविरुद्धत्वात् च्छमेव

तादृशनाम्नां तदबोधकत्वोक्तौ न किमपि प्रमाणं; प्रत्युत श्रीविष्णुसहस्रनामस्तवारम्भे महाराजयुधिष्ठिरेण "स्तुवन्तः कम्" इत्यादि पृष्टे पितामहगाङ्गेयेनोत्तरितं "जगत्प्रभुं स्तुवन्नामसहस्रेण" इत्यादि; "सर्वदुःखातिगो भवेद्" इत्यन्तं ग्रन्थं "नामसहस्रेण स्तुवन् गुणकीर्त्तनं कुर्वन्" तथा "निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणाद्" इति विष्णुधर्मोत्तरोक्तवाक्यं प्रमाणयतां "षष्ठीगुणक्रिया जातिरूढीनां शब्दप्रवृत्तिहेतूनां संभवात् सर्वे शब्दा

परस्मिन् पुंसि प्रवर्त्तन्ते" इत्थं व्याचक्षाणानां-श्रीशंकराचार्य्यपादानामुक्तयस्तद्बोधकत्वप्रतिष्ठापनपरा एव जाग्रति

स्तवघटकनाम्नामवाचकत्वे हि भगवन्निष्ठगुणादीनां भगवत्तत्तन्नामप्रवृत्तिनिमित्तत्वोक्तिः स्पष्टमेव विरुद्धा भवेत्, तस्मात्तेषां तदीयतत्त्वे स्थिते भगवतोऽपि वाच्यत्वं दुरपन्हवं, " वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वस्यैव प्रवृत्तिनिमित्तलक्षणत्वात्, ततश्चावाचकत्वोक्तिरसूयाऽऽदिप्रयुक्तदुराग्रहमूला; शास्त्रज्ञानवैधुर्यनिबन्धना वा नास्त्यत्राणुरपि विचिकित्सा

एतेन प्रथमकिञ्चोक्तौ भगवदवाचकत्वेऽपि बोधकत्वं लक्षणाऽऽदिना स्यादित्युक्तिरप्यव्युत्पन्नतां-द्रढयति

यच्चोच्चारणद्वाराऽदृष्टेत्याद्युक्तं; तदप्यसंगतं,-भगवन्नाम्नामुच्चारणद्वाराऽदृष्टजनकता तदैव स्याद् यदा भगवद्विषयकबोधजननसामर्थ्यं तत्र स्याद्, अन्यथा विश्वादिनाम्नां भगवत्संबद्धत्वमेवाप्रामाणिकं प्रसज्येत,

यच्चेत्याद्याक्षेपोऽप्यसमञ्जस एव संभाव्यमानार्थस्याक्लृप्ततयाऽनुवाद्यत्वानर्हत्वाद्

यच्चेत्याद्याक्षेपोऽप्यसूयाकलुषित एव, टिप्पणीस्थलेखात् स्फुटमेतदवगम्यते यत् शक्यसंबन्धो-लक्षणा चेद् ? यस्मिन् पदे शक्तिरेव किंचिन्निरूपिता नास्ति तत्र किंचिन्निरूपिता लक्षणाऽप्यसंभवेति निरूपकभेदतात्पर्येण निर्दिष्टविषये निरूपकैक्यमास्थाय पर्य्यनुयोगश्छलपद्धतिमध्यास्ते न वेति निरपेक्षप्रेक्षावन्तः परिशीलयन्तु,

यच्च वाचकत्वशक्त्योरैक्याक्षेपः सोऽप्यत्यन्तं-हेयः, शक्त्याऽर्थविषयकबोधजनकत्वं वाचकत्वमुच्यते, तथा च व्यापारस्य व्यापारिनिष्ठधर्ममात्रेणैक्यमेवेति केनानुभवेन तीर्थेनाधिगत इति तादृशा एव ज्ञातुमलम्,

यच्च तथा हीत्यादिना-आक्षेपे स्तोत्राद्बहिस्तेषामुच्चारणं पापक्षयसाधनमित्यत्र शास्त्रप्रमाणाभावादित्युक्तं तदपि नितान्तशास्त्रानभिज्ञतासाधकं-

"सर्वरोगोपशमनं सर्वोपद्रवनाशनम् ।
शान्तिदं सर्वरिष्टानां हरेर्नामानुकीर्त्तनम्" इति
"सर्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ।
यद्वाऽभिरोचते नाम तत्सर्वार्थेषु योजयेद्",

इत्यादिप्रमाणैर्भगवन्नामोच्चारणं पापक्षयकारीत्यर्थस्य स्पष्टप्रतिपत्तेः,

यत्तु टीकाकृदाशयवर्णनं तदपि स्वदोषस्य परत्रार्पणजातीयं, न हि टीकाकारोऽस्त्येतादृगनवधानवान् यत्स्वयं बहुत्र पूर्वोक्तवचनतत्तुल्यान्यन्यानि वाक्यानि प्रदर्श्यापि भगवन्नामोच्चारणस्य पापक्षयसाधनत्वाभावसमर्थनेन प्रत्यवेयाद्, एतेन शास्त्रप्रमाणाभाव एव प्रतिबन्धक इत्युक्तिरपि च्छिन्नमूला; तत्सद्भावस्य दर्शितत्वाद्,

यच्च तदपीत्यनेनाक्षेपः सोऽप्यज्ञानविजृम्भितएव, यतो वाचकत्वं चेन्नास्ति लक्षकत्वं त्वसति बाधके नैव संभवीति फलितमेवानुपस्थापकत्वम्,

एवं यच्चोच्यत इत्यपि हेयं-विश्वादिशब्दानां-भगवद्वाचकतायां कथं तात्पर्य्यानुपपत्तिरागता यन्निबन्धना शक्तिं विहाय लक्षणाऽऽद्रियते

शेषे च यदपीत्याक्षेपोऽप्यश्रद्धेयतमः-स्वाव्युत्पत्तिं दोषविशेषवशात् परत्रारोप्याक्षेपोक्तेः, जीवे-

श्वरसाधारणात्मशब्दस्य चेतनत्वे वाच्यताऽवच्छेदकत्वसत्त्वेऽपि नेश्वर आत्मशब्दवाच्य इति कुतोऽवधारितं तर्कतीर्थेन, ? यथा प्रमेयद्रव्यादपदानां पृथिवीत्वघटत्वादिषु वाच्यताऽवच्छेदकत्वाभावेऽपि पृथिवीघटादयः प्रमेयत्वद्रव्यत्वादिभिः प्रमेयद्रव्यादिपदवाच्या एव, कथमन्यथा घटः प्रमेयो द्रव्यं पृथिवी वेत्यादयोऽभियुक्तव्यवहाराः प्रामाणिकाः स्युरिति कृतं विस्तरेण ।

निरपेक्षविज्ञपाठकवृन्देभ्यः सप्रश्रयमेतन्निवेदनम्—प्रबन्धेऽस्मिन् क्वचित् क्वचिद् दूषभाषाऽव्यवहृतिर्जाता किन्त्वत्र न नो दोषः, तीर्थमहोदयेनैवात्मना समंभाषां प्रयुञ्जानं स्वस्मै रोचमाना परिपाटी स्वप्रबन्धे प्रदर्शिता सुतरामस्माभिरपि तत्प्रसत्त्यै तथैव भाषा व्यवहारीति । शम् ।

सात्त्विकं साहाय्यम् ।

श्रीसार्वदेशिकार्यसभायाः प्राधान्यपदमलङ्कुर्वद्भिः समण्डलैः—

श्रीनारायणस्वामि-महोदयैः ।

काशीस्थ-संस्कृत-साहित्य—समाजस्य-विपन्नां दशामुपश्रुत्य तस्मै प्रतिमासं १०) रूप्यकं साहाय्यं वितीर्णमिति तेभ्यः समण्डलेभ्यः साधुवादान् वितरति समन्त्रणा-समितिसदस्यः ।

श्रीप्रभुदत्तशर्म्माऽग्निहोत्री (महामहोपाध्यायः)

सभापतिः—

श्री संस्कृत-साहित्य-समाजस्य काशीस्थस्य ।

परिभाषेन्दुशेखर-व्याख्या ।

पद्यमयी, रुचिराख्या ।

(आदितः)

(ले० शास्त्री अमृतलाल शर्म्मा व्या० वेदान्त-तीर्थः) ।

सच्चित्सुखस्वरूपं ध्यात्वा विश्वेश्वरं गुरूंश्च हृदि।
परिभाषाणां व्याख्यां रचये रुचिराभिधां पद्यैः ॥१॥
गद्योक्तोऽर्थो दुर्धर उक्तः पद्यैः स एव सुधरः स्यात्।
इति मत्वा व्याख्येयं पद्यैर्विहिता विदां प्रमोदाय॥२॥
प्राचीनेऽस्मिन्नपि च व्याकरणे वाचनिक्यो याः।
ज्ञापकतो न्यायाद्वा सिद्धा भाष्येऽथ वार्त्तिके पठिता
पाणिनिना चापठिता व्याख्येया अत्र परिभाषाः।
तासां नागेशकृतां व्याख्यामनुसृत्य गुरुभिरुक्तांश्च॥४
विजयाभिधटीकायां संगृह्यावश्यकान्परिष्कारान्।
ग्रथ्नामि पद्यबन्धं यथामति मतेः परिष्कृत्यै ॥ ५॥
यद्बोधो[1] विधिशास्त्र-प्रवृत्तिमथ वा निवृत्तिमातनुते
शब्दस्य[2] साधुतां वा शक्तिं[3] या नैव बोधयति ॥६
अधिकारादतिरिक्ता[4] सा परिभाषेति लक्षणं बोध्यम्
त्रीण्यत्र च प्रकरणान्याद्यं शास्त्रत्वसाधकं[5] तदनु ॥७
बाध-प्रयोजकोक्तिर्द्वितीयमन्त्यं च शेषोक्तिः ।
एकांशविकृतमपि नैवान्यवदित्यन्तमाद्यमथ ॥ ८॥

---

(१) यद्बोध इति, विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगि साधुत्वाप्रकारक-शक्त्यविषयक-बोधजनकत्वे सत्यधिकारशास्त्र[illegible]न्नत्वं परिभाषात्वम् । (२) अपवादसूत्रव्यावृत्तय इदम् (३) संज्ञासूत्र व्यावर्तनायेदम् । (४) पूर्वत्रासिद्धमित्[illegible] द्यधिकारसूत्रव्यावृत्तय एतत् ।

(५) प्रवृत्तिप्रयोजकनिर्णयात्मक-बोधजनकत्वं शास्त्र[illegible] तत्साधकत्वं व्याख्यानत इत्यारभ्य एकदेशविकृतमनन्यवदि[illegible]त्यन्तानां परिभाषाणाम् ।

पञ्चम्या निर्देशो बलवत्तर एतदन्तमपरं च ।
अवशिष्टं च तृतीयं प्राधान्याच्छास्त्रसाधकं प्रथमम् ।
अइउण् सूत्रे लणिति च सूत्रेऽप्येकस्य णस्यैव ।
ग्रहणादखिण् पदार्थे सन्देहान्निर्णयार्थमिदमाह ।१०।
व्याख्यानाच्छिष्टकृतादन्यतरार्थ-निर्णयः कार्यः ।
नहि सन्देहाच्छास्त्रं स्यादननुष्ठापकं किमपि ॥११॥
पुण्यजनकतारूपेष्टसाधनत्वस्य निश्चयेनैव ।
प्रवृत्तिर्भवेत्पुंसां साधुपदोच्चारणे नियतम् ॥ १२ ॥
तन्निश्चयार्थके यत्सन्देहोत्पादकं वचः शास्त्रे ।
व्याख्यानात्सन्देहो निवर्त्य इत्यर्थसूचकं तद्धि ॥ १३ ॥
तेनाणुदिदिति हित्वा पूर्वेणैवाण् परेण चेण् ग्राह्यः'

परिभाषेन्दु-शेखरस्य कारिकानिबद्धेयं रुचिरा टीका यदि पाठकेभ्यो रोचेत, तदा स्वानुमतिप्रदानेनानुगृह्णन्तु । अग्रे प्रकाशनीया नवेति

(सम्पादकः)

संस्कृत-भाषा-महत्त्वम् ।

[ले० श्रीसरयूप्रसाद शास्त्री (द्विजेन्द्रः) काव्यतीर्थः]

प्राचीनतमेयं सुरभारती संस्कृतभाषैव या मुनीन्द्रैर्वाल्मीकि-व्यास-वसिष्ठादिभिरपि व्यवहृता, समादृता च परस्परं कालव्यवहितानपि श्रुति-स्मृति-पुराणेतिहासादिग्रन्थान् माणिक्यभूतान् एकसूत्रे ग्रथ्नन्ती मञ्जुमालेव विभाति । कथमन्यथा सृष्ट्यादौ चतुर्मुखनिःसृताश्चत्वारो वेदाः, ततोऽर्बुदाधिकवत्सरादपि पश्चाद्भाविनां मन्वादि-मुनिप्रवराणां स्मृतयश्चाद्यत्वेऽप्यस्माकं कर्णकुहरान् पावन्यकरिष्यन् ।

या चेयं संस्कृतवाणी मधुरतमवर्णालङ्कारैरलङ्कृता, स्मृति-पुराणादिभिः संसेविता, वेदैरध्युषिता, पुरातनयुगमभिव्याप्याद्यावधि सनातनधर्मैकप्राणा नित्या चेति निश्चीयते न जानीमहे कैर्दुष्कृतकर्मभिः कृतघ्नैः सततमनादृियमाणा सरस्वतीयं पातालमूलं बलादिवाभ्युह्यते ।

सैव सुरभारती कलियुग-प्रभावेणान्तर्हितैर्विबुधैर्विरहिताऽपि स्ववात्सल्येनैवैकेन त्रिविधान् तापान् दूरयन्ती शाश्वत-धर्मावलम्बिनोऽस्मान् अवति । यथा दिनावसानेऽस्तंगच्छतो भगवतो भास्करस्य परमपावनी प्रभा परितस्तूत्तमे शिखरेऽत्यन्तं क्षीणतरा विभाति तथैवाद्यत्वे सायंसमयविडम्बिनि कलिकालेऽस्मिन्नस्तं जिगमिषोः सार्वभौमस्य सनातनधर्मसूर्यस्य शोभाऽपि सुरसरस्वतीगुणैरनुत्तमैरुच्चतमे भारतवर्ष एव क्षीणतां संजायमानेव भातीत्यहो ! आश्चर्यम् ।

यतो यत इयं गीर्वाणवाणी प्रान्तर्हिता भवति ततस्ततः खद्योतसमा ह्यनेकशोऽवलम्बविस्तृताः पाखण्डधर्मा अवैदिकाः प्रोद्यन्ति; परन्तु नायमस्तं गमिष्यति सनातन-धर्मसूर्यो न च तत्प्रभाऽपि संस्कृतभाषा । सनातनो हि भगवानेष धर्मभास्करः, नास्य कदाचिदस्तत्वं सम्भाव्यते । अत एवायं शाश्वतिको धर्म इति व्यवह्रियते सर्वैः ।

हा हन्त ! ईदृश्या विशुद्धायाः प्राञ्जलगुणगणगुम्फितायाः सुरभारत्या एव अस्तित्वोन्मूलनार्थं मोघश्रमां क्रियां क इव विमूढः संश्रयते ? इदानीन्तनानां नवीन-शिक्षा-दीक्षितानामथ च समेषां विदुषां सहृदयानामपि जनानामश्रद्धा दरीदृश्यते किलास्यां भारत्यां भारतेऽस्मिन्नेव ।

किमत्र कारणम्? सत्सु बहुष्वपि कारणेष्वे-कोऽनुवादोऽपि कारणतया परिगण्यते यतो वै कस्याश्चिद्भाषायाः कस्याश्चिदन्यस्यां भाषायां पुनः परिवर्तनमेवानुवादः। अथानूदिते वाक्यसमूहे मूलस्थ-शब्दानां याथार्थ्यं कदापि नायातीति निर्विवादसिद्धम्।

यथा चाध्यात्मिकगम्भीरभावोद्बोधकानां शब्दा-नामनुवादोऽन्यासु भाषासु कथं सम्पद्येत? यथा-कथमपि सम्पद्यमानेऽप्यनुवादे मूलग्रन्थानामभि-प्रायः प्रायो विलुप्येत एव उदाहरणार्थमत्रानू-दिता ग्रन्था एवालम्भविष्यन्ति, ते च सर्वत्रैव सुलभाः। यथा कस्य चिन्मन्त्रस्य सूत्रस्य, श्लोकस्य वा पदार्थो यादृक्संस्कृते भासते, नानूदिते तादृगिति सुरभारतीसमुपासकैरनुभूयत एव।

साम्प्रतन्तु बहूनां बहुभाषाभाषिणामत्रेयं सम्म-तिर्यत् "प्रचुर-प्राचीन-पुस्तकानामन्यस्यां विशेषतो हिन्दीभाषायामनुवाद एव लोकोपकाराय श्रेया-निति, एतेनैवास्य भारतवर्षस्य समुन्नतिरपि सम्भविष्यतीति"।

किन्तु समीचीना नेयं सम्मतिर्न च वयमत्र श्रद्दध्महे। समीचीनविचार-समलङ्कृताः सहृद-यास्तु कथयन्ति। यत्—

"सर्वासां भारतीयानां भाषाणामुपजीव्यता।
संश्रिता सुरभारत्यां तत्त्यागो न मतो वरः॥

अपिच—

"जह्युः संस्कृतभाषाञ्चेत् हिन्दीभाषाश्रिता जनाः।
तदाऽसौ ग्राम्यभाषातोऽप्यधमत्वं गमिष्यति॥"

अतोऽयं निष्कर्षः समुत्पद्यते, यन्मूलं विना, केवलमनुवादेन कालान्तरे तस्य मूलस्य विनाश एव भावीति। अतो यद्यनुवादः कस्यचित्कार्य्य एव तदाऽसौ मूलेन सहैव प्रकाशयितव्यो नो चे-दस्याः सुरभारत्या नूनमेवाधोगतिर्भविष्यतीति। सर्ववादि-सिद्धान्तः।

अयि भोः! कः खल्वत्रेदृग् ऋषिसन्तानो यः स्वमातरमपि सुरभारतीमधो निनीषेत्।

अतोऽस्माभिः स्वीयार्य्यभाषोन्नत्यभीप्सुभिः सा-वधानैर्भवितव्यं समालोच्यैवानुवादो विधेयः। अस्माकमनवधानमेवैर्विपद्धञ्जतोयोत्सर्जकैस्तिरोभव-तीयं संस्कृतभाषारविभाः। ते वेगप्रचलतोत्साहवायु-वेगेन क्षणादेव तिरोधातुं शक्यन्ते। किमधुना काला-तिपातेन यैर्यैर्विविधोपायैः सुरभारत्याः समुन्नति-र्भवो चेति सम्भाव्यते तैस्तैरुपायैरस्माभिः सत्वरमेव प्रयतितव्यमिति। अयि भोः सहृदयाः संस्कृत-साहित्य-समुपासकाः! संवदध्वं सङ्गच्छध्वम्।

अपरञ्च—

"धर्मप्राणाः! कुरुत सततं देववाणी-विकाशे
बुद्धिं तामुन्नयत सततं तीव्रयत्नावधानैः।
अन्तर्धानं सुरमुनिगिरः सम्भवेद्यर्हि तर्हि,
नायं धर्मो न च खलु यशो नामशेषोऽपि तिष्ठेत्॥"

"तस्मात्कायेन मनसा वाचा चापि सदा द्विजैः।
यतितव्यं देववाणी-जीर्णोद्धाराय सन्ततम्॥"

इतिशम्।

धन्वन्तरि-वन्दना ।

[रचयिता—हरिनारायण शर्मा वैद्यः (आयुर्वेदाध्यापकः)

विशिष्टरोगौषध-बोधभावात् ।
रोग-प्रजाभाव-विधान-वीरम् ॥
न तत्र यान्तश्च कदापि मोहम् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(२)

पीयूषपाणिं कुशलं क्रियासु ।
धीरं निरीहं शुभदं दयालुम् ॥
प्रवुद्धसाङ्गागद--वेद--विद्यम् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(३)

स्वस्थेषु मैत्रीं करुणां रुजार्ते ।
प्रीतिं सुसाध्ये विदधानमेव ॥
उपेक्षणञ्चासु-मुमुक्षुमर्त्ये ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(४)

इच्छन्तमग्र्यं परमं स्व-धर्मम् ।
दुःखात्प्रयत्नेन सदातुराणाम् ॥
निजात्म-जानामिव रक्षितारम् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(५)

भूतानुकम्पेति परो हि धर्मः ।
निश्चित्य पथ्येन गदघ्नमस्मात् ॥
सुसिद्धिमन्तं सुखिनम्प्रशान्तम् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(६)

पुंसां गदानां विविधे निदाने ।
लिङ्गे सुशान्तौ च भवाप्रवृत्तौ ॥
चतुर्विधज्ञान-विशेषभाजम् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(७)

देशस्य कालस्य तनोर्गदानाम् ।
द्रव्यस्य दोषस्य रसस्य चापि ॥
अशेष-तत्त्वज्ञवरं प्रभावात् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(८)

स्पर्शावगम्यैर्बहुभिस्तु भावैः ।
शरीर-जातैर्गदपीडितानाम् ॥
आयुः प्रमाणान्यवबुध्यमानम् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

(९)

असाध्यवर्जं परियाप्य याप्यान् ।
साध्यामयान् सिद्धसुयोगसङ्घैः ॥
निघ्नन्तमव्याहतवुद्धिवेगम् ।
धन्वन्तरिं वैद्यवरं नमामि ॥

*प्रतापगढीय वी. एन्. मेहता-संस्कृत-विद्यालय- धन्वन्तरि-जयन्त्युत्सवे पठिता ।

ब्रह्मचर्य्यम् ।

लेo—धनेशदत्तशर्मा छात्रः (दानापुर सं० विद्यालयस्थः,)

अत्र धराधाम्नि ब्रह्मचर्यं विना न केऽपि काममपि समुन्नतिं कर्त्तुं शक्नुवन्ति । अस्यामेवार्यभूमौ प्राचीनाः प्रातःस्मरणीया महर्षयो वशिष्ठप्रभृतयो ब्रह्मचर्य-वैभवेनैव जगच्चमत्कृतवन्तः । अर्वाचीना अपि भगवत्पूज्यपादाः शङ्कररामानुजवल्लभ-निम्बार्क-माध्व-प्रमुखा धर्माचार्या ब्रह्मचर्यमहिम्नैव विश्वं विस्मापयन्ति स्म । किं वहुना, लोकमान्याः स्वर्गीय-"वालगंगाधर"-महोदया, ब्रह्मचर्य-प्रभावेणैव राजनीतौ नैपुण्यमासाद्य देशविदेशान् निर्मलैरात्मयशोभिरलञ्चक्रुः । स्वर्ग-सोपानमेतद् ब्रह्मचर्यं, मुक्तेर्व्योमयानमेनद् ब्रह्मचर्यमिति । असाध्या अपि व्याधयो ब्रह्मचर्यवलेन निःसंशयमनायासमचिरादेव विलयं व्रजन्ति । ब्रह्मचर्यमाधिवर्गं क्षिप्रं समूलमुन्मूलयति, ब्रह्मचर्यमाध्यात्ममाधिदैवमाधिभौतञ्च वलमुत्पादयति, जनयति च निरन्तरं प्रसादमन्तःकरणे । ब्रह्मचारिभिः त्रिलोकमपि स्ववसात्कर्त्तुं प्रभूयते । किं पल्लवितेन क्षिति-तले नास्ति तादृशं किमपि कार्यं यद् ब्रह्मचर्येण निष्पाद्यं न भवेत् । पूर्वाचार्यैं र्ब्रह्मचारिणां यान्यनवद्यानि कर्त्तव्यानि निर्दिष्टानि तानि निखिलानि त्रिष्वेवान्तर्भवन्ति, वीर्य-रक्षा विद्याध्ययनं गुरुशुश्रूषाचेति । शरीरमाद्यं खलु धर्मसाधनमिति शास्त्रदिशा निखिल-धर्म-धर्माङ्गरक्षायै प्रथमं शरीर-नैरुज्यं निष्पादनीयम् । एतमेवादर्शं "नायमात्मा वलहीनेन लभ्य" इति श्रुतिरपि पुष्णाति । वीर्य-रक्षणं विना न कदाचित् कथमपि वपुर्वलं वृद्धिमुपेयात । शरीरेऽस्मिन् निखिल-मर्मभूता मनोवहा नाम नाडी वरिवर्ति, वीर्यपातनावसरे मनोवहाभिधाना नाडी सातिशयं चञ्चलायते, तदाघात-प्रतिघाताभ्यां सर्वा धमन्यः विकम्पन्ते । अतः शुक्रनाशकाः तस्मिन्नवसरे मृतप्राया वेभवन्ति । अत एव शास्त्रे निगदितं खलु कविना "मरणं विन्दुपातेन जीवनं विन्दुधारणादिति" अपि चाद्य भुक्तमन्नं सप्तविंशति-तमे दिने वीर्यरूपेण परिणमति । इत्थमेव चत्वारिंशद्बिन्दुरुधिरत एकविन्दुवीर्यमुत्पद्यते । ये जनाः प्रत्यहं शुक्रस्य नानाविन्दुवर्गं पातयन्ति तेषां शरीरतः कियन्तो रुधिरौघा निःसरेयुरिति स्वयमेव ते विभावयन्तु ॥

तेषां वीर्यव्ययिनां देहे न कथमपि शक्तिरुपचीयेत । तस्माद् शारीरिक-वलवृद्ध्यै वीर्यरक्षणं नितान्तमावश्यकम् । काये द्विविधाः कीटाः भवन्ति, श्वेता, रक्ताश्च, शारीरकाः श्वेताः कीटा रोगजनकं वाह्यकीटकदम्बं विजित्य शरीरमभिरक्षन्ति रक्ताश्च सन्ततं शरीरस्वास्थ्यं समेधयन्ति । समधिकशुक्र-नाशतो नितान्तं श्वेताः कीटाः दुर्वलायन्ते । येन मानवानां शरीराणि वाह्यतो रोगकीटा निरन्तरमाक्रामन्ति । तस्माद् रोगभीतिभञ्जनाय ब्रह्मचर्यपालनं नितान्तं प्रयोजनत्वमावहते ।

निसर्गतोऽहर्निशं प्राणिनां श्वासप्रश्वासाः षट्शतोत्तरैक-विंशतिसहस्रमिताः शरीरान्निःसरन्ति । इयं श्वासानां स्वाभाविकी गतिः; सा च गतिः स्वभावाद्द्वादशाङ्गुलिर्लम्बायमाना प्रवर्तते । इयमेव द्वादशाङ्गुलिपर्यन्त-गमन-शीला गतिर्भोजनादि-कार्यवशादधिकाधिकमुपजायते । यथोक्तं हठयोगे—

"देहाद्विनिर्गतो वायुः, स्वभावाद्द्वादशाङ्गुलिः ।
भोजने षोडशाङ्गुल्यो, गायने विंशतिस्तथा ॥
चतुर्विंशाङ्गुलिः पान्थे, निद्रायां त्रिंशदङ्गुलिः ।
मैथुने षट्त्रिंशदुक्तो, व्यायामे च ततोऽधिकम् ॥

उक्तप्रमाणपुञ्जं प्रमाणीकरोति यत् वीर्यविनाशे सातिशयं श्वासा निर्गच्छन्ति, अतः प्राणिनामायुः क्षीयते। अतो दीर्घायुः-प्राप्तये प्राणिभिरवश्यं ब्रह्मचर्यम्पालनीयम्, प्राणानां केवलं श्वास-प्रश्वासनिर्भरत्वात् "असंकल्पाज्जयेत्काममिति" शास्त्रतो मदन-विजयाय त्वसतां कामानां संकल्पो हेयः। स्मरणाद्यष्टविध-मैथुन-त्याग एव ब्रह्मचर्य-लक्षणम्। अतो ब्रह्मचारिभिरष्ट-विधमैथुनत्यागे प्रवर्तितव्यम्, ब्रह्मचर्यामृतेन च शरीरं पोषणीयम्, मनो निग्रहणीयम्, वचः संयमनीयम्, नियमेन च जीवनमवनीयम्। इत्येवास्माकं सहृदयान् सहाध्यायिनो ऽन्तेवासिनः प्रति सादरं सानुनयं सानुरोधश्च निवेदनमिति दिक् ॥

पाणिनीय-प्रकाशः ।

[ले० म० म० देवीप्रसाद शुक्लः कविचक्रवर्ती]

॥ अथ स्वादि-सन्धिः ॥

सकारान्तं पदं यश्च सजुषूशब्दान्तकश्च यत् ॥
तस्य रुस्स्यात्सचाऽन्त्यस्याऽलः स्थान इति निश्चितम्
अतोऽप्लुतात्परस्य स्याद्रोरुरत्यप्लुते परे ॥
शास्त्रं प्रति रुत्वस्याऽसिद्धत्वन्तु न जायते॥ २ ॥
अनूद्य रुत्वमुत्वस्य विधानादिति बुध्यताम् ॥
शिवोऽर्च्यस्सर्वदा पुम्भिर्निजोन्नतिविधायिभिः ॥३॥
अतोऽप्लुतात्परस्य स्याद्रोरुर्हशि परे सति ॥
शिवो वन्द्यस्सदा प्रीतैः पुरुषैर्मोक्षलिप्सुभिः ॥ ४ ॥
भोपूर्वस्य भगोपूर्वस्याऽघोपूर्वस्यरोस्तथा ॥
भवेद्वर्णपूर्वस्य यकारोऽशि परे सति ॥ ५ ॥
देवा इह विराजन्ते देवायिह सुरक्षकाः ॥
अशीतिग्रहणाद्देवास्सन्तीत्यादौ न दुष्टता ॥ ६ ॥
पदान्तयोर्वयौ स्यातां वा वकारयकारयोः ॥
परे तु सत्यशि लघूच्चारणाविति सम्मतम् ॥ ७ ॥
रसनाग्रोपाग्रमध्यमूलानां यस्य भाषणे ॥
शैथिल्यं जायते नूनं स लघूच्चारणः स्मृतः ॥ ८ ॥
पदान्तस्य यकारस्याऽलघुयत्नस्य सन्ततम् ॥
ओकाराद्धि परस्य स्याल्लोप एतन्मुनेर्मतम् ॥ ९ ॥
भो अच्युत ! स्वभक्तं माम्पाहि पाहि कृपां कुरु ॥
लघुप्रयत्नपक्षे भोयच्युतेति विबुध्यताम् ॥ १० ॥
पदान्तस्येति निर्देशात्तोयशब्दे न दुष्टता ॥
अवर्णपूर्वयोर्लोपः स्याद्यकारवकारयोः ॥ ११ ॥
पदान्तयोरुञि पदे परे त्विति मुनेर्मतम् ॥
स उ एकाग्निराभाति ज्वालाजालकरालितः ॥ १२ ॥
पद इत्युक्तितस्तन्त्रयुतेत्यादौ न दुष्टता ॥
भोपूर्वस्यभगोपूर्वस्याघोपूर्वस्य चापि वै ॥ १२ ॥
स्याल्लोपोऽवर्णपूर्वस्य यकारस्य परे हलि ॥
भोदेवाः कृपया दीनं भवन्तोऽवन्तु मां सदा ॥ १४ ॥
भगोनमस्तेऽघोयाहि देवा नम्या ननु त्वया ॥
हलीतिग्रहणाद्देवायिहेत्यादौ न दुष्टता ॥ १५ ॥
रेफादेशो भवेदह्नः परे सुपि न तु ध्रुवम् ॥
शङ्करोऽहरहस्सेव्योऽहर्गणो मागमद्वृथा ॥ १६ ॥

अस्रुपीत्युक्तितोऽहोभ्यामित्यादौनाऽस्तिदुष्टता ॥
रूपशब्दे रात्रिशब्दे शब्दे चाऽपि रथन्तरे ॥ १७ ॥
परे सति भवेदह्नोरुत्वमेतन्मुनेर्मतम् ॥
अहोरूपं गतश्चाहोरात्रिरेषा विभासते ॥ १८ ॥
अहोरात्रजपस्तस्याऽहोरथन्तरमुच्यताम् ॥
भवेद्रेफोऽहरादीनाम्पत्यादिषु परेषु वा ॥ १९ ॥
अहश्च गीश्च धूश्चेमेऽहरादय उदाहृताः ॥
तथा पतिर्गणः पुत्रश्चैते पत्यादयस्स्मृताः ॥ २० ॥
उदेत्यहर्पतिस्साक्षादहःपतिरहःपति ॥
इत्याकुलतयाऽवोचत्कामुकं कापि कामिनी ॥ २१ ॥

क्रमशः

रघुवंश-महाकाव्ये

चोरपत्नीयटीका

वत्सोत्सुकापि स्तिमिता सपर्या-
म्प्रत्यग्रहीत्सेति ननन्दतुस्तौ।
भक्त्योपपन्नेषु हि तद्विधाना-
म्प्रसादचिह्नानि पुरः फलानि ॥ २२ ॥

सा धेनुः स्तिमितापि निश्चलापि वत्सोत्सुका सती असपर्यां प्रत्यग्रहीत् सेति सहिता ईतिर्यत्र अथ सहिता इतिर्यत्र कर्मणि तद्यथा तथा तौ ननन्दतुः हि अपि तु उ वितर्के भक्त्या अपपन्नेषु अयुक्तेषु तद्विधानां तयोर्विधा इव विधा येषां तेषां फलानि पुरः नगर्य्याः प्रसादचिह्नानि प्रकृष्टः सादो येषु तादृशानि चिह्नानि येषां तादृशानि भवन्ति ॥ २२ ॥

गुरोः सदारस्य निपीड्य पादौ
समाप्य सांध्यं च विधिं दिलीपः।
दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥ २३ ॥

निषण्णां निर्गताः षट् वर्गाः कामादयः येषां तेषां रिपुः चौरः पुनरेव दोहावसाने दोग्ध्रीं न भेजे किं कृत्वा सदाचारस्य गुरोः सती आरा चर्मभेदिका यस्य तस्य गुरोः पादौ निपीड्य संवाह्य तथा सान्ध्यं सन्धिभवं विधिं समाप्य कीदृशः चौरः दिलीपः दिलों यवागूं पिबति तथाविधः पुनः कीदृशः भुजोच्छित् भुजयोः उद्गता छित् छिदा कर्तनं यस्य चौरत्वात् सः "दिलो यवागू विरूपा" इति हैमः। छेदनं छित् संपदादित्वात् क्विप् ॥ २३ ॥

तामन्तिकन्यस्तवलिप्रदीपा-
मन्वास्यगोप्ता गृहिणीसहायः।
क्रमेण सुप्तामनु संविवेश
सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥ २४ ॥

गोप्ता अपलापकः अनु यथा तथा तां आस्य आक्षिप्य गृहिणीसहायः सन् गृहिणीसहितः, अथ गृहिणीसहः आयो यस्य, अथ गृहिणीं स्यति तादृशः हायः हानं यस्य सः क्रमेण सुप्तां तां गृहिणीम् अनु संविवेश प्रातः सुप्तोत्थितां तां गृहिणीम् उत्तस्थे कीदृशीं तां धेनुम् अन्तिके नितरां अस्तः वलिप्रदीपो यस्याः तां कीदृशीं गृहिणीं अन्तिके स्थापितः वलिप्रदीपो यया सा ताम् ॥ २४ ॥

इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्तेः।
सप्तव्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥ २५ ॥

तस्य त्रिगुणानि सप्त दिनानि व्यतीयुः कीदृशस्य अमहनीयकीर्तेः चौरत्वात् न महनीया कीर्तिर्यस्य तस्य तथा दीनोद्धरणोचितस्य दीनानां पान्थानां उत् उच्चैः यत् हरणं सर्वस्वमोचनं तत्र उचितस्य तथा प्रजार्थं प्रसवार्थं महिष्या समं हयं द्विषन्त्या सह इत्थं व्रतं धारयतः धारं कुर्वतः अथ इत्थं एतादृक् व्रतं यत्र कर्मणि तद्यथा तथा प्रजानां अर्थं धनं धारयतः, अथ प्रजार्थे धारं कुर्वतः अथ महिष्यां सैरिभायां प्रजार्थं इत्थं समं तुल्यं व्रतं धारयतः अहनि दिवसे ईया ईं लक्ष्मीं याति, अथ इया ईं कामं याति तादृशी कीर्तिर्यस्य तस्य ॥ २५ ॥

(क्रमशः)

गर्हितं किमतः परम् ।

श्रीमन्तःसुप्रभात-सम्पादक-महोदयाः पत्रमिदं सुप्रभातस्यैव कृते लिखितमित्यविकलप्रकाशनेनानुगृह्णन्तु

ओरुगण्टि वेंकटेश्वर शर्मा

काशीस्थाः कियन्तः पण्डिताः स्वविचारानुरूपं श्रुति-स्मृति-पुराणादीनामर्थं कुर्वन्तो देश-कालानुपयुक्तां प्रत्युत देशविध्वंसकरीमर्वाचीनकालत एव प्रवृत्तां सनातनधर्मस्य वाह्याचारपद्धतिं कियतीं तद्द्वयं मन्वानाः स्वाज्ञानेन, दुराग्रहेण वा वैयक्तिकासूयामात्सर्यादिदोष-पारवश्येन वा कियतो नेत्रामन्धान् वित्तेन पूर्णाञ्छ्छिनो वशीकृत्यतेषामेव वित्तैर्बहुायाससाध्यं बहुव्यय-सम्पाद्यञ्चोदर्क-शून्यमब्राह्मणमहासम्मेलनायोजनमारचयन्ति— इति समाचारपत्रतो ज्ञायते । आरचयन्तु नाम न मे तत्र किञ्चिदस्ति वक्तव्यम्—

"विस्तीर्णा पृथिवी जनश्च विविधः
किं किन्न सम्भाव्यते ।"

वक्तव्यन्त्वत्रेयदेवास्ति यदिमे महात्मान आत्मानं शुद्धसनातनधर्मानुयायिनस्प्राचीनतममार्गानुगामिनं मन्यमाना अपि कथमीदृशीं वाह्याडम्बरबहुलामन्तःसारविरहितां पाश्चात्य-पद्धतिमाश्रयन्ति धर्मनिर्णये तत्र तु केवलं धर्मशास्त्रविदामेव भवति प्रयोजनं न राज्ञां नापि साधारणजनतायास्तत्र विषयेऽकिञ्चित्कराया इति । कथञ्च "कलावाद्यन्तयोः स्थितिरिति" वाक्ये जडश्रद्धतया कलौ केवल-ब्राह्मणशूद्रयोरेव सत्वात् क्षत्रिय-वैश्ययोरभावे स्व-मतेन शूद्ररूपाणामेवात्रत्यमरुभूमिस्थ-वैश्यजातीनां द्रव्यान्नग्रहणादिपातित्याधायकदुष्कर्मकर्तृत्वमाश्रयन्ति ।

कथं वा स्वसिद्धान्ततो म्लेच्छानां (यवनानां) मलकाना-क्षत्रियाणां (अस्मन्मते तु व्रात्य-क्षत्रियाणां) शुद्धिविधायकत्वात् स्वसिद्धान्तानुसारं पातित्यभाजि परार्घ्यैव घोषणापत्रादावसहयोगार्हादिविशेषणेन कृतनिन्दे भारतधर्म्म-महामण्डले गत्वा-साहाय्यदानार्थं तत्सञ्चालकेभ्यो बद्धाञ्जलि-प्रार्थनाकरणम्—तत्सभापतिना च महाराजेन दर्भङ्गाधिपतिना पुनः सम्पर्कमाचरन्तीत्याद्यैवैतेषां कृत्यानि विभ्रमयन्ति सनातनधर्मावलम्बि-समाजम् । सर्वसनातनधर्म्मविद्वदसम्मतं साइमन्सप्तकस्वागतं कुर्वतस्तस्यैव राज्ञोऽखिल-ब्राह्मण-महासम्मेलनस्यास्य

सभापतित्वमुपस्थापयतां कथञ्चिच्छास्त्रज्ञानां सनातनधर्मानुयायिनां केषामपि भविष्यत्र सम्मेलनेऽणुरप्यास्था-ऽदरदृष्टिर्वेति विचारणीयमेवैभिर्महात्मभिः । अपरञ्च कथमिमे महात्मानः स्वस्मिन्लङ्घमानानि—

" न शूद्र-राज्ये निवसेन्नाधार्मिकजनावृते "

इत्यादि धर्मशास्त्रीयवचनान्यनादियमाणा अन्येषांकृते धर्मशास्त्रीयनियमान्निखिलानविकलानेव पालयितुमुपदिशन्ति ।

अन्यच्च—अपरिवर्तनवादिन इमे सम्मेलनसञ्चालका महामहोपाध्यायाः प्रतिमासं १०) दशरूप्यकं म्लेच्छराजप्रतिग्रहं गृह्णन्तः स्वयं पातित्यं जुषमाणाः कथं धर्मशास्त्रनिर्णेतारः ?

इतरच्च यदीमे महात्मनो नूतनं कमपि निर्णयमकृत्वा वर्तमानामन्धपरम्परागतां रुढिमेव समर्थयितुमुद्युक्तास्तर्हि कथमियन्तं प्रयासमाश्रित्य पर्वतं खनित्वा मूषकं निःसारयन्ति । तावन्मात्रस्य कृते इयत्प्रयासाचरणन्तु व्यर्थमेव भाति ।

अथवा यथा किम्वदन्त्या श्रूयते यदत्र वाराणस्यां चिरकालतो बहुभिर्विद्वद्धौरेयैः प्रतिष्ठापितां काशीपण्डितसभां शिथिल-प्रायां विलोक्य पण्डित प्रकाण्डा देशकालात्मविदो बहवोऽद्यत्वे चालयितुं पुनर्यतन्ते । वर्षद्वयतः साधु प्रचालयन्त्यपि । यत्र च बहवः प्रसिद्धाः काशीस्था विद्वांसः सदस्याः । तस्या विरोधकरणमेवास्य सम्मेलनस्य प्रयोजनमिति ।

यतोहि तस्याः सभायाः पदाधिकारिणो महानुभावाः स्वनामधन्याः सनातन-धर्माभ्युन्नत्यै सर्वत्रैव तन्महत्व-प्रख्यापनाय च विधर्मिभिः कृतान् सर्वविधानाघातप्रत्याघातांश्चापाकृत्य द्वीपद्वीपान्तरेष्वपि प्रचारयोग्यं वर्तमानकालक्षमं सनातनधर्मस्वरूपं परिष्कर्तुं प्राणपणतश्चेष्टन्ते । तादृगेव च तस्योद्देश्यपत्रमपि मुद्रितं विद्यते ।

तस्याः सभाया मुखपत्ररूपेण सनातनधर्मोदयनामकमेकं हिन्दीपत्रमपि निःसरति । (जिघृक्षुभिः काशीपण्डित-सभा-कार्य्यालय, काशीनरेशमन्दिर, गोदवलिया, बनारससिटी इतिसङ्केततो ग्राह्यम् ।)

अन्यच्च तत्सभासदस्या अखिलभारतवर्षीय-सनातनधर्मसभायाः प्रयागीयाधिवेशननिर्णीतान प्रस्तावान् समर्थयन्ति । महासम्मेलन-सञ्चालकाश्चेमं तद्विरोधमाचरन्तीत्येतदपि काशीपण्डितसभातो विद्वेषकरणनिमित्तमेषाम् । अत एव यत्र कुत्र मूर्खसमाजे काशीपण्डित-सभा-सदस्यान् अपवदितुं तैः सह श्रामण्यमाचरितुमिमे स्वशक्त्यनुरूपं स्वकटिबलं यावद्यतन्त एव । परन्तु एवङ्कुर्वाणा इमे महात्मानः धर्म-शास्त्रविगर्हितं महा जनापवादापमानजन्यमहापातककलङ्कितमात्मानञ्च विदन्त्यहो स्वार्थान्धतैषाम् ?

किम्बवीम्यहं सम्मेलन-पक्षाश्रितानां कतिपयानां पण्डितानां जघन्यकृत्यं । ते हि सर्वतोऽप्यात्मानं निर्बलं गणयित्वा पण्डित-सभासदस्यान् विधवाविवाहसमर्थनान्त्यजस्पृष्टान्नभोजनादिविविधस्वकल्पितदोषैः समाजदृष्टौ पातयितुं यतन्ते । परन्त्वत्रापि इमे विफलप्रयासा एव भवन्ति, भविष्यन्ति चेति निश्चयः ।

पश्यन्तु, यत्र पण्डित-सभायाम् महामहोपाध्यायाः पण्डितराजाः श्रीप्रमथनाथ-तर्क-भूषण-महोदयाः, महामहोपाध्यायाः श्रीदेवीप्रसादशुक्ल-कविचक्रवर्तिमहोदयाः, ज्योतिर्विदां मूर्धन्यमणयं महामहोपाध्यायाः श्रीमन्तोमुरलीधरझामहोदयाः,

पूज्यपादाः सनातनधर्मैकप्राणाः श्री-अनन्तरामशास्त्रिमहोदयाः, प्रातःस्मरणीयाः श्रीकाशीनाथशास्त्रिमहोदयाः, विश्वविदिता वैयाकरणशिरोमणयो विनयावताराः श्री (देव) हरनारायणत्रिपाठिमहाशयाः, देशकालविदः श्रीहृषीकेशोपाध्यायज्योतिषाचार्य्यमहोदयाः, सदाचारनिरताः श्रीगोपालशास्त्रिणोदर्शनकेशरिमहोदयाः, श्रीमन्तोमहादेवशास्त्रिणः साहित्याचार्याः, इत्यादयः ।

अन्ये च बहवः स्वनामधन्याः सनातनधर्मादर्शस्वरूपाः सदाचारपूता विद्वांसः सन्ति । तत्र सभायामेव धर्मविपर्य्यासस्यैवम्भूत-विषयाणां वा स्वप्नेऽपि सम्भवो नास्ति परन्तु

"स्वार्थी दोषं न पश्यति"

इति नियमनिगडिताः कियन्तः सूर्य्योपरि थूत्कृतिरूपव्यापारान्नैव विरमन्तीत्याश्चर्य्यतरम् । सर्वतोऽपि पराहतास्ते–हिन्दुविश्वविद्यालयीयविदुषामेवेयं पण्डितसभेत्यपि बहुत्र कथयन्ति, परन्तु निष्पक्षपातिनां विदुषां दृष्टिकोणमहमित उपरिनिर्दिष्टविद्वत्प्रवरसमुदाय-नामोपरि समावर्जयितुमिच्छामि। पश्यन्तु-कियन्तोऽत्र सन्ति, येषां हिन्दु-विश्वविद्यालयतोऽणुरप्यस्ति सम्बन्ध इति । सर्वेऽपि तु ततः स्वतन्त्राः काशीस्थाः प्रसिद्धा विद्वांसः सन्ति किम्बहुना ते तु स्वविचारदृढिम्नि पर्वतवदकम्प्याः सन्ति । गत-प्रयागीय-सनातनधर्म-महासभाधिवेशने श्रीमद्भिर्देवीप्रसादशुक्ल-कविचक्रवर्त्तिमहोदयैरेव सवर्णेभ्यः सप्रणव-दानस्य विरोधो विहितस्तस्मिन्विषये तेऽधुनापि तादृग्विचारा एव सन्ति । तथा द्विजाति-कृत-लाङ्गल-चालनप्रस्तावो दर्शनकेशरिणां श्रीगोपालशास्त्रिणां विरोधेनैवास्वीकृतोऽभवत् । अहन्तु जाने यत्—

'सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव,
अवमानस्य चाकांक्षेदमृतस्येव सर्वदा ॥ इति

मानव वचनस्य तु काशी पण्डित-सभासदस्या एव परिपालकाः । यत् सम्मेलनसञ्चालक-समर्थक-परिपोषकप्रभृतीनां दुरुक्ति-वादानाकर्णयन्तोऽपि सनातनधर्मशाश्वतिकाभ्युदय–जनमङ्गलादि–जनक स्वपवित्र-विचारान्नैव विरमन्तीति । ईदृशानामेव दृढविचाराणां विदुषां सनातनधर्म्मेऽयत्वे आवश्यकता विद्यते यैश्च पुनरपि समेधितः स्यात्सनातन धर्म-महिमा। येन च सर्वेऽपि जगतीतलगा जन्तवोऽस्योदारधर्म्माश्वत्थस्य च्छायातलाश्रिताः सुखिनः स्युरिति । ब्रा० सम्मेलन-सञ्चालकादि-सुधियस्तु राग द्वेषादि-परवशाः सन्तः—

"धर्मं चरत,माऽधर्मं सत्यं वदत माऽनृतमिति" धर्म-शास्त्ररहस्यमपि विस्मृत्य किङ्कर्तुं व्यवसिता इति न विद्मः । श्रूयते तेषां रागद्वेषदम्भाहङ्कारादिबहुलव्यवहारत पवोद्विग्ना जात-घृणा बहवः काशीस्थाः प्रसिद्धा विद्वांसो ब्राह्मण-सम्मेलनन्नैव समुपतिष्ठन्ते । प्रत्युतास्य सर्वथा बहिष्कारमेव कुर्वन्तीति कथं स्यात् साफल्यं द्वेषासूयामूलकस्यास्य सम्मेलनस्येति विदध्यादीश्वरः शिवम्

ओरुगण्टि वेंकटेश्वर शर्मा
(आन्ध्राभिजनः काशीवास्तव्यः)

उरगाजिह्व-(औरंगजेब) स्य पुत्रपार्श्वे प्रहितम्पत्रम् ।

(अवशिष्टांशः)

(अवधप्रसाद शर्म्मा का० ती० आयुर्वेदरत्नम् ।
खगौल-स्थ- ई० आई० आर० स्कूल हेडपण्डितः) ।

(९)

नाऽयाता हि विभूतयः सह मया सेना न वा दुर्जया ।
सर्वैता हि समर्जिता भुजबलेनात्रैव हा ! सम्पदः ।
किन्त्वेतत् समुपार्जनं मम पुनः पुण्येन नाभूदहो,
दुष्टं मामनुयाति केवलमतः पापं सखे ! वाऽधुना ॥

(१०)

उद्धारो मम हा ? कथन्नु भविता दुःखादितो घोरतो,
भोक्तव्यं कथमस्य रे प्रतिफलं पापस्य दैवाधुना ।
किं कुर्य्यां विवशोऽस्मि हन्त कठिनं कष्टं पुरो वर्त्तते,
हाऽऽवर्त्ते विषमे प्रभो निपतिता जीर्णा तरीयं मम ॥

(११)

यद्यत् कार्य्यमिदं मया कृतमहो सर्वं शुभं वाऽशुभम्,
तत्तत्सर्वमिदं ब्रवीम्यवितथं हा! हा! कृतं त्वत्कृते ।
दोषः कोऽपि सुत त्वया मयि पुनर्नो पातनीयोऽधुना,
हा!हा! पुण्यकृदस्मि वा कलुषकृत् किन्तु त्वदर्थं ननु ।

(१२)

बुद्धिर्मेऽद्य पराङ्मुखी स्मृतिरपि प्रायेण नष्टाऽभवत् ।
जाता हा धनुषाकृतिः कटिरहो दृष्टिस्तथा विह्वला
जीर्णां मेऽत्र तनुं विहाय सकलै र्वीर्य्यादिभिः प्रस्थि-
तम् ॥ शेषो मद्गमनं नु केवलमहो युष्माकमग्रेऽधुना ॥

(१३)

चित्ते हन्त ! पदे पदे भवति मे तापः प्रमादस्य हा !,
पाषाणोपममप्यहो नु शतधा भिन्नं हृदेतन्मम ॥
नष्टो मे समयोऽधुना न भगवन् ! यत्नः परो दृश्यते ।
हस्ताद्धन्त ! विनिर्गतो ननु सरः कुर्य्यां किमद्य प्रभो!

(१४)

भित्वा पापघटं स्वकीयमभितो गन्ता यमस्यालयम् ।
गर्वादैहिकमत्र सर्वनियमं न्याय्यं विनाश्य क्षितौ ॥
हित्वैतत्प्रियमप्यहो निजवपुःप्रेमास्पदम् जीर्णकम् ।
दुष्कीर्त्तिः 'सहधर्मिणीव' नहि मामेकाऽधुना मुञ्चति ।

(१५)

किञ्चिन्न प्रथमं विचारितमहो ! मूढ़ेन मोहान्मया, ।
बद्धो दुष्कृतिरज्जुभिः कपिरिव भ्राम्यामि हाहाऽवशः ।
रे रे ! ! संप्रति कुत्र कोऽस्मि शरणं कं वा व्रजामीह रे
शोकार्त्तस्य ममाद्य हन्त ! सकला गाढ़ान्धकारा दिशः ।

(१६)

व्यर्थं नैव कदापि पुत्र ! भवता हा ! पीडनीया प्रजा,
कर्त्तव्यात् किल पूर्वमेव सुधिया चिन्त्यं भविष्यत्फलं
हा!हा! किल्विषकारिणं प्रथमतो मामेव पश्याधुना,
कीदृक् पापफलं चिरेण विषमं पुत्राद्य वोभुज्यते ॥

(१७)

दुर्लभ्यः समयस्त्वया नु सुधिया व्यर्थं न नेयः किल,
वक्तव्यं मधुरं वचोऽनिशमहो रक्ष्यं सुशीलं चिरात् ।
स्वाद्वीयं सरसा सुधा हि सुखदा वाणीषु संवर्त्तते,
तास्वेवासु-हरं विषं च विषमं हा ! दुस्सहं तिष्ठति ॥

(१८)

पूर्वं पुत्र ! सदैव कार्य्यमखिलं साम्नैव कार्य्यं त्वया,
दर्पान्धेन पदे पदे हि भवता ध्येयो न दण्डः पुनः ।
जेतव्या रिपवस्त्वया नु सुधिया रागादयो दुर्जयाः
रक्ष्यं दुर्व्यसनान्मनश्च चपलं नित्यं निजश्रेयसे ।

(१९)

निर्दोषं यदि पीडयिष्यसि जनं कञ्चित् सुखस्याशया,
तन्नूनं भवितासि पुत्र ! मम भो दुःखस्य हेतुश्चिरात् ।
जागर्तीह चिरेण मेऽद्य हृदये ह्याशा त्वदीयाऽन्तिमा,
ब्रूमः किन्तु हृदेव केवलमहो जानाति दुःखं हि यत् ।

(२०)

दृष्ट्वैतत् प्रियपुत्र ! पत्रमखिलं मद्दुःख-संसूचकम्,
उद्बुद्धया करणीयमत्र सकलं कार्य्यं पुनर्निश्छलम् ।
नैतद्विस्मरणीयमत्र सकलं वाक्यं मदीयं शुभम्,
दत्वाऽन्त्याशिषमद्य यामि भुवनात्त्वद्दर्शनैर्वञ्चितः ॥

श्रीसुप्रभाताशीः

श्रीसारस्वत-वैभवं समुदयन् साहित्य-सत्पूरुषम् ।
नानालङ्कृतिरीतिनीति-निपुणैर्भावैः समुद्भावयन् ॥
विद्यावारिधिषु गौरवं प्रकटयँस्तल्लब्धेषु सर्वोन्नतिम् ।
लोकेस्मिन् खलु सुप्रभात-महिमा नित्यं समुज्जृम्भताम् ॥

धन्यास्त उद्योगिनो महात्मानो येषां महाकष्ट-साध्याऽऽशालतेदानीं पुष्पिता फलिता सती नितरां निखिलमधीतं जगत् प्रीणाति । महद्भ्यस्तेभ्यो धन्यवादवितरणमनुचितमिति ज्ञात्वाप्यनेकशः सादरं हार्दिकान् धन्यवादान् दत्वा दत्वापि न विरमत्यन्तरात्मा । एवमेव नितरां श्लाघ्याः पण्डित मनोरञ्जकाः, सुप्रभाताङ्का भवेयुरित्याशंसति,

श्रीसत्यप्रसादशास्त्री "बहुगुणः"
टकोली, देवलगढ़, गढवाल ।

मासिकं मुद्राशतम् ।

गुरुकुलविद्यालये वृन्दावने दार्शनिकस्य विदुषः प्रयोजनम् । प्रमाणपत्रेणाध्यापनादियोग्यतासूचकेन सह पत्रं प्रहिण्वन्तु ।

श्रीरुद्रदेवशुक्लोवेदाचार्य्यः,
काशी विद्यापीठ बनारस ।

गार्भाधानं विधानं किमु भवति पुरेवाऽद्य तावद्विजानां ।
संस्काराणां प्रकाराः किमु तदनुभुवां भव्यभावं भजन्ति ॥
सद्रीतिः क्वोपनीतेः श्रुति-विहित-कृतिः कीदृशीदं विचार्यं ।
प्राचीनाचार्यचर्या-समुचित-समयो नायमस्तीति मन्ये ॥ १ ॥

म० म० देवीप्रसादशुक्लः कविचक्रवर्ती

सम्पादकीयम्

सुप्रभातपाठकैः पठितमेव भवेत् श्रीमताम्बेकटेश्वरशर्मणाम्पत्रम् । तत्पत्रावलोकनेन तु ब्राह्मणमहासम्मेलनसञ्चालकानां कर्तव्योपरि दयैवोदेति ते हि अखिलभारतवर्षीय-सनातनधर्ममहासभाया विरोधमाचरन्तीत्येतदपि गेहेनर्दित्वन्तेषां हास्यास्पदमेव । यस्याश्च सभायाः सर्वस्मिन्नपि प्रान्ते प्रतिनिधिस्वरूपाः सहस्रशः शाखासभाः सन्ति तस्य विरोधार्थमेवमेकत्र गृहकोणे कोलाहलकरणेन कथमिमे सफलमनोरथाः स्युः । अहन्तु कथयामि यदिमे स्वमनोवेगं स्ववाक्कण्डूयनं शान्तयितुमेवेत्थत्कूर्दनमुत्सवनादिकमाचरन्ति । महासभाविरोधमाचरद्भिरेभिः स्वात्मापि विस्मर्य्यत इत्येतदेवाश्चर्य्यम् सनातनधर्म-काशी पण्डित-सभा तु नैकस्य कस्यचन विदुषः सम्पत्तिः सा तु सर्वेषामपि काशीस्थविदुषां सभास्ति । तस्या विरोधाचरणं तत्सदस्यविदुषोऽपवदितुमनेक-कपटपाशप्रसारणम् । तैः सह ग्रामण्यप्रयोगः कियद्रोचेत सत्पथपथिकेभ्यः सुरभारतीसमुपासकेभ्यः । अहमत्र विषये न वहु वच्मि स्वयमेव स्वेदृग्गर्हिताचारेण लज्जितांस्तान् ।

तेषामीदृग्व्यवहारेणैव भूयांसः काशीस्थाः प्रसिद्धाः पूज्यपाद पण्डित पद्मनाभशास्त्रिमहोदयप्रभृतयोऽपि नैकतरपक्षगा विद्वांसो ब्राह्मणसम्मलनतस्तटस्थाः सञ्जाताः ।

जगत्प्रसिद्धानां स्वनामधन्यानां पण्डित राजानां श्रीमहामहोपाध्याय प्रमथनाथ तर्कभूषणमहोदयानां श्री म० म० श्री देवीप्रसादशुक्ल कविचक्रवर्तिमहोदयानां, सर्वतन्त्रस्वतन्त्र पण्डित श्री पद्मनाभशास्त्रिमहोदयानां, म० महाध्यापक राधाप्रसाद शास्त्रिणां धर्माचार्य्याणां, अशेषशास्त्राध्यापक श्रीकाशीनाथ शास्त्रिणां, वैयाकरणशिरोमणि श्री (देव) हरिनारायणत्रिपाठिमहोदयानां, वर्तमानप्रगति-परिचितानां श्री हृषीकेशोपाध्यायगणकशिरोमणिप्रभृतिविद्वच्छिरोमणीनामनुपस्थितौ किं साफल्यमस्य ब्राह्मण महासम्मेलनस्येति सुधिय एव विमृशन्तु । क्वच—

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तन्निबोधतेति ॥

मनूक्तिः सनातनधर्म-स्वरूपे । क्वचैषां रागद्वेषमात्सर्य्यासूयोपहतानां तत्स्वरूपनिर्णये प्रवृत्तिरिति महद्वैषम्यम्—

अहमिमान्पृच्छामि यदिमे किङ्कर्तुं व्यवसिताः ? किं सनातन-धर्म्ममपि सम्प्रदायं कर्तुं वाञ्छन्ति । अयि भोः ! विमृशन्तु सनातनधर्म-स्वरूपम् ।

यं पृथग्धर्मचरणाः पृथग्धर्म-फलैषिणः ।
पृथग्धर्मैः समर्चन्ति तस्मै धर्म्मात्मने नमः ॥

इदं हि वाक्यम् किमुपदिशति भवतः किं यथाहमुपविशामि तथैव सर्वैरुपवेष्टव्यम् ? यथाहं व्रजामि तथैव सर्वैर्व्रजेलिममिति ? पश्यन्तु अस्मिन्नेव धर्म्मे—

अह ! ह ! निन्दसि श्रुतिजालम् केशव ! धृतबुद्धस्वरूप ! जय जय देवहरे ?

इति भगवदुपालम्भः । अस्मिन्नेव धर्म्मे—

"अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
प्रज्ञापौरुषहीनानां जीविका धातृनिर्मिता " ।

इति देवाचार्य्यस्य बृहस्पतेरुक्तिः । किम्बहुना अस्मिन्नेव धर्मे ईश्वरावतारस्यापि कपिलस्य निरीश्वरवादं सांख्यशास्त्रं जागर्ति ।

अपि च बौधायनसूत्रे—

"पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतो यानि दक्षिणतस्तानि व्याख्यास्यामो यथैतदनुपनीतेन सहभोजनं पर्य्युषितभोजनं मातुल-पितृष्वसृ-दुहितृपरिणयनमिति, अथोत्तरतः—उर्णाविक्रयः शीधुपानमुभयतोदद्भिर्व्यवहार आयुधीयकं समुद्रयानमितीतरदितरस्मिन् कुर्वन् दुष्यतीतरदितरस्मिंस्तत्र तत्र देश-प्रामाण्यात् इति " ।

(अद्यत्वे तु लशुन-पलाण्डुभक्षणादयोऽपि बहवः सन्ति ।)

इत्यादि-देशकालाधिकारिभेदतो व्यवस्थाऽस्ति । नात्र सम्प्रदाय-मत-मतान्तरवदेकैव विधा दृश्यते । सनातनधर्मोऽयमश्वत्थवदनेकशाखः कदाचनैकस्याः शाखाया वृद्धिः कदाचनापरस्याः । नायं मृतशरीरवद्वर्द्धनोऽपक्षीयमाणो विनश्वरः । किन्तु जीवन्मानव इव विकाशशालीति विदाङ्कुर्वन्तु । अतएव "यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्याद्ये तत्र ब्राह्मणाः सम्मर्शिनो (नतु भवादृशा अपरिवर्तनवादिनः) युक्ता आयुक्ता अलूक्षा धर्मकामाः स्युर्यथा ते तत्र वर्तरन् तथा तत्र वर्तेथाः ।" श्रुतिः—

" अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्म्मः स्यादशङ्कितः"

इत्यादि परामृशन्तो रागद्वेषादिकं विहाय सनातनधर्ममिमं स्थाष्णुं चिकीर्षन्तोऽग्रे वर्द्धन्तां । प्रयागीयसनातनधर्ममहासभानिर्णयान्न पृष्ठतो गन्तुमीहामपि कुर्वताम् । निरीक्षन्तां सनातनधर्मह्रासम् । एकदा धरातलमिदं सनातनधर्मावलम्बिभिरेव परिपूर्णमासीत् । अद्यत्वे तु धरातलमात्रे—१, ६३, ६४, ०१, ००० इयती जनसंख्यास्ति । तत्र—५४, ४५, १० ००० इयन्तः खृष्टीयाः । ४६, ३८, ००, ००० इयन्तो बौद्धाः २२, १८, २५, ००० इयन्तो मोहमदीयाः । २१, ६५, ३४, ५८६ इयन्त एव हिन्दवः । १५, ८२, ७०, ००० इयन्त आरण्यकाः । १, २२, ०५, ००० इयन्तो यहूदीयाः । १, ५२, ८०, ००० इयन्तश्च प्रकीर्णकाः । चतसृष्वपि महाजातिषु हिन्दूनामेव संख्याऽल्पीयसी, तत्रापि सनातनधर्मावलम्बिनः कियन्त इति स्वयमेव विमृशन्तु । तत्रापि ३००० सहस्रत्रयं खृष्टाः, मोहमदीयाश्च केवलं जुमामज्जितेऽष्टादश १८ प्रतिदिनं वर्द्धन्ते हिन्दूनान्तु प्रतिदिनं ह्रास एव भवति । वर्द्धनस्य कथा तु दूरे तिष्ठतु ।

अतः पाश्चात्यशिक्षामात्रग्रहणविदूषितान्तःकरणान् स्वत एवेमं विहातुकामान् स्वीयानेव बान्धवान् न गलहस्तयन्तु सनातनधर्मतः, अपि तु साम्ना निष्पक्षविचारेण च तानावर्जयन्तु स्वपक्षे, इत्येव मम परामर्शः—अपरञ्च—

स्पृश्यास्पृश्यादि-विचारे कल्याणधर्मनिबन्धा म. म. पं. सदाशिवमिश्र शर्मणाप्येवमेवादिष्टमस्ति—

" संसर्गदोषः पापेषु मधुपर्के पशोर्वधः " ।

इत्यादित्यपुराणीय-वचनार्थकरणावसरे । तदपि पश्यन्तु—कल्याणधर्मसर्वस्वे ४५१ तमे पृ० ।

अत्र पापेषु यावत्पापेषु स्पर्शदोषात्मक-पातकमेकं युगान्तर-विषयमेव कलौ तु परिहातव्यं तन्नामक-वृजिनमित्यर्थः सुसमीचीन एव । कलावङ्गीकृते तत्परिहरणे सुतरां कलियुगान्तर्गतापदि परिवर्जनीयस्तद्दोष इति परामर्शः । + + परिशुद्धचरितकेशपरिच्छदैः प्रतिलोम-शङ्करजातीयैः सहैकासनोपवेशनादि-कार्य्यानुष्ठानावसरे नावगण्यः स्पृष्टास्पृष्टिविचारः । अन्यथैषां धर्मान्तरग्रहणेन स्वधर्मदौर्बल्य-प्रसङ्गात् । "

इत्यादि—भवन्तोऽपि यद्यस्मिन्काले किमपि कर्तुं वाञ्छन्ति चेदेवमेव गम्भीरविमर्शनेन सनातन-धर्ममिमं समेधयन्तु, सर्वमान्यञ्च कुर्वन्तु, देशकालोपयोगिनिर्णयेन जनानावर्जयन्तु समादरणेऽस्य । अहो ! रागद्वेषाभिभूता अन्यथयितुमेवेच्छन्ति चेत्तदा तु—

"न कल्माषो न कपिलो न कृष्णो न च लोहितः । अणीयान् क्षुरधारायाः को धर्मं वक्तुमर्हति ।"

इति स्मरन्तोऽत्रविषये विचारमेव न कुर्वन्तु । जपमालिकां गृहीत्वा हस्तोपरि हस्तं वा धृत्वा गृह एव तिष्ठन्तु । कथं पुनरेतावता महता समारोहेण सम्मेलनमारचयन्ति स्वतर्जनगर्जनादिना च रोदसी सम्मीलयन्तीत्यलं बहूक्तेन । * * *

सुरभारती-समेधनसमादरः ।

बुलन्दशहरप्रान्तस्थखुर्जाभिजनेन श्रेष्ठिप्रवरेण श्री गौरीशङ्करगोयनका महोदयेन स्वात्तव्ययकोशतः सुरभारत्याः समृद्धये पञ्च षट् लक्षाणि मुद्राणां निःसार्य्य पृथगेकमक्षय्यकोशं व्यधात् । यतश्चैकः संस्कृतमहाविद्यालयः प्रचलति । पुनश्च दानवीरेण तेनैषमोऽपि सार्द्धलक्षस्यैकमन्यत् न्यास-पत्रं विरचय्य श्रीसुरभारती-शिक्षासमुत्कर्षाय प्रोत्साहनम् समनुष्ठितम् । एतदीयमितिवृत्तमस्यास्मिन्नङ्के संक्षेपतः प्रकाशितं द्रक्ष्यन्ति सुप्रभातपाठकाः । अनया व्यवस्थया श्रेष्ठिनोऽस्य संस्कृतविद्यानुरागो मूर्तिमानिव प्रस्फुरति । सन्ति बहवोऽत्र भारते धनिनः परन्तु तेषां संस्कृतभाषामर्मानभिज्ञत्वात् तदीय धनानामन्यस्मिन्नेव कर्म्मणि भवति व्ययः । श्रेष्ठिनोऽस्य संस्कृतज्ञानस्यैव फलमिदं, यदेतस्य द्रव्यव्ययः संस्कृत-भारत्या एव समुन्नतौ भवतीति । एवमेवास्य श्रद्धा दैनन्दिनंवृद्धिमीयात् । अयञ्च स्वादर्शजीवनेनान्यानपि धनिनः सत्पथे नयश्चिरं जीव्यादिति श्रीविश्वनाथमभ्यर्थये । श्रीमता 'आज'—सम्पादकेनास्मिन् विषये स्वाग्रलेखेऽभिहितं यत् केवलं ब्राह्मणा एवास्याः परीक्षाया अधिकारिणो भविष्यन्तीति नियमं विदधता श्रेष्ठिवर्य्येण स्वीय संकोचभावोऽभिव्यक्तीकृत इति' अत्र ममेदं वक्तव्यं विद्यते यन्नेयं सङ्कोच-दृष्टिः श्रेष्ठिनोऽपि तु अनेनास्य बहुविमर्श-कारित्वम्, देशकालात्मविज्ञत्वम्, कार्य्याकार्य्यव्यवस्थितौ शास्त्राश्रितत्वमेव द्योत्यते । पश्यन्तु इदानीं ब्राह्मणातिरिक्ताः सर्व एव द्रव्यलाभशून्यं संस्कृताध्ययनं विहाय द्रव्यलाभधिया पाश्चात्यशिक्षायामासक्ता भारतीय-संस्कृतिमप्युपहसन्ति । तुच्छस्वार्थलाभमोहेन पाश्चात्याचारपरायणा गोरण्डप्रभु-पुत्तलकमात्मानं कृत्वा तदीयदोष-गुणानन्धा इवानुकुर्वन्ति । कथन्तेभ्यः कृते मुक्तहस्तोऽयं भवेत् ? अपि च "दातव्यमिति यद्दानं दीयतेऽनु-

पकारिणे। देशे काले च पात्रे च तद्दानं सात्विकं विदुः" इति—तथा "समममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। प्राधीते शतसाहस्रमनन्तं वेद-पारगे" इति शास्त्रनियममनुसरतोऽस्य कथं सङ्कोचदृष्टिरिति वक्तुम्पारयामः। अपरञ्च निश्चितं विदन्तु भवन्तो यत् भारतीयं भव्यं सनातन-धर्म-परिपोषकैर्ब्राह्मणैरेव साधितं भविष्यति। स एव धर्मः सैव च जातिर्भारतस्य हृदय-स्थानं निगद्यते। अस्ति च तादृगेव। यद्यप्यधुना तयोः स्वरूपं विगुणितमिव भाति तथापि स्वस्वरूपज्ञाने सञ्जातेऽनयोः समक्षे न कोऽपि धर्मो न कापि जातिः स्थातुमर्हति। स्मरन्तु चाणक्यमपं नन्द-साम्राज्य-ध्वंसकरं चन्द्रगुप्तसाम्राज्य-प्रतिष्ठापकमिति। किम्बहुना "तावद्गर्जन्त्यमी धर्मा जम्बुका विपिने यथा। न गर्जति महासिंहो यावद्धर्मः सनातनः" अतो ब्राह्मण्यं परिवर्धयते सनातन-धर्मञ्च समेधयतेऽस्मै श्रेष्ठिने ससाधुवादमस्माकमाशीः। प्रबन्धक-समितौ च धर्मान्तरभाजां विशेषतः शासकपदस्थानां प्रवेशने कः श्रेष्ठिन आशय इति मयाऽपि न लक्ष्यते। मन्येऽत्राद्यत्विकी चाटुकध्वनि-सम्प्रदायसरणिरेव श्रेष्ठिनानेनाप्याश्रितेति। यत् किमपि स्यादनुकरणीयोऽयं दान-प्रकारोऽन्यैरपि कमलाकान्तपूतैर्भारतीयैरिति शम्।

*　　*　　*

अयि सुप्रभात-पाठक-महोदयाः !

अत्रैव सुप्रभातस्यान्यतमे पृष्ठे मुद्रितम् सात्विकम् साहाय्यम्। श्रीमद्भिरवलोकितमेवभवेत्। पश्यन्तु एवमेव महानुभावैः सुरभारतीसमुन्नति-कामिहमानैः साहाय्यन्दीयमानमासाद्यायं सं० सा० समाजः स्वकीयया आर्थिक्या अवस्थाया यथा कथमपि क्षतिम्पूरयन् पञ्चवर्षेभ्यो वर्षेभ्यः श्रीमत्याः सुरभारत्याः सर्वविधामपि सेवां विदधद्यावधि-सुप्रभात-सञ्चालनेन विवाद-समिति-संस्कृतच्छात्र-सङ्घादि-संस्थापनेन वाचनालय--संस्कृत-सा० विद्यालयाद्युद्घाटनेन च संस्कृत-साहित्य-समाजेऽपूर्वाञ्जागर्तिञ्जनयन् श्रीमतां संस्कृतसेविनामुन्नत्या अहर्निशं यत्नमादधातीति।

अतः श्रीमन्तोऽपि प्रतिमासं निजपाणिपद्मयोरुपतिष्ठतोऽस्य वराकस्य सुप्रभातस्यैवार्थिकादि साहाय्येन लालनां कुर्युः कारयेयुश्चेन्महान् हस्तालम्बो विहितः स्यात् सं० सा० समाजस्य।

निभालयन्तु तत्र भवन्तः श्रीमन्तो नाद्यापि श्रीमतां प्रियतमं 'सुप्रभातम्' स्वव्ययं स्वयमुपार्जयति। इदमिदानीन्तरुणं सदपि स्वावश्यकव्ययार्थमपि स्वपितुः सं० सा० समाजस्यैव मुखं निरीक्षत इत्यहो विषादास्पदं संस्कृतज्ञानाम्।　　*　　*

॥ ऋग्वेदालोचनम् ॥

ले०—पं० श्री नरदेवशास्त्री वेदतीर्थः।

यथानामगुणं पुस्तकमिदमशेषं पठित्वा लेखकस्य भारतीय-संस्कृति-प्रेम्णाहमतीवानन्दितः। पदे पदे गुरुभक्त्यादि-भावप्रोद्बलनेनाध्येतुर्हृदये पौरस्त्य सभ्यता साधु समुद्भासिता भवति। पुस्तक-विषयोपन्यास वैदुष्यमपि चेतश्चमत्करोति मुग्धानल-(मेग्डानल) लो० तिलक-, सामश्रमीत्यादि-पाश्चात्य पौरस्त्य-मनीषिकदम्बानामृग्वेदविषयिणी गवेषणा साररूपतया निवेशिता पाठकानां वैदिकार्य्यनिवासभूमिज्ञाने साधु वैशद्यमादधाति। ब्रह्मवादिपक्ष-निरुक्त-पक्ष-सायणाचार्य्यादि-पक्ष पर्य्यालोचनया तु प्रत्नूतनाशेषपण्डितप्रकाण्डानां

वेदाऽपौरुषेयत्व-पौरुषेयत्वादि विचारवैचित्र्यविज्ञापनेन पुस्तक-पाठकानां वेद-विषयकमान्ध्यमपसारयताऽमृताञ्जनमेवेदमाविष्कृतं शास्त्रिवर्य्येणेति, तस्मै स धन्यवादं वैदिकविज्ञानेतिहासादिज्ञान—प्रियान् सुप्रभात-पाठकाननुरुणधिम पुस्तकमिदमवलोकयितुम् । ३०० शतत्रयपृष्ठात्मकस्य वैदिकार्य्यसभ्यताऽशेषज्ञानसम्भृतस्य वाह्याकार-मुद्रण-प्रकार-लिपि-सौन्दर्य्यादि-विभूषितस्याप्यस्य मूल्यम् १।॥) पादोनरूप्यकम् प्राप्तिस्थानम्—मैनेजर, शान्ति प्रेस, आगरा (यू० पी०)

सुरभारती-शिक्षा-समुत्कर्षाय प्रोत्साहनम् ।

बुलन्दशहरप्रान्तस्थखुर्जाभिजनेन श्रीमता श्रेष्ठिप्रवरेण गौरीशंकरगोयनकामहोदयेन संस्कृतिमवाङ्मयस्य श्रेयसां शास्त्रसमुदयानां प्रागदृष्टचरीमतिगभीरां भूयसीश्चोपलब्धिं भृशमुज्जीवयितुमभिवर्द्धयितुञ्च सार्द्धलक्षमितं वित्तजातं प्रान्तीयशासनसदसे प्रयोजनमदोऽभिलक्ष्य समर्पितं यदस्य कुसीदेन सहस्रमुद्रामिता उपहारा (दक्षिणाः) श्चत्वारो विपश्चितामपश्चिमेभ्यस्तेभ्यो दास्यन्ते ये निम्नाम्नाते विषयचतुष्टये प्राथम्यमुपगच्छेयुरचरमाश्च प्रमाणयेयुरात्मनो योग्यताम् ।

शासनसदसा व्यवस्थेयमधोनिर्दिष्टदिशाङ्गीकृता ।

(१) न्यासमण्डलमिदं 'सेठ-गौरीशंकर-गोयनका-संस्कृत-स्पेशलाइजेशन-दक्षिणा-इण्डाउमेण्ट ट्रस्ट' इति नाम्ना प्रथितिमुपैष्यति ।

(२) अथमस्य न्यासमण्डलस्य भविष्यति समुद्देशो यत् प्रतिवत्सरं वाराणस्यां राजकीयसंस्कृतमहाविद्यालये सुपरीक्षितान् स्वविषये प्रौढिमुपगतान् विपश्चितः पदवीप्रदानेन दक्षिणाप्रदानेनोपहारप्रदानेन चाभिनन्द्य संस्कृतिमवाङ्मयेऽभिनवायाश्च मत्कृतेराधानं तथोच्चशिक्षायाः प्रोत्साहनमिति। तत्र वास्य भवेयुरधिकारिणो ये जन्मना ब्राह्मणाः श्रुति-स्मृति—पुराण—-प्रतिपादितसनातनधर्मानुसारिणः स्युः ।

अमी वक्ष्यमाणा भविष्यन्ति परीक्ष्यविषयाः—

वेदो वेदाङ्गयुतः । धर्म्मशास्त्रं पूर्वमीमांसा च । वेदान्तः । पुराणं सेतिहासम् ।

(३) परीक्षाया भविष्यति त्रैविध्यम्—लिखितपरीक्षा, मौखिकपरीक्षा, शास्त्रार्थपरीक्षा चेति।

[१] लिखितपरीक्षायाम्—तिसृभिस्तिसृभिः ...राभिः समाधेयानि षट् प्रश्नपत्राणि भविष्यन्ति।

[२] मौखिकपरीक्षायाम्—समित्या सम... कमपि विषयमधिकृत्य परीक्षार्थिविरचिते मौलिक निबन्धे भविष्यन्ति मौखिकाः प्रश्नाः ।

[३] शास्त्रार्थपरीक्षायाम्—द्वयोरधिकानां वा परीक्षार्थिनां मिथो भविष्यति शास्त्रार्थः ।

भारतवर्षीयासु प्रतिष्ठितपरीक्षासु सर्वोच्चपरीक्षायां समुत्तीर्णो लब्धवर्णः परीक्षायामस्यां प्रवेक्ष्यति यदि स परीक्षां तामुत्तीर्य स्वे परीक्ष्यविषये वर्षत्रयं कृतपरिश्रमः स्यात् । प्रत्नां परिपाटीमनुसरन्तोऽपि संख्यावन्तः परीक्षायामस्यां प्रवेष्टुं प्रभविष्यन्ति, यदि तेषां वैदुष्यं पूर्वोक्तोपाधिधारिभिः समं प्रमाणितं स्यात्, वर्षपञ्चकं यावत् ते स्वविषये कृतयत्नाश्च स्युः ।

परीक्षायां प्रविविक्षुभिर्विधिरयं व्यवहार्य्यः—

परीक्षार्थिना परीक्षायां प्रवेष्टुं शिक्षाविभागोच्चतमकर्मचारिणा प्रत्तेन, परीक्षार्थिनः प्रान्तीयविश्वविद्यालयस्य शासकमहोदयेन वाइसचान्सलराख्येन समुत्सृष्टेन वा परीक्षार्थिनः सदाचारस्य योग्यतायाश्च प्रति पादकेन प्रमाणपत्रेण साकमेकमावेदनपत्रं समितेर्मन्त्रिणः सविधे प्रेषणीयम् । यदि परीक्षार्थी कस्यचिद् भारतीयावनिपालस्य विषय मावसन् स्यात्तर्हि स तत्रत्यशिक्षाविभागस्योच्चतमकर्मचारिणः प्रमाणपत्रं प्रदाय परीक्षायां प्रवेष्टुं शक्ष्यति । आवेदनपत्रे परीक्षाया निबन्धनस्य च विषयः स्फुटमुल्लेख्यः ।

सोऽयमुल्लेखः समितेः समक्षमुपस्थापयिष्यते तयाङ्गीकृते तस्मिन्नवश्यन्त्वामनुचिन्त्यपरीक्षार्थिना परीक्ष्यविषये इयती संविदुपार्जनीया, इयच्च नूतनमन्वेषणं कार्यमिति परीक्षार्थिनं सूचयितुं विद्वत्तल्लजानामुपसमितिरेका नियोक्ष्यते ।

परीक्षार्थिनः निबन्धो मन्त्रिद्वारा समितेरुपकण्ठं परीक्षातिथेर्मासत्रयात्प्राक् प्रहितं भविष्यति । तेनैव साकं तस्य मौलिकतायास्तत्तद्ग्रन्थानाञ्च सूचिकाविवृतिरप्यपेक्ष्येत । अर्थात्—निबन्धेऽमुष्मिन्नियानंशो लेखकेन स्वप्रतिभया प्रतिनिबद्धः, इयांश्चांशोऽमुकामुकग्रन्थेभ्यः समुद्धृत इति । तदनन्तरं समितिस्तमनुसन्धातुं त्रीन् परीक्षकान् नियोक्ष्यति ।

परीक्षार्थी परीक्षायां प्रवेष्टुं विंशतिर्मुद्राः परीक्षाशुल्करूपेण समितयेऽर्पयिष्यति । मुद्राजातमेतन्न्यासमण्डलस्य कोषे स्थापितं भविष्यति ।

शास्त्रार्थपरीक्षा द्वयोर्मिलितयोर्विद्वद्वृन्दारकयोः ग्रहीष्यते ।

परीक्षायामुत्तीर्णो लब्धवर्णः, वाचस्पतिरित्येतया पदव्या भूषयिष्यते । अर्थात्—यो यामुत्तरिष्यति परीक्षां स तद्विषयिणीं वाचस्पतिपदवीं प्राप्स्यति । यथा—वेदवाचस्पतिः, स्मृतिमीमांसावाचस्पतिः वेदान्तवाचस्पतिः, पुराणवाचस्पतिरिति । प्राप्तोपाधिपरिचायकं शतेन रूप्यकैः क्रेयं काश्मीरदेशीयमेकं राङ्कवांशुकं (काश्मीरी दुशाला) वाराणसेयं शीर्षरत्नश्चोपायनरूपेण प्राप्तोपाधिभ्यो दास्यते । प्रतिवत्सरं वाराणस्यां राजकीयसंस्कृतमहाविद्यालये उपाधिवितरणोत्सवावसरे उपाधयो वितरिष्यन्ते । प्रत्येकस्मिन् विषये प्रथमकक्षायां सर्वप्राथम्यमुपगताय विपश्चिते सहस्रं मुद्राः स्वर्णपदकञ्च समर्पयिष्यते । समितिर्यदीच्छेत्तदा रजतपदकं साधारणीं दक्षिणाञ्च तेभ्योऽपि प्रयच्छेद् येषां स्वविषयिणी योग्यता परीक्षकान् भृशं सन्तोषयेत् ।

एतद्वर्षीया—एतादृशी परीक्षा १९२९ खीस्ताब्दीयेऽप्रिलमासे भविष्यति । परीक्षायास्तिथयः प्रकाशयिष्यन्ते । वर्षेऽस्मिन् निम्नाङ्कितयोर्द्वयोर्विषययोर्भविष्यति परीक्षा—वेद विषयिणीपरीक्षा—शुक्ल-यजुर्वेदे । वेदान्तविषयिणी परीक्षा-शाङ्करमतवेदान्ते ।

परीक्ष्यग्रन्थानपेक्षितानन्यांश्च विषयान् जिज्ञासमानैः समितेर्मन्त्रिणः सविधे पत्रं प्रेषणीयम् ।

सभापतिः श्रीगोपीनाथ कविराजः एम्० ए०, । वाराणसेयराजकीय सं० महाविद्यालयाध्यक्षः ।

मन्त्री श्रीकाशीरामः, एम्० ए०, । संयुक्तप्रान्तीय सं० पाठशालानां निरीक्षकः

संस्कृत-समाचाराः

श्री-सनातन-धर्म-सभा

चूरूनगरस्थ-श्रीसनातन-धर्म-परिषदोऽष्टादश-वार्षिकोत्सवो भाद्रपद-शुक्ल-१०-११-१२ तिथिषु महता समारम्भेण समपद्यत । तत्र क्रमशः—विद्यावयोवृद्धाः पं० श्री-जयदेव-मिश्रमहाशयाः, चूरूनगरस्थन्यायाधीशमहोदयाः, (तहसीलदार साहब) श्रीमत्पण्डित-श्रीधरव्यासज्योतिर्विन्महोदयाश्च सभापति-पदं शोभितवन्तः । पं० मल्लिनाथ ज्यौतिषाचार्य्य महोदयेन सभाया वार्षिकं विवरणं सुश्रावितम् । त्रिष्वपि दिनेषु 'वर्णाश्रमधर्म, सनातनधर्म-स्वरूप-भक्तिमहिमप्रभृतिविषये—पं० अखिलानन्द-महोदयस्य च सुमधुरं हृदय ग्राहि व्याख्यानमभूत् । जनतोपस्थितिः पर्याप्ता आसीत् ।

स० मंत्री सनातनधर्म-परिषदः, चूरूनगरम् } बी० जोशी (साहित्यशास्त्री)

जङ्गलीनाथः

सारण्यमंडले हियादपुरे यवनावसथे बहुकालोऽभूत्, जङ्गलीनाथनामा महादेवः कदाचन स्वयमेव प्रादुर्बभूव । तत्रत्या जना इमं स्वयंभुवं ज्ञात्वा महत्या श्रद्धया महताऽऽदरेण विविधैर्वाद्यैः पूजयन्ति । तस्मिन् ग्राम एक एव कूपः जङ्गलीनाथसंनिकट एव वरिवर्ति । यतो यवनाः पानीयं पिबन्ति शिवभक्ताश्च शिवं समभ्यर्चन्ति । तत्रैवेदानीं स्वराज्य-खिलाफतान्दोलनावसरे आर्य-यवनयोः प्रवृद्धवैरकालतो वैरायमाणा यवनाश्चार्चाविघ्नन्ति । यद्विषये हिन्दुयवनयोरपि योगो वर्षद्वयात् प्रचलति । तत्र हिन्दूनामेवन्यायालयतोऽधुनाविजयोजातः ।

जगन्नाथपुरं सारन् { शिवकुमार शास्त्री का० तीर्थ

विहारोत्कल-प्रान्तीय-संस्कृत-समाजस्य-
(विहार ऐण्ड ओरिसा संस्कृत असोशियेशन)

सूचना

भाविनीः १९२९ वत्सरीय-विहारोत्कल-प्रान्तीय-संस्कृत-समाजीय-परीक्षा दित्सुभिः परिक्षार्थिभिः ३०-११-२८ मितिपर्यन्तं नियमित-शुल्केन साकं आवेदन-पत्राणि प्रपूर्य्य प्रेषणीयानि । एतत्प्रान्तीय विद्यालय-परीक्षार्थिभिः स्व-स्व-मंडल-विद्यालय-निरीक्षकाणां उपनिरीक्षकाणां वा कार्य्यालयत आवेदन-पत्राणि ग्राह्याणि तत्रैव प्रेषणीयानि च । बहिः प्रान्तीयैः परिक्षार्थिभिस्तु स्वीयानि आवेदन-पत्राणि निम्नोक्तकार्यालयत एव प्रापणीयानि । तत्रैव प्रेष्याणि च ।

एस, एन, मजुमदार शास्त्री (सेक्रेटरी)
बिहार एण्ड ओरिसा, संस्कृत
एसोशिएशन पटना ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौर मार्गशीर्ष १९८५ वैक्रमाब्दे ।

पञ्चमवर्षं Vol. 5

December 1928.

अष्टमोऽङ्कः No. 8.

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिमुदस्यद् भेदतारा विलुम्पन्-नयदधिसुरभाषाभाषि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'॥

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्ती, साहित्य-वारिधिः

सम्पादकः—

दर्शनकेसरी श्रीगोपालशास्त्री त्रिपाठी, "साहित्याचार्य्यः"

व्यवस्थापकः—

श्रीगिरीशशुक्लः, "न्यायाचार्यः"

वार्षिकम्मूल्यम्—३)

भारतीयेभ्यः—१२)

प्राप्तिस्थानम्—

सुप्रभात-कार्यालयः

बनारस-सिटी ।

छात्रेभ्यः—१॥)

वैदेशिकेभ्यः—९)

अस्याङ्कस्य मूल्यम् ।)

श्रीकाश्याम् अखिलभारतवर्षीय-सनातन धर्म्म-महासभा-
विशेषाधिवेशने स्वागतसमितेः सभापतीनाम्
द्विजराज-काशीराज-श्रील-श्रीयुत महाराज
श्री प्रभुनारायण सिंह शर्म्म-
वीरपुङ्गव-
जी. सी. आई. ई., जी. सी. एस. आई.
प्रभृत्युपाधिगणभूषितानाम्

अभिभाषणम्

भूमिष्ठापि न यात्र भूस्त्रिदिवतोऽप्युच्चैरधःस्थाऽपि या
या बद्धा भुवि मुक्तिदा स्युरमृता यस्यां मृताजन्तवः।
या नित्यं त्रिजगत्-पवित्रतटिनीतीरे सुरैः सेव्यते,
सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत् ॥

(१)

पूजनीया धर्म्माचार्य्याः प्रियाः सभासदश्च !

श्रीकास्यामस्यां निखिलभारतवर्षीयसनातन-धर्म्म-महासभाया अस्मिन् महाधिवेशने कृपया समागतान् सनातनधर्म्मैकशरणान् सनातनधर्म्मस्य संरक्षणाय परिपोषणाय समभ्युदयाय च कृतनिश्चयान् श्रीमतः प्रतिनिधीन् सदस्यांश्च स्वागतेनाभिनन्द्य, मया सविनयं यत् किञ्चिदिह समुचितं समालोचनीयं, पुरतः समुपह्रियते, तत्र श्रीमद्भिर्भवद्भिः कृपया दीयमानमवधानं समभ्यर्थ्यते ।

श्रुतिमूलस्य धर्म्मशास्त्रपुराणेतिहासशिष्टाचार-परम्परा-परिवृंहितस्य भारतीयानामस्माकं सकलैहिकपारत्रिककुशलैकनिदानस्य महतः सनातन-धर्म्मस्याऽभ्युदयमबाधमभिलषतां सनातनधर्म्मावलम्बिनाम् केषुचिद्विषयेषु कालवशतः समुत्पन्नं प्रतिपत्तिवैषम्यं शास्त्रानुमतविचारालम्बनेन परिहाय सर्व्वथा ऐकमत्येन वर्त्तितव्यमित्यस्मिन् विषये नास्ति कस्यापि प्रेक्षावतो जनस्य वैमत्यम् ।

साम्प्रतं कीदृशानामुपायानामवलम्बनेन तद्वर्त्तनं सुकरमभीप्सितफलानुकूलं च सम्भवेदित्यस्मिन् विषये, पुरुषमतिवैचित्र्यात् समुत्पद्यमानानां बहुविधानां विप्रतिपत्तीनां प्रतिदिवसमुपचीयमानः प्रसरो महतापि प्रयत्नभरेण यद्यपि नाधुना निवारयितुं शक्यः, तथापि सन्त्यधुनापि तानि बहूनि कर्त्तव्यानि, येषु सर्व्वेषामेव सनातनधर्म्मावलम्बिनामस्माकं प्रायेण ऐकमत्यमनायासेन भवितुमर्हति, आपाततस्तान्येव कर्त्तव्यानि सामाजिकैः सर्वैरेव ऐकमत्येन दृढ़तराध्यवसायेन च यद्यनुष्ठितानि भवेयुः, तर्हि महान् खलु उपकारः सनातनधर्म्मावलम्बिनामस्माकं सर्वास्वपि श्रेणीषु अचिरेणैव कालेन समुदियादित्यत्र नास्ति मे अणीयानपि सन्देहलेशावसरः ।

कानि खलु तथाविधानि कर्त्तव्यानि इत्यपेक्षायां प्रदर्शनार्थम् आपातत एतान्येव श्रीमतां पुरतः संस्थाप्यन्ते,—यथा अस्मदीये समाजे आबाल्यात् धर्म्मशिक्षायामौदासीन्येन समुपचीयमानस्य नास्तिक्यस्य परिहाराय विद्यालयेषु सर्व्वेष्वेव नियमेन सनातनधर्म्मशिक्षाप्रवर्त्तनम् ।

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम् ॥"

इति भगवता मनुना प्रतिपादितस्य दशलक्षकस्य धर्म्मस्य जातिवर्णनिर्विशेषेणानुष्ठानाय सर्व्वेषामेव सनातनधर्म्मावलम्बिनां योग्यतासम्पादनम्, आबाल्यात् सर्व्वेषां कुमाराणां कुमारीणां च सर्व्वे-

जातीयानां सत्यंप्रति ऐकान्तिकस्यानुरागस्य मिथ्याव्यवहारं प्रति विद्वेषस्य च समुत्पादनं, मनसि दृढ़तया संस्थापनं च, दारिद्र्यादिभिः यथाकालं विद्यां लब्धुमसमर्थेषु प्राकृतेषु जनेषु सुयोग्योपदेशकनियोगेन रामायणमहाभारतपुराणप्रभृतीनां धर्म्मग्रन्थानां सम्यक् तात्पर्य्यबोधानुकूल-व्याख्यानमुखेनोपदेशदानविधिसौकर्य्यं प्रतिनगरं प्रतिग्रामं सायं प्रातश्च जनसम्मेलनस्थलेषु निखिलमङ्गलहेतु-सर्व्वोपद्रविनिवारणक्षम-श्रीमद्भगवन्नामसङ्कीर्त्तनादिप्रवर्त्तनं, सदा सदाचारपरेषु सत्यैकव्रतेषु शास्त्रानुशीलनरतेषु भगवद्भक्तेषु ब्राह्मणेषु सार्व्वजनीनश्रद्धासमुत्पादनम्, गवां सम्यक् प्रतिपालनं, सर्व्वतः संरक्षणं च, 'संघे शक्तिः कलौ युगे' इति शास्त्रवचनानुसारेण स्वधर्म्मसमाजजातिदेशाभ्युदयार्थं सर्व्वेषां सनातनधर्म्मावलम्बिनां मनुजानामैकमत्येन एकप्राणतया च विहितकार्य्यसम्पादनयोग्यतानयनं च, एतानि तावत् कार्य्याणि प्रायेण सर्वैरपि सनातनधर्म्मावलम्बिभिः अवश्यानुष्ठेयतया अङ्गीक्रियन्ते । अखिलभारतीयसनातनधर्म्ममहासभाया अपि एतानि कार्य्याणि प्रत्यधिवेशनं कर्त्तव्यतया समुद्घोषितानि । एतेषामन्येषां च समाजहितकराणां कार्य्याणां सम्पादनाय अवश्यमपेक्षितं बलं साहसं धैर्य्यं त्यागशीलत्वं च सम्यगधिगत्य इयं महासभा सर्व्वेषां सनातनधर्म्मावलम्बिनां भारतीयानां महते सुचिरस्थायिने च उपकाराय सदा प्रभवतु, तेनास्मासु महोदयपुरःसरा शान्तिः सुप्रतिष्ठिता भवतु, इतीयमस्माकं करुणामयश्रीविश्वनाथचरणकमलयोः सभक्तिविनिवेदनमित्यलमभिज्ञेषु श्रीमत्सु इदानीमधिकेन विनिवेदनेनेतिशम् ।

रचयिता—देवदत्तशर्म्मा शास्त्री, ज्वालापुरमहाविद्यालयस्थः ।

त्वय्येव दीपावलि ? चण्डि ! षण्ढे ! स्वामी दयानन्द इतोऽपनीतः ।
वधाय ते मार्गणमेतदास्तेऽप्यधः प्रदीपैर्गगने खधूपैः ॥ १ ॥
धर्मोपदेशाय स देहधारी लीनो धरायामिह धर्मचारी ।
तमेव लीनं परिलोकयन्ते त्वधः प्रदीपैर्गगने खधूपैः ॥ २ ॥

ग्राहक-संख्या-विरहितं पत्रं नैवावलोक्यते सुप्रभातकार्यालये, इत्यवधानीयम् ।

अखिलभारतवर्षीयब्राह्मणसम्मेलनप्रबन्धकारिणीसभापतेः

महामहोपाध्याय पण्डित श्रीयुक्त

पञ्चानन तर्करत्न भट्टाचार्यमहोदयस्य

संक्षिप्तम्

अभिभाषणम्

नमः सर्वजगद्बिम्बच्छायामण्डलमूर्त्तये ।
अनन्तज्ञानविज्ञानश्रेयःसौभाग्यपूर्त्तये ॥

विदितमस्तु तावदत्रभवतां श्रीभारतधर्माचार्यनिदेशनियन्त्रितसदाचारवर्त्मनां सामाजिकानाम्, यद्चिरंजीवता मया दृष्टा प्राचीना समाजस्थितिः, क्रमविस्रस्तिस्तु तस्या यदधुना दृश्यते, तन्मूलं वैदेशिकी शिक्षा। वैदेशिकं हि राजचक्रं बहुजनपूर्णायामस्यां स्वर्णप्रसविन्यां भारतधरित्र्यामव्याहतमाधिपत्यं कामयमानमार्षोपदेशात्रिरुद्धस्वदेशीयकौशलं शिक्षाव्यपदेशेन तथा प्रवर्त्तयामास, यथा तत्परावर्तितमतिका जनाः प्रायेण समाजस्थितिविरोधिनो जाताः स्वांश्चावमन्यमाना अन्तर्भेदेन चत्वारो वर्णा विशेषतो वर्णबाह्या जीर्ण-शीर्णाः सञ्जाताः। "अस्त्येव सवर्षां मनुष्याणां साम्यं, कल्पितो वर्णभेदः स्वार्थसाधनपरैर्धूर्तब्राह्मणैः, निपीडिता हि प्राचीनाभिजाता नवागतानामार्याणां प्रभावेण, शूद्राः खलु भारतवर्षस्य प्राचीनाधिकारिणः। येषां मूर्द्धन्या द्राविडा आसन्।" इत्येवं नाम वैदेशिकी शिक्षा, तया च शनैरुत्तम्भितो भेदः। भेदो हि राज्ञां प्रणेयः प्रथमोपायः। सति च भेदे वर्द्धमाने चान्योन्यं विद्वेषे यथावसरं तत्र तत्रानुकूलायमानस्य राजचक्रस्य समदृष्टितादिप्रशंसा च प्रवृत्ता। अथ गच्छति कियति काले दैवात् तच्छिक्षापरिणतिरीदृशी जाता, यया बहवो राजचक्रविद्वेषिणो बभूवुः, राजचक्रं हि समदर्शनं स्वपक्षस्य, विषमदर्शनं च ब्राह्मणादीनाम् ख्यापयति; आचरति च विषमं भारतीयैः सह स्वजातीनां विरोधे, उपेक्षते च योग्यमपि भारतीयं राजकीयविशिष्टकृत्येषु, येन कनीयानपि स्वदेशस्यापकारः कल्याणं च प्रभूतं भारतस्य, न तं पन्थानमाश्रयत इत्येवं वैषम्यावबोधः प्रद्वेषहेतुः प्रादुरासीत्। न तावत् तच्छिक्षायामस्ति जन्मान्तरवादः, नापि राजरूपस्य भगवद्विभूतित्वज्ञापनमपि तु राजचक्रोच्छेदपद्धतिप्रतिपत्तिरेव। तदनुशीलनलब्धप्रकर्षाणां केषाञ्चन वैदेशिकशासनोच्छेदबुद्धिरुदपद्यत। केचित् संघशक्तिवृद्धये नाम कूटराजनीतिचर्चापराङ्मुखान् स्वाचाररक्षणपरान् शास्त्रनिष्ठान् ब्राह्मणान् निगृह्णन्तः प्राचीनसमाजस्थितिमपघ्वंसयितुं प्रवृत्ताः। ते हि 'अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। एतत् सामाजिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुरिति भगवतो मनोरुपदेशं तृणाय मत्वा धार्मिकहिंसामसत्यमात्मस्तेयमाशौचं कपटसत्यकवचेनाऽऽच्छादयन्तोऽनुतिष्ठन्ति स्वैराचारं धर्माचारवतो भण्डा इति विनिन्दन्ति। देशोद्धार एव परममस्माकं कर्म इति भावं प्रकटयन्तो देशमधः एव पातयन्ति न हि श्रुतिस्मृत्युदितधर्मभ्रंशनं कदाचिदुद्धारोपायो भवितुमर्हति। स्वाधीनतैव परमोऽर्थ इत्युदीरयन्तः, अन्तश्च बहिश्च सर्वथैव परतन्त्रा भवन्ति। प्रयच्छन्ति च पारतन्त्र्यमाश्रयेभ्यः स्वशास्त्रविधिमुत्सृज्य स्वैराचारपराः स्वेषां विलक्षणभावमपजहतः स्वीकुर्वाणाश्च म्लेच्छभावपारतन्त्र्यं, कथं नाम नामापि गृह्णन्ति स्वातन्त्र्यस्येति

भृशं विक्रीयामहे । भोज्यदानविनिमयेन वा ललनोपचारदानपरिवर्त्तनेन वा लज्जार्पणकौशलेन वा प्रायेण तेषामर्था ह्रियन्ते पणननिपुणैर्वैदेशिकैः । नहि वैदेशिकद्रव्यसम्भारव्यवहारमन्तरेण तेषामहरेकमप्यतिवर्त्तते, इत्येवं परतन्त्रवृत्तयः । स्वातन्त्र्यस्वरूपमप्यजानन्तः स्वाधीनतावादेन परप्रत्ययनेयबुद्धीन् व्यामोहयन्ति । केचित्तु वाह्याचारेण प्राचीनभावमाश्रयमाणा अपि मनसा तानेवानुकुर्वन्ति । तथाहि न तेऽपि शास्त्रं बहु मन्यन्ते, नापि चिरन्तनाचारं, वैदेशिका यथा ब्राह्मणद्वेषं प्रचारयामासुः तेऽपि तथैवाभ्युपगच्छन्ति, न च विश्वसन्ति जन्मान्तरीयकर्मफलेन जात्यायुर्भोगान् । इत्येवं परानुकरणपटीयसा मनसा चिन्त्यमानं स्वातन्त्र्यमपि पारतन्त्र्यस्यैवैकः प्रकारः, नहि दौवारिकरक्षितो गृहपतिः परतन्त्रो भवति नापि दौवारिकविरहितोऽप्रावृतद्वारेषु गृहेषु निवसन् निगडबद्धः पुरुषः स्वतन्त्रो भवति । आर्षपद्धतिमनुसरन्तो वर्णाश्रमिणः सुदीर्घमनेहसं वाह्यपारतन्त्र्यमनुभवन्तोऽपि आन्तरेण स्वातन्त्र्यामृतेनाप्यायिता जीवितात्ययं नापेदिरे । प्रत्युतापेदिरे पुष्टिम् ।

आर्षपद्धतिपरित्यागप्रणयिनश्च साम्प्रतिका यद्यपि वाह्यपारतन्त्र्याद्विमुच्येरन् तथापि आन्तरपारतन्त्र्यकालकूटास्वादसम्मूढा जीवितादेव भ्रश्येयुः, एवं नाम गतानुगतिकतया वयमपि तादृशा माभूमेति समानशीलव्यसनेषु निवेदनम् । अपिच साम्प्रतम्—

नेतृत्वं नाम शास्त्रावमन्तृत्वम्, देशभक्तिर्नाम ब्राह्मणद्वेषः, औदार्यं नाम अविचारेण पानभोजनम्, समदर्शनं नाम प्रतिष्ठितदेवालयेषु सर्वजातिप्रवेशनम्, विद्या नाम परप्रतारणम्, धर्म्मो नाम आत्मस्तेयम्, कर्म्म नाम अनुकूलनीयपापानुवृत्तिः, वीरत्वं नाम सदाचारत्यागः, त्यागो नाम परस्वाधिपत्यम्, दया नाम दुःखजीविस्वजनोपेक्षा, कृतज्ञता नाम पित्रादिपरित्यागः, संस्कारो नाम समाजस्थितिभङ्ग इत्यादयो नवाः परिभाषाः प्रचरन्ति ।

स्वशास्त्रपरिनिष्णाता अपि न शिक्षितसंज्ञां लभन्ते । वैदेशिक-शिक्षाकवलितास्तु तामविसंवादमेवाधिगच्छन्ति । आपणक्रीतम्लेच्छान्नजीविनश्च चुल्लीहीनगृहाधिष्ठातारोऽपि पुरुषधौरेयाः महात्मत्वेन संज्ञायन्ते । हिन्दुनामलाञ्छनमितरव्यावर्त्तनाय महम्मदीयैः प्रवर्त्तितमधुनाऽतिव्याप्तवदालक्ष्यते ।

यथाऽस्मत्समशीलव्यसना वर्णा भाषाविपर्ययजनितभ्रान्तयो माभूवन्नित्येतदर्थमैकमत्यसाधनमस्माकं प्रयोजनम् । ये तावन्मूलतः सजातीया अपि विजातीयभावमापन्नाः, समभाषा अपि विषमभाषाव्यवहारिणः, कुलतो मित्रभूता अपि शत्रूयमाणाः समुपेक्षितधर्मशास्त्रा राजनीतिवर्त्मना लब्धप्रवेशाः समाजाभ्यन्तरं दूषयितुं प्रयतन्ते, नच स्वरूपतस्तावदिमान् जानीते लोकः । एते हि, येषां राजनीतिचर्चाप्रतिनिधितया राजकीयपरिषदि लब्धासनास्तेषामेव प्राणाधिकं धर्माचारं विध्वंसयितुमीहन्ते, इदमेषामालम्बनशाखाच्छेदिनी नीतिः सर्वतस्तारस्वरेणोद्घोषणीया । न खलु स्वशास्त्रविश्वासमन्तरेण भवति जात्यभ्युदय इत्ययं विश्वासो यथा बद्धमूलो भवेत्तदर्थं प्रयतनीयम् । एवमुद्योगः सर्वत्र भारतप्रान्तेषु सममेव सम्पादनीय इत्यत्रैकमत्यं सर्वेषां सनातनधर्मिणां सहमेलनमन्तरेण न भवतीति सम्मेलनमिदं सप्रयोजनम् । सम्मिलित-भगवद्-

र्माचार्यचरणावलोकपुण्यसंचयश्च विद्यान्तरदुर्लभं प्रयोजनम् ।

किञ्च सर्वधर्मविरहितानां राजनीतिचर्चामात्रसाराणां सामाजिकतत्वमविदुषां नर्त्तनकुर्द्दनपटीयसां जनानामुल्लम्फनप्रोल्लम्फनवाक्कन्दुकलीलाहृतमनसः प्राकृतास्तद्वशतामधियन्ति । के चन मध्यमास्तेषु वीतरागा अपि तदितरेषामालस्यदोषजनितां वा मोहजनितां वा बहुषु कर्मसूपेक्षामवलोक्यानन्यगतिकतया तदनुवर्त्तिनो भवन्ति । परे च समाश्रयणीयः कः पन्था इति संशेरते, चिरमनुत्थाने च तावदस्माकं सम्प्रति संशयाना अपि पुरस्तात्तद्वर्त्मैवाश्रयिष्यन्ति, एवं क्रमेण प्रसृते तदनुगमनप्रवाहे पिण्डोदकलोपः सर्वेषामेवास्माकं नियतमेव भविता ।

दुष्करोहि संयम आपातक्लेशभूयिष्ठश्च, सुकरः स्वैराचारो रमणीयश्चापाततः ।

विना शास्त्रविश्वासं विना परलोकभीतिं न चैतयोरुपादानहाने भवतः । शास्त्रविश्वासभङ्गे परलोकभयाभावे च सर्वा एव स्थितयो भज्येरन्, भग्नस्थितिकाश्च मानवाः पशुप्राया भविष्यन्ति । इत्येषानर्थपरम्परा सर्वतो बोधनीया । तदर्थमप्येतन्महासम्मेलनम् । इत्येतावन्ति प्रयोजनान्यभिलक्ष्य संघटितमिदं महासम्मेलनं श्रीश्रीविश्वेश्वरकृपया सम्मेलनपोषकाणां चानुग्रहेण सुसम्पन्नं भूयादिति शम् ॥

हेमन्तर्तु चर्या ।

(रचयिता—भगवतीप्रसाद शुक्ल अयुर्वेदाचार्यः सभापतिः बहराइचसंस्कृतच्छात्रसमितेः)

अलिचापे तु हेमंतो-धनुर्ग्राहौ परेऽपरे ॥
पौषमाघौ-सहःपौषौचतुर्णां प्राग्धि संमतः ॥१॥

हेमन्तकाले जठरानलो वै,
रुद्धान्तरोष्मा हिमशीतवातैः ॥
पचत्यजस्रं गुरु चापि भुक्तं,
निरिन्धनो धातुचरो नृणां स्यात् ॥२॥

आद्या रसाः स्निग्धतमास्त्रयोऽतो,
नवान्नपिष्टोष्णजलं सुपथ्यम् ।
गोधूम-माषेक्षु-पयोविकारा,
ऊर्जस्करा येऽपि च ते निषेव्याः ॥३॥

बिलेशयानां प्रसहोदकाना,
मनूपजानामपि चामिषादाम् ॥
पलमत्तुकामस्त्वलमत्तु कामम्,
न जातु हारि प्रबलाग्निकारि ॥४॥

शैत्यश्च शीतानिलजातरौक्ष्यं,
व्यायामवातघ्नकटूष्णतैलम् ॥
उत्सादनाभ्यञ्जनपादघात—
युद्धावमर्दा निखिलं निहन्युः ॥५॥

तारुण्यमधुसम्मत्ताः,
समुद्दीप्तमनोभवाः ॥
अहिमेता हिमे काँस्कान्
प्रमदानोष्णयन्त्यहो ॥६॥

१ मधुराम्ललवणाः

न स्त्री स्वातन्त्र्यमर्हति ।

(ले०—श्रीनिवास केदलायः रम्भापुरमठस्थः)

देशेऽस्मिन्नन्तर्वाणयश्चिरन्तनाः 'स्त्री अस्वतन्त्रा' इत्यकथयन् । यदि विचारयेम वास्तविक्या दृष्ट्या, तदा तत्कथनं सांप्रतमेवेति भासेत । प्रथमं नारी-शरीररचना-विचारादेव तत् कोमलं कष्टमसहिष्णु इति स्फुटं प्रतीयते । पुरुष-कलेवरे यदस्ति काठिन्यं शक्तिवैशिष्ट्यञ्च न तत् सर्वथा संभवेन्मृदुलशरीरेषु महिलाजनेषु । भिदैषा न केवलं मानवीयासु जातिषु; अपि च पशु-पक्ष्यादितिर्यक्ष्वपि विभाव्यते ।

केचनाऽभिप्रयन्ति यत् स्त्रीणां कृत्रिम-बन्धनैः शारीरिकी शक्तिश्छिन्नाऽऽसीत्, ततस्ताः पुरुषा इव प्रबला नाऽभूवन् इति" परन्तु मृग-विहगादिष्वखण्डं विद्यते स्वातन्त्र्यम्, तथाऽपि भेदोऽयं तेषु किमर्थमालोक्यते ? वृष-महिषौ यावन्तं भारं वहतः, न तावन्तं वोढुं कथमपि प्रभवो गोमहिष्यादयः। अतो नराः कृषये शकटाय च वृषमहिषादीनेवोपयुञ्जते । तत्कृते चेद्वयं गा महिषीश्चैवोपयोजयेम तदा दुग्धमेव न दद्युस्ताः । तथा न शक्ताः स्युर्वृषमहिषवन्निर्वोढुमपि । अर्थात द्विविधस्यापि कार्यस्य क्षतिः स्यात् । विनिमयेन विहितं कार्यं निसर्गमपि नाशयति । एतेन को वा लाभः तथा कर्तुं के वा सज्जाः ? अभिनवयाऽनया सरण्या लाभाऽवाप्तिरास्तां दूरे; मनुष्य-जीवन-निर्वाहोऽपि न स्यात् ।

विषयोऽयं नारीणामपि सम्बध्यते । पुरुषाऽपेक्षया नूनं नार्यो निर्बलाः कोमला इति नास्ति संशयः कस्यापि । परन्त्वस्मिन् विप्रतिपद्यन्ते बहवः सुधारण-धोरणी-दर्शका नागरिकाः । "महिला नृभिस्तुल्यबला स्सन्ति गर्भ-धारण-मोचनावसरेषु भवेयुस्ताः परतन्त्राः । आसामायुषि समयोऽयमल्प एव । तदैता अस्वतन्त्रा इति न विस्मयाऽवकाशः । पुरुषा अपि शक्तिहीनाः परवन्तो भवन्त्येव व्याधाविति

न सर्वसम्मतेयं व्याहृतिः । यतः पुरुष-समानशक्तयस्त्रियः । "मिस् ताराबाई", सदृशाः क्वचिद्वित्राः स्युर्जगति, न सर्वाः, व्याधिजं पारवश्यं स्त्रीपुंसोस्समम् । तथा व्याधि-पीडे आगन्तुके क्षणिके च न प्रकृतिसिद्धे गर्भधारणं त्वबलानां नैसर्गिकम् ।

वनिताः सन्ततये तद्गुप्तये जनिमलभन्त । तासां स्वभावसिद्धं पारतन्त्र्यमीश्वरकल्पितमेव । नवमासगर्भधारणं तदनु मोचनञ्च । परं जातापत्यता विद्यत एव मासत्रयम् । तद्वर्षपर्यन्तमन्याधीनताऽसां युक्तैव । तदा वपुषा चेतसा च स्वातन्त्र्येण न कर्म विधातुं पार्येत । ताः कुर्वीरन् यदि, तदा वैयात्येन तस्य विपरिपाको ध्रुवमर्भके दृश्येत । प्रसूतेरनन्तरं कष्टदः शिशुरक्षाभारः तासां शिरस्येव पतति वर्षद्वयपर्यन्तम् । इयदेव तात्पर्यम् एकस्मै शावकाय वत्सरत्रयं यावत्परवत्येव भवेन्नितम्बिनी, तदनु भूयो गर्भधा-रणवेला भविष्यति ।

इत्थमाषोडशादापञ्चचत्वारिंशत्पर्यन्तं यावदासां सर्वमायुः गर्भधारणार्भकपोषणार्थमेव याति परिस्थितावस्यां कथं स्वातन्त्र्यमनुभवेत्सा ? पूर्वोक्तं प्रजापालनकर्म अयोग्यमिति न कोऽप्याचक्षीत विवेकी । प्रबल-सन्ततेरुत्पत्तिः तद्गुप्तिश्च समेषां राष्ट्रप्रणयिनां कर्तव्यम् । ततः स्त्रीजीवितेनास्वात-

न्त्र्येणैव भाव्यम्, एवञ्च सति स्त्रीपुमांसैा समानाविति पूरुषवत् स्त्रीभ्यः स्वातन्त्र्यं दत्वा ताभिः पुरुषक्रियाः कारयितुं यतमानानां सुधारकधौरेयाणां मैाख्याय किमुत्तरं देयम् ?

समाज-सुधारको भगवान् मनुमहर्षिर्देशहानिमभिप्रेत्यैव स्त्री-स्वातन्त्र्यमपललाप स्त्री-स्वातन्त्र्यस्याशयः वंशक्षयः स एव राष्ट्रनाशः !

गर्भधारणादिसमयेषु योषितः स्वातन्त्र्येण किमपि विधातुं न शक्नुवन्तीति पूर्वमेव निरूपितम् । पुरुष-कार्यकर्त्र्यो रमण्यः प्रायः प्रजोत्पत्तेर्विमुख्यो लक्ष्यन्ते । यद्यारभन्ते पौरुषाणि कर्माणि प्रमदास्तदाऽवश्यं विशेद्रसातलं राष्ट्रम् । "स्त्रीपुंवच्च प्रभवति यदा तद्धि राष्ट्रं विनष्टम् । ' इति नानृतम् । स्वातन्त्र्येणात्मजीविका विदधत्य स्सीमन्तिन्योऽविवाहमेवेहन्ते । अथवा विवाहिता अपि सन्तति-निग्रहे यतन्ते । एतस्मात् यादृक्परिणामो भविष्यति तदद्यत्वे 'फ्रान्स्' देशपरिस्थत्या स्पष्टमवभासते । एतेन स्वैराचारो जले तैलबिन्दुरिव प्रसरिष्यत्येव । अयं भावः-स्वैराचाराद्विवाहमर्यादा नङ्क्ष्यति ततः कुटुम्बसंस्था मृग्या भविता निकेतनेषु । निर्णीयेदं ज्ञानचक्षुषा मुनिना मनुना प्रतिषिद्धा स्त्री-स्वातन्त्र्यप्रचारसरणिः । परन्तु तदीया कल्या वाणी उन्मार्गगामिनीनामेतासां हृदयं न प्रीणाति । ततस्तासामुन्नतिरपि 'नवाङ्गनानां नव एव पन्थाः ' इति नवीनैव । प्रजोत्पादनाय पुरुषाऽवश्यकतायां विद्यमानायामपि, स पूरुषः तत्कार्यं विधाय अन्यत् कार्यं स्वातन्त्र्येण कर्तुं प्रभवेत् । एवं पुरुषस्वातन्त्र्यमबाधितं सहजं च विद्यते । नार्यस्तु गर्भधारणवशान्नूनं परवत्यः ।

किन्तु स्त्रीभ्यः स्वातन्त्र्यदानमयोग्यमिति वचसः ताः केवलं पुरुषभोग्या इति वा दास्य इति वा नाऽस्माकमाशयः । कश्चिन्मनुरपि "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता" इति ताः सम्मानितवान् नेयमसङ्गतिः । तात्विकदृष्ट्या तासां पारतन्त्र्यमङ्गीकृत्य तासां यावदावश्यकं स्वातन्त्र्यं तावन्मात्रं दातव्यं सर्वेषां कर्तव्यमिति भगवतः मनोरभिसन्धिनाऽवसीयते । इति

समस्या-पूर्त्तयः ।

"किं कम्प्रति ब्रूमहे"

योऽयं शाश्वत-धर्म-कर्म-निरतैर्विज्ञैर्जनैः सेवितः ।
नानाकार्य्यकलाकलापकुशलश्चासीत्सुदेशः पुरा ॥
अस्मिन्पूर्वतने समृद्धिसदने देशे पराधीनता ?
धिक्कालस्य विचित्रतां कुटिलतां, "किं कम्प्रति ब्रूमहे" ! १
यत्रासन्निगमाऽगमादिपटवः साहित्य-संगीतकाः ।
विद्वांसः सुकलाकलापकुशला धीराः प्रवीराश्च ये ॥
यातास्तेऽपि दिवं कलौ पुनरिमे हा हाऽवशिष्टा नराः ।
आर्य्याः शुद्धि-पुनर्विवाह-घटकाः "किं कम्प्रति ब्रूमहे" २

"भारतम्"

न दृश्यते सा परमा रमा सखे !
सखेदमस्माभिरितो विमार्गिता ।
यदाऽगुरेते वणिजोऽत्र शासकाः ।
सखे ! तदैत्सापि विहाय "भारतम्" ॥ १ ॥
मिथो मृषाभाषणता-परम्परा—
मनार्य्यतां शासकगाश्च वञ्चनाम् ।
विलोक्य नीतिं जनतापकारिणीं
सखे ! रमाऽगात्प्रविहाय "भारतम्" ॥ २ ॥

—"द्विजेन्द्रस्य" ।

ब्रह्मचर्याश्रम-प्रभावः ।

(ले०—शुक्ल आत्माराम-शास्त्री, विठूरस्थः)

अयि भारतीय-भारत-महानुभावाः !

भवादृशां सुदूरदर्शिमहोदयानां हिन्दुनेतृणाञ्चैतदविदितन्नास्ति यद्धु वार्तमानिके कराले कलिकाले आर्य्य(हिन्दु)-नाम्ना यावन्तः सम्प्रदाया धर्ममार्गाश्च कथ्यन्ते, तेषु वर्णाश्रम-धर्मावलम्ब्यार्याणां दशैवात्यधिकशोचनीया । एषु 'नवशिक्षित'-नामधारिणां समुदायस्य कृते तु सर्वतो वर्णाश्रम-धर्मस्य नामैवापमानजनकम्, येनैतस्या अतिप्राचीनायाः सर्वश्रेष्ठायाः सामाजिकसर्वसिद्धिप्रदपद्धतेर्मूलोन्मूलन एव तैर्देशोन्नतिः समाजोन्नतिः स्वधर्मोन्नतिश्चावलोक्यन्ते । अथ चान्यसंघे जडतैतादृशी प्रवृद्धास्ति यद्वर्णाश्रमधर्मोपरि सहस्रश आक्रमणान्यनाचारांश्च दर्शं दर्शमपि तस्यातिकठिनं हृदयं न विहन्यते । तत्प्रतिकारार्थं च पुरुषार्थशक्तिसंचारोऽपि तेन न क्रियते । अमुना कारणद्वयेन वर्णाश्रमधर्मावलम्बिजनतां, येषां केषांचिदिच्छा भवति, त एव वाक्यबाणैः पादघातैरपमानजनककार्यप्रणालीभिरनेकैराघातैश्च पूर्वं विविधुरिदानीमपि विध्यन्ति । यथा हि, राष्ट्रियमहासभा (कॉंग्रेस)-राजकीयमहासभा (कौंसिल)-प्रभृतिषु क्वचित् क्वचिद्धु हिन्दुमहासभास्वपि कियन्त एव हिन्दुनामधारिणो वर्णाश्रमधर्मविरोधिवर्गाः सङ्घीभूय स्वस्वपितृपितामहादिभिः प्रवर्तितानुमोदितस्यैतस्य विधेर्मूलोच्छेदार्थमेव यतन्ते ।

सर्वस्या अप्यस्या वर्तमानहीनदीनदशाया निवारणाय संमिल्य पुरुषार्थसाधनमेवैकमात्रमुपायं पश्यामः । तत्पुरुषार्थशक्तिप्रकटनार्थमथ च वर्णाश्रमधर्मरक्षणार्थमेव परमकारुणिका दयालवः पूज्याः पूर्वजा ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यासा इत्याश्रमाँश्चतुरो विभज्य संस्थापितवन्तः, यैराश्रमैरार्या भारतवर्षवासिनः 'आश्रमादाश्रमं गच्छेद्धु' इति रीत्या क्रमशः स्ववर्णाश्रमधर्मान् रक्षन्त ऐहिकीमानन्दसम्पत्तिमनुभवन्तः पारलौकिकीं च सुखसम्पत्तिमनुबभूवुरिति ।

अतिकुटिलकलिसमयप्रतापेन ब्रह्मचर्यस्येदानीमस्तित्वमेव लुप्तप्रायम्. यस्य प्रबलप्रतापमिन्द्रादयो देवा अपि सोढुन्नाऽशक्नुवन् यस्य ब्रह्मचर्यस्य प्रभावः स्वयम्भगवता वेदेन स्वमुखेनेत्थं वर्णितो यत्—"ब्रह्मचारिणं पितरो देवजनाः पृथग् देवा अनुसंयन्ति सर्वे गन्धर्वा एनमन्वायंस्त्रिशत् त्रिशताः षट्सहस्राः सर्वान् स देवाँस्तपसा पिपर्ति ॥ २ ॥ ब्रह्मचारी समिधा मेखलयाश्रमेण लोकाँस्तपसापिपर्त्ति ॥ ३ ॥ ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत, इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराभरत् ॥ ४ ॥ इति तस्य ब्रह्मचर्यस्यैतादृश्यवहेलना ? आः ? भगवन् ! भवानेव रक्षकोऽसह्यदुःखपयोधिमग्नानामस्माकम् ।

अयि भव्यभारतीयाः !

पूर्वस्मिन्नवसरे भवदीयोऽयं भारतवर्षदेशोऽखिलभूमण्डलस्थदेशेषु ब्रह्मचर्यस्यास्य प्रबलप्रतापेन निखिलदेशैः पूजितः सर्वेभ्योऽधिकशक्तिशालिगौरवान्वितः सर्वसुख-सम्पन्नश्चाऽसीत्, यत्र भारतवर्षवासिनो जागतिकाखिलमनुष्यानशिक्षयन्त, तथा च भगवता मनुनोक्तम्—

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥"

इति स्वर्गकल्पस्यास्य भारतवर्षस्य पुरातनीं

दशामालोच्याधुनिकीमत्यगाधगर्तगताञ्च तामालोच्य केषां स्वदेशहितैषिणां न स्याद्व्यथितं मनः । तस्मिन् पुरातनावसरेऽस्माकं विज्ञता तात्कालिकाज्ञानध्वान्तरात्राविततस्ततः परिभ्राम्यन्तीभ्यो वैदेशिकजातिभ्यो राकाज्योत्स्नादेश्या सन्मार्गप्रदर्शिकाऽऽसीत्, अस्माकं विद्यानां कलानां च प्रादुर्भावेन सकलाऽन्यजातयो विस्मययुक्ताः साश्चर्याः सत्यश्चकिता आसन्, तथा च व्याकरणसूत्राणां सम्पादनशैली, दार्शनिकमतानुसन्धानं न्यायपदार्थान्वेषणम्, ज्यौतिषाद्भुतोन्नतिः, बीजगणितम्, अङ्कगणितम्, दशमलवरचना, आयुर्वेदस्य विस्मयकारकाविष्कारश्चास्माकं जाज्वल्यमानानि चिह्नान्यद्यावधि संसारेऽत्रावस्थितानि, तात्कालिकाद्वितीयोन्नतीनामादर्शा इदानीन्तनेऽप्यस्मान् साभिमानान् कुर्वन्ति ।

अस्माकं पुरातनकालिकब्रह्मचर्यतपसा यथा यथा लाभा अभवन्, ते तात्कालिकसुन्दरसुखदसमयस्य स्मारका भारतीयप्रत्येकप्राणिहृदयेषु स्वार्थत्यागः, जातिसेवा, निर्भयता, उच्चाकाङ्क्षा, आत्मसंयमः, धार्मिकभावश्च सुदृढा आसन् । परन्तु परमखेदावसरोऽयं यदिदानीन्तनकुटिलसमयप्रभावैस्तथाऽस्मदादीनां परस्परेर्ष्याकलहप्रमादालस्यादिभिर्दुर्गुणैर्ब्रह्मचर्याश्रमः प्रायो लुप्त एव प्रतीयते, यस्य फलमस्माभिरहर्निशमनुभूयत एव ।

परमसौभाग्यस्यैष विषयो यदेतद् ब्रह्मचर्यरूपपुरुषार्थशक्तेः पुनस्तथैव प्रकटनार्थं बहुभिर्विधीयते यत्र तत्रोद्योगः, तेष्वेव कर्णपुरप्रान्ताभिजनैः कान्यकुब्जकुलोत्पन्नैः पूज्यपादैः प्रातःस्मरणीयैः श्री १०८ श्रीमाधवप्रकाशनैष्ठिकब्रह्मचारिभिर्याज्ञिकैः प्राचीनर्षिप्रणीतप्रणालीरनुसृत्य सर्वतः प्रशंसनीयोद्योगैरेको नूतनः 'श्रीब्रह्मावर्तब्रह्मचर्याश्रमः' कर्णपुरप्रान्तीयविठूरनगरे संस्थापितः । तत्रेदानीं वेदाध्यापको वेदान्ताध्यापको मातृभाषाध्यापक इति त्रयोऽध्यापका विंशतिं ब्रह्मचारिणोऽध्यापयन्ति ।

आशासे यदयमग्रे प्रतिदिनं समेधिष्यते यतः सनातनधर्मशिक्षादीक्षिता अधीतसकलविद्याः स्नातका उच्चकोटिकविद्वांसो भूत्वा स्वदेशस्य स्वप्राणातिप्रियसनातनधर्मस्य च पूर्णानुरागिणो भविष्यन्तीति । शिवं विदध्याच्छिवः ।

पाणिनीय-प्रकाशः ।

[म०म० पं० देवीप्रसाद शुक्लः, कविचक्रवर्त्ती]

लोपो भवति रेफस्य परे रेफे सति ध्रुवम् ॥
ढकाररेफलोपस्य हेत्वोस्तु परयोस्ततोः ॥ २२ ॥
ढकाररेफयोर्दीर्घः पूर्वस्याऽणो भवेद्ध्रुवम् ॥
ततो न विरतस्तस्यां सपुनारमते भृशम् ॥ २३ ॥
हरीरम्यस्तथा शम्भूराजते किमहं ब्रुवे ॥
अणइत्युक्तितो बोधो न तृढे न वृढे तथा ॥ २४ ॥
पूर्वग्रहणसामर्थ्यादनुत्तरपदेऽप्ययम् ॥
त्वमजर्घाः कथं रायं रुजालीढो यतिस्स्वयम् ॥ २५ ॥
'मनसूरथ' इहाऽऽसीत्प्राक् सस्य रुत्वं विलोप ओः ।
तत उत्वञ्च रेफस्य लोपश्चासावुभौ ततः ॥ २६ ॥
"विरोधे तुल्यबलयोः सति कार्यम्परम्भवेत्" ।
इतिशास्त्रेण रेफस्य लोपः प्राप्तस्ततः परम् ॥ २७ ॥
त्रिपाद्यन्तरितत्वाच्च रलोपासिद्धिरागता ।
तत उत्वं गुणश्चाऽभूत्ततः सिद्धो मनोरथः ॥ २८ ॥

अथाऽककारयोरेतस्त्रैर्यस्तुः परे हलि ।
तस्य लोपो भवेत्किन्तु नञ्समासे स नेष्यते ॥ २६ ॥
एष विष्णुः स्वयम्भाति सशम्भुरिव शोभते ।
'एषकोरुद्र' इत्यादौ न दोषोऽकोरितीरणात् ॥३०॥
तथा नञ्समासे नो इति निर्देशतः किल ।
असशिव इहेत्यादिप्रयोगेषु न दुष्टता ॥ ३१ ॥
हलीत्युक्तेर्न दोषः कोऽप्येषोऽत्रेत्यादिके स्थले ॥
'स' इत्येतस्य सोर्लोपो भवेदचि परे सति ॥ ३२ ॥
लोपे सत्येव पूर्येत पादश्चेदिति सम्मतम् ॥
श्रीरामस्सैष किं साक्षाज्ञामदग्न्यं व्यजेष्ट यः ॥३३॥
अन्यथा पादपूर्त्तौ तु नायं लोपो भवत्यतः ॥
सोऽहमाजन्मशुद्धानामित्यादिषु न दुष्टता ॥ ३४ ॥
माता रामरतिर्यस्य पिता श्रीदुःखभञ्जनः ॥
तेन देवीप्रसादेन कविना सुविनिर्मिते ॥ ३५ ॥
पाणिनीयप्रकाशाख्ये प्रबन्धेऽस्मिन्मनोरमे ॥
इदं सन्धिप्रकरणं पद्यरूपं समाप्तिमैत् ॥ ३६ ॥

॥ इति सन्धिप्रकरणम् सम्पूर्णम् ॥

॥ शमस्तु ॥

महात्मनो माहात्म्यम् ।

[ले०—लक्ष्मीनाथ मिश्रः (काव्यतीर्थः) भागलपुरीय-रसलपुरस्थः]

सत्याग्रहाश्रमे गान्धिमहोदयेन विष-वस्तिविधानेन क्लेशमनुभवन्तं पङ्गुं गो-वत्समघातयदिति न कोऽप्यनुमुद्यतः कोऽपि दृश्येत, यदि पत्रेषु पत्रिकासु च वृत्तमिदं प्रकाशितं न स्यात् । श्रुत्वेदं सनातनधर्म्मावलम्बिनो मर्माणि आहता विमुञ्चन्त्यश्रूणि, नाशाऽऽविलाः परमपि गान्धिसम्पादितं किञ्चिच्छ्रेयो भारतीयानाम्, स्वराष्ट्रनिर्माणकार्येऽप्येवमेव न कदाचिद्विपत्तिरापतेदिति सन्देहः समुदेति चित्ते । यद्यपि पङ्गु-गोवत्स-सेवाश्रममाश्रयदाश्रमवासिजनस्तथापि तच्छरीरनाशे सत्येव तस्य वास्तविकं सुखं तर्कयता पाश्चात्यदेशाचारविश्वासकलुषीकृतबुद्ध्या कृतमेतदश्रव्यमकर्त्तव्यञ्च कर्म्म गान्धिमहोदयेन । "कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म्म स्वभावजम्" (गी० अ० १८ श्लो० ४४) वचनेनानेन किमेवंविधमेव गोरक्षणमुक्तं भगवता वैश्यकुललब्धजनीनाम् ? द्विविधासु हिंसासु नान्तर्भवति किमियं हिंसा ? प्राणिवृत्तिच्छेदः, अविधिपूर्वकं प्राण्युपघातो वा हिंसा । हिंसापदार्थः कोऽभिप्रेतस्तस्येति तु न निश्चिनुमः । यज्ञे युद्धे च जायमानां वेद-शास्त्रविहितामपि हिंसां निन्दन् गोवत्स-प्राणहानिं विधाय साम्प्रतं कथङ्कारं स्वात्मनः प्रधानोपासकतामहिंसाया रक्षिष्यति । अज्ञानान्मोहाद्वा गोवधे महतैनसा लिप्तो भवत्यात्मा महात्मनामपि । कस्य शास्त्रस्य वा सनातनधर्मावलम्बिसमाजाचारस्यानुमतोऽयं पन्थाः ? यमनुसृत्य कृतं गान्धिना गोवधरूपं महत्पातकम्, आचारोऽयं सनातनधर्मध्वंसिनाम् । शास्त्रबोधिताऽचारपरिपूतमेव कर्माऽचरन् यशः श्रेयश्च विन्दति जनः, न पुनरवमत्य शास्त्राज्ञाम् । "यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥" (गीता० अध्या० १६ श्लो० २३) कार्यमिदमारभमाणस्य गान्धिमहोदयस्य हृदयभूमिर्नैवावलोकिता, लज्जया विवेकितया वा, कथमन्यथा ऽसार्वजनीनां वृत्तिमिमामुरीकर्त्तुम्प्रभवेत् ? येन नात्मनस्तोषः, परस्य वा न कश्चिदुपकारः, यस्य च सम्पादने

त्रपाऽऽक्रामति नाचरन्ति तत् कार्यं जनाः । तदेवोक्तं भगवता बादरायणेन—"यदन्येषां हितं न स्यादात्मनः कर्म पौरुषम् । अपत्रपेत वा येन न तत्कुर्यात्कथञ्चन" (महाभा० शान्ति प० अ० १२४ श्लो० ६६) । तर्कयामो, लब्धे स्वराज्ये, व्याधितल्पगतस्य जीवमात्रस्य विषप्रयोगेण हनने न हिंसाजनितोऽधर्मः, न वा राजदण्डभीतिरपीति नियमं विधातुमवश्यमेव यत्नमाधास्यन्ति गान्धिमहोदयाः । निजे शरीरे सर्वेषां प्रभुत्वम्, तत्कथन्न व्याधितल्पगता जना विषप्रयोगेणानित्यमिदं शरीरं परित्यज्याऽविच्छिन्नं सुखं गान्धिनिर्णीतं परमं पदम् (वस्तुतो नरकम्) प्रपद्यन्ते (!)

व्याधिव्याकुलानां शोचनीया दशा गान्धिमहोदयानामिति समाचारो नैकदा पठितोऽस्माभिः प्राक् । वयं पृच्छामः, स्वशरीरप्रभुः गान्धी न कथं विषप्रयोगेण निजशरीरं परित्यज्यासुखसागरपारमगमत् ? निजशरीरनाशोऽन्यस्यापि कस्यचिदात्मप्रतिकूलो व्यवहारो न कस्यचित्प्रेयान् भवति, सर्व एव निजप्रियं निजात्मानुकूलमेवाचरन्ति, एवं प्रतिकूलमाचरन् गोवत्सस्य गान्धिमहोदयो नाजीगणन्निजजीवनसुखसमानं तस्य जीवनसुखम् । उक्तञ्च "न तत्परस्य संदध्यात्प्रतिकूलं यदात्मनः । एष संक्षेपतो धर्मः कामादन्यः प्रवर्त्तते ॥" (महाभा० अनुशासनप० ११३-श्लो० ८) अपिच, "यदन्यैर्विहितं नेच्छेदात्मनः कर्म पूरुषः । न तत्परेषु कुर्वीत जानन्न प्रियमात्मनः ॥ १९ ॥ जीवितं यः स्वयं चेच्छेत्कथं सोऽन्यं प्रघातयेत् । यद्यदात्मनि सम्पश्येत् तत्परस्यापि चिन्तयेत् ॥ २१ ॥" (महाभारत-शान्ति०) ॥ गोवत्सस्य परवशतां समीक्ष्य यदि तन्मरणं सुखकरमभिमतं तस्य, तदा सकलभारतवासिनः परवशाः, तेऽपि महात्मनोऽनेनोपायेन परवशं शरीरं परित्यज्यामन्दानन्दसन्दोहसम्पादननिदाननन्दनकानने विचरन्तु, विहरन्तु, सुखमनुभवन्तु च । नातःपरमपि किञ्चिद्वक्तुमुत्सहे । वक्तव्यमेव शिष्टमेतावदेव यत् "दुराग्रहमुत्सृज्य शास्त्रविधिमनुसृत्य प्रायश्चित्तमनुष्ठाय विधाय च पश्चात्तापं पापमुक्तो भवतु गान्धिमहोदयः । इत्येव निष्कृतेः पन्थाः, नान्यथा सन्तोषलवमपि सञ्चारयितुं प्रभविष्यति एतत्कर्मविलुण्ठितसनातनधर्मिहृदये" इति विरतिमीहते लेखनी ।

—:***:—

चौरपञ्चाशिका टीका ।

[स्वर्गीयः पं० श्रीदुःखभञ्जन कविः]

अन्येद्युरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥

अथ परेद्युः मुनिहोमधेनुः आत्मानुचरस्य आत्मना स्वेन अनु यथा तथा चरति तादृशस्य अथ आत्मा एव अनुचरो यस्य तस्य चौरस्य भावं सत्ताम् अथ आत्माभिप्रायम् इङ्गितविशेषं वा जिज्ञासमाना सती गौरीगुरोः हिमालयस्य गह्वरं गुहाम् आविवेश कीदृशं गङ्गाप्रपातान्तविरूढ-शष्पं सः अथ गङ्गाप्रपातः अन्तो येषां तादृशानि जातानि बालतृणानि यत्र तत् ॥ २६ ॥

सा दुष्प्रधर्षा मनसापि हिंस्रै—
रित्यद्रिशोभाप्रहितेक्षणेन ॥

अलक्षिताभ्युत्पतनो नृपेण

प्रसह्य सिंहः किल तां चकर्ष ॥ २७ ॥

किल ऐतिह्ये सिंहः प्रसह्य तां धेनुं चकर्ष कीदृशः अनृपेण चौरेण अलक्षिताभ्युत्पतनः कीदृशेन इति अद्रिशः पर्वतशः प्रतिपर्वतमिति यावत् अभाप्रहितेक्षणेन अभया अप्रहिते ईक्षणे यस्य तेन इति किं अदुष्प्रधर्षा सा हिंस्रैः मनसा अपि ॥ २७ ॥

तदीयमाक्रन्दितमार्तसाधो—

गुहानिबद्धप्रतिशब्ददीर्घम् ॥

रश्मिष्विवादाय नगेन्द्रसक्तां

निवर्तयामास नृपस्य दृष्टिम् ॥ २८ ॥

स पाटलायां गवि तस्थिवांसं

धनुर्धरः केशरिणं ददर्श ॥

अधित्यकायामिव धातुमय्यां

लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥ २९ ॥

तस्याः इदं तदीयम् आक्रन्दितम् आक्रन्दनम् भावे क्तः कर्तृ, नून् पिबति लक्षणया रुधिराणि अथ जनान् भक्षयति तादृशस्य चौरस्य दृष्टिं नगे पर्वते वृत्ते वा अन्द्रसक्तां रश्मिषु आदाय रज्जुषु गृहीत्वा इव निवर्तयामास कीदृशस्य आर्तसाधोः आर्ताः पीडिताः साधवो येन यस्माद्वा हेतुभूतात् कीदृशमाक्रन्दनं गुहानिबद्धप्रतिशब्ददीर्घं स्पष्टम् । "अन्द्रः स्यात्कुनटीभेदे गुल्मग्रन्थौ शिरावणे ॥ कुशूलपादे कन्दे च वल्मीके पामरेऽपि च॥ विचर्चिकाविशेषेऽपि जातिभेदे च वाच्यवत् " ॥ २८ ॥ स्पष्टम् ॥ २९ ॥

(क्रमशः)

शोकोच्छ्वासः ।

प्र०—भारतं भारतीयांश्च

स्वकीयान्विरहातुरान् ।

क्व गतो ऽद्यविहायाऽस्मान्

हा ? हा ? पञ्चाम्बुकेसरी ॥ १ ॥

उ०—आर्य्याणामवनीं दृष्ट्वा

सायमन्सप्तक-संकुलाम् ।

देवान् वेदयितुं सोऽगाद्

दिवं पञ्चाम्बुकेसरी ॥ २ ॥

—"द्विजेन्द्रस्य"

(सहायक-सम्पादकस्य)

शुभाभिनन्दनम् ।

श्रीमदाद्यशङ्करभगवत्पादाचार्य-प्रतिष्ठापित-पश्चिमाम्नाय-श्रीशारदापीठाधीश्वराणाम्, श्रीमज्जगद्गुरु-शङ्कराचार्याणाम्, श्रीश्रीराजराजेश्वराश्रमस्वामिचरणानाम् कमनीयेषु करकमलेषु—

श्रीमन्तः पूज्यपादाः सुगुणगणचणाश्चारुचञ्चच्चरित्राः ।
सत्कर्माणः स्वधर्मावननिपुणधियो धैर्यगाम्भीर्ययुक्ताः ॥
जीवन्मुक्ताः प्रभावोपचितसितयशोराशिसंभासिताशाः ।
सन्तु श्रीशंकरार्या जगतिविजयिनो राजराजेश्वराख्याः ॥
श्रीशारदापीठमठाधिनाथाः श्रीराजराजेश्वरनामधेयाः ॥
श्रीशङ्कराचार्यमहोदयाः श्री,युक्ताश्चिरं मोदभरं लभन्ताम् ॥ २ ॥
स्वधर्ममर्मावनदत्तचित्ताः हृत्तापहीना विलसत्सुवृत्ताः ॥
अनेकभक्तार्चितपादपद्माः श्रीशंकरार्या विजयं लभन्ताम् ॥ ३ ॥
वसुन्धराधीश्वरवृन्दवन्द्याः प्रणम्यपादानतसर्वलोकाः ॥
दयामयान्तःकरणाः सुशीलाः श्रीशंकराचार्यवरा जयन्तु ॥ ४ ॥
वाराणसेया विद्वांसो मुदिता मानशालिनः ।
श्रीमतो भवतो भूयोऽभिनन्दन्ति समादरात् ॥ ५ ॥

वाराणसी,
मार्गः कृष्ण १०, १९८५ ।

श्रीसंस्कृत-साहित्य-समाज-सदस्याः ।

" राक्षसनामकरणबीजम् "

(ले०—जयपुर-राजगुरु-कथाभट्ट-वंश्यो-नन्दकिशोर-शर्म्म-साहित्याचार्यः (सरस्वती-भवनं काशी) ।

प्रायो गतवर्ष एव सुप्रभातस्य यस्मिन्कस्मिन्नप्यङ्के कोऽपि महोदयः प्रश्नमिमं प्राकाशयत् तदुत्तरं च प्रार्थितवान् । यन्मुद्राराक्षसनाटके सुबुद्धिशर्माभिधेयस्य जात्या ब्राह्मणस्यापि नन्दमन्त्रिणः किमर्थं दुष्टकर्मोचिता 'राक्षस' इत्याख्या प्रख्यापिता ग्रन्थकर्त्रा ।

तदुत्तरे—पुरातत्त्वविभागे पुस्तकविद्याकर्म-(बिब्लोग्राफी) सम्पादयता मया राजेन्द्र-लालमित्र-सम्पादित-पुस्तकसूचीपत्र-चतुर्थभागे १६५४ संख्यायां मुद्राराक्षसपूर्व-पीठिकाख्यं श्रीयुक्तानन्तकविरचितं गद्यकाव्यं समासादितम् ।

तदनुसारिण्या कथयाऽत्र समाधाने प्रावर्त्ति । 'एकदा नन्दश्चामरग्राहिण्या सुमङ्गलया सह वल्लोत्सवदर्शनाय कमनीयकामिनीकामितं प्रमदवनं प्राविशत् । तत्र च निर्यत्पिपीलिकापङ्क्तिसन्दर्शनेन राजमुखकमलं स्मितमाकलय्य स्मितवदनायां सुमङ्गलायां 'महाराजस्मितेनैव मम स्मितं संजातमिति वदन्त्यां' च 'मत्-स्मितहेतुं कथय नो चेत् त्वां निग्रहीष्ये" इति सुमङ्गलां प्रति राज्ञो नन्दस्य पर्यनुयोगः ।

ततस्तु सा सुमङ्गला सुबुद्धिशर्माभिधेयस्य कस्यचित् ब्राह्मणस्य समुपदेशेन राज्ञः स्मितनिमित्तं प्राकाशयत् ।

राजा नन्दस्तु तस्मै सुबुद्धिशर्माभिधेयाय द्विजाय मन्त्रिराक्षसपदवीं प्रदाय स्वामात्यकृत्ये न्ययुङ्क्त । ('राक्षस' इति पदवी-प्रदाने किं बीजमिति न स्फुटति । सम्पादकः) । विशेष-जिज्ञासाक्रान्त-हृदयैस्तु तत्रत्यकथाभागाः सावधानमनुसन्धेयाः यद्वा--उद्भटभटकूरकर्मप्रख्यस्य राक्षसोपाख्यस्य वीरोचितप्रकाण्डप्रक्रियाक्रियाविधायित्वात् सुबुद्धिशर्माख्यस्य ब्राह्मणस्यापि प्रोक्ताख्या संगतैवेति नास्ति मनागपि संशयावसरः । यथा च—काव्यपरिभाषायां वक्त्रौचित्येन कर्मौचित्येन वा प्रबन्धरचना विधीयते ।

(मृते नन्दे तत्काये योगविद्यया प्रविष्टं कञ्चन योगिनं चेष्टादिभिरूहयित्वा तदीयं कायं पुनः प्रवेशभिया सुबुद्धि-शर्मा भस्मीचकार, अतः स्वकाय-दाहद्वेषेण रुष्टो नन्दकाये निगूढोऽसौ योगी तं 'राक्षस' संज्ञया आजुहावेति स्वाध्ययनकाले कस्मिंश्चित्पुस्तके मया दृष्टचरम् । सम्पादकः) ।

संस्कृताध्यापकस्यावश्यकता ।

दिगम्बर-जैनव्याकरणसाहित्योच्चग्रन्थाध्यापनकुशलस्यैकस्य संस्कृताध्यापकस्यावश्यकता वर्त्तते । येऽध्यापनचातुर्येणच्छात्रान् समीचीनतया तोषयितुं समर्थास्ते महानुभावाः स्वयोग्यतापरिचायक-प्रमाणपत्रादि-पुरस्सरमधोलिखित-संकेतेन पत्रं व्यवहरन्तु । मासिक-पुरस्कारश्च योग्यतानुसारेण प्रदास्यतेऽस्माभिः ।

स० मन्त्री गो० दि० जैन सिद्धान्त

मोरेना (ग्वालियर) ।

सम्पादकीयम्

व्यर्थः प्रयासोऽभवत् ।

वैशाखमासत एव भारतीय-सभ्यता-समेधन-समादराणां सनातनधर्मणां सुधियां हृदि सुविरूढासीदियमाशालता—यत् सनातनधर्मस्य जागरूकादर्शस्वरूपायां वाराणस्यां भावि ब्राह्मणमहासम्मेलनं स्वधर्मस्य पुनर्जागरूकतायै, विधर्मणां मुखमर्दनपुरस्सरं शाश्वतिक-कल्याणकृत्सनातनधर्मस्वरूपाविष्कृत्यै, वर्तमानप्रगतिप्रतिस्पर्द्धि-वाह्याचारपरिष्कृत्यै, विवादास्पदविषयाणाञ्चैकमत्येन सत्स्वरूपनिर्धारणायालं भविष्यतीति ।

परन्तु सम्मेलनसञ्चालकानामीर्ष्याद्वेषाभिभूतबुद्धिविपर्य्यासेन मूलत एवोच्छिन्नायां तस्यां सर्वमप्येकपद एव विनष्टम् । सम्मेलनसञ्चालकमर्मज्ञैर्वाराणसेयैर्बहुभिर्विद्वत्तल्लजैस्तु पूर्वमेवास्य भाविनं परिणामं विगणय्यौदासिन्यमेवावलम्बितमासीत्, किन्तु "दूरतो मृदङ्गनादः श्रुतिं सुखयतीति" लोकोक्तिपरवशा अज्ञाततन्महिमानो वहिस्था वराका महान्तो विद्वांसः पश्चात्तापभाजोऽभवन्नित्यस्माकं चेखिद्यते चेतः ।

विचारसभायामुपसेदुषां विदुषान्नेदन्तिरोहितं स्याद्यदिमे महात्मानो निर्णयबुद्ध्या नेदं सम्मेलनमामन्त्रयाञ्चक्रुः, किन्तु पूर्वमेव स्वमनसि कञ्चन सिद्धान्तं स्थिरीकृत्य तस्यैव प्रकाशनायैतावन्नर्तनकूर्दनमेषामासीदिति । नो चेत् सार्द्ध-(१५००)सहस्राणां प्रतिनिधीनाम्मध्ये (तेषामेव वाक्यतः परम्परयाऽश्रूयत—यदेतावती संख्या प्रतिनिधीनामासीदिति) केभ्यश्चनाऽपि स्वविचारप्रकाशाय पर्य्याप्तावसरो न प्रदत्त एभिरित्यत्र किङ्कारणम् ?

यद्येभिर्महात्मभिर्निर्णयबुद्ध्या सम्मेलनमिदमनुष्ठितं स्यात्तर्हि, उपस्थितैरियत्संख्याकैर्विद्वत्प्रतिनिधिभिः स्व-स्वविचारानुरूपं विमर्शितेषु सप्तदशप्रश्नविषयेषु कस्य स्यान्नाम वैमत्यम् । नापि स्यादसन्तोषः केषाञ्चनापि सुधियाम् । परन्तु स्वदुराग्रहग्रहिलैरेभिर्महात्मभिः पुनरप्येषां विषयाणां विचारो धर्मपरिषदन्तरस्य कृत एव परित्यक्त इत्यहो ! व्यर्थ एवैतेषाम्प्रयासोऽभवत् । अस्तु देशकालाभिज्ञा विद्वांसस्तु तेषु विषयेषु स्वाविरतधर्मशास्त्रादि-परिशीलन-जन्यविमलविमर्शबुद्ध्या-कृतनिश्चया एव सन्ति । ते च यथाशक्यं स्वविचारानुरूपं स्वयमाचरन्ति, स्वानुगाँश्च चारयन्त्यपि श्रीमता मनुनाप्येवमेवाभिधाय समर्थित एवायमर्थः :—

"एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः ।
स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः" । इति

तेषान्तु नास्त्येवैवम्भूतस्य ब्राह्मणमहासम्मेलनादिबाह्याडम्बरकरणस्य प्रयोजनम् । साधारणजनताया

सन्तोषाय तु श्रीकाशीपण्डितसभायाः काशीसनातनधर्मपण्डितसभायाश्च साहाय्येन अखिलभारतवर्षीय-सनातनधर्ममहासभयाऽवश्यमेवैषां सप्तदशप्रश्नानां धर्मशास्त्रीयनिर्णया अविलम्बेनैव प्रकाशिता भविष्यन्ति इत्याशास्महे । ते च निर्णया देशकालपरिस्थिति-पर्य्यालोचनास्खलित-श्रुति-स्मृति-पुराणेतिहासादिविमर्शैरवधारिताः सिद्धान्तिताश्च भविष्यन्ति, इत्यपि सम्भावयामः, अस्माकन्तु सम्मेलनसञ्चालकानां विचारपद्धतौ दयैवोदेति-यत्-कथन्ते देशकालपरिस्थितिविरुद्धं तर्कशून्यं धर्मशास्त्रं विवेक्तुं सन्नद्धा आसन् । यत्र खलु सहस्रशः शास्त्रवचनान्येव श्रुत्यविरोधिनां तर्काणां देशकालपरिस्थितीनाञ्च शास्त्रविमर्शनायैवादरणं कुर्वन्ति । किम्बहुना भगवती श्रुतिरपि 'श्रोतव्यो मन्तव्यः' इति स्वात्मनः सहायकत्वेन तर्कमाश्रयति । श्रीशङ्कराचार्यभगवत्पादैश्च लौकिक-तर्कस्यापि साहाय्यं "पण्डितो मेधावी गान्धारानेवोपसम्पद्येतैवमेवेहाचार्य्यवान् पुरुषो वेद" इत्यादि श्रुतिनिदर्शनेनाभ्युपेतमेवेति न तिरोहितं सुधियाम् । धर्मशास्त्राणि तु—

"केवलं शास्त्रमाश्रित्य, न कर्तव्यो विनिर्णयः ।
युक्तिहीनविचारे तु धर्महानिः प्रजायते । "
आर्षं धर्मोपदेशञ्च वेद-शास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ।" (मनु.अ.१२)
"प्रत्यक्षञ्चानुमानञ्च शास्त्रञ्च विविधागमम् ।
त्रयं सुविदितं कार्य्यं धर्मशुद्धिमभीप्सता।'(मनु.अ.१२)
"धर्मे प्रमीयमाणे तु वेदेन करणात्मता ।
इति कर्तव्यताभागं मीमांसा पूरयिष्यति ।"(भ.वा.)
"देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत् ॥"
(इति आह्निकतत्त्वे, दक्षबौधायनवाक्यम्)
"जाति-शक्ति-गुणापेक्षं सकृद् बुद्धिकृतन्तथा ।
अनुबन्धादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत् ॥"
(इति देवलस्मरणम्)

विज्ञानेश्वरेणापि—याज्ञवल्क्यटीकायाम्—परस्परोपमर्दपरिहारार्थं विषयव्यवस्था-कल्पनैवोचिता । सा च जातिशक्ति गुणाद्यपेक्षया कल्पनीयेति ।

इत्येवं बहूनि शास्त्रीयवचांसि सन्ति, यानि च युक्तिहीन-धर्मशास्त्रविचारं विरुन्धन्त्येव नहि, अपि तु निन्दन्त्येव । दार्शनिक-विज्ञानानि तु प्रत्यक्षत एव जाग्रति अनुमानाभ्यर्हितत्वसूचकानि । तथाहि कणादाक्षपाद-कपिल-पतञ्जलि-प्रभृति-महामान्यानां दर्शनानि त्वानुमानिकत्वेनैव गीयन्ते । पूर्वोत्तरमीमांसे अपि 'श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यादिभिः प्रमाणैः पुरुषबुद्धिपरिकल्पितैरेव श्रुत्यर्थं मीमांसमाने न तर्काश्रयतां परिहरत इति किं बहुज्ञेषु बहूक्तेन । एवमेव वैदिक-लौकिकोभय-मीमांसा-विरहितं विचारमाचरद्भिस्तैः सर्वे स्वपक्षगा अपि विद्वांसो विरोधिताः । शास्त्रनिर्णयमपि दूरे प्रक्षिपद्भिः स्वमनोऽभिलषितमपि न पूरयितुम्पारितम् । समाचारपत्रादिष्वपि न किमपि वृत्तं प्रकाशितम्, सर्वसाधारणजनेभ्योऽपि न कोऽपि मार्गो निदर्शितः, इति सर्वोऽप्येषां व्यर्थः प्रयासोऽभवदित्येव खेदास्पदमस्माकम् । सम्मेलनस्यास्य साफल्यान्वेषणे दत्तावधाना वयं कथमपि संस्कृत-विश्वविद्यालयोद्घाटनप्रस्तावमेवैकं सर्व-

स्मिन् क्षेत्र एकं मृत्पिण्डमिव सारमाकलयामः । तत्रापि यदीमे बद्धपरिकराः सन्तस्तस्य कृते यत्नमाचरेयुस्तदैवास्माकं सन्तोषः स्यात् । वयं तु कथयामो यद् व्यर्थमेवैते द्वेषासूयाभिभूताः स्वकर्तव्यविमुखा ब्राह्मणानां जन्म-सिद्धमपि नेतृत्वमपगमयन्ति । किम्बहुना यदैवेमे रागद्वेषौ विहाय कर्तव्यपरायणा भूत्वा कार्य्यक्षेत्रेऽवतरेयुस्तदैव सर्वमपि भारतमेकदैव जागरितं स्यात् ? स्याच्च स्वर्गायितोऽयं देशः । अपि च सर्वात्मना समुत्थिते ब्राह्मणकुल इदानीं य इमे नेत्राभासा अस्मदीयं परमपवित्रं नेतृपदं विगुणयन्तोऽन्यथयन्ति भारतीयं समाजम् । तेषां चक्रमेकपद एव निरुद्धं भवेत् दूरे तिष्ठत्वन्यत्, यदीमे महात्मानः संस्कृतविश्वविद्यालयोद्घाटनायैव स्वशक्त्यनुरूपं प्रयतेरन् तदापि सर्वा एव भारतीयाः सनातन-धर्मावलम्बिन्यो जनता एतदनुगा भवेयुः । अपेक्षिते साहाय्ये वयमपि सोल्लासास्तत्र सर्वत्र सर्वतः सर्वथा सर्वात्मना साहाय्यमाचरिष्याम इत्यास्माकं हार्दिकोऽभिप्राय इति विरम्यते विस्तरात् ।

* * * *

जगद्गुरु–श्रीशङ्कराचार्य्याणां–

शुभाभिनन्दनम् ।

अस्मिन् मासेऽत्र काश्यां समागतानां पश्चिमाम्नाय-शारदापीठस्थ जगद्गुरुशङ्कराचार्य्य-श्रीराजराजेश्वराश्रम स्वामिवर्य्याणां स्वागत-शुभाभिनन्दन-पूजन-व्याख्यानादिकं बहुत्र श्रीगुर्जरच्छात्र समिति-श्रीकाशीपण्डित-सभा-संस्कृत-साहित्य-समाजादि-प्रशस्यतरासु संस्थासु सञ्जातम् । तद्वृत्तमस्मिन्नङ्के स्थानाभावादस्माभिः प्रकाशयितुन्न पारितम् । अग्रिमाङ्के पाठकानां पुरतोऽवश्यमुपस्थापयिष्यामः ।

संस्कृत-समाचाराः

ब्राह्मणमहासम्मेलनाधिवेशनम् ।

विदितमेव स्यात् सुप्रभातपाठकानां यत् कार्तिककृष्णपक्षे ब्राह्मणमहासम्मेलनम् महता समारोहेण सम्पन्नमिति । प्राक् महासम्मेलनावसरे एव कतिपयैः समाचारपत्रैः प्रकटितमभूत् यत् सम्मेलनसम्पादकाः व्यक्तिगतासूयापराः सन्तः सम्मेलनाय उद्यता इति । अहं तावत् महासम्मेलनविचारसभायां महासभायां च उपस्थितोऽभवम् ।

इदानीं तावत् तत्र किमहमन्वभवमित्येतद्विषये युष्माकं सविधे विज्ञापयामि । अयं समय एव तथाविध आपतितोऽस्ति यो धर्मविरोधीति गीयते एतादृशे अविश्वासयुगे स्वीयधर्मरक्षणार्थं सनातनपथजुषां ब्राह्मणविदुषां सुसंघटनाय एतावान् समारोहोऽतिशयेन प्रयासेन सम्पादित इत्ययमपि प्रशंसार्हः । नूनम् यदाहं तत्र विचारसभायां महा-

सभायां च देशांतरादागतैः १५०० प्रतिनिधिमहोदयैः समलंकृतमधिवेशनमपश्यं तदा मम ह्यतीव-सम्मोदःसमजनि । सन्तु नाम, कार्य-परिचालने मध्यस्थनिर्णये स्वपक्षप्रोद्बलने परपक्षप्रतिरोधे च महोदयानाम् अनन्तकृष्ण-शास्त्रिणामसहनीया हावभावा निरंकुशप्रवर्तनातिशयः पक्षपातश्च । तथाऽपि मुहूर्त्तमिदमालोच्यताम् यत् तावत् परिश्रमेण दशविध-ब्राह्मणानां समावेशनं कृतमित्येव तेभ्यो म०म० लक्ष्मणशास्त्रिद्राविडेभ्यः, म० म० पञ्चानन-तर्करत्नेभ्यः, अपरेभ्यः संपादकेभ्यो साधुवादसहस्राणि दातव्यानि न वेति ।

तस्मिन् महासम्मेलनेऽतीव निन्दनीया दुःखदा च या त्रुटिरभवत् सेयमेव यत् नियमास्तादृशाः स्वेच्छया विहिता ये काशीस्थ-विद्वदाचार-विरोधिनो लज्जाजनकाः । कतिपये प्रस्तावाश्च देशकाल-पात्राननुकूला एव स्वीकृताः । यदि सम्मेलनकार्यकर्तारस्ते प्रस्तावा देशाभ्युदय-निःश्रेयसकरा इति मन्येरन् तर्हि परिपालयन्तु तान् । सर्वत्र उक्तसम्मेलनस्य शाखाः प्रशाखाः स्थापयन्तु, धर्मप्रचारार्थम् उपदेशकान् विसृजन्तु "आरम्भशूराः खलु भारतीयाः" इत्येषा लोकोक्तिस्तैरवश्यमन्यथा कर्तव्या । प्रयत्नान्तेषां भगवान् विश्वनाथः सफलीकरोतु—इति आशास्ते ।

वेङ्कटेश्वर शर्मा ।
(आन्ध्राभिजनः, काशी-विद्यापीठस्थः)

विशेषाधिवेशनम् ।

कार्तिक-शुक्ल—द्वितीयायां बुधे स्थानीय-श्री-परिव्राजक-महामण्डलस्य विशेषाधिवेशनं महासमारोहेण समजनि । सभापतेरासनं श्रीमज्जगद्गुरुशङ्करभगवत्पादगोवर्धनपीठाधीश्वरश्रीभारतीकृष्णतीर्थस्वामिभिस्समलङ्कृतमासीत् । मङ्गलाचरणानन्तरं श्रीमत्प्रेमपुरिस्वामिनः "संन्यासिनो यदा कार्यक्षेत्रे अवतरन्ति तदा प्रवृत्तिकारणान्निन्दां व्रजन्ति, यदि न कुर्वन्ति तथा जनेऽकर्मण्यादिदोषालङ्कृता भवन्तीत्येतेषां द्वैविदुध्ये किं कर्तव्यं तदेवाद्योद्बोधयन्त्विति" सभापतीन् प्रार्थितवन्तः । सभापतिमहोदयैः सर्वं श्रुत्वा द्विघटिकापर्यन्तं संन्यासधर्मः प्रदर्शित उद्घोषितं च यावत्पर्यन्तं शिखासूत्रधारिणो वयं तावत्पर्यन्तमस्माकं सर्वमपि कार्यं फलेच्छायुक्तं भवति तत्त्यागेनाऽस्माकं निष्कामकर्मण्यधिकारः सञ्जातः । संन्यासिनां शरीरमपि परोपकाराय विद्यते पुनर्धनसम्पतेः का कथा ? अस्माभिः सदैव निष्कामकर्म कुर्वद्भिः भुवि पर्यटनं कार्यं येनास्माकमेवमस्मत्संसर्गिणामुभयलोककल्याणं भवेत् । एवं सम्यगस्मद्धर्मानुसारेण कार्यकरणे धर्मस्य, देशस्य, समाजस्य च सुरक्षा भविष्यति । इति—

ब्रह्मानन्द संन्यासी,
मन्त्री—'श्रीपरिव्राजक-महामण्डलस्य' काशी ।

श्रीधन्वन्तरि-जन्म-महोत्सवः ।

श्री महीशूर-(मैसूर) जनपदे सम्भाव्यमानानां रोगाणामपाकरणाय तज्जनपदानां पूर्णायुर्वेद-शिक्षा प्रदानाय च प्रतिष्ठापिते गवर्न्मेंन्ट-आयुर्वेद-महाविद्यालये प्रति-वत्सरं धन्वन्तरि-महोत्सवो भवति । स चास्मिन् हायने आश्वयुज-कृष्णद्वादश्यां महता समारम्भेण नगर-सभा-सभापतीनां (म्युनिसिपैल्टी प्रेसिडेन्ट) श्रीयुत टि० जि० राम० बी. ए. एल. एल. बी. महोदयानामध्यक्षत्वे समपद्यत । वार्षिक-विवरण-पाठमारभ्य विदुषां व्याख्यानानन्तरं श्रीमन्महाराज-संस्कृत-पाठशालाया नव्यन्यायाध्यापकानां श्रीमताम् एस. रामस्वामि अयङ्गार्य्यमहाशयानाम् ।

" प्रह्वीभावमुपाश्रयन्तु नृपतौ लोका" इति घोषितुं ।
शीर्षन्यस्त-किरीटरत्न-विलसत्कान्तिप्रसूनैर्मुदा ॥
सामन्तावनिपा यदीय-चरणावाराधयन्त्यन्वहम् ।
तस्मै कृष्णनृपाय भूरि कुशलं देयात्स धन्वन्तरिः ॥

इत्यन्तश्लोकात्मकस्तोत्रेण धन्वन्तरि-स्तुत्या सधन्यवादं स-महाराजाशीर्वादं च महोत्सवोऽयं समाप्यतेति निवेदयिता—

श्री गोपालकृष्णः शास्त्री,
गवर्मेन्ट—आयुर्वेद—कालेजः
(मैसूर)

श्रीकाशी-पण्डित-सभा ।

सं० १९८५ वैक्रमाब्दीय-कार्तिक-शुक्ल-प्रतिपदि (ता० १३—११—२८) सारस्वतकुलभूषण 'रायसाहब, श्रीमान् माधवराम खण्ड-' महोदयानां राम-मन्दिरे एका महती सभा सम्पन्ना । तत्र काशीस्थसमस्त-सारस्वत-मण्डली-पण्डित-समुदायश्च समुपस्थित आसीत् । अस्यां सभायां ब्राह्मणानां संस्कृत-विद्यायाश्च महत्वं, द्वयोः साम्प्रतिकस्थितिरेवं भविष्यत्कर्तव्यमित्यादि-विषयानधिष्ठायानेकेषां विदुषां महत्वपूर्णोपदेशाः संवृत्ताः । तथा च पश्चिमाम्नाय-द्वारिका—पीठाधीश्वर—जगद्गुरु—श्रीमच्छङ्कराचार्य्य—श्रीराजराजेश्वराश्रममहाराज—पार्श्ववर्तित्वेन ब्राह्मणमहासम्मेलने उपस्थितेभ्यः निम्नाङ्कितेभ्यो विद्वद्वरेभ्यः श्रीलोहाणाखत्रिप्रभृतिसज्जनेभ्यश्च "काशीस्थ-सारस्वत-मण्डली"-द्वारा, एवं "श्रीकाशीपण्डित-सभा"—द्वाराऽभिनन्दनपत्राण्युपाधयश्च क्रमशः समर्पिताः । इति ।

*(१) श्रीपण्डित-कार्तान्तिक श्रीकृष्णशर्म-ज्योतिर्विद्भ्यः—" दैवज्ञ-वाचस्पतिः " इति ।

(२) महोपाध्याय पण्डित श्रीदयाराम खटाऊ जी शर्मभ्यः—' वेदान्त-वाचस्पतिः ' इति ।

(३) श्री पण्डित जयराम-उकरडा-व्यासेभ्यः —' भागवताचार्यः ' इति ।

(४) श्रीसेठसिंघसुन्दरेभ्यः —' स्वधर्म-धुरन्धरः ' इति ।

(५) श्रीवसन्त दयालुभ्यः —' व्याख्यान-केशरी ' इति ।

श्रीगोपालशास्त्री त्रिपाठी
स० मन्त्री—श्रीकाशी-पण्डित-सभायाः

* एतयो विद्वद्वरयोः सारस्वत-मण्डलीतोऽभिनन्दन अपि समर्पिते आस्ताम् ।

प० व्रा० छात्रसम्मेलनम् ।

श्रीपरिव्राजकछात्रसम्मेलनस्य विशिष्टाधिवेशनं ता० २८—११—२८ तिथौ अद्वास्पदस्य श्रीपण्डित गोपालशास्त्रिणां दर्शनकेसरिणां सभापतित्वे संजातं।

तत्र श्रीसच्चिदानन्द परमहंसस्य सारगर्भ-संस्कृत-भाषणानन्तरं, राष्ट्रकेतुः श्रीलालालाजपतरायस्य पंचास्युकेशरिणः मृत्युना देशस्य या क्षतिः संजाता तां प्रति शोकप्रकाशनात्मकः प्रस्तावः सर्वसम्मत्या समादृतस्तथा कतिपयच्छात्राणां भाषणानन्तरं सभापतिमहोदयस्य पाण्डित्यपूर्णं भाषणं सरस-सुसरस्वत्या संजातं विसर्जिता च सभा—

स्वामी विज्ञान-भास्करानन्द

मन्त्री—श्रीपरिव्राजक-छात्रसम्मेलनस्य

लक्ष्मीकुण्ड, काशी ।

सर्वतन्त्रसिद्धान्त पदार्थलक्षणसंग्रहः

गौरीशङ्करभिक्षुकृतः, द्वितीयावृत्तिः । मूल्यम्-।।।)

वेदवेदाङ्गदर्शनस्मृतिकाव्यादिशास्त्रीय-पदार्थानां २७०० लक्षणवर्णनात्मकग्रन्थो नाद्यावधि प्रकाशितः । उपयोगित्वविषये—

'ये सन्ति विषयाश्चास्मिन् ते न दृष्टाः, परत्र वै ।
अत्र चैव समावेश्यं सर्वसिद्धान्तलक्षणम्' इति काशी-मद्रासादिस्था ८६ विद्वांसो मुक्तकण्ठमुद्घोषितवन्तः ।

प्राप्तिस्थानम्—

[?]मरीदेवी, पुट्ठी, पो० जमालपुर, जि० हिसार ।

सचित्रम् सामुद्रिक-रहस्यम्

ले०—श्रीकालिकाप्रसादशर्म्मा, राजज्योतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथा नवीनमेव । एतेन हस्तरेखाणां गुरुं विनैव सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि-कोकोक-विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनी-प्रभृतीनां स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाश्च लक्षणानि, तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वसविधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

महाकवि बाणभट्टः ।

ले:—भू०पू० सुप्रभात-सम्पादकः श्रीकेदारनाथ शर्म्मा

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र बाणभट्टस्य जीवनविषये महत्वपूर्णा, मननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारकोऽयं निबन्ध-बन्धः । मूल्यम् =) मार्गव्ययः -)

सर्वेषां प्राप्तिस्थानम्—

मैनेजर—सुप्रभात-कार्यालयः, बनारस-सिटी ।

लेख-सूची ।

सं० सा० समाजस्य धर्मपरिषद् ।

इदानीं वाराणस्यामन्यत्र च धार्मिकक्षेत्रे शैथिल्यमस्तङ्गस्तनां, धर्मप्राणर्जु शुद्धि-वैश्यादि-साधारणजनेषु दाम्भिकानां वर्द्धमानं पादप्रसारं धर्ममर्मानभिज्ञेषु धार्मिकह्रासञ्च विलोक्य, संस्कृत-साहित्य-समाजेन एका 'धर्मपरिषत्' संस्थापिता । या च समये समये बहिःप्रदेशेषु स्वोपदेशकसदस्यैः धर्मप्रचारं कारयिष्यति । यस्या धर्मोपदेशका मार्गाद्यावश्यक-व्ययमात्रमेवादाय धार्मिक-सामाजिकादिसभायां धर्मोपदेशार्थं गतागतं करिष्यन्ति, प्रत्यहञ्चात्र काश्यां जनसम्मर्दबहुले दशाश्वमेध-घट्टे धर्मशास्त्राणां प्राचीनपद्धत्या कथाप्रवचनं च प्रवर्तयिष्यन्ति ।

गत-पौषशुक्लद्वितीयायां महता समारम्भेण सर्वेषां सं० सा० समाज-सदस्यानामन्येषाञ्च काशीस्थानां विदुषामुपस्थितौ दशाश्वमेधीयाऽहल्यावायी-घट्टे कथाप्रवचनस्य प्रारब्धिरपि सञ्जाता । यत्र च समाजीय-धर्मपरिषत् सदस्याः श्रीपं०विन्ध्येश्वरीप्रसादशास्त्रिणो मनुस्मृतेः कथा-प्रवचनं प्रत्यहं सायं पञ्चवादनतः षड्वादनं यावन्नियमतः कुर्वन्ति । काशीस्थानां सर्वेषां संस्कृत-विद्यालयच्छात्राणां कृते तु प्रवचनमिदं महदुपकरिष्यतीति प्रतिदिनं सायं वायुसेवन-बुद्ध्यैव तत्र गत्वा तदीयं मनुस्मृति-प्रवचनं शृणुयुश्चेत् । यदि च स्वपार्श्वे तत्पुस्तकं संस्थाप्याध्ययनरूपेण ते शृणुयुस्तदा "एकक्रियार्थद्वयप्रसिद्धेति" श्रवणेन साकं मनुस्मृतिरपि कण्ठस्था स्यादित्यहो नोपेक्षणीयोऽयमवसरो धर्मशास्त्ररहस्य-जिज्ञासमानैर्भावुकैः संस्कृतच्छात्रैरन्यैश्चेति—

केदारनाथशास्त्री सारस्वतः,
मन्त्री—सं० सा० समाजस्य ।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रं संस्कृत-मासिक-पत्रम् ।

पञ्चम-वर्षे | सौर—पौषे । १९९५ वैक्रमाब्दीये | नवमोऽङ्कः ।

श्रीशारदाष्टकम् ।

[रचयिता—श्रीचन्द्रशेखरशर्मा, बीकानेरस्थः]

तनुतां मनोज्ञनयताम्, नयतां तमो-विलयताम्।
ददतां जनेष्वभयताम्, दयतां सदैव दयताम् ॥

रमणीय-पद्म-शोभम्, कमनीयसर्वतोभम्।
तनुते पदं प्रसादम्, हरते मनो-विषादम् ॥

द्रवयन्नुदेति दैवम्, नमतेऽशिवं सदैवम्।
महिमानमाद्रियन्ते, के नैतमद्भुतं ते ॥

चरणाम्बुजस्य सेवामुपकल्पयन्ति देवाः।
मुनयोऽपि योग-लीनास्त्वां चिन्तयन्त्यदीनाः॥

करुणाप्रसारसिन्धुम्, त्वामेव, सर्वबन्धुम्।
जानाति देवि ! सर्वः,स्तवयत्यलं सगर्वः ॥

धारा सिताऽसिपुञ्जे, कमनीयता निकुञ्जे।
तुलनोभयोरनन्या, त्वय्येव देवि ! धन्या ॥

त्वय्येव सन्ति भावास्त्वय्येव सत्प्रभावाः।
त्वामेव चिन्तयन्तः, सत्यं भवन्ति सन्तः॥

मातर्ददासि वृद्धिम्, पुनरैश्वरीं समृद्धिम्।
त्वं सर्वतो जयन्ती, कल्याणवैजयन्ती ॥

संस्कृत-साहित्य-समाजस्य संक्षिप्त-परिचयः *

जगदम्बावलम्बाय निरालम्बाय शूलिने ।
जगत्त्रय-कुटुम्बाय नमः साम्बाय शम्भवे ॥
या शिल्पशास्त्रादिपयो महार्हम् ,
सन्दुह्यते योजितबुद्धिवत्सैः ।
वैज्ञानिकैर्विश्वहिताय शश्वत् ,
तां भारतीं कामदुघामुपासे ॥

अयि आर्या आचार्यचरणाः !

विदितमेव तत्र भवतां यदिदानीं समये निखिलेऽपि भूमण्डले दरीदृश्यते प्रबलो विप्लवः, समाकर्ण्यते सुमहान् कोलाहलः, अनुभूयते विषमविषमा दुरवस्थितिः, अनुमीयते च भीषणतरा परिणतिः । अस्माकं सम्मुख एव विश्वमण्डले विपुलं वैक्लव्यमवलोक्यते । अस्माकं भारतवर्षे धर्मप्राणा हिन्दूजातिरियमराजकतायामस्यां चकित–चकितेव सर्वतो विलुंठ्यमाना दोदुल्यमाना च विपथ-प्रवृत्ता कल्याणं कामयन्ती कातरतरैर्नेत्रैः स्वीयान्नेतॄनन्वेषयन्ती समालोक्यते ।

अस्या हिन्दूजातेर्जन्मसिद्धा नेतारो विद्वांसो ब्राह्मणाः स्वकीय-कार्यक्षेत्रमपहाय कालस्य दुर्दमनीयं प्रवाहं संरोद्धमपारयन्तो निर्जीवाः, अकर्मण्याश्च निभृताः सन्तिष्ठन्ते । तेषामपि समाजे सैव व्याकुलता, सैव दुरवस्थितिः, सैव च परिणतिर्दरीदृश्यते या खल्वितरेषु साधारणेषु जनेषु चिराद्वरीवर्ति । एतेषामेवालसतया स्वार्थपरतया च, सुचिरकालादस्मत्पूर्वजैर्महर्षिचरणैराचार्यपादैर्विद्वत्प्रकाण्डैश्च संरक्षिता हिन्दूजातिर्वर्णाश्रमपरिस्थितिश्च, साम्प्रतमितरधर्मावलम्बिभिर्धर्मानभिज्ञैः हिन्दूसमाजनेतृत्वाभिमानिभिश्च कैश्चन स्वच्छन्दं निःशङ्कञ्च यथाभिमतं विनाश्यते, विलुठ्यते च । तदस्य विद्वत्समाजस्य समुत्थाने, सुसंग्रन्थने, सुसञ्चालने च केवलमाचार्यचरणानामेव वर्तते शास्त्रसिद्धो लोकसिद्धश्चाधिकार इति नात्र कस्यापि लेशतो वैमत्यं सम्भवेदिति सुदृढं प्रतीमः ।

अस्माकं पूज्यपादाः प्रातःस्मरणीया धर्म-संस्थापकाः श्रीमच्छङ्करभगवत्पादाचार्या अन्ये च श्रीमद्रामानुज-निम्बार्कवल्लभ-प्रभृतय आचार्या एतादृश एव महति समाज-सङ्कटे, धर्म-विप्लवे, बुद्धि-व्यतिकरे च प्रादुर्भूय भारतीयं वर्णाश्रमसंग्रन्थनम्, विदुषाञ्च सङ्घटनं सम्पादयन्त इमं समाजं विविधैरुपायैः प्राणपणेनापि जीवितं स्थापयामासुरित्यपि न तिरोहितं कस्यापि विदित-वेदितव्यस्य विदुषः ।

परमिदानीमस्माकं भारतीयानां विदुषां ब्राह्मणानाञ्च दुर्दैववशाद्वा यथा कथमपि वा आचार्य-मण्डलमप्यस्माकमस्मात्प्रसिद्धाद्दोषाद् न सुरक्षितं वरीवर्त्तीति परं विषादस्थानमस्माकम् । तथापि श्रीमद्भगवच्छङ्कराचार्यचरणप्रतिष्ठापितां वैदिक-धर्म-प्रतिपालन-परिपाटीं यथाशक्यं निर्भयेन चेतसा, सुविशदेन बुद्धिवैभवेन, प्रबलेन च तपोबलेन यथाशास्त्रं परिरक्षतां श्रीमतामाचार्य-चरणानां कार्य-परिपाटीं दर्शं दर्शं वयं संस्कृत-साहित्य-समाज-सदस्याः काशीस्था विद्वांसः श्रीमतां चरणेषु श्रद्धा-पुरस्सरं भक्तिपुष्पाञ्जलिं समर्पयन्तः परं प्रसादमाप्नुमस्तदस्माकमेव सौभाग्य-विजृम्भितम्, तच्चास्माकमेव गौरवं महिमानञ्च समेधयतीति वयं सादरं सबहुमानं साभिलाषञ्च स्वीयान् हृदयोद्गारान् श्रीमतां पुरतः सविनयं सुस्पष्टञ्च व्याहरामः । यतः—

"सुहृदि निरन्तर-चित्ते,
गुणवति भृत्येऽनुवर्तिनि कलत्रे ।
स्वामिनि शक्तिसमेते,
निवेद्य दुःखं सुखी भवति ।" इति

---

* एष संस्कृत-साहित्य-समाज-परिचयः, मार्गकृष्ण-दशम्यां १९८९ वैक्रमाब्दीये त्रिशिष्टाधिवेशने सभापतिपदमलङ्कुर्वताम्, पश्चिमाम्नाय शारदापीठस्थ-जगद्गुरु-शङ्कराचार्य्य-श्रीश्रीराजराजेश्वराश्रमस्वामिचरणानाम्, कमनीयेषु करकमलेषु श्रीसंस्कृत-साहित्य-समाज-सदस्यैः सादरं सविनयं साभिलाषञ्च समर्पितः— [सम्पादकः]

संस्कृत-साहित्य-समाजः ।

साम्प्रतिकी हिन्दूनां परिस्थितिः कियतीं दुरवस्थां समापन्ना स्वीयमस्तित्वं विलोपयितुञ्च प्रवृत्तेति नेदानीं वक्तव्यं विद्यते ।

एतस्याः दुर्गतेर्निदानं विद्वांसो ब्राह्मणाः सन्ति । यतोहि भारतीय-हिन्दूसमाजस्य शीर्षस्थानीया नेतारः संस्कृतज्ञाः विद्वांसो ब्राह्मणा एव सन्ति । तेषां स्व-कार्यक्षेत्र-परित्याग एव भारतीय प्राचीनसंस्कृतेः सभ्यतायाश्च प्रधानं विनाशकारणं प्रत्यक्षमस्माकं प्रतिभासते । पण्डितानामवनति-कारणेष्वसाधारणं कारणं अभिमानः सहि नाम तेषां विघाताय प्रतिक्षणमुपचीयमान एवालोक्यते । अभिमानेन तेष्वनैक्यम्, अनैक्यात् कलहः, कलहाद्दारिद्र्यम्, दारिद्र्याच्च तज्जन्यानां विविधानां दुर्गुणसन्ततीनां सुतरां समुत्पत्तिरिति नाविदितं विदितवेदितव्यानाम् । शुष्कगर्वेण वयं स्वधर्मनिरता अपि स्व-सभ्यतां स्वसाहित्यं रक्षन्तोऽपि स्वदेशे, स्वजातौ, स्वसमाजे, स्वकुटुम्बे, स्वगृहेऽपि बुभुक्षिता म्रियामहे । तत्रैवास्माकं गृहे, अस्माकं देशे, अस्माकं साम्राज्ये सहस्रशो विदेशीय-धर्मप्रचारकाः सहस्रशश्च यवनधर्म-प्रचारका निःशङ्कं स्वच्छन्दं प्रत्यक्षञ्च सुरापानम्, गोमांसभक्षणम्, व्यभिचारम्, अनाचारञ्च समाचरन्तो भीषणं निर्लज्जता-ताण्डवं कुर्वन्ति । वयमभिमानहताः, दैववञ्चिताः, दौर्भाग्यमाक्रोशमाणाः, गृहकलह एव शुष्कशक्तिक्षयं बहुमन्यमानाः समाजदृष्टौ तिरष्कृतास्तिरोहिताश्च शनैः शनैः न केवलमात्मानमेव; स्वसभ्यताम् स्वभाषाम्, स्वगौरवम्, स्वमहिमानम् सर्वमपि च विलोपयितुं प्रवृत्ताः स्मः ।

सर्वत्रैवाभिमानेन पतनं प्रकृतिसिद्धो नियमः । संस्कृत-भाषाया अभ्युत्थानसमये भगवान् कालिदासः स्वग्रन्थेषु स्वीयं नामापि न प्रकटयन् लिखति—

"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥"

कालिदासात् सार्धसहस्रवर्षानन्तरं संस्कृत-साहित्यस्य पतन-समये पण्डितराजो भगवान् जगन्नाथः समालपति, यत्—

आप्राचः कामरूपात्तुहिनगिरितटादाचकूलात् पयोधेः
यावन्तः सन्ति काव्य-प्रणयनपटवस्तेऽविशङ्कं वदन्तु ॥
मृद्वीका-मध्यनिर्यन्मसृणमधुरी-माधुरी-भाग्यभाजाम्,
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः

एषैव गर्वोक्तिः संस्कृत-साहित्य-छ्यायाश्रमो बिन्दुरासीदिति वक्तुं शक्यते । एतेनैवाभिमानेन शनैः शनैः पाण्डित्यस्य ह्रासे समालोच्यमाने प्रकम्पते चेतः, विषीदन्ति मर्माणि, यदिमां दशामापन्ना वयं निकटे भविष्यत्येव स्व-पूर्वपुरुषाणामक्षय्यां कीर्तिं कथामात्रशेषां विधास्यामः । नास्त्यत्र सन्देहलेशोऽप्यस्माकम् ।

एवमेवास्माकमनेन व्यापारेण प्राप्तावसरा पाश्चात्य-शिक्षापद्धतिरस्मान् सर्वथा भक्षयितुं प्रसारितकरा पिशाचिनीव सर्वतः समावर्तते । राज्यमस्माकमहितम्, राजकर्मचारिणश्चास्माकमहिताः, राजकीयशिक्षादीक्षिताश्च भारतीया एवाऽस्माकं विध्वंसं कामयन्ते, राजनीतिनेतारश्चास्मान् सनातसाक्षिसङ्कोचभङ्गमवलोकयन्ति । किं बहुना; दैवमप्यस्माकं प्रतिकूलम् । एतत्सर्वमप्यनर्थजातमस्माकं दोषेणैव समागतम् । नहि दुर्बलमकर्मण्यं पितरमपि पालयन्ति पुत्राः । दरिद्रस्य दुर्बलस्य च जगति नास्ति शरणं क्वापि । दैवोऽपि दुर्बलघातको भवतीति प्रकृतिसिद्ध एवैष नियमः । तामेतां दुर्बलता मुज्जासयितुम्, कर्मण्यतां प्रबलताञ्च सम्पादयितुमत्र संस्कृत-विद्याकेन्द्रे संस्कृत-विदुषां प्रधान-साम्राज्ये वाराणसी-नगरे कतिपयैर्महद्भिर्देशकालात्मविद्भिः संस्कृत-पण्डितैः रुम्भूयैका प्रबला सङ्घशक्तिः संस्थापिता । या च **संस्कृत-साहित्य-समाज**-नाम्ना श्रीमतां पुरतः सविनयं सोत्साहं सोल्लासञ्च संस्थिता वर्तते ।

कार्य—विभागाः ।

संस्कृत-पण्डितानां छात्राणाञ्च प्रधानकेन्द्र-भूतायामस्यां वाराणस्यामस्माभिश्चिरकालाद्दरीदृश्यते यत् शतशः सनातनधर्मावलम्बिनां सभाः संस्थापिताः । बहुवारं विदुषां छात्राणाञ्च समितयः संग्रन्थिताः । भूयस्यश्च संस्कृत-समुन्नति-सम्पादकाः संस्थाः, पाठशालाः, अन्यानि च बहूनि कार्याणि सञ्जातानि, परं तत्परिणतौ प्रतिदिनमेव-नहि नहि-प्रतिक्षणमेव

संस्कृतभाषायाः क्षीणतैव प्रत्यक्षीक्रियते । संस्कृतभाषायाः, ब्राह्मणजातेः, सनातनधर्मस्य च परस्परं विद्यते भूयान् महिष्ठो घनिष्ठश्च सम्बन्धः । त्रयोऽपि परस्परमन्योन्याश्रयतामाश्रयन्त इत्यस्माकं वर्तते प्रबलतरा धारणा । एकस्याप्यभावे द्वयोः स्थितिरशक्यैवेति समेषामपि मार्मिकाणामत्रैकमत्यमेव स्यात् । तदेकस्यैवाङ्गस्य प्रत्यङ्गस्य वा समुन्नयने कृतप्रयत्नानामसाफल्यमालोच्यास्माभिः सर्वाङ्गीणां संस्कृतसमुन्नतिं विधातुकामैः संस्कृतसमाजस्य द्वादश विभागाः संस्थापिता विद्यन्ते । यथा—

(१) संस्कृतच्छात्र-सम्मेलनम्, (२) संस्कृत-कवि सम्मेलनम्, (३) शास्त्रार्थसभा, (४) निरीक्षासमितिः, (५) गवेषण-समितिः, (६) संस्कृत-नाट्यपरिषद् (७) धर्म-परिषद् (८) पुस्तक-प्रकाशन-परिषद्, (९) पत्र-प्रकाशन-समितिः, (१०) संस्कृत-सेवा-सङ्घः, (११) शिक्षा-संस्कार-समितिः, (१२) भारतीय-संस्कृत-विद्यालयश्चेति ।

अत्र चैतेषां विवरणमपि समासतो निर्दिश्यते ।

१—संस्कृतच्छात्र-सम्मेलनम्—सर्वप्रथममिदानीमस्माकमिदमेव कर्तव्यं प्रतिभाति यदस्माकं भाविपण्डित-समाजः, सर्वाङ्गैः सुदृढः, सजीवः, कर्मवीरः, देशकालात्मवित्, सोत्साहशक्तिसम्पन्नश्च स्यादिति । प्रचलितां संस्कृत-विद्वत्परिपाटीं संस्कृतच्छात्राणामवस्थाञ्च दर्शं दर्शमस्माकं प्रकम्पते हृदयम् ।

"ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ।"

भगवत उदयनाचार्यस्येमामुक्तिं च विचारपथमारोहयतामस्माकं हृदये सञ्जायते भीः, यदिदानीं शास्त्रतत्त्वाभिज्ञानामपि लोक-कालानभिज्ञानां विदुषामियं दुष्परिस्थितिर्विद्यते चेदग्रे वराकाणामेषां केवलं परीक्षा-पण्डितानामनात्मविदां, निर्जीवानां छात्राणांच का गतिर्भविष्यतीति । अत एव तेषु सर्वप्रथमं नवजीवनसञ्चारः प्रधानतममुद्देश्यमस्माकं समाजस्य । येन ते स्वीयज्ञानस्य पूर्णतां साफल्यञ्च भजेयुरिति समस्त-संस्कृतच्छात्राणाम् सम्मेलनं सम्पाद्य तेषु सुदृढसङ्घशक्तेः संस्थापनमस्माकं प्रथमकर्तव्यम् ।

२—संस्कृतकविसम्मेलनम्—साम्प्रतं प्रचलितेऽपि साहित्याध्ययने साहित्य-रसिकानां राज्ञां सहृदयानाञ्चाभावेनास्माकमिदं साहित्याङ्गं कवित्वं शनैः शनैरपसरत्येव संस्कृत-समाजादिति तत्संरक्षणायास्य संस्थापनमावश्यकम् ।

शास्त्रार्थसभा—साम्प्रतं प्रचलिता नियमित-विषयिका शास्त्रार्थपद्धतिर्वस्तुतो नातिशंसणीयकमाधत्ते । केषुचन निर्द्धारितग्रन्थेष्वेव शुष्क-शब्दानामेव विचारो नास्माकं विचारवैभवमुन्नयति; प्रत्युतास्माकं व्यापकं विविधविषयज्ञानं प्रतिबध्नात्येव । धर्मशास्त्रेषु, व्यावहारिकेषु विषयेषु, वैदिकविषयेषु, पुराणेषु, दार्शनिकेषु तात्त्विकेषु विचारेषु च नास्त्यस्माकं नियमिता शास्त्रानुकूला शास्त्रार्थ-सरणिः । शब्दवालानां चर्माणि समाकर्षयतामस्माकं व्यापकतत्त्वविचारसरणिः पुनर्यथा समागच्छेदिति शास्त्रार्थसभा समाजेन संस्थापिता ।

४—निरीक्षासमितिः—एतदपि विदितमेव श्रीमतां यत्र केवलमत्रैव; सर्वत्रैव वञ्चका व्यापारिणो दुराचारिणश्च संस्कृतपाठशाला-छात्रालयादिव्याजेन धन-सङ्ग्रहं विधाय वराकान् पण्डितान् छात्रांश्च प्रवञ्चयन्ति, मुग्धांश्छात्राननेकेषु दुराचरणेषु प्रवर्त्तयन्ति, तेषां जीवनं विनाशयन्ति च । केषुचन सत्रेषु, छात्रालयेषु, पाठालयेषु च तदधिकारिणः स्वामिनामनुपस्थितौ कपटेन धनमर्जयन्ति । छात्रेभ्यश्च जीर्णम्, कृमिकुलकलुषितम्, दूषितम्, स्वास्थ्यविघातकमन्नादिकं दत्वा निर्जीवान् दरिद्रान् छात्रान् खेदयन्तीति क्षते क्षारमिव तदस्माकमसह्यं भवतीति सर्वविधामीदृशीं दुरवस्थां दूरीकर्तुमस्माभिस्तेषां सम्यङ्निरीक्षणाय निरीक्षासमितिसंस्थापनमावश्यकत्वेन परिगण्यते ।

५—गवेषणा-समितिः—अनया समितया विलुप्तप्रचारस्य, विज्ञानमयस्य, अपारस्य संस्कृतवाङ्मयस्य तत्त्वान्वेषणं विधीयेत । साम्प्रतमाङ्ग्लशिक्षादूषितमतयः केचन भारतीयाः, संस्कृतानभिज्ञाश्च पाश्चात्यपण्डिताः, स्वैराचारमाचरमाणाः संस्कृतवाङ्मयमन्वेषयन्ति, कदर्थयन्ति च । तेन वास्तविकानि प्रतनूनि प्रत्नानि तत्त्वानि तिरोहितान्येव सन्तिष्ठन्ते—इति संस्कृतविदुषामिदं प्रधानतमं कर्तव्यम् ।

६—संस्कृतनाट्यपरिषद्—इयं संस्कृतच्छात्रेषु दार्ढ्य-सम्पादनाय प्राच्यसाहित्य-संरक्षणाय, मनोरञ्जनाय चावश्यकतामावहतीति नात्र विशिष्टं वक्तव्यमस्माकम् ।

७—धर्म-परिषद्—अस्याः परिषदः कियती आवश्यकता विद्यत इति न कथनीयतामावहति । साम्प्रतं धर्म-क्षेत्रस्य कुश-काश-कण्टकाकीर्णत्वेन तस्य स्वरूप-निर्णयाय कार्यक्षेत्रे सपरिकरं समवतीर्णाः सन्ति विद्वांसः केचन । परमस्य निर्णयाय भूयान् समयः, प्रचुरमध्ययनं शास्त्राणाम्, पक्षपातरहिता देशकालस्थिति-विचार-चतुरा, विशुद्धा बुद्धिरपेक्षिता। वेदानाम्, पुराणानाम्, धर्मशास्त्राणाम्, इतिहासानाम्, साम्प्रदायिकसिद्धान्तानाञ्च सम्यगध्ययनं विना साम्प्रतं विषमे समये धर्म-निर्णयो न कदापि भवितुमर्हतीति निःसंशयं निर्भीकञ्च समुद्घोषयामः । तदर्थं समाजः, हिन्दुसमाजस्य, वर्णाश्रमसमाजस्य च सुव्यवस्था-सम्पादनाय, तत्प्राणभूतस्य भगवतः सनातनधर्मस्य च, सम्यग्विवेचनाय धर्मपरिषदं स्थापयित्वाऽचिरादेव भारतीयानां समस्त-विदुषाम्, व्यवहारिकाणाञ्च लोकानां समक्षं सडिण्डिमघोषं स्वीयान् विचारान् प्रकटयितुमचिरादेव प्रबलं प्रयतिष्यत इति निश्चितं समाजेन ।

८—पत्रप्रकाशन-परिषद्—अनया परिषदा सुप्रभातं नाम मासिकं संस्कृतपत्रं पञ्चवर्षेभ्यः सञ्चाल्यते । तद्विषये चास्माकं नास्ति वक्तव्यम् । साम्प्रतमेव हिन्दी-भाषायां सर्वाङ्गसुन्दरं विचार-पूर्वं पाक्षिकं समाजमुखपत्रमाविर्भविष्यतीति समाज-सदस्यानां सुदृढो निश्चयः । शनैः शनैरियं परिषत्, साप्ताहिक-दैनिक-पत्राणां प्रकाशनेऽप्यविरतं प्रयतमाना वरीवर्त्ति।

९—पुस्तक-प्रकाशन-प्ररिषद्—अस्याः विषये नेदानीं विशेषतो वक्तव्यम् ।

१०—संस्कृत-सेवा-सङ्घः—साम्प्रतं परःसहस्राः संस्कृतच्छात्रा दारिद्र्येण कस्यापि सहृदय-निरीक्षकस्याभावेनान्यैश्च प्रत्यक्षैः पूर्वोक्तैरनेकैः कारणैः पशुमारं म्रियन्ते 'अनेके च संस्कृतविद्वांसः समुचितसाहाय्याभावेन दुःखमाप्नुवन्ति । एवमेव संस्कृतज्ञेषु सेवाभावस्य, पारस्परिकस्याखण्डसौहार्दस्य च सम्पादनाय सेवासङ्घस्य विद्यते महत्यावश्यकता ।

११—शिक्षा-समितिः—साम्प्रतं संस्कृत-समाजस्य पतनकारणेष्वनेकेषु समुचितशिक्षाया अभाव एव परं पतन-कारणम् । अस्मासु सर्वत्र पाश्चात्य-शिक्षा-दीक्षा-परीक्षा-प्रकाराः प्रचरन्ति । यद्यपि वयं स्वीये समाजे सर्वं कर्तुं प्रभवामः, परन्तु अस्माकं सर्वाङ्गीणं विनाशं सुनिभृतं सम्पादयन्ती पाश्चात्य-पद्धतिः संस्कृत-भाषाम्, प्राच्य संस्कृतिम्, आर्य-सभ्यताञ्च तिरोहितुं यथा गुप्तरीत्या प्रयता विद्यते, न तथा काचनापरा शक्तिरस्माकं विघातिका । अस्याश्च गूढा भीषणा परिणतिरस्माकं प्रत्यक्षं न प्रतिभासते । तस्याः पाश्चात्य शिक्षा-दीक्षा-परीक्षादिपद्धतेः सुमहान् विरोधः, स्वकीय-शिक्षा परीक्षा-पद्धति-प्रचारश्चास्माकं जीवनम् । एतस्मिन् विषये वयं भृशमुदासीनाः स्मः । परमयं सुधीरं गभीरं च विचारणीयो विषयः । अतः शिक्षा-संस्कार-समितिर्नितरामपेक्षिता । एतदर्थमद्भुतमेव परीक्षापद्धतिमेकां सञ्चालयिष्यति समाजः ।

१२—भारतीय-संस्कृत-विद्यालयः— साम्प्रतं सर्वत्र विद्यालयेषु आंग्ल-परीक्षा-पद्धत्यनुसारं केषाञ्चन विषयाणामध्ययनाध्यापन-प्रचारो दृश्यते । भारतीयैः संस्थापिताश्च महान्तो विश्वविद्यालया अपि सर्वथा तामेव सरणिमनुसरन्तः संस्कृतशिक्षा-विषये नितरामुदासीनाः सन्ति । नहि संस्कृतशिक्षा सर्वाङ्ग-सम्पूर्णा, भारतीय-संस्कृति-सुरक्षिका, व्यापक-ज्ञानपूर्णा, भारतीय-ज्ञानविज्ञान-प्रकाशिका जीवनपूर्णा कुत्रापि विद्यते । इमां शिक्षा-पद्धतिं दृष्ट्वा वयं भृशं विदीर्ण-हृदया वर्तामहे । तत्केवलं प्राच्य-संस्कृति-संरक्षणाय विशाल-पुस्तकालय-परिपूर्णस्य भारतीय-संस्कृत-विद्यालयस्य महती आवश्यकता वरीवर्तीति नाविदित-चरं शिक्षा-मर्म-विदामांग्ल-राजनीति-रहस्यविदाम् ।

एवमनेन समाजेन संस्कृत-समाजस्य सर्वाङ्गीण-समुन्नतिसम्पादनाय द्वादश विभागाः सकल-लोक-समक्षं प्रस्ताविताः सन्ति । न खलु समाजः सुदीर्घकाल-सम्पाद्यान्, प्रचुर-धन-सम्पत्तिसमपेक्षितान्, अनवरतपरिश्रमसाध्यानिमान् सर्वानपि विभागान् स्वहस्तेनैव सम्पादयितुमीष्टे, समभिलषति तु । तस्येयमभिलाषा वर्तते यत् ये केचनापि विशुद्धहृदयेन, करुणया, स्नेहेन, औदार्येण, गाम्भीर्येण च संस्कृत-सेवाम्, समाजसेवाम्, धर्म-सेवां वा कर्तुं कामयन्ते, तैरेतेषु विषयेष्ववश्यमवधानदानं विधाय समाजोद्देश्यानां परिपूर्तये सर्वथा प्रयतनीयम् । साम्प्रतमेष समयः कार्यकरणक्षमः । यदिदा-

नीमपि वयं स्वार्थनिरताः भवेमस्तदा न केवलं स्वीयं विनाशं करिष्यामः; प्रत्युत स्व-देश-समाज-धर्मादीनपि विनाशयन्त आगामिन्याः सन्ततेः पन्थानं कण्टकाकीर्णं कुर्वन्तस्तेषां जीवनमपि विनाशयिष्याम इति सर्वथा विवेचनीयमाचार्यचरणैः, विद्वद्धौरेयैर्वृद्धविपश्चिद्भिः, देशस्य सर्वस्वभूतैर्नवयुवभिः पण्डितैः, अस्माकञ्च प्राणभूतैश्छात्रैरिति साग्रहं सानुरोधञ्चास्माभिर्निवेद्यते ।

समाज–साफल्यम् ।

पञ्चवर्षेभ्यः संस्कृत-साहित्य-समाजोऽयं काश्यां संस्थापितो निःसहाय एव कृतघ्नैः, क्रियमाणघ्नैश्च स्वार्थाभिभूतैरनेकधा समुपद्रुतोऽपि सुदृढेन हृदयेन, सत्येन सङ्कल्पेन, अनन्तेन प्रेम्णा, समुपचितेन सौहार्देन च निःशङ्कं कार्यं कुर्वन् यत्साफल्यमनुभवन्विजयतेतराम्, तत्तस्य सत्यसङ्कल्पस्य, प्रवर्धमानस्य च वीर्यस्यैव विजृम्भितम् ।

यतस्ततो भिक्षावृत्तिमकुर्वन्, धनसंग्रहलोभं दूरे निक्षिपन्, विविधा भयङ्करा विपत्तीस्तिरस्कुर्वन् प्राणापहारकान् प्रहारान् सोल्लासं मर्षयन्, विरोधिपुः स्व-सत्यबलेन सात्त्विकं भावं प्रापयन्नायं समाजः पञ्चसु वर्षेषु स्व-स्वरूपानुरूपं साफल्यमभजदित्यस्माकमुत्साहः प्रतिदिनम्, प्रतिक्षणमुपचीयमान एव वर्तते ।

यदा समाजेन काश्यां सर्व-प्रथममस्य संस्थापनं समुद्घोषितं तस्मिन् काले प्रगाढ-निद्रा-निमिलित आसीदन्यः काशीस्थः पण्डित-समाजः । प्रथममेव समाजस्यास्य डिण्डिमघोषं सुप्रभाताभिधानम् मुखपत्रं पण्डितानामुत्थाने सुप्रभातमेवाभवत् । तदनन्तरञ्च शनैः शनैः जागर्तिमापन्ने समाजे संस्कृत-पत्रागासुरीयां भूमावस्यां वाराणस्यां समभूत् 'सूर्योदयः' । तदनन्तरञ्च 'सहस्रांशुः' ब्राह्मण-महासम्मेलनम्' चेति पत्रत्रयं काश्यामाविर्भूतम् । न केवलं काश्यामेव; सुदूरवर्तिनि पञ्चाप-प्रान्तेऽपि सुप्रभातस्य 'उद्योतः'-प्रकाशमलभत । लवपुरीयैर्नवयुवकैः संस्कृतविद्वद्भिश्च 'उद्योत' नामकं सुन्दरतरं संस्कृत-मासिकं पत्रं निःसार्यते । इदं तु प्रथमं साफल्यं समाजस्य ।

एवमेव चिरसुप्तोऽयं पण्डित-समाजः शनैः शनैः जागर्तिमनुभवन् प्राचीनां विश्रृङ्खलितां शास्त्रार्थसरणिं पुनः समुदनयत् । यतस्ततो बहुत्र सुव्यवस्थिता शास्त्रार्थ-सरणिः सम्प्रवृत्ता ।

ये खलु पण्डिताः व्याख्यानादिकार्येषु प्रथमं विरोधं कुर्वन्ति स्म, त एव स्वीयान् बालकान्, छात्रांश्च व्याख्यानप्रदानादौ प्रावर्तयन् । एवमेव ये खलु विद्वांसः, छात्राश्च सेवा-सङ्घादिसामाजिकानि कार्याणि प्रतिपदं निन्दन्ति स्म, विरुन्धन्ति स्म, त एव विद्वांसः स्वयं सेवाकार्येषु साम्प्रतं छात्रान् प्रवर्त्तयन्ति । प्रतिपाठशालतश्छात्रा अपि स्वयं सेवकादिकार्येषु प्रवर्तन्ते । एतदपि पण्डित-समाज-दृष्ट्या नाल्पं साफल्यं समाजस्य ।

अस्माभिर्वारंवारं प्रार्थिता आसन् विद्वांसो यत्–'श्रीमन्तः प्रतियोगिविधया, अनुयोगिविधया वा यथाकथमपि वा कार्यक्षेत्रे समवतीर्य स्वीयं कालिमानमपहरन्त्विति । तत्रापि अस्माभिर्महान् साफल्यलाभः कृतः सामाजिकैः । काशीस्था वृद्धविद्वांसोऽस्माकमाह्वानमाकर्ण्य समुत्थिताः, महान्तमाशातीतं च कार्यं समपादयन्निति महान् हर्षप्रकर्षः ।

एवमेव समाजेन संस्कृतच्छात्राणां सुदृढ-संग्रन्थनाय वर्षद्वयात् काशी-संस्कृतच्छात्रसङ्घः संस्थापितः । यस्येदानीं यावद् विंशत्यधिवेशनानि यत्र तत्र संजातानि । तत्र च दशाधिवेशनानि शकलजनतासाधारणं नगराङ्गणे (टाउनहाले), विश्ववि-द्यालये, शारदामठे, विश्वाराध्ये रंगमञ्चे, काशीनरेशमन्दिरे च सञ्जातानि । यत्र बहवो मान्याः पूज्या विद्वांसो नागरिका नेतारश्च भागमगृह्णन् । तेनापि संस्कृतच्छात्रेषु महती जागर्तिः समभूत् । छात्राश्चानेके भाषणे, लेखने, कार्यकरणे च कुशलाः संवृत्ताः ।

सामाजिकेनोद्योगेन श्रीमतामच्युताश्रमस्वामिमहोदयाना-माश्रयेण च भारतीय-संस्कृत-साहित्य-विद्यालयस्य संस्थापनम-प्यभूत । यत्र संस्कृतच्छात्राणां धर्मशिक्षा-भूगोलशिक्षा-हिन्दी-शिक्षेतिहासशिक्षा–लेखनशिक्षा-निबन्धरचनानुवादादि-शिक्षा-प्रबन्धः कृत आसीत् । परं स्वामि-महोदयाः कियत्कालानन्तरं धार्मिकेऽपि स्वस्थाने नैनं विद्यालयं समस्थापयन् । तं च स्थानाभावाद्वयं विवशास्तं स्थगितवन्तः ।

समाजस्याधिवेशनेषु प्रतिवर्षं प्रत्याधिवेशनं संस्कृतच्छात्राणां व्यापकेषु शास्त्रीयेषु, लौकिकेषु च विषयेषु नवी

या रीत्या विवादोऽपि (दिवेट्) भवति तत्र च पुरस्कार-वितरणमपि समाजेन क्रियते ।

समाजस्याधिवेशनेषु च श्रद्धेया विद्वांसो माननीयाः श्रीरामावतारशर्ममहोदयाः, श्रीमन्मध्वसम्प्रदायाचार्याः, पण्डित-प्रकाण्डाः पूज्यपादाः श्रीदामोदरलाल-गोस्वामिमहोदयाः, महामान्याः श्रीमदनमोहनमालवीय-महोदयाः, हिन्दू-विश्वविद्यालयाचार्याः श्रीआनन्दशङ्कर-ध्रुव-महोदयाः, महामहोपाध्याया विद्यावयोवृद्धाः श्रीप्रमथनाथ-तर्कभूषण-महोदयाः, श्रीमन्तो रामभवनशास्त्रिमहोदयाः, महामहोपाध्यायाः श्रीप्रभुदत्त-शास्त्रिमहोदयाः, महामहोपाध्यायाः श्रीदेवीप्रसाद शुक्ल-कविचक्रवर्तिमहोदया अन्ये च विद्वाँसः सभापतिपद-मलङ्कुर्वन्तः समाजस्योत्साहं समेधितवन्तः । अद्य च श्रीमता-माचार्यचरणानां परमपवित्रेण शुभागमनेन कृतार्थीकृतोऽयं संस्कृतविदुषां समाजः परं साफल्यमनुभवन्नमन्दानन्द-सन्दोहं विन्दते ।

अस्य प्रारम्भे संस्कृत-समाजस्य दुरवस्थां विलोक्य-विदीर्णहृदया वयं समाज-संस्थापनमभिलषन्तः स्वीयान् मान्यान् विदुषः प्रार्थितवन्तः, परन्तु गाढसुप्ते, मात्सर्य-कलुषिते च पण्डित-समाजे सर्वेऽप्यस्मान् तिरस्कुर्वन्तो हसन्तिस्म, परमस्माकं सौभाग्येन म० म० श्रीमत्प्रभुदत्तशास्त्रि-महोदयाः, संस्कृत-नवयुवकानामादर्शभूता मान्या अस्माकं गुरुचरणा महामहोपाध्यायाः श्रीदेवीप्रसादशुक्ल-कविचक्रवर्ति-महोदयाः, अस्माकमुत्साहं प्रवर्धयन्तो नेतृत्वमस्माकम-ङ्गीकृतवन्तः । अस्माकं परमपूज्या विद्यावयोवृद्धाः श्रीमदनन्तराम-शास्त्रिमहोदया अपि कार्येऽस्मिन् सोत्साहमस्मानभ्यवर्द्धयन् ।

बहवश्चास्माकं मान्याः संस्कृतपण्डिताः स्व-स्वभावसुल-भेन मात्सर्येण, द्वेषेण च दन्दह्यमाना विविधं विरोधमकुर्वन् परमस्माकमुत्साहशक्तिर्न मनागपि शैथिल्यमभजत् । शनैः शनैः प्रवृत्ते कार्ये प्रायशः सर्वेऽपि काशीस्थाः सहृदया विद्वांसोऽ-स्मासु जीवनशक्तिं प्रवर्द्धयन्तः समाजमिमं सनाथीकुर्वन्ति ।

कार्यकर्तारः, आर्थिकीपरिस्थितिश्च ।

अस्माकमार्थिकी परिस्थितिर्नामसात्रैव विद्यते । सुप्रभात-प्रकाशने, समाजाधिवेशनादावन्येषु च कार्येषु यावान् व्ययो भवति तत्सर्वमपि सुप्रभातद्वारैव सम्पाद्यते । प्रथमत-एवास्य सञ्चालकैरर्थसङ्ग्रहविषये औदासीन्यं प्रकटीकृतम् । यतः साम्प्रतं विविधैर्वञ्चकैराडम्बरेण महता दम्भेन च भिक्षावृत्त्या धनं सम्पाद्यते । तस्य व्ययश्च स्वार्थसिद्धावेव क्रियते, तत्रापि संस्कृतनाम्ना, ब्राह्मण-समाजनाम्ना, सनातनधर्मनाम्ना च धन-मर्जयत्सु प्रायशो व्यापारिण एव सन्ति । तदिमां दुरवस्था-मालोच्य समाजेनैषा पद्धतिरेव परित्यक्ता । यदा कदाचन समा-पन्ने ह्यर्थसङ्कटे यस्य कस्यापि सहृदयस्योद्योगेनास्माभिस्ताव-न्मात्रमेव धनमासादितं, येन कार्य-प्रतिबन्धो न भवेदिति । केवल-मुत्साहधनाः, परिश्रमपरायणाः, ईश्वरावलम्बिनो नवयुवकादर्शाः समाजकर्णधाराः कार्यं कुर्वन्ति । गतवत्सरात् पूर्वमस्य स्थायि-कोषे सप्तशतमुद्रा आसन् । परमिदानीं व्ययाधिक्येन ता अपि न सन्ति । किम्बहुना, अस्मदभिन्नसुहृदा ज्येष्ठभ्रातृकल्पेन श्रीमता विन्ध्येश्वरीप्रसादशास्त्रिणा मया च स्वहस्तेनैव यन्त्र-सञ्चालनं कृत्वा प्रथमाङ्को मुद्रित आसीत् । एवमेव सर्वदा कार्यसाफल्यमालोक्य वयं स्वपरिश्रमेणैव कार्यं सञ्चालयामः ।

एतस्य प्रधान-सञ्चालकेषु कार्यकर्तृषु च सर्वेषामस्माकं मान्याः प्रिय सुहृदः श्रीगोपालशास्त्रिणः साहित्याचार्या दर्शन-केशरिणः (काशी-विद्यापीठस्य दर्शनाध्यापकाः) साम्प्रतं सुप्रभात-सम्पादकाः सन्ति । अपरे च परमोत्साहिन आदर्श-युवकाः पण्डिताः प्रियवराः श्रीगिरीश शुक्लाः, न्यायाचार्याः (हिन्दूविश्वविद्यालये न्यायाध्यापकाः) समाजस्य व्यवस्थापकाः सन्ति । अस्माकं श्रद्धेयाः सुहृदः श्रीमत्तारादत्त-पन्त-महाशयाः साहित्य-व्याकरणाचार्याः, (रणवीर-पाठशाला-द्वितीयाध्यापकाः) साम्प्रतं संस्कृतच्छात्रसङ्घस्य सञ्चालकाः सन्ति । समाजस्य सुप्रभातस्य च विशिष्टाः संस्थापकाः सुप्र-सिद्धाः कार्यकर्तारः श्रीविन्ध्येश्वरीप्रसाद शास्त्रिणश्च वर्षद्वयं यावत् सुप्रभातस्य सम्पादन-व्यवस्थापनादिकार्य्यं सञ्चाल्य साम्प्रतं सामाजिक-कार्येषु प्रधान-सहायकाः सन्ति । अस्माकं प्रथमे प्रोत्साहकाः सहायकाः श्रीदामोदरशास्त्रिणो भिषगाचार्या अपि समाजस्य प्रधानाङ्गभूताः सन्ति । इदानीं काव्यतीर्थेन श्रीसरयूप्रसाद शास्त्रिणा (द्विजेन्द्रेण) अपि सुप्रभातस्य-स०-सम्पादकत्वेनास्माकम्महत्साहाय्यं क्रियते । श्रीमदनगोपाल-शर्म्मा त्वस्य सुप्रभातस्य प्राणभूतः सर्वदा समाजकृते प्राणान् दातुं सन्नद्धः सन्तिष्ठते ।

एवं चास्माकं सर्वेषां प्रधाननेतारः श्रीमन्तो म० म० श्रीकविचक्रवर्त्तिमहोदयाः, श्रीमन्तः श्रीअनन्तरामशास्त्रिमहोदयाः, परमोत्साहाः श्रीमन्तः सभापतिमहोदयाः, व्याकरणाचार्याः, श्रीमदनमोहनशास्त्रिणो व्याख्यानवाचस्पतयश्चास्माकं सञ्चालकाः सहायकाश्च सन्ति।

म० म० डा० गङ्गानाथझा, एम० ए० (वाइसचान्सलर प्रयागविश्वविद्यालय), एवं काशीस्थ विद्वन्मौलिमणयो म.म. श्रीप्रमथनाथभट्टाचार्य-महोदयाः,भारतगौरवभूताः श्रीसदाचार्य-रामावतारशर्ममहोदयाः, भारतप्रसिद्धा व्याख्यातृशिरोमणयः म०म० श्रीगिरिधरशर्म्ममहोदयाः, काशीस्थाः विद्यावयोवृद्धाः पण्डितप्रकाण्डाः श्रीरामभवनशास्त्रिमहोदयाश्चास्माकमनुशासकाः सर्वदा समाज-साहाय्यं कुर्वन्ति। तैरेव महोदयैरस्य समाजस्य सर्वप्रथमं वीजवापः कृत आसीदिति तेषां महतीमुपकृतिमुररीकरोति समाजः।

उपसंहारः।

साम्प्रतं वत्सरेऽस्मिन् सर्वत्रैव संस्कृत-समाजेऽभूतपूर्वां जागर्त्तिमालोक्य,स्वकार्य-साफल्यञ्चालोच्य, संस्कृत-साहित्य-समाजोऽयं महता समारम्भेणोत्साहेन च कार्यक्षेत्रेऽवतीर्य, संस्कृतनवयुवकानां सुदृढं सङ्ग्रन्थनं सम्पाद्य, महामहति हिन्दुसमाजे, संस्कृत-समाजे, पण्डित-समाजे च विशिष्टां शास्त्र-लोक-मर्यादाऽविरुद्धां शाश्वतिकीं जागर्त्तिं कामयन्, सर्वारम्भे भगवतस्तत्रभवतः श्रीशङ्कराचार्यचरणस्य सोत्साहम्, साभिलाषञ्चार्चनमाचरन्, तत्रभवत आचार्यान् सानुरोधं सविनयञ्च प्रार्थयते, यत्—वाह्यशत्रुभिरान्तरिकैश्च भीषणशत्रुभिः सर्वतः समाक्रान्तोऽयं भारतीय-हिन्दुसमाजः पण्डितानामालस्यात् शनैः शनैः विनाशोन्मुखः, प्रतीक्षते कमपि श्रीमच्छङ्करभगवत्पादाचार्यसमानवीर्यवतो नेतॄनिति नात्र बहु वक्तव्यम्। श्रीमन्तश्च सन्ति भारतीयेष्वाचार्येषु सपरिश्रमं कार्यकर्तारः।

एतदपि विचारणीयं यदिदानीं सर्वत्र भू-मण्डले नवयुवकानां साम्राज्यं समेधमानमालोक्यते। भारते वर्षेऽपि नवयुवकानामान्दोलनमिदानीं प्रतिदिनमभिवर्धमानमालोक्यते। भारतीया नवयुवकाः सर्वसाधनसम्पन्नाः साम्प्रतं भीषणां क्रान्तिं कर्तुं कामयन्ते। राजनीतौ, समाजे, धर्मे सर्वत्रैव वृद्धा नेतारो नवयुवकान् विविधैः साधनैः समुत्साहयन्ति। स्वयञ्च तेषामादर्शभूताः प्राणान्परिहातुं बद्धपरिकराः सन्तिष्ठन्ते। अस्माकं वृद्धा नेतारः स्वयमादर्शहीनाः पथपरिभ्रष्टाः, अकर्मण्याः स्वीयान्नवयुवकान् नोत्थितान् सहन्ते। स्वकीय-स्वार्थपरवशास्तान् युवकानपि पातयितुं प्रबलं प्रयतन्ते, इति सर्वप्रथमं विनाश-कारणमधःपातकारणञ्च हिन्दुजातेः। परमिदानीं संस्कृत-नवयुवका अपि तेषां नग्नचित्रमालोचयन्तोऽन्येषां नेतॄणामादर्शं गृह्णन्ति। ततश्च पण्डिता महान्तमुत्पातमाचरन्ति, न च स्वीयं दोषमनुपश्यन्तीति साम्प्रतं तेषां देश—धर्म—समाज—प्राणभूतानां युवकानां नेतृत्वाय कस्याप्युदारहृदयस्य धर्मनेतुर्वर्तते महत्यावश्यकता।

साम्प्रतमुत्साहपूर्णानां नवयुवकानां नेतृत्त्वं कर्तुं शिथिलाः सन्ति वृद्धविपश्चितः। तत्रभवति भवति आचार्यचरणे वर्ततेऽस्माकमाशावन्धः। यदि चेच्छ्रीमन्तो वास्तविकीं धर्मसेवां विधातुमभिलषन्ति, तदा स्वतन्त्रेण, देशकालानुकूलेन, भारतीय-संस्कृतिपूर्णेन, उदारेण पथा प्रवर्त्तयन्तु, समाजम्, कुर्वन्तु देश-कल्याणम्, समाचरन्तु समाजस्य सुदृढं बन्धनम्।

इयमेवास्माकमभिलाषा, इयमेवचाशा। न वयं धनं कामयामः, न प्रतिष्ठाम्, नापि चान्यत् किमपि। वयमभिलषामस्तादृशं धर्मनेतारम्, यः खलु वस्तुतः श्रीमदाद्यशङ्कराचार्य-चरण-प्रदिष्टेन पथा स्वीयान् प्राणान् करतले संस्थाप्य, निर्भयः केसरीव भारत-विपिनं विधर्मि-हृदय-विदारकेण गर्जनेनापूरयेत्, येन पलायिता भवेयुस्ते हिन्दुधर्म-विद्रोहिणः, निर्दयं भारतं निगिरमाणाश्च हिंस्राः दुष्टश्वापदा इति।

—श्रीकेदारनाथ शर्म्मा सारस्वतः
(सं० सा० समाज-मंत्री)



"देववाण्यभिवन्दनम्"

[रचयिता-गोस्वामी श्रीनिवासशास्त्री
सी. पी. सागर-वास्तव्यः]

अयि ! सौख्यकारिणि मौढ्यहारिणि,
देववाणि ! नमोऽस्तु ते ।
भवसिन्धुतारिणि कीर्तिधारिणि,
देववाणि ! नमोऽस्तु ते ॥१॥
अधिगम्य ते चरणालयान्तिक-
माप्नुवन्ति जना न किम् ?
अयि शारदेन्दु-तिरस्कृतद्युति
देववाणि ! नमोऽस्तु ते ॥ २ ॥
कलिकाल-कुत्सित-कल्मषोत्थ-
कुतर्क-कर्कश-बुद्धयः ।
कलयैव किं कलयन्ति ते किल
देववाणि ! नमोऽस्तु ते ॥ ३ ॥
अधुनाऽपि भारत-भूतले
भवदुद्भवो न तिरोऽभवत् ।
प्रभवन्ति भावित-भावनास्तव-
देववाणि ! नमोऽस्तु ते ॥ ४ ॥
त्वदृते वयोधनरूपजाति-
भिरन्वितोऽपि न शोभते ।
विधवाऽऽत्तकुङ्कमबिन्दुवन्ननु
देववाणि ! नमोऽस्तु ते ॥ ५ ॥
मनसोबलं वचसोबलं मतिजाडय-
मात्मनि पाटवम् ।
हर, देहि, नाशय, धेहि, मे भुवि
देववाणि ! नमोऽस्तु ते ॥ ६ ॥
किमु "मा(श्री)निवास" जनोऽप्य-
पाङ्गनिरीक्षितो भविता क्वचित् ।
वरमेतमेव वृणे दयामयि,
देववाणि ! नमोऽस्तु ते ॥ ७ ॥

ईश्वर-सन्देशः

[निबन्धा—पञ्चानन्दश्चतुर्वेदः प्रयागस्थः]

अयि सुहृदयाः, सुमनोहराः, सुसंघटिताः, सुपुरुषाः, भारतीयाः ! शृणुत मत्सन्देशम् ।

भारते भवतां सृष्टिं विधाय सामाजिकीं लौकिकीं शास्त्रीयामतिमनोहरां प्रजापालनपद्धतिञ्च शिक्षयित्वा सुखेनात्र क्षीर-सागरे स्वपिमि; किन्तु भवन्तः साम्प्रतं पूर्वोक्तां सर्वां क्रियां विहायाऽहम्मन्यमानाः सन्तः मत्कृतं कर्म च तिरस्कुर्वन्तो मदनुष्ठितां स्वानुजानां रक्षामकृत्वा कथं मां दुःखयन्ति ।

दृश्यते च सर्वे यूयं वृद्धानां वाक्यमनादृत्य स्वकीयेनैव कपोल-कल्पितेन शास्त्रेण कार्यं कुरुथ न युष्माकम् राज्ये सर्वे सुखिनः, नान्त्यजानाम् रक्षा, न शास्त्र-रक्षा, न मर्यादा-रक्षा, न स्त्रीणां रक्षा न गवादीनां रक्षा, सर्वथा त्राहि-त्राहि करुणो दीनः हृदय-विदारणः, आश्चर्य-जनकः, स्वरः श्रूयते कथमेतदर्थमेव तत्र युष्माकम् निवासः कृतः, एतदर्थमेव शास्त्रं निर्मितम्, एतदर्थमेव अल्पायासेनैव बहुपुण्यफलप्रदं कलियुगं विरचितं परस्परम् द्वेषेर्ष्या-क्रोध-मद-मात्सर्यच्छल-प्रपञ्चादीनां वृद्धिर्जायते।

आधुनिकीं दशामालोक्य न स्वावताराय प्रयत्नं करिष्यामि । यदाऽन्त्यजानां रक्षा सर्वेषामुपकारायेति पूर्वोक्तं साधु चरित्रं स्फुटीभविष्यति तदा वैदेशिकानां संहारार्थमागमिष्यामि ।

युष्माकमेव निरुद्योगतो रामलीला निरुद्धा, युष्माकमेवानुत्साहेन गोवधः, नारी-हरणं, धर्मोपरि कुठाराघातश्च प्रतिदिनं प्रभवति । युष्माकमेव कृत्येन, वृद्ध-बाल-विवाहेनाऽसंख्या विधवा भारतेऽस्मिन्दरीदृश्यन्ते ।

यदि कटिबद्धा भूत्वाऽस्य दोष-निस्सारणे कृतप्रयत्ना भविष्यथ, तदा परित्राणायेत्यादि दर्शयितुमागमिष्याम्यन्यथाऽरण्यरुदितमिव रोदनं कुर्वन्तु नाहमागन्ता । स्मरन्तु मद्वाक्यम्—

"अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणाम् ।
कर्तारं भजते सोऽपि नह्यकर्तुः प्रभुर्हि सः" इति

हेमन्तोपालम्भः ।

[ले०—जगन्नाथशर्म्मा शिष्यः, ब्रजभूषण विद्यालयस्थः गया ।]

तुषारलेशं समवाप्य कान्ता
गता न का कान्तसदेशमाशु ।
युवा च हेमन्त ! न कां सदोषा-
ञ्चकार दोषाभिनवोढ-योषाम् ॥१॥
द्रुतं महासैन्यबलावलेपो-
विजित्य हेमन्त ! महारिपुस्त्वाम् ।
कृतावमर्षो नयशीलशाली
निजाधिपत्यं शिशिरो विधाता ॥२॥

उपनिषद्गौरवम् ।

[ले०—कुरुक्षेत्रीय पं० छज्जूरामशास्त्रि-कविरत्न-विद्यासागरः लायपुरीय-वारक्षषिकुलस्थः ।]

प्राचीनकालादस्मदाचार्यचरणा वेदविषयं त्रिषु भागेषु विभजन्ते स्म, स च विषयविभागो व्यापकोऽतीव विशुद्धश्च, तदनुसारेण वेदोपनिषत्स्वपि त्रिधैवाध्यात्मिक-तत्वस्य वर्णनमस्ति । अर्थात् परमात्मनो जीवात्मनश्च तत्त्वज्ञानं वेदेषु त्रिधा व्यवस्थितं विद्यते कर्मोपासना-ज्ञानभेदात् । एतत्प्रकारत्रयं काण्डत्रय-नाम्ना व्यपदिश्यते । तत्र ज्ञानकाण्डे परमात्म-जीवात्मनोर्वास्तविक-स्वरूपस्य वर्णनम् । कर्मकाण्डे यज्ञसम्बन्धिकर्मकलापस्य विधानम् । उपासनाकाण्डे परमात्मनो भक्तिनिरूपणम् । ज्ञानकाण्डस्य—'सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्ध' मित्यादिकमुदाहरणम् । कर्मकाण्डस्य—'सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्विनावधीतमस्तु माविद्विषावहै' इत्यादि । (एष कर्मोपदेशः पुरुषान्प्रतीश्वरीयः) उपासनाकाण्डस्य—"प्राणाय नमस्तस्मै यस्य सर्वमिदं वशे । यो भूतःसर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम् ॥" इति वैदिकसमये त्रीणि काण्डानि मिलित्वा धर्मशरीरं कुर्वन्तिस्म । वस्तुतस्तु त्रयोऽप्येते भेदाः समयभेदाज्जाताः । ये मानवा यज्ञादिकर्मकाण्डस्य विगुणत्वं क्षणिकफलदायित्वं वा विलोक्य विरक्तास्ते भक्तिपथं चाश्रयन्तेस्म । एवं भक्तिज्ञानकर्मणां पृथक् २ मार्गाः संबभूवुः । सम्प्रदायाश्च बहवः प्रचलिताः । ब्राह्मणग्रन्थेभ्यस्तु इदं ज्ञायते यत्पुरा वेदाः कर्मकाण्डार्थमेवोपयुज्यन्तेस्म

मीमांसा-दर्शनादिग्रन्था अपि कर्मकाण्डस्यैव परिपोषका इति सुव्यक्तम्। ब्राह्मणग्रन्थेभ्यः किंचिदर्वाचीनकालीना वेदसारभूता उपनिषदस्तु—'प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयोऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति॥' इति मुण्डकोपनिषच्छ्रुत्या सुव्यक्तमेव कर्मकाण्डमुपहसन्ति। ब्राह्मणग्रन्थेषु ज्ञानोपासनयोस्तादृशी निष्फलता न प्रदर्शिता। उपनिषत्सु तु कर्मकाण्डस्य महानेवायमुपहासः कृतो दृश्यते। यद्यपि सर्वा उपनिषदो नैककाल-प्रभवा न सहमताश्च तथापि 'ज्ञानादेव मुक्तिरिति' प्रतिपादने सर्वासामैकमत्यम्। ज्ञानकाण्डस्यैव विस्तारो न्यायवैशेषिकसांख्ययोगवेदान्तदर्शनादिषु दृश्यते। भक्त्यपरपर्यायमुपासनाकाण्डं रामायणभारतादिग्रन्थेभ्यो विकाशमाप। एवमेते त्रयोऽपि भेदा वेदप्रभवा एव। कर्मज्ञानभक्तीनां भेदभावं निरस्य भ्रातृभगिनीवद्भगवद्गीता त्रयाणामेकार्थसंपादने यत्नं करोति। यतस्तया त्रयाणामेव सफलत्वं प्रसाध्य विभक्ता अपि त्रयः पुनर्मेलिताः। अत एव संप्रति भगवद्गीता प्राणभूता हिन्दूनां मन्यते। प्रकृतमनुसरामः, सर्वासां भाषाणामुत्पत्तिस्थानं संस्कृतभाषा। तस्या धार्मिकसाहित्ये यद्वेदानां गौरवं तदेवोपनिषदामित्यत्र नास्ति कस्यापि वैमत्यम्। विदुषां कल्पना-हंसी तूपनिषत्सरोवरे महान्तमेव मज्जनानन्दं लभते। वस्तुतस्तु निःसारे संसारे उपनिषद एव सजन्यज्ञानाग्निना जन्मजराया जटिलं जालं जर्जरयित्वा अमन्द-ब्रह्मानन्द-रसभाजनं कुर्वन्ति यस्य रसस्य स्थायीभावश्चमत्कारः स खल्वद्भुतो नाम रसः। उपनिषत्सु पदे पदे भासते। कस्यचिदुपनिषदामध्ययनेऽपि कृते यत्परमानन्दो न जायते स खलु 'नैष स्थाणोरपराधो यदेनमन्धो न पश्यतीति, न्यायादुपनिषदां नापराधः। पारिभाषिकशब्दानां बाहुल्यात्किंचित्काठिन्यमपि तासां भूषणमेव न दूषणम्। उपनिषदो न बुभुक्षितव्याघ्रेण तुल्या अपितु दुग्धदायिन्यो धेनवः। तदनुशीलनरूपसेवया परममृतं प्राप्यते, यत्पीत्वा नरोऽजराऽमरो भवितुमर्हति। 'आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्' इति न्यायात्।

किंबहुना पाश्चात्य-विद्वद्भिरपि-काण्ट-शोपनहार-मोक्षमूलर-मुग्धानल-प्रभृतिभिरुपनिषदो धार्मिकसाहित्यस्य प्राणा मन्यन्ते। तैरुक्तम्, उपनिषद्भिर्वेदेभ्यो ज्ञानरत्नानि निष्कृष्य तैः सुवर्णमाणिक्यं मेलयित्वा एका निर्मला माला कल्पिता या भारतीयकण्ठे बद्धा सती विलक्षणां द्युतिं धारयति। भारतवर्षस्य पुरातनो महिमा यद्यपीदानीं नास्ति, तथापि संस्कृतभाण्डारस्य यावान्धार्मिकपुस्तकानामंशो लभ्यते, तस्य गम्भीरतां प्रवेष्टुमद्य यावदपि कश्चिदन्यदेशीयो विद्वान्न समर्थः। केचित्कथयन्ति यस्मिन्समये शिक्षायाः सभ्यतायाश्च पूर्णः प्रचारो भवति, तदैवौपनिषदं ज्ञानं वर्द्धते। वैदिकसमये कर्मकाण्डानुयायिन एव सर्व आसन्। उपनिषदामुच्चविचारांस्ते न जानन्ति स्म। यदा शिक्षायाः सभ्यतायाश्च विकाशोऽभूत् तदा महर्षिभिः स्वस्वगूढविचारा उपनिषद्द्वारा प्रकाशिताः। कणाद-गोतम-कपिल-बुद्ध-शङ्करादिभिः कर्मकाण्डस्य खण्डनं कृत्वा ज्ञानकाण्डस्य प्रचारः कृतः। परन्तु नैतत्सत्यं प्रतिभाति, यत उपनिषदां वास्तविको विचारविषयोऽद्वैतवादः। तं चाद्वैतवादं खद्या-

खण्डन-सिद्धान्त-लेशाद्वैतसिद्धि-प्रभृतिग्रन्थेभ्योऽपि प्रोज्ज्वलरीत्या शतं वेदमन्त्राः प्रतिपादयन्ति । उपनिषदामाश्रयो वेदो यथा अनादिस्तथैवौपनिषदं ज्ञानमप्यनादि । उपनिषदामेव वाक्यानां समन्वयाय भगवता वेदव्यासेन स्वकीयं वेदान्तदर्शनं प्रणायि ।

किंचित्समयानन्तरं तस्योपरि बहूनि भाष्याणि संजातानि । तेषु सर्वेष्वपि शङ्करावतारभगवच्छंकराचार्यकृ भाष्यमतीव प्रौढं सचमत्कारं च वर्तते, परन्तु 'प्रायेण सामग्र्यविधौ नराणां पराङ्मुखी विश्वसृजः प्रवृत्ति' रिति न्यायेन तत्रैको महान् दोषोऽपि विद्यते । स चायं यत् शाङ्करभाष्यं केवलं शास्त्रीयमेव न, किन्तु कथापरकमपि । भगवान्शङ्कराचार्य एकमद्वैतपक्षं स्वीकृत्य तत्समर्थने सर्वोपनिषदो वेदान्तदर्शनं भगवद्गीतां च लापयामास । शांकरभाष्यपाठकस्य चित्ते स्वभावादिदमङ्कितं भवति यच्छङ्कराचार्यः स्वबुद्धिप्राबल्येन स्वपक्षे लोकानाकर्षति न निष्पक्षपातमुपनिषदोऽन्यांश्च ग्रन्थान् व्याख्याति । एवमेव श्रीरामानुज-श्रीमाध्व-श्रीनीम्बार्क-श्रीवल्लभादिभिराचार्यैः स्वस्वभाष्यैः सम्प्रदायस्यैव दार्ढ्यं कृतं न निष्पक्षपातं किंचिद्व्याख्यातम् । अस्तु, तावत्प्रकृतमनुसर्तव्यम् । उपनिषदां गौरवे बहूनि कारणानि सन्ति । तत्र दिङ्मात्रं प्रदर्श्यते । प्रथमं कारणमुपनिषदां भाषासारल्यं, यथा—'वायुर्यथैको भुवनं प्रविष्टः रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो वहिश्च ॥ (काठकः)॥ पश्य कीदृशी सारल्यस्य चरमा सीमा । अथ च—

'त्रयो वेदा एत एव' वागेव ऋग्वेदो मनो यजुर्वेदः प्राणः सामवेदः, (बृददारण्यकम्) । ऋग्वेदस्य कार्यं स्तुतिर्वाग्रूपत्वात् । यजुर्वेदस्य कर्मसम्पादनं मनोरूपत्वात् सामवेदस्य जीवात्म-परमात्मनोः सम्बन्धस्थैर्यकरणं प्राणरूपत्वात् पश्यैक एव दृष्टान्तः कथमिव गम्भीरं प्रश्नं स्पष्टयति। द्वितीयं कारणं केन-कठ-प्रश्न-छान्दोग्य-बृहदारण्यक-प्रभृतय उपनिषदो ब्रह्मज्ञानरूपं तीव्रमौषधं कथारूपिणि मधूनि मेलयित्वा पाययन्ति । इति

"म०म० पं० श्रीशिवदत्तशर्म-दाधिमथानां"
संक्षिप्त-परिचयः ।

(रचयिता—जयपुर-राजगुरुकथाभट्टवंश्य -नन्दकिशोरशर्मा साहित्याचार्यः, सरस्वती-भवनं, काशी)।

बदरीलालतनयो गोदादेव्यास्तु गर्भजः ।
शिवदत्तो दाधिमथस्त्यक्त्वाऽस्मांस्त्रिदिवं गतः ॥१॥
श्रीमज्जयपुराधीश-विद्यानिलय-रक्षिताः ।
विद्याः सर्वा अधीत्यैव वाचस्पतिसमप्रभः ॥ २ ॥
शब्दशास्त्रे प्रगल्भत्वं प्रातिनिध्यं च पाणिनेः ।
अनल्पकल्पनाजालैरभजद्गुरुसन्निधौ ॥ ३ ॥
प्रसारं तत्र विद्यानां कृत्वा लब्ध्वा च गौरवम् ।
दुर्गाप्रसाद-सविधे काव्यमाला-प्रकाशकः ॥ ४ ॥
स्वातन्त्र्यं तत्र लब्ध्वा यो ग्रन्थोद्धारमथाकरोत् ।
वेङ्कटेश्वर-यन्त्रेऽपि रङ्गनाथस्य सम्मतः ॥ ५ ॥
टिप्पणीर्ग्रन्थरत्नेषु चक्रे भाव-परिप्लुताः ।
ज्यौतिषेऽपि दृढज्ञानाच्चन्द्रसूर्योपरागयोः ॥ ६ ॥

कृत्वा च गणनां धीमानर्वाचीनविधानतः ।
राज्ञो माधवसिंहाय दर्शयामास दानिने ॥ ७ ॥
काशिका-टिप्पणीकर्ता भाष्यभाषणनागरात् ।
लवपुरे प्राच्यविद्याप्रधानाध्यापकोऽभवत् ॥ ८ ॥
द्वात्रिंशद्वर्षपर्यन्तं बालांश्चक्रे सुपण्डितान् ।
ततः स सुयशःप्राप्य जराजीर्णकलेवरम् ॥ ९ ॥
मार्गकृष्ण-त्रयोदश्यां देवनद्यास्तटे शुभे ।
काश्यांत्यक्त्वा शाश्वतं तच्छिवसायुज्यमाप्तवान्॥१०॥

पूज्यपूजाव्यतिक्रम-परिणामः ।

समुपस्थितेषु जगद्गुरुश्रीशङ्कराचार्यरामानुजाचार्यवल्लभाचार्यचरणेषु, वङ्ग-गुर्जर-काठियावाड-कच्छ-महाराष्ट्रादिसर्वप्रान्तीयसुप्रसिद्ध-महामहोपाध्यायाद्युपाध्यलङ्कृत–विद्वद्वरेषु सर्वमान्यजनसमूहेषु चापीदमद्वितीयमखिलभारतीय–ब्राह्मण-महासम्मेलनं समयद्रव्यव्ययापेक्षया किमप्यन्यत् न कृतवदिति यत् विश्वासार्हसमाचारपत्रैः सर्वत्र शङ्खरवेणोद्घोष्यते निन्दा च क्रियते। तत्र को हेतुरिति पाठकानां मनसि सहजमाशङ्का समुत्पद्येत । बहुत्र पत्रेषु तु परिषत्सञ्चालकानां पक्षपातादिदोषा अस्य कारणत्वेन समुपस्थापिताः सन्ति । परमस्मन्मते तु पूज्यपूजाव्यतिक्रमस्येदं फलम् । तद्विचार-सभायामेकदिने पञ्चाननतर्करत्नमहोदयैः स्वाधिकारमनालोच्य पूज्यचरणानां जगन्मान्यानां धर्माचार्याणां जगद्गुरुश्रीशङ्कराचार्यकुर्तकोटिस्थानां तत्प्रेषित-सभासदस्यानाश्रयोऽवमानः कृतस्तस्येदं फलम् यदिदानीं सर्वे कृतकार्यमपि सम्मेलनं निन्दन्त्येव । अन्यच्च अनन्तकृष्णशास्त्रिणां सभा-सञ्चालकानामनुचितमशोभनं च वक्तव्यम् । यत् "ते इतो (विचार-सभातः) गच्छन्तु येषां सभानियमेषु वैमत्यं वर्तते " इति । किमेतदपि न ज्ञायत एभिर्यत् वीतरागभयक्रोधैः ऋषिमहर्षिभिः प्रणीतेषु सनातन-धर्म-नियमेषु वैमत्यं सम्भवति, (यद्दूरीकरणायैव ब्राह्मणमहासम्मेलनं सम्पन्नम्) तत् किं रागद्वेषान्वित-युष्मत्-सदृश-मनुष्यकृतनियमेषु तन्न सम्भवति ? ब्राह्मण-महासम्मेलनन्तु भवतां गृहं नासीत् (!) भवद्भिरनुचितभाषणेन पूज्यपण्डितानामवमानः कृतः । अतः तस्य फलमनुभूयताम् । सर्वत्र निन्दा ! घृणा !! किं बहुलेखनेन ? "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ।" इति ।

—त्र्यं. वि. मोहोरीरः ।

उत्कण्ठा ।

[रचयिता–केदलायोपाह्वः श्रीनिवासशर्मा रम्भापुरमठस्थ]

नाकीश–मौलि–मणि–राजि–विराजिताऽङ्घ्रेः
काश्याः पवित्र-चरितस्य विभोश्शिवस्य
शोकार्ति–हारि–पद–पङ्कज–रेणु–राशा—
वाशास्महे विलुठितुं वयमल्पपुण्याः ॥ १॥

पापारि-वारि-परिपीय सुरापगाया—
स्तापाऽपनोदनपटुं गिरिशं प्रणम्य
पाकारि–सेवित–पदा–महमन्नपूर्णा-
मासेव्य धूत-कलुषः सुकृती कदा स्याम् ॥२॥

परम–पूरुष–पाद–विनि–स्सृता
पतित–पावन–चारु–गुणाऽन्विता ।
मुनि–चकोर–शिवङ्कर–चन्द्रिका
शिवकरी कनु स्यात्सुरदीर्घिका ॥३॥

सम्पादकीयम्

हा ! अनभ्रे वज्रपातः

" यच्चिन्तितं तदिह दूरतरं प्रयाति ।
यच्चेतसापि न कृतं तदिहाभ्युपैति ॥ "

अयि प्रिय सुहृदः सुप्रभात-पाठकाः ! कम्पते करः, शिथिलं शरीरम्, विदीर्यते हृदयं न प्रचलति लेखनी, शीर्य्यते स्वान्तम् प्रियवयस्यस्य गिरीश शर्मणो दिवङ्गमन-वृत्तान्तमावेदयितुम् । न मतिः प्रत्येति, येन सहाद्युनैवाशितम्, स्थितम्, हसितम्, विलसितम्, स एकपद एवान्तर्हितः स्यादिति ? वयं चकितचकिता एव प्रतीक्षामहे । किं वयस्योऽस्मान् विहाय गमिष्यति ? न ह्येवं सम्भवति । हा ! कास्मान् जहासि ! कुह सर्पसि ! किमितोऽपि स्वर्गं सुख-सन्दोहः ? नहि संस्कृत-साहित्य-समाज-सुहृत्-सह-वास-सुख-तुलां निःश्रेयस-सुखमधिरोढुमर्हति इति निश्चितं वेत्तु । हा ! हा ! स्वप्नोऽयम्, आहो माया उत मतिभ्रमोऽस्माकम् ? किं वयम्प्रलपामः " यत् गिरीशशुक्लोऽस्मासु नास्तीति ? अरे दुर्दैव ! कराल काल !! नैवं स्यात् सहि कायेनास्मान् विहायापि स्वस्मृत्या क्षणमपि न जातु हास्यति । न कदापि तेन वयं वञ्चिताः । स कथमेकपद एवैवं वैरस्यमाचरिष्यति । हा ! यो हि, अस्मान् हतोत्साहानपि स्वमञ्जुल-मधुर-भाषया सुधाप्लावितान् करोति स्म, स किमनिगद्यैव शाश्वतिकपदाय प्रस्थितो भविष्यति ? नैतत् स्वप्नोऽपि सम्भाव्यते । हा ! हन्त !! सर्वमपि ममैतत् प्रलपितम् न स कर्णे करोति । स तु दीर्घनिद्रं प्रसुप्त एव, दीर्घ-प्रस्थानं प्रस्थित एव, सोऽन्तिम-श्वासं निरश्वसीदेव । वज्रहृदय ! संस्तम्भयात्मानं न स पुनरावर्त्तते । हा ! संस्कृत-साहित्य-समाज सर्वथा वञ्चितोऽस्येव तेन महात्मना ! अहो न बध्नाति धैर्यं धिषणा, किं ब्रूमः प्रियसुहृदोऽकारणत्यागम् ? कमुपालभामहेऽधुना ? कालो बलीयान् किल न विमृशति कर्तव्याऽकर्तव्यम् । गतहायन एव प्रिय-सुहृदो हिन्दुविश्वविद्यालये न्यायशास्त्राध्यापकत्वमुपश्रुत्य समेत्यास्माभिर्निर्णीतमासीद् यन्न्यायकुसुमाञ्जलि-वात्स्यायन-प्रभृतीन् सर्वानपि दुरूह-न्याय-ग्रन्थान् सरल-संस्कृतटीकया समलङ्कृत्य शास्त्रिग्रन्थ-मालायां स्वल्पतरशुल्केनैव प्रकाशयिष्यामो, येन सर्वेषामपि तदध्यायिनां स्यात् सौलभ्यमिति । तत् सर्वमपि स्मृतिपथमुपगतं भृशं दुनोति चेतः । संस्कृत-साहित्य-समाजस्य व्यवस्थापकत्वमुररीकृत्य सर्वमपि सुप्रभातीय-प्रबन्धकृत्यं स्वशिरस्येव प्रियसुहृदा गृहीतमासीत् । गृहस्वामिने सर्वमपि भारं समर्प्य यथा कुटुम्बिनः सुखं विहरन्ति तथैव वयं प्रियसुहृदि सं० सा० समाजीयम् सर्वमप्युत्तरदायिकृत्यं निधाय सुखिनो मुदिता आस्म । यदा खलु समाजीयाधिवेशनं भवति स्म, तदोपवेशनादि-

प्रतिपत्तिकर्मत आरभ्य प्रतिपन्नकर्मान्तं सर्वमपि-कृत्यं कुटुम्ब-स्थविरवत् प्रियसुहृदैव सम्पाद्यते स्म। तत्सर्वमपि स्मारं स्मारमिदानीं न निरुध्यतेऽश्रुधारा। पुरतश्च तदीयानाम् अनाथानां कुटुम्बानां दशां विलोक्य व्यथतेऽन्तरात्मा क एषास्पालयितेति। हा! हन्त!! तदीयकुटुम्बेषु—हतभाग्या जरठा जननी, चतस्रो दीना दुहितरः, द्वौ कोमलौ कुमारौ, विधवा तपस्विनी भार्या अहर्निशं विलपन्ति न शुष्यति नयनाम्बु तेषाम्। नास्ति कोऽप्याधारस्तेषा-ञ्जीवनस्य। हा! कस्य दुष्कृतस्याऽयं परिणाम उपनतो? यत् पुष्पन्नेव तरुरशनिना विनिहतः, सर्वमप्यारामं दग्धवान्। हा! कले! ध्रुवं तवैवेदं कापट्यम्, यत्र मृष्यसि सुकृतशालिनं परोपकृति-परायणं बुधजनं स्वसाम्राज्ये। अयि सुप्रभातपाठकाः! सम्प्रति प्रियसुहृदो गिरीशशर्मणो न्यायाचार्यस्य परिवाराः श्रीमतामेव कृपाकटाक्षैकजीविनः सञ्जाताः। अतो तदीयानाथ-कुटुम्बदशां श्रुत्वा विगलितान्तः करणाः ये केऽपि यत् किञ्चिद् द्रव्यादिकम् तदीयकुटुम्बसाहाय्यार्थं प्रेषयितुमभिलषेयुः, तत्सर्वमपि महामहोपाध्याय-पण्डित-देवीप्रसादशुक्लक-विचक्रवर्तिनाम्ना सुप्रभात-कार्यालये प्रेषयितुं तथा-न्यांश्च प्रेषणार्थं प्रेरयितुमर्हन्ति। इदानीं सर्वेभ्योऽपि दानेभ्यः तत्कुटुम्बरक्षार्थं दत्तं दानं महत्पुण्यमु-त्पादयितुमलमिति सर्वानेव प्रतिभाति। यथा स्यात् तेषां विपत्समुद्रे मज्जतां तृणसाहाय्यलाभ-स्तथा विधीयतां तत्र भवद्भिः श्रीमद्भिरिति साञ्जलि-प्रार्थयमानस्य शोकाकुलस्याश्रुधारानिमिलितनयन-स्य ममापि नाग्रे सरति लेखनीति विरम्यते।

*

*   *   *

शोकोच्छ्वासः ।

अत्र काश्यां मार्गशीर्षकृष्णचतुर्दश्यां महामहोपाध्यायविद्वद्वराणां श्रीमतां शिवदत्तशास्त्रिवर्याणां लवपुरीय वास्तव्यानां स्वर्गवासोभूदिति नितरां विषादस्थानमस्माकम्, नूनं संस्कृत सरस्वत्या, दुर्भाग्यविलसितञ्चेदम्। विद्वद्धुरीणानान्तेषां लोकोपकारिण्या साहित्यसेवया अधमर्णा वयं तत्पारिवारिक-जनानां सन्निधौ समवेदनां प्रकाशयन्त स्तच्छान्त्यै परमात्मानं प्रार्थयामहे।

*   *   *   *

शारदापीठस्थाः श्रीशङ्कराचार्याः ।

काश्या मस्यां समागतानां पश्चिमाऽम्नायश्री-शारदापीठस्थानां जगद्गुरुशङ्कराचार्य-श्रीराज राजेश्वराश्रम-स्वामि-पादानां श्री-काशीपण्डित-सभातोऽभिनन्दनं पूजनञ्च संजातम्। यत्र सर्वेऽपि महामहोपाध्याया दण्डिस्वामिनः श्रेष्ठिनश्चोपस्थिता आसन्। संस्कृत-साहित्य-समाजद्वारा च नगराङ्गणे(टाउनहाल) जनसङ्घसम्भृते महता समारोहेणआचार्यपादानां समादरणं शुभाभिनन्दनमभूत्। काशीस्थ-गुर्जरसमित्यापि समारोहपूर्वकं पूजनं कृतम्। काशिक-ब्राह्मण-सम्मेलने च, आचार्यवर्याणां सनातनधर्मस्य दार्ढ्यसम्पादनाय विदुषां परस्परमैकमत्येन कार्यकरणाय च भावपूर्ण उपदेशोऽभवत्। श्रीमदाचार्यपीठद्वारा च काशीस्थानां सर्वेषामेव दण्डिस्वामिनां सवस्त्र-युगलं भिक्षाकृत्यं सम्पन्नमम्। विशिष्टानां विदुषां वैदिकानाञ्च सर्वेषां सदक्षिणः सत्कारः समपद्यत। अत्यन्तश्रेष्ठिभिश्च स्वस्वालयेष्वाचार्याणां पूजन

मुपदेशश्रवणं च कृतम् । एवमागतेष्वेतेषु शारदापीठस्थभगवत्पूज्यश्रीशङ्कराचार्यपादेषु इदानीं काश्यां समीचीना धर्मचर्चा प्रजासु धर्मोत्साहवृद्धिरासीदिति प्रसीदत्यस्माकं चेतः ।

* * * *

गीता-डायरी ।

प्राप्तिस्थानम्—गीताप्रेस गोरखपुर मू० ।=)

इयं डायरी हिन्दु (आर्य) जातेस्तु प्राणस्वरूपैव प्रतिभाति गीतापाठं कुर्वतोऽनया गीता सम्पूर्णाऽपि वर्षाभ्यन्तर एव कण्ठस्था भविष्यति । यतो हि प्रतिपत्र मत्र गीताश्लोकद्वयं मुद्रितमस्ति। इमां डायरीं गृहीतवतः प्रतिदिनं गीतापाठो दैनिक-वृत्त-लेखनञ्चेति "एकक्रियार्थद्वयकृत्प्रसिद्धा" इति लोकोक्तिश्चरितार्थ्यमेति । वयं तु अभिलषामो, यत् सर्वेऽपि भारतीया अन्येऽपि गीतानुरागिणो विशेषतः संस्कृतज्ञा इमामेव डायरीं गृह्णन्तु बहुज्ञातव्यविषयसम्भृतायाः शोभनकर्गजादिविभूषिताया अप्यस्याः मूल्यमतीव स्वल्पमस्ति ।=) आणकमिति

संस्कृत-समाचाराः

सुप्रभातस्य 'गिरीशाङ्कः' ।

अयि आर्य्याः ! सुप्रभात-पाठकमहाभागाः ! हन्त ! संस्कृत-साहित्य-समाज-संस्थापकेषु सुप्रभात-सञ्चालकेषु चान्यतमः काशीस्थविद्वन्मण्डलीमण्डनायमानः, संस्कृतसाहित्यसेवकानामादर्शभूतः श्रीमान्–पण्डित—गिरीशशुक्ल—न्यायाचार्यमहोदयः अकाण्ड एव विनश्वरं शरीरमपहाय कैलाशवासमनुतिष्ठन् संस्कृतज्ञ-समाजमपारे शोकपारावारे सममज्जयदिति हृदयविदारकं दैवदुर्विलसितं कस्य वा सहृदयस्य स्वान्तं न नितान्ततान्तमातनोति ?

तत्तस्यालौकिकशक्तिशालिनो महानुभावस्य स्मृतौ सुप्रभातस्य 'गिरीशाङ्कः' पौषमासान्त एव सत्वरं प्रकाशमेष्यति । अतोहि तस्य महात्मनो विषये यत्किमपि गद्यं पद्यं वा निवापाञ्जलिरिव श्रीमद्भिः सप्ताहाभ्यन्तर एव कार्यालये प्रेषणीयम् ।

भवद्भिस्तद्विषये स्वीयमनोभावं तज्जीवनविषयकाणां विषयाणाञ्च यथाज्ञानं वर्णनं स्वल्पतरं वा महद्वा यावद्वा सत्वरमवश्यञ्च प्रेषणीयमिति नात्र किमप्यधिकं वक्तुं पारयामि भग्न-हृदयो, हतभागधेयोऽहमिति निवेदयते ।

शोक-विकलः—

विन्ध्येश्वरीप्रसाद-शास्त्री,

'गिरीशाङ्क'-सम्पादकः ।

राष्ट्रिय-समाहावसरे

कलिकातानगर्य्याम्

त्रिचत्वारिंशत्तम (४३) वर्षीय-भारतीय-राष्ट्र-महासभायाः

(काँग्रेस) महाधिवेशनम् ।

[सूचयिता—साहित्य-शास्त्री पं० श्रीसरयूप्रसादपाण्डेयः (द्विजेन्द्रः) काव्यतीर्थः]

इयं हि राष्ट्रिय-महासभा, भारत-प्रधानभूतायां कलिकाता-नगर्य्यां गतराष्ट्रियसप्ताहे महता समारोहेण निर्विघ्नं समपद्यत । तत्र समन्तात्प्रतिनिधिरूपेण राजनैतिक-धार्मिक-सामाजिकनेतारो विद्वांसो नागरिका राजानश्च सभाजना: समागता आसन् । अस्यामपरे द्वीपान्तरागताः प्रतिनिधयोऽपि सम्मिलिता इत्ययमत्र विशेषः (?) तत्र श्रीमन्तः पण्डित-मोतीलाल-नेहरूमहोदया राष्ट्रसभायाः सभापतिपद-मलञ्चक्रुः ।

अथ यथावसरन्ते सभापतिस्थानमलङ्कृत्या-संख्यजनसमाकुलायां राष्ट्रिय-महासभायां महता चातुर्य्येण निखिलकृत्यजातं सुसम्पादितवन्तः । तदखिलं कार्यविवरणसमूहं सुर-सरस्वती-समुपासकानां सुप्रभात-पाठकानां कृते सारभूतं सूत्रीयते ।

तत्रादौ प्रथमदिने—माङ्गलिकसंगीतानन्तरं श्री जे० एम० सेन-गुप्तमहोदयानां सारगर्भितं भाषणं सञ्जातम् । ततः पुनरपि संगीतपूर्वकं राष्ट्रनायकानां श्रीमतां पं० मोतीलाल-नेहरूमहोदयानां सम्भाषणं समपद्यत । तदैव राष्ट्रभाषा-सम्मेलनसभापतीनां श्रीगांधी-महोदयानामप्योजः पूर्ण-शिक्षाविलसित-सम्भाषणानन्तरमद्यतनं कृत्यं समाप्तिमगात् ।

द्वितीयदिने—श्रमिकाणां सङ्घसम्पादनायाद्य सभामण्डपे युवकप्राणभूतानां श्रीमतां पं० जवाहिरलाल-महोदयानां सभापतित्वे श्रमिकदल-सम्मेलनं सञ्जातम् । ततो महासभायां (कांग्रेसे) देशान्तरादागतान् शुभ-सन्देशान् श्रावयद्भिर्महासभाप्रधानसचिवैः, सभापतिमहोदयैरन्यैश्च स्वनाम-धन्यैर्नेतृवर्गैः समुपयुक्ताः प्रस्तावाः प्रस्ताविताः सर्वसम्मत्या ते स्वीकृताश्चेति ।

तृतीयदिने—अद्यापि पूर्ववत् देशकालानुसारिणो पूर्णस्वतन्त्रतायाः साधनभूता बहवः प्रस्तावाः प्रस्ताविता वादि-प्रतिवादिभ्यां विनिर्णीताः संशोधिताश्च स्वीकृताः । तदैवागामिन्या राष्ट्र-महासभाया (काँग्रेस) अधिवेशनं पञ्चाम्बु-प्रान्तीय-लाहौर-नगरे भविष्यतीति निमन्त्रणं स्वीकृतम् ।

चतुर्थदिने—महासभासमाप्तिवासरे सुनिर्णीतेषु प्रस्तावेषु श्रीगाँधीप्रमुखानां वृद्धानामौपनिवेशिकस्वराज्यसम्पादनाय, पं० जवाहिरलाल-प्रमुखानां नवयुवकानां पूर्ण-स्वतन्त्रतालाभायेति पक्षद्वये सञ्जाते, वर्षं यावत् सर्वसम्मत्या पूर्वतन एव पक्षः स्वीकृतः, तदसिद्धौ द्वितीयपक्षसाधने प्राणपणेनापि प्रयत्नो विधेय इति निर्णीतोऽयं सिद्धान्तो महासभायाः । तत्रैव गोरक्षण-महासभायाः सभापतिभिः श्रीमदनमोहन-मालवीयमहोदयैः गोजातिरक्षयैव स्वराज्योपलब्धिरित्युच्चैरुद्घोषितम् ।

सनातनधर्म-सभा-समाचाराः ।

काश्यां 'कार्तिकमासे' सूर्यग्रहणावसरे पण्डित श्रीमदनमोहनमालवीय-महोदयानां सुप्रबन्धेन जगद्गुरूणां श्रीमच्छङ्कराचार्य्य-श्रीभारतीकृष्णतीर्थ-स्वामि-महोदयानां सभापतित्वे अखिलभारतवर्षीय-सनातनधर्म-महासभाया विशिष्टाधिवेशनमभूत् । तत्र देशकाल-शास्त्रानुसारिणो बहवः प्रस्तावाः प्रस्ताविताः स्वीकृताश्च । ततो मार्गशीर्षमासे दशाश्वमेधघट्टे महता समारोहेण अ० भा० सनातनधर्मसभायाः स्थायि-सभापतयः श्रीमन्तो मालवीयमहोदया महारुद्रयागं जपादिकं च बहुभिः श्रोत्रीयैर्ब्राह्मणैः कारयित्वा स्वयञ्च विधाय, प्रायः शतद्वय-संख्याकान् सर्वानेव वर्णान् सप्रणव-मन्त्रैर्दीक्षितवन्तः । पुनश्च तैः कलिकातानगर्य्यां परमपवित्र-श्रीभागीरथीतटे महति जनसम्मर्दे सर्वभ्योऽप्यधिकारिभ्यो मन्त्रदीक्षा प्रदत्ता । तत्र च तद्विरोधिनो महामहोपाध्याय श्रीलक्ष्मणशास्त्रि-प्रभृतयोविद्वांसो मालवीयैः सह तद्विषयकं शास्त्रार्थं विधाय निजपराजयरूपं यथोचितं पुरस्कारं संगृह्य पराहता बभूवुरिति कलिकातास्थ-हिन्दी-पत्रादिभिर्ज्ञायते ।

श्रूयते च, तत्र विजय-श्रियमधिगत्य सोत्साहाः श्रीमालवीयमहोदया जगन्नाथपुरी-महाराष्ट्रोज्जैनी-हरिद्वार-सिन्ध-पञ्जाप-प्रयागादिषु सर्वतीर्थ-क्षेत्रेषु मन्त्रदीक्षादानोद्देशेन भ्रमणं करिष्यन्तीति । बङ्गदेशस्था महामहोपाध्याय-श्रीकामाख्यानाथ-तर्कवागीशप्रभृतयः सर्वेऽपि महान्तो विद्वांसः श्रीमालवीय-मतं समर्थितवन्तः ।—एकस्तटस्थः संवाददाता ।

श्रीकाशी-पण्डित-सभा ।

अस्याः सभाया द्वाचत्वारिंशत्तमवार्षिकमहोत्सवः श्रीकाश्मीराधिपनेर्दशाश्वमेधीय-विशालभवने श्रीमतां महामहोपाध्यायानां पं० श्रीमुरलीधरझा महोदयानां सभापतित्वे महता समारोहेण समपद्यत। तत्रेश्वरवन्दनपूर्वकं श्रीमन्त्रिमहोदयानां सभाकृत्य-प्रकाशनानन्तरं पूज्यपाद-पं० श्रीपद्मनाभशास्त्रि-महोदय-प्रभृतीनां काशीस्थविदुषामुपदेशपूर्णभाषणान्यभूवन् । वैदेशिकेभ्यः काशीस्थेभ्यश्च योग्यतमविद्वद्भ्यः परीक्षोत्तीर्णेभ्यश्छात्रेभ्यः क्रमशो मानपत्रप्रमाणपत्रादि-वितरणानन्तरं ससाधुवादं सभाविसर्जनमभूत् । तत्र मानपत्रग्रहीतॄणां कतिपयेषां विदुषान्नामानि उपाधयो यथा—

श्रीकविराज-प्रतापसिंहमहोदयः—रसायनाचार्य्यः श्रीरायसाहब जगन्नाथप्रसादः—चिकित्सकचूडामणिः श्रीबालमुकुन्दशर्म्मा—हिन्दी-साहित्यरत्नम् । श्रीराजपुरोहितवैद्यनाथपारीखः—पौरोहित्यरत्नम् । श्रीहरगोविन्दशास्त्री—पाणिनीय-व्याकरणाचार्य्यः। श्रीशिवशङ्करवैद्यराजः—भिषगाचार्य्यः। श्रीरेवाशङ्कर-शास्त्री—सद्विद्यावागीशः । श्रीमोतीरामशास्त्री—विद्यावारिधिः । श्रीहिम्मतिरामशास्त्री—भिषक्चूडामणिः । श्रीकृष्णारामशास्त्री—याज्ञिकमार्तण्डः। श्रीगुलाबरायशास्त्री (हाथी)—विद्यावारिधिः। श्रीजटाशङ्करशुक्लः—वेद-विशारदः । श्रीमन्नूभाई (सोलिसीटर)—विद्यासागरः । श्रीमल्लभाई वैद्य-महोदयः—भिषग्रत्नाकरः । श्रीमोहनलालमहोदयः—धर्मभास्करः। श्रीबनमालीपांड्या—धर्मधुरन्धरः। श्रीवसनजी महाशयः—स्वधर्मभूषणम् ।

इत्यादि बहवो विद्वांसश्छात्राश्च सन्ति येषां नामानि स्थानसङ्कोचात्त्यज्यन्ते ।

—श्रीगोपालशास्त्री त्रिपाठी
(स० मन्त्री-काशी-परिडत-सभायाः)

श्रीगीता-जयन्ती ।

स्थानीय दर्शन-विद्यालये काव्यतीर्थोपाधि-विभूषितानां श्रीमतां पं० सरयूप्रसादशास्त्रिणां सभापतित्वे श्रीगीता-जयन्ती-महोत्सवो महता समारम्भेण समपद्यत । तत्र श्रीगीता-पूजनं तत्पाठं हरिकीर्तनादिकञ्च कृत्वा विदुषां छात्राणाञ्चाप्यनेकेषां गीताविषयकं भाषणमभूत् । अन्ते सभापतिमहोदयानां भाषणे "गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः" इत्युच्चैः श्रुत्वा प्रतिश्रुतं तत्रत्यैश्छात्रैः गीताकण्ठस्थकरणायेत्यादर्शोऽयं समेषां हिन्दुजनानामिति—

मन्त्री-'दर्शन-समितेः'
लक्ष्मीकुण्डम्, काशी । } निवेदयति—
ठाकुरप्रसादशर्मा

संस्कृत-संवर्द्धिनी-समितिः ।

स्थानीय-सेन्ट्रल-हिन्दू-स्कूलनामधेये विद्यालये बहुनामध्यापकानां विद्यार्थिनाञ्च समुत्साहेन पारस्परिक-संस्कृत-संभाषण—परिज्ञानाऽभिवृद्धये मार्गशीर्षमासे 'संस्कृतसंवर्द्धिनी' नाम्नी एका समितिस्तैः संस्थापिता । तस्याः प्रारम्भिकाधिवेशनं श्रीमतां पं० कालीप्रसन्नचक्रवर्ति-महोदयानां सभापतित्वे महता समारोहेण समपद्यत । तत्र पदाधिकारिणोऽपि निम्ननिर्दिष्टनामानोऽध्यापकाः सर्वसम्मत्या निर्णीता अभूवन् ।

सभापतिः-कविरत्नं पं० श्रीकालीप्रसन्नचक्रवर्ती बी. ए. मन्त्री—साहित्य-शास्त्री परिडत-श्रीजगन्नाथप्रसाद त्रिपाठी एम. ए., स० मन्त्री—काव्यतीर्थ पं० श्रीसरयूप्रसादशास्त्री (द्विजेन्द्रः) विशारदः ।

अन्ते सर्वसम्मत्या निश्चितमिदं यदागामिनि समित्यधिवेशने व्याख्यान-विषयो निबन्ध-निषयश्च "वर्तमान-संस्कृत-शिक्षासरणिः समीचीना न वा" इति ।

स० मन्त्री—
"संस्कृत-संवर्द्धिनी-समितेः"
(सेन्ट्रल-हिन्दू-स्कूल, काशी)

विचित्रा-चिकित्सा

एकोऽद्वितीयो वैद्यो ऽपस्मार-(मिर्गी) प्रस्तानशादिरुजान्वितान् जनाननायासेनैवापगतरोगान् करोति । अर्शरोगप्रपीडितं जनं नवभिर्दिनैरेव कर्त्तन-(आपरेशन) दुःखेन विनैव स्वस्थं करोति । तत्राजीर्णादिरुजानां का कथा ? श्वेतकुष्ठकासश्वास-(दमा) मपि वर्षद्वयाभ्यन्तर एवापगतं करोति । दीनेभ्यो जनेभ्यो न किञ्चिद् गृह्यते, किन्तु सम्पत्तिशालिभ्यस्तच्छक्त्यनुसारेण पारितोषिकं गृह्यते । विशेषं जिज्ञासमानैरत्र पत्रव्यवहारो विधेय—इति ।

दर्शन-विद्यालयः,
लक्ष्मीकुण्डम्, काशी । } —सरयूप्रसादपाण्डेयः
(द्विजेन्द्रः)

वार्षिकोत्सवः

रायदुर्गीय-श्रीहरनन्दनराम-रुइया-संस्कृत (कालेज) महाविद्यालयस्य द्वादशो वार्षिकोत्सवो महर्षि-कल्पस्य श्रीनीलकण्ठन्यायाचार्यस्याध्यक्षत्वे महता समारोहेण सम्पन्नः । बहूनां विदुषां शिक्षाविषये संस्कृतभाषाया महत्त्वविषये च ललितललितानि भाषणान्यभूवन् । महाविद्यालयस्य प्रधानाध्यापकेन श्रीहनुमत्प्रसादशास्त्रि साहित्याचार्येण वार्षिक-विवरणं श्रावितम् । अन्ते परीक्षोत्तीर्णेभ्यश्छात्रेभ्यः पारितोषिकं वितीर्य्य ससाधुवादं सभाविसृष्टिर्-भूदिति निवेदयति—

ब्रजमोहन सिंघानिया ।
(प्रबन्धकः)

समालोचना-सारः

साहित्य-दर्पणस्य 'विमला'

अपूर्वा (हिन्दी) टीका ।

संस्कृत-साहित्य-शास्त्रे साहित्य-दर्पणनामा ग्रन्थो विषय-साकल्येन, प्रतिपादन-शैल्या, परमता-लोचनरीत्या चातिशेत एवैतद्विषयकानितरग्रन्था-निति सप्रमाणं वक्तुमुद्यताः स्मः । प्रणेता ग्रन्थरत्न-स्यास्य न केवलं संस्कृतभाषायामेव, अपि तु 'अष्टादशभाषावारविलासिनी-भुजङ्गतां' दधानः साहित्य-विद्याया वाचस्पतिः, इति तत्कृतिभ्य-एवावगम्यते ।

साहित्य-दर्पणस्य प्रचुरासु टीकासु तर्कवागीश-श्रीरामचरणभट्टाचार्यकृता 'विवृति' रेव स्वगुण-गरीयसीति परमप्रेयसी साहित्य-पाण्डतानाम् । इदानीं तस्यैव साहित्यदर्पणस्य लक्ष्मणपुर-(लखनऊ) स्थित—'मृत्युञ्जय-महौषधालयतः' प्रकाशिता विद्यावाचस्पति-साहित्याचार्य-श्रीशाल-ग्रामशास्त्रिकृता 'विमला' ऽऽख्या हिन्दी-टीका विचित्रेव प्रतिभाति अक्षुण्णताम् ।

अस्यां हिन्दीटीकायामितराभ्यः संस्कृतटीका-भ्य एतावानेव विशेषो यदत्र स्वोपजीव्यविवृति-कार-श्रीतर्कवागीश-महोदयैः सह सघृणमधिक्षिप्ताः दर्पणकाराः । अनेन साहित्याचार्येण दर्पणकारः सर्पत्वेन कल्पित इति श्रुत्वा कस्य सहृदयस्य मनसि सहसा क्रुधो घृणायाश्च समुद्रेको न भविष्यति ?

संस्कृतविद्वांसो टीकामिमां दृष्ट्वा तदधिक्षेप-प्रकारमवश्यं चिन्तयेयुरिति सप्रश्रयं निवेदनम् । संस्कृत-साहित्यसम्मेलनेऽप्येतादृश-गालिप्रदान-दु-र्न्दिलायाष्टीकाया विचारो यदि भवेत्, तदा महानुपकारः स्यान्नव्यानां शिक्षितानाम् ।

साहित्याचार्येणानेन 'अलंकार-कल्पद्रुमः' 'अर्वाचीन-साहित्य-विवेचना' चेति निबन्धद्वयं 'मौलिक' मपि स्वमेधया समुद्भावितम् । तयो-रालोचनाऽत्रैव 'सुप्रभाते' क्रमशः प्रकाशं गमिष्यति तदवलोकनेन सर्वेऽपि ज्ञास्यन्त्येव साहित्याचार्यो 'विद्यावाचस्पतित्व' मिति नाधिकमिह सम्प्रति वदामः ।

—किशोरीदासवाजपेयी शास्त्री ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्य्यः

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दी भाषायां निबन्धलेखनेऽथानुवादादिज्ञाने महत्सौकर्यं स्यात् । मूल्यम्—आणकपञ्चकम् ।=) मार्गव्ययः =)

सूर्यचरितम् वा ऋतुचरितम् ।

ले०—तारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः ।

गोलविद्या-विषयकं नूतनं महाकाव्यम् ।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः । गोलविषये नूतनं संस्कृत-महाकाव्यम् । सर्वथा द्रष्टव्यम् । मूल्यम्—१) मार्गव्ययः पृथक् ।

सनातन-धर्म-संरक्षकः ।

उपदेशदर्पणस्य प्रथमसंख्या ।

सङ्कलयिता—एकः काशीस्थः सनातनधर्मा विद्वानाचार्यः

पुस्तकमिदं हिन्दीभाषायां श्रुतिस्मृति-पुराणेतिहासशिलालेखादिप्रमाणाधारेण शुद्धिभोजनादिव्यवस्थाविषये लिखितमस्ति । विषयेऽस्मिन् बहुज्ञताभिलाषुकैर्वर्त्तमान-सामाजिक-धार्मिक-प्रगतिप्रतिस्पर्धिभिः खण्डनमण्डनकामैश्चावश्यं गृहेलिममिदम् जिघृक्षुभिराणकद्वयस्य =) चिटिका प्रेष्या ।

सचित्रम् सामुद्रिक-रहस्यम् ।

ले०—श्रीकालिकाप्रसादशर्म्मा, राजज्योतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथा नवीनमेव । एतेन हस्तरेखाणां गुरुं विनैव सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि-कोकोक-विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनी-प्रभृतीनां स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि, तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वसविधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

महाकवि बाणभट्टः ।

ले:—भू० पू० *सुप्रभात-सम्पादकः श्रीकेदारनाथ शर्मा*

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र बाणभट्टस्य जीवनविषये महत्वपूर्णा, मननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारकोऽयं निबन्ध-बन्धः । मूल्यम् =) मार्गव्ययः -)

Rg N. 1348 A.

अतीत—१९८१-८२-८३-८४ संवत्सराणाम्

सुप्रभातम् ।

प्रथमवर्षस्य—१९८१

शोभनबन्धैः पुस्तकाकृत्या निबद्धम् । मूल्यम्—६) षण्मुद्राः । मार्गव्ययः पृथङ्नास्ति ।

द्वितीयवर्षस्य—१९८२

प्रथमाब्दवदतिमनोहरबन्धबद्धम् । मूल्यम्—५) पञ्चमुद्राः । मार्गव्ययः पृथङ्नास्ति ।

तृतीयवर्षस्य—१९८३

पूर्ववद् बद्धम् । मूल्यम् २॥) सार्द्धमुद्राद्वयम् । मार्गव्ययः पृथक् ।≡) ।

चतुर्थवर्षस्य—१९८४

अतिमनोहरमिदम् निबद्धम् । मूल्यम् ३॥) सार्द्धमुद्रात्रयम् । मार्गव्ययः पृथक् ॥)

प्रकीर्णाङ्काः

प्रकीर्णाङ्काः स्वल्पा एव विद्यन्ते । येषाम्पार्श्वे-कस्यचनाङ्कस्याभावो भवेत्ते नूनं शीघ्रतां कुर्वन्तु ।

प्रथमवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणकचतुष्टयम् । अङ्काः—आदर्शः, १, ४, ६, ११, १२,

द्वितीयवर्षस्य—प्रत्येकाङ्कस्य मूल्यम्—≡) आणकत्रयम् । [illegible]—२, ३, ५, ६, ७, ८, ९, ११, १२ । [illegible]

तृतीयवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—=) आणकद्वयम्, अस्य सर्वेप्यङ्काः सन्ति ।

चतुर्थवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणकचतुष्टयम् । अस्य सर्वेप्यङ्काः सन्ति ।

प्रकीर्णाङ्कानां मार्गव्ययोनिर्धारितमूल्यतः पृथगेव । जिघृक्षुभिस्त्वरा कार्या । पत्रव्यवहारसङ्केतः-

व्यवस्थापकः—

सुप्रभात-कार्यालयः, काशी

(Benares City)

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

गिरीशाङ्कः

माघे १९८५ वैक्रमाब्दे ।

पञ्चमवर्षं
Vol. 5


February 1929.

दशमोऽङ्कः
No. 10.

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिरततिमुदस्यद् भेदतारा विलुम्पन्-
नयदपि सुरभाषाभाति जागतिकैः ।



विबुध-विहग-वाद्यैराह्वयद् भाग्यभाजम्,
विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'

[एतेषां मार्गशीर्षशुक्लपञ्चम्यां सं० १९५३ वै० जन्म, मार्गशीर्षपूर्णिमायां सं० १९८५ वै० मृत्युः ।]

सम्पादकः—

श्रीविन्ध्येश्वरीप्रसादशास्त्री ।

अस्याङ्कस्य मूल्यम् ।)

[२४७ पृष्ठावशिष्टम्]

महोदयानां मार्गशीर्षपूर्णिमायां गिरीशपुरङ्गमनमभूदिति परं विषादस्थानमस्माकम् ।

एतेषां गुरुवराणां देशोद्धारप्रणयिनां ममोपरि सुमहान् प्रेमातिशय आसीदित्यसमये वज्राघातो न कदापि व्यपगतः स्यात् । नूनमिदानीमखिले राजनैतिकसामाजिकधार्मिकविप्लवमये भारतवर्षे हीनदीनायाः सजलनैत्रैः स्वीयान्नेतॄनन्वेषयन्त्या देववाण्या दुर्भाग्यविलसितमिदम् ।

एतेषां संस्कृतसाहित्यप्रभाकराणामस्ताचलगमनेन नितरां परितप्ताः, तत्पारिवारिकजनानां समीपे हार्दिकसमवेदनां प्रकाशयामः । जगद्रक्षाशिक्षाविचक्षणं गिरिजापतिं गिरीशमेवं प्रार्थयामो यद् गिरीशशुक्लवियोगजशोकसंतप्तहृदयाननाथान् सुकुमार-कुमारी-कुमारान् सनाथान् करोत्विति ।

अजयगढ़राज्यम्, ३—२—२६ | भवदीयः— लल्लाभैयाशुक्लः

शोकाश्रुविन्दवः !

हा ! वाणि ! दार्शनिकि ! हन्त ! निराश्रयासि
काशि ! त्वमप्यहह ! शोकरता न भासि ।
आशीविषोपमितदारुणकालदष्टो
नष्टो गिरीश इह चेद् युवयोरधीशः ॥

—श्रीरामनारायणदत्तपाण्डेयस्य ।

न्यायं सावयवं किलोभयमथ श्रीपाणिनीयं तथा,
सांख्यं काव्यमधीत्य वेदममलं वेदान्तमल्पैर्दिनैः ।
जैनानामपि तर्कवादमखिलं दृष्ट्वैव योऽध्यापिपत्,
अन्यत्राऽपि च मालवीयरचिते सद्विश्वविद्यालये ॥
यस्याऽऽसीद् विरुदावली प्रवचने लेखे च शक्तिः शुभा,
छात्राणामपि हृच्चमत्कृतिकरी प्रीतिः किलाऽध्यापने ।
सादृश्यं वत भारतीयविदुषां गोष्ठीषु नासाद्यते,
यातोऽस्मानपहाय शैवपदवीं वन्द्यो गिरीशः सुधीः ॥

गिरीशशुक्लस्य सदान्तरात्मा, सायुज्यमभ्येतु महेश्वरस्य ।
सुतौ तदीयौ चिरजीविनौ स्तां, समाप्नुयाच्छान्तिमलं कुटुम्बः ॥

—श्रीसत्यनारायणशास्त्रिणः ।

अवगत्य दिवं गतं बुधं नयविज्ञं च गिरीशपण्डितम् ।
नितरां हि निपीडिते श्रुती नयने बाष्पयुते च ते च मे ।
शिथिलीभवतः करावुभौ लिखितुं नोत्सहते च लेखनी ।
हृदयं च विदीर्य्यतेतरां वयमुच्छ्वासहताः हतासवः ॥

—श्रीवासुदेवद्विवेदिनः ।

वाराणसीनाथनिबद्धभावः साहित्यपाथोजविकासभानुः ।
राष्ट्राभिमानी किल कर्मयोगी हंहो वतागात् क्व गिरीशशर्म्मा ॥
वैशेषिकन्यायकलासु विज्ञो वेदान्तविच्चापि पुराणवेत्ता ।
षड्दर्शनाचार्य्यतया प्रसिद्धो गतः परात्मा क्व गिरीशशर्म्मा ॥

—श्रीगोपालदत्तत्रिपाठिनः ।

किं भो दैवमशोभनं, दिविषदो
रुष्टा, ग्रहा निन्दिताः ।
देवेन्द्रः किमुताऽप्रसन्नहृदयः,
श्रान्तश्च वाचस्पतिः ॥
कर्माऽन्धः किमु धर्मराजनृपतिः
विष्णुः सुषुप्तश्च किम् ।
कालः प्राणहरो 'गिरीश' विदुषां
केनाऽपि नो वारितः ॥

—श्रीकृष्णवल्लभशास्त्रिणः ।

गिरीशशुक्लामलशीतरश्मिं,
जग्राह कालो विकरालराहुः ।
शोकान्धकारावृतमस्ति विश्वं,
कथं नु जीवेम वयं चकोराः ॥

—श्रीमहाबलशर्मणः ।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम्।

पञ्चम-वर्षे | सौर—माघे १९८५ वैक्रमाब्दीये— | दशमोऽङ्कः।

गिरीशः।

आर्याऽधिसङ्गाधिकसुप्रसन्नः समुल्लसद्भूतिविभूषिताङ्गः।
सुबोधशाली विबुधोपजुष्टः पदे परस्मिन् रमते गिरीशः॥ १॥
अहीनसंसर्गितया प्रसिद्धो वृषानुरागेण भृशं मुदं यन्।
न्यायैकनिष्णातमतिः परात्मा पदे परस्मिन् रमते गिरीशः॥ २॥
अनन्यसामान्यगुणोपपन्नः प्रसन्नचित्तो विलसत्सुवृत्तः।
हृत्तापहृत्तापरमाप्तशीलः पदे परस्मिन् रमते गिरीशः॥ ३॥
विराजमानो द्विराजसङ्गाद् गङ्गाजलोल्लासिकलेवरश्रीः।
कलाविलासालयतामुपेतः पदे परस्मिन् रमते गिरीशः॥ ४॥
सदागमाऽऽशंसितसत्प्रभावो विद्याऽतिविद्योतितचारुचेताः।
शिवान्वितः शङ्करणैकतानः पदे परस्मिन् रमते गिरीशः॥ ५॥

—श्रीदेवीप्रसादशुक्लः 'कविचक्रवर्त्ती'
(महामहोपाध्यायः)

श्रीगिरीशशुक्लो न्यायाचार्य्यः ।

ले०—श्रीगोपालशास्त्री, त्रिपाठी ।

दर्शनशास्त्रस्य प्रगाढपाण्डित्यजुषानेन विदुषा मम सङ्गतिः सुप्रभातप्रकाशनान्तरं कियत्सु दिवसेषु गतेष्वेवाभूत् । पूर्वन्तु नैयायिकोऽयं रीवाँ-राज्यान्तर्गतकिञ्चिद्ग्रामाभिजनः काशीवास्तव्यः सरयूपारीणब्राह्मण इत्येतावानेव संक्षिप्तः परिचय आसीत् । प्रसङ्गतो रथ्यायां सङ्गतयोः कदाचिदावयोः केवलान्वयिलक्षणे कियत्कालं विचारेण परस्परालाप-लक्षणः सम्बन्धोप्युद्भूत आसीत् । यदा सुप्रभातस्य जन्मदः पं० केदारनाथशास्त्री सारस्वतमहोदयो मत्पार्श्वं आगत्य वयं किञ्चित् पत्रं प्रकाशयितुमिच्छामस्तत्र भवन्तोऽपि साहाय्यमाचरन्तु, इति व्यजिज्ञपत्, तदा गुरुपुत्रोऽयं किञ्चित् सार्वजनीनं कार्यं कर्तुमभिलषत्यतोऽस्य साहाय्यमवश्यं विधेयमिति मनसि निश्चित्य "अधुना यावत् के भवतां सहायका जाताः" इति मया पृष्टास्ते श्रीविन्ध्येश्वरीप्रसादशास्त्रिणो नामागृह्णन् । ततश्च मम स्वीकृतिपत्रं गृहीत्वा ते पत्रप्रकाशनादिव्यवस्थितये स्वगृह एवैकां समितिमाकारयामासुः । समितौ तत्राहं, पण्डितश्रीविन्ध्येश्वरीप्रसादशास्त्री, पं० केदारनाथशास्त्री सारस्वत इति त्रय एवास्म इत्येव तावदहं स्मरामि । तत्र सुप्रभातमिति पत्रनामास्तु इत्येभिः प्रस्तावितम् । तदेव च सर्वसम्मत्या स्वीकृतमभूत् ।

अत्र काश्यां के विद्वांस एवम्भूताः सन्ति येऽत्र साहाय्यमाचरिष्यन्तीति विचारणायां पण्डित देवीप्रसादशुक्ल-कविचक्रवर्ति-पं० गिरीशशुक्ल-पं० दामोदरशास्त्रि-महोदयप्रभृतीनां विदुषां नामान्युपस्थितान्यभूवन् । प्राथमिको व्ययः कथं प्रचलिष्यतीति विचारे स्वपार्श्वादेवायमावश्यको व्ययः कर्तव्य इति सर्वैर्निश्चितम् । संक्षेपत ईदृगेव प्राथमिकमल्पविचारं विधाय काशीस्थविदुषां साम्प्रतिकोपस्थितये एका सूचनाऽस्माभिः प्रकाशिता ।

अत्र काशिकराजकीय-संस्कृत-पाठशाला-व्याकरणाध्यापकानां श्रीमतां श्रीरामभवनोपाध्यायमहोदयानां सभापतित्वे पत्रप्रकाशनप्रस्तावः स्वीकृतः । ततश्च श्रीमन्तोऽस्माकं मान्याः श्रीकविचक्रवर्तिमहोदयाश्च सम्पादकत्वार्थं प्रार्थिताः स्वस्वीकृतिमददुः, तेषां स्वीकृतिदानेन द्विगुणोत्साहा वयं प्रकाश्यमानानां लेखानां यथाकथञ्चित्परस्परत एव संग्रहं विधाय शीघ्रमेवादर्शाङ्कं मुद्रापयितुं सन्नद्धा अभूम । तत्र प्रधानतो व्यापारो मम प्रियवयस्ययोः श्रीकेदारनाथशास्त्रि-श्रीविन्ध्येश्वरीप्रसादशास्त्रिणोरेवासीत् । मया तु मुख-बद्ध-श्लोकं कियतो लेखांश्च समर्प्य नाममात्रतः प्रूफसंशोधनादिव्यापारे साहाय्यमनुष्ठितमासीत् । इत्थमादर्शप्रकाशनानन्तरं सुप्रभातजन्मदात्रैव पण्डितगिरीशशुक्लानां मया परिचयः कारितः । तदानीन्तैः सहालापादिना मम मनसि य आनन्द उत्साहो मनोभावोद्गमश्चासीत् स किमनया क्षुद्रलेखन्या व्यक्तो भविष्यति ? प्रथमत एव तेषां महात्मनां न्यायाचार्याणामपि सतां हिन्दीभाषानुरागं 'सरस्वती'—प्रभृतिपत्रग्राहकत्वञ्च विलोक्याहं चकित-चकितोऽभवम् । अहो ये वयं पण्डिता हिन्दीभाषां 'भाखा' इति शब्देन व्यवह-

रोमस्तत्रैवैषामियाननुरागः ! हन्त ! इमेऽवश्यमाधुनिक-प्रगति-प्रतिस्पर्द्धिनो देशकालात्मविदो महोदयाः सन्ति, एभिरस्माकं सं०-सा०-समाजीयं कार्य्यं साधु प्रचलिष्यति । इति मे मनसि आमोदयोऽभूत् । तदनुकूलमेव ते तदानीमेवोत्थाय सुप्रभातसाहाय्यार्थं सन्नद्धा भूत्वा स्वपरिचितैः कियद्भिः परिव्राजकमण्डलेश्वरैः द्रव्यं दापितवन्तः । सम्मेलयित्वा यथाकथमपि आदर्शाङ्कद्वयोऽस्माभिर्निःशेषितः । ततःप्रभृति तु त एव महात्मानः सर्वमपि सुप्रभातकृत्यभारं स्वशिरसि गृहीत्वा रात्रौ दशवादनं यावत् कार्य्यालयकृत्यं कुर्वन्तोऽभूवन् । स्वभावस्तेषामीदृक् सरलो गम्भीरश्चासीद् यत् कदाचन मन्त्रणसमितौ परस्पर-सम्मतिवैषम्येऽपि महता धैर्येण ते स्वमतं प्रकाशयन्ति स्म येन सर्वेषामपि सन्तोषस्योदेति स्म । किम्बहुनाऽस्माकं मित्र-गोष्ठीषु मत्तो वयसा कनीयानपि स मया वर्षीयानिवावगम्यत । मया सह यदैव तेषां सङ्गतिः सञ्जायते स्म तदामन्दानन्दतुन्दिलितयोरावयोः कालातिपातोऽप्यगणित एव भवति स्म । यदापि मे मनसि कोऽपि गृहचिन्तया सांसारिकव्यग्रतया वा विरलो विकार उत्पन्नः तदैवाहं तत्पार्श्वं गत्वा तदपाकृतिमन्वभवम् । सार्वजनीनकार्य्ये तेषां कीदृङ्मनोयोग आसीदिति सर्वप्रथमकाभ्यन्तर एव संस्कृत-साहित्यसमाजे संस्कृतच्छात्रसङ्घप्रवर्तन-वाचनालयोद्घाटन-परीक्षासमितयुद्भावन-शास्त्रिमण्डल-ग्रन्थ-माला-संस्थापनादि-कृत्यैरेव द्योत्यते । सनातनधर्म-पण्डित-सभासंस्थापनेऽपि तेषामेव प्राधान्यमासीत् प्रथमवर्षे च प्रधानमन्त्रिणोऽभवन् । चक्रवर्तिमहोदयानान्तु अन्तिमवर्ष एवासन् । यत् किमपि कविमहोदयाः कथयन्तोऽभूवन् तत्सर्वमपि नतमस्तका एव ते गृह्णन्तोऽभूवन् । तदाज्ञयैव ते वर्षद्वयं सुप्रभातं सम्पादितवन्तः । तेषां सम्पादनकाले साधु सुप्रभातसहायकानां वृद्धिरभूत् । एवं सर्वमपि सार्वजनीनकृत्यं कुर्वतां तेषां स्वकुटुम्बभरणार्थं द्रव्यसंचयचिन्ता स्वप्नेऽपि नाभूत् । बहुशोऽस्माभिर्निवेदितास्ते एवमेवाकथयन् यत् "कुसूल-कुम्भीधान्यो वा त्र्याहिको द्व्याहिकोऽथवा जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः पर इति मनोराज्ञया ब्राह्मणानां धनसञ्चयनं गर्हितम् । ब्राह्मणानान्तु सुरभारतीसमुपासनैव परमं कर्तव्यन्तत्त्वहं करोम्येव । अग्रेऽपि सं० सा० समाजसेवयैवाहं स्वकालं नेष्यामि" इति । मध्ये मध्ये काशीस्थपण्डितानां सं० सा० समाजत औदास्यं विलोक्य यदा यदा वयं हतोत्साहा अभवाम, तदा त एव महात्मानोऽस्मान् सोत्साहान् कुर्वन्तोऽभवन् । कियानेव कालो गतो यत्र मया सह तेषां परामर्श आसीत् यत् कुसुमाञ्जलिग्रन्थस्य न्यायवात्सायनस्य चान्येषामपि दुरूहन्यायग्रन्थानां साधु सरलसंस्कृतभाषया हिन्दी-भाषया च विभूषितं मनोहरं प्रकाशनं स्वल्पमूल्येनैव शास्त्रि-मण्डल-ग्रन्थमालातो भवतु येन तदध्यायिनामन्येषाञ्च हिन्दी-भाषाभिज्ञानामपि स्यात् सौलभ्यमिति । बालानां सदाचारोन्नतौ तेषां महदासीदवधानम् । एतद्धियैव ते सदाचारसोपाननामकमेकं शिक्षोपनिषत्पूर्णं पुस्तकं बाल-शिक्षार्थं स्वयं विलिख्य प्रकाशितवन्तः (यच्च मुद्रितं विद्यते ≥) आणकत्रयेण सुप्रभातकार्यालयतो मिलति) धर्मशास्त्रेऽपि तेषां तादृगेवासीत् प्रवेशो यथा दर्शनशास्त्रे । कियानेव कालोऽभूत्, देवलस्मृतिं

स्वहस्तेनैव प्रतिलिपितो विलिख्य ते मह्यं राष्ट्रभाषया समलङ्कृत्य प्रकाशनायाददुः, तांश्चाहं तत्कथनानुसारेण साधु सम्पाद्य प्रकाशयितुं यतमान एवासम्, तावदेव ते कुटिलेन कालेन वियोजिताः । हा ! हन्त कोपलब्धि र्भाविनी तादृशस्य स्मितमुखस्य वयस्यस्याधुना, यो हि मम कथने तादृगवधानं दास्यति ? एकदा कथानुकथनप्रस्तावे विजयादोषं मन्मुखाच्छ्रुत्वा स तत्कालत एव तत्सेवनाभ्यासमजहात् । ताम्बूलभक्षणाभ्यासमपि मत्कथनेनैव ह्रसिमानं नीतवानासीत् । किं कथयामि प्रियसुहृदा वञ्चिता वयं पङ्गु-कूण-मूक-प्राया जाताः । न दृश्यते कोऽपि तादृक् कर्णेहत्य कार्यकर्ता प्राणायामपि वैफल्यपरम्परायां द्विगुणितोत्साहेन स्वव्यापारं विधाता । ईदृशं सर्वगुणसम्पन्नं स्वादस्योत्साहसमेधितमन्त्रणसमितिसदस्योत्साहं प्रियवयस्यं गिरीशशर्माणं स्मारं स्मारं न शुष्यति नयनाम्बु, न वध्नाति, धैर्यं धिषणा, न विश्वसिति चेतस्तेषां परलोकवासम् । अयि सुप्रभातपाठकाः ! अधुना सुप्रभातसंचालनभारो भवद्भिः सर्वैरपि विभज्य वहनीयो येन स्यान्मम प्रियवयस्यस्य परलोकगतस्याप्यात्माप्यायित आनन्दितः प्रसादितः सुप्रभातोन्नतिं समीक्ष्य । श्रीमन्तश्च तदीयप्रियतरं सुप्रभातं समुन्नयन्तस्तदृणमुक्ताः स्वात्मानं कृतकृत्यं कुर्वन्तोऽस्मानपि सोत्साहानेव विधास्यन्तीति विरमति बहुविक्लव-वाग्व्यापारादिति ।

गिरीश-स्मृतिः ।

कलिकवलितचित्तं धर्म्मधैर्य्यादिहीनं
मलिनविषयमग्नं जीवलोकं विलोक्य ॥
जननमरणजालच्छेदने लम्पटः किं
गिरिशचरणरेणौ संविलीनो गिरीशः ! ॥

साफल्यं शुचिता विचारपटुता विद्याप्रचारोद्यमः
शास्त्रेषु व्यसनं विनम्रवचनं सौजन्यजन्यक्षमा ॥
धर्म्मे तत्परता गुणैकरुचिता तर्कप्रियत्वं च तत्
हाहा ! पण्डितकेसरिंस्त्वयि गते क्व स्थानमासादयेत्॥

त्वदेकपुत्रां जननीं जरातुरां
सुतास्तनूजौ गृहिणीं तपस्विनीम् ॥
सदानुरक्तं स्वजनं च निर्दयं
निपात्य दुःखाब्धिजले कुतो गतः ? ॥

तव विरहकृशानु र्ध्यानमात्रेण दीप्तो
बुधवर ! हृदयं नो दुःसहज्वालजालैः ॥
ज्वरयति ननु यादृग् भीषणं सन्ततं तत्
प्रकटयितुमजीवा लेखनी नो समर्था ॥

—श्रीजीवनकृष्णभट्टाचार्य्यः ।

शोकोच्छ्वासः

(ले० श्रीगिरिजादत्तत्रिपाठी—काशी-हिन्दूविश्वविद्यालयस्य)

अयि सुप्रभातपाठकाः !

न भवेदविदितो भवद्भिर्न्यायाचार्याणां पण्डित गिरीशशुक्लशर्मणां मरणवृत्तान्तः । स्मृत्वा चेमं नितरां दूयते मच्चेतस्तथापि तदीयाशेषगुणैर्भृशं प्रणोदित स्तदीयगुणवर्णने प्रवृत्तोऽस्मि । ते हि अत्यन्त

एव वयसि काशीराजकीयसंस्कृतविद्यालयीयन्यायाचार्यपरीक्षामुत्तीर्य काश्यामेवच्छात्राध्यापनेन पाठकपाटवं प्रकटय्य अनन्तरं सुप्रसिद्धगोयनकाविद्यालये न्यायशास्त्रमध्यापयितुं प्रवृत्ताः। तत्र च विलक्षणप्रतिभया, प्रगाढपाण्डित्येन च सर्वान् सन्तोषयन्तः परमां ख्यातिं लब्धवन्तः। व्यतीतेऽब्दे विद्यालयशिरोमणि-काशी-हिन्दूविश्वविद्यालयान्तर्गतप्राच्यविद्याविभागीयन्यायविभागं सुशोभितवन्तः स्वपदार्पणेन। शास्त्रपाण्डित्यं, व्युत्पत्तिवैचित्र्यं व्यवहारपाटवं च तेषां स्मृत्वा खिद्यते नितान्तं स्वान्तम्। दृश्यते हीदं वैचित्र्यं, यत् संस्कृतभारतीसमुपासकेषु विद्वत्सु प्रायो व्यवहारानभिज्ञत्वमेव भवति, परमेतस्य नियमस्य व्यभिचार एवासीत्तेषु विद्वद्वरेषु। आजीवनमन्तेवासिभिः सार्धमेतादृङ्निष्कपटमाचारमाचरितवन्तः, येन तेषां प्राणास्तद्गता एव जाताः। ते हि काशीहिन्दूविश्वविद्यालयीय-संस्कृतच्छात्रसमित्याः सभापतयो निर्वाचिता आसन् तत्सदस्यैः। परमियं हि हतभागिनी समितिः, अचिरादेव प्रियविरहिता जाता। नासीदिदमस्या भाग्ये प्रियसुखं भोक्तुम्। संस्कृतच्छात्रसमित्या अमूल्यमिदं रत्नं तिरोबभूव, अस्याः सदस्याश्च दुःखार्णवे गाढं निमज्जन्तः पारं गन्तुमसमर्थाः कर्तव्यविरहिता एव जाताः। हा हन्त! दुर्दैव! किमिदमाचरितं त्वया, अकाल एवासह्यो वज्रः प्रहारितः!!

शोकोद्गारः।

सहसैव गिरीश हे सखे!
क नु मित्राणि विषादसागरे॥
विनिपात्य दृशोरगोचरो
धृतमौनव्रत! साम्प्रतं गतः॥ १॥
तनयाः करुणास्पदं न किं?
सुहृदो वा प्रतिकूलवर्तिनः॥
यदुपेत्य चिराय साम्प्रतं
नरलोकं किल मुक्तवानसि॥ २॥
अहह! क्षणमप्ययं! तवा-
ऽकृतिरेषा मनसोऽपयाति न॥
ननु धैर्यमियं बुधावलि-
स्तव शोकेऽद्य दधातु कीदृशम्॥ ३॥
हतदैव! तवैव चेष्टितं
ननु मन्ये कथमन्यथाऽधुना॥
विबुधोऽल्पवया अदृश्यतां
गतवानित्यभिधत्स्व कारणम्॥ ४॥

जगन्नाथशास्त्री होशिङ्गः,
(साहित्याचार्यः)

ममाशाबन्धो विच्छिन्नः।

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा! हन्त! हन्त! नलिनीं गज उज्जहार!!

अनेन गजेन इव करालकालेन गिरीश-तनुनिपातेन तदाश्रिता ममाशालता मूलत एव विच्छि-

न्नेति शोकमोहाकुलस्य बालस्य दग्धहृदयस्य हृदयहारिणी कथा श्रूयताम् । कोशगतस्य द्विरेफस्येव ममापीदानीमवस्था सञ्जाता । गिरीशोदितज्ञानप्रकाशेन गमिष्यति मेऽज्ञानम्, भविष्यति मे सुप्रभातम्, हसिष्यति मे सुखश्रीरित्याशास्तद्दिनात् पुष्पायमानाः प्रलयकालवायुना सहसैव विलयं नीताः ।

एकदा संस्कृत-साहित्य-समाजाधिवेशने तद्व्यवस्थापकस्य गिरीशशुक्लमहोदयस्य श्रुतिमधुरं सुमनोहरं सुभाषणमश्रौषम् । तत एव 'क इमे' इति सञ्जातकुतूहलः, तेषां सं०सा० समाजव्यवस्थापकत्वेन विश्वविद्यालयीयन्यायशास्त्राध्यापकत्वेन न्यायशास्त्रस्याद्वितीयपण्डितत्वेन च प्राप्तपरिचयः, उत्पन्नाशाङ्करः, तान् द्रष्टुं सदैव प्रयत्नशीलः, अयं मन्दभाग्यो दुर्दैववशात् यावत् तदीयं दर्शनमपि कर्तुं नाशक्नोत् तावदेव करालकालेनानार्यमाचरितं ममाशास्थानं निर्दयं विच्छिन्नमिति मे दुर्दैवदुर्विलसितम् ! हा ! रोदिति हृदयं, मुञ्चतः कवोष्णाश्रूणि नेत्रे, व्रजत्यन्धकातरतां दृष्टिः, शैथिल्यं याति देहबन्धः, किमधिकम् विनष्टयष्टिः पङ्गुरिव, आश्रयविहीनोऽन्ध इवेदानीमहं सञ्जात इति हा ! हतोऽस्मि । कथमधिकं लिख्यतामधुना ! न चलति मे लेखनी ।

अन्ते, कालकवलीकृतशरीरस्य गिरीशशुक्लमहोदयस्य परमात्मा स्वपादभूमौ परमं स्थानं दद्यादिति स्वीय मौक्तिकतुल्याश्रुमालया तं दयाघनं परमात्मानं संपूजयन् अहं सविनयं साग्रहं च प्रार्थये—इति ।

स्वं० वि० मोहरीरः (काशी विद्यापीठस्थः)

दुर्दैवदुर्विलसितम् ।

अहह ! प्रतिभागुणैर्गरिष्ठं
सरसं सूरि"गिरीश"शर्मशुक्लम् ।
करुणा-विकलो विवेक-शून्यो
विकरालः कवलीचकार कालः ॥ १ ॥

समयोचितसत्तमव्यवस्था-
स्थितिसम्पादनकौशलाद् "गिरीशः"
यदहो ! उदजीवयत् तदद्या-
ऽऽश्रयहीनं नहि भाति "सुप्रभातम्"॥२॥

अद्य "संस्कृतसाहित्य-समाजः" शोकसागरे ।
पतितो याति वैक्लव्यं "गिरीशेन" वियोजितः ॥३॥

हाहा ! हन्त ! विधे ! गिरीशपदभू-
सौभाग्यमत्युन्नतम्
यत्त्वं प्रापितवान् "गिरीश"मधुना
स्थानेऽस्ति तच्चेष्टितम् ।
किन्तु न्यायविरोधि दुःसहमिदं
दुश्चेष्टितं, यत्किल-
न्यायाचार्यसुधीस्त्वया कवलितो-
ऽकाले हठान्निर्दयम् ॥ ४ ॥

अहह ! सहजप्रेमाधारप्रसादावराजितो-
त्तरपदलसद् "देवी-विन्ध्येश्वरी" समुपेक्षया ।
ननु विरसतां चित्ते धृत्वा "गिरीश !"गतं त्वया
तदियमथवा दैवी लीला न ते किल दूषणम् !

अनन्तरामशास्त्री वेतालः
(साहित्याचार्यः)

कालचेष्टितम् ।

ले०--सीतारामशास्त्री जोशी एम्. ए. (साहित्याचार्यः)

यदि नित्यमनित्येन निर्मलं मलवाहिना ।
यशःकायेन लभ्येत ततो लब्धतरं नु किम् ॥
(सुभाषितम्)

अनया सुभाषितोक्तरीत्या न्यायाचार्यपण्डितगिरीशशुक्लानां शरीरविनिमयो जात इत्यत्र नास्ति कश्चित्सन्देहः । अधुनास्माकं ते यशःशरीरेणैव प्रतीयन्ते । महतामयं स्वभावः किल यदि ते क्षणमपि स्युस्तर्हि किमपि महत्कार्यमेव विदध्युः । श्रीगिरीशशुक्ला नूतने वयसि संसारसुखमनुभूय स्वमित्रबान्धवान् परिपोष्य यथाशक्ति समाजसेवां विधाय स्वदारपुत्रादीन् अनाथान् कृत्वा परस्मिन् धाम्नि विलीनाः । यावज्जीवं लोके प्रशंसास्पदमेव भूत्वा शरीरयात्रां निर्वाहितवन्तः । अत एव तेषां जीवितं स्पृहणीयमेव जातम् । तेषां मया सह परिचयस्त्वल्पकालिक एवाभूत् । गतमाघमासे यदाहं काशीस्थविश्वविद्यालयस्याधिकारिभिः प्राच्यविज्ञानविभागेऽध्यापककार्ये नियुक्तस्तदा तैः सह प्रथममेव मे संस्तवो जातः । तदारभ्य ते मम मनसि पूजास्थानमेव प्रापुः । एकाहोऽपि मया तथा न स्मर्यते यस्मिन् तेषां विषयक आदरो लघुर्भूतः । प्रत्युत दैनंदिनं वृद्धिमेवाभजत । तेषामृजुस्वभाव आकृत्यनुकूल एवासीत् । तेषां स्मितालापो मोहकं वदनं, मधुरा वाणी, दैवी संपत्परिपोषकमभिमानराहित्यं सर्वमेव स्पृहणीयमभवत् । अहहातीव कष्टतरमिदं यदस्मिन्संसारे एवंविधैः सह परिचयोभूत्वाऽचिरादेव वियोगावस्थाऽनुभूयते । निर्घृणः काल इति सत्यमेव, परं सोऽपि स्वार्थसाधनपटुः किमपि रमणीयं वस्तु स्ववशं कर्तुं प्रयतते !! विनश्वरं कलेवरमिति सैर्वैरेव ज्ञायते । किन्तु तेनानश्वरं किमपि कर्तुं कतिपयेषामेव प्रयासः । अस्यां श्रेण्यां गिरीशशुक्लाः पदं कुर्वन्ति, अतो भगवतो विश्वनाथस्य सविधेऽभ्यर्थनेयं यद्भवदिच्छया तेषां कौटुम्बिको जनोऽसहायो जातः । अतस्तद्विषयिकी चिन्ता गिरीशशुक्लानां मनसो निराकृत्य भवद्भिरेव वोढव्येति शम् ।

शोकोच्छ्वासः ।

श्रुत्वा गिरीशस्य गिरीशलोके,
प्रयाणमाकस्मिकमद्य लोकात् ।
विदीर्य्यते हृत्परमत्र कुर्म्मः,
किं क्रूरकालस्य विचेष्टितेषु ॥

यदाननान्निःसृतवाग्विलासं,
निसर्गमाधुर्य्यरसानुलिप्तम् ।
सर्वास्ववस्थास्वमृतायमान-
माकर्ण्य केषां चकितं न चेतः ॥

गीर्वाणवागुन्नतिहेतुभूतं,
सम्मेलनं यन्नवमं बुधानाम् ।
जातं पुरा कर्णपुरे तदैवा-
ऽस्माकं गिरीशेन समागमोऽभूत् ॥

महात्मनस्तस्य तदावलोक्य,
गुणानुरक्तिं सुरवाणि भक्तिम् ।

बुधस्वभावोचितसौम्यमूर्त्तिं
नानाविधाशाङ्कुरितं मनोऽभूत् ॥

श्रुत्वा तं सहसा पुरन्दरसभासभ्यीभवन्तं शुचा,
क्रान्तं बन्धुजनं विहाय सकलं याचे विभुं शङ्करम् ।
धैर्य्योत्सारितशोकमोहविषया तत्सन्ततिः सन्ततं,
कल्याणे पथि संगता यितनुताच्छुभ्रं तदीयं यशः ॥

कविरत्ननारायणप्रसादद्विवेदी ।

शोकाश्रु ।

ले०—महेशानन्द ओझा न्याय-शास्त्री,

सृजति तावदशेषगुणाकरं,
पुरुषरत्नमलङ्करणं भुवः ।
तदपि तत्क्षणभङ्गु करोति चेत्,
अहह ! कष्टमपण्डितता विधेः ॥

अयिभोः संस्कृतभाषानुरागिणः सहृदयाः !! सहसैवेदमावेदयितुं भवतां पुरः न पार्यते, यन्मम गुरुचरणा नश्वरं जगद् विहाय दिवं गता इति शिथिलान्यङ्गानि, केनापि क्रूरेण भावेन नियम्यमानेव लेखनी न निबन्धुं शक्नोति । अस्य मासस्य प्रथमायां तारिकायां लवपुरादागत्याहं कस्यचित्सकाशादिदानीं काशीस्थविद्वन्मण्डलीमण्डनायमानाः पण्डितप्रकाण्डाः संस्कृतसमाज-साहित्यसेवासंलग्नमानसाः शिक्षैकपक्षपातिनः प्राक्तनाऽधुनिकशिक्षकेषु आदर्शभूता न्यायतन्त्रस्वतन्त्रास्तव गुरुचरणकमलाः श्रद्धेयश्रीगिरीशशुक्ला न्यायाचार्यपदालङ्कृता मान्या असारमापातरमणीयं संसारं चिराय परिहाय स्वकीयं बन्धुवर्गं शिष्यसमुदायं शोकाब्धौ निक्षिप्य संस्कृतज्ञेषु घृणामुत्पाद्य देववाणीमिमां मूर्च्छन्तीमवज्ञाय स्वर्गं गता इति वज्रपातसन्निभं वचनं श्रुत्वाऽहमतिव्यलपम् । सहसैव च नाहं तत्थ्येनेदमनभ्राशनिपाताकारं धृतात्तं स्वीचकार; किन्तु यदा तेषां गृहे गत्वा बालकानामतिकरुणं रोदनमश्रौषन्तदा ममाङ्गानि चेतनारहितानीवाभूवन् । कस्मादयमत्यल्पीयसि वयसि अस्माकं संस्कृतज्ञानां शिरोरत्नं करालोऽयं कालोऽपजहारेति चिन्तानलसंतप्त एवास्ते ममात्मा । किं संस्कृतस्यैवैतादृशानि भागधेयानि सन्ति यद्यः कोऽपि देववाणीमिमामुन्नतिपथं प्रापयितुं यतते स एव क्रूरेण यमेन स्वकीयं स्थानं नीयते इति कस्य वा नाम सचेतसश्चेतो दूयेत । संस्कृतच्छात्राणां विशेषतो विश्वविद्यालयीय-विद्यार्थिनामस्माकं विदीर्णान्तेऽन्तःकरणानि न शक्नुमो वयं तस्य साधोः गुणान् गणयितुमिति । नाद्यापि प्रत्ययं करोति मनो यत्सत्यमस्मत्तः पृथग्भूता गुरव इति । हा हन्त ? करुणारहितविधे ! सफलो भव । इदानीं कृतं करणीयं त्वया । हा ! सत्य, कुत्रेदानीं तव वसतिर्भविष्यति ! हा न्यायतन्त्र ! कस्य पार्श्वे स्थास्यति भवानधुना ! गुरुवर्या ! नेदं साधु भवद्भिरनुष्ठितं यत्सहसैव स्वर्गमनमकारि भवद्भिः । अहं पञ्चनदप्रान्तस्थ-शास्त्रिपरीक्षां दत्वा तेषां पार्श्वे न्यायकन्दलीसहितप्रशस्तपादभाष्यमपठम् । कीदृशी तेषां पाठनशैली आसीदिति केनोपमिनोमीदानीम् । हा ! कथमतिदुर्बोधानपि ग्रन्थानतिसरलां सरणिमनुसृत्यास्मान् बोधयन्तिस्म ते । कीदृशो मधुरिमा कीदृशी-आकृतिः प्रतिक्षणं परिहासोन्मुखी वार्ता तेषां लक्ष्यतेस्म । तेषां महानुभावानां चरित्रं स्मारं स्मारं तेषां परि

वारस्य अतिकरुणं परिदेवनं श्रावं श्रावं तस्य चातीव दीनां दशां दर्शं दर्शं गुरुवर्यस्य चरणकमलेषु निवापाञ्जलिमयीमिवाश्रुधारां जहामि। अथ च प्रार्थयामि विश्वेशं काशीपुरपतिं यदस्माकं गुरोरात्मा येन प्रकारेण स्वर्गादपि अधिकं सुखमाप्नुयात्तथा भगवन्! दयाशीलेन त्वया यतनीयमिति। तेषां बन्धुवर्गोऽपि यथा शान्तात्मा स्यात्तदर्थमपि उमापतिं प्रार्थयाम्यहम् ।

शोकोद्गारः ।

निर्दयत्वमवलम्ब्य कुटुम्बं
　दुःखसागरनिमग्नमनाथम् ।
संविहाय कथमद्य गिरीश !
　हा ! गतोऽसि परलोकमितस्त्वम् ॥
त्वां विना तव कुटुम्ब इदानीं
　सर्वथा किल विषीदति रौति ।
स्वर्गतस्सुखमलौकिकमुच्चैः
　प्राप्य तं किमिति न स्मरसि त्वम् ॥
नो दया हृदि तवास्ति किमद्य
　यच्छृणोषि न कुटुम्बविलापम् ।
सा भवद्धृदयकोमलता हा !
　काऽगमद्वद सखेऽसुखदायिन् ॥

—श्रीदेवीप्रसादशुक्लः कविचक्रवर्ती
(महामहोपाध्यायः)

सुरगिरो दुर्भाग्यम् ।

[ले०—श्रीयज्ञनारायण उपाध्यायः एम्० ए०]

आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखम् ।

न्यायाचार्यगिरीशशर्ममहाशयानामसामयिकमृत्युवशादुत्पन्नाया वाराणसीविदुषां क्षतेः पूर्त्तिर्न स्वल्पेन कालेन कथमपि सम्भाव्यते। न केवलं गिरीशो गीर्वाणवाण्याः पारदृश्वा अपि तु सच्चरित्रः सदाचारसंपन्नः शुचिशीलश्चासीत्। इदं तु विशेषतः शोकावहं यद्द देशस्य तदीयपरिपक्वानुभवमहिम्ना विविधमनोरथसाफल्याङ्कुरे जाग्रत्येव स यौवनारम्भ एव करालकालेन अकस्मात् कवलीकृतः। अस्य पूर्वपुरुषाः रीवाँराज्ये मनिगवाँ—वसतौ अवसन्। पितृव्यश्चास्य शैवध्वजशर्मा वैदिकपुङ्गवः सहास्य पित्रा समागत्य काश्यां महतीं ख्यातिमवाप। बाल्य एव पित्रा विहीनस्यास्य पितृव्येणैव स्नेहानुबन्धाद्द विद्यासंस्काराः प्रावर्ध्यन्त। गुरवश्चास्य काशिकराजकीयपाठशालायां (गवर्नमेन्ट-संस्कृत-कालेज) न्यायशास्त्राध्यापकाः श्रीजीवनाथशर्ममिश्रा अस्य प्रतिभासम्पत्त्या भृशमतुष्यन्। अचिरादेव च न्यायाचार्यपरीक्षामुत्तीर्णस्य तस्य कतिपयप्रतिष्ठितपाठशालास्वध्यापयतश्छात्रा दश दिशः प्रसृताः। विश्रुतकीर्तिरेष विनयबहुलो भारतभूषण पं० मदनमोहनमालवीयमहानुभावैः प्रसह्य हिन्दूविश्वविद्यालयेऽध्यापकपदेऽधिरोपितो देशस्य संस्कृतविद्याया वा दुर्दैवाद्द वर्षमात्रेणैव कलेवरं पाञ्चभौतिकमजहात्। अयं च वृद्धमात्रे पत्न्यै अत्यल्पवयःकुमाराभ्यां कन्याचतुष्टयाय च ऋणमन्तरा न किञ्चिदपि

दत्त्वा अगच्छत् । अस्य च सर्व एव कुटुम्बिनो महतां दयापात्राण्येव । विश्वेश्वरश्चास्य परलोकं गतस्य सुखशान्तिं, कुटुम्बायास्य सुहृद्भ्यश्च धैर्यं दद्यात् ।

संन्यासिनो रुदितम् ।

[श्रीयोगीन्द्रस्वामी, वीकानेरस्थः]

ग्रन्थान्प्रणेष्यति लिखिष्यति सुप्रभातं
विद्वत्समाजमपि नेष्यति संघशक्तिम् ।
एवं विचिन्तयति संस्कृतभाषिलोके
कालो गिरीशमहहा ! कवलीचकार ॥ १ ॥

उत्साहयन्ति सुखयन्ति सुधारयन्ति
विश्वासयन्ति मधुरं वचनं वदन्ति ।
साहाय्यमाददति पौरुषमावहन्ति
हंहो ! भवादृशबुधा भुवि नात्र सन्ति ॥ २ ॥

हा ! हन्त !! अयि गिरीशाङ्कसंपादकमहोदयाः ! पञ्चमवर्षस्य नवमाङ्के श्रीमन्माननीयपण्डित-गिरीशशुक्लन्यायाचार्यमहोदयानामकाल एव निर्वाणपदप्राप्तिसमाचारमवलोक्य नितरां विदीर्णहृदयोऽस्मि । विस्मृतं कर्तव्यं, न जानामि वक्तव्यं लेखनीयं वा ।

येन हि मातृ-पितृ-स्वजनादिकृतेऽपि न रुदितं, तेन संन्यासिनापि मया तत्कृते तु बालवत्तदेव कृतम् । प्रेम्णो विचित्रा गतिः । अथवा—

मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः ।
उत्पद्यन्ते त्रयः पक्षाः मित्रोदासीनशत्रवः ॥

पूर्वमयं जनस्तेषां प्रियच्छात्रतामगमत् । काश्यां यथा स्नेहेन पुत्रवत् मित्रवद्वा तैरयं पाठितो न तथाऽन्यैः । न्याय-वेदान्तदर्शनादि पाठयद्भिस्तैरस्य जीवस्य यद्बहु उपकृतमस्ति, यावज्जीवनं न कदापि तद्विस्मृतिपथं यास्यति । न तेषामुपकारस्य प्रत्युपकारं पश्यामि, येन मे आनृण्यं स्यात् । न केवलं ते पाठका एव, अपि तु पाठनसमये पाठकाः, आपदवसरे प्रियमित्राणि इव सदुपदेशपुरःसरं धैर्योत्साहप्रदायकाः सुखदपथप्रदर्शकाश्चासन् । निःस्वार्थता, लोभविहीनता, परोपकारपरायणता, प्रियवक्तृतादयस्तु तेषां सहजा गुणाः सन्ति स्म । न जातु चित्ते छात्राणां दुःखदशां हतोत्साहतां चावलोकयितुमपि सेहिरे । बहुशो मया दृष्टमासीद् यत्तै र्यथाशक्ति द्रव्यप्रदानेनापि दीनाः छात्रा भृशमुपकृताः । इदानीं तेषां दीनं कुलं भगवान् दीनबन्धु र्ध्रुवं रक्षतु ।

तेषां पण्डितवराणां गुणेषु सर्वश्रेष्ठोऽयं गुणो वरीवर्तिस्म यच्छ्रीविश्वेश्वरस्य नगर्यां समस्तवाराणस्यां त एव सर्वाधिकाः संन्यासिच्छात्राणां प्रियप्राणा बभूवुः । त इव न कोपि प्रेम्णा भक्त्या श्रद्धया वा तान् अपाठयत् । अयं सर्वो मामको नैजोऽनुभवो मया प्रकाश्यते, न श्रुतमात्रः कल्पितो वा ।

किं बहुना, तेषामुपकारपरम्परा गुणगणांश्च स्मारं स्मारं भृशं खिद्यते मे चेतः । किं करोमि । दैवी विचित्रा गतिः । अत्र विषये सैव प्रमाणं प्रभ्वी च ।

न चेह जीवितः कश्चित्कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ।

इदानीं संन्यासिबन्धूनां वाचस्पतीनां तेषां प्राणेभ्यः सद्गतिं, तद्गृहगतानां प्राणिनां हृदयेभ्यः शोकसहनशक्तिं शान्तिं च परमपिता परमेश्वरोऽवश्यं दास्यतीति दृढो मे विश्वासः ।

गिरीशस्मृतयः ।

[ले०—श्रीकेदारनाथशर्मा सारस्वतः ।]

सृजति तावदशेषगुणाकरं पुरुषरत्न-मलङ्करणं भुवः ।
तदनु तत्क्षणभङ्गि करोति चेदहह! कष्टमपण्डितता विधेः
(फल्गुहस्तिनी)

पञ्च वर्षाणि व्यतीतानि, यदा वयं द्वित्राः सुहृदः समेत्य, संस्कृत-साहित्यस्य संस्कृत-समाजस्य च भीषणां दुरवस्थामालोच्य कमप्युपायं चिन्तयन्तः संस्कृत-साहित्य-समाज-संस्थापनाय काशीस्थ-विदुषां साहाय्यं प्रार्थितवन्तः । हन्त ! न विस्मरामि तं दिवसं, यस्मिन् विश्वाराध्य-रङ्गमञ्चे समाज-संस्थापनावसरे सर्वप्रथममेकेनैव वीरेण समुद्घोषितम्, यदहमस्य समाजस्य सदस्यतां ग्रहीष्यामि यथावसरं कार्यञ्च करिष्यामीति । यद्यपि नासीदस्माकमाशा, यदयं नैयायिक-प्रवरः समय-कष्ट-परिश्रम-साध्येऽस्मिन् कठिने कार्येऽस्माकमुचितं साहाय्यं सम्पादयितुं प्रभविष्यतीति । को जानातिस्म, यदयं प्रखरप्रतिभा-सम्पन्नो मार्मिक-तत्त्वदर्शी विद्वान् न केवलं साहाय्यमेवाचरिष्यति; परमस्माकमपि नेतृत्वं कुर्वन् चिरसुप्ते विद्वत्समाजे सफलां क्रान्तिमुत्पादयिष्यतीति । स च वीरः शास्त्रतत्त्वदर्शी गिरीश-महोदयोऽकाण्ड एव पश्यतामेवास्माकं केवलं कीर्तिकलेवरेणैवातिष्ठत् इति नास्माकं हृदये सुदृढं संलग्नः शोक-शङ्कुरयमाजीवनमस्मान् प्रतोदयिष्यतीति नास्माभिर्निवेदयितुं प्रभूयत इति जानन्त्येव सुहृदः सुप्रभात-पाठकाः ।

कियद्दिवसानन्तरं समाजस्य कार्येषु दत्तचित्तास्ते अपरिचितानामप्यस्माकमुत्साहवर्धनाय सुप्रभात-प्रकाशनार्थं धनसाहाय्यं लेखादिसाहाय्यञ्च कृत्वाऽस्माकमुत्साहमवर्धयन् । द्वितीयमासानन्तरं कार्यालयाभावादव्यवस्थिते सुप्रभाते भारत-धर्ममहामण्डले सुप्रभातकार्यालयोऽगमत् । तदानीं सुप्रभातस्य सम्पादका अस्माकं प्रियसुहृदः श्रीविन्ध्येश्वरीप्रसादशास्त्रिणः, व्यवस्थापकाश्च श्रीमन्तो गिरीशशर्माण आसन् । कार्यालयस्य महामण्डलाक्रान्तत्वात्, महामण्डलीयनीतिं विरुन्धद्भिरस्माभिः समुत्साहिताः श्रीगिरीशमहोदया महामण्डलस्य नातिदूर एव सशुल्कं कार्यालयस्थानं कृत्वा संस्कृत-साहित्य-समाजस्य सुप्रभातस्य च स्वतन्त्रं कार्यालयं स्थापितमकुर्वन् । तदानीं गिरीशमहोदयानामेवोत्साह आसीद्यत्ते निर्धनावस्थायामेव केवलं परिश्रमबलमवलम्ब्य सुप्रभातस्य सञ्चालनव्यवस्थां व्यवास्थापयन् । वयं तु धनाभावान्निरुत्साहसम्पन्ना आस्म, परमिमे श्रद्धेय—प्रयत्नाः प्रातः संन्यासिसंस्कृतमहाविद्यालये सायञ्च सत्यनारायण-महाविद्यालये चाविरतं कठिनतरदर्शनशास्त्रग्रन्थानध्याप्य रात्रौ प्रहरपर्यन्तं सुप्रभातकार्यं कुर्वन्तिस्म । तदानीमासीद्धनाभावः, तथाहि वेतनदानयोग्यताभावात्ते स्वयमेव लेखकस्य

कार्यं कुर्वन्तिस्म । तस्यैव परिश्रमस्य फलभूतं सुप्रभातं साम्प्रतं विजयतेतरां सर्वत्र संस्कृत-संसारे । शनैः शनैः कार्य-प्राचुर्य्यात्, धनाभावस्य सत्वात् च स्वाधिकृते सुंघनीसाहूमन्दिरे निःशुल्कं कार्यालयस्थापनमकुर्वन् । एतस्मिन्नेवावसरे महामण्डलीयानामनुरोधेन सूर्योदयनाम संस्कृतपाक्षिकपत्रं सम्पादयन्तः श्रीविन्ध्येश्वरीप्रसादशास्त्रिणः सुप्रभात-सम्पादनं त्यक्तवन्तः । अवशिष्टेषु त्रिषु कार्यकर्तृषु श्रीमन्तः गोपालशास्त्रिणः, अहञ्च-द्वावपि कार्यान्तरविवशौ गिरीशमहोदयं सम्पादनाय प्रार्थितवन्तौ । कार्येष्वनुद्विग्नमनाः, गम्भीर-प्रकृतिः श्रीमान् गिरीशमहोदयः सोत्साहं सम्पादनकार्यं समचालयत् । वर्षद्वयं यावत् तेन भगवता सम्पादितमिदं सुप्रभातं महतीं समुन्नतिं समधिगच्छत् स्थिरतामवापत् । तदनु च मया गृहीते सुप्रभात-सम्पादनभारे पुनस्ते विविधकार्यव्यापृता अपि व्यवस्थाभारमाजीवनं कुर्वन्तः समाजं सुप्रभातञ्च सम्यक् सञ्चालयन्त आसन् । तस्मिन् कालेऽस्माभिः सामाजिकैर्मध्ये मध्ये वारं वारमवकाशो गृहीतः, परन्तैः समाज-संस्थापनादारभ्य यावज्जीवनं न कदापि सुप्रभातकार्यं परित्यक्तम् । हन्त ! तेषां धैर्यम् ।

किं ब्रूमो मन्दभाग्या वयं तेषां गाम्भीर्यं धैर्यञ्च । तेषामाभ्यन्तरसुहृदामप्यस्माकमिदानीं यावत् न विदितचरमासीत् यत् ते ऋणग्रस्ता अपि सन्ति । तेषां कुटुम्बे दश प्राणिन आसन् । आयश्चासीत् पञ्चाशन्मुद्रामासिकमितः । ऋणग्रस्तत्वेऽप्येतावन्तं सुदीर्घं कुटुम्बं परिपालयन्तः केवलं सुरसरस्वती-समाराधनैकतत्परस्तत्रभवान् गिरीशशुक्लः प्रत्यहं प्रशान्त-गम्भीर-भावेन सुप्रभात-कार्यं सञ्चालयन्, संस्कृत-विदुषां छात्राणाञ्च पुरो महान्तमुज्ज्वलमादर्शं स्थापितवान् । ये खलु असन्तुष्टवृत्तयो मात्सर्यमग्ना भाग्यमाक्रोशमाणाः पुरुषकारपरिहीनाः कार्यचौराः संस्कृतविद्वांसश्छात्राश्च कथयन्ति,—'किं कुर्मो, नास्ति समयः'—इत्यादि, ते महापुरुषाः केवलं पौरुषहीना एव । अस्माकमादर्शो विद्वान् तत्रभवान् गिरीशमहोदयः स्वगाम्भीर्येण, सन्तोषेण, धैर्येण च समुन्नतिशिखरमारूढश्चतुर्ष्वेव वत्सरेषु शनैः शनैः समुन्नति-सरणिमनुसरन् संस्कृतज्ञानां पुरस्तात् शिक्षणीयमुदाहरणमुपास्थापयत् । सर्वप्रथमं ब्रह्मविद्यापाठशालायां पञ्चदशमुद्रावेतनेन अष्टादशमुद्रावेतनेन वाध्यापयन्तिस्म । एकवर्षाभ्यन्तर एव संन्यासिसंस्कृतपाठशालायां समागता इमे विंशतिमुद्रावेतने, सायं सत्यनारायणविद्यालये च त्रिंशन्मुद्रामासिकवेतने च कार्यं कुर्वन्तिस्म । एकवर्षानन्तरमेव नवसंस्थापिते गोयनकामहाविद्यालये चत्वारिंशन्मुद्रामासिके समध्यापयन्त ।

इमे क्रियत्कालानन्तरमेव हिन्दूविश्वविद्यालये पञ्चसप्ततिमुद्रामासिकेनाध्यापयन्तिस्म । वर्षचतुष्टयमेवाविरतं सुरसरस्वतीं समाराधयन् सरस्वतीमातुस्तनयोऽकाल एव कालकवलितः समभूदिति कस्य वा सहृदयस्य हृदयं न विदारयेत् ।

अन्यदपि, गिरीशशर्म्मणामत्यधिकं महत्त्वमिदमासीद्यत्तेषां हृदयं नितरां विशुद्धं रागद्वेष-रहितमासीत् । सत्यपि मतभेदे, सिद्धान्त-विरोधे च न ते कस्यापि माननीयसिद्धान्तमपलपन्तिस्म । 'बुद्धेः

फलमनाग्रहः,' 'विद्याफलं विनीतत्वम्,' इत्येतदुभयं तेषु सर्वथा संगतमासीत् । मनुष्यजीवने यत्किमपि महत्त्वमस्ति तदिदमेव । सत्यं हि नाम तेषु प्राधान्येनासीत् । तत एव च प्रत्यहमुन्नतिपथमधिरोहन्तः सर्वत्र कार्येषु साफल्यं लभमानाः पण्डित-समाजे महतीं सुधारणां, जागर्ति, जीवनश्च सञ्चारयन्तोऽस्माकमादर्शभूताः समभवन् ।

सामाजिककार्येषु मया सह गिरीशशर्म्मणामासीन्महान् सहयोगः, वर्षपञ्चकं यावत् तैः सह महानासीद्घनिष्ठतरः सामाजिक-कार्य-सम्बन्धः, सामाजिक-कार्येष्वावयोर्महासम्बन्धस्य कारणमिदमासीत् यत्, ते कस्यापि कार्यस्योपयोगितां विज्ञायैव तावत् सन्तुष्टा न भवन्तिस्म, यावत्तं विषयं कार्यरूपेण न परिणमयन्तिस्म । सर्वेष्वपि कार्येषु प्रथमं भागभाजस्ते सत्येन प्रबलेन च हृदयेन कार्यक्षेत्रेऽवतरन्तिस्म । तेषां हृदयं नितरां विशुद्धमतएव च वीर्यवदपि समभूत् । वस्तुतस्ते काशीस्थे विद्वत्समाजे रत्नभूता आसन् । तेषां जीवनमादर्शभूतं परम-पावनं प्रशान्त-गम्भीरं विमलं विशुद्धञ्चासीदिति स्वल्प एव वयसि स्वल्पे च काले समुन्नतिक्रममधिरूढास्ते नामतोऽपि गर्वमपहरन्तः सर्वथा-समभावेनैव सर्वान् सम्भावयन्तः सम्मानयन्तश्च सर्वेषां स्नेह-सम्मानास्पदानि समभूवन् ।

तेषां पाण्डित्यमपि प्रथितम्, प्रकृष्टम्, प्रबलञ्चासीत् । नव्यन्यायशास्त्रस्य मार्मिकास्तार्किका अपि प्रकरण-पाण्डित्ये काश्यामसाधारणा एवासन् । न्यायवेदान्त-साङ्ख्य-मीमांसादिदर्शनग्रन्थानामध्यापकाः स्वल्पा एव परिगणनीयाः सन्ति । तेषु प्रथितयशस इमे दार्शनिकप्रवरा न साधारणविद्वांस आसन् । ते न केवलं शुष्कदार्शनिका एव; व्याकरण-साहित्ययोरपि तलस्पर्शिनो विद्वांसोऽभूवन् । सुप्रभातं सम्पादयतां तेषां व्याकरण-साहित्य-पाण्डित्यं प्रत्यक्षमेव सुप्रभात-पाठकानां विदुषाम् । नैतावतैव, ते सुदक्षा मर्मविदः पौराणिकाश्चासन् । पौराणिकी वृत्तिर्हि तेषां परम्परासंप्राप्तैवासीत् । हिन्दीभाषालेखने, पत्रसम्पादनकलायाञ्च निपुणास्ते यन्त्रालयादिकार्येषु व्यावहारिकेषु च महत्त्वपूर्णेषु विषयेषु प्रगाढं पाण्डित्यं परिचयञ्च दधतिस्म ।

दीर्घतरं कुटुम्बं परिपालयन्तः स्वल्प-धना अपि गिरीशशर्म्माणो न कदापि केनापि कुत्रापि व्यथितचेतसो विकलाश्च समालोकिताः । नापि च कदापि तेषां मनसि, वचसि, कर्मणि वा गृहचिन्तया कश्चनापि विघ्नः समुत्पादितः । मुदित-मानसाः, बुद्धिधनाः, सहृदय-शिरोमणयस्ते सर्वदा प्रसन्न-हृदया एवावातिष्ठन्तेत्यपरं महत्त्वमादधाति विषयस्तेषामनुकरणीये जीवने । दुर्लभतराणि हीदृशानि पावनचरितानि महार्हाणि समुज्ज्वलानि भारतीय-विद्वद्रत्नानि । भारतवसुन्धराया दौर्भाग्य-विलसितमेतत्, यत् नहीदृशा महात्मानः सुखिनो दीर्घायुषश्च भवन्तीति । पाश्चात्यपण्डितास्तु प्रायो दीर्घायुषः । परं हतभागधेयेष्वस्मासु भारतीयेषु ब्राह्मणेषु प्रचलत्ययं दुर्विधिविहितो नियमः—

अत्यन्तगुण-मेधावी चतुर्णामेव भाजनम् ।
अल्पायुरनपत्यो वा दरिद्रो वा रुजान्वितः ॥

हन्त ! वयन्तु दैवदुर्विपाकमिममालोक्य किंकर्तव्यविमुग्धमनसो न किमपि वक्तुं पारयामः ।

परं किं ब्रूमः, ! तस्य महात्मनः कैवल्यलाभानन्तरं तदीयस्य कुटुम्बस्य कीदृशी परिस्थितिर्वरीवर्त्तीति तु क्षते क्षारमिव विदारयति चेतः । हन्त !

दूरोल्लासित-सज्जनापदि दृढप्रारब्ध-नीचोन्नतौ ।
यः सर्गे क्षण-दृष्ट-नष्ट-विरसे बद्धादरः सर्वदा ॥
पश्येयं यदि तं क्वचित् सकरुणोपालम्भरूक्षोक्तिभि-
र्लज्जानिष्प्रतिपत्तिमूकवचनं कुर्यामहं वेधसम् ॥

विदीर्णहृच्छोकोच्छ्वासाः ।

(ले०—श्रीदिनेश शर्म्मा)

नाज्ञातमस्ति तत्रभवतां श्रीमतां संस्कृत-साहित्यसमाजोन्नतिपरायणानां देववाणीप्रचारप्रवणानां दत्तसंस्कृताध्ययनचेतसामखिलान्तेवासिनां "सुप्रभात" पाठकानाञ्च यदेको विद्वद्गणधुरीणः संस्कृतसमाजस्तम्भरूपो रूपे सौन्दर्ये वा साक्षान्मदन इव, बुद्धौ बृहस्पतिरिव, नम्रतायां धरेव, कृतौ ब्रह्माणमिव, विद्यायाञ्छङ्कराचार्य इव, तेजसि साक्षाद्गिरीश इव कश्चन "गिरीश"नामधेयो मत्पूज्याङ्घ्रिकमलो निखिलजनध्येयचरितोऽत्युत्कृष्टक्लिष्टग्रन्थान्सरलतयाऽध्यापयन् हिन्दूविश्वविद्यालये छात्रहृदयान्याह्लादयन् न्यायकक्षायां समध्यापितवानासीदिति ।

तत्कीर्तौ गुणप्रकाशने वाऽलमधिकेन, यतो गिरः ईशस्य (गिरीशस्य) गुणव्याख्यानानि केवलया गिरा एव नरः कथं समर्थः स्यात् कथम्वागतः पदं विदध्यात् । यस्य च कीर्तिः कृतिश्च विलसत्येव माधुरी पञ्चलक्षणी-टिप्पणीरूपेण विदुषां दृष्टिगोचर इति । तदीहा सर्वथैवमासीद् यत्कथं संस्कृताध्येतॄणामुन्नतिः, कथम्वा वेद वेदाङ्गदर्शनपुस्तकानां पठनपाठने सुगमता, कथं वा रीत्या देववाणीपाठकानां राष्ट्रे राष्ट्रियकार्ये वा मानं स्यादिति ।

अद्यावधि नाधिकमहो व्यतीतं यत् अधुनैव कालो निजदुष्टताम्मूर्खतां वा प्रकाशयन् पश्यतामेव मादृशानाम्बहुच्छात्राणान्तथान्य क्रियाकुशलचिकित्सकानां विपश्चितां वाग्रत एव त्वरितं गुरुवरप्राणान् हृत्वा पश्यतोहरतां समाप्नुवन् गीर्वाणीमातुरङ्कं क्षणेनैव शून्यञ्चकार । उन्नतिशिखरमारुरुक्षोः पदैकमधस्तलं पदैकमुपरि सोपाने ददतः संस्कृतसाहित्यसमाजस्य विचित्रा दशा संवृत्तेति कष्टम् ।

गिरीशशुक्लमहोदयाः ।

[ले०—अम्बिकाप्रसादशर्मा, व्याकरणाचार्यः] ।

एते काशीस्था न्यायशास्त्रपारंगता न कस्यापि विदुषोऽपरिचिताः । एते सुगृहीतनामधेयाः काशीस्थराजकीयसंस्कृतपाठशालायां श्रीमतां पण्डितप्रवराणां श्रीजीवनाथमिश्राणां सविधे अधीयाना वर्षत्रयमस्माकं सहाध्यायिन आसन् । तत आरभ्य अद्यावधि एतेषामस्माभिः सह परिचय आसीत् । एतेषां हृदयौदार्यम्, निष्पक्षपाता विचारशैलिः, निरभिमानता, न्यायप्रियता, निर्भीकता, प्रगाढं पाण्डित्यमित्यादयोऽनेके गुणा न शक्यन्ते वर्णयितुम् । न कदाप्येभिर्महानुभावैर्लोकरञ्जनाय "मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यदिति" दुष्टपद्धतिराचरणपथमानीता । किन्तु सदैव "मनस्येकं वचस्येकं कर्मण्येकमिति" सज्जनाचरितपथेनैव व्यवहियतेस्म । किमधिकमेषां गुणपरिचयाय पर्या-

प्रमिदं यद्यावधि धार्मिकतायां समधिकोदार-विचारैरप्येभि र्न कस्यापि प्राचीनविदुषो मनागपि द्वेषलेशो दृष्टचरः श्रुतचरो वा । यद्यपि एषामैहलौकिकचरितमपि स्वर्गीयमेवासीत्तथापि स्वर्गगमन-परिश्रमे किमर्थमात्मा उपनीत इति त एव जानन्ति महान्तः ।

गिरीशस्यास्य शुक्लस्य स्वर्गतस्य विहाय नः ।
गुणानां वर्णने शक्ताः कथं स्यामो भुवि स्थिताः ॥
इत्थं चरितं यद्वद्वु विश्रुतं शुचि वर्तते ।
पिष्टपेषणवद् व्यर्थं वर्णनं विदुषां पुरः ॥ इति

स्मरणीयाः समये वयं वयः !

[ले०—श्रीरामप्रसादशुक्लो विद्यार्थी ।]

अहं पण्डितवरस्य श्रीगिरीशशर्म्मणो दर्शनाय तन्मृत्योः अष्टदिनपूर्वमेव प्रतापगढ़ात् काशीं गतः । मामवलोक्य तेनोक्तं-"रामप्रसाद ! अस्माकं स्मरणमस्ति, गतवर्षे वृद्धमङ्गलस्य समये श्रीपं० केदारनाथस्य नौकायां मया सह त्वमपि वर्तसेस्म, तदनन्तरं काश्यां त्वमद्यैवागतः" । पुनरुक्तवान्— "मया दीपनिर्वाणगन्धोऽनुभूयते, प्रज्ञापि चास्माकं पूर्ववदस्ति । संग्रहणीनामके रोगे "युवा जीवति वा न वा" अत्र वा शब्दो वर्तते । अतो ज्ञायते, पुनः स्वस्थो भूत्वा प्रतापगढं गमिष्यामि । यदि इदानीं मम मृत्युर्भविष्यति तर्हि "दीपनिर्वाणगन्धश्च न जिघ्रन्ति गतायुषः" इति श्लोकमनर्गलं त्वं जानीहि । इदानीं कालेऽस्माकमिदमेव महद्दुःखमस्ति यत् कन्याया विवाहो न कृतः, अथच गृहोपरि यदृणं वर्तते तन्न दत्तम् । भयंकरेऽस्मिन् रोगे यद्यप्युपस्थितानां कार्याणां स्मरणं मया न कृतं, तथापि चेतो दूयते । एतदर्थमेव वारं वारं रावलपिण्ड्यां कलकत्तायां, बम्बईनगरे च गमनं कृतं, परन्तु सफलमनोरथो न जातः । प्रत्युत-मोहमय्यामेवानेन प्राणघातकेन रोगेणाहं ग्रस्तः । पञ्चदश-वर्षाभ्यन्तर एव ममोदयो जातः, अस्तोऽपि भविष्यतीति लक्ष्यते ।

"मम जन्म वेणुबाणनवेन्दुमिते विक्रमाब्देऽभूत् । यदा अष्टवर्षस्याहमभूवम्, तदा मम पितुः दुर्गाप्रसादशुक्लस्य मृतिर्जाता ! स्वर्गगतस्य पण्डितशैवध्वजस्य मम पितृव्यस्य संरक्षकतायां मम सम्यक् पालनं पोषणञ्च सम्वृत्तम् । परन्तु अध्ययनस्य काचिदपि व्यवस्था गगनमुनिनवेन्दुवैक्रमाब्दात् पूर्वं न जाता । केनचिन्मित्रेणावबोधितोऽहं गगनमुनिनवेन्दुवैक्रमाब्दस्य चैत्रशुक्लद्वितीयातः काश्या राजकीयप्रधानविद्यालये पण्डितप्रवराणां जीवनाथ-मिश्राणां समीपे न्यायशास्त्रपठनार्थं गतोस्मि । तस्मिन्नेवाब्दे (१६१४ ई०) न्यायमध्यमपरीक्षायामुत्तीर्णो जातः । ततो न्यायशास्त्राचार्यपरीक्षां दत्वा सन्न्यासि-सत्यनारायण-गोयनका-विद्यालयेषु क्रमेण न्याय-वेदान्तादि-विविध-शास्त्राणि छात्रान् पाठयित्वा गत-वर्षे जैनन्यायशास्त्रपाठनार्थं हिन्दू विश्वविद्यालये गतोऽहम्, अद्यैव -श्रूयते हिन्दूविश्वविद्यालये मम नियुक्तिः स्थिरा जाता । परन्तु तत्र पुनः गमिष्यामि न वेति को जानाति ? १६७० वैक्रमाब्दस्य चैत्रमासात १६८५ वैक्रमाब्दस्यायं मार्गशीर्षो मास इति पञ्चदशवर्षाभ्यन्तरे सर्वेषां कामानां सिद्धिःकृता । परन्तु बत कृतं तत्

कविवराः पं० श्रीदेवीप्रसादशुक्लाः, श्रीकेदारनाथ-शर्म्माणः—अन्ये च काशिस्था मे शुभचिन्तकाः, यूयञ्च करिष्यथेत्यस्माकं विश्वासः ।" इत्यादिसकरूणं सम्भाष्य—"स्मरणीयाः समये वयं वयः" इत्युक्तवान् !!

शोकशङ्कुः ।

[ले०—श्रीसरयूप्रसादपाण्डेयः (द्विजेन्द्रः) काव्यतीर्थः]

श्रीमतां पण्डितप्रवराणां न्यायाचार्यगिरीश-शर्मशुक्लमहोदयानां कैवल्याधिगमेन समुत्पद्यमाना संस्कृतज्ञमण्डलस्य महीयसी हानिर्न शक्यते प्रयत्नशतेनाऽपि पूरयितुम् । वाराणसेयं श्रीसंस्कृत-साहित्यसमाजं तदीयमुखपत्रं सुप्रभातं च ते स्वरुधिरैरसिञ्चन्निति नास्ति परोक्षं केषामपि विदुषाम् । तैर्विना समाजः सुप्रभातं च म्लानायमाने न सुषमामाकलयतः । तैः सह मम कथं परिचय इत्यधो निर्दिश्यते—

एकदाऽहं स्वगुरुचरणैः श्रीमद्भिः श्रीगोपाल-शास्त्रि (दर्शनकेसरिभिः) महोदयैः सहानुगच्छन् तत्र गतवान्, यत्र सुप्रभातपत्र-प्रकाशनाभिलाषिणां संस्कृत-साहित्य-समाजसदस्यानां मन्त्रणसमिति-रभूत् । अत्रसुप्रभातप्रकाशनाय संजाते निर्णये-ऽहमपि च्छात्रशुल्केन तद्ग्राहकत्वमुररीकृतवान् । तदैवाऽस्माकं तैः साकं प्रथमं भाषणपूर्वकः परिचयो जातः । सुप्रभातसम्पादनावसरे पत्रव्यव-हारेण तत्परिचयो निरूढिंगतः । तत्पश्चात् यदाहं जयनारायणहाईस्कूलनामधेये विद्यालये अध्यापकत्वेन नियुक्तस्तदैव तेषां मया सह प्रगाढपरिचयः स्नेहाधिक्यञ्चाभूत् । यतस्तेषामेकः सतीशनामा पुत्रस्तद्विद्यालये मम पार्श्वे पठतिस्म । तस्मिन्नेव समये तैः सह वार्त्तालापस्यावसरः सम्प्राप्तः । हा! हन्त ! विधे ! नूनं क्रूरोऽसि ।

यदा तेषां सुमधुरभाषणं, विस्मयकरं स्मितञ्च स्मृतिपथं समागच्छति, तदा विदीर्यते हृदयं, न प्रचलति लेखनी, न दृश्यतेऽश्रुपरिपूरिताभ्यामाभ्यां नयनाभ्यां किञ्चिदपि । वयमिदानीं युवप्राणभूतानामादर्शस्वरूपाणां पण्डितप्रकाण्डानां श्रीगिरीशशुक्लशर्म्मणां न्यायाचार्य्याणां सहसैव दिवङ्गमनेन विदीर्णहृदयाः सञ्जाताः ।

यद्यपि मया बहुत्र बहुधा बहुविधा विद्वांसो दृष्टाः श्रुता अपि, तथापि नेदृशो लोकवेदविदो देशकालमर्मज्ञाः परमोदारचेतसो विद्वांसो दृष्टिगोचरीकृताः । एतेषु महाभागेषु वैलक्षण्यमिदमद्वितीयमासीत्, यत्किल ते न केवलं शास्त्रमर्य्यादामर्म्मज्ञा एव, प्रत्युत यथाकालं लोकमर्य्यादाभिपालका अपि आसन् । तेषां पाठनपद्धतिरनुत्तमा विद्यार्थिनाम् अतीवोपकारिणी मनोहारिणी चासीदिति तद्विदो जानन्त्येव । संस्कृतभाषायां यादृगधिकारस्तेषामासीत्तादृगेव हिन्दी (राष्ट्र) भाषायामपीति नाविदितचरं केषामपि । किं बहुना, साम्प्रतं तदीयवियोगेन नितरां निपीडिता वयं काशीश्वरं प्रार्थयामो यदसौ दयासिन्धुस्तदीयतनुजन्मानौ बुद्धिमन्तौ दीर्घायुषौ च विदध्यात्विति ।

सम्पादकीयम्

नेत्र-निवापाञ्जलयः ।

एकस्य दुःखस्य न यावदन्तं,
गच्छाम्यहं पारमिवार्णवस्य ।
तावत् त्रितीयं समुपस्थितं मे,
छिद्रेष्वनर्था बहुलीभवन्ति ॥

हन्त भोः ! केनेदमवधारितमासीद् यत् प्रियवयस्ये पण्डितगिरीशशर्मशुक्ले न्यायाचार्ये परलोकं गते सुप्रभातस्य गिरीशाङ्को मयैव हतभाग्येन सम्पादितः स्यात् ! काशीमभ्युपेताः पण्डितमण्डलीमण्डनायमाना महामहोपाध्यायशिवदत्तशास्त्रिणो दाधिमथाः संस्कृतसाहित्यसमाजसेवकान् सनिमन्त्रणं सम्भावयितुमिच्छन्तीति सुप्रभातकार्यकर्त्तुर्ब्रह्मचारिणो मदनगोपालस्य मुखादाकर्ण्य प्रसीदता मया पञ्चषदिवसानन्तरमेव तेषामश्राव्यं श्रुत्वा महान् विषादोऽनुभूतः ! तदनन्तरं केषुचिदेव दिनेषु गच्छत्सु पथप्रदर्शकेन सुहृदा गिरीशेनाऽपि हृदये सुदृढं निखातः शोकशङ्कः ! " शोकसंवर्द्धनायैव मयि चैतन्यमर्पितम्, मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः " इति भवभूतेरुक्तिरीषद्व्यत्यासेन मयि संगच्छते ! हा बन्धो गिरीश ! क्व नु त्वादृशस्य साधोः सुहृदः सम्भवः ! भवता विरहितः समाजो न शोभते ! क्रूरकालेन भवन्तमपहृत्य, महामान्यं सभापतिमपि कवलीकृत्य समाजस्य शिरसि दृढमशनिर्निक्षिप्तः ! कर्मकाण्डकुलकमलदिवाकरै महामहोपाध्यायपण्डितप्रवरप्रभुदत्तशास्त्रिभिरपि शिवत्वमासाद्य समाजो विस्मारितः ! महानुभावैरेभिर्यादृशं सर्वविधं संस्कृतसाहित्यसमाजस्य साहाय्यमनुष्ठितं न शक्यते निर्जीवया लेखन्या लिखितुम् । हा "सुप्रभात"! एवं दुःखपरम्परयाऽनेकशो जर्जरीभूतेन त्वया कथं प्राणा धारयिष्यन्ते ? अयि पाठकाः ! शोच्यावस्थामापन्नस्य गिरीशकीर्त्तिभूतस्य सुप्रभातस्यैतस्य जीवनं भवतामधीनम्, रक्षन्तु भवन्त एतत, येन गिरीशात्मा प्रीतः स्यात् । त्वयाऽपि भगवन् गिरीश ! आत्मजेऽत्र सदा दयनीयम् । अस्मिन् सुप्रभातस्य गिरीशाङ्के 'स्तुत्याऽनिर्वचनीयताऽखिलगुरो ! दूरीकृता यन्मया' इति सत्यं ममापराधः । किन्तु क्षन्तव्योऽस्मि । मन्मते तु—

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे ।
सुरतरुवरशाखा-लेखनी, पत्रमुर्वी ॥
लिखति यदि गृहीत्वा शारदा सर्वकालम् ॥
तदपि तव गुणानां नैति पारं गिरीश ! ॥

बाल्यजीवनम् ।

प्रायः षष्ठिहायनानि व्यतियन्ति, यदेको ब्राह्मणपरिवारः शैवः शैवनगरीं वाराणसीं 'रीवाँ'-राज्यतः

३

समागमत् । परिवारस्यैतस्य राज्ञा आसीद् घनिष्ठः सम्पर्कः, परन्तु ब्राह्मणधर्मा परिवारोऽयं वाराणसीनिवासमेव निरतिशयं प्रियं मन्यतेस्म । परिवारेऽत्र पण्डितशैवध्वजशुक्लः पण्डितगङ्गाप्रसादशुक्लश्चेति द्वौ सोदरावास्ताम् । गङ्गाप्रसादशुक्लस्य सन्तानद्वयं—पार्वतीदेवी पुत्री, गिरीशशुक्लः पुत्रश्चेति । गिरीशशुक्लस्य जन्म १९५३ वैक्रमाब्दस्य मार्गशीर्षशुक्लपञ्चम्यां बुधे रात्रौ नववादने काश्यां बभूव । स्वीयसामयिकसुप्रोवरेषु वाराणसेयेषु कर्मकाण्डस्य पारदृश्वनि पण्डिते गङ्गाप्रसादशुक्ले दिवंगते शैवध्वजशर्मैव सन्ततिद्वयस्यैतस्य सम्यक् परिपालनादिकमन्वतिष्ठत् । अन्वर्थनामाऽयं शैवध्वजो निरन्तरवेदाध्ययनमननिदिध्यासनपरायणो नैजं ब्राह्मणोचितं धार्मिकजीवनं यापयन् काशीस्थशैवानां प्रधानाचार्यत्वेन विश्रुत आसीदिति श्रूयते । ब्राह्मणेन वेद एव केवलमध्येयो विज्ञेयश्चेति तन्मतम् । व्यास-वरूद-निषाद-प्रणीता ग्रन्था ब्राह्मणेन न स्पर्शनीया इति तत्सिद्धान्तः । श्रुत्यर्थावगतिहेतवे व्याकरणस्य अष्टाध्यायी-भाष्यमात्रस्याध्ययने तस्य श्रद्धा । ब्राह्मणेन प्रतिदिनं केचन वैदिका मन्त्रा नूनं लिखितव्या इति तदीयो विश्वासेस्म विश्वासः । साम्प्रतमपि गिरीशगृहे तेन निजहस्तलिखिता वैदिकग्रन्था निभाल्यन्ते । "न शूद्रसमाः स्त्रियः" "तस्मात् छन्दसा स्त्रियः संस्कार्याः" "न हि शूद्रयोनौ ब्राह्मणक्षत्रियवैश्या जायन्ते" इत्यादि हारीतधर्मसूत्रप्रामाण्येन द्विजस्त्रिभिरपि वेदोऽध्येय इति तस्य दृढीयसी धारणा । सोऽयं स्वकीयसिद्धान्तानुरूपं कौमार एव वयसि देव्या पार्वत्या गिरीशेन च समग्रां शुक्लयजुर्वेदसंहितां मुखस्थामकारयत् । शैवध्वजप्रयत्नतो गिरीशशुक्लेन बाल्यकाल एव संहिता-शतपथ-ब्राह्मणादयो वेदग्रन्थाः, अमरकोषः, अष्टाध्यायी च कण्ठस्थीकृताः ।

किशोरावस्था ।

हिन्दीभाषायाः सुप्रसिद्धकवेः सुगृहीतनामधेयस्य श्रीजयशङ्करप्रसादस्य पूर्वपुरुषाः स्वर्गीयश्रीदेवीप्रसादादयः शैवाः शैवध्वजशर्माणं सुतरां श्रद्दधतेस्म । एतेषां परिवारः सुँघनीसाहुनाम्ना काश्यां प्रसिद्धः । स्वर्गीयदेवीप्रसादमहोदयेन शैवध्वजशुक्लतो दीक्षाऽपि गृहीताऽऽसीत् । हौजकटोरास्थिते सुँघनीसाहु-शिवालये गिरीशमध्यापयन् शैवध्वजो निवसन्नभूत् । एष श्रुतिव्यतिरिक्तं किमपि शास्त्रमध्येतुं गिरीशं न न्यदिशत् ! परन्तु गिरीशमहोदयस्य मनसि व्याकरणटीकाग्रन्थानां दार्शनिकपुस्तकानां चाध्ययने बलवती समीहा समुत्पेदे । शैवध्वजभयेन गुप्तरूपेणैव निजाभिलषितग्रन्थान् गिरीशमहोदयः पठितुमारेभे । एकदा करकलितसिद्धान्तकौमुदीन्यायमुक्तावलीप्रभृतिपुस्तकं गिरीशमालोक्य शैवध्वजः परं चुकोप, तं च बहिष्कर्त्तुमियेष । किन्तु श्रीजयशङ्करप्रसादमहोदयस्य शान्त्वनया, वर्त्तमानसंस्कृतशिक्षासरणिसमुपयोगितावर्णनेन च शैवध्वजः कथं कथमपि विरराम । तदा प्रभृति तस्य निर्बाधमध्ययनं प्राचलत् । अनन्तरं हि गिरीशशुक्लमहोदयः साहित्यव्याकरणदर्शनादीनां सपरिश्रममध्ययनेन परं प्राविण्यं प्राप्नुवन् वाराणसेयपण्डितप्रकाण्डेषु गण्यमान्यो भूत्वा ब्रह्मविद्या-संन्यासि-सत्यनारायणविद्यालयेषु, काशी-हिन्दुविश्वविद्यालये च रूंख्यातीतानन्तेवासिनोऽध्यापयन् १९८५ वैक्रमाब्दे मार्ग-

शीर्षपूर्णिमायां प्रातरष्टवादने निःश्रेयसमधिगतवान् इति जानन्त्येवैतत्संख्यासमुदिततत्तन्निबन्धनिबद्धनिबन्धैः पाठकमहानुभावा इत्यलं तन्निवेदनेन ।

गिरीश-कोषः ।

रीवाँराज्यात् सर्वस्वं विहाय काशीमुपढौकमानेनाऽकिञ्चनेन पित्रा विरहितस्य शुक्लमहोदस्य बाल्यकालत एवार्थकष्टमासीत् । तदीयपितृव्ये शैवस्वर्गेऽपि परलोकमलङ्कृतवति सर्वोऽपि कुटुम्बपरिपालनभारः शुक्लमहोदयस्यैव शिरसि समापतितः । कुटुम्बे तस्य जननी, गृहिणी, द्वौ तनूजौ, चतस्रः कन्याः, एकः सम्बन्धीयः, स्वयं चेति दश प्राणिनः । आगन्तुकानां कथा तु दूरे तिष्ठति । व्ययश्च वाराणसेयः । शुक्लोऽपि व्यये महानुदारः । तथाऽपि तेन स्वयमर्जयित्वैव स्वकुटुम्बस्य पालनपोषणादिकमनुष्ठितम् । षड् वर्षाणि, कियन्तो मासाश्च व्यतिगच्छन्ति, तेन सशुल्के परगृहे निवासो न साधुरिति मत्वा काशी-टेढ़ीनीमस्थात् श्रीलक्ष्मणशास्त्रिणो वैद्यात् षोडशशतरूप्यकानि प्रतिशतमेकमुद्रामासिककुसीदेन ऋणमादाय क्रीत आलय एकः । एकोननवत्यधिकनवशतमुद्राः कुसीदरूपेण शुक्लमहोदयेन स्वयमर्पिताः । एतदृणव्यतिरिक्तं षट्शतमुद्रामितं प्रकीर्णकम् ऋणमपि तेन मासषट्कं रोगग्रहग्रस्तेन नैजचिकित्सार्थं कृतमास्ते । चतस्रः कुमार्यः सन्ति । तास्वेका विवाहयोग्या । एतस्या विवाहे सहस्रसहस्रव्ययानुमानम् । इयद्व्ययमन्तरेण सरयूपारीणब्राह्मणसाम्प्रतिकपरिस्थितेरवलोकनेनेयं कष्टां दशामायेत । अध्यापनीयौ द्वौ कुमारौ । एतावतो महतः कुटुम्बस्य काश्यां परिपालनमिति सर्वमवधार्य शुक्लसुहृद्भिरेको 'गिरीश-कोषः' संस्थापितः । फाल्गुनकृष्णप्रतिपदं यावत् गिरीश कोषे १६३०॥।≡)। मितद्रव्यस्य आयोऽभूत् । तत्र शुक्लमहोदयस्य श्राद्धे ६३॥।=) द्रव्याणि व्ययीभूतानि । (श्राद्धदिवसेऽनुमानतः पञ्चाशन्मुद्राणां तानि तानि भोज्यवस्तूनि शुभचिन्तकगेहेभ्यः समागतानि, तान्यपि श्राद्धे व्ययितानि) २≡) प्रकीर्णको व्ययः । ११२५) मुद्रा गृहार्णदात्रे श्रीलक्ष्मणशास्त्रिणे प्रदत्ताः । सम्प्रति ४०६॥।=)। गिरीशकोषे तिष्ठति । ६५-)॥। द्रव्ये समागते गृहार्णं निःशेषं स्यात् । षण्मासाभ्यन्तर एव सर्वमपि ऋणं दास्यत इति प्रतिज्ञापूर्वकं प्रार्थनया गृहार्णदेन कुसीदस्य २५६) मुद्राः कृपया परित्यक्ता इति तस्मै शतशः साधुवादा दीयन्ते । श्रीदेवीप्रसादशुक्ल-श्रीरघुवीरत्रिपाठिवैद्य-श्रीयज्ञनारायणोपाध्याय—श्रीराजनारायणशर्म—श्रीरामव्यासपाण्डेयानां परिश्रमोदर्कभूतो गिरीशकोषस्य उपर्युक्तरूप्यककलाप इति पाठकैरवधेयम् । निष्किञ्चनैश्छात्रैर्विद्वद्भिश्च वाराणसेयैरेवैतानि रूप्यकाणि दत्तानीति न विस्मर्त्तव्यम् । सम्प्रति बहिःस्थानामवसर आयातः । अयि भोः ! बहिस्थाः संस्कृतसेवकाः ! मातुः संस्कृतसरस्वत्या अविरतसेवायामेवोत्सर्गीकृतजीवनस्य शुक्लमहोदयस्य पारिवारिककार्यकलापसम्पादनार्थं संस्थापिते गिरीशकोषे श्रीमन्तस्तादृशं साहाय्यमाचरन्तु येन दुःखपङ्कमग्नो ब्राह्मणपरिवारः समुद्धृतः स्यात् । नाधिकं भवत्सु निवेदन् । भवतां कार्यं, भवन्तो जानन्तु । साहाय्यदातृभिः "महामहोपाध्याय श्रीदेवीप्रसादशुक्लः, सुप्रभात- कार्यलयः, काशी" इति संकेतेन द्रव्यं प्रेषणीयम् ।

संस्कृत-समाचाराः

प्रहितपत्राणि शोकाञ्जलयश्च ।

सम्पादकमहोदयाः !

पण्डितप्रवरन्यायाचार्यगिरीशशुक्लमहोदयानां मार्गशीर्षपूर्णिमायां दिनेऽष्टवादनसमये पाञ्चभौतिकनश्वरकलेवरपरित्यागपूर्वकं निःश्रेयसलाभेन पौषकृष्णप्रतिपदि विश्वनाथमन्दिरसन्निधाने काशीस्थविदुषां महती शोकसभा समभूत्। पौषशुक्लाष्टम्यां टाउनहाले शुक्लमहानुभावानां, महामहोपाध्यायप्रभुदत्तशास्त्रिणां च कैवल्याधिगमेन महामहोपाध्याय—श्रीप्रमथनाथभट्टाचार्याणां सभापतित्वे संस्कृतसाहित्यसमाजस्य शोकाधिवेशनमभूत् । तदनु द्वितीयदिने तत्रैव काशीविद्वत्परिषदाऽपि नैजं शोकाधिवेशनमनुष्ठितम् । हिन्दुविश्वविद्यालये, वाराणसेयेषु वहिस्स्थेषु च वहुषु विद्यालयेषु शुक्लमहोदयस्य कृते वहवः शोकसभाः समपद्यन्तेति ।

काशी
१२-२-२८ } आश्रवः—
श्रीमदनगोपालशर्मा

सम्पादकमहोदयाः !

पौषकृष्णतृतीयायां शनिवासरे श्रीशङ्करनाथमहाविद्यालयीयाया वाग्वर्धिन्याः कुमारसभाया एकं शोकाधिवेशनं श्रीपूज्यपादानां श्रीगिरीशशुक्लन्यायाचार्याणां मृत्युसमाचारं ज्ञात्वा महाविद्यालये संजातम्, यत्र कुमारसभायाः सर्वे सदस्या अधिकारिणो महाविद्यालयीया अध्यापकाश्च उपस्थिता आसन् । सर्वसम्मत्या श्रीपं० रामद[...] शास्त्रिभिः शोकप्रस्तावः पठितः । तथाहि—

श्रीशङ्करनाथमहाविद्यालयीया वाग्वर्धि[...] कुमारसभा श्रीमतां पं० हुकुमचन्द्रशास्त्रिणां (श्रीगि)रीशशुक्लमहोदयशिष्याणां) साभापत्ये, प्रातःस्म[र]णीयानां श्रीगिरीशशुक्लमहोदयानां लोकान्तरगम[नवृत्ता]न्तं श्रुत्वा, तेषां महात्मनां गुणसम्भारान् स्मारं स्म[ारं स]न्दोदूयमानहृदया भृशं शोकं प्रकाशयन्ती लोका[न्तरे] तेषां भव्यं भावयेद्भगवान् काशीशो विश्वनाथ[...] भृशमानतेन शिरसाभिलषति । तच्छोकसंतप्[...] परिवारेण सह समवेदनां प्रकाशयन्ती च तत्परिवा[र...] शोकशमनाय तमेव भगवन्तं प्रार्थयते । एतन्म[...] शोकनिमित्तकोऽवकाशश्च समजनि ।

कपूंरस्थल-राज्यम्
१५ पौषे, सं० १९८५ { निवेदकः—
किशोरीलालजोशी

माननीयाः सम्पादकमहानुभावाः !

गुरुवर्याणां श्रीमतां पण्डितप्रवरन्यायाचा[र्य]गिरीशशुक्लशर्म्मणामसामयिकपरलोकगमनेन [...]मनाथा दीना अन्तेवासिनो दुःखदावाग्निद[...] किंकर्त्तव्यविमूढाश्च सन्तप्ततदीयपरिवारसन्नि[...]

समवेदनां प्रकटयन्तो दयार्द्रचित्तानां गुरुवराणामात्मनः शान्तिमभिलषामः । तेषामस्माकमुपरि यादृशो दयातिशय आसीन्नासौ जन्मशतेनाऽपि विस्मर्तुं शक्यते ।

वाराणसी, १०-२-२९ } श्रीरामसिंहासनशर्मा श्रीगोपालदत्तशर्मा

श्रीमन्तः सम्पादकमहोदयाः !

संस्कृत-साहित्य समाजसंस्थापको महामाननीयः श्रीमदाचार्यः श्रीगिरीशशुक्लमहानुभावः स्वीयं पाञ्चभौतिकं शरीरमुत्सृज्य गिरिजापतेः परमपावनपदवीं जगामेत्यसामयिकं हृदयविदारकं संवादं श्रुत्वा, वयं भृशं दुःखिताः । देशमान्या एते संस्कृतसरस्वत्याः, भगवतस्सनातनधर्मस्य, भारतजनन्याश्च यादृशीं सेवां व्यधुर्न तथा संस्कृत-साहित्यसेवकसमाजे कोऽपीति । वयं तत्पारिवारिकजनानां सन्निधौ सहानुभूतिं प्रकाशयामः ।

अजयगढ़राज्यम् ६-२-२९ } कृपेच्छुः- पौराणिकपीताम्बररावः

माननीयाः ! सम्पादकाः !

नमोऽस्तु । 'सूर्योदय' द्वारा 'सुप्रभात' स्य भूतपूर्वसम्पादकानाम् अधुना च व्यवस्थापकानां पण्डितश्रीगिरीशशुक्लन्यायाचार्य्याणां स्वर्गतिं विज्ञाय अहं महतीं शुचमापन्नोऽस्मि । यद्यपि तैः साकं मम नासीत् साक्षात् परिचयः; तथापि तेषां विद्वत्ताऽऽदिगुणाः, नवयौवनश्च ममाप्यक्षिणी बाष्पाऽऽविले अकार्षुः ! एतेषां स्वर्गमनेन 'सुप्रभाते' सत्यं कुलिशपातोऽजनि । अस्मिन् बृहति शोके सहाऽनुभूतिं विवृण्वन्नहं परमात्मानं तेषां सद्गतिं तत्पारिवारिकेषु च धैर्यं प्रार्थये । 'हा हन्त ! करालकालव्याल ! त्वं कलौ कलिकल्मषकलुषः सन् वैदुष्यप्रत्यर्थी संवृत्तः ।

मुलताननगरम् । २-२-२९ } भवदीयो— दीनानाथशर्मा शास्त्री,

श्रीयुतसम्पादकमहोदयाः !

संस्कृत-साहित्य-समाज-प्राण-विद्वद्दल सहृदय-पं० गिरीशशुक्लन्यायाचार्यमहोदयानामकाण्ड एव निधनसमाचारं पठित्वा महद्दुःखं समभून्मम मनसि । हा ! हन्त ! अकाल एवास्माकं पूज्यन्यायाचार्याणां स्वर्गारोहणं समजनि ! नूनं संस्कृतसरस्वत्या दुर्भाग्यमेतत् । हा ! कोऽधुना गहनन्यायशास्त्रस्य-न्यायकुसुमाञ्जलिप्रभृतिपुस्तकानां सरलां टीकां विधास्यति ? हा ! अनभ्र एव वज्रपातोऽयं कालेन कृतः । न केनाऽपि ज्ञायते कालस्य कुटिला गतिः । श्रीमतां शुक्लमहोदयानां पारिवारिकजनानां सन्निधौ समवेदनां प्रकाशयन्नहं तच्छान्त्यै परमेश्वरं प्रार्थये ।

चूरू, २८-१-२९ } भवदीयः— श्रीवासुदेवशास्त्री ।

श्रीमन्तः सम्पादकाः !

विदेशीयशिक्षादीक्षापिशाचनीप्रबलप्रभावपारतन्त्र्यपाशनिगडितचरणायाः सुरसरस्वत्या नेत्ररत्नभूतानां प्रातःस्मरणीयचरणारविन्दानां संस्कृत-साहित्य-समाजसेवकादर्शभूतानां व्याकरण-साहित्य-कर्मकाण्ड-न्याय-ज्यौतिषशास्त्राध्यापकानां गुरुवराणां श्रीमदाचार्यपादानां श्रीगिरीशशुक्ल-

(अवशिष्टम् आवरणद्वितीयपृष्ठे द्रष्टव्यम्)

Rg N. 1348 A.

अतीत—१९८१-८२-८३-८४ संवत्सराणाम्

सुप्रभातम् ।

प्रथमवर्षस्य—१९८१

शोभनवन्धैः पुस्तकाकृत्या निबद्धम् । मूल्यम्—६) षण्मुद्राः । मार्गव्ययः पृथङ्नास्ति ।

द्वितीयवर्षस्य—१९८२

प्रथमाब्दवदतिमनोहरबन्धबद्धम् । मूल्यम्—५) पञ्चमुद्राः । मार्गव्ययः पृथङ्नास्ति ।

तृतीयवर्षस्य—१९८३

पूर्ववद् बद्धम् । मूल्यम् २॥) सार्द्धमुद्राद्वयम् । मार्गव्ययः पृथक् ।≡) ।

चतुर्थवर्षस्य—१९८४

अतिमनोहरमिदम् निबद्धम् ।

मूल्यम् ३॥) सार्द्धमुद्रात्रयम् । मार्गव्ययः पृथक् ॥)

प्रकीर्णाङ्काः

प्रकीर्णाङ्काः स्वल्पा एव विद्यन्ते । येषाम्पार्श्वे कस्यचनाङ्कस्याभावो भवेत्ते नूनं शीघ्रतां कुर्वन्तु ।

प्रथमवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणक-चतुष्टयम् । अङ्काः—आदर्शः, १, ४, ९, ११, १२,

द्वितीयवर्षस्य—प्रत्येकाङ्कस्य मूल्यम्—≡) आणकत्रयम् । अङ्काः—२, ३, ५, ६, ७, ८, ९ ११, १२ ।

तृतीयवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—=) आण-कद्वयम्, अस्य सर्वेप्यङ्काः सन्ति ।

चतुर्थवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—।) आणक-चतुष्टयम् । अस्य सर्वेप्यङ्काः सन्ति ।

प्रकीर्णाङ्कानां मार्गव्ययो निर्धारितमूल्यतः पृथगेव। जिघृक्षुभिस्त्वरा कार्या । पत्रव्यवहारसङ्केतः-

व्यवस्थापकः—

सुप्रभात-कार्यालयः, काशी

(Benares City)

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौर-फाल्गुने १९८५ वैक्रमाब्दे ।

पञ्चम-वर्षे
Vol. 5

MARCH 1929.

एकादशोऽङ्कः ।
No. 11.

C. M. V. Sharma
Benares City

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिर-ततिमुदस्यद् भेदतारा विलुम्पन्, नयदधि-सुरभाषाभाषि-जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्' ।

निरीक्षकः—

महामहोपाध्याय-श्रीदेवीप्रसादशुक्लः, कविचक्रवर्त्ती, साहित्य-वारिधिः

सम्पादकः—
दर्शनकेसरी श्रीगोपालशास्त्री त्रिपाठी
"साहित्याचार्य्यः"

स० सम्पादकः—
पाण्डेय-श्रीसरयूप्रसादशास्त्री (द्विजेन्द्रः)
"काव्यतीर्थः"

व्यवस्थापकः—
श्रीसत्यनारायणशास्त्री " कविराजः "
(टेढ़ीनीम, बनारस-सिटी)

वार्षिक मूल्यम्—३)
माननीयेभ्यः—१२)
अस्याङ्कस्य मूल्यम् ।)
छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

लेख-सूची ।

गिरीशकोषः—

अद्यावधि अस्मिन् कोषे गृहर्णसंख्यापरिमितमेव द्रव्यमागतमस्ति । अन्येषामुत्तमर्णानामृणानपकरणमन्तरा न गृहविमुक्तिरिति तस्यकृतेऽपि दयालुभिरुदाराशयैर्दानिभिर्यतेलिमम् । पूर्वप्रकाशितद्रव्येभ्योऽतिरीक्तानीमानि द्रव्याणि समागतानि । हिन्दूस्कूलीयाध्यापकमहोदयेभ्यः ४३) इयत्संख्याकन्तु कोषाध्यक्ष-श्रीमदनन्तरामशास्त्रिणां हस्ते सम्प्राप्तमस्ति । इतोऽधिकमेवास्मिन्मासे आगमिष्यतीति सम्भाव्यते । श्रीकाशीविद्यापीठाध्यापकच्छात्रेभ्यः ५१।) सपादैकपञ्चाशद्रूप्यकाणि सनातनधर्मस्कूलप्रभृतिस्थानीयविद्यालयाध्यापका अपि स्व-स्वविद्यालये द्रव्यसञ्चयार्थम्प्रार्थिताः सन्तीति सूचयति—

श्रीरघुवीरशास्त्री 'वैद्यः' (संग्राहकः)

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम् ।

ञ्चम-वर्षे | सौर—फाल्गुने १९८५ वैक्रमाब्दीये | एकादशोऽङ्कः ।

सुप्रभाताशीः

(१)

विश्वाशागत-गद्य-पद्यरचना यस्मिन् समालोडते ।
स्फारे वीचिचये सुगूढविषया यस्याऽऽस्ते शुक्तिवत् ॥
गम्भीरो बहुलेखमौक्तिकमयः प्रज्ञैः प्रसिद्धिं गतः ।
योऽसौ सँस्कृतसंस्कृतो विजयते श्रीसुप्रभातोदधिः ॥

(२)

गुणगणरमणीयं यस्य गम्भीरभावं-
कविकुलमहनीया यस्य कीर्तिः पृथिव्याम् ॥
विविध-विषय-विद्याभूषितो यस्य कायः-
स किल जयतु नित्यं 'सुप्रभातं' पृथिव्याम् ॥

—वासुदेवशर्म्मा द्विवेदी

(भवानी-छापरवास्तव्यः ।)

स्वाध्यायोऽध्येतव्यः

[ले०—श्रीनरदेवशास्त्री, वेदतीर्थः]

(ज्वालापुर-महाविद्यालय-व्यवस्थापकः)

कालमाहात्म्याद्वेदपरः 'स्वाध्याय'—शब्दः सम्प्रति वेदाङ्गानां मध्येऽन्यतमेषु रूढः । स्वाध्यायः स्ववेदोऽध्येतव्यः । अधीयते किमु स्ववेदोऽद्यत्वे भूदेवैः ? स्वाध्यायप्रवणा ब्राह्मणा न सन्तीति नास्माकमभिप्रायः, सन्त्यल्पशो भारतभूमिभूषणभूताः । लोकसंख्यानाद्भारतीये भूभागेऽस्ति ब्राह्मणानां कोटिद्वयीति प्रतीयते । तेषु च जातिमात्रोपजीविनामेवाधिक्यम् । आर्यसाम्राज्याभावात्, सत्त्वत्रियाणां तेजोऽभिभवाच्चैतादृशी दशा संवृत्तेति वयं विजानीमः, परं भारतीयानां पुनरुज्जीवनं सर्वथा ब्राह्मणसादिति किमु वक्तव्यम् ? तच्च पुनरुज्जीवनं केवलं जातिमात्रोपजीविभिर्ब्राह्मणैर्न भवितुं शक्यमिति । यदीदानीमपि ब्राह्मणाः पुरेव विद्यावन्तस्तपस्विनश्चाभविष्यँस्तर्हि नूनं भारतीयजनानां पुनरुज्जीवनमभविष्यद्‌ । भूदेवानां ब्राह्मणानां देहः क्षुद्रकामाय नास्तीति मनुनैव सुस्पष्टं प्रतिपादितम् । तथाहि—

"ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते ।
इह कृच्छ्राय तपसे प्रेत्यानन्तसुखाय च ॥"

द्विजन्मनां विशेषतश्च ब्राह्मणानां वेदाध्ययनमेव परं तपः—

"तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥
वेदमेवाभ्यस्येन्नित्यं तपस्तप्स्यन्द्विजोत्तमः ।
वेदाभ्यासो हि विप्रस्य, तपः परमिहोच्यते ॥"
(मनुः २—१६५-६६)

तच्च तपो भूदेवैर्विस्मृतप्रायम् अत एव तेषां प्रवृत्तिः सदोषा संवृत्ता । ते चाधुना वाचो विग्लापनेन कालं गमयन्ति, स्वयमेव न विदन्ति कर्त्तव्याकर्त्तव्यम्, कथङ्कारं नामाऽन्यान् शास्त्रतत्त्वं बोधयितुं शक्नुवन्ति ? हन्त ! क्व तदुच्चैस्तत्त्वमुपनिषद्वर्णितम् ? तथाहि—

"तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहूञ् शब्दान् वाचो विग्लापनं हि तत् ॥"

क्व चेदानीन्तनी विपन्ना दशा जगद्गुरुब्रुवाणां ब्राह्मणानाम् ? यथाऽन्येषु वेदाङ्गेषु परिश्रमो विधीयत एभिस्तथा कथं न स्वाध्याये-स्ववेदे विधीयते ? वेदोपदेशाय ग्लायन्तो ब्राह्मणा एवास्य पुण्यभूमेरधोगमनस्य मूलम् । यथा सैनिकगतस्य जयाऽपजयस्य सेनापतौ व्यपदेशस्तथैव ब्राह्मणेतरकृतानां पुण्यपापानां ब्राह्मणेष्वेवापदेशो मन्यतामिति । हन्त ! यैस्तपोनिष्ठैर्ब्राह्मणैरद्यावधि कुलपरम्परामनुसृत्य स्वाध्याय-रक्षा कृता, तेऽपि घृतलवण-तैलतण्डुलेन्धन-चिन्तया म्रियमाणाः स्वसन्ततीसाङ्ग्लभाषाऽध्ययने

प्रेरयन्ति, स्कूलेषु कालेजेषु च प्रेषयन्ति, अतः परं किं कष्टम् (!!) महच्च वैचित्र्यं पश्यामः सम्प्रति। आङ्गलविद्यातो विमनीभूताः पौरस्त्यविद्या-अधिजीगांसमानाः सन्ति । पौरस्त्यविद्याभ्यो ग्लायतां च प्रवृत्तिः पाश्चात्यशिक्षादीक्षासु च । सर्वमधरोत्तरमिव, सर्वं संकुलमिव, सर्वं मण्डलं व्याकुलीभूतमिव पश्यामः । जीविकालोभादेव ब्राह्मणाः "पाण्यास्याः" (मनुः) संवृत्ता इतस्ततो हस्तं प्रसारयन्ति स्वतेजोभङ्गञ्चानुतिष्ठन्तीति । महर्षिणा भृगुणा साधूक्तं धर्मतत्त्वं श्रोतुकामान् महर्षीन्प्रति—

"अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥"

अयि मान्याः ब्राह्मणाः !

वेदानामभ्यासो विधेयः, आचारस्य रक्षणं विधेयम्, आलस्यं हेयम्, अन्नदोषस्त्याज्यः—येन पुरेव श्रीमतां धीमतां विद्यावतां पुनरुज्जीवनं भारतभूमेश्च पवित्रतमायाः पुनराश्वासनं स्यादिति भूयो भूयो विनिवेदनम् । के ब्राह्मणाः पारयितुं समर्थाः ? इति प्रश्ने तु—

"ते ब्राह्मणाः पारयितुं समर्थाः" इत्यादि श्रीमद्भागवतोक्तं प्रकरणं द्रष्टव्यमित्येव ब्रूमः, विस्तरभयादत्र नोच्यते। भवतु अद्यात्रैव विरम्यते ।

करुणक्रन्दनम् ।

(वियोगिनीवृत्तम्)

शृणु केशव ! नो दशामिमाम्,
द्रुतमागत्य विभो ! सुरालयात् ।
इह पश्यतु धर्म्मपुङ्गवान्,
व्यभिचारे निरताञ् शठान् हरे ! ।१।

नहि देशहिताय मानवः,
कुरुते कार्य्यमुपाकृते विधौ ।
निजसोदरयोः परस्पर-
मभियुद्धं सततं विलोक्यते ॥२॥

तव भारतपुण्य-भूतले,
द्विज-गो-वृन्दमुपैत्यपक्षयम् ।
करुणामय ! पश्य गोकुलम्,
यवनैःसंकुलवत्सयूथ्यकम् ॥ ३ ॥

अयि माधव ! किं श्रुतन्न ते,
महिलानामतिदैन्य-रोदनम् ।
भुवि शीघ्रतयाऽवतीर्य्यताम्,
धृतचक्रेण हरे ! कृपानिधे ! ॥

—रामप्रसादमिश्रः, विद्यार्थी
(व्रजभूषण-विद्यालयस्थः)

विशेष-विज्ञप्तिः

विदाङ्कुर्वन्तु भवन्तः सुप्रभातलेखका ग्राहकाः पाठकाश्च यत् ये केऽपि सुप्रभाते प्रकाशनार्थं लेखान् कविता वा पेषयन्तु ते सुस्पष्टाक्षरैरेकस्मिन्नेव पृष्ठे लिखित्वेति न विस्मर्तव्यम् । अथ चावश्यकपत्रव्यवहारादावप्येष एव नियमः। तत्र पत्रोत्तरापेक्षायां चिटिकाऽपि नूनमेवप्रेषणीयेति, नान्यथोत्तरलाभः ।

(सं० सम्पादकः)

अश्रु-द्वयम् ।

[लेखकः—रवीन्द्रशास्त्री, भिवानी]

मधुमासे निनिर्गत-" सुप्रभाते " कस्यचिद्विद्यार्थ—महोदयस्य " हिन्दुधर्मान्तर्गताः काश्चित् घातिकाः प्रथाः " इति-शीर्षकं सन्दर्भमुद्वीदय चेतसि मे एतद्विषय एव किञ्चिल्लिखनस्पृहाऽभिव्यक्ता । विद्यार्थिमहोदयस्य दर्शं दर्शं विधेयमेतदुल्लसति मनः । यद्येवमेवान्येऽपि सुलेखका एतदेव लक्ष्यीकृत्य किमपि लिखेयुस्तर्हि महानुपकारः स्यादस्य स्वातन्त्र्यातीतस्य भारतीभारतस्य ।

इदानीं भारतवर्षस्य कीदृग्व्यवस्था इति तु सुविदितमेव सर्वैस्सामयिक-समाचार-पत्र-पाठकैः । कथमनुदिनं मौहम्मदीयाऽत्याचारो वृद्धिमेति, कथञ्च हिन्दुजाती रसातलतोऽपि तलातले परिस्खलति, शक्तिहीनत्वादस्माकं सर्वत्र माङ्गलिककार्येष्वपि कथमत्याचारो यवनानाम्, कथमस्मदीय-रमणीनां परिहरणं तिरस्करणञ्च चर्क्रति यवनाः, कथं वा यत्र तत्र सर्वदैव दण्डादण्डि-केशाकेशि हिन्दु-यवनयोर्युद्धं श्रूयते ! लवपुरादौ तु परीक्षादिस्सुच्छात्राणामपि जीवितेश-निकेतन-गमनमभूदिति स्मारं स्मारं परिदूयते चेतः ! हा हन्त !!

विषयेऽस्मिन्निदानीमधिकतया कारणद्वयमे मुख्यतो दरीदृश्यते । तच्च कथमस्मज्जीवनोच्छे चर्करीत्यत्र प्रथमं तु " बाल-परिणयः " अपरश्च ' वृद्ध-परिणयः ' । अनेनैव कारणद्वयेनास्मा जातिह्रासो बोभूयते । अथ च भृशमेवैतस्य प्रती कारो नो स्यात्तर्ह्यवगन्तव्यमेतत् यत् हिन्दुजाति वसानं गतेवाऽस्ति । यदेतयोः (बाल-वृद्ध-परि णययोः) सहृदय-संस्कृतज्ञावस्थितावपि ' प्रचार धिक्यं वर्वर्त्ति । पुनरपि न कश्चित् समाजशु चिन्तकः किञ्चिद्दु बाभाष्यते । ' बाल-परिणयो ' खलु शास्त्र-स्मृति-प्रतिपादितो न च हिन्दुधर्मा न्तर्गतः । यवनात्याचाराधिक्ये केनचिन्महोदये समाजैशुभाकाङ्क्षया प्रवर्त्तितेयं प्रथा । भगवद् मनुना तु न क्वापि बालपरिणयो बोभूयेतेति स्पष्टी तम्, न काप्यक्षिस्फालनेनापि दृश्यते बाल-परि णयः । बाल्यावस्थायान्त्वपराणि विधेयानि विनि हितानि स्मृतिप्रवर्त्तकैः, परं तानि तु विस्मृतान्य र्वाचीन–कोविद–कदम्बैः । " बाल-परिणयः " इ विषये तु मदीयमपि किञ्चिद्वक्तव्यं वर्त्तते । परि णयशब्देन तावदत्र किमभिव्यज्यत एतत्त्ववगम्य एव शब्दज्ञैः । अथ च, परिणयस्तदैव बोभवि महति यदा न्यूनातिन्यूनं परिणायकः परिणयशब्द वाच्यार्थन्त्वधिगच्छेत् । नो चेत्, कथं परिण कीदृक् परिणयः ? येन वराकेण बालेनैतद्विषये

किञ्चिदपि नावगम्यते तस्यैव परिणयः ? हा, धिक्कष्टम् !! एतत्खलु चित्रमस्मदीय एव भारते दरीदृश्यते (!) एवं सति, कथं बलरक्षणं स्यात्, कथञ्चागामिजीवनं सुखकारकं सम्भवेत् ?

सदनाधिक्य एवमपि निरीक्ष्यते यद्यदा परिणयानन्दलम्पटाय बालकाय 'मधुपर्कं प्रतिगृह्यताम्' इति जागद्यते कन्याजनकस्तदा 'मनोरञ्जकमिदं दृश्य'मिति मत्वा डिम्भो हास्यं करोति। बालिकानान्तु काऽऽख्यायिका ? एतास्तु स्वातन्त्र्यातीताः पुरुषाधीनाः किं कुर्युर्वराक्यः। मरुस्थले त्वष्टवर्षीयं बालं बालया सहोद्वीक्ष्य स्त्रियो "राधाकृष्णयोर्युग्मता ('राधाकृष्ण की जोड़ी' इति भाषया) सम्भूता" इति बम्भण्यते !!! स्वदशवर्षावस्थायामेव स वराको बालोऽष्टवर्षीयां बाल-वैधव्य-विधुरां विलपन्तीं विधवां परिहाय यमालयं याति। वैधव्य-दुःखदुःखिता बाला कथं कथमपि यापयति जीवनावशेषम्! यदा तस्या यौवनश्रीः प्रादुर्भवति तदा विलासविलसितः कामस्स्वकीयं सम्मोहनं शरं लक्ष्यीकृत्य तां तच्चेतसि परित्यजति। ततः सा विधुरा बाला यौवनोद्यामेनानङ्गशरजर्ज्जरितेन च हृदयेन कस्यचिन्मौहम्मदीयस्य निकेतने यापयति स्वदिवसान्। तत्र च प्रजननक्रियां सम्पाद्य दशगोभक्षकान् दुष्टानधमान् समुत्पादयत्यसौ। एवमेका गोपालकजननी दशगोभक्षकान् सुतान् सम्पादयति (!!) तत्रापि समाजसुधारका धर्मशास्त्रिणश्च कृततूष्णीमो भवन्तीति हा, हन्त !! किमतः परं दुःखदं विवरणं स्यात् ?

हा! भगवन्! त्वमेवैतस्या हीनाया जात्याः सहायकः स्यात्। हिन्दुरक्तरञ्जिता वनितास्स्वीये धर्मे सम्मेलयन्ति यवनाः, स्वभोग्याश्च ताः कुर्वन्ति कथमेनमेतस्य निस्तरणं सम्भविष्यति ? हा! हन्त!! बाल-विवाहकरणेन कीदृग्ज्यानिरस्माकमिति तु दर्शितमत्र। वृद्ध-विवाह-विषयेऽपि चेल्लेखकाः किमपि लिखेयुस्तर्हि समाजोन्नतिस्तत्संरक्षणं च स्यादित्यनुमिनोमि। शुभमस्तु।

अवस्थात्रयी


द्विपाद्यावन्मर्त्यः प्रवचनपटुः कर्मकुशलः,
स्वतन्त्रः सानन्दोऽध्ययनसुमतिर्भ्रमणरुचिः।
चतुष्पादे जाते पशुरिव विमूढो गृहरति-
स्तथाऽलित्वं प्राप्ते महति खलु मोहे निपतति॥१॥

—सत्यप्रसादशास्त्री "बहुगुणः"

नामगुप्तिः

किन्नाम प्रथमाश्रमस्य भगवन्! का सृष्टिकर्त्री सखे!
कः खे क्रीडति काञ्चनस्य हि तथा काऽऽख्याऽपरा विद्यते।
किञ्चास्ति ह्यवहेलनस्य मतिमन्! नामान्तरन्तद्वद।
मत्प्रश्नोत्तरपूर्ववर्णजनिता ज्ञेया मदीयाऽभिधा॥ १॥

शर्मान्तः प्रश्नोत्तर-प्रथमाक्षराऽभिधः
कुशेश्वर संस्कृत विद्यालयस्थः।



भारतीयं सुश्रावक-यन्त्रम् ।

(ले० — पण्डित कृष्णदत्तभारद्वाजः शास्त्री, बी. ए.)

सुविदितमेवैतत्सुधियां यदाधुनिकवायुयाना-विष्कारात्प्राक्संसारः श्रीमद्रामायणप्रभृतिग्रन्थ-वर्णित-पुष्पकादि-व्योम-यानाऽस्तित्वे संशयान आसीदिति । प्रत्यक्षं खयानान्येव विलोक्य सर्वेषां सन्देहो विलयमुपागमत् । पुराणवर्णनासु च कोऽपि विश्वासः समजनि । यद्यपि वयमर्वाचीना भारतीयाः प्राचीनोत्कर्षं साधयितुं न प्रभवामो विज्ञानाद्यभावात्परायत्तत्वाच्च, तथापि शास्त्रोल्लेखे मिथ्यात्वमारोपयितुं कृतः प्रयत्नोपि गच्छत्यनेहसि सफलेतरो भविष्यति । विज्ञानस्य महान्महिमा अवलोक्यते ।

अद्यत्वे भारतीय-राष्ट्रपरिषदा —(काङ्ग्रेस) वसरे उपस्थिताया जनतायाः श्रवणसौकर्याय सुश्रावक (Loud-Speaker) नामकानि यन्त्राणि सर्वासु दिक्षु अवस्थाप्यन्ते यद्द्वारा व्याख्यातुः वचांसि सर्वत्र समानमाकर्ण्यन्ते । यद्यप्येतद्यन्त्राविष्कारस्य श्रेयो यशः प्रतीच्यविदुषामेव तथापि नैतत्पुरा भारतवर्षे आसीदिति न वक्तुं युक्तम्। यतः प्राचीन-भारत-गौरवशालिनि महाभारते प्राप्यते हि एतादृशोपकरणास्तित्वम् ।

पुरा खलु दिलीपमहाराजस्य यज्ञे विश्वावसुर्नाम गन्धर्वो वीणामवादयत्, श्रोतारश्च देवप्रमुखा अष्टादशसहस्रसंख्याका आसन् । एतावति विशाले समाजे सुस्पष्टं वीणाप्रवणनं न सुकरम्। तदानीन्तना वीणा घोरध्वनयोऽभूवन्निति चेत्तर्हि समीपस्थानां श्रोतॄणां कर्णास्तूत्तुङ्गारावेण श्रवणाऽरमणीयेन नष्टा एवाऽभविष्यन्, परन्तु न तादृग्वर्णनमुपलभ्यते। अतो विश्वावसु-वीणामहाध्वनि-कल्पनाऽपार्थैव । तत्र तु " ममैव पुरतो वीणामयं मधुरं वादयतीति " विचारः सर्वस्य मनस्युद्भूत । उक्तञ्च यथा—

" ननृतुर्देवगन्धर्वाः षट्सहस्राणि सप्तधा ।
अवादयत्तत्र वीणां मध्ये विश्वावसुः स्वयम् ।
सर्वभूतान्यमन्यन्त मम वादयतीत्ययम् " ।

अत्र पूर्वोक्तो जनताया भावो विश्वावसुवीणावादनकौशलजन्यः ? आहोस्विद्‌ रङ्ग-प्रबन्ध-विशेषोद्भूतः सम्भवेत्, परन्त्वाधुनिकोपरिलिखितयन्त्राणीव तदापि उपकरणानि बभूवुरिति मम मतम् ।

उदुम्बरसार-प्रयोगाः ।*

म० म० श्रीगणनाथसेनशर्म्मणः (एम्. ए. एम्. एस्.)

सद्यो-व्रणे—

विंशतिभागजलेन सह उदुम्बरसारस्य प्रयोगः सद्यस्सुखायाऽऽरोग्याय च भवति, यदि स्वल्पजलेन प्रयुज्यते तर्हि दाहस्तोदश्च भवति ।

अग्नि-दाहे—

षड्गुणजलेन सहितः तत्प्रयोगो दाहनाशक आरोग्यप्रदश्च भवति ।

नेत्र-रोगेषु—

पूयमेहसम्पर्कजन्ये नेत्राभिष्यन्दे सद्यः प्रसूतस्य बालस्य अन्येषाञ्च नेत्ररक्तकोऽयम्प्रयोगः साधारण-नेत्राभिष्यन्देऽपि उदुम्बरजलेन नेत्रधावनं विशेषेण हितम्। नेत्रोपघाते चास्य पिचुप्रयोगः परमहितकरः पोथकीरोगे चन्दनवद्द्रवं कृत्वाऽस्याञ्जनं हितकरं भवतीति न विस्मर्तव्यम् ।

कर्ण-रोगेषु—

कर्णनाडी-व्रणजन्य-पुराणपूयस्रावे उदुम्बरजलेन कर्णप्रक्षालनमारोग्यप्रदम्भवति ।

नासा-रोगेषु—

नवीनप्रतिश्याये पुराणपीनसे च नासाप्रक्षालनेन सद्यः सुखम्भवति, नासारक्तस्रावे एतज्जलेन धारा-प्रक्षालनम्परमोपकारि भवति ।

दन्त-रोगेषु—

दन्तपूयरोगे वर्त्तिवत्कृत्वास्य चूषणन्निष्ठीव-नञ्चाल्पीयसा कालेनाऽऽरोग्य-प्रदम्भवति ।

मुख-रोगेषु—

मुखपाकादौ प्रक्षालनं स्वास्थ्यप्रदम् । मुखक्षते जलरहितस्योदुम्बरसारस्य क्षणिकस्पर्शनं शीघ्रं फलप्रदम्भवति ।

मूत्रमार्गरोगेषु-दुष्टव्रणेषु च—

(शराविकादौ) किञ्चित्तरलीकृतस्यास्य प्रले-पस्तज्जलेनैवोष्णस्वेदश्च पञ्चषैर्दिनैर्व्रणशोधनः क्रमशो रोपणश्च ।

नाडी-व्रणेषु—

तुत्थकप्रयोगान्ते उदुम्बरसारस्य वर्त्तिका प्रयुक्ता शीघ्ररोपणाय भवति ।

रुजायुक्ते व्रणशोथे—

अस्य घृष्टचन्दनवत् पौनःपुन्येन प्रयोगो रुजाशोथहरो भवति ।

प्रवाहिकायाम्—

नवीनायाञ्जीर्णायाञ्च उदुम्बरसारजलेन वस्ति-प्रयोगः (आन्त्रधौतिः) शीघ्रमारोग्य-प्रदो भवतीति बहुधा परीक्षितोऽयम्प्रयोगः ।

---

* चम्पारण्यान्तर्गत-रत्नमाला-निवासिनां चिकित्सकचूडामणि-भिषगाचार्य्य-कवीन्द्र-श्रीचन्द्रशेखरधरशर्म्म-महोदयानामुदुम्बरसाराविष्कारो भैषज्यजगति युगान्तराऽऽधायकः । आविष्कर्तृभिश्च संस्कृताध्येतृणां कृते तस्य निःशुल्कमेव प्रदानं प्रतिज्ञातमस्ति, तत्र विषये महामहोपाध्याय-श्रीगणनाथसेनमहोदयानां सम्मतिः प्रकाश्यते । विशेषजिज्ञासवः सुप्रभात-कार्यालयतः -) आणकैकस्य चिटिकां सम्प्रेष्य तत्प्रयोगविधिं गृह्णन्त्विति । —(सम्पादकः)

अम्लपित्ते-शूले च—

अस्य प्रत्यहन्द्विस्त्रिः प्रयोगोऽतीव हितकरः (मात्रा-५-१० रक्तिकाः) भवति ।

पुराणग्रहण्यामप्येवं विध एव प्रयोगो विशेषेण हितकरो भवतीति एतावन्तः प्रयोगा मया परीक्षिताः । एते च श्रुता अन्येभ्यो वैद्येभ्यः—

विषूचिकायाम, यकृच्छूले, वातवेदनासु, अश्मरीशूले, प्रदरे, रक्तपित्ते, पूयमेहे, मधुमेहे, अतिसारे, वृक्कशूले, उदरशूले, कैन्सरनामकरोगे, कर्णशूले, भगन्दरे चैतत्प्रयोगो हितकरो भवति । तथाहि—

औदुम्बरामृतमिदं सुपरीक्षितञ्चो,
युञ्जन्तु साधुमतयो भिषजः सदैव ।
तेनात्र रोगशतपीड़ितदुःखिलोक-
दुःखापनोदनविधौ प्रभवन्तु धीराः ॥१॥

—✻—

शीतला-संक्षिप्तपरिचयः प्रतिषेधोपायश्च

[लेखकः—श्रीभगवतीप्रसादशुक्लः, आयुर्वेदाचार्यः,
सभापतिःवहराइचस्थच्छात्रसमितेः]

इह खलु विदितमस्ति सर्वसाधारणजनानां शीतलाया दारुणव्याधित्वम् । आसार्धसहस्रवर्षात् जनपदेषु कवलितजीवितापि न शीतला शीतला जाता; प्रत्युत प्रत्यब्दं सहस्रशो जना अनया क्रान्ता विपद्यन्ते । एष व्याधिः यथा शिशूनां भवति न तथेतरेषां तरुणस्थविराणाम् । एतदङ्कशयानाः शिशवो भूम्ना शवा एव उपलभ्यन्ते । दैववशाद् यदि जीविता भवन्ति तदा एतल्लक्षण-लक्षिता नष्टप्रायवर्णेन्द्रिया आजीवितावसानं दृश्यन्ते । अयं व्याधिर्घोररूपेण विद्यमानः पुरा भारतीयान् नार्दयतिस्म यथेदानीम् । न च प्राचां कृता शीतला संज्ञाप्यस्योपलभ्यते (!) प्राक्तनैस्तु मसूरिकेति कथिता सूत्रितापि क्षुद्र रोगेषु । यथा चरके-पतञ्जलिः "याः सर्वगात्रेषु मसूरमात्रा मसूरिकाः पित्तकफात् प्रदिष्टाः" (च. चि. अ. १२) दाहज्वरं रुजावन्तस्ताम्राः स्फोटाः सपीतकाः । गात्रेषु वदने चान्तः विज्ञे यास्ता मसूरिकाः ॥ (सुस्रुत अ. १३) "गात्रे स्यतश्च वक्त्रस्य दाहज्वररुजान्विताः । मसूरमात्रास्तद्वर्णाः तत्संज्ञा पिटिका घना ॥ (वाग्भट उत्तर ३१—८) इत्यनेनानुमातुं शक्यते, यद् वाग्भटसमयपर्यन्तमुद्भूतिर्न जाताऽस्येति ।

माधवादीनां ग्रन्थे विशेषविवरणदर्शनादव गम्यते, यत् वाग्भटात् कियत्कालानन्तरमेवं शनैः शनैर्दारुणव्याधित्वं शीतलेतिनाम च प्रापेति।

परमाङ्गलवैद्यके (डाक्टरी) मसूरिकोत्पत्तिं पृथ्वी-जल-वायु दुष्टितो भूम्ना तज्जुष्टरोगिसंस्पर्शादिभिरामनन्ति, कथयन्ति च शीतलारोगिणां शुष्कपिटिका रजःपरमाणवो वायुमिश्रिता नासिकादिमुखेनान्तःशरीरगता अन्येषामपि शीतलोत्पादका भवन्ति । व्याधिरयं प्रायः शिशिर-वसन्त-ग्रीष्मेषु-जनानभिद्रवति । विज्ञानं त्वस्य मसूराकारा सर्वावयवप्रचुरसान्द्र-पिटिका तीक्ष्णज्वरवती या, सा मसूरिका 'स्मालपोक्स्' इति कथ्यते। या तु विरलपिटिका, अल्पज्वरकरी सप्ताहाभ्यन्तरमेवोत्पत्तिप्रकोपप्रशमा सा 'चिकनपोक' इति कथ्यते। सज्वरा, ताम्राभा, रोमकूपोन्नतिसमा, तृतीया रोमान्तिका नाम मसूरिका 'मिसलेस' इति च प्रोच्यते ।

एतन्महाव्याधितो रक्षणार्थं प्रत्नवैद्यैर्मसूरिकाक्रान्तजनानां चर्मोत्पाट्य इतरेषां वाहौ छिन्नायां त्वचि तद्रजःकणं प्रक्षिप्य मसूरिकाकल्पा अन्या मसूरिका उत्पाद्यन्तेस्म। परमेतत्प्रयोगतः सत्यपि शीतलाया अपुनर्भावित्वे,गृहीतमसूरिकात्वचो जनस्य सहजव्याधिना अर्शःकुष्ठोपदंशादिना कृतमसूरिकोऽपि जन एतज्जात-व्यापत्तिमन्वभवत्, शोणितदोषात्। न केवलमेत एव दोषाः, क्वचित्प्राणात्ययाश्चापि जाताः, घोरपिटिकारसजातत्वात्। एवं रोपमन्यमानानामहरहोऽन्यप्रतीकारोपायं मृगयतां डा. विलियम्-जेनर-महोदयेन १७९६ ई० वक्शीनेशन (टीका) इत्याख्यो योग आविष्कृतः ।

अयं महानुभावः शीतलाक्रान्तिकाले गोपालानां रोगघ्नणां च अतज्जुष्टत्वात्, इतरेषां शीतलार्तत्वाच्च निश्चिकाय। यदेतादृशी अद्भुता गवि शक्तिर्विद्यते यया तत्समीपवर्तिनो जना जातु शीतलार्ता न भवन्ति । तदाऽवश्यमेव गोमसूरिका रसव्याप्तशोणिता मानवा अपि नानुभवेयुस्तद्व्यापत्तिमिति निश्चित्य प्रागष्टवत्सरीयबालके प्रयुज्य दृष्ट्वा तदनुत्पत्तिं चान्यविकारं वा पुनः पुनः सहस्रवारानुभाव्य विज्ञापयतिस्म। "अयं सर्वथा प्रमोदोदर्क" इति स एष प्रयोगो भारते भारतशासकैर्भारतीयान् प्रति व्यवह्रियते साम्प्रतम् । गोस्तनजातमसूरिकामुत्पाट्य लसीका गृह्यते प्रयुज्यते च सैव यस्याः "वक्शीनेशन" इति नाम । अस्मात् कथंचिदपि न भेतव्यम्, सर्वथा कार्मुकोऽयम् ।

ये खल्वत्रोद्विजन्ते ते आयुर्वेदीयौषधेन परमसुकुमारान् कुमारान् संस्कृतदेहान् विधाय सुखं यावज्जीवितं तिष्ठन्तु न जातु शीतलाया भयम् ।

तथाहि—

" ये शीतलेन सलिलेन विपिष्य सम्यङ्
निंबा[१]ऽक्षबीजसहितां रजनीं[२] पिबन्ति ।
तेषां भवन्ति न कदाचिदपीह लोके
पीडाकरा जगति शीतलिका विकाराः ॥१॥
मोचा[३]रसेन सहितं स[?][४]चन्दनेन
वासा रसेन मधुकं[६] मधुकेन[७] चाथ ।
आदौ पिबन्ति सुमना[८]स्वरसेन मिश्रं
ते नाप्नुवन्ति भुवि शीतलिकान्विकारान् ॥२॥

१ निंबः (नीम)+अक्षः (बहेड़ा) तयोर्बीजं । २ रजनी (हरिद्रा) ३ कदलीवारिणा । ४ श्वेतचन्दनेन । ५ अडूसा । ६ मधु । ७ मुरैठी । ८ मालती । (चमेली) इति इमे सर्वेऽपि योगा जनसुलभा दृष्टफलाश्चेति ।

भौतिकवादोऽनुपादेयः

[ले०—साहित्य-शास्त्री पं० चैनसुखदासो न्यायतीर्थः]

साम्प्रतमध्यात्मवाद-विमलसलिल-पूरपरिपूते, तपोधन-महर्षिगण-चरणरजोनिर्मार्जिते, निस्सारजड़वाद-दूषित-पङ्क-कलङ्क-शङ्कयाऽपि रहिते, सुराऽसुर-वृन्दमहिते, माननीयेऽस्माकमस्मिन् भारते वर्षे पाश्चात्यानां संसर्गात् सर्वथा हेयोऽपि भौतिकवादः समुत्कर्षमयं स्वास्पदं कुर्वन् दृग्गोचरीभवतीति महच्चित्रमेतत् ? पश्चिमीय-शिक्षणतो भारतीया अपि सरस्वत्युपासका नाशोन्मुखा मुख्यमुन्नतिसाधनमपास्य मरीचिकायाः समानतामादधानं साधनाभासं गवेषयन्तो दृष्टिपथमवतरन्तीति दुर्भाग्यमस्माकम् ! ईदृशीं चेतसो व्यथासम्पादिकामवस्थां निरीक्षमाणानां भारतहितैषिणां भारतीयानामन्तःकरणमशनिपात—जर्जरीभूतमिव भवति । यदि भौतिकवादस्याऽयमेधमानः प्रसारो नावरुध्येत, तर्ह्यनागतकालेऽध्यात्मवादस्य नामापि न श्रोष्यत इति निश्चितमेव ।

इदानीं शनैःशनैर्भारतस्य निखिलमपि वायुमण्डलं भूतवादमयं भवति । विज्ञानस्य चरमोन्नतिरपि भूतवादस्य जननी । चेतसो विस्मयसम्पादकैर्विज्ञानस्याभूतपूर्वैराविष्कारैर्धर्मश्रद्धाऽपि विलुप्तेवास्ति भारतीयानाम् । केचित्तु धर्ममपि आडम्बरमात्रं प्रतिपादयन्ति, ईश्वरस्यापि बहिष्कारं विधातुं सन्नद्धाः सन्ति, कथयन्ति चेत्थं नास्यां जगत्यामीश्वरनामधारी कश्चन पदार्थो वरीवर्ति । इदं किल केवलं कल्पनाजगतो वस्तुमात्रम् । न च कश्चन वास्तविकः पदार्थः । माधुरीत्यभिख्यायां हिन्दीपत्रिकायां केनचिद्भूतवादपक्षपातिना लेखकेनेश्वर-बहिष्कारविषयक एको लेखः प्रकाशित इति तु सुविदितमेव समेषां सहृदयपाठकानाम् । एतादृग्धर्मध्वंसकार्ये समयस्य शक्तेश्चोपयोगेन को लाभो भविष्यतीति तु लेखकमहोदय एव विजानीयात् । धर्ममाडम्बरमात्रं प्रतिपादयद्भिरीश्वरबहिष्कारं च कुर्वद्भिः पुरुषैर्न कदाचिदपि विचारितं यदेतयोर्नाम्नाऽपि लोकानां महानुपकारो भवति । यदीश्वरभयं न स्यात् सर्वत्र जगति निरन्तरं रक्तनद्यो वहेयुः सबला निर्बलान् त्रासयेयुः, शान्तेस्तु नामाऽपि न श्रूयेत, निखिलमपि जनमण्डलं कलहायमानं प्राणान्तमुपव्रजेत् । पुरातनसमयेऽध्यात्मवादप्रचारेण न कश्चनापि भारतवासी दुःखी आसीत् साम्प्रतन्तु सर्वत्र हाहाकारः श्रूयते । कश्चन धनाभावतः, कश्चन जनाभावतः, कश्चन च शरीरसौख्याभावतो दुःखपीडितोऽस्ति । साम्प्रतन्न कुत्रापि परि-

पूर्ण दुःखाविमिश्रं सुखं समवलोक्यते, भयङ्करैरसाध्यैःकष्टसाध्यैश्च रोगैर्मृत्योः किङ्करैरिवानवरतं भारतीया जनता क्लेशिताऽस्ति । अकालमरणादिनाऽसह्यदुर्भिक्षादिना च प्रतिसंवत्सरं भारतीय-दीनजनताया याऽदर्शनीयाऽवर्णनीया च दुर्दशा भवति तस्या वर्णनमात्रमपि कर्तुमस्माकं मनो नोत्सहते । एतत् समस्तमपि जडवादप्रचारफलमेवास्ति ।


यदि प्राक्तनसमयाद्वर्तमानकालस्य भेदो विचार्येत तर्हीदं निःसंशयं निगदितुं शक्येत, यत् पुरातनसमयः सुवर्णयुगमासीदिति । तदानीं सर्वे जना धनधान्यपरिपूर्णा निखिल-सांसारिक-सुखानुभवननिमग्ना अपि परोपकारैकव्रता धर्मप्राणाः पापभीरवश्चासन् । तदानीमकालमृत्योर्नामाऽपि नासीत् । न च कश्चन दुर्भिक्षपीडितो बुभुक्षाकुलितश्चाभवत् । अधुना तु प्रायोऽकालमृत्यव एव भवन्ति । प्रतिदिनमनेके भारतीया अन्नाभावतः क्षुधाकुलिततया प्राणान् विमुञ्चन्ति । प्रतिवर्षमकालस्य साम्राज्यं दृग्गोचरीभवति ।

अयमनात्मवादः सर्वथाऽपि हेय इति न केवलं भारतीया एव जानन्ति अपि तु पाश्चात्या अपि बहवो विद्वांस इमं सर्वथा परिहेयं प्रतिपादयन्ति । आत्मवादगवेषणायां प्रयतमानाश्च समवलोक्यन्ते । मानवजातेश्चरमोन्नति-साधनमयमेवात्मवाद इति निःशङ्कं निश्चितं च कथयन्ति । भारतीया यावदनात्मवादमपरिहेयमनुभविष्यन्ति न तावद्भारतस्योन्नतिर्भविष्यति । ये जडवादपक्षपातिनो न ते वस्तुभूतमुन्नतेर्लक्षणं जानन्ति । नास्तिकवादाश्रयणेन भारतस्य महदनिष्टं भविष्यतीति नात्र सन्देहलवोऽपि ।

अन्ते च प्रार्थयामहे, यद्भारत-हितानुवर्तिनो विद्वांसः शीघ्रमेवेदानीमालस्यं विहाय तद्दोषस्य निराकरणे भारतस्य समुन्नतये च सन्नद्धा भवेयुरिति शम् ।

सुप्रभातपाठकेभ्योऽभ्यर्थना ।

श्रीमन्तः पाठकमहोदयाः ! विदाङ्कुर्वन्तु तत्रभवन्तो भवन्तो यत्सुप्रभातस्य पितृकल्पानां स्वर्गीय-पण्डित-गिरीशशुक्लशर्मणां दिवङ्गमनमेतत्कृते कीदृश-शोकोद्वेगकरमिति । अत एवेदं तत्पुत्रकल्पमिदं साम्प्रतिके होलिकोत्सवावसरे स्वकीयं कलेवरं साधारणप्रायमेव भवतां पुरः स्थापयति सर्वेषामन्यपत्राणामनल्प-जल्पन-कल्पना-विलसनपुरस्सरमनुनर्तनन्दर्शन्दर्शम्प्रसीदतो भवतोऽभ्यर्थयते च यदीनं बहिर्मलीनमपि मां क्षमध्वमिति ।



समस्यापूर्त्तयः *

राष्ट्रमाराधनीयम्

राजा यादृक्तादृशो लोक एष-
भूयादेवं प्राहुरन्नार्थविज्ञाः ।
अस्माद्धेतोः पूजनं स्वीहमानै-
र्नित्यं भूपे "राष्ट्रमाराधनीयम्" ॥

—मोहनलालशर्म्मा, (चिड़ावा)

* * * *

श्रुतिसततसुघोषैः कीर्तितं नैकशो य-
त्तदनु मनु-वसिष्ठैर्वन्दितं ध्यानवद्भिः ।
पवनसलिलयोगाद्यस्य पुष्टा वयञ्च
तदखिल-फलकल्प "राष्ट्रमाराधनीयम्" ॥

—सोमदेवशर्म्मा सारस्वतो विद्यार्थी ।

* * * *

दलित-ललितवेषं पूरितं क्लेशपुञ्जै
र्विघटित जनवृन्दं नश्यदानन्दकन्दम् ।
विबुधवरकदम्बैः शान्तिभावानुभावैः
सरस-हृदयपद्मे "राष्ट्रमाराधनीयम्" ॥

—गोपालदत्तविद्यार्थी ।

* * * *

सकल-सुखनिदानं भारते गीयमानं
विविध-निधिसुशोभं सर्वविद्याविभूषम् ।
धृत-नव-रसयोगैर्विज्ञवृन्दैश्च लोकै-
र्हृदय-गतमखण्डं "राष्ट्रमाराधनीयम्" ।
पर-पद-दलितेऽस्मिन्भारतेऽनार्यवर्गैः
सततमहितकैर्वा पीड्यमानैस्तथैव ।
अहह ? मनुजवर्गैर्भीरुभिर्भारतीयैः
कथय, कथमिदानीं "राष्ट्रमाराधनीयम्" ॥

—सरयूप्रसादशास्त्री "द्विजेन्द्र"

* * *

अयि बुधवरसार्थाः ! साम्प्रतं वाग्विनोदम्
परिहरत नितान्तं स्वान्तमालोक्य तान्तम् ।
इह सुरवचसो हा ! सर्वतः संवृतायाः
परिहृत-गृहजालं "राष्ट्रमाराधनीयम्" ॥

—गोपालशास्त्री "केसरी"

---

* इमाः समस्यापूर्त्तयः सं० सा० समाजस्य पञ्चम-वार्षिकाधिवेशने (फाल्गुनकृष्णैकादश्यां गुरौ) पठिताः ।

—(स० सम्पादकः)

सुप्रभातम्

निजसुरगिरमेतां सर्वथाऽराधयध्वं
स्व-तनु-मति-वचांसि ध्यानतो वर्द्धयध्वम् ।
रुचिर-विविध-बोधं मामधीत्याऽजयध्वं—
सुनियतपठितॄन् भो वक्ति वः "सुप्रभातम्" ॥
—गोपालशास्त्री "केसरी"

* * * *

दयानिधान-प्रभुदत्तहीनम्
त्यक्तं गिरीशेन महामलीनम् ।
शल्यं यदन्तर्निहितं निशातम्
दीनं बुधाः ! रक्षत "सुप्रभातम्" ॥
—पाण्डेयः सुरेन्द्रदत्तशर्मा 'इन्द्रः'

* * * *

श्रीविश्वनाथनगरी-विदुषां हि बीजम्
बोधो धिया महिलया सहयोगमापत् ।
तद्बीजतो जनिमविन्दत लोकमान्यो
ज्ञानाकरो गुणिसुतः किल "सुप्रभातम्" ॥
—मोहनलालशर्मा (चिड़ावा)

* * * *

ऋषिगणसमद्धर्त्ति बिभूतः पूज्यगान्धे-
रयनमनुसरेयुर्भारतीया मनुष्याः ।
सपदि रविरुदीयात्स्वीयराज्यात्मकोऽद्धा
निविड़-तिमिर-तन्त्रं नाशये "त्सुप्रभातम्" ॥
—सोमदेवशर्मा सारस्वतः,

* * * *

विबुधवर-वरेण्ये भारते हन्त ? जातं
विलपनमबलानां बाल-वैधव्य-योगात् ।
गमनमितरधर्मेऽस्पृश्यजातेश्च वीक्ष्य
कथय, कथमिदानीं जायतां "सुप्रभातम्" ॥

निखिल-गुणनिधानैर्विज्ञवर्यैरगाधै-
र्धृतदय-सुखधामैश्शान्तचित्ताभिरामैः ।
विहितमिदमखण्डं शम्भुपुर्यां चिरन्तं
निहितहृदयरागैर्धार्यतां "सुप्रभातम्" ॥
—सरयूप्रसादशास्त्री "द्विजेन्द्रः"

* * *

सखे ! वसन्त !!

(लेखकः—साहित्यभूषण पं० आशारामशास्त्री, व्याकरणाचार्यः)
प्र० अ०—श्रीमहर्षिकुलब्रह्मचर्याश्रम, लक्ष्मणझूला ।

प्राज्यप्रमादसमुपस्थित-पारतन्त्र्य—
पाशैर्भृशं निगडिताः परिदीनभावाः ।
श्रीमत्प्रसाद-विमुखा भगवन्निदानीं
रम्यं वसन्त-समयं कथमर्चयामः ॥ १ ॥

धी-श्री-विहीनाः कथमत्र हन्त !
नित्यं सुदीनाश्च सखे वसन्त !
सर्वस्वरिक्ताः किल भारतीया-
स्त्वां स्वागतेन ह्यभिनन्दयेयुः ॥ २ ॥

सुप्ता मृताः किञ्चन जीविता वा
चिरादिमे भारत-भू-सुतास्त्वाम् ।
निवेदयन्त्यञ्जलिबन्धमेत-
द्द्वेषस्य पारस्परिकस्य नाशम् ॥ ३ ॥

विधाय तूर्णं ननु प्रेमपूर्णा—
न्विधेहि सत्कर्म-पथे सुलग्नान् ।
यथा वसन्तः खलु भारतोर्व्यां
सदा वसन्तं ह्यभिनन्दयेयुः ॥ ४ ॥
(युग्मम्)

वसन्तोत्सवः ।

सिद्धार्थान् प्रथयन् रसालनिकरानुल्लासयन् सर्वतः
संफुल्लां सुमनस्ततिं विरचयञ्जाड्यार्तिमुन्मूलयन् ।
चिन्तातान्तिमुदस्य चेतसि चिरं चैतन्यमुत्पादयन्
भूयादभ्युदयाय भारतभुवि प्रादुर्भवन् माधवः ॥१॥
धत्तेऽन्तं जडतामयः कुसमयस्तेजस्विनो जृम्भिताः
संसज्जाः सरकारकाः क्षितिरियं जाता सदाशाधरी ।
उत्साहं विपुलं वहद्भिरधुना धृत्वा करे जीवनम्
प्रेष्ठैः साधु समेत्य रागनिभृतैर्निर्विश्यतामुत्सवः ॥२॥

शान्त-शृङ्गारौ

पायान्नोदरमौलिनेत्रपुटो निर्बद्धगाढासनः
किञ्चित्किञ्चिदुदञ्चिताधरपुटो विभ्राजितोऽग्राभिधः ॥
सान्द्रानन्दभरानुभूतिविगलद्बाह्यप्रपञ्चस्मृतिः
कश्चिद्योगमुपाश्रितो गिरिभुवा भावोद्भटो धूर्जटिः ॥

—अलवरस्थो भट्टगिरिधारिशर्मा,
(कविकिङ्करः)

चन्द्रकान्ते !

रति-कलित-कपोलं सारहीनं विदित्वा
वसति तव कपोले सर्वदा शम्बरारिः ।
सपदि भवति बोधः सुष्ठु विज्ञाय वक्त्रं
विधुरपि निजवासं लज्जया खञ्चकार ॥१॥

तव रतिकरहास्यं चन्द्रकान्ते ! विलोक्य
भवति शशिकलायाः लोकमध्येऽपमानः ।
सरसिज-नयनाभ्यां लज्जिता भूरि भूत्वा
युगपदुदकमध्ये सर्वमीना निमग्नाः ॥२॥

—श्रीश्यामनारायणपाण्डेयः ।

भृङ्गान्योक्तयः

(१)

ललामकमलावली किमु मतङ्गजैर्मर्दिता
न्यदाहिषत मालतीप्रभृतयः किमीवैरहो ?
निरर्थकपद्मावलीं प्रणिनदन् रुदन्नाक्षिपन्
प्रमत्त इव पर्यटन्त्वमसि भृङ्ग ! येनाऽधुना ॥

(२)

द्रुढोल्लसितमञ्जरी-समुदये यदीयेऽनिशं
सुमञ्जु-परिगुञ्जितं प्रणिनदन्नभूर्मोदभाक् ।
अमुत्र विटपेऽधुना विधिवशाद्विनाशङ्गते
विहाय तव नोचितन्तमितरत्र भृङ्गायनम् ॥

(३)

द्विरेफ ! करिकेसरि-प्रचुरदानधारामितो
दधत्प्रमदमावहन्नसि परं म संहसन् ।
अवव्रजसि नैव तन्मम मनः परं खिद्यते
यदि श्रवणमास्फुरेत्तव दशा तदा कीदृशी ॥

—श्रीजीवनाथझा शर्म्मा ।

पठनं नाम ।

[ले०—केशवात्मजः, पं० मूलशङ्करशास्त्री, वडाली]

पठनं स्वात्मविज्ञानं पठनं कर्षणं स्मृतम् ।
पठनं चूषणं प्रोक्तं पठनं त्वात्मशीलनम् ॥ १ ॥
पठनं मोक्षणं द्वन्द्वात् पारतन्त्र्यात्तथैव हि ।
पठनं स्वाश्रयित्वं तु पठनं प्रकृतिज्ञता ॥ २ ॥
पाठः शक्तित्रयावाप्तिः पठनं प्रकृतेर्जयः ।
पठनं विनयाधानं पठनं सारसङ्ग्रहः ॥ ३ ॥
पठनं समदर्शित्वं स्वयं विज्ञाय वर्तनम् ।
पठनं मृत्युशोकाब्धेस्तरितुं सेतुबन्धनम् ॥ ४ ॥
पठनं तु परिच्छेदः पठनं परिशीलनम् ।
पठनं पात्रतावाप्तिः पठनं कर्मकौशलम् ॥ ५ ॥
पठनं नाम गोदोहः सद्ग्राहालम्बनं तथा ।
निवर्तनं त्वसद्ग्राहादात्मदीपप्रकाशनम् ॥ ६ ॥

पठितं सत्यकामेन सत्यं जाबालि-सूनुना ।
दृष्टिर्लब्धा स्वयं यत्नाद्धौम्यशिष्योपमन्युना ॥७॥
आत्मज्ञानं यमाल्लब्धं मृत्योरमृतताऽर्जिता ।
श्रद्धावताऽनसूयेन दान्तेन नचिकेतसा ॥ ८ ॥
गुरोराज्ञाममोघान्तु कुर्वताऽऽरुणिना तथा ।
आत्मानपेक्षवीरत्वं दर्शितं वार्निरुन्धता ॥ ९ ॥
जागर्ति रान्तरीन स्यात् पठनं तद्विडम्बनम् ।
शुका वा सारिका वाऽथ शब्दान्नाधीयते किमु ॥१०॥
यदि कर्तव्यनिष्ठा नो वितण्डावादतः किमु ?
सफलं कर्मवैदग्ध्यं वर्षाभूरटितं मुधा ॥ ११ ॥
संकल्पाऽचारवचसां त्रयाणामेकरूपता ।
शुभा चैव समर्था च सफलं पठनं तदा ॥ १२ ॥

संस्कृतच्छात्राणामात्मिकबलह्रासः

ले०—पं० सरस्वतीप्रसादशर्मा, भैसौना (फैजाबाद)

साम्प्रतं हि खल्वधिकतममिदं दरीदृश्यते, यत् संस्कृतभाषामधीयमानैरपि प्रथमादि–परीक्षोत्तीर्णैः संस्कृतान्तेवासिभिर्गीर्वाण-विद्याया भाषण-लेखना-दिविधेयेष्वियत्यसमर्थता प्रकाश्यते, यन्निरूपणेन वयं व्रीडां कुर्मः । संस्कृतभाषायाः प्रथमपरीक्षोत्ती-र्णानां हि विद्यार्थिनां तुलनांऽग्लभाषायामिण्ट्रेन्स (S. L. C.) परीक्षोत्तीर्णैश्छात्रैः सह सम्पाद्यते लोकैरिति श्रुतमस्ति, परन्तूक्तपरीक्षोत्तीर्णैरांग्लभाषा-याश्छात्रैर्नूनं हि सर्वाणि विधेयानि सुस्पष्टमांग्ल-भाषायामेव सम्पाद्यन्ते । गीर्वाणविद्यायाश्छात्रैस्तु परीक्ष्य-ग्रन्थातिरिक्त-देवभाषाभाषणे, लेखने चासम-र्थताऽनभिज्ञताऽनुत्साहश्चापि प्रदर्श्यते । किमन्यद्

[शेषः २६६ पृष्ठेऽधो द्रष्टव्यः]

विवाहनक्षत्रविषये प्रश्नः ।

[ले०—महोपाध्यायः, खटाऊशर्मात्मभवः पं० दयारामशर्मा]

(बडगादी, मुम्बई नं० ३)

प्रायः सर्वैः पण्डितवर्य्यैर्व्याकरणव्यतिरिक्तेषु सर्वेषु विषयेषु पूर्वं पूर्वं प्रमाणं स्वीक्रियते। तथा सतीदानीन्तना विवाहे—१ रो० उत्तरास्तिस्रः (२ उ. फा. ३ उ. षा, ४ उ. भा.) ५ रेवती, ६ मूलं, ७ स्वातिः, ८ मृगशीर्षः, ९ मघा, १० अनुराधा, ११ हस्त-इत्येतानि नक्षत्राणि गृह्णन्ति, न तु पारस्करगृह्योक्तानि नक्षत्राणि। तत्र— " त्रिषु-त्रिपूत्तरादिषु स्वातौ मृगशिरसि रोहिण्याम्। " इति सूत्रे त्रिषुत्रिपूत्तरादावित्युक्तत्वात् । १ उ. फा. २ हस्तः, ३ चित्रा, ४ उ. षा, ५ श्रवणः, ६ धनिष्ठा, ७ उ. भा, ८ रेवती, ९ अश्विनी, १० स्वातिः, ११ मृगशीर्षः, १२ रोहिणी-एतानि द्वादशनक्षत्राण्युक्तानि सन्ति । (पा. गृह्यसूत्रे)

तत्सूत्रे १ मूलं, २ मघा, ३ अनुराधा—एतानि त्रीणि नक्षत्राणि त्यक्तानि । अपि च—१ चित्रा, २ श्रवणः, ३ धनिष्ठा, ४ अश्विनी—एतानि नक्षत्राणि गृहीतानि सन्ति; परन्तु इदानीं चित्रा, श्रवण, धनिष्ठा, अश्विनी-एषु नक्षत्रेषु केऽपि विवाहं प्राय न कुर्वन्तीति ।

अथ मूलाख्यं नक्षत्रं तीक्ष्णसंज्ञं दारुणसंज्ञञ्च। तत्र तीक्ष्णनक्षत्रे अभिचारकर्माणि भवन्ति । मघा नक्षत्रमुग्रसंज्ञं क्रूरसंज्ञञ्च, उग्रनक्षत्रेष्वपि उ भयङ्करकृत्यं (मारणादिकर्माणि) भवति कथं तस्मिन्नक्षत्रे विवाहः स्यात्साधुफलदः किञ्च धनिष्ठानक्षत्रं श्रवणनक्षत्रं चोर्ध्वमुखसंज्ञं तस्मिन्नुर्ध्वमुखनक्षत्रे राज्याभिषेकं पट्टबन्धं कारयेत् । अश्विनी-चित्रादिभानि पार्श्वमुखा स्मृतानि । एषु 'दमनं गमनाऽगमनादिकं कार्यं' इत्याद्युक्तत्वात्सूत्रग्रन्थेऽप्युक्तत्वाच्च शुभफलप्रदे नक्षत्रेषु विवाहः कथं न भवति ?

सामान्यग्रन्थोक्तानि नक्षत्राणि कदा प्रविष्टानि तथा च सूत्रोक्तानि नक्षत्राणि कथं, केन, कदा वा व्यवहारान्निष्कासितानीत्येवं विधः प्रश्नः समा धेयोऽत्रैवेति शिवम् ।

श्रीभगवान्दास-महोदयानां षाष्टित-माब्दीय-महोत्सवे सादरम-भिनन्दनम् ।*

[जन्म, माघी मौनी अमा सं० १९२९ वि०]



शुद्धस्वान्तमदागमैकशरणो बुद्धो निरीहः परः
स्फूर्जज्जागतिकप्रपञ्चविमुखः संत्यक्तसर्वैषणः ।
सम्प्राप्तः परिपूर्णकामपदवीं स्वेनैव भावेन यो
भूत्यै भारतभूभुवां स भगवान् दासो भवन् भासते ।१।
धर्मे धीरधियो धरासु कतिचित्केचित्कलाकोविदा
ऐतिह्ये प्रभवन्ति केऽपि सुधियोऽन्ये राजनीतौ मताः ।
साहित्ये सरसा लसन्ति च परे केचित्तथा केषुचित्
सर्वस्मिन्विषये समेधितमतिर्धन्यस्त्वदन्योऽस्ति कः ।२
श्रद्धामाकलयन्ति केऽपि विबुधाः पौरस्त्य-विद्यागमे
केचित्केवलमेव कौतुककृतः पाश्चात्य-शिक्षार्जने ।
अन्योन्यप्रतिकूलतां श्रितवतां प्राचां प्रतीचामपि
भावानां भगवान्समन्वयकरो विज्ञानवाराන්निधिः ॥३॥
दुष्प्रापं डिपुटी-कलक्टर-पदं सम्मानसंवर्द्धनं
मत्वा यत्नशतं सदैव विदधल्लोको दरीदृश्यते ।
तत्सन्त्यज्य पुरा भवान् बहुविधां शिक्षाप्रचारोद्यतां
भास्वद्भारतसभ्यतैकजननीं संस्थां समस्थापयत् ॥४
हिन्दूकालेजनामा दिशि दिशि सुचिर-
प्रोल्लसत्कीर्त्तिधामा ।
शिक्षायाः काशिकायां सुरुचिर-निलयः
श्रीमता स्थापितो यः ॥
तत्रैवोत्पद्यमाना सुरवचसि परं-
भावमन्तर्दधाना ।
संसत् संवर्द्धिनीति प्रसृमरविभवा
संस्कृतस्याचकास्ति ॥ ५ ॥
श्रीमत्षष्टितमाब्दपूरणदिने सम्पद्यमानोत्सवे
सभ्यास्तत्समितेः समेत्य सकला मोमुद्यमाना भृशम् ।
माद्यन्मानसपारिजातरचितैर्माल्यैः सदा शोभनै-
स्त्वामर्चन्ति गुणाकरं परमया प्रीत्याऽभिनन्दन्ति च ॥६॥

सं० हि० स्कूल काशी
माघी मौनी अमा.
सं० १९८९ वि०

भवदीयदीर्घायुरभिलाषिणी—
श्रीसंस्कृतसंवर्द्धिनीसमितिः ।

* अभिनन्दनमिदं श्रीविन्ध्येश्वरीप्रसादशास्त्रि-विरचितं डाक्टर-श्रीभगवान्दासमहोदयानामभिनन्दनार्थं 'सेवा-सदन' नाम्नि तदीयनिलये दिग्देशान्ततः समागतेषु संघीभूतेषु मनीषि-मण्डलेषु सभापतिप्रमुखैः सं० सं० समिति-सदस्यैः सत्कार-कमलयाः सादरं समर्पितम् ।
—(स० सम्पादकः)

संस्कृत-साहित्य-समाज-सदस्याः।

संस्कृत-साहित्य-समाजस्य प्राचीनमन्त्रणा-समितेरधिवेशनं फाल्गुनशुक्लप्रतिपदि मार्चमासस्य १३ तमे दिवसे सुप्रभातकार्यालये सम्पन्नम्। तत्र चागामि-वर्षस्यकृते समित्या अधोनिर्दिष्टप्रकारेण निर्वाचिताः—

पदाधिकारिणः—

प्रधान-सभापतिः—महामहोपाध्यायः श्रीप्रमथनाथ भट्टाचार्यः, तर्कभूषणम्।

सभापती—म०म० श्रीमुरलीधरझा, ज्योतिषाचार्यः
म० म० श्रीरघुनन्दनत्रिपाठी (विहार)

संयुक्त-सभापतयः—म० म० श्रीगिरिधरशर्मा चतुर्वेदी (राजपुताना)
म०म० श्रीहरिहरकृपालुमहाशयः (विहार)
म० म० श्रीहाथीभाईशास्त्री (गुजरात)
म० म० श्रीतातासुब्बारायशास्त्री (मद्रास)

अर्थमन्त्री— पण्डित श्रीअनन्तरामशास्त्री
मन्त्री— ,, श्रीकेदारनाथशास्त्री सारस्वतः
सहायकमन्त्री—(रिक्तस्थानं विद्यते)
धर्मपरिषन्मन्त्री—,, श्रीविन्ध्येश्वरीप्रसादशास्त्री
प्रचारमन्त्री— ,, श्रीरुद्रदेवशास्त्री वेदाचार्यः
सम्पादकः— ,, श्रीगोपालशास्त्री 'दर्शनकेसरी'
स० सम्पादकः— ,, श्रीसरयूप्रसादशास्त्री 'द्विजेन्द्र'
व्यवस्थापकः— ,,श्रीसत्यनारायणशास्त्री कविराजः
आयव्ययनिरीक्षकः ,,श्रीविक्रमादित्यत्रिपाठी आचार्यः
कार्यालयनिरीक्षकौ ,,श्रीविद्याधरझा बी. ए.
,,श्रीबलदेवमिश्र ज्योतिषाचार्यः।

विशेषसदस्याः—

१. म०म० श्रीदेवीप्रसादशुक्लः कविचक्रवर्ती
२. सर्वतन्त्र-स्वतन्त्र पं० श्रीबालकृष्णमिश्रः

[२६३ पृष्ठावशिष्टम्]

भणितव्यमस्ति? यदि कदाचित्, कथमपि, कैश्चिदन्तेवासिभिः संस्कृतभाषाभाषणे स्वकीयोऽत्साहः प्रदर्श्यते, तदात्वन्यैस्तत्सहाध्येतृभिश्छात्रैस्तद्भाषणे छिद्रान्वेषिवत् केवलमशुद्धतैवान्विष्यत इति महदाश्चर्यम्? किम्बहुना, संस्कृतभाषाभाषणे केवलन्तैरसमर्थतैव न प्रदर्श्यते, किन्तु लज्जापि। इयं हि संस्कृतच्छात्राणामात्मिक-बलावनतिः। प्रत्येकैः संस्कृतच्छात्रैरिदं किल प्रतिज्ञातव्यमस्ति यन्मिथो भाषणपत्रादि-व्यवहारो हि सर्वदा गीर्वाण-विद्यायामेव सम्पादनीय इति। संस्कृतविद्यायाश्छात्रैस्तद्भाषायामेवं शक्तिर्विवर्धनीया विद्यते, यथांग्लभाषायाश्छात्रैस्तद्भाषाविशारदैश्चापि देवभाषान्तेवासिनां जुगुप्सां विहाय, मुक्तकण्ठं प्रशंसा विधेया भविष्यतीति दिक्। एवं करणेनैव संस्कृतच्छात्राणामात्मिकबलह्रासो न भविष्यतीत्यलम्।

३. पण्डित-श्रीरघुवीरशास्त्री वैद्यराजः
४. „ श्रीविद्याधरशर्मा गौड़ः, वेदाचार्यः
५. „ श्रीदेवीनारायणशर्मा बी.ए.एल.एल.बी.
६. „ श्रीमदनमोहनशास्त्री
७. „ श्रीसभापति-उपाध्यायः, व्याकरणाचार्यः
८. „ श्रीतारादत्तपन्तः, साहित्याचार्यः
९. „ श्रीजगन्नाथवाजपेयी, आयुर्वेदाचार्यः
१०. „ श्रीराजनारायणशास्त्री, व्याकरणाचार्यः
११. „ श्रीमहादेवशास्त्री, साहित्याचार्यः
१२. „ श्रीप्रतापसिंहमहोदयः, कविराजः
१३. „ श्रीकाशीनाथशास्त्री, वैदिकः
१४. „ श्रीतारापदो भट्टाचार्यः
१५. „ श्रीदामोदरशास्त्री, कविराजः
१६. „ श्रीरामशास्त्री महोदयः
१७. „ श्रीबालमुकुन्दशर्मा सारस्वतः
१८. श्री बाबू जयशङ्करप्रसादमहाशयः
१९. श्री बाबू शिवपूजनसहायो हिन्दी-भूषणम् ।

पत्र-प्रकाशन-समिति-सदस्याः—

१. श्री तर्करत्न-न्यायरत्नेत्याद्यनेकबिरुद-विभूषितः सर्वतन्त्र-स्वतन्त्रो मध्वसम्प्रदायाचार्यः श्री १०८ श्रीदामोदरलाल-गोस्वामिमहोदयः (निरीक्षकः)
२. श्री गोपालशास्त्री 'दर्शनकेसरी' (सम्पादकः)
३. श्री द्विजेन्द्रकविः (स० सम्पादकः)
४. श्री सत्यनारायणशास्त्री (व्यवस्थापकः)
५. श्री केदारनाथशास्त्री सारस्वतः (मन्त्री)
६. श्री विन्ध्येश्वरीप्रसादशास्त्री
७. श्री शिवपूजनसहायः, हिन्दी-भूषणम् ।

धर्म-परिषद्विभागस्य सदस्याः—

१. श्री तर्करत्न-न्यायरत्नेत्याद्यनेकबिरुद-विभूषितः सर्वतन्त्र-स्वतन्त्रो मध्वसम्प्रदायाचार्यः श्री १०८ श्रीदामोदरलाल-गोस्वामिमहोदयः
२. म० म० श्री प्रमथनाथभट्टाचार्यः तर्कभूषणम्
३. म० म० श्री अन्नदाचरण-तर्कचूड़ामणिः
४. म० म० श्री मुरलीधरझा ज्योतिषाचार्यः
५. म० म० श्री देवीप्रसादशुक्लः कविचक्रवर्ती
६. पण्डित श्री अनन्तरामशास्त्री महोदयः
७. „ श्री बालकृष्णमिश्रः, न्यायारण्य-केसरी
८. „ श्री रामभवनशास्त्री व्याकरणाचार्यः
९. „ श्री राधाप्रसादशास्त्री धर्माचार्यः
१०. „ श्री हरिनारायणत्रिपाठी, व्याकरणाचार्यः
११. „ श्री विन्ध्येश्वरीप्रसादशास्त्री (मन्त्री)
१२. „ श्री सभापति उपाध्यायः, व्याकरणाचार्यः
१३. „ श्री चिन्नस्वामी शास्त्री मीमांसाकेसरी
१४. „ श्री गोपालशास्त्री दर्शनकेसरी
१५. „ श्री तारादत्तपन्तः, साहित्याचार्यः ।

विशेषसूचना—सं० सा० समाजस्य पञ्चमवार्षिकाधिवेशन-विवरणमत्र स्थानाभावान्न प्रकाशितम् । आगामिन्यङ्के तद्विस्तृत-विवरणं प्रकाशितं भविष्यतीति विदाङ्कुर्वन्तु श्रीमन्तः सुप्रभातपाठकाः । सचाङ्कः 'समाजाङ्कः', भविता तत्पौषप्रथमाङ्कश्चापि "वैदिकाङ्कः" । तत्र वेदविषयका गवेषणादिपरिपूर्णा लेखा अपेक्ष्यन्त इति विदुषोऽभ्यर्थयते, यद्द्रुतमेव तान् सम्प्रेष्यानुगृह्णन्त्विति ।

—(स० सम्पादकः) ।

सम्पादकीयम्

राजनीतौ संस्कृत विदुषां प्रवेशः ।

पूर्वं हि वर्णाश्रममर्य्यादाप्राधान्येऽस्मिन्भारते जन्मना क्षत्रिया वीर्य्यवन्तो राजानो बभूवुः, धर्म-शास्त्र-प्रणेतारश्च जन्मना ब्राह्मणा विद्यावन्तो महर्षयोऽभूवन् । यैश्च प्रवर्तिता नियमास्तदानीन्तनै राजर्षिभिः स्वप्रजासु प्रचारिताः स्वयञ्च तन्नियमानुसारमेव व्यवजहुः । कियतः कालादघटनघटना-पटीयसो भगवतः कालात्मनो माहात्म्यात् परस्परं कलहायमानैः क्षत्रियपार्श्वैर्यवना राजान आनायिषत, ततश्च तेषामत्याचार-पीडितैस्तदानीन्तनैर्विज्ञै राजनीतिविद्भिरार्य्यैरियं वर्तमानशासनपद्धतिर्गौराण्डजातिहस्ते निक्षिप्ता । या चेदानीमात्मन ईश्वरदत्तभारतशासनाधिकारित्वं प्रख्यापयति । नेतृभिः पौनः-पुन्येनानुरुध्यमानापि स्वराज्यायोग्यान् भारतीयान् प्रमाणयितुं सोपधि बहुविपरीतं चेष्टते—इति नास्त्यविदितं तदीयचङ्क्रमणपरिचितिचणानां विचक्षणानामिति ।

अस्तु, सा हि बहुशोऽनुरुध्यमाना, बहुभिश्च भर्त्स्यमाना, कियद्भिश्च प्रार्थ्यमाना, बलवद्भिश्च गृहीतकण्ठा कथंकथमपि कियन्तमधिकारं शिक्षास्वास्थ्यविषयकं दत्तवती भारतीयेभ्यः । तत्रापि प्रातिनिध्यविधयैव भारतीयानां कियतां भवति प्रवेशः, प्रान्तीयनियमनिर्मापिकासु तथा भारतीयव्यवस्थापिकासु च सभासु, तत्रप्रतिनिधिनिर्धारणनियमे कियत्यो योग्यता अपेक्ष्यन्ते । तत्र शिक्षायोग्यताऽपि गण्यत एका । यथा ये इंग्लिशपरीक्षायां बी. ए. परीक्षोत्तीर्णाः सन्ति तेऽपि प्रतिनिधिनिर्वाचने समर्था इति । अत्र स्वभावत एव संस्कृतज्ञा विद्वांस उदासते । यतो हि य एकदा सम्राजां राज्यासनाधिरोहणप्रच्यावनयोः समर्था आसन् । तथाहि—

‘ये देवा देवसुवः स्थ त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानां राजा’ इति ॥

(हे देवा अग्न्यादयो ये यूयं देवसुवो यजमानप्रेरकाः स्थ ते यूयमिमं यजमानमामुष्यायणम् अमुष्य देवदत्तस्य पुत्रममुष्य पौत्रं अनमित्राय शत्रुराहित्यार्थं सुवध्वं स्वीजानीध्वं । किंच महते क्षत्रायानुत्तम-क्षत्रियकुलाय, महते अधिपत्याय अप्रतिहतनियमनसामर्थ्याय, महते जानराज्याय जनसम्बन्धि यद्राज्यं तस्मै सार्वभौमत्वाय सुवध्वं अनुजानीत । हे भरता राजन्यवैश्यादयो धनिका एष यजमानो युष्माकं राजा, एनं स्वामिनं यथोचितं सेवध्वमित्यभिप्रायः । सोम उत्तमदेवोऽस्माकं ब्राह्मणानां राजा नत्वयमो यः क्षत्रियः इति श्रुत्यर्थः ।)

इत्यादि वेदवचोभिः सूच्यते । त एवाद्य एवमुपेक्ष्यन्ते यत् सर्वत्रैव राजसभासु राजकीयकर्मसु च नैव केऽपि गण्यन्ते प्रत्युत इदानीं पाश्चात्यशिक्षावायुविकृतचेतोभिस्ते सर्वथोपहस्यन्त एव । अस्मिन् व्यतिकरे ब्राह्मण-पण्डितैर्वर्णाश्रम-मर्य्यादापालनपरायणैर्नैवमुपेक्षया वर्तितव्यम् । कालो हि प्रबलप्रतापो रङ्कान्नृपान् करोति धनिनश्चाधनान् विदधाति—इति नियतिप्रवाहस्तैस्तैरधुना लोकव्यवहारे दृष्टिपातो विधेय एव । चिकित्सकचूडामणिर्वाग्भटोऽप्येवमेवाह । यथा—

"त्यागः प्रज्ञापराधानामिन्द्रियोपशमस्स्मृतिः ।
देशकालात्मविज्ञानं सद्वृत्तस्यानुवर्तनम् ॥"

किम्बहुना, संस्कृतविदुषामुपेक्षयैवान्ये सर्वेऽपि स्वात्मानं नेतृत्वेन प्रख्यापयन्तः सर्वत्रैव राजसभासु प्रविशन्तः स्वयमेव धर्म-नियमादिनिर्माणमाचरन्तः मात्सर्य्यादि-मानवसामान्यदोषाभिभूता उपेक्षन्ते संस्कृतज्ञान् विदुषः, धर्मशास्त्रपद्धतिश्चावहेलयन्तः स्वयं कामचारं चरन्त्यन्याँश्च चारयन्तीति सर्वतोऽप्युपद्रुतेयमस्तीदानीं भारत-वसुन्धरा । अतो बद्धाञ्जलिरभ्यर्थये मान्यान्, अनुरुन्धे समवयस्कान्, आज्ञापयामि विनेयान्, यत्ते बद्धपरिकरा भवन्तु सर्वत्रैव राजनीतिसभासु प्रान्तीयसभा-(लेजिस्लेटिभ् कौंसिल) मण्डल-सभा-(डिस्ट्रिक्टबोर्ड) नगर-सभासु (म्युनिसिपैलिटी) च प्रेष्यमाण-प्रतिनिधि-निर्वाचनयोग्यताधिकारे संस्कृतपरीक्षोत्तीर्णानामपि प्रवेशं कारयितुमिति । एवं वर्तमानराजनीतिमार्गा-वतीर्णानां संस्कृतविदुषां सम्पर्कमधिगत्य साधारणजनतापि द्रुतमेव परिचिता भविष्यति वर्तमान-राजनीतिपद्धत्या । नेतारोऽपि स्वकामचारं परित्यज्य भारतीसंस्कृति-प्रेमपरायणा एव भविष्यन्तीति "एकां क्रियां द्व्यर्थकरीं" विमृशन्तु सुधियः सुमनोयोगेनेत्यभ्यर्थ्य्यैव विरम्यते ।

× × × ×

श्रीमन्तः श्रीभगवान्दासमहोदयाः ।

एतेषां महोदयानां षष्टितमवर्षीयजन्मदिवस-समुत्सवे काशीस्थ-हिन्दू-स्कूल-सं० सं० समित्या समर्पितमभिनन्दनं पठितमेव स्यात्सुप्रभातपाठकैः । गतमासे स्वीयोपाधिवितरण-महोत्सवे सपरिषत्सदस्यैः हिन्दूविश्वविद्यालयीय-वर्तमान-चाँसलर-महोदयैः काशीविद्यापीठकुलपतिभ्यः प्राच्य-पाश्चात्यानवद्यविद्याविद्योतितान्तःकरणेभ्यो जगत्प्रसिद्धेभ्यो विद्वच्छिरोमणिभ्य एभ्यो महोदयेभ्यः "डाक्टर" इति विरुदं प्रदाय यत् स्वीयगुणिपूजाप्रेमाविरकारि, तत सपरिषत्सदस्यानां तेषां सौजन्यविवेकविलसितं प्रशंसनीयतरमेव ।

अन्यच्च, श्रीमद्भिः श्रीभगवानदासमहोदयैरेव प्रथमतो हिन्दू-कालिजरूपेण प्रतिष्ठापितं बीजमिदानीं हिन्दूविश्वविद्यालयत्वेन परिणतमिति सर्व एव तद्वृत्तवेदिनो विद्वांसो जानन्ति । तत एवोद्भूतां स्वीयामिमां योग्यसत्कृतिं स्वीकुर्वतां तेषां महानुभावानां चेतसि कीदृगमन्दानन्दपायोनिधिरान्दोलितः स्यादिति तैरेवानुभूतम्भवेत् । विरला एवेदृशानामानन्दसन्दोहानां भाजनानि भवन्ति पुरुषपुङ्गवाः । इतीमं सुयोगं वयम्भूयोभूयोऽभिनन्दामः ।

समालोचना-सारः ।

'युवकः'

हिन्दी-मासिक-पत्रस्यास्य सम्पादकः प्रकाशकश्च सम्पादनपटुः श्रीरामवृक्षशर्म्मा (बेनीपुरी)। प्राप्तिस्थानम्-"युवक-आश्रम", पटना। वार्षिक-मूल्यम् ४) प्रत्येकस्य च मूल्यम् ।=)

अस्य सम्पादनं महता चातुर्य्येण भवतीतित्यलं बहुवक्तव्येन । सम्पादकमहोदया 'बालक'-सम्पादनवसरे तद्धिताय यथा प्रयत्नवन्तस्तथैवात्र 'युवक'-सम्पादनेऽपि प्रयत्नशीला भविष्यन्तीत्यस्माकं सुदृढो विश्वासः । पत्रमिदं सहृदयेषु विशेषतो राष्ट्रभाषाभाषि-भारतीय-नवयुवक-सुकोमलहृदयेषु नवजीवनोत्पादने नूनं सफलीभविष्यति ।

अस्यच लेखा हृदयग्राहिण उत्साहवर्द्धकाः सुपाठ्याश्च सन्तीति तत्पठनेनैव विज्ञायते । सत्स्वप्यत्र बहुविध-वैचित्र्येषु चित्रेषु न किमपि वैचित्र्यम् ! ततोऽप्यावरणपृष्ठस्थं मुखचित्रन्त्वतीवानुपयुक्तमेतत्कृते इति तद्दर्शनेनैव प्रतीयते । अतो यदि तत्स्थाने राष्ट्रभावाभिव्यञ्जकं किमप्यन्यच्चित्रमभवेत्तदा "सुवर्णे सुगन्धः" स्यादित्यस्माकमभिप्रेतम् । अथाशास्महे यदुत्साहिनो नवयुवकवर्गा अवश्यमेतदाग्रावधास्यन्तीति ।

भारत-भूषण-पञ्चाङ्गम्—

सं० १९८६ वैक्रमाब्दीयं तिथिपत्रमिदम् । ज्योतिषाचार्य्याभ्यां श्रीरामनिहारद्विवेदि-श्रीरामानन्द-मिश्राभ्यां विनिर्माय लोकश्रेयसे प्राकाशितम् । सर्वथोपादेय-ज्ञातव्य-पर्वनिर्णय-यात्राविवाह-मुहूर्त-निश्चय-मिलापक-चक्रादिसमन्वितम् । प्रतिभाति जिघृक्षुभिः ।=) आणकद्वयस्य चिटिका (टिकट) श्रीपण्डित-रामनिहारद्विवेदी, ज्यौतिषाचार्य्य, धर्मकूप-काशी-इति सङ्केतेन प्रेषणीया ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

सौर-चैत्रे १९८५ वैक्रमाब्दे ।

पञ्चम-वर्षं
Vol. 5

April 1929.

द्वादशोऽङ्कः ।
No. 12.

वार्षिक मूल्यम्—३)
माननीयेभ्यः—१२)

छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य मुखपत्रम् ।

तिमिर·ततिमुदस्यन् भेदतारा विलुम्पन्, नयदधि-सुरभाषाभाषि-जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयन् भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्' ।

निरीक्षकः—

महामहोपाध्याय–श्रीदेवीप्रसादशुक्लः, कविचक्रवर्त्ती, साहित्य-वारिधिः

सम्पादकः—
दर्शनकेसरी श्रीगोपालशास्त्री त्रिपाठी
"साहित्याचार्य्यः"

स० सम्पादकः—
पाण्डेय-श्रीसरयूप्रसादशास्त्री (द्विजेन्द्रः)
"काव्यतीर्थः"

व्यवस्थापकः—
श्रीसत्यनारायणशास्त्री " कविराजः "
(टेढ़ीनीम, बनारस-सिटी)

अस्याङ्कस्य मूल्यम् ।)

लेख-सूची

—:***:—

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम् ।

पञ्चम-वर्षे	सौर—चैत्रे १९८५ विक्रमाब्दीये	द्वादशोऽङ्कः ।

राष्ट्रगानम् ❋

(दादरावृत्तिः)

वन्दे त्वां भूदेवीम् । आर्यमातरम् ।
जयतु जयतु पद-युगलं, ते निरन्तरम् ॥ध्रुवम् ॥
शुभ्र-शरच्चन्द्रयुक्त-चारु-यामिनीम् ।
विकसित-नवकुसुम-मृदुल-दाम-शोभिनीम् ।
मन्दस्मितयुक्त-वदन-मधुरभाषिणीम् ।
सुजलां, सुफलां, सरलाम् ;
शिववरदां, चिरसुखदां, मुकुलरदाम् ॥ आर्य० ॥१॥
वशकत्रयकोटिजन-कण्ठनादिनीम् ।
अमितभुजां धृतसदसीं तनयतारिणीम् ॥
हिमनगजां स्वाभिमान-बुद्धिदायिनीम् ।
कमलाम्, अमलाम्, अतुलाम् ;
रिपुहरिणीं, बलकरिणीं, धृतनलिनीम् ॥आर्य० ॥२॥
धर्मस्त्वं शर्म त्वं त्वं यशोबलम् ।
शक्तिस्त्वं भक्तिस्त्वं कर्म चाखिलम् ॥
प्रतिसदनं प्रतिमा ते त्वं महाबलम् ।
धरणीं, भरणीं, जननीम्;
कविप्रतिभां, नतसुलभां, जगदम्बाम् ॥ आर्य० ॥३॥

❋ संस्कृत-साहित्य-समाजस्य वार्षिकाधिवेशन-प्रारम्भे गानमिदं काशी-विद्यापीठस्य छात्रैः सुस्वरं गीतं वाद्यस्य साहाय्येनेति ।
—(स० सं०)

सभापतेरभिभाषणम् *

* श्रीहनुमते नमः *

मैथिलीहेतुमाश्रित्य हनूमान् भरतप्रियः ।
भारते राजतेऽद्यापि तं नमन् मुरलीधरः ॥१॥
ब्रूते स्तोकं बुधाः सर्वे शृण्वन्तु यद्रोचकम् ।
दूरं निरस्य यत्किञ्चित् सारलेशं भवेद्यदि ॥२॥
भवद्भिः कृपयाऽऽहूतः सभास्वाम्येन सत्कृतः ।
अयोग्यो योग्यतां प्राप्तुमाशासे श्रीमदग्रतः ॥३॥
श्रीसंस्कृत-सुसाहित्य-समाजस्याधिवेशने ।
पञ्चमे पञ्चम इव तर्केऽहंस्यामपि ध्रुवम् ॥४॥
अत्राधिवेशने सभ्यैः सनातनपथानुगैः ।
भाव्यं भव्यं तदैव स्यादन्यथा शोक उच्चकैः॥५॥
राष्ट्रीयं मङ्गलं गानं किं कुतोऽत्राधिवेशने ।
शास्त्रीयञ्चेदवश्यं तद्रोचकं मन्मतं त्विदम् ॥६॥
राष्ट्रीया नागरी भाषा भवत्वत्र क्षतिर्न हि ।
तदर्थं बहवः सन्ति शङ्खभेरी-निनादकाः ॥ ७ ॥

किन्तु ते संस्कृतार्थं हि करतालं न कुर्वते ।
पण्डिता झल्लरीवादं राष्ट्रीयार्थं प्रकुर्वते ॥ ८॥
नागरीचालका गालीरर्पयन्ति स्वपत्रके ।
पण्डितेभ्यः सदा ते तु विधवाधर्मलुण्ठकाः॥६॥
धर्मशास्त्रं विनिन्दन्ति वेदान् विप्रान् सनातनान्।
किन्तैः कार्यं बहिरथैर्हि सेत्स्यतीति विचारणा १०
इत्यादि कारणं प्रायः पण्डितानां समागमे ।
सुसंस्कृतसमाजेऽस्मिन् बुधा जानन्तु तत्त्वतः११
परीक्षानर्त्तकी देशे नरीनृत्यति राक्षसी ।
वेदं शास्त्रं पुराणानि भुक्त्वा नास्त्यत्र शेषकम्१२
नाममात्रेण सन्तुष्टा वयमत्राप्रयोजकाः ।
भवन्तोऽद्य नवीना हि साधयन्तु स्वपौरुषम्१३
वयं जीर्णा कार्यमुक्ता काशीनिर्वाणलोलुपाः ।
भवतां प्रेमबद्धा वै जीवाम इति शं शुभम् ॥१४॥

रामकटोरा, काशी ।
५-३-२६

बद्धकरयुगलो भवदीयो—
मुरलीधरझा ।

* सं० सा० समाजस्य पञ्चमवार्षिकाधिवेशने तृतीयदिवससभापतीनां म० म० पं० श्रीमुरलीधरझा ज्योतिषाचार्य्य-महोदयानामभिभाषणमिदम् । —(सं० सं०)

संस्कृत-प्रहसनम् ❀

(प्रियदेशशर्म-खड्डेशास्त्रिणोः प्रवेशः)

खड्डेशास्त्री—अये प्रियदेशशर्मन् ! अस्तु, भवतः कथनेन इदन्तु मया सम्यग् ज्ञातं यद् दक्षिणस्यां दिशि एव विन्ध्यः पर्वतः, ततोऽपि अग्रे बहवो देशाः सन्ति । काञ्ची-विशाला-प्रभृतयो महानगर्य्यश्च तस्यामेव दिशि विद्यन्ते इति ।

पश्चिमायामपि प्रयागः, कान्हपुरम् , इन्द्रप्रस्थमिति । ओ हो ! उत्तरस्यां वर्तते गोरक्षपुरम्, नैपालदेशोऽपि कोऽपि अस्ति यस्तस्यामेव दिशि वर्तते । अपरन्तु इदं मयाऽपूर्वमेवाद्य ज्ञातं यत् पाटलिपुत्रं पूर्वस्यां दिशि वर्त्तते । अहो ! इदं कस्मादृशीतं भवता ? अहं तु वारद्वयम् प्रथम-मध्यम-परीक्षे दातुं पुष्पपुरं गतवान् । परन्तु एतन् नाज्ञासिषम् यत् कां दिशमवलम्ब्य तन्नगरमिति ।

प्रियदेशशर्मा—अये खड्डेशास्त्रिन् ! अत्र किमाश्चर्यं विद्यते । वयं राष्ट्रभाषा-(हिन्दी)-विद्यालय एव भूगोलेतिहासाध्ययनकाले सर्वत्रप्रथममिदमेव पठामो, यदस्यां दिशि एतन्नगरं विद्यते, इमानि वस्तुजातानि तत्राविर्भवन्तीति । किं भवन्तोऽत्यावश्यकं वस्तु भूगोलगणितेतिहासादिकमपि न जानन्तीत्यहो आश्चर्यम् !

खड्डेशास्त्री—सखे प्रियदेशशर्मन् ! किं पृच्छसि, अद्यतु भवन्मुखादेव शृणोमि यत् भूगोलगणितेतिहासादिकमपि किञ्चिद् वस्तुजातमस्तीति । पूर्वन्तु एतस्य नामापि न श्रुतं मया, अध्ययनन्तु दूरे तिष्ठतु । अस्तु, इदमद्य भौगोलिकं ज्ञानमुपदिश्य भवता मम बहु-उपकृतम् । किमहं वच्मि, अस्माकमध्यापका लोकव्यवहारानभिज्ञाः साधव एव । तेऽस्माकमध्ययनाध्यापनादिव्यवस्थायां किमप्यवदधत्येव न हि । ते हि नेत्रे निमील्य तान्येव पुस्तकानि पाठयन्ति, यानि राजकीयपरीक्षासु निर्धारितानि सन्ति । वयं कूपे पतामः । देशः कुम्भकारपचने भस्मसाद् भवतु । किन्तेन तेषां महात्मनां प्रयोजनम् । ते तु युधिष्ठिर-राज्यमिदमिति कृत्वा सुखं शेरते । तेषां विज्ञानमेव नास्ति यच्चाणक्यस्यापि पितृव्यपत्नीयं वर्तमानशासनपद्धतिः । बलिवर्दवत् शृङ्गघर्षणेनैव इतो मृदुद्रेको भवतीति ।

प्रियदेशशर्मा—अयि खड्डेशास्त्रिन् ! विस्मरति भवान् । मया तु बहुशः पठितम् इतो निर्गच्छति 'सुप्रभात'-पत्रे यद् राजकीय संस्कृत-परीक्षायां भूगोलेतिहासयोरपि भवतु प्रवेश इति । अतो मिथ्या वदति भवान् यदस्माकमध्यापका नावदधत्यत्र विषय इति । इदानीं काश्यां संस्कृत-साहित्य-समाजेन तु नूतनयुगपरिवर्त्तनमेव कृतमस्ति संस्कृत-जगति । "पण्डिता अलसा भवन्ति, ते सार्वजनीनं

* प्रहसनमिदं संस्कृत-साहित्य-समाजस्य पञ्चमवार्षिकाधिवेशने काशी-विद्यापीठस्य च्छात्रैरभिनीतम् । (स० सं०)

कार्य्यं न कुर्वन्तीति" लाञ्छनं तु संस्कृत-साहित्य-समाज-सदस्यैः स्वोद्योगेन सर्वथैवापाकृतमेव ।

खड्डेशास्त्री—ह ! ह ! ह ! प्रियदेश ! त्वमपि अहमिव कूप-मण्डूक एवासि, किमपि न जानासि । हरे ! हरे ! सुप्रभातम् ! सुप्रभातम् !! सुप्रभातम् केऽपि पण्डिताः पठन्ति अपि तत् पत्रम् ? अहमेकदा तज्जिघृक्षुः स्वगुरुमभ्यधाम् यद्भो गुरो ! अहं सुप्रभातपत्रं पठितुमभिलषामि । तत्र बहव उपयोगिनो लेखाः सन्ति-इति । स तु लगुडं गृहीत्वा मां ताडयितुमुद्यतः । हा ! हा ! समाचारपत्रं पठिष्यसि? अरे ! कौमुदीं खाद, कौमुदीं पिब, कौमुदीं गृहीत्वा स्वपिहि, कौमुदीं गृहीत्वा जागृहि । जगति किं भवतीति ज्ञातुमिच्छामपि न कुरु । चुल्ल्यां पततु तत्सुप्रभातम् कुप्रभातमिति ।

प्रियदेशशर्मा—खड्डेशास्त्रिन् ! किं तर्हि भवता गुरोराज्ञा पालिता न वा ?

खड्डेशास्त्री—प्रियवर ! आज्ञापालनस्यावसर एव नागतः । तदानीमेवावयोः कलहं श्रुत्वा पाठशालाध्यक्षस्तत्र समागतः । स च ममाध्यापकं बहु विनिन्द्य सर्वानप्यस्मान् सुप्रभातं पठितुमुपदिदेश, अपराण्यपि च हिन्दीपत्राणि पठितुमुपदिष्टवान् । ततः प्रभृति सर्वेऽपि छात्राः सुप्रभातं पठन्ति ।

प्रियदेशशर्मा—अस्तु, ईश्वरो भवतां कल्याणं विदध्यात् । साधु ! भवन्तो देशकालात्मविदो भवन्तु !! अधुना मया गम्यते । (यातुमिच्छति)

खड्डेशास्त्री—(वस्त्रं गृहीत्वा) आः ! कथं गमिष्यसि ? बहुदिवसात् मिलितोऽसि । मम बहु-प्रष्टव्यं विद्यते, अयं मम सुहृदपि समागतोऽस्ति । अयमेव इत आरभ्य त्वया सह वार्तां करिष्यति ।

(खड्डेमित्रस्य प्रवेशः)

प्रियदेशशर्मा—भोः खड्डेमित्र ! वद, वद, किन्ते वक्तव्यमस्ति ?

खड्डेमित्रम्—भोः प्रियदेशशर्मन् ! शृणोमि भवान् बहु देशभक्तोऽस्ति । इदन्तु ब्रूहि यदधुना स्वदेशि-वस्त्रान्दोलनं प्रवर्त्तते-इति यज्जनाः कथयन्ति तस्य कोऽर्थः ? किं स्वदेशि-वस्त्राणां कोऽपि समुद्रोऽस्ति यस्मादान्दोलनं नाम जलप्रवाह उद्वेलते-इति ।

प्रियदेशशर्मा—भोः खड्डेमित्र ! अस्मादेव कारणात् सर्वे जना भवद्विधान् [1] कूपमण्डूकोपाधिभिर्विभूषयन्ति । राम ! राम !! भवानेतदपि न जानाति यत् स्वदेशि-वस्त्रान्दोलनस्य कोऽभिप्राय इति? केवलं लम्बशाटपटावरणमेव कर्तुं जानासि!!! अस्तु, शृणु महात्मन्, गेहेनर्दिन् ! इतो भारतदेशादेव रूप्यकेणैकेन सप्त सेटकानि अष्टौ सेटकानि वा क्रीत्वा कार्पासकानि विदेशेषु हरिवर्षादिषु ('योरप' इति भाषया ख्यातेषु) प्राप्यन्ते । तत्रत्या उद्योगिनो मानवास्तत एव तूलं निर्माय तद्योजत एवैकं रूप्यकं सम्पादयन्ति । अवशिष्टात्तूलात्तु एकस्मिन्नपि सेटके सूक्ष्मातिसूक्ष्माणि सूत्राणि निर्मान्ति, येन च धौतद्वयं धौतत्रयं वा सम्पादयन्ति । तानि पुनरपि भारते वर्षे प्रेषयन्ति, यानि च भवन्त एव क्रीणन्ति । एवं विदेशि-वस्त्रद्वारा नदीप्रवाह इव भारतीयं द्रव्यं प्रतिवर्षं हरिवर्षं गच्छति, अत्र च सुवर्णभूमौ दैनंदिनं दारिद्र्यमेव समेधते ! एतस्य सर्वस्यापि भवद्विध एव निदानम् । तदेव भारतवर्षाद्वाह्यमानं द्रव्यम्

(स्वदेशी आन्दो)लनोद्धुमत्रत्या नेतारो यतन्ते । तस्य कृते प्रतिग्रामं प्रतिनगरं प्रचारं कुर्वन्ति, यत्र कोऽपि विदेशिवस्त्रं क्रीणन्तु-इति । अयमेव स्वदेशि-वस्त्रान्दोलनस्याभिप्रायः । पश्य कोऽपि, पुरत आयाति ।

(अनुकरणदासस्य प्रवेशो विदेशीयपरिच्छेदेन)

अनुकरणदासः— (खड्डेमित्रं दृष्ट्वा क्रोधान्वितो भूत्वा (?)स्यैवापशब्दादिकम् आंग्लभाषायां वदति—) "ओह् ! व्हॉट ए फूलिश मॅन ही ईज ! सी, ही पुट्स् ऑन दि चोंगा इन् धिस् रिफॉर्मेशन पीरिअड् ऑफ़ दि ट्वेंटिएथ संच्युरी ! ब्लड़ीफूल ! नॉन्सेन्स !! वेल् बट् आय् मस्ट नॉट फ़र्गेट दॅट् ही (इ)ज माय् ओल्ड् फ्रेंड् ॲण्ड ॲकॉर्डिंगली आय् मस्ट शेक् माय् हॅण्ड वुइथ हिज़् ! हॅलो मिस्टर खड्डेमित्र, गुड् इव्हिनिंग ! हाऊ आर यू" *

[अनुकरणदासस्तस्य पार्श्वं गत्वा हस्तस्पर्शं करोति, तस्य (ह)स्तं वेगेन कम्पयति । खड्डेमित्रं तु स्वहस्तं कृषति, (ना)सिके संकोचयति, अङ्गानि शिरश्च चालयति, हस्तपादौ (क्षि)पति । अनुकरणदासः स्तब्धीभवति, प्रियदेशशर्मा हसति ।]

खड्डेमित्रम्—अये प्रियदेशशर्मन् ! अहन्तु म्लेच्छेनानेन स्पृष्टः सचैलं स्नानं कर्त्तुमिच्छामि । हा ! हा ! कोऽयं दुरात्मा मामकारणमेव स्पृष्टवान् (कि)मपराद्धं मयाऽस्य । (तदभिमुखो भूत्वा) अरे दुष्ट दुरात्मन् ! कोऽसि त्वम्, यन्मामकस्मादागत्य स्पृष्टवानसि ? किं मयाऽपकृतं तव ?

अनुकरणदासः—" वेल् सर्स ! सी हिम—आय् डिड् नेव्हर सी सच् ए वाइल्ड फ़ेलो बिफ़ोर ! आय् ॲम् अनुकरणदास, हिज़ ओल्ड् फ्रेंड़, ॲण्ड वीइङ्ग् हिज़ ओल्ड् फ्रेंड़ आय् वुइश् टु सॅल्यूट् हिम् ॲण्ड ही रन्स् अवे फ़्रॉम मी ॲज़ ए बुलक् फ़्रॉम ए रेड रॅग ! ओह् ! नो वेटर, दॅन् ए बीस्ट !!"[२]

प्रियदेशशर्मा—(खड्डेमित्रं लक्ष्यीकृत्य) अयि महात्मन् ! अयं अनुकरणदासस्तव पुरातनं मित्रमात्मानं ख्यापयति । किं भवान्न परिचिनोत्येनम् ?

[खड्डेमित्रम् उपनेत्रं नेत्रयोः संयोज्य अनुकरणदासमग्रतः पृष्ठतः पश्यति, शिरस्त्राणमुत्तारयति, बाहू चालयति, पश्चात्परिचयं लब्ध्वा तमालिङ्गति, स्वयं संस्कृते हिन्दीभाषायां च वक्ति, अनुकरणदासस्तु 'इंग्लिशि' वक्ति । परस्परं कोऽपि कस्यापि कथनं नावगच्छति ।]

खड्डेमित्रम्—किम्, अनुकरणदासोऽयम् ? कुत्र इयन्तं कालमासीत् ? किं विदेशे बम्भ्रम्यमाण एतावन्तं कालं यापितवान् ? अहो वैदेशिकभावापन्नः परिचीयते एव न हि सोऽयमनुकरणदास इति ।

अनुकरणदासः—" वेल, डिअर फ्रेंड़ खड्डेमित्र ! डोण्ट " यू रेकग्नाइस् मी ! डोंच्यू नो आय् हॅड् बीन इन इंग्लॅंड फ़ॉर फ़ाइव्ह यीअर्स ॲण्ड् आफ़्टर दॅट आय् ट्रॅव्हल्ड थ्रूआउट ऑल् दि यूरोपिअन कंट्रीज़ ! आय् सॉ दि लार्जेस्ट बिल्डिंग्ज़ ऑफ़ अमेरिका ! ॲण्ड डू यू नो व्हेन् आय् वॉज़ इन पॅरिस, आय् लर्न्ट् दि आर्ट् ऑफ़ डान्सिंग देअर.

---

* (स्वगतम्) हन्त ! कोऽयं मूर्खः ! पश्य, अस्मिन् (स)संस्कृते विंशतितमे शतकेऽयं गतानुगतिकपरः पुरुषः 'चोंगा' (ना)मकं वस्त्रं धारयति-इत्यहो ! अस्य मौर्ख्यम्, अज्ञानं च । (पर)न्तु, अयं मम पुरातनः सुहृदिति तु मया कदाचिदपि न (वि)स्मर्तव्यम् । अतस्तस्य हस्तान्दोलनं कर्तुं मामुचितमेव (प्रति)भाति (प्रकाशम्) भो खड्डेमित्र ! नमस्ते ! कथय, (कथं व)र्तसे ?

२—पश्यन्तु भवन्त एनम्, एतादृग् बर्बरो न पूर्वं कदापि मया दृष्टः । अहमनुकरणदासोऽस्य पुरातनं मित्रम् । तेनैव सम्बन्धेन तं नमस्कर्तुमहमिच्छामि; परन्तु यथाऽऽरक्तेन पटेन बलीवर्दस्तथाऽयमपि मत्तः पलायितुकामः खलु । हा ! हन्त ! ननु पशुतोऽपि नीचतरः प्रतिभात्ययम् ।

नाऊ आय् डू नॉट् लाइक् इण्डिया ! आय् डिस्लाइक हर् रस्टिक् फुड्, फूलिश कस्टम्स् ॲण्ड रूड मॅनर्स् !! आय् फ़ाइण्ड् दि पीपुल् ऑफ़ इण्डिया बार्बरस् ॲण्ड यू आर् ऑल्सो वन् ऑफ़् देम ३

प्रियदेशशर्मा—(उभयोरपि दशां दृष्ट्वा मनसि चिन्तयन्नुभावपि उद्बोधयति खड्डेमित्रं लक्ष्यीकृत्य) अये महात्मन् ! न कोद्रवं प्रशंसनीयमस्ति, नापि वा श्यामाकं निन्दनीयमस्ति । यथा भवान् कूपमण्डूकस्तथाऽयमपि अन्धोऽनुकरणकारी। उभावपि युवां देशमिमं रसातलं प्रापयतः । पश्यतु, धर्मशास्त्रादिषु लिखितमस्ति—

,, न स्यूतेन, न दग्धेन, पारक्येन पटेन च ।
आह्निकं कर्म कुर्वीत, कृतम्वै निष्फलं भवेत् ॥ " इति ।

किं भवानस्य वचनस्यानुकूलं व्यवहरति ? अल्पीयांस एव पण्डिता भवेयुर्ये स्वदेशीयवस्त्रेणैव स्वकीयं सर्वं कृत्यं सम्पादयन्ति, स्वकुटुम्बान् वा परिधापयन्ति ! हा हन्त ! कष्टतरमिदम् । ये खलु पण्डिताः पूर्वं राज्यचक्रं चालितवन्तः तान् एव अस्माकं पण्डितान् ये चलितुमपि न जानन्ति तेऽपि देशद्रोहिणोऽकर्मण्यान् कथयन्ति ! भो सुहृदः, यूयं तु स्वदेशीयवस्त्रं परिधत्त—

३—भोः खड्डेमित्र ! किं भवान् मां न परिचिनोति ? किं भवान् न जानाति, यदहमनुकरणदासः पञ्चवर्षपर्यन्तं 'इंग्लैण्ड' देशे न्यवसम्, अनन्तरं च समग्रे हरिवर्षे पर्यटनं कृत्वा तत्रत्यांश्चेतोहरान् भूमिभागांश्च दृष्टवान् । अमेरुके देशे ('अमरीका' मिथे) प्रविष्टस्तत्र च नभःस्पृशान् प्रासादानवलोकितवान् । तथा च पेरीसनगर्यां मया नृत्यकलायां कौशल्यं सम्पादितम् । न भारतभूरस्य मां प्रीणाति । तत्रोत्पद्यमानं रूक्षं धान्यं, घातकयः प्रथाः' नारक्यो रूढयश्च न मह्यं रोचन्ते । भारतीयाः खलु संस्कृतिहीनाः, त्वमपि तेषामेको बर्बरः ।

खड्डेमित्रम्—(संक्रुद्धः) अलं, अलं, अलम् । मौनमास्ताम् । व्यर्थमेव स्वपाण्डित्यं प्रकाशयसि । जाने, त्वं 'लीडरो' वा 'विष्टरो' वा असि-इति । जाने त्वमेव साधुरसि, अपरे सर्वेऽपि अनभिज्ञा एव । आः ! मन्ये, अयं स्वर्गत एव समागतोऽस्ति । यद् त्वं मम अध्यापकादपि विद्वानसि, यत्तव कथ[…] करोमि ? मम गुरुपादास्तु विदेशीयवस्त्रमेव परिदधति । ते कथयन्त्यपि च यदस्माकं परम्परा एवेदमायाति तत्कथं वयं परित्यजाम इति । गच्छ गच्छ, न वयं तव कथनं करिष्यामः ।

प्रियदेशशर्मा—अरे, अरे ! कथमयमेकपदे एव कुद्धः सञ्जातः ? अस्तु, भो खड्डेमित्र ! त्वं मम वचनं कुरु वा न कुरु-इत्यस्य नास्ति मे चिन्ता । खलु धर्मशास्त्रकर्तॄणां महर्षीणां श्रुतेरपि आज्ञामुल्ल[…] गच्छसि-इत्येव मां दुःखयति ! पश्य—

'देशकालात्मविज्ञानं सद्वृत्तस्यानुवर्त्तनम्'

इति वाग्भटाचार्यो देशस्य कालस्य आत्मन[…] विशेषज्ञानं कर्तव्यमिति डिण्डिमनादं वक्ति अपरं सतो वृत्तस्य समीचीनस्यैवातीतस्यानुवर्त्तनं; न तु 'अन्धेन नीयमाना यथाऽन्धा' इति अन्धीभूय यस्य कस्यापि कुवृत्तस्य कुत्सितस्यातीतस्याप्यनुकर[…] कर्त्तव्यमिति वक्ति । श्रुतिरपि—'यान्यस्माकं सुचरि[…] तानि तानि सेवितव्यानि, नो इतराणि' इत्यादि शति । किमहं वच्मि, भवन्तस्तु इदमपि […] जानन्ति यदियं रूढिः कियतः कालात् प्रचलिता[…] स्ति, इयमिदानीमनुपयुक्ता गर्हिता हेयैवेति मनागपि न विचारयन्ति, सर्वमपि नम्रीभूय गलितवृषभवत् स्कन्धेनावहन्ति—इति ।

(तावदेव कस्यचन मार्गस्थ-विज्ञस्यागमनम् ।)

मार्गस्थः—प्रियदेशशर्मन् ! किम्भवाननेन सह-शुष्ककलहं करोति ? इमे तु महात्मानो भवन्ति महात्मानः ! एते खलु प्रदर्शनालये स्थापयितुं योग्याः सन्ति । किं न पश्यसि एतेषां पाण्डित्यम् ? अरे ! अत्रैव काश्यां ब्राह्मणमहासम्मेलने एतादृशैर्ब्राह्मणैरियं अज्ञानमूलिका आत्मघातिका च निर्धारणा कृता, यत् स्वधर्मानुयायिभ्यो रविदासे-श्वश्चमंकारादिभ्यो गोरक्षकहिन्दुभ्योऽपि परधर्मानुयायिनो मूर्तिभञ्जका वेदविनिन्दका गोहिंसका मोहम्मदीय-तुरुष्कादयो यवनाः श्रेष्ठाः स्पृश्याश्चेति । तेषां यदि देशकालात्मविज्ञानं भवेत्तर्हि कदापीदं न स्यात् । यतो हीमे मोहम्मदीया मोहम्मदस्य जन्मकालत एव सञ्जाताः । परन्तु तत्रत्याः (सम्मेलनगताः) बहवोऽपि पतञ्जलिमहाभाष्यादिषु यवनशब्दोल्लेखं दृष्ट्वा इमानेव स्वच्छन्दव्याख्यान् कल्पयित्वा तत उत्कृष्टान् वदन्ति । (अनुकरणदासं दृष्ट्वा) कोऽयं भो वानराकृतिः, स्वदेशेऽपि विदेशिवदाचरतीति ?

प्रियदेशशर्मा—अयमप्यस्माकं दौर्भाग्यतो विदेशाचारव्यवहारस्य अन्धानुकारी विस्मृतमातृभाषः आङ्ग्लभाषामधीत्य सप्तमे आकाशे नरीनृत्यते । पश्य, अस्य परिच्छदम् । मन्ये, अद्यैव हरिवर्षत आगतोऽयं—(अनुकरणदासमनुलक्ष्य) किम्भो ! कथं शोभसे । कथं न वदसि--

अनुकरणदासः—" व्हॉट ! व्हॉट सेऽस्ट दाऊ ! इण्डियन ड्रेस्... फूल्स वेअर इट् ! आय् डिस्लाइक् इन्डियन् युअर कल्चर !! व्हॉट ऑफ़ ड्रेस् देन् " ४

मार्गस्थः—हा, हन्त ! दुर्भाग्यं भारतवर्षस्य यदेवं केचन परानुकरणप्रिया भूत्वा स्वदेशव्यवहाराय स्वदेशाचाराय च तिलाञ्जलिं दत्त्वा पाश्चात्यसभ्यतामेव सर्वत आश्रयन्ति-इति । किं भो महात्मन् ! किमिदम् ? किं भवान् क्रिश्चियन-धर्मानुगो विद्यते, यदिदं नेक्‌टाइ (कण्ठबन्धनं) धारयसि । सत्यम्, त्वमनेन परिच्छदेन भारतस्य कण्ठमेव बध्नासि । त्यज, त्यज इदं सर्वम् , पश्य-यत्त्वया शोभार्थं ध्रियते, तदिदमीशामहाशयस्य 'क्रॉस' पदवाच्यमस्ति । यथा कश्चिच्छोभार्थं संन्यासिनां वेषधारणं कुर्यात तथैव तवेदं वेषधारणमिति सत्यं जानीहि ।

(अनुकरणदासो न किंचिदपि बुध्यते । स अज्ञानं नाटयति, तदा प्रियदेशस्तं 'इंगलिश' भाषयैव बोधयति ।)

प्रियदेशशर्मा—" डिअर अनुकरणदास ! धिस् फ्रेण्ड् ऑफ़ माइन सेज् दॅट यू हॅव् बिकम् डिस्लॉयल् टु युअर मदरलॅंड बाय् ॲडॉप्टिंग् वेस्टर्न कस्टम्स ॲण्ड मॅनर्स ॲण्ड दॅट यू हॅव चेंज्ड् युअर ओन् रिलिजन् ॲण्ड् टर्न्ड् ए क्रिश्चियन्-यू किल् युअर मदर इण्डिया-बाय् धिस कॉंडक्ट् ऑफ़ युअर्स-फॉर दि सेक् ऑफ़ हेवन प्लीज़ डोंट् डू दॅट-यू ट्रेचरस फेलो ! "

---

४ किम् ? किं कथयति, भवान् ? भारतीयवेशभूषा..........सा तु मूर्खैरज्ञैरेव ध्रियते । भवदीया भारतीया सभ्यताऽपि मां न प्रीणाति । तत्कथं भवदीया वेशभूषा तत्कर्तुं समर्था भवेत् ।

अनुकरणदासः—(स्वगतम्) " ईज़् धिस् ऑल् ट्रू व्हॉट ही सेज्? ॲम् आय् रिअली डिस्लॉयल टु माय् मदरलैंण्ड? इंडीड् देअर ईज़् नॉट दि लीस्ट डाउट ॲबाउट् इट्! सर्टेनली इट् इज़् ऑल ट्रू!! आय् ॲम् रिअली गोइंग अगेन्स्ट् दि प्रोग्रेस् ऑफ़ माय नेटिव्ह प्लेस्!!! (प्रकाशम) वेल् फ्रेण्ड्स् आय् ॲशुअर यू आय् विल प्लेज माय्-सेल्फ़ टुं खद्दर फ्रॉम् धिस् व्हेरी मोमेंट् ॲण्ड-एल्स् "—५

(संस्कृतमाश्रित्य) अहमपि किंचित् किंचित् संस्कृतं जानामि; इत आरभ्य तस्या अध्ययनं सम्यक् प्रकारेण कर्तुं प्रयतिष्ये इत्येव मे प्रतिज्ञा । तथा च विदेशिवस्त्रं परित्यज्य स्वदेशीयवस्त्रं परिधातुं प्रतिजानामि-इति ।

(ततः सर्वमपि स्ववेशं परित्यज्य खद्दरवस्त्रपरिधानमनुकरणदासेन तत्रैवसम्पाद्यते । तद्दृष्ट्वा उभावपि प्रियदेशमार्गस्थौ तं प्रशंसयन्तौ कथयतः—)

मार्गस्थः— साधु अनुकरणदास! साधु, अद्यारभ्य भवानवश्यं संस्कृताध्ययनं करोतु । सा तु देवभाषाऽस्ति। तस्या अध्ययनेन हृदयं पवित्रतमं जायते चेतसि च स्वधर्म्म-स्वदेशयोरादरभावो जाज्वल्यते । अपरं च यथा भवान् संस्कृताध्ययनं कृत्वा देशसेवां कर्तुमर्हति न तथाऽन्यया भाषया! यतो हि सृष्टेरादित आरभ्य सर्वेऽपि समीचीना महर्षीणां विचारास्तस्यामेव भाषायां निबद्धाः सन्तीति । अपरं च कस्मिन्नपि देशे गच्छतु कामपि भाषां पठतु परन्तु स्वीयान् साध्वाचारविचारान् न त्यजतु। इदं हि राष्ट्रियत्वं नाम यत् स्वदेशोद्भवानामेव अशोभनानामपि वस्तूनां तथा सदाचाराणां सन्नीतीनां च रक्षणं वर्द्धनं पालनं च प्रचारणमिति। पश्यतु न, जयप्राण (जापान) देशस्था वीरपुङ्गवाः सर्वमपि हरिवर्षीयगुणजातं गृह्णन्ति; परन्तु स्वदेशाचारं भूमावुपवेशनं काष्ठगृहनिर्माणं नैव त्यजन्ति।

(खडूडेमित्रं लक्ष्यीकृत्य) किं शास्त्रिन्! किं विचारयति भवान्! भवाँस्तु सर्वमपि राष्ट्रियमाचारं वेषं च विभर्त्ति ; परन्तु भवतोऽज्ञानात्सर्वमपि निष्फलं भवति । पश्यतु, यस्मिन्वेषे भवानस्ति स वेषस्तु भारतीय एव ; परन्तु सर्वाण्यपि भवतो वस्त्राणि विदेशोद्भवानि, अत एव परोदरपूरकानि भवन्तं समाजे निन्दापात्रं कुर्वन्ति । देशकालात्मज्ञानाभावाच्च भवाँल्लोके हेयोऽनुपादेयश्च भवति। यदि भवान् सर्वदा खद्दरमेव परिदध्यात्, स्वल्पप्रयासेनैव इतिहास-भूगोलादिज्ञानं देशीयसमाचारपत्राणाञ्चाध्ययनं कृत्वा वर्त्तमान-प्रगति-परिचयं सम्पादयतु चेत्तदा तु 'सुवर्णे सुगन्ध-समवायः' सञ्जायेत । भवानेव सर्वेषामपि भारतीयानां नायक[illegible] स्यात, यतो हि भारतस्य नेतारस्तु संस्कृतज्ञा ए[illegible] भवितुमर्हन्ति नान्यभाषाभिज्ञा विदेशिभावसम्पन्ना[illegible] कियन्त आधुनिका नेतारः । तेषु तु बहव एवमे[illegible] सन्ति ये भारतमिदं यूरोपमेव कर्तुं यतन्ते । उ[illegible] ष्ठन्तु भवन्तः स्वदेशीयवस्त्रकवचं परिधाय सर्वम[illegible] संस्कृत-साहित्य-समाजमुज्ज्वलयन्तः सर्वानपि स्व[illegible]

५—(स्वगतं) यदयं वदति तत्किं सत्यम्! अप्यहं विश्वासघातको येन मदीया मातृभूमिः प्रतार्यते? अपि तत्सत्यम्? आम्, तदेव निःसंशयं सत्यं वस्तु । जननी-जन्मभूमेरहं हितविरोधी संवृत्तः खलु! तां अवनतिगर्तमहमाकर्षयामीति खलु मम महानपराधः । (प्रकाशम्) अयि सुहृदः! प्रतिजानामि यदद्यप्रभृति भारतवर्षीयं वस्त्रं खद्दरं परिदधामीति।

तुगान् स्ववशे स्थापयन्तु, नो चेदिदानीं क्रान्तियुगेऽस्मिन् न कोऽपि कस्यापि वृथामाहात्म्यं स्वीकर्त्तुं बलादपि उद्यतो भविष्यति—इति ।

खड्डेमित्रम्—(उत्साहमासाद्य अमितौजसाऽऽवेगेन वक्तुं प्राक्रमत) किं भोः ! किमहमस्मादपि गर्हितोऽस्मि यन्मामुपदिशति भवान् ! पश्यतु, अस्मद्गुरवः स्वदेशिवस्त्रं परिदधतु वा न परिदधतु परन्तु वयमद्यारभ्यैव स्वदेशिवस्त्रं तत्रापि च खद्दरं परिधास्यामः । सर्वानपि स्वसुहृदः स्वानुगाँश्च तदेव परिधापयिष्यामः । अहो! वयं शृगाल-सहचरीभूताः सिंहा इवात्मानं विस्मृत्य म्लेच्छराजपराधीना भूत्वा तदीयदेशोद्भववस्तुजातं बिभृम इत्यहोऽस्माकमविचारित्वम् ? पश्यास्माकं ब्रह्मबलम्, सर्वानपि स्व-यजमानान् स्वशिष्याँश्च स्वदेशिवस्त्रधारिण एव करिष्यामः । सर्वेऽपि वयं संस्कृतज्ञा अद्यारभ्यस्वदेशिवस्त्राणि अन्यान्यपि च स्वदेशीयान्येव वस्तुजातानि परिधास्यामो ग्रहीष्यामश्च । न कोऽप्यस्मासु विदेशीयं वस्त्रं वस्तु वा ग्रहीष्यति । वयं तु जन्मत एवासहयोगिनो भवामः, नाभिलषामो यदत्र भारतभूमौ कस्यापि म्लेच्छराजस्य शासनं भवेदिति । पश्य, वयं शय्योत्थायं परमात्मानं प्रार्थयामहे "म्लेच्छनिवहनिधने कलयसि करवालम् ... म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः" इति । अत्रैवागामिनि संस्कृत-साहित्य-समाजाधिवेशने भवान् सर्वानपि खद्दरमयवेषभृत एव संस्कृतज्ञान् छात्रान् विदुषश्च द्रक्ष्यतीति निश्चितं जानातु । अपरं च, वयं संस्कृतज्ञाश्छात्रा विद्वांसश्च 'सुप्रभातम्' अपराण्यपि हिन्दी-समाचारपत्राणि-करिष्यामः, तथा सर्वत्रापि संस्कृत-पाठशालासु भूगोल-गणितेतिहासानां पाठनायान्दोलनं करिष्यामः ।

मार्गस्थः—साधु, खड्डेमित्र ! साधु, भवान् ब्राह्मणबालोऽस्ति, दर्शितं भवता स्वानुरूपं कर्म ? विना-संस्कृतज्ञैर्नहि अस्य देशस्य सामाजिकी धार्मिकी वोन्नतिर्भवित्री—इति भवद्विधा एव सुसंस्कृता विद्वांसो भारतमिदं सनाथीकरिष्यन्ति । आयान्तु सर्वे वयं मिलित्वा परेशं प्रार्थयामहे । तथाहि—

(भरतवाक्यम्)

वयमिह निजसत्त्वात्साम्प्रतं विप्रलब्धा-
अजर ! सफलय त्वं प्रार्थनां सद्य एव ।
शतमपि शरदां वै प्राणिमोऽत्र स्वतन्त्रा-
द्रुतमुचितपथेऽस्मान् भारतीयान्नयेथाः ॥१॥
बहव इह जना ये पृष्ठगा देव ! आसँ-
स्त्वरम-शिखरमारात्सङ्गता उन्नतेस्ते ।
विलपति तव दीना प्रेयसी भारती भूः
किमुचितमिदमित्थं मौनमालम्बितुं ते ॥ २ ॥
विधिपरवशनो हा ! संश्रिता दैन्यमीदृग्-
वयमिह लघिमानं साम्प्रतं लम्भिताः स्मः ।
पुनरपि निजशक्तेर्ज्ञानमासादयन्तः
परमकरुण ! देशं स्वं स्वतन्त्रं विदध्मः * ॥३॥

राष्ट्रदेवो भव । इति शम् ।

---

* सुमनोहरं गभीरभावभावितमिदं प्रहसनं सुप्रभातसम्पादकैः श्रीगोपालशास्त्रिभिर्विरचितं संस्कृत-साहित्य-समाजस्य पञ्चम-वार्षिकाधिवेशनेऽभिनेतुम् । तच्च तेषामेवच्छात्रैस्तेषामेव नेतृत्त्वे समयोचित-भावभङ्गिभिरभिनीतमिति तु दुग्धशर्करायोग एव । अभिनेतृणां नामानि एवम्भूतानि सन्ति यथा—

श्री गुरुनाथः	(खड्डेशास्त्री)
श्री गोपालजयकृष्ण-कुलकर्णी	(प्रियदेशशर्मा)
श्री सिद्धेश्वर-बडोदकरः	(खड्डेमित्रम्)
श्री शङ्करपुरोहितः	(मिस्टर अनुकरणदासः)
श्री त्र्यम्बकमोहरीरः	(मार्गस्थो विज्ञः)

—(स० सम्पादकः)

श्रीयुत-पं० रामनारायणमिश्र-महोदयानां सिद्धियात्राभिनन्दनम्*

देशोद्धारकृते विहाय परमं स्वं धाम काशीमिमाम्
सौख्यं राजकुलोचितं प्रणयिनस्त्यक्त्वा च बन्धून् निजान् ।
यास्यन् नन्दन-सन्निभे नृपपुरे द्वीपान्तरे लन्दने
जीयात् सर्वकलासु भारतविधेः 'श्रीरामनारायणः' ॥ १ ॥

श्रीरामः कुशलं करोतु भवतः साक्षाद्रिपूणाञ्जयी
सम्पत्तिं प्रददातु सिन्धुशयनो नारायणः सेन्दिरः ।
त्वञ्चास्मान् सुखयस्व कृत्यनिपुणः कृत्वैव कार्यं समम्
व्यावृत्तः कुसुमाकरेण सदृशं सम्फुल्लयन् भारतम् ॥ २ ॥

त्वादृक्षान् रसिकान् स्वदेशकृतये दुःखार्णवाद् दुस्तरा-
दन्यान् तारयतः स्वयं च तरतः प्राशास्महे साम्प्रतम् ।
कोटयस्तिस्र उतापि हीनगणना वीरा यदा त्वादृशा-
भूयासुर्भरतस्य भूमिरनघा भूयात् पुनः पूर्ववत् ॥ ३ ॥

रामनवमी सं० १९८६	*श्रीअनन्तरामशास्त्री,* रणवीर-संस्कृत-पाठशालाध्यक्षः ।

* हरिवर्षे (यूरोप) देशीय-'इटली' प्रदेशान्तर्गत 'जनोवा' स्थानीय "अन्तर-राष्ट्रिय-शिक्षा-सम्मेलने" मान्या मिश्रमहोदया भारतीयप्रतिनिधिभूता वैशाखकृष्ण ७ बुधे काशीतो गच्छन्तः सिंहल (लङ्का) द्वीपीये 'कोलम्बो' नाम्नि स्थाने वृहज्जलयानेन वैशाखशुक्ला ७ बुधे द्वीपान्तरं गमिष्यन्ति, तदुपलक्ष्ये मिश्रमहोदयानामभिनन्दितुं श्रीमदनमोहनमालवीयमहोदयानां सभापतित्वे समुपस्थितेषु सूरि-सङ्घेषु पठितानामभिनन्दपत्राणामन्यतममिदम् ।

—द्विजेन्द्रः (स० सं०)

उलूकध्वनिः*

सुप्रभातस्य तृतीयचतुर्थाङ्के शास्त्रव्यवसायिनां कुत्सितं कर्मेति शिरस्को लेखः प्रकाशित आसीदिति नाविदितमस्ति सुप्रभातपाठकानाम्। तत्र सुप्रभातसम्पादकमहोदयेभ्यः शतशो धन्यवादाः सन्ति। यतस्ते सुप्रभातस्य नवमनियमे "विवादग्रस्ता व्यक्तिगताक्षेपपूर्णलेखा न प्रेषणीयाः" इति मर्यादां पादाभ्यामाहत्य स्वकीयं प्रगाढ़पाण्डित्यं दर्शितवन्तः। अतःपरं लेखकमहोदयेभ्यो धन्यवादान् वितरामो, येषां मर्यादा निराकारब्रह्मतोऽपि परा तिष्ठति (!) तत्र भवन्तः "सम्प्रति सर्वं विहाय देशस्य स्वातन्त्र्यमेव विद्यते साध्यं वस्तु भारतीयानामिति" ख्यापयन्तः, किञ्च "सङ्घे शक्तिः कलौयुगे" इति लज्जितमुखेनोद्घोषयन्तो देशनायकानां राष्ट्रसंघटनैककर्तव्यत्वमिति भाषणं कुर्वन्तो "हिन्दुसंघटनं" कामयन्तः साम्प्रदायिककलहं शमयन्तः सुप्रभातालोके कृष्णीकृतं स्वमुखं दर्शयितुमसमर्थाः सन्तः स्वकीयं नाम चोरायत्वा उलूकध्वनिं कृतवन्त इति निभालयन्तु सुधियः।

तस्मिन्नेव विषयेऽहं किञ्चिद्विलिखामि। यद्यप्येतादृशानां गुणग्रहणशीलानां लोभाक्रान्तचित्तानां शास्त्रविनिन्दकानां कृते लेखप्रतिवादोऽप्ययुक्तः समयवैफल्यं चास्तीति मन्यते। तथापि "शठे शाठ्यं समाचरेदिति" मन्यमाना वयं तदुत्तरे प्रवृत्ताः स्मः।

भो प्रणव! शास्त्रव्यवसायिन इन्द्रियारामा भवन्तीति कथमनुभूतं भवद्भिः रन्याभ्योऽथ.......... अनुभूतम्।

पौषस्य पूर्णिमायां सूर्योदये प्रकाशितं गोस्वामिनां यज्ञोपवीतधारणविरुद्धव्यवस्थापत्रं कथं दूषितं? तत्र दूषकतावीजं किम्?

अयि महात्मन्! यद्भवान् भीषयते "एतेषां जीवनवृत्तान्तादिभिः सह पुस्तकाकारं खण्डनं प्रकाशयिष्यते" इति तत्रैकान्ते इत्थं विचारणीयं, नहि भवतामेव पार्श्वे लेखनी मसीपात्रञ्चास्ति किन्तु भवतां मुखविमर्दकानामपि सविधे। तस्मिन्व्यवस्थापत्रे न केवलं पूज्यपाद-म० म० श्रीलक्ष्मणशास्त्रिणामेव हस्ताक्षराणि विद्यन्ते; किन्तु महाराजाधिराज-श्रीकाशीराजमहोदयानामपि हस्ताक्षराणि विद्यन्ते प्रधानन्यायालय-(हाईकोर्ट प्रयाग) स्थन्यायकर्तृणामपि व्यवस्थाऽस्ति "ते शूद्रा" इति। अथ च नवमहामहोपाध्यानामन्येषां विदुषाञ्च हस्ताक्षराणि

* कस्यापि 'सुप्रभात'-कर्मचारिणोऽनवधानतया कदापि पं० केदारनाथशास्त्रिसारस्वतमहोदयानामनुपस्थितौ 'प्रणव' नाम्ना कोऽपि लेखस्तदीयसम्पादकतायां प्रकाशितोऽभूत् तस्यैवोत्तरमिदं साम्प्रतं म० म० श्रीलक्ष्मणशास्त्रि-द्राविडचरणानां पक्षतः कोऽपि तदीयश्छात्रः प्रेषितवानिति वयं सधन्यवादं प्रकाशयामः— (सम्पादकः)

सन्ति तान् सर्वान् विहाय कथं श्रीमतां पूज्यपाद-महामहोपाध्याय श्रीलक्ष्मणशास्त्रिणामेव निन्दायां कुप्रवृत्तिः ? "एतर्हि तु छिन्नाः प्रश्ना एव क्रियन्ते श्रीलक्ष्मणशास्त्रिभिरुत्तरं " सुप्रभाते " देयमिति यद्भवाँल्लिखति तत्रेदमवधार्यताम् । यत् श्रीमतां प्रश्नानामुत्तराणि सृष्टिकर्तापि दातुमसमर्थः ।

तथाहि—

" अज्ञःसुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति ।' इति

अन्यच्च—

" पोतो दुस्तरवारि-राशितरणे दीपोऽन्धकारागमे
निर्वातव्यजनं मदान्धकरिणां दर्पोपशान्त्यै शृणिः ।
इत्थं तद्भुवि नास्ति यस्य विधिना नोपायचिन्ताकृता
मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः "—इति

अतो महामहोपाध्याय—श्रीलक्ष्मणशास्त्रिणो भवतां प्रश्नोत्तरे सर्वथैवासमर्था, अत आत्मानं धन्यं मन्यमाना उलूकध्वनिं कुर्वाणाः सुप्रभाता-लोकात् प्रपलाय्य निबिड-ध्वान्तमन्विष्य ससुखं तिष्ठन्तु भवन्तोऽस्माभिस्तु स्वनाम चोरयन्तो भवन्तो नान्वेषिष्यन्त इति—

—गोपालदत्तशर्म्मणः ।

संस्कृत-साहित्य-समाजः ।

अयं संस्कृत-साहित्य-समाजोऽत्र काश्यां षट्छात्रविद्भिर्ब्राह्मणैः संस्कृत-साहित्यस्य पुनरुद्धाराय वर्षपञ्चकात्पूर्वमेव प्रस्थापितोऽस्ति । प्रतिसंवत्सरमस्य समाजस्य वार्षिकाधिवेशनम्भवति, तत्र समाजकृतकार्यस्य सामान्यजनानां परिबोधाय विवरणं क्रियते, येन सर्वेषां विदितं भवेत् यदयमपि समाजो देशकालपरिस्थित्यनुरूपं यथावसरं कार्यं कुर्वन् पीडितानां ज्ञानेन, दानेन, शक्त्या च साहाय्यं विदधत्, लुप्तप्रायस्य प्राचीन-संस्कृतसाहित्यस्य गवेषणादिभिः पुनरुद्धरणं कृत्वा विद्वद्वरोल्लिखितनिबन्धपाठनेन च सर्वेभ्यो जनेभ्यस्तस्य साहित्यस्य परिचयं ददत् पंचवर्षं यावत्तत्सेवां विदधातीति । नाविदितं देशकालात्मविदामिदं यदेतादृशस्य समाजस्येदानीं परसंस्कृत्यभिभूतेऽस्मिन् भारतवर्षे नितरामावश्यकता वरीवर्तीति । प्रायः सर्वैरिदानीन्तनैः पाश्चात्यसंस्कृतिमेव बहुमन्यमानैर्जनैर्जनकल्याणदत्तचित्तानामस्मत्पूर्वजानां पूज्यकृतिः स्व-संस्कृतिर्विस्मर्यते । यदीयमेवावस्थाऽप्रतिहता प्रचलति चेत् प्रियभारतस्याचिरादेव ' इतो नष्टस्ततो भ्रष्टः ' इत्यवस्था भवेत् । अत एव भारतगौरव-संरक्षकैर्निष्काममकर्मयोगिभिर्महामहिमशालिभिर्ब्राह्मणैः स्वदेशधर्म-संस्कृति-साहित्य-समुद्धाराय संस्कृत-साहित्य-समाजस्य संस्थापनं संघटनं च कृत्वा स्वश-

त्यनुसारं कार्यं विधीय इति तेषां धन्यवादार्हत्वम्, स्वाङ्गश्रमेण द्रव्यदानेन वा पोषणीयत्वाच्चास्य समाजस्य । नायं समाजो व्यर्थमेव व्ययं विधाय भारतस्य भारभूतः संवृत्त इति प्रत्यक्षीकृत समाजकार्यस्य मे निष्पक्षपातं मतम् ।

एतस्य समाजस्य दिनेषु रवि-सोम-भौम-गुरु-वासरेषु (३, ४, ५, ७ मार्च, २९) संवृत्ते पञ्चमवार्षिकाधिवेशने ये ये सज्जनाः, छात्राः, विद्वांसः, अपरे च बाल-वृद्धाः समुपस्थिता आसन् । ते सम्यग् जानन्ति यदेभिः समाजसञ्चालकैर्विविधविषयकानि भाषणानि गवेषणापूर्ण-प्रबन्धपठनानि च कारयित्वा या संस्कृत-साहित्यसेवा विहिताऽस्ति सा खलु अद्वितीयाऽनिर्वचनीया चेति । अन्यच्च 'काशी-विद्यापीठ'स्थच्छात्रद्वारा प्रहसनमेकं विधाय संस्कृत-पण्डितानामन्येषां जनानां च कूप-मण्डूक-वृत्तित्वापाकरणाय स्वदेशिवस्त्र परिधारणाय च यः प्रयत्नस्तैः समाजकार्यकर्तृभिर्विहितः स तु अपूर्व एव सर्वानपि अन्यान् स्वदेशिवस्त्र-प्रचारप्रयत्नानतिशेत इति । सामान्यजनमनोवृत्तिं लक्ष्य विहितोऽयं परिस्थिति–परिवर्तनशीलः साधिक्येन सफलीभवेदिति सुमहान् ममाभि-लाषः ? अनेन च प्रयत्नेन यत खलु तैः स्वदेशिकार्यं सम्पादितं तदलौकिकमसामान्यं सर्वथा देशकालपरिस्थित्यनुरूपं चेत्यत्र न मतवैभिन्यम् ।

परम्, महान् खेदावसरोऽयं यत् काशीस्थाः संस्कृतज्ञाः पण्डिताश्छात्राश्चापि बहुसंख्यायामत्र समाजे दत्तचेतसो न भवन्तीत्यपरे जनास्तु कश्चिदेवात्रावदधति । अन्तिमे दिने समाजमन्त्रिमहोदयैः श्रीकेदारनाथशास्त्रि-सारस्वतैः, समाजाधारभूतैः श्रीगोपालशास्त्रिभिश्च सामान्यजनानां पण्डितवर्याणाञ्च साहचर्य्य-सम्पादनाय यन्महत्वपूर्णं भाषणं कृतं तत्तु सर्वैरवश्यमेव स्मर्तव्यम् । रागद्वेषादिमहादोषान् विस्मृत्य आशाजीविनां समाजसञ्चालकानां प्रार्थनां च संस्मृत्यास्माभिः सर्वैर्भारतीयैः संस्कृतविद्वद्भिश्छात्रैः, सनातनधर्मिभिश्च पाश्चात्यसभ्यताभिभूतास्मत्संस्कृतिसंरक्षण-प्रयोजनस्यास्य समाजस्य ज्ञानेन, दानेन, अङ्गपरिश्रमेण, सहयोगेन वा साहाय्यं कृत्वा संरक्षणीयोऽयं देशकालपरिस्थित्यनुरूपं कार्यकर्त्ता संस्कृत्युन्नतिदक्षो जगत्यां भारभूतश्च संस्कृत साहित्य-समाज इति सानुरोधं प्राथ्यते ।

—त्र्यम्बकविनायक-मोहरीरेण
(काशी-विद्यापीठस्थेन ।)

❀ प्रहेलिका ❀

यः शब्दश्चनुरक्षरेण वनजं वर्णैस्त्रिभिर्भूधरम्
वर्णाभ्याञ्च शरीरिणं प्रकथयत्येकेन वैश्वानरम् ।
व्यस्ते शुष्कतृणं प्रतीरविषयं मध्ये च डिम्भन्तथा
बुध्यन्ते यदि पण्डिता भुवितले धन्या बुधा एव ते ॥

——देवरभट्टशर्मा छात्रः, (वाराणसेयः) ।

स्वर्गीय-स्मृतिः

स्वर्गङ्गतानां महामहोपाध्याय-पण्डित-रामावतारशर्मणाम्

एम० ए०, साहित्याचार्याणां कृते—

शोकाश्रु-विन्दवः ।

स्वप्नोऽयमस्ति यदि वा भ्रम एवमेव,
मोहोऽथवा परित एष विजृम्भमाणः ।
नो मेऽवधारणपरायणतामुपैति,
चेतोऽभितोऽपि विततं निरवेदय जाड्यम् ॥१॥
स्वेनैव पाणिकमलेन सरस्वती यं,
संलाल्य पालितवती सुतनिर्विशेषम् ।
'रामावतार' इतिमञ्जुपदाभिधानः,
स क्वापि दैवहतकेन चिराय नीतः ॥२॥
सा बुद्धिरप्रतिहता निखिलेऽपि शास्त्रे,
सा वादिनां हृदयमोहनतर्करीतिः ।
विद्यावताञ्च परिषत्सु स हासभावः,
कञ्चेतनं स्मृतिमुपेत्य न रोदयन्ति ॥३॥
हा काव्यनिर्मितिकले ! विकले ! क्व नैजं,
स्थानं समाप्य भवितास्यधुनाधुताधिः ?
हं हो प्रसादगुण वत्स ! न जीवितासि,
चिन्ता मुधैव हृदये विविधा बुधानाम् ॥४॥
भारतं भाहतं जातं विहारो हारवर्जितः ।
'रामावतारे' स्वर्याते मूर्च्छिताऽभूत्सरस्वती ॥५॥

—श्रीहरिशङ्करपाण्डेयस्य ।

(असिस्टेन्ट छपरिन्टेण्डेन्ट विहारोत्कल-संस्कृत एसोशियेशनम्)

* * *

अस्तो विज्ञानभानुर्लयमयमयते
शब्दसद्रत्नसानु-
वैक्लव्यं कान्तशोके कलयति कविता-
कामिनी हन्त ! लोके ।
संशुष्कोऽत्यन्तदूरोपसृमरविभवो
दर्शनाम्भोधिपूरो
हारे वाणी-विहारे निमिषति नयने
सूरि 'रामावतारे' ॥ १ ॥

—श्रीविन्ध्येश्वरीप्रसादशास्त्रिणः ।

* * *

साहित्ये रसिकः श्रुतौ श्रुतधरः षड्दर्शने दर्शकः
कल्पेऽनल्पकरो निरुक्तविषये निर्वाचितो वेधसा ।
व्याकृत्यां प्रकृतिः स्वयं गुणवतां मान्यः समेषाञ्च यः
सोऽयं भू-भुवनं विहाय विगतो 'रामावतारः' सुधीः ।

—श्रीतारादत्तपन्तस्य ।

* * *

द्विज-भूषण ! शोकमश्नुते
त्वदभावे विकलाऽद्य भारती ।
क्व गतोऽसि सुपुत्र ! मेऽधुना
बहुशः क्रन्दति 'राम' ! भारती ।

—रामप्रसादमिश्रस्य ।

सम्पादकीयम्

स्वदेशीय-वस्तु-व्यवहारः ।

"न स्यूतेन न दग्धेन पारक्येन पटेन च ।
आह्निकं कर्म कुर्वीत कृतं वै निष्फलं भवेत् ॥"
(आ०—सू०)

भारतीय-संस्कृतौ ब्राह्मण एव प्राधान्यम् । अत एव तद्विदो ब्राह्मणास्तत्रापि च संस्कृतज्ञा अभ्यर्हिता गीयन्ते । तेषां ने-तृत्वमेवाद्य यावद् भारते प्रचलितमासीत् । परन्तु [इदा]नीं तेषामज्ञानाद्देशकालात्मज्ञानाभावाच्च हस्तं [गत]मपि तद् दूरीभवदिव दृश्यते । तदेव न [शो]भवति; प्रत्युत अद्यत्वे त एव 'देशद्रोहि'-[ना]म्नाहूयन्ते-इत्यत्र किं निदानमित्यवमर्शे तेषां [स्व]ाभाविकी व्यवहारविरक्तिरेवात्र निदानमिति [मे ...]न् प्रतिभाति ।

पश्यन्तु, इदानीं यत् किञ्चनापि धार्मिकं सामा-[जि]कं राजनीतिकमान्दोलनं भवति तत् सर्वमपि [...]व क्रियते । यद्यपि तत्रापि सन्ति ब्राह्मणाः [पर]न्तु ते संस्कृतज्ञपण्डिता एव इति तु न कथयितु-[म]र्हसे । बहव एवं कथयन्ति यदिदानीन्तनी [आन्दोल]नप्रणालिरेव विचित्राऽस्ति । यत्र पण्डितानां प्रवेश एव दुर्घट इति । परन्तु नास्माभिरिदं स्वीक्रियते अस्तु नाम राजनीत्यान्दोलने तेषां प्रवेशः कष्टलभ्यः परन्तु धार्मिक-सामाजिकादिषु तु तैरेवाधिकारिभिर्भाव्यम् । परन्तु निभालयन्तु तेषामौदास्यम् ! तत्रापि त एव महात्मान आन्दोलकाः सन्ति येऽन्यत्र राजनीति-प्रभृतिषु व्यग्र-व्यस्ताः सन्ति । हा! कष्टम्! अन्यद्दूरे तिष्ठतु, केवलमिदं स्वदेशि-वस्तूनामेवान्दोलनं यदि संस्कृतज्ञा विद्वांसः स्वहस्ते कुर्य्युश्चेत्तदा देशस्य तेषाञ्च महानुपकारः स्यात् । ते हि यदि स्वदेशीय-वस्त्राणि परिदध्युः, स्वदेशीय-वस्तुभिर्व्यवहरेयुस्तदा तदनुयायिनो जनास्तु एवमेव तान् दृष्ट्वैव तस्मिन्मार्गे व्यापृताः स्युः, येन भारतीय-द्रव्यस्रोतः पाश्चात्यवणिग्भिराकृष्यमाणमेकपद एव निरुद्धं स्यात् । अन्यच्च, तेषामपि धर्मशास्त्रीयवचसः पालनेन धर्म्मविवृद्धिः, देशे तेषां समादरः साधु समेधितः स्यात्, स्याच्चाद्यत्वे प्रवर्द्धमानं संस्कृत-विद्वद्विषयकं देशजनोपेक्षणं निरुद्धमिति ।

अवदधतु, अस्मिन् वर्षे राष्ट्रमहा-सभायाः स्वदेशि-वस्त्राऽऽन्दोलन-सम्बन्धि शस्त्रं महात्मनो गान्धिमहोदयस्य हस्ते गतमस्ति, ते चेदानीमान्दोलनमिदम् पुनः प्रारब्धवन्तः सन्ति । यदि अधुनापि संस्कृतज्ञा विद्वांसश्छात्राश्चात्र विषये अवदध्युश्चेदनायासेनैवास्य कार्य्यस्य सिद्धिः

सम्पन्ना स्यात् । विगतायां होलिकायां यत्र-तत्र-होलिका-दहनावसरे राष्ट्रनेतारः सर्वानेवोपस्थितान् स्वयजमानान् (स्वयंसेवकान्) शिष्यान् स्वसुहृदः सम्बन्धिनश्च विदेशिवस्त्रदाहमुपदिदिशुः । इदं सर्वमपि कृत्यमस्माकं संस्कृतज्ञानामस्ति । वयं हि देशस्यास्य जन्मसिद्धा नेतारः (पुरोहिताः) स्मः । यदि वयं स्व-स्वरूप-परिचिताः सन्तो देश-राष्ट्रहित-कराणि कार्य्याणि केवलं कर्तुमेव व्यवसिता भवेम न कारयितुं, तदापि द्रुतमेव देशोऽयं स्वतन्त्रः स्यात् ।


वयं भावुकान् संस्कृतच्छात्रान् अनुरुन्ध्मः, यद् भवन्तो विमृशन्तु नैजं कर्तव्यमस्मिञ्जगति । नैवमेव व्यर्थजीवनं यापयन्तु । अस्मिन् राष्ट्रियाह्वाने आत्मानं पुरस्कुर्वन्तु दाहयित्वा प्रक्षिप्य वा विदेशीय-वस्त्ररूपमलम्, आत्मानञ्च राष्ट्रकार्य्यक्षमं कुर्वन्तो मार्जयन्तु संस्कृतज्ञेषु आसज्यमानमिदं लाञ्छम्, यत् "संस्कृतज्ञा विद्वांसश्छात्राश्च देशद्रोहिणो, नेमे स्वदेश-स्वराष्ट्र-प्रेमभाजो भवन्ति" इति।

* * *

कैवल्याश्रिताः म० म० रामावतारशर्माणः ।

जगति शिक्षितशब्दभाजः क एवम्भूताः सन्ति ये श्रीमतां रामावतारशर्मणां नाम्ना न परिचिताःस्युः । ते हि विपश्चिदपश्चिमा अद्भुताः सुरभारती-प्रणयिनोऽपूर्वाः स्वतन्त्रप्रकृतिकाः सर्वमपि स्वसमयं विद्याविज्ञान-वारिधि-मन्थनेनैवानयन् ।

[स्व० रामावतारशर्मा]



जन्म-सं० १९३४

मृत्यु-सं० १९८५

विरला एव विद्वांस एवमलौकिकप्रतिभा-सम्पन्ना भवन्ति । अमी हि महात्मानः स्वजन्मना छपुर-(छपरा) मण्डलमलङ्कुर्वन् । स्वल्पेनैवानेहसा प्राच्यपाश्चात्योभय-विद्या-वैदुषीभाज इमे स्वाद्भुताऽध्यवसायेनाऽपूर्वाणि ग्रन्थरत्नानि जग्रन्थुः । तत्र 'परमार्थानुशासनम्', 'भारतीयेतिवृत्तम्' 'मुद्गरानन्दकाव्यञ्चेत्यादिकतिपये ग्रन्थास्तु मुद्रिताः सन्ति । कियन्तश्चेदानीमपि अमुद्रिता एव सन्ति । तत्रैषां प्राणेभ्योऽपि प्रियतरमेकमभिधानं विद्यते, यच्च संस्कृत-साहित्यस्याद्वितीयं रत्नं लोकोपकारधिया सुरभारत्या अक्षय्यकोश-सञ्चयनकामनया तेषां स्मृतिद्रढिम्ने च तस्याभिधानस्य प्रकाशनमत्यन्तमेव समुचितमिति तज्ज्ञानत्र विषयेऽवधानदानाय विनिवेदयन्तस्तदीयकुटुम्बैः सह समवेदनाञ्च प्रकाशयन्तः शोक-संविग्न-चेतसोऽल्पीयसैव विरमामः ।

सूचना—प्रियपाठकाः ! बहुशः साग्रहं सानुनयमनुरुद्धा अपि समाज-मन्त्रिणो न वार्षिककार्य्यविवरणानि समाजीयाऽव्यय-विवरणञ्च चान्यानि मन्त्रणा-समिति-कार्यजात-विवरणानि प्रेषितानीति 'समाजाङ्कम्' असम्पाद्य यथा-सवरोपलब्ध-सामग्रीभिः कथमपि साधारणाङ्कमेव सम्पादयितुमपारयाम । समयातिपातोऽप्येतन्मूलक एवेति क्षन्तव्या वयं श्रीमद्भिः । —(सम्पादकः)

संस्कृत-समाचाराः

१. कृत्रिम हृदयम्—

आधुनिके विज्ञानयुगे विज्ञानशास्त्रप्रवीणैस्तज्ज्ञैः एतादृशी प्रगतिः समधिगता यत्ते मृतानपि प्राणिनः जीवतः कर्तुं समर्था भवन्ति इति श्रुत्वा आश्चर्यविमूढानि भवन्ति चेतांसि । रसिया देशे मृताय पुरुषाय जीवनमगदं दत्त्वा अष्टघटिकाभ्यन्तर एव तस्मिश्चेतनत्वं समर्पितम् । 'रॉकफेलर' नाम्नि संस्थाविशेषे कुक्कुटबालकस्य हृदयं शरीरात् पृथक् विंशतिवर्षपर्यन्तं सजीवं सुरक्षितमिति श्रूयते । कुक्कुरस्यैकस्य शिरश्छेदनं कृत्वा हस्तपादोदराद्यवयवविहीनं केवलं तच्छिरः कृत्रिमहृदयस्य साहाय्येन रक्तसम्प्राप्त्या जीवन्निवाखिलान शब्द-स्पर्श-रस-रूपादीन्द्रियव्यापारान् सम्पादयति । एकः शाखामृगो मृतोऽपि स्वस्यैव शरीरेऽसृक् प्रवहणेन जीवितो बभूव इति प्रयोगेण सिद्धम् । अचिरादेव कोऽपि शुक्राचार्यः सञ्जीवनीविद्यासम्पन्नोऽसुरेषु भविष्यतीति न किमप्याश्चर्यस्थानम् ?

२. स्वच्छताविधायकः सर्पः—

सर्वत्र नगरेषु मलमूत्रादिदुर्गन्धि-वाहकाः नलिकाः सन्त्येव । केषुचिन्नगरेषु ताः भूमिगर्भे भवन्ति । तत् स्थानं शुद्धं कदापि नास्त्येव, यतस्तत्र स्वच्छकर्तुं स्वच्छकृतां ('भंगी' आदीनां) कठिनतमं भविष्यति । तं क्लेशं दूरीकर्तुमस्य सर्पस्य योजना कृताऽस्ति । तासु नलिकासु सर्पमसुमुपन्यस्य तेन सम्बद्धं यन्त्रं चालयन्ति । तदा तु सर्पोऽयं विस्तृतो भवति, तत्रस्थं मलं चापाकरोति । तेनैव यन्त्रेण संकुचितो भूत्वा पुनरपि मूलरूपं दधाति-इत्येवास्य विशेषः । अनेन परिष्कारेण मानवानां श्रमपरिहारोऽवश्यमेव सम्पादितो भविष्यति ।

३. महिलासम्मान-संरक्षको वीरः—

'नेपाल' देशीयया 'माया' नामिकया युवत्या सह बलात्कारं कर्तुं यतमानस्य नराधमस्य हीरालाल-अग्रवालनाम्नो दुरात्मनो हत्यां सम्पादयन् वीरयुवकः खड्गबहादुर-सिंहो नरशार्दूलोऽद्यपर्यन्तं वर्षद्वयं यावत् आङ्गलशासककृपया कारावासे निबद्ध आसीत् । तस्य बन्धनसमयोऽष्टवर्षीयो निश्चितस्तथापि भारतीय-महिला-मण्डलस्य समाजनेतृणां च प्रयासेन वर्षद्वयाभ्यन्तर एव तस्य वीरस्य मुक्तिरभवदिति तेषां कार्यमतीव प्रशंसनीयम् । वर्तमानशासका अपि तद्भागधेया एव ।

४. म० म० रामावतारशर्मणां देहत्यागः

हा हन्त ! विगते अप्रैलमासस्य तृतीयदिने पण्डितप्रवराणां श्रीरामावतारशर्मणां पाटलिपुत्रनगरे देहावसानो बभूवेति तु महादुःखस्थानमस्माकं सर्वेषां संस्कृतोन्नतिप्रणयिनाम् । एतेषां संस्कृतपाण्डित्यं आबालवृद्धम् आसेतुहिमाचलं सम्यक् प्रसिद्धमासीत् । एवम्भूतानां विदुषां मृत्युना

संस्कृत-हिन्दी-साहित्यस्य या हानिः सञ्जाता सा न कदापि प्रपूर्यते! कालचक्रं स्मृत्वा दुःसह्यमपीदं दुःखं केनापि प्रकारेण सहनीयमेव भवति। तेषां पूतात्मा परमां शान्तिं प्राप्नुयादित्येव तं दयाघनं प्रार्थयितुं शक्ता वयम्। यदि संस्कृत-साहित्यस्योन्नतिं विधातुं प्रयतेमहि तर्हि तु महामहोपाध्यायानामात्मा सुचिरां शान्तिं लब्धुं समर्थः स्यात् नान्यथा!!!

५. रूप्यकमेकं दण्डः!

कलकत्तानगर्यां 'श्रद्धानन्दपार्क' स्थाने विदेशिवस्त्राणां दहनं महात्मगान्धिभिः सम्पादितम्। अतस्तत्रत्य-नगरसंरक्षकैः रक्षिभिः (पुलिसैः) तेषामुपरि अभियोगः कृतः। विचारालयाध्यक्षेण तदपराधार्थं रूप्यकैकं दण्डं दातुं महात्मा गान्धी आदिष्टः। 'श्रद्धानन्द-पार्क' सामाजिकस्थानं विद्यते। तत्र किमपि वस्तु न दहनीयमिति तु नियमः। तद्भङ्गस्तैः कृतः, अत एवायं दण्डः!

६. चलविजयोपहारो विजितः—

गुरुकुल-कांगड़ी-विश्वविद्यालयस्य वार्षिकाधिवेशनोत्सवे महाविद्यालय-वाग्विवर्धिनी-सभायां 'भारतवर्षस्य पूर्णस्वातन्त्र्यमेव ध्येयं भवितुमर्हति' इत्यस्यां स्थापनायां वाद-विवादः सञ्जातः। तस्मिन् प्रथमः पुरस्कारः 'चलविजयोपहार' श्रीकाशी-विद्यापीठस्थ-विद्यार्थिभ्यां लब्धः। अनया राष्ट्रीयसंस्थया (काशीविद्यापीठ-नामिकया) विवादार्थं द्वौ छात्रौ एकः पक्षेऽन्यो विपक्षे श्रीवेंकटेश्वर-सत्यनारायणौ प्रेषितौ। तयोरेव वक्तृत्वपाटवेन स विजयोपहारः संलब्धः। स तु शीघ्रमेव विद्यापीठे आगमिष्यति।

७. उग्रा दमननीतिः—

आङ्ग्लशासकानां दमननीत्याऽधुना भयङ्करमुग्ररूपं धृतं दृश्यते। सर्वत्र भारते वर्षे युवकगणः कारालये निक्षिप्तः। कारणमस्य कारानिक्षेपस्य श्रूयते यत्केचिज्जनाः तत्रापि बहुशो युवका एव अस्माद्देशतः साम्राज्यवादस्य मूलमुत्पाट्य प्रक्षेप्तुं प्रयतन्ते, साम्यवादस्य बाहुल्येन प्रचारमपि कर्तुमीहन्ते इत्यनेन कारणेन तेषां कारागृहे निःक्षेपणं सम्भूतम्। अनेन स्वातन्त्र्येच्छायां मूलाघातः कृत इति यदि विदेशीयशासकानां भवेद्भावना तर्हि सा वैयर्थ्यमेव याप्स्यति इति ते निश्चयेन जानन्तु, जागृतोऽयं भारतः स्वातन्त्र्यमेव प्राप्स्यति, पवित्रं स्वर्गं वा गमिष्यति। तस्य कृते न विद्यते तृतीयः पन्थाः!!

समालोचनासारः

शिशुपालवधं महाकाव्यम्।

प्राचीनकाव्यमिदं मल्लीनाथस्य सर्वङ्कषाख्यया तथा ततोऽपि प्राचीनस्य श्रीवल्लभदेवस्य खण्डान्वयरूपेण विहितया अन्वयावदमुद्रितया सन्देहविषौषधि-नामिकया च टीकया समलङ्कृतं श्रीजयकृष्णदासेन स्वीय-विद्याविलास-यन्त्रालये काशी संस्कृत-सिरीज़-पुस्तकमालाया ऊनषष्ठितमपुष्परूपेण प्रकाशितमस्मत्पार्श्वे समालोचनार्थमागतमस्ति। श्रीमता मल्लीनाथेन तु सर्वेऽप्यस्माकं सुहृदः परिचिता एव। श्रीमतो वल्लभदेवस्य टीकेयं पदार्थबोध

सुपष्टमाचरति, येनाल्पज्ञानामपिच्छात्राणामनाया-सेनैव स्यात् श्लोकार्थावगतिः। अद्यावधि मल्लीनाथ एवास्मासु श्लोकार्थ-विवृत्तौ प्रसिद्ध आसीत्। परन्तु वल्लभदेवसमक्षे तु सोऽप्यकिञ्चित्कर इव प्रतिभाति।

अहो वैदुष्यमहो वैशद्यमस्य विवृतौ? किम्बहुना एतेमे अनर्घे टीके माघकाव्ये समुपलब्धे तथैवा-स्माकं मित्राभ्यां सम्पादक-परिष्कर्तृभ्यां श्री अनन्तरामशास्त्रिवेताल-श्रीजगन्नाथशास्त्रिहोसिङ्गा-ख्यामनयोः सर्वाङ्गसम्पूर्णताविधाने न किमपि परित्यक्तम्, भूमिका-कथासारांशप्रदानादिभिः साधु समलङ्कृतमिदं काव्यम्। सहैवाभ्यां प्रकाश-काय साधुवादं ददतश्छात्राननुरुन्ध्मोऽस्य परिश्र-मस्य साफल्यसम्पादनाय। सर्वविध-कर्गज-मुद्रणादि-परिष्कृति-विभूषितस्य ७५२ पृष्ठात्मकस्य श्लोकसूचि-भूमिकादिभिस्ततोऽपि विवृद्धकलेवर-स्यास्य पुस्तकस्य। मू० ३॥)—(सम्पादकस्य)

प्राप्तिस्थानम्—

जयकृष्णदास-हरिदासगुप्तः

चौखम्भा-सिरीज-आफिस-विद्याविलास प्रेस,

वनारस-सिटी।

प्राप्ति-स्वीकारः।

'बालकस्य चित्राङ्कः'

विचित्रोऽयं चित्राङ्कः, चित्रकलाकोविदैः श्री-रामेश्वरप्रसादवर्म-चित्रकारचतुरैः सम्पादितो विविध-सचित्र-चरित्र-चित्रितः सर्वैः सहृदयजनैः विशेषतो बाल-विद्यार्थिभिश्च नूनं सन्दर्शनीयः। १२० पृष्ठसंख्यकेऽत्र बालके १३१ संख्यकानि चित्राणि सन्ति। किम्बहुवक्तव्येनात्र! यतो वै अस्योपादेयता गुणगौरवत्वञ्च पठनेनैवानुभूयते। मूल्यमस्य १॥), वार्षिकञ्च ३), प्राप्तिस्थानम्—

मैनेजर-'बालक' लहेरियासराय।

* * *

'संसारः'

साप्ताहिकमिदं पत्रं विगत-श्रीवसन्त-पञ्चमीतो निःसरति। अस्य सम्पादको वसिष्ठनारायणवर्म्मा प्रकाशकश्च पं० हरिद्वारशर्मा 'वैद्यः'। हिन्दी-संसारे जागर्त्तिकरम्, कृषकाणां पक्षपाति, श्रमजीवीनां सहायकमिदं पत्रं सर्वत्र योग्यसेवां प्रकुर्वच्चिरन्तिष्ठतु-इति मेऽभिलाषा। वार्षिकं मूल्यमत्र २॥), विदेशे च ४),

प्रतिस्थानम्—

व्यवस्थापकः-'संसारः'

गोविन्द-प्रेस, बलिया।

* * *

'बलिया-गज़ट'

साप्ताहिकमिदं पत्रं हरिहर-प्रेस-बलियात एव निःसरति। अस्य सम्पादको बाबू महिपालबहादुरसिंहः, प्रकाशकश्च पं० रामचीजद्विवेदी। मूल्यमप्यत्र २), विदेशे च ४)

विषयस्त्वस्यापि समीचीन एव, किन्तु यन्त्रालयत्रुटिः पुष्टकर्गजाभावश्च सहृदयानां हृदयेषु खेदमेवावहति। अतोऽत्र प्रकाशकमहोदयैर्दृष्टिप्रसादं विधेयमिति।

* * *

'ब्राह्मण-सर्वस्व'

अस्यायं 'रजत-जयन्ती-अङ्कोऽभूतपूर्व एव प्रकाशितः। अत्रत्याः स्तम्भगा लेखा श्रुति-स्मृति-प्रतिपादिताः पाण्डित्यपूर्णा विविधभावविलसिताः सन्दर्शनीयैव वरीवर्त्ति।

अङ्कस्यास्य सम्पादकैः पं० कन्हैयालालमिश्र-महोदयैरेतस्य गौरवभूतं सम्पादनं विधाय स्वकीयं सम्पादनचातुर्यम्प्रदर्श्य, साहित्य-संसारेऽपूर्वमेकं रत्नम्मे पुरतः स्थापितमिति तत्पठनेनैव प्रतीयते। मूल्यं १), प्राप्तिस्थानम्—

सम्पादक-'ब्राह्मणसर्वस्व'
ब्रह्मप्रेस, इटावा।

* * *

'सँगिहा'

पत्रस्यास्य 'रामाङ्को'ऽयमद्य मे पुरतः समुपस्थितः। अस्य सम्पादकः पं० राजारामचतुर्वेदीयः प्रकाशकश्च लाला वंशीधरमहोदयः। वार्षिकं मूल्यं २), प्रत्येकस्य ।)

प्राप्तिस्थानम्—

सँगिहा-कार्यालय, भासौन, (इटावा)

* * *

'स्त्री के पत्र'

अस्य लेखकः साहित्याचार्यः पं० चन्द्रशेखरशास्त्री, प्रकाशकश्च ओझाबन्धु-आश्रमः, प्रयागः। मूल्यं १)

पत्रमिदं स्वानुरूपं नर-नारीजन-मनोरञ्जकं सर्वविध-शिक्षाप्रदश्चातीव सुष्ठु-सुशोभनप्रकारैः प्रकाशितं वर्तते। अस्य चोपादेयता पठनेनैव प्रतीयते। अतः सर्वैर्जनैर्विशेषतो दम्पतीभ्यां तु नूनमेव संग्रह्य पठनीयमिति।

—'द्विजेन्द्रस्य' (स० सं०)

दशसहस्रमुद्राः।

आजमगढ़-मण्डलान्तर्गत-माधवभूमिस्थाय-हिन्दु-आश्रमाय तस्य संस्थापकेन कुञ्जबिहारी-पाण्डेय-विद्यार्थिना "भिक्षया" दशसहस्र-मुद्राः संग्रहीतुं प्रतिज्ञा कृता। तदर्थमस्मादेव वैशाखात् हिन्दून् प्रतिजिगमिषति। अत एव प्रार्थये, सर्वैरेव हिन्दुभिरवश्यमेव साहाय्यं कर्तव्यम्, आजमगढ-मण्डलस्थैर्हिन्दुभिस्तु विशेषेणैवेति सूचयति—

वायुनन्दनअग्निहोत्री
मध्यमेश्वर, बनारस।

सूर्यचरितम् वा ऋतुचरितम्।

ले०—तारादत्तपन्तः, साहित्याचार्यः, व्याकरण-काव्य-तीर्थः।

गोलविद्या-विषयकं नूतनं महाकाव्यम्।

अतिसरलम्, भारतस्य विभिन्नदेशानां नदीनां पर्वतानां ऋतूनां चात्र परिचयो कविना नवीनया सरण्या समुपवर्णितः। गोलविषये नूतनं संस्कृत-महाकाव्यम्। सर्वथा द्रष्टव्यम्। मूल्यम्—१) मार्गव्ययः पृथक्। [सुप्रभात-कार्यालयः, काशी]

Rg N. 1348 A.

सुप्रभातस्य वैदिकाङ्कः ।

[सम्पादकः—श्रीकेदारनाथशर्म्मा सारस्वतः ।]

सुप्रभातस्य षष्ठवर्षीयः प्रथमोऽङ्कः कैलाशवासिनां वैदिकप्रवराणां सुगृहीतनामधेयानां महामहोपाध्याय-श्रीप्रभुदत्तशास्त्रि-महोदयानां स्मृतौ वैदिकाङ्कतया महता समारम्भेण प्रकाशितो भविष्यति ।

अस्मिन्नङ्के वेदसम्बन्धिन एव गभीरगवेषणापूर्णा लेखाः प्रकाशमेष्यन्ति । वेदोपवेदविज्ञानपूर्णोऽयमङ्कः परं महत्त्वमुपयोगिताञ्च समासादयिष्यति । लेखाश्चापि सचित्रा भविष्यन्ति ।

सर्वथा दर्शनीय एव भविष्यत्ययमभूतपूर्वः सुप्रभाताङ्कः । किम्बहुना ? ग्राहकेभ्यो विनामूल्यं वितीर्येत । मूल्यमर्द्धरूप्यकम् ।

एतस्मिन्नङ्के लेख-प्रदानाय प्रार्थिताः सन्ति धुरन्धरा वैदिक-विज्ञानविदो विद्वत्प्रवराः । यथा—

१—श्रीमत्पूज्यपाद-जगद्गुरु-श्रीशङ्कराचार्य-श्री १०८ भारतीकृष्णतीर्थ-महोदयाः, (पुरी)

२—श्रीमन्मध्वसम्प्रदायाचार्याः सर्वतन्त्र-स्वतन्त्राः श्रीदामोदरलालगोस्वामि-महोदयाः, (काशी)

३—श्रीमहामहोपाध्यायाः—पण्डितराज—प्रमथनाथ-तर्कभूषणमहोदयाः । (प्रिन्सिपल—संस्कृत-कालेज, हिन्दू-विश्वविद्यालय, काशी]

४—महामान्याः श्रीमदनमोहनमालवीय-महोदयाः (वाइसचान्सलर-हिन्दू-विश्वविद्यालय, काशी)

५—विद्यावाचस्पति-महामहोपाध्याय-श्रीमधुसूदन-मिश्रमहोदयाः, (जयपुरम्)

६—महामहोपाध्याय-श्रीगिरिधरशर्म्माणः चतुर्वेदमहोदयाः, (प्रिन्सिपल-संस्कृतकालेज, जयपुरम्)

७—महामहोपाध्याय-डा० गङ्गानाथझा महोदयाः, एम्० ए०, डी० लिट्०, (प्रयागविश्वविद्यालय)

८—प्राच्यविद्यामहार्णव-श्रीगोपीनाथकविराज-एम० ए० महोदयाः । (प्रि० संस्कृत-कालेज, काशी)

९—विद्वद्वर-श्रीमदानन्दशङ्कर-ध्रुव, एम० ए० एल० एल बी०, महोदयाः । (प्रो-वाइस-चान्सलर-हिन्दू-विश्वविद्यालय, काशी)

१०—श्रीमान् मङ्गलदेवशास्त्री एम० ए०, पी० एच्० डी० (अध्यक्ष—सरस्वती-भवन, काशी)

११—महामहोपाध्याय-श्रीदेवीप्रसादशुक्ल-कविचक्रवर्ति-महोदयाः, (काशी ।)

१२—सर्वतन्त्र-स्वतन्त्राः श्रीबालकृष्णमिश्रमहोदयाः (दर्शनाध्यापकाः-श्रीकाशी-हिन्दू-विश्वविद्यालयस्य)

अन्ये चाप्यनेके विद्वद्धुरीणाः प्रार्थिताः सन्ति। अतोऽत्र त्वरा विधेया ग्राहकत्वायेति सूचयति—

श्रीसत्यनारायणशास्त्री कविराजः (व्यवस्थापकः)

लेखादिप्रेषण-स्थानम्—

" वैदिकाङ्क-सम्पादकः "
सुप्रभात-कार्यालयः, काशी

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

षष्ठ-वर्षे
प्रथम-द्वितीयाङ्कौ

वैदिकाङ्कः ।

वैशाख-ज्येष्ठयोः
१९८६

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य सचित्रं मासिकं मुखपत्रम् ।

तिमिर-ततिमुदस्यन् भेदताराविलुम्पन्, नयदधि-सुरभावाभाति जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयन्ब्राम्यभानुम्, विलसतु भुवनेऽस्मिन् सर्व्वतः 'सुप्रभातम्' ॥

निरीक्षकः—
सर्वतन्त्रस्वतन्त्रः पण्डित-सम्राट् श्रीदामोदरलालशास्त्री गोस्वामी,

सम्पादकः—श्रीकेदारनाथशर्म्मा सारस्वतः ।

व्यवस्थापकः—
कविराजः श्रीसत्यनारायणशास्त्री भिषक्शिरोमणिः
(टेढ़ीनीम, बनारस-सिटी)

वार्षिक मूल्यम्—३) अस्याङ्कस्य मूल्यम् ।।।) छात्रेभ्यः—१॥
माननीयेभ्यः—१२) ग्राहकेभ्य अशुल्कम् वैदेशिकेभ्यः—५)

सनातनधर्म-संरक्षकः ।

(उपदेशदर्पणस्य प्रथमसंख्या)

सङ्कलयिता—एकः काशीस्थः सनातनधर्मा विद्वानाचार्यः

पुस्तकमिदं हिन्दीभाषायां श्रुतिस्मृति-पुराणेतिहासशिलालेखादिप्रमाणाधारेण शुद्धिभोजनादिव्यवस्थाविषये लिखितमस्ति । विषयेऽस्मिन् बहुज्ञताभिलाषुकैर्वर्त्तमान-सामाजिक-धार्मिक-प्रगतिप्रतिस्पर्धिभिः खण्डनमण्डनकामैश्चावश्यं गृहेलिममिदम् जिघृक्षुभिःसार्द्धाणकद्वयस्य =)॥ चिटिका प्रेष्या ।

सचित्रम् सामुद्रिकरहस्यम् ।

ले०—श्रीकालिकाप्रसादशर्म्मा, राजज्यौतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथा नवीनमेव । एतेन हस्तरेखाणां गुरुं विनैव सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्य्यः

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दीभाषायां निबन्धलेखनेऽनुवादादिज्ञाने च महत्सौकर्यं स्यात् । मूल्यम्—सार्द्धाणकषट्कम् ।=)॥

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि-कोक्कोक-विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी चित्रिणी-हस्तिनी-प्रभृतीनां स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि,तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च अन्ये च बहवो ज्ञातव्या कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वसविधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम्

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-तीर्थ

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया बालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृतकाव्येषु नाटकेषु पुराण-पुस्तकेषु च समागतानां देशानां नदीनां स्थानानां पर्वतानाञ्चाधुनिकी स्थितिस्तेषां नामानि च सन्ति सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् ॥) आणका.

महाकवि बाणभट्टः ।

लेः—भू० पू० सुप्रभात-सम्पादकः, श्रीकेदारनाथश

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र बाण भट्टस्य जीवनविषये महत्वपूर्णा, मननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारको निबन्ध-बन्धः । मूल्यम् =)॥

सर्वेषां प्राप्तिस्थानम्—

मैनेजर, सुप्रभात-कार्यालयः, बनारस-सिटी ।

पाठकेभ्यो निवेदनम् ।

सविनयं सादरं सबहुमानं सभयञ्च श्रीमत्सेवायां समुपसर्पति सुप्रभातम् ।

महता विलम्बेन प्रकाशितमिदमिति प्रेयाँसः पाठकाः खिन्ना भविष्यन्ति । परमत्र दैवायत्ता विवशाश्च वयं क्षमाप्रार्थनमन्तरा न किमपि कर्त्तुं पारयेमहि ।

अत्र विलम्बस्य ग्रीष्मावकाशादिविविधकारणेषु सत्स्वपि प्राधान्येन त्रीणि कारणानि समुपतिष्ठन्ते । प्रथमं कारणं भूतपूर्व व्यवस्थापकानामाकस्मिकं परलोक-प्रयाणम् । मम च नवीनतया कार्यालय-प्रबन्ध-ज्ञाने विलम्बनम् । द्वितीयं कारणं सम्पादक-व्यसनम् । एकस्मिन्नेव समये प्रथम-सम्पादकानां श्रीमतां गोपालशास्त्रिमहोदयानां धर्मपत्नी सहसैव गर्भस्राव-रोगेण भृशं पीडिता दुःसाध्यदशायामपतत् । वैदिकाङ्क-सम्पादकस्य च श्रीकेदारनाथशर्मणो नवीना-धर्मपत्नी सहसैव परलोकं प्रायादितिघटनाद्वयमेकदैव सञ्जातम् । एतेन द्वयोरपि सम्पादकयोरिदं दारुणं व्यसनं महान्तं विलम्बमकरोत् । तृतीयश्च कारणं चित्राणां निर्मापणम् । चित्रकाराः कलिकाता-प्रयागादि नगरेषु सन्ति । तत्र पत्राणां गमनागमनयोर्महान् विलम्बः समजनि । तत्रापि श्रीमतां पं० विद्याधर महोदयानां चित्र-फलकं नाद्याप्युपलब्धम् । एतदतिरिक्तं कार्यालय-कार्यकर्तॄणामवकाश-ग्रहणम्, आकस्मिकञ्च विदुषां मरणम्, ग्रीष्मावकाशः, उत्साहभङ्गः, अर्थकष्टञ्चेति बहूनि कारणानि सन्ति । अतएव षष्ठवर्षारम्भ एव अभिनव-व्यवस्था-सम्पादने भूयान् विलम्बोऽभवदिति सहृदयाः पाठकाः सहजया करुणया क्षमाप्रदानं कुर्वन्तु । आषाढमासतो वयं यथा समयं सुप्रभात-प्रेषणे सुदृढं प्रयता भविष्यामः । सम्पादकाश्च सुप्रभात-समुन्नत्यै सोत्साहं प्रयतिष्यन्त इति । अग्रिमाङ्कः परिशिष्टाङ्करूपेण प्रकाशितः स्यात् ।

सविनयं निवेदयति,

श्रीसत्यनारायणशास्त्री

व्यवस्थापकः ।

सुप्रभात-कार्यालयः

वाराणसी ।

लेख-सूची ।

चित्र-सूची ।

वैदिक-शिरोमणिः—



स्वर्गीय—महामहोपाध्याय श्रीप्रभुदत्तशास्त्री अग्निहोत्री।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम् ।

षष्ठ-वर्षे | सौर—वैशाख-ज्येष्ठयोः १९८८ विक्रमाब्दीये | प्रथम-द्वितीयाङ्कौ ।

मङ्गलम् ।

इन्द्रस्य सुहृदं यज्ञं सदसस्पतिमद्भुतम् ॥
धनं मेधामहं याचेऽभ्यर्थ्यमानं सदार्थिभिः ॥ १ ॥
यां वै मेधां देवगणाः पितरश्चाभिमन्वते ॥
तयाऽद्य मेधयाऽग्ने मामद्य मेधाविनं कुरु ॥ २ ॥
ददातु वरुणो मेधां मेधामग्निः प्रजापतिः ॥
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे ॥ ३ ॥
मयि देवा दधतु तामुत्तमां श्रियमीश्वरीम् ॥
यथाऽहमुपजीव्यः स्यां ब्रह्मणः क्षत्रियस्य च ॥ ४ ॥
अग्ने नयास्मान् सुपथा विमुक्त्यै पथामभिज्ञोऽसि यतोऽखिलानाम् ॥
वियोजयैनः कुटिलं समग्रम् कुर्वस्ततो देव नमो वचांसि ॥ ५ ॥

साग्निकः शुक्लः श्रीकृष्णः

वैदिकाङ्कः ।

सुप्रभातमिदं स्वजीवनस्य पञ्चवर्षाणि समाप्य साम्प्रतं षष्ठे वर्षे पदमादधत् सर्वान् सुप्रभात-प्रणयिनः पाठकान्, ग्राहकान्, अनुग्राहकान्, अनु-शासकान्, संरक्षकान्, सादरं सविनयं सबहुमा-नञ्च समभ्यर्थयमानो, भगवन्तं जगदीश्वरं सकरुणं प्रार्थयते यत् नूतनोऽयं वत्सरो मङ्गलमयो मोदमयश्च भूयादिति ।

विगते वत्सरे वयं हृदयं हस्तेन अवष्टभ्य तूष्णीं स्थिताः सम्मुख एव हृदय-विदारकं दृश्यमालोक-यन्तो मूकीभूताः स्मः ।

पश्यतामेव पाषाणहृदयानामस्माकमेकैकशः अनेकशो विद्वाँसः, दौर्भाग्यविलसितं दीन-दरिद्रमिदं भारतम्, मृतकल्पां सुरभारतीम्, घृणार्हञ्च हिन्दू-समाजमपहाय परलोकं प्रस्थिताः । ये च विद्वाँसः, परलोकं प्रस्थिताः, ते न केवलं शुष्कविद्वाँस एवा-सन्, परं विदुषां पथप्रदर्शकाः, आदर्शभूताः, समा-जस्य नेतारः, भारतमातुः सुपुत्राश्चाप्यासन् ।

एतदवलोकयतामस्माकं हृदयं नोत्सहते कि-मपि कर्तुम् । संस्कृतक्षेत्रे वर्षपञ्चकात् कार्यं कुर्वन् समाजो नितरां श्रान्तः समजनि । पर्वतमुत्पाट्य-मूषिकालाभ इव महान्तमुद्योगं कृत्वाऽपि न तादृ-शी फलसिद्धिः समालोक्यते, यादृशी अपेक्षिता आसीत् । धनसाहाय्यं दूरे तावत्तिष्ठतु । हार्दिकं मौखिकं वा साहाय्यं केनापि न दीयते । हन्त ! ये खलु सहायकाः, मार्मिकाः, उत्साहित[illegible]

ते शनैः शनैः परलोक-प्रयाणं कृत्वा समाजमिमं शिथिलप्रयत्नं कुर्वन्ति ।

एतदेव सर्वं दारुणं दैवदुर्विपाकं दर्शं दर्शं भूयसा विलम्बेन वैदिकाङ्कमिमं श्रीमतां सम्मुखं समुपस्थापयन्तो वयं न जिह्रीमः, नापि च बिभीमः। का गतिः ? विवशत्वादेषोऽपराधः क्षन्तव्यः—पाठक-प्रवरैः ।

एतेषु बहुषु विलुप्तप्रायेषु विद्वद्रत्नेषु, संस्कृत-साहित्य-समाजस्य सभापतयः, काशीस्थ विद्वत्प-रिषदध्यक्षाः, हिन्दुविश्वविद्यालयस्य प्रधानस्तम्भ-रूपाः, भारतीय-सभ्य-समाज-पूजिताः, विलुप्तप्राय-वैदिककर्मकाण्ड-समुद्धारकाः, विदुषां जीवनभूताः, वैदिकशिरोमणयः, समाराध्यचरणाः, अस्माकं पितृकल्पाः महामहोपाध्याय श्रीप्रभुदत्तशास्त्रिमहो-दया आहिताग्नयः परं विशिष्टञ्च गौरवमासाद-यन्ति ।

सुप्रभातेन सहापि तेषां घनिष्ठो महिष्ठश्चासीत् सम्बन्धः । समाजसभापतित्वमलङ्कृत्य मृतप्रायं सुप्रभातं धनसाहाय्यद्वारा समुज्जीवयन्तः, कार्य-क्षेत्रमपहायाकर्मण्यतां भजमानानस्मान् पुनः संग्रन्थयन्त इमे वैदिकप्रकाण्डाः संस्कृतभाषाया महान्तमुपकारं कृतवन्तः । एतेषां कैलाशवासो नितरां खलीकरोति खलु मानसम् । तदेतेषां कृतज्ञताप्रकाशनाय यावच्छक्यं प्रयतनं सुप्रभातस्य परतरं कार्यं विद्यते ।

कृतज्ञता-प्रकाशने विमूढा मत्सरिणो हिन्दवः, तत्रापि संस्कृतज्ञाः, महतीं दुरवस्थामवा-त्तमः । ये नाम पूर्वजानां महतां महत्त्वं न जानन्ति

ज्ञात्वाऽपि न प्रख्यापयन्ति, तेषां महत्त्वमपि न ज्ञातं न चापि प्रख्यातं भवति । ते हि जीवन्मृता कीटा इव, मशका इव उत्पद्यविलीना भवन्ति । अस्माकं पूर्वजाः, साम्प्रतिकाश्च पाश्चात्यास्तां कृतज्ञतां न कदापि व्यस्मरन्, विस्मरन्ति च, अतएव ते जगति सर्वोत्तमं स्थानमभजन्, लभन्ते च ।

अस्माकं वैदिकाङ्कनायकानां प्रातःस्मरणीय चरणानाम्, महामहोपाध्याय-अग्निहोत्रिमहोदयानां कृते वास्तविकं कृतज्ञता प्रकाशनन्त्वेतदेवासीत् यत् तेषां नाम्ना काश्यां सुमहान् वैदिक-महाविद्यालयः संस्थापितो भवेदिति । यत्र विविधा विद्वाँसः वैदिकतत्त्वानि, वैदिक-विज्ञानानि, वैदिककर्माणि प्रचेयन्तः, कुर्वन्तो दर्शयन्तश्च जगतोऽस्योपकुर्वीरन् । यं च द्रष्टुम्, यत्र च शिक्षामवाप्तुं निखिल-जगतो विद्वांसः समागच्छेयुः । परमेतत् सर्वं दरिद्राणामकिञ्चनानामकर्मण्यतमानामस्माकं भाव-मग्नतामात्रमेव । उक्तमेव ।

उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः ।
बालवैधव्यमाप्तानां कुलस्त्रीणां कुचाविव ।

वयं तु विश्वसिमो यत् यदि महान्तः संग्रथिता भवेयुर्विद्वांसस्तदानैतद्दुष्करं भवेत् । परं वयन्त्वे-तदपि सम्भावयामो यत् पण्डिता अस्माकं विचारान् श्रुत्वं श्रावमपि हास्यपरायणाः, क्रोधजर्जरा भवि-ष्यन्ति । भवन्तु नाम ते । परं वयमद्यापि प्रस्ताव विषय प्रस्तुतमेव कुर्मः ।

एवं हि, अन्येषां स्मारकचिह्नानां सांप्रतं दुष्करत्वात् समाजोऽयं तेषां स्मृतिरक्षार्थं सुप्रभा-तस्य वैदिकाङ्कं सम्पाद्य कथमपि तेषां कृतज्ञता प्रकाशनाय यतते ।

एतस्मिन् वैदिकाङ्के यथाविचारमस्माभिः किमपि कर्तुं न पारितम् । अस्माकमभिलाषः आसीत् यत् महतां विदुषां लेखा अस्मिन् अङ्के प्रकाशिताः स्युः । एतदर्थमस्माभिः संप्रार्थिता विद्वांसो यथापूर्वं केचन समयाभावात्, केचन संस्कृतलेखना-समर्थत्वात्, केचन आलस्यात्, केचन गर्वात् विविधव्याजं कृत्वा स्वीयान् प्राणानत्याजयन् । अहो! दुर्विलसितम् । तथापि यैर्महोदयैः लेखाः प्रहिताः तेषां कृतज्ञताप्रकाशनपूर्वकमस्माभिर्लेखाः प्रका-शिताः सन्ति ।

एतस्मिन्नवसरे अस्माकं साध्वी प्रियतमा धर्म-पत्नी प्रभादेवी सहसैव वियोग-व्याकुलानस्मान् विदधती परलोकं प्रायात् । तस्याः गुणवत्या हृदय-देवताया वियोगेन भिन्नहृदया वयं मासमेकं सर्वाणि कार्याणि विहाय वैकल्यावस्थाया मेव स्थिताः, येन वैदिकाङ्कसम्पादने, वेदविषयक-विचारविवेचने चास्माकं विचारा मनस्येव स्थिताः, स्थानाभावात् समयाभावाच्च । अन्येषाञ्च विद्वद्वर्याणां सन्ति लेखा अनेका अप्रकाशिता एव तानस्याग्रिमे परिशिष्टाङ्के प्रकाशयिष्यामः । तेभ्यः क्षमाप्रार्थनं कुर्मः ।

चित्राणां निर्माणे मुद्रापणे च महान् विलम्बः समजनि । अस्माकमियमभिलाषोऽभूत्, यत् लेखैः सह लेखकानां चित्रमपि भवेदिति । परं तत्र विलम्बावलम्बनमवलोक्य चित्राणां मुद्रापणं पृथ-गेव कृतम् । साम्प्रतमपि कियन्ति चित्राण्यवशिष्टा-न्यासन्, तेषां मुद्रणं परिशिष्टाङ्के भविष्यति ।

केषाञ्चन लेखकानां चित्राण्येव न समुपलब्धानीति तेभ्यः क्षमाप्रार्थनपूर्वकं निवेदयामो यत्ते स्वीयं चित्रफलकं (ब्लक) प्रेषयन्तु परिशिष्टाङ्के ।

यद्यपि नास्ति तादृशो वैदिकाङ्कः, यादृशः अस्माभिर्विचारितः अनुमितश्चासीत्, परं किं कुर्मः ? सहृदया विदितवेदितव्याः विद्वाँसः अनेनैव सन्तोषं कुर्वन्तः श्रीमतां स्वर्गीयमहामहोपाध्याय श्रीप्रभुदत्तशास्त्रिणां वास्तविकं चिरस्थायि स्मारकं स्थापयितुं बद्धपरिकरा भवन्त्विति । किं बहुना ?

—श्रीकेदार नाथ शर्म्मा सारस्वतः

रामावतार-सरस्वतीसदनम् ।

भारतीय-संस्कृत-समाजस्य गौरवालङ्कारभूताः, विश्व-विख्याता दिग्गज-विद्वाँसो महामहोपाध्यायाः आचार्यश्रीरामावतारशर्ममहोदयाः साम्प्रतमस्मासु न सन्तीति विदितमेव सर्वेषां सुरसरस्वती प्रणयिनाम् । साम्प्रतमेव तेषां कैवल्यलाभोऽभवदिति भारतवर्षीय-विद्वत्समाजस्यामूल्यमद्वितीयञ्च रत्नमपहृतम् । साम्प्रतमिदमस्माकमावश्यकं कर्तव्यं सञ्जातं यत् तेषां कृते स्वीयादरभाव सूचनायेदृशं स्मारकं प्रस्तोतव्यं येन तेषामन्तरात्मा सन्तुष्टो भवेदिति । इमे हि खलु महर्षिप्रवरा एकान्तं विद्याव्यसनिनः, अप्रतिमसाहित्यानुरागिणः, असाधारण-विद्वाँसश्चासन् । अहोरात्रं नासी कश्चिदपि सः क्षणः यस्मिंस्ते संस्कृतग्रन्थाध्ययनाद्विरता अभूवन् । एवंस्थिते तेषां सर्वोत्तमं स्मारकमिदमेव भविष्यति यत् भारतवर्षस्य प्रधानकेन्द्रभूतायां वाराणस्यामस्यां सहस्रशो विदुषां छात्राणाञ्च ज्ञानवृद्ध्यै विराट् संस्कृत-पुस्तकालयो भवतु । यत्र वाराणस्यां संस्कृतविदुषां छात्राणाञ्च कृते लक्षत्रयाधिको वार्षिकव्ययः काश्यां भवेत्, तत्रैकस्य महतः संस्कृत-पुस्तकालयस्यावश्यकता कियतीमावश्यकतामादधातीति न वक्तव्यम् ।

अस्माकमियमभिलाषो विद्यते यत् अस्मिन् ग्रन्थसंग्रहालये संस्कृतस्य नवीनाः, प्राचीनाः, स्वल्पाः, महान्तश्च ग्रन्थाः सङ्कलिता भवेयुः । एतस्मिन् पुस्तकालये सर्वेषां संस्कृतविदुषां चित्राणां प्रियवस्तूनामपि संग्रहो भवतु । एतदेव नहि; संस्कृतसम्बन्धिनां भिन्नभिन्नभाषापुस्तकानामपि संग्रहोऽपेक्षित एव ।

एवं भारतवर्षस्य प्रधानतमे प्राचीन संस्कृतविद्याकेन्द्रे वाराणसीपुरे एतादृशस्य सरस्वती-सदनस्य निर्माणं भवेत्, येन संस्कृत- संसारस्य महदुपकारसाधनं स्यात् श्रीमतां शर्ममहोदयानाञ्च जीवनोद्देश्यं सुसिद्धं स्यात् । काशी हि नाम तेषां महापुरुषाणामतिप्रियतरं स्थानम्, तेषां ज्ञानार्जन कालेऽप्यत्रैव व्यत्यगच्छत् प्रयाणात् किञ्चित्पूर्वमेव काशीनिवासार्थं तैः स्वकीयं भवनमपि निर्मापितमासीत् । तदिदानीं पूज्यचरणया तेषां धर्मपत्न्या श्रीमत्या रत्नवत्या देव्या तेषां पुण्यस्मृतौ स्मारकं तत्रेन संस्थापितं विद्यते । भारतीयसभ्यतायाः प्रमुखं तीर्थमध्येतत् वाराणसीपुरं वर्वर्तीति रामावतार-सरस्वती-सदन-निर्माणाय समुपयुक्ततरमेतदति रिक्तं स्थानं न भवितुमर्हति । अतएव संस्कृतसाहित्य-समाज-सदस्याः समस्त देशस्य धनिकान्, मान्यान्, विद्यानुरागिणः सादरं सानुरोधञ्चाभ्यर्थयन्ते यत्तेऽस्मिन् महति कार्ये, तस्य पूर्त्यै प्रयतनं विधाय स्वकीयां गुणग्राहकतां उदारताञ्च प्रथयन्त्विति ।

स्वर्गीय—महामहोपाध्याय श्रीप्रभुदत्तशास्त्रिमहोदयाः ।

लेखकः—श्रीकेदारनाथशर्मा, सारस्वतः

श्रौतस्मार्त-क्रियासूर्यं कर्मकाण्ड महार्णवम् ।
वेद-कल्पतरुं वन्दे प्रभुदत्ताग्निहोत्रिणम् ॥

अस्माकं चरितनायकाः प्रातःस्मरणीयचरणाः वैदिकशिरोमणय आहिताग्नयः पण्डितप्रवराः श्रीमत्प्रभुदत्तशास्त्रिमहोदयाः वेदवेदाङ्गविद्वत्सु भारते वर्षे सर्वथैव प्राधान्यपदमलमकुर्वन्निति निवेदितमेवास्माभिः । तेषां महत्त्वमहितं गौरवपूर्णञ्च चरितमालोचयतामस्माकं हृदये महानुत्साहः, गर्वः, गौरवञ्च समुज्जृम्भते । स्वजीवने केन कियान् महत्त्वलाभः कृत इति न तस्य तादृशं महत्त्वसूचकं भवति, अपितु तेन स्वकीयजीवने कियान् कष्टानुभवः कृत— इत्येतदेव तस्य जीवने महत्त्वमासादयति । धनिकानां गर्भश्रीमतां पुत्रा यदि महत्त्वमाप्नुयुश्चेत् न किमपि तेषां महत्त्वम् । ये खलु निरवलम्बतया विविधकष्टमयं संसारसागरं समुत्तीर्य सर्वलोकानां मूर्ध्नि प्रतिष्ठन्ते, त एव धन्याः, त एव गुरवः, त एव जगत आदर्शभूता महापुरुषाः, तेषामेव जीवनं जीवनं, तेषामेव महत्त्वं महत्त्वम् । अस्माकं चरितनायकस्य पूज्यपादस्य श्रीमदग्निहोत्रिमहोदयस्य जीवनं तादृशमेव महत्त्वपूर्णमादर्शभूतमतएव च सर्वेषामनुकरणीयं वन्दनीयञ्चाभवत् ।

एतेषां जन्म 'जींद'-मण्डलान्तर्गत लिजवाना ग्रामे १९२१ वैक्रमाब्दे कार्त्तिकशुक्लाष्टम्यां सोमवासरे श्रीमतां पण्डितघनश्याममिश्रमहोदयानां गृहे समभूत् । बाल्यकाल एव पितृवियोग-विकला अनाथा इमे समभवन् । अष्टमे वर्षे-१९२९ तमे वैक्रमाब्दे-विधिवदुपनीता इमे ज्येष्ठभ्रातृभिः श्रीमद्भिः श्रीहरद्वारिशर्म्ममहोदयैः सह स्वाध्यायाध्ययनार्थं काश्यां समागमन् ।

वाराणस्यां श्रीमतां चिन्तामणिगुर्जरमहोदयानां सविधे सम्पूर्णस्य शुक्लयजुर्वेदस्याध्ययनं कृतवन्तः । ततश्च श्रीमतां मूलचन्द्रगुर्जरमहोदयेभ्यः, श्रीमद्भ्यः पण्डितजगन्नाथशर्मभ्यः सार्थं शतपथब्राह्मणमधीतवन्तः । सहैव च पूज्यपादानां पण्डितप्रवराणां वैयाकरणकेसरिणां श्रीमतामनन्तरामशास्त्रिमहोदयानां सविधे भाष्यान्तं व्याकरणं सांख्ययोगशास्त्राणि चाधीतवन्तः । इमां कृत्स्नामपि शास्त्रसम्पत्तिमासाद्य सुप्रथितयशसां वैदिकशिरोमणीनां श्रीमतां युगलकिशोरव्यासमहोदयानां निकटे साङ्गं सविस्तरं कर्मकाण्डशास्त्रमधीत्य वैदिकप्रवरा इमे वाराणस्यां विद्वत्सु वैदिकेषु च प्रथमां प्रतिष्ठामवाप्य शनैः शनैर्लब्ध-

यशःप्रसराः समस्तेऽपि भारते प्रधानवैदिकाः समभवन् ।

अध्ययनकालानन्तरं सर्वसौभाग्यसम्पन्ना अपि पूज्यचरणाः श्रीमन्महामहोपाध्यायमहोदया यावज्जीवनं छात्रेभ्यो वेद-वेदाङ्ग-कर्मकाण्डादिशिक्षां वितरन्तः सर्वथा स्वाध्यायनिरता एवाभवन् । सर्वप्रथमं १९४६ तमे वैक्रमाब्दे सरस्वती-गोपुरस्थितसत्यनारायणमन्दिरे वेदाध्यापकत्वे नियुक्ताः । १९५२ तमे वैक्रमाब्दे नगवास्थित-रुइयासंस्कृतपाठशालायाम्, १९५५ तमे च वैक्रमाब्दे भास्करपाठशालायामध्यापयन्, १९५८ तमे च विक्रमवत्सरे हिन्दूकालेजस्थरणवीर-संस्कृत महाविद्यालये वेद-कर्मकाण्ड-प्रधानाध्यापकपदे नियुक्ता इमे महता गौरवेण कार्यं समचालयन् । १९६४ तमे च वैक्रमाब्दे च हिन्दूकालेजस्य तत्कालीनाध्यक्षाणां श्रीमतां डा० भगवान्दास एम्० ए० डी० एल० महोदयानां पुत्रस्य विदेशगमने तत्समर्थनमकुर्वन्तः श्रीमन्तो हिन्दूकालेजमपहायाग्न्याधानं कृत्वा गृह एव पाठनकार्यमकुर्वन् ।

१९७३ तमे च वैक्रमाब्दे देशपूज्यानां महामान्यश्रीमालवीय-महोदयानामाग्रहेण सादरं सबहुमानं सगौरवञ्च श्रीमन्तो हिन्दू-विश्व-विद्यालये संस्कृत विभागे प्राधान्येन कार्यभारं गृहीतवन्तः । हिन्दूविश्वविद्यालयस्य प्रधानस्तम्भेषु एत एव संस्कृतज्ञेष्वासन् । हिन्दुविश्वविद्यालयस्य धर्मविज्ञान-विभागे निर्वेतनं प्रधानाध्यापक (प्रिन्सिपल) पदे स्थिता इमे तद्विभागीय-समितेः (फेकल्टी) प्रधानाध्यक्षा (दीन, Dean) अपि आसन् । विश्वविद्यालयीयसञ्चालनसभायां (काउन्सिल), सिनेट-समितौ च संस्कृत विभागस्य प्रतिनिधिपदे नियुक्ता आसन् । एवं सेन्ट्रलहिन्दूस्कूल-रणवीर-संस्कृत पाठशाला-सञ्चालन-समितौ (स्कूलबोर्ड) प्रधान-संस्कृत-सदस्या अप्यासन् । एवं आयुर्वेद-विभागे, अन्यास्वपि तत्तत्समितिषु (सिण्डिकेट, कोर्ट आदि) सदस्यतां कुर्वन्तो विश्वविद्यालयस्य महान्तं साहाय्यकं समाचरन् । एतादृशं गौरवं संस्कृत-विद्वत्सु प्रायो दुर्लभमेव ।

१९८१ तमे च विक्रमसंवत्सरे भारतसम्राजा "महामहोपाध्याय" पदव्या विभूषिता इमे तमेवोपाधिं स्व-गुणगणगौरवगरिम्णा समभूषयन् । वस्तुतो निखिलेऽपि भारते नासीदेतादृशो वैदिकशिरोमणिः । न केवलं शुष्कवैदिका एव, सिद्धान्तकौमुद्याः अन्येषाञ्च व्युत्पादकानां काव्य-साहित्य-दर्शन-ग्रन्थानां पाठने परम-प्रथित-कीर्त्तय आसन् । वेदार्थपाठने, कर्मकाण्डस्य जटिल-गहनविषयाणां मर्मविस्फोटने च परं प्रावीण्यमासीदेतेषाम् । अतएव वाराणस्यामद्वितीयं साम्राज्यमासीत् तेषां संस्कृत-पण्डितेषु ।

एतेषां यादृशं पाण्डित्यमासीत् तादृशमेव च हृदयम्, औदार्यम्, सहृदयत्वम्, परोपकारित्वम्, दयालुत्वञ्चासीत् । प्रायः संस्कृत-पण्डिता अपूर्णपण्डित्या नैतादृशं महत्त्वं गौरवं गरिमाणमासाद परोपकार-निरता उदाराशयाः सहृदयाश्च भवन्ति । अतएव साधारणजीवने स्थिता अपि चरितनायकाः आदर्शभूतमसाधारणं गौरवमासादयन् ।

प्रायो भारतवर्षस्य प्रधानश्रेष्ठिन एतेषां चरणानुरक्ताः, आज्ञापराः, भक्ताः, शिष्याश्चासन् । राजबलदेवदासप्रभृतयो जगत्प्रसिद्धा वदान्यमौलिभूताः श्रेष्ठिप्रवराः श्रीमतामाहिताग्निमहोदयानामनन्यभक्ताः, चरणानुरक्ताश्चासन् ।

हिन्दूविश्वविद्यालयस्य विभिन्नविभागेषु कियन्त एव प्रसिद्धा विद्वाँसो श्रीमतामग्निहोत्रिमहोदयानां कृपया गुणग्राहकतया चाध्यापनादिकार्येषु नियुक्ताः समुपकृताश्च सन्ति । विदुषां गुणग्रहणे तेषां समुन्नति-सम्पादने, सर्वविधसाहाय्ये च सहर्षं बद्धपरिकरा न जाने कियतां ब्राह्मण-विदुषां जीवनदातार आसन् । विविधैरुपायैः प्रकारैश्च याचकान् सफलमनोरथान् कुर्वन्तो महामहोपाध्यायमहोदयाः स्वकीयमक्षयं यशः, पुण्यञ्चार्जितवन्तः। शतशः सहस्रशो ब्राह्मणा विद्वाँसश्च तैरुपकृताः सन्ति ।

तेषां गुणगौरवावर्जितहृदयाः, श्रीमहामान्याः काशीनरेश्वराः, श्रीमन्मालवीयमहोदयाः, श्रीमन्माननीयाः जीन्द-नरेश्वराः, अन्ये च भारतवर्षीया अनेके राजानः, महाराजाः, श्रेष्ठिनः, माननीयाः महापुरुषा विद्वत्प्रवरा एतेषां परमभक्ताः, अनुरागिणश्चासन् । भारते वर्षे प्रायः सुप्रसिद्धेषु सर्वेष्वपि नगरेषु प्रधानयागेषु प्रतिष्ठासु च सर्वत्रैवाचार्यत्वमाचार्य्याणाम् । अमृतसर-नगरीय-सुप्रसिद्ध 'दुर्ग्याना' मन्दिरसंस्थापनमप्येतेषां हस्तेनाभवत् । बहूनां राज्ञामभिषेकश्चैतैः सम्पादितः । सर्वमपि स्वहस्तेनैव सम्पादयन्तः सर्वेषामेव भारतीययुवकानां विशेषतः संस्कृतज्ञानामादर्शभूता अभवन् । एतदेव महत्त्वं महत्त्वम्, एषैव समुन्नतिः समुन्नतिः, एतदेव वास्तविकं गौरवम् । इदानीमधुना । स्वकीये विषये अनन्या अद्वितीयाश्चेमे तेषां समुन्नतिम्, सौभाग्यम्, सामर्थ्यम्, महत्त्वम्,

एतेषां स्वरूपमपि नितरां मनोहरं रमणीयमाकर्षकञ्चासीत् । एकवारमेतेषां स्वरूपपरिदर्शनेन जनानां भक्तिः समुदेतिस्म । प्रायो विद्वाँसो बलहीनाः, स्वास्थ्यरहिताश्च भवन्ति । परमेतेषां स्वास्थ्यमतीव समीचीनं सुव्यवस्थितञ्चासीत् । वाचि माधुर्यं स्वाभाविकमभूत् । तैः सह संलपतां हृदयं परमाह्लादितं भवतिस्म ।

वैदिक-कर्मकाण्डप्रचारे यज्ञानां प्रचारे चैतेषां महान् प्रयत्न आसीत् । यत्र देशेषु पुरा यज्ञयागादिवैदिकक्रियानामभाव आसीत्, तत्र तत्राग्निहोत्रिमहोदयैर्महारुद्रादियागानां सहस्रशः प्रचारणं कृतम् । पञ्चगौडेषु श्रौतस्मार्तक्रियानुष्ठानप्रचारं विधाय वैदिकविधीनाम्, तन्मूलकस्य च भगवतः सनातनधर्मस्य यादृशः प्रचारः कृतः, यादृशी च भक्तिर्जनहृदये समुत्पादिता आसीत्, न तादृशी प्रयत्नशतेन व्याख्यानसभादिभिश्च सम्पादयितुं शक्या । इमे च साक्षात् वेदमूर्त्तयः, सनातनधर्मस्य प्रधानस्तम्भभूताः नास्तिकानां हृदयेऽपि वैदिकीं श्रद्धां समापादयन् ।

एतेषां प्रधान-शिष्येषु सर्वप्रथमशिष्यास्तु तेषां ज्येष्ठतनया श्रीमन्तो विद्याधरशर्म्ममहोदया एव सन्ति । तेषां परिचयः क्रमशो दास्यामः । इदानीमिदमेव वक्तव्यमस्ति यत् ते पितृचरणानामिव भारतवर्षे न स्वीयां तुलां बिभ्रति । पञ्चगौडेषु त एव

वैदिकशिरोमणयोऽस्माकं संस्कृत-समाजस्य गौरव-भूताः सन्ति।

एवं श्रीमन्तो विजयचन्द्रवेदाचार्यमहोदयाः काशीस्थ-राजकीय-संस्कृतमहाविद्यालये वेदाध्यापका आसन्। तेषां स्मरणं कृत्वा हृदयं भिद्यते। हन्त साम्प्रतमेव ते नवयुवका विद्वांसः पूज्यपादानां गुरुचरणानां परिचर्यार्थमस्मान् शोक-सागरे विनिक्षिप्य कथामात्रशेषा वर्तन्ते।

अपरे पण्डितनाथूरामशर्म्ममहोदया वेदाचार्याः, साम्प्रतं हिन्दूविश्वविद्यालयीये धर्मविज्ञानविभागे वेदाध्यापकाः सन्ति। ते विशुद्धानन्द महाविद्यालये व्याकरणाध्यापका अपि सन्ति। इतरे श्रीमन्तः पण्डित-व्रजबलालझा वेदाचार्याः, हिन्दुविश्वविद्यालयीय रणवीर-संस्कृत-पाठशालायां वेदविभागे प्रधानाध्यापकाः सन्ति। कलिकातानगरीयविशुद्धानन्द-महाविद्यालयवेदाध्यापकाः श्रीदेवानन्द झा वेदाचार्याः, खुरखुरास्थ-चन्द्रभूषण-संस्कृत-महाविद्यालये वेदाध्यापकाः श्रीत्रिवेणीशझा वेदाचार्यमहोदयाः, किम्बहुना, मैथिल सरयूपारीणगौड-सारस्वतेषु प्रायः सर्वेऽपि वैदिका विद्वाँसः स्तेषां साक्षात्परम्परया वा शिष्य-प्रशिष्या एव सन्ति। एतद्धि गृहमुत्तरभारते वैदिकानां मूलायतनं प्रधानस्थानञ्चाभवत्।

एतेषां पञ्चभ्रातर आसन्। त्रयो भ्रातरः गृह एव तिष्ठन्ति। तेषां कुटुम्बादिकमपि तत्रैव वरीवर्ति। ज्येष्ठभ्रातरः श्रीमन्तो हरद्वारि शर्म्ममहोदयाः साम्प्रतमपि नवतिवर्षवयस्काः काशीवासं कुर्वन्ति। तेषां पुत्रत्रयं विद्यते। श्रीमन्तः कालीप्रसादमहोदयाः, श्रीगौरीदत्तशर्म्माणः, श्रीहरदत्तशर्म्माणश्चेति त्रयोऽपि वैदिकविद्वाँसः क्रियानिष्ठाः कार्यरताः सन्ति।

श्रीमतां महामहोपाध्यायानां पुत्रत्रयं विद्यते। तत्र ज्येष्ठाः श्रीमन्तः पण्डितविद्याधरशर्म्ममहोदयाः हिन्दूविश्वविद्यालयीय धर्मविज्ञानविभागस्य प्रधानाध्यापकाः सन्ति। एतेषामपि परः शताश्छात्राः धर्माचार्याः वेदाचार्य्याश्च सन्ति। एतेषां विषये इदमेव कथनमलं भवेद्धु यदिमे श्रीमतां पितृचरणानामपेक्षया कस्मिन्नप्यंशे न्यूना न सन्ति। शीलतायाम् नम्रतायाम्, सौजन्ये, सौहार्दे, सदाचरणे चासाधारणाः सन्ति। एतेषां स्वरूपमपि तेषामिव गौरवपूर्णमाकर्षकं प्रभावोत्पादकञ्च विद्यते। एतेऽपि काश्यां विद्वत्सु गौरवभूताः, वैदिकेषु प्रथमगणनीयाः सन्ति। एभिरिदानीमेव श्रौताधानं कृतमस्ति।

द्वितीयपुत्राः श्रीमन्तः पण्डितशिवदत्तशास्त्रिणो न्यायाचार्य्याः काशीस्थ-राजकीय-संस्कृत-महाविद्यालये न्यायाध्यापकाः सन्ति। इमेऽपि काशीस्थनवयुवकेषु प्रसिद्धाः कार्यकर्तार उत्साहवन्तश्च सन्ति।

तृतीयतनयाः श्रीमन्तः पण्डितदेवनाथशर्म्माणो वैदिकविधौ निष्णाताः पौरोहित्यादिगृहकार्यं सम्पादयन्ति। इमेऽपि सुशीलाः, विनम्राः सदाचारपरायणाः सन्ति।

यद्यपीमे वैदिकाचार्याः वर्षद्वयादस्वस्था एवासन्। परं नासीत् नित्यकर्म्मणां हानिः। कियतः कालात् जीर्णज्वरजर्जरा इमे पौषशुक्लतृतीयायाम् उत्तरायणे सङ्क्रमणसमय एव नितरां स्वस्थचित्ताः ज्ञानपूर्वकं शरीरं त्यक्तवन्तः। प्रातः समुत्थाय सन्ध्यावन्दनादि नित्यकृत्यं समाप्य, अरिष्टनिवृत्तये तुलादानं विधातुं धृतार्घ्यपात्रा एव सहसा अनायासेनैव शरीरं त्यक्तवन्तः। प्रोक्तमेव 'अनायासेन मरणं विना दैन्येन जीवनम्।'

एतेषां कैलासवासेन भारतवर्षस्य वेदशाखी शुष्कतामापद्यत। वैदिकं पाण्डित्यञ्च ह्रसिमानमगमत्। काशीस्थविदुषां गौरवस्तम्भरूपाणां मञ्झिहोत्रिमहोदयानां काशीलाभेन शून्यमिव भारतीयं विद्वन्मण्डलं वस्तुतः शून्यमेव सञ्जातम्। कियतां ब्राह्मणविदुषां कल्पवृक्षोऽयं सहसैव तिरोभूदिति दौर्भाग्यविलसितमेव सुरभारत्याः, संस्कृत-साहित्य-समाजस्य च।

सुप्रभातम्

वैदिक-काल-निर्णेता



भगवान् लोकमान्यः तिलकः ।

वैदिकधर्म-संरक्षकः



महामान्यो मदनमोहन मालवीयः ।

काशी-विद्यापीठ-कुलपतिः



डा० भगवान् दासः, एम० ए०, डी० लिट्०

प्रणववादः ।

ले० — डा० भगवानदास एम० ए०, डी० एल० महोदयः ।
(श्रीकाशी विद्यापीठ कुलपतिः)

पूर्वकथा ।

प्रायः त्रिंशद्वर्षादधिकः समयो व्यतीतः । १९९४ वैक्रमाब्दीये शीतकाले 'बारावंकी' नाम्नि नगरे यदा अहं राजकीय कार्य-वशाद्गतवानासम्; तदा अस्माकं मित्रस्य पण्डित परमेश्वरीदासस्य गृहे एकस्य विदुषो दर्शनमभवत् । तेषां नाम 'धनराज' इति आसीत् । मया श्रुतं यत् शैशवावस्थायामेव शीतला रोगेण तेषां नेत्रे नष्टीभूते; परं तेषां मेधा[1] नितरां प्रबला आसीत्, बहूनि बहुमूल्यानि च संस्कृतग्रन्थरत्नानि तैः कण्ठाभरणीकृतान्यास-न् । तैः सह वार्तालापेन मदीयं मनस्तेषां कृते सश्रद्धमभवत् । तेषां कथनमासीत् यत्, "येषां विषयाणां प्रश्नमात्रेणैव आस्तिक-पण्डितानां समाजे, मनुष्यो नास्तिकः भ्रष्टो वा भवति; तेषां सर्वेषामुत्तराणि संस्कृतग्रन्थेषु सविस्तरमुपपादि-तानि सन्ति । तैरुक्तं यत्, मया बाल्यावस्थायां गुरुभ्यः पृष्टम्, यत् गुरो ! पाणिनिव्याकरणे माहेश्वराणि सूत्राणि चतुर्दश-सङ्ख्याकान्येव किं सन्ति ? पञ्चदश संख्यकानि षोडशसङ्ख्यकान्येव वा किं न सन्ति ? एवं सूत्राणां क्रमो यथा लिखितस्तथा कथं विद्यते ? अन्यथा तेषामुल्लेखः कथं न कृतः ? इति । एतेषां प्रश्नानामुत्तरेण मया ताडनमेव लब्धम् । कियत्कालानन्तरमेव मया कस्यापि संन्यासिनो मुखाच्छ्रुतम् यत् कश्चन विद्वान् विद्यते यत्पार्श्वे विंशतिसहस्र संख्यकानि माहेश्वरसूत्राणि, षष्टिसहस्रमितञ्च नारदीयं भाष्यं विद्यते । तेषां निकटे त्वया पठनीयम् । अस्याः प्रणाल्या एकः श्लोकः साम्प्रतमपि श्रूयते । यथाः—

" यान्युज्जहार माहेशाद् व्यासो व्याकरणार्णवात् ।
तानि किं पदरत्नानि मान्ति पाणिनिगोष्पदे ॥" इति

एवं मया नेत्रहीनेन तेषां गृहे पठता यतस्ततो गुरु-ग्रन्थानामन्वेषणं कृत्वा शतशो ग्रन्थाः समुपलब्धाः । ते च स्थानाभावात् कण्ठेकृता । "

एष आत्मोदन्तस्तैरेव प्रज्ञाचक्षुर्भिःस्वयं कथित आसीत्, अत्र कियान् सत्यांश इति वक्तुं नास्ति किमपि स्वतन्त्रं प्रमाणम् ।

आत्मवृत्तान्त-श्रवणानन्तरं मया पृष्टम्, यत् प्राचीन-ग्रन्थेषु कुत्रापि 'अहम्' 'एतत्' 'न' एतेष्वेव त्रिषु शब्देषु ब्रह्मनिरूपणं भवता समुपलब्धमिति । तैश्च किञ्चित् विचार्य प्रोक्तं यत् ओम्, एतेभ्य एव शब्देभ्यो ब्रह्मनिरूपणं गार्ग्यायण–ऋषिप्रणीते 'प्रणववाद' नाम्नि ग्रन्थे कृतमस्ति । तैस्तदानीं तस्य ग्रन्थस्य कियानंशोऽपि श्रावित आसीत् । पुनर्मया काश्यां सेन्ट्रलहिन्दूकालेजस्य सेवायां समागतेन १९५७ तमे विक्रमवत्सरे काश्यामाहूतास्ते पञ्चमासान् मद्गृहेऽवस्थाय १६००० श्लोकात्मकं प्रणववादनामकं ग्रन्थममलीलिखन् । स च ग्रन्थः क्रमशो मया, मन्मित्र

* एष लेखः श्रीमतां श्रीभगवान्दासमहोदयानामा-ङ्ग्लभाषा... वैदिकाङ्कृते सङ्क्षेपतो हिन्दीभाषातोऽनूदितः, अत्र ...स्याय यत्रकुत्रचन सन्धिनियमस्य भङ्गोऽपि विहितः, ...व्यं पाठकैः । —सम्पादकः

१—धारणाशक्तिः । 'धीर्धारणावती मेधा' ।

प्रवरेण महामहोपाध्याय-श्रीगङ्गानाथझामहोदयेन, श्रीमता महामहोपाध्यायेन श्रीअम्बादासशास्त्रिणा च लिपी कृतः । तस्यैव क्रियानंशः सारतः श्रीमतामभिमुखं संस्थाप्यते ।

अस्मिन् ग्रन्थे अयमेव विषयो विस्तरतः समुपवर्णितो विद्यते यत् प्रणवे त्रीणि अक्षराणि सन्ति, 'अ' 'उ' 'म्' इति । एतेषामर्थः—अहम्, एतत्, न इत्ययमेवास्ति । एषां त्रयाणामेव समाहारो ब्रह्मपदवाच्यः ।

पाठकाः विचारयिष्यन्ति यत् 'अहम्-एतत्-न' इत्यस्य किं रहस्यमिति तथा प्रणवस्य अतिपवित्रे शब्दे अस्यार्थस्य सन्निवेशेन वा किं फलम् ? हिन्दूनां कर्णेषु मुखेषु च इयं वार्ता सम्यक् प्रविष्टा वर्तते यत् समस्तजगतः सारभूता वेदाः, वेदानां सारभूता गायत्री, गायत्र्याः सारभूतो मूलबीजभूतः प्रणवः । प्रणवात् वेदस्य, वेदाच्च जगतः समुत्पत्तिः । परं प्रणवाद्वेदानाम्, वेदेभ्यश्च जगतामुत्पत्तिः कथं जायत इत्यस्य प्रश्नस्योत्तरं प्रचलितग्रन्थेभ्यो ग्रन्थपण्डितेभ्यश्च नोपलभ्यते । अस्मादेव प्रणववादग्रन्थादस्य समीचीनमुत्तरं समुपलभ्यते ।

अनन्तजीवानामेकमात्रमयमेवाभिलापो यत्—'सुखं मे भूयात् दुःखं माभूदिति' । अनन्तजीवैरनन्ताः प्रकाराः सुखस्य दुःखस्य च स्वीकृताः सन्ति । परमनुगमतः सर्वेषां सुखानां दुःखानाञ्चैकमेव मूलस्वरूपं विद्यते । अहमः—आत्मनः वृद्धिरेव सुखस्यैकमात्रं स्वरूपम्, तस्य हानिः-ह्रास-एव दुःखस्यैकं स्वरूपं विद्यते । यद्यप्युपाधिभेदात् अनन्ताः जीवाः सन्ति, परं तेषां मूलस्वरूपमेकं 'अहम्'-इत्येवास्ति । अत एव मनुना प्रोक्तम्—

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥

उपनिषत्स्वपि—

"आत्मनस्तु कामाय सर्वं प्रियं भवति ।"
"आत्मा वै श्रेष्ठः प्रेष्ठश्च" आमन्त्रितो अहम् अयम् इत्येवाग्रे उक्त्वा अथ अन्यन्नाम प्रब्रूते यदस्य भवति ।

—बृहदारण्यके,

यत्र यत्र स्वत्त्वं विद्यते, स्ववशः प्रचलति, स्वीयं शासनं विद्यते, तत्रैव सुखम् । यत्र यत्र परत्वम्, परतन्त्रत्वम्, पर शासनं विद्यते; तत्रैव दुःखम् । यत्र अहंत्वं (ममत्वम्) यत्राभिमानः, तस्यैव पोषणेन सुखम्, शोषणेन च दुःखम् ।

परतन्त्रतैव मृत्युः । रामेण पृष्टो वशिष्ठः । यथा—

परमेष्ठ्यपि निष्ठावान् ह्रियते हरिरप्यजः ।
भवोऽप्यभावमायाति कैवास्था मादृशे जने ॥

—योगवाशिष्ठे ।

व्यासेनापि स्वपुत्राय शुकाय समुपदिष्टम्—

किं ते धनेन किमु बन्धुभिरेव वा ते,
किं ते दारैः पुत्रक ! यो मरिष्यसि ॥
आत्मानमन्विच्छ गुहां प्रविष्टम्,
पितामहस्ते क्व गतः पिता च ॥

नचिकेता अपीन्द्रादिममेव वरं वरयामास—

येयं प्रेते विचिकित्सा मनुष्ये
अस्तीत्येके नायमस्तीति चान्ये ।
एतद्विद्यामनुशिष्टस्त्वयाऽहम्,
वराणामेष वरस्तृतीयः ॥

यदि मृत्युभयान्मुच्येत जीवस्तदैव पारतन्त्र्याद्विमुच्येत तदैव च तस्य आत्मवशत्वं सर्वश्रेष्ठत्वञ्च सिद्ध्येत । तदैव परमानन्दः समुत्पद्येत । "भूमा वै सुखम् ।" तदैव आत्मनः अहमः, भूमा = बहुत्वम्, महत्त्वं व्यापकत्वं वा सिद्धं स्यात् । "नाल्पे वै सुखमस्ति ।" आत्मनो लघुत्वे सुखं नास्ति । यावत् स्वं परवशम्, पराधीनम्, लघुम्, मृत्युवशं मन्यते, तावत् कुतः सुखम् ?

अस्मादेव मृत्युभयादात्मानं मोक्तुं मनुष्यैर्बहवो विचाराः कृताः । सर्वस्रष्टुः परमेश्वरस्य सत्ता स्वीकृता । आरम्भवादः स्वीकृतः । न्याय-वैशेषिक-दर्शनयोर्निर्माणं सञ्जातम् । ततोपि सन्तोषो न जातः । पराधीनता तथैव स्थिता । यदि परमेश्वरो रुष्टः स्यात्तदा किं भवेत् ? इत्येतद् भयं स्थितम् एव । तदा नास्तिक दर्शनानामुत्पत्तिः सञ्जाता । सांख्य-योगशास्त्राणाञ्च

प्रकृतिपुरुषौ द्वावनादी पदार्थौ स्वीकृतौ । परिणामवादः प्रचलितः । द्वैतापत्तिः समायाता । अन्नत्त्वद्वैतस्यावश्यकताऽऽसीत् । " द्वितीयाद् वै भयं भवति' । तदा मायावाद-अविद्यावाद-अध्यासवाद-आभासवाद-विवर्तवादानामुत्पत्तिरभूत । वेदान्तदर्शनमाविर्भूतम् ।

वेदान्ते, पुरुष—प्रकृत्योर्भिन्नत्त्वं न स्वीक्रियते; परं पुरुषस्य-आत्मन एव माया—प्रकृतिः-शक्तिःस्वीकृता वेदान्तिभिः। 'अहं ' रूपः पुरुषः, आत्मा, " एतत् " रूपा प्रकृतिः, माया अविद्या चेति । एवं जगतो द्वौ विभागौ जातौ—एकः अहम्,रूपः,विषयी, अन्यश्च 'एतद्' रूपः, विषयः, जडः, आत्मविवर्त्तः, विरुद्धः, विपरीतः आभासमात्रः, आत्मनि अध्यस्तः, अध्यारोपितः । ' अहम् ' सत्यम् , माया च मिथ्येति तैः सिद्धान्तितम् । परमत्रापि वेदान्ते—एषा शङ्का समुत्पन्ना यत् सम्बन्धो भवतु मिथ्या; परं कथमेष सम्बन्धः समुत्पन्नः ? यद्येकवारं जातस्तदा पुनः कथं न भविष्यति ? किमत्र प्रमाणं यद्येनास्माकं मुक्तिः स्यादेव(! वेदान्त-प्रचलितैर्महावाक्यैर्न सन्तोषः सञ्जायते । केचन वदन्ति

'सोऽकामयत बहुस्याम्, प्रजायेय " " तत्सृष्ट्वा तदेवानुप्राविशत् " इति ।

केचन केवलं निष्क्रियं साधयन्ति । अहं ब्रह्मास्मि, "नेह नानास्ति किंचन " इत्यादिः । परमाभ्याँ वाक्याभ्यामस्माकं सन्तोषो न जायते । वयन्तु तादृशं वाक्यमभिलषामः येन निखिलमपि विश्वं करामलकवत् प्रतीयेत । तदेतत् महावाक्यं " अहम् एतत् न " सर्वेषां समाहाररूपं वरीवर्त्ति ।

प्रणववादस्य विषयः ' महावाक्यम् ' ।

'अहं ', ' एतत ', ' न '—अस्मात वाक्यात् यत फलमस्ति तस्य वर्णनं विस्तरतः प्रणववादे कृतमस्ति । तदत्र संक्षेपतः समुपवर्ण्यते ।

प्रणवस्य त्रयाणामक्षराणामर्थस्त्रिषु शब्देषु कृतोऽस्ति । तदेवैकं मूलभूतं महावाक्यमुपलभ्यते । ' अ 'कारस्य 'अहं', आत्मरूपः, ' उ ' कारस्य ' एतत् ' अर्थः, (विषयः, अनात्मरूपः), ' म ' कारस्य ' न ' इत्यर्थः, (निषेधात्मक सम्बन्धः) । अतः प्रथमं, महावाक्यं "अहम्-एतत्-न, ", परमात्मनः, ब्रह्मणः, स्वरूपम् , स्वभावम् , प्रकारम्-अर्थात्-संसारं दर्शयति । एतेषां त्रयाणां शब्दानां संयोगतः, विभागतः, तथा अनुलोमतः, प्रतिलोमतश्च अवान्तर महावाक्यान्युद्भवन्ति । एकैकं महावाक्यं संसारस्य एकैकस्य विभागस्य प्रकारस्य च नियमभूतमस्ति । तदनुसारमेव संसारस्य तत्तद्विभागाः सञ्चाल्यन्ते ।

के के प्रधान-प्रकाराः ? केन केन महावाक्येन तेषां सूचनं सञ्जायते ? तत्तद्विधेया अधिकारिणश्च के के ? एतन्निर्णयार्थं मूलमहावाक्ये दृष्टिनिक्षेपो विधेयः । यतस्तस्मिन्नेव तत एव च समस्तसंसारस्य सृष्टिः, स्थितिः, लयश्च सम्भवति । ' अहम् ' इति आत्मनः स्वरूपम् । ' एतत् ' इति अनात्मनः स्वरूपम् । अनयोर्निषेधरूपः सम्बन्धः । "अहमेतन्नास्मि "—इमां भावनाम् , इमां धारणाम्, इमां संविदं च यदि क्रमदृष्ट्या अवलोकयामश्चेत् , अस्मिन् तिस्रो वार्त्ता निःसरन्ति । प्रथमतस्तु ' अहमः ' अग्रे ' एतत ' पदार्थः समागच्छति । तस्मिन्नेव क्षणे ज्ञानं भवति । तदनन्तरं ' अहमः ' एतदश्च संयोग-वियोगस्य सम्भवः सम्भवति । इयमेव इच्छा । तृतीयक्षणे संयोगस्य वियोगो भवति । सैषा क्रिया कथ्यते । संयोग-वियोगयोः सहोपादानं संयोगस्य प्रथममवश्यसम्भवात् पश्चात् वियोगस्य चापि सम्भवाच्च । प्रथमं रागस्ततो द्वेषः, आदौ प्रवृत्तिस्ततो निवृत्तिः, पूर्वमादानं ततो दानम् । इयमेव संसरणक्रिया वर्तते ।

ज्ञानम्, इच्छा, क्रिया च ।

ज्ञानम्, इच्छा, क्रिया चेति तिस्र एव जीवमात्रस्य जीवनमात्रस्य च सर्वस्वमस्ति । प्रतिक्षणं प्रत्येको जीवः ज्ञानेच्छाक्रियाणां चक्रे पतितः परिभ्रमति । आदौ ज्ञानम् , तत इच्छा, तदनन्तरञ्च क्रिया । क्रियाया अनन्तरं पुनर्ज्ञानम्, पुन रच्छा, पुनः क्रिया । एतदनन्तं चक्रं सर्वथा प्रचलत्येव ।

प्रणवे अकारो ज्ञान-सूचकः, उकारः क्रियायाः, मकारश्च सदसदात्मिकाया विधिनिषेधरूपाया इच्छायाः ।

' अहं ' रूपे आत्मनि-पुरुषे-अथवा प्रत्यगात्मनि यत्त्रयाणाममीषां पदार्थानां बीजं वर्तते, तदेव सत्-चित्-आनन्देति

नाम्ना कथ्यते । ज्ञानं चिदात्मकम्, क्रिया सदात्मिका, इच्छा चानन्दस्वरूपा । एवमनात्मनि-अर्थात्-मूलप्रकृतावपि एतएव त्रयः पदार्थाः । सत्त्वं ज्ञानात्मकम्, रजः क्रियात्मकम्, तमश्च इच्छात्मकम् । एतएव प्रत्येक परमाणौ, प्रत्येकस्मिंश्च ब्रह्माण्डे व्यासाः सन्ति । ब्रह्माण्डे ज्ञानस्याधिष्ठाता देवो विष्णुः, क्रियाया ब्रह्मा, इच्छायाः शिवः । प्रतिब्रह्माण्ड मिमा एव त्रिमूर्तयः सन्ति ।

ऋग्वेदः ।

"अहम्", "अहमस्मि", "अहं ब्रह्मास्मि", इदं महावाक्यं ज्ञानस्य संभूतम् । अस्य व्यवहरणम्, प्रयोगः, विष्णुदेवताया आधीनं विद्यते । अस्यैव टीकारूपो ऋग्वेदः । ऋग्वेदस्य मुख्यं महावाक्यमिदमेवास्ति । अस्यैव विस्तारो ऋग्वेदे वर्तते । अस्मिन्नेव ज्ञानसर्वस्वं निहितं वर्वर्ति ।

यजुर्वेदः ।

"एतत्", "एतत् (बहु) स्याम्", एकोऽहं बहु स्याम्" एतन्महावाक्यं क्रियातत्त्वम् । अयमेव यजुर्वेदस्य मूलमन्त्रः । अस्याधिष्ठाता देवो ब्रह्मा । चतुर्णां वेदानां वक्ता ब्रह्माऽस्ति अतएवोच्यते ततो वेदप्रकाशकारिणी क्रिया तस्मादेव भवति । नोचेत् पृथक् वेदप्रकाशका देवाः भिन्ना एव ।

सामवेदः ।

"न", "एतत् न", "नेह नानास्ति किञ्चन" एतन्महावाक्यमिच्छायास्तत्त्वम् । इच्छाया कार्यमेतदेव यत् जीवं सांसारिकेषु पदार्थेषु प्रवर्तयेत्, पुनस्तस्य इच्छापूर्तिर्न भवेत्, तस्य मनो विषय-व्याकुलं स्यात्, तत असन्तोषं वैराग्यञ्चाधिगच्छेदिति । इच्छैव प्रथमं जीवम् अस्तेः स्वरूपं दर्शयित्वा पश्चात् नास्तेः स्वरूपं प्रदर्शयति । जीवः स्वेच्छावशादेव संसृतिचक्रे पतितो दुःखानि भुञ्जन् 'जीव'-संज्ञां लभते । 'एतत सर्वं किमपि नास्ति'-एतदेव स्वरूपमिच्छायाः । सामवेदस्य मूलभूतमिदमेव महावाक्यम्, शिवश्च तदधिष्ठाता देवः ।

अथर्ववेदः ।

एतेषां त्रयाणामेव वाक्यानां समाहारः तदेव मूलवाक्यम् "अहमेतन्न" विद्यते । अथर्ववेदोऽस्यैव व्याख्यारूपः यं स्वयं महाविष्णुर्विरचितवान् ।

यथैव महाविष्णुना समष्टिरूपेण अथर्ववेदस्य रचनां विधाय स्वाधीनस्थानामधस्स्थानामधिकारिणां शासनाधीनं कृतम् तथा स्वाधीनस्थकर्मचारिणां पृथक् पृथक् विभागसञ्चालनाय ऋग्यजुःसाम्नां रचना कृता, तथैव तदुपरिष्टैरधिकारिभिर्महाविष्णोः शिक्षणाय महावेदः—गायत्रीरूपो विरचितः । एवमनन्तोऽयं क्रमः । मूलसूत्राणि, मूलसिद्धान्तानि मूलमहावाक्यानि सर्वेष्वपि तान्येव सन्ति । केवलं व्याख्याविस्तारत एव भेदः प्रतीयते ।

गायत्री ।

गायत्री विषये उच्यते यत् चतुर्विंशतिमुख्यमहावाक्यानां सूचकमेकैकमक्षरं गृहीत्वा गायत्रीनिर्माणं सञ्जातमिति ।

प्रत्येकस्य वेदस्य चत्वारो विभागाः ।

ज्ञानेच्छाकृतीनां त्रयाणां तथा चतुर्थस्य 'न' कारस्य च समाहारः—इत्येव सिद्धान्तितम् । एतेषामेव-परिवर्तनविवर्त्तनाभ्यां संसारस्यानन्तानन्तविभागाः सञ्जायन्ते । एतदनुसारमेव प्रत्येकस्य वेदस्य चत्वारो विभागाः सन्ति । एषा विभाग-व्यवस्था केवलमस्माकं गणनायैव, वस्तुतस्तेषां न परस्परं भेदः । एकस्मिन्नन्येषां निभृता स्थितिर्वर्तत एव । ज्ञाने, इच्छा क्रिया च वर्तते । इच्छायां ज्ञानं क्रिया च । क्रियायां इच्छा ज्ञानञ्च । ज्ञानमये ऋग्वेदेऽपि ज्ञानांशः संहितारूपः, क्रियांशो ब्राह्मणभागः, इच्छांश उपनिषत् स्वरूपः, एतेषां समाहाररूप उपवेदश्च तन्त्रशास्त्रम् । एवं सर्वेष्वपि वेदेषु विभाग-चतुष्टयं विद्यत एव ।

शाखा ।

प्रत्येकस्य वेदस्य शाखाद्वयं विद्यते । कृष्णा, शुक्लाच । एतस्य कारणमिदं यत्, पुरुषः, प्रकृतिः आत्मा, अनात्मा, सत्, असत्, प्रकाशः, तमः, दक्षिणमार्गः, वाममार्गश्चेति एतेषामेकैकस्याभिव्यक्तये प्रत्येकस्य वेदस्य शाखाद्वयं विद्यते ।

अङ्गोपङ्गानि ।

एतदनन्तरं ज्ञानेच्छाक्रियाणां परिवर्त्तन-विवर्त्तनाभ्यां [वेद]स्य शिक्षादीनि षडङ्गानि, वेदान्त-मीमांसादीनि चोपाङ्गानि [ज]ातानि । एतेषां संमिश्रणेन बहूनि शास्त्राणि जायन्ते । [ए]षां सर्वेषां वेदानां शास्त्राणाञ्च समूहसमष्टिः संहितांशे [वि]द्यते ।

वेदानां विषयः ।

(१) ऋग्वेदे ह्येतत् सर्वं वर्णितमस्ति यत् कस्य पदार्थस्य [क]स्मात् कथञ्च समुत्पत्तिः, स्थितिः, विनाशश्चेति । को देशः [क]श्च कालस्तदुचितः ? का तस्यावश्यकता ? कियन्तश्च तद्वि-[भा]गाः ? इत्यादि ।

(२) यजुर्वेदे क्रियायाः स्वरूपम्, क्रियायाः मोक्षः, [ब]न्धश्च, मोक्षस्य प्रकाराः, यज्ञाः, संस्काराः, श्राद्धानि [त]थैतेषामाध्यात्मिकोऽर्थः समुपवर्णितः । जीवनमात्रस्य [स]र्वे व्यवहारा एतस्मिन् कथिताः सन्ति ।

(३) सामवेदे इच्छायाः वर्णनमस्ति ।

प्रथममेव कथितं यत्, संसारे द्वावेव पदार्थौ दृश्येते, [']अहम्' 'अनहम्' चेति । अनयोः सम्बन्धः, अनयोः संयोग-[वियोग]-मित्थयमेव शक्तिस्वरूपस्तृतीयः पदार्थः । शक्तेरपि [ए]कं स्वरूपमिच्छैव । इच्छां विहाय अन्यत् किमपि ["]...[ं]" जगति नास्ति । आत्मनो दृष्ट्या यःपदार्थः ['...'] स एव जीवदृष्ट्या 'इच्छा' पदार्थः । यथा आत्मन-[स्त्र]यो गुणाः; सत्, चित्, आनन्दरूपाः, यथा मूलप्रकृतेः [सत्त्वर]जस्तमोरूपा स्त्रयोगुणाः सन्ति, तथैव शक्ति-मायादि-[रू]पायाश्छायाया दैवप्रकृतेस्त्रयो गुणाः, सृष्टिस्थिति-संहाररूपाः सन्ति । दैवतादृष्ट्या इमा एव तिस्रः शक्तयः सरस्वती-लक्ष्मी-सती-रूपाः कथ्यन्ते । ज्ञानशक्तेः-सरस्वत्याः ब्रह्मणः सम्बन्धः, यो ब्रह्मा क्रियायाः, उत्पत्तेश्चाधिष्ठाता, एतदर्थं विद्यते यतो ज्ञानं विना क्रियाया अनुपपत्तिः । एवं क्रिया-शक्तेः-लक्ष्म्याः ज्ञानस्य स्थितेश्चाधिष्ठातुर्विष्णोःसम्बन्ध एतदर्थं विद्यते यत् क्रियामन्तरा ज्ञानस्य साफल्यं नास्ति । एवमेव सती-शिवयोः सम्बन्धः । द्वावपीच्छारूपौ । अतएव द्वयोरर्धाङ्गरूपः सम्बन्धः ।

ज्ञानेच्छाक्रियानुसारं प्रत्येकस्य त्रयो विभागाः । लक्ष्म्याः-अर्थात्-क्रियाशक्तेः प्रत्येकं त्रयो विभागाः सन्ति । यथा रमा, लक्ष्मीः, शारदा च । रमायां ज्ञानांशस्य संमिश्रणम्, लक्ष्मीः शुद्ध-क्रियारूपा, शारदायां क्रियया सह इच्छा सम्मि-लिताऽस्ति ।

एवं ऐन्द्री-ब्राह्मी-सरस्वती-भेदेन सरस्वती चापि त्रिविधा । सत्या अपि त्रयो भेदाः सन्ति । यथा-सती-गौरी, पार्वती च । एतासां नवानां समाहारो भैरवीनाम्ना व्यपदिश्यते । एता एव दशमहाविद्याः, ज्ञानेच्छाक्रियाभेदेन भवन्ति ।

देववाहनानां हंस-गरुड-वृषभाणामप्येतादृश एवार्थो देश-काल-गतिरूपः । एतएव त्रयो निषेधात्मकस्य मकारस्य गुणाः सन्ति । त्रयोऽपि साक्षात् निषेधस्वरूपाः शून्यरूपाः सन्ति । देशोऽप्याकाशरूपः, कालोऽप्यभावरूपः, असद्रूप एव । एवं गतिरपि, या देश-कालयोः संयोगेन समुत्पद्यते, साऽपि परमशून्यरूपाऽस्ति । यद्यप्येते त्रयोऽपदार्थाः परम-सद्रूपाः सन्ति; तथापि एतेषां विना संसारस्यास्तित्वमेव न स्यात् । एष्वेव संसारः ।

एतासां शक्तीनामनन्त-प्रकारकं वर्णनं सामवेदे कृतमस्ति ।

वैदिको राज्याभिषेकः ।

लेखकः—श्रीतारादत्त पन्तः, साहित्याचार्यः, व्याकरण-काव्यतीर्थः दर्शनशास्त्री ।

राज्याभिषेकः खलु न सर्वस्यापि मनुष्यमात्रस्य अपि; तु तिरश्चां पशूनां मृगाणां मक्षिकाणां कीटानामपि महाकौतूहलजनको दृश्यते स च भगवता वेदेनैवं विहितो-यस्य सामग्रीवर्णन-श्रवणमात्रेणापि मनुष्यमात्रस्य मनसि महान्ति कल्लोलकुलानि प्रोल्लसन्ति, शौर्य्योदार्य्यादि परिपूर्णं भवति हृदयम्, आशा च भवति यदि-एवंविधिना एवं रूपस्य यजमानस्य एवं प्रकारकः अभिषेकः क्रियेत एवंविधेन चतुर्वेदविदा पुरोधसा, साक्षात्प्रभुदत्तेनेव प्रभुदत्तेन, निदाघमल्लस्येव भगवता सवित्रा, तर्हि अस्माकं भूगोल एव किमुत भारते; स्वाराज्याय, वैराज्याय, भौज्याय, विजित्यै, अभिजित्यै, सर्वा अपि प्रजा समर्था भवेदिति । तस्यैतस्य महाभिषेकस्य संक्षेपः पाठकमनोविनोदाय क्रियते यथा—महाभिषेकवित् यः पुरोहित इच्छेत्, अयं क्षत्रियः सर्वान् जेतव्यान् जयेत्, सर्वालोकान् प्राप्नुयात्, अयम्, सर्वेषां राज्ञां मध्ये श्रैष्ठ्यं लभेत, परमतां गच्छेत्, अथ च वाञ्छेत् अयमेवं साम्राज्यं, भौज्यं स्वतन्त्रं राज्यं विशिष्टं राज्यं, किमुत पारमेष्ठ्यं राज ˈ माहाराज्यं, सर्वेषामाधिपत्यं लभेत, युद्धपारगामी स्यात्, सार्वभौमः स्यात्, सार्वकालिकः स्यात्, सर्वस्याः पृथिव्या एकराट् स्यात्, तमेतं क्षत्रियम् ऐन्द्रेण महाभिषेकेणाऽभिषिञ्चेत्; परं प्रजापालन-प्रतिज्ञापूर्वकम् ।

अयि पाठकाः ! पश्यत मन्त्रार्थतत्त्वं सामर्थ्यं पुरोहितस्य । स प्रतिज्ञां कारयित्वा पश्चात् राज्याभिषेकं करोति । प्रतिज्ञां च शपथपूर्वकम् करोति क्षत्रियः—यथा—

स य इच्छेत् एवंवित् क्षत्रियः अहं सर्वान् जेतव्यान् जयेयम्, अहं सर्वान् लोकान् विन्देयम्" ....इत्यादि स न विचिकित्सेत्, स ब्रूयात् सह श्रद्धया, यस्मिन् दिने ज्ञातोऽस्मि यस्मिंश्च प्रेतास्मि तदुभयमन्तरेण इष्टापूर्त्तं मे लोकं, सुकृतम्, आयुः, प्रजां मत्तोवर्जितां (पृथक्) कुर्याः, यदि ते अहं द्रुह्येयम् । इति क्षत्रियस्य प्रतिज्ञया साक्षात् स्पष्टमेव बुध्यते न क्षत्रियस्य स्वकीया प्रजा इति । किन्तु आचार्य-समर्पिता रक्षणीया प्रजा क्षत्रियस्य। अन्यथा कथमीदृशी शपथपूर्विका घोरा प्रतिज्ञा स्यात् । अतोऽद्यापि भवतां ब्रह्मणानां सर्वाः प्रजाः ब्राह्मणानुकारिणः स्वायत्तीकुर्वन्ति, भवन्तः शिथिलप्रयत्ना दृश्यन्ते, इति हन्त !

शिथिलताच वेदानभिज्ञतयैव । अन्यथा —

सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति ।

इति सर्वज्ञस्य मनोर्वचनं कथं सङ्गतं स्यात् ।
हन्त! ब्राह्मणाः अनधीतवेदा अपि वयं ब्राह्मणा एव
तावन्तं कालं यदि स्थिताः किमर्थं पुनरपि वेदा-
भ्यासेन न रक्षिष्याम आत्मनः स्वरूपम्, संपत्तिम्,
गौरवम्, अग्रगण्यताम्, सामर्थ्यञ्च । पश्यत, स्वसाम-
र्थ्यम्—यथा—ऐतरीये—

र ह वा अपुरोहितस्य नृपस्य, विबुधा, अन्नमदन्ति,
तस्माद्राजा राज्यं कुर्वाणो, ब्राह्मणं पुरोदधीत ।
इति तत्रैव ।

राज्यं कुर्वतः क्षत्रियस्य पुरोहित एव
आहवनीयो भवति, जाया गार्हपत्यः, पुत्रोऽन्वा-
हार्यपचनः, स यत् पुरोहिताय करोति, आहवनीये
तज्जुहोति, । अथ यज्जायायै करोति गार्ह-
पत्ये एव तद् जुहोति । अथ यत्पुत्राय करोति-
अन्वाहार्यपचने· एव तज्जुहोति ।

इति भगवती श्रुतिः स्वयमेव यज्ञ-राज्ययो
र्द्वयोरत्यन्तसारूप्यं प्रतिपादयन्ती पुरोहितस्य
क्रियायां तथा राज्यसंचालने कौशलम् इति
स्वयमेव दर्शयति ।

प्रशंसति च पुरोहित-सामर्थ्यं भगवती श्रुतिः—

अग्निर्वा एष वैश्वानरः पञ्चमेनिः (पञ्च-
...) यत्पुरोहितः । तस्य वाचि, एका
भवति, पादयोरेका, त्वचि एका, हृदये
एका, उपस्थे एका, ताभिर्ज्वालाभिर्ज्वलन्ती-
र्दीप्यमानाभिरुपोदेति राजानम् ।
...एष वैश्वानरः 'पञ्चज्वालः यत् पुरोहितः,
...राजानं परिगृह्य तिष्ठति, समुद्र इव भूमिम् ।

इत्यत्र पञ्चशक्तियुतस्य पुरोहितस्य राजोप-
सर्पणम् प्रथमा, पुरोहिशक्तिसंहिता द्वितीया श्रुतिः
समुद्रवेष्टितभूमिसदृशे पुरोहिते राष्ट्रपतौ राज्य-
सञ्चालके सति नृपस्य राज्ये न अनिष्टं भवति-
इति च श्रुतिः कथयति—

दीर्घायुरस्य राष्ट्रं भवति नैनं पुराऽऽयुषः
प्राणास्त्यजन्ति, आजरसं जीवति सर्वमपुरेति
न पुनर्म्रियते—

यस्यैवं विद्वान् ब्राह्मणो राष्टगोपः पुरोहितः ।

—ऐतरेयब्राह्मणे,

इष्टप्राप्तिं च दर्शयति भगवती श्रुतिः ।

क्षत्रेण क्षत्रं जयति बलेन बलमश्नुते—
यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः

अथच प्रजानुरागं दर्शयति सति पूर्वोक्ते पुरोहिते-

तस्मै विशः संजानते संमुखा एकमनसः,
यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः

पूर्वोक्तगुणविशिष्टपुरोधसा कृताऽभिषेकः अथच,
तदाज्ञया कृतशासनविधानः क्षत्रियः, अनायासेनैव
शत्रून् जयति ।

स इत् राजा प्रतिजन्यानि विश्वानि,
अप्रतीतो जयति राष्ट्राणि ।

—ऋग्वेदः,

पौरोहित्यस्य योग्याऽयोग्यौ ब्राह्मणौ—

योह व त्रीन् पुरोहितान् त्रीन् पुरोयातॄन् वेद,
स ब्राह्मणः पुरोहितः, स वदेत पुरोधयाः,
अग्निर्हि पुरोहितः, पृथिवी पुरोधाता,
वायुर्वाव पुरोहितः, अन्तरिक्षं पुरोधाता,

आदित्यो वाव पुरोहितः, द्यौः पुरोधाता, एष एव पुरोहितो य एव वेद, अथ स तिरोहितो य एवं न वेद ।

अत्र भगवत्या श्रुत्या अग्नि-पृथिव्योः, वातान्तरिक्षयोः द्यौ-सूर्ययोः विलक्षणः सम्बन्धो भूगर्भ-भूगोल-खगोलविद्यागम्यः, सर्वनीतिरम्यः, सर्वतोभद्रनम्यः, तद्वेत्ता पुरोहितः नचेदपुरोहित इति प्रतिपादितम् । अत्र भूमेः स्थितिः, भूमौ प्रधानकार्य्याणि च अग्न्यधीनानि । अन्तरिक्षकार्य्याणि वायोरधीनानि स्वर्गिणां ग्रहनक्षत्रादीनां विशेषकार्याणि सूर्यगतिज्ञानाधीनानि इति तेषां पुरोहित-पुरोधातृभावः संक्षेपतः सुधीभिर्विभावनीयः विस्तरस्तु लेखान्तरे गोलसूत्रे, सूर्यचरिते वा द्रष्टव्यः । प्रकृतमनुसरामः

हा ! भारतीयाः !! अथवा सर्वेऽपि मानवाः ! क्व सन्ति ते क्षत्रियाः, येषां राज्याऽभिषेकमहोत्सवः सार्वभौमः स्यात् क्व गतास्ते ब्राह्मणा येऽक्षत्रियमपि स्वगुणमहिम्ना क्षत्रियं कारयेयुः । येषां पादप्रक्षालनावशिष्टजलं सार्वभौमाः शिरसा वहन्तिस्म—

आपः पादावनेजनी द्विषन्तं निर्दहन्तु मे,
—इतिमन्त्रेण ।

हा हा विद्वांसः ! एतादृशौ द्वौ वैदिक-सार्वभौम-चक्रवर्त्तिनौ प्रातःस्मरणीयश्रीप्रभुदत्त—विजयचन्द्रौ, भारतभाग्यह्रासात् युगपदेव भूलोकमत्यजताम् इत्यहो कष्टपरम्परा !!!

तथापि ब्राह्मणैः पुरा निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चासीत् । इदानीन्तु सकारणः, (राज्यावाप्तिफलकः) पठितव्यः, अर्थतः ज्ञातव्यश्च कर्त्तव्यश्च प्रयत्नः भारतभूमावेव भारतराज्याऽभिषेकाय भविष्यतः पालकस्य । यदैव भारतभूमौ वैदिको राज्याभिषेको भविष्यति तदैव श्रुतिस्मृतिरीत्या राज्यशासनं प्रवर्त्तेत, तदैव विश्वजनीनम्, तदैव राज्यं स्वतन्त्रम् । तदर्थमेवाग्रहः कर्त्तव्यो भारतीयैः । अयि सार्वभौमं अवलम्बस्व क्षत्रियत्वम्, पालय वर्णाश्रमधर्मम् । कुरु भूलोकाऽधिपत्यम्, सदैव तिष्ठ भारतभूमौ, भवतुराज्याभिषेको वैदिक इति ॥

संग्रहीष्यामः संभारान्, भावयिष्यामः परिसरं ब्रह्मण इतिच ।



सुप्रभातम्

सुप्रभातस्य निरीक्षकः



सर्वतन्त्र-स्वतन्त्रः श्री दामोदरलाल गोस्वामी ।

भारतवर्षस्य महर्षिः



आचार्य श्रीरामावतार शर्मा ।

प्रयागविश्वविद्यालय-कुलपतिः



म० म० डा० गङ्गानाथ झा एम० ए०, डी० लिट्०

वैदिक आर्य्य-निवासः ।

लेखकः—दर्शनकेशरी, श्रीगोपालशास्त्री, साहित्याचार्यः, काव्य-न्यायतीर्थः, (सुप्रभात-सम्पादकः) ।

पाश्चात्याः संस्कृतज्ञा विद्वांसस्तदनुगाश्च कियन्तः ज्ञा अपि ऋग्वेदाद्यालोचनया अन्यान्यैतिहासिकज्ञानेन च आर्य्याणामादिनिवासं भारतातिरिक्तं कमप्यन्यं देशं कल्पयन्ति, तत्रापि च तेष्वेव तद्विषये बहु द्वैमत्यं , केचन कथयन्ति यद् "आर्य्याः" प्रथमतः कास्पियन स्य पार्श्वे कुत्रचन प्रदेशे न्यवात्सुः, तत एव क्रमशोऽत्र ते वर्षे आगमन्निति" केऽपि तु "आर्य्या उत्तरमेरुप्रदेशतः भारतमाजग्मुरिति" उद्घोषयन्ति, अन्येच "तिब्बत विष्टप) प्रदेशत एव आर्य्या अत्र भारते पदन्यासमकार्षु- " जल्पन्ति । इत्यादि । एवं परस्परं सत्प्रतिपक्षायमाणे अन्योऽन्यमेवान्योऽन्य-प्रमाणैर्व्याहन्यन्त एव ।

परन्तु अद्य सुप्रभातपाठकानां पुरतो वैदिकशिरोमणीनां स्थानां म.म. पूज्य प्रभुदत्तशास्त्रिणां स्मृतौ कोऽप्युपहार- वैदिकविषयक एवार्पणीयो लेख इति वैदिकाङ्कसम्पा- नां प्रियवयस्यानां श्री पं० केदारनाथशास्त्रि-सारस्वता- ज्ञामासाद्य ऋग्वेदाद्यालोचनेनेतरप्रमाणेन च तत्र विषये प्रकाशमादधत् स्वान्तःकरणसन्तोषायान्येषां विमर्शिनां विमर्शाय च कियदपि यतिष्ये ।

मतौ तु स्वदेशेऽपि विदेशिवदाचरतामेवेदं कथनं स्याद् यद् वयं भारतीया बहिस्था यवनशासकवद् शासकवदिह भारते बहिस्त आगत्य तिष्ठामो अस्माकमादिजन्मभूरिति । हा ! हन्त ! एवं भारतीयानां मतिविभ्रमः सञ्जातोऽस्ति यत्ते स्वयं संस्कृताध्ययनं स्तं वेदराशिं नालोचयन्ति किन्तु; परकीयमुखेनोद्गतं प्रान्तं विज्ञानं सत्यत्वेनाकलयन्तः स्वदेशेऽपि विदेशि श्लाघनीयं मन्यन्ते ।

अस्तु ! अद्य तत्रैवाहं ऋग्वेदर्चासु सुप्रभातपाठकानां दृष्टिमावर्जयामि पश्यन्तु ।

"इमं मे गङ्गे यमुने सरस्वति सुतुद्रि स्तोमं सचता परुष्ण्या असिक्न्या मरुद्वृधे वितस्तयार्जीकिये शृणुह्यासुषोमया" । (ऋ० १०—७५)

मन्त्रोऽयं भारतीयप्रसिद्धनदीस्तुत्या कं देशमार्य्यावासं सूचयति ?

"सितासिते सरिते यत्र सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति"

अस्मिन्मन्त्रे प्रयागस्थ-गङ्गायमुनयोः सङ्गमः साक्षादेव दृश्यते । एतेनापि सूच्यते यदार्य्याणां वैदिककालिको निवासोऽत्रैव भारते वर्षे आसीन्नान्यत्र कृष्णयजुर्वेदीय-प्रथमकाण्डेऽष्टमप्रपाठके दशमानुवाके—

"ये देवा देवसुव स्त त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानां राजा ।"

इति मन्त्रो दृश्यते, यत्र भारतशब्दस्यैवोल्लेखोऽस्ति; येनायमेव भारतो देश आर्य्याणामादिनिवासः सूच्यते । शतपथ ब्राह्मणेऽपि ।

"तेषां कुरुक्षेत्रं देवयजनमास, तस्मादाहुः कुरुक्षेत्रं देवानां देवयजनमिति ।"

एतन्मन्त्रगतं कुरुक्षेत्रमेवादियज्ञस्थलमार्य्याणामत्रैव-निवासं सूचयति । आर्य्यावर्त्त-शब्दोऽपि "आर्य्या, आवर्तन्ते

पुनः पुनरुद्भवन्ति यत्रेति व्युत्पत्त्यात्रैव आर्य्यनिवासं लक्षयति । अपरञ्च,

गान्धारिभ्यो मूजवद्भ्योऽङ्गेभ्यो मगधेभ्यः
प्रेष्यं जनमिव शेवधिं तक्मानं परिदद्मसि ।"

इत्याथर्वणिकमन्त्रे सर्वेषामेवाधुनापि प्रसिद्धानामार्य्यावर्त-देशानामङ्गमगधादीनां मूजवदादिपर्वतानामपि कीर्तनं विद्यते । किमेतेनेदमेवायाति यदार्य्या बहिस्त आगत्यास्मिन् देशे न्यवात्सुः ? (कान्धार) गान्धारदेशस्तु आर्य्याणां पूर्वं निवासभूरासीदिति डिण्डिम-घोषं श्रुतिरुद्घोषयति ।

"पण्डितो मेधावी गान्धारानेवोपसम्पद्येतैव-मेवेहाचार्य्यवान् पुरुषो वेद ।"

(छान्दो० ६-१४-२)

महाभारतकालेऽपि गान्धारदेश आर्य्यनिवासोऽभूदिति तद्देशराजस्य पुत्री गान्धारी धृतराष्ट्रेण परिणीता सूचयति । इदानीं यत्तत्र म्लेच्छावासो विद्यते तत्रार्य्याणां स्वधर्मसंकोचो हेतुः ।

अपरञ्च

" किं कृण्वन्ति कीकटेषु गावः "

(ऋ० ३-५-३-१४)

इति निन्द्योपात्तोऽयं (मगध) कीकटोदेश आर्य्यनिवासस्य स्वसान्निध्यमेव द्योतयति, नतु कास्पियन् देशस्य । निरुक्तकारश्च "कीकटो नाम देशोऽनार्य्यनिवासः" (नि० ६-६-४) इति मगधदेशमेव परामृशति ।

स्मृतिषु तु

" कीकटेषु गया पुण्या नदी पुण्या पुनःपुना ', च्यवनस्याश्रमं पुण्यं, पुण्यं राजगृहं वनम्"

इति स्पष्टमेव मगधदेशकीर्तनं श्रूयते । अन्यच्च—

"यस्येमे हिमवन्तो महित्वा,
यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहुः
कस्मै देवाय हविषा विधेम: (ऋ० १०-१२-१-४)

इति विराट्ब्राह्मणः स्तुतौ स्पष्टमेव भारतस्यैवसीम्नो निर्देश उपलभ्यते । इत्यादि ऋग्वेदीय-प्रमाणैरेव सूच्यते यदार्य्याणां निवासभूः भारतवर्षमेव पूर्वमप्यासीन्न कश्चनान्यो देश इति । एतदन्यतः यत् कदाचित् सीम्नि संकोचो दृश्यते कदाचिच्च विस्तृतिरिति । तदपि कालभेदेन सम्पद्यते । यथा-ऋग्वेदीयनदीस्तुतौ "ऋजीत्येनी रुशती महित्वा परिज्रयांसि भरते रजांसि, अदब्धा सिन्धुरपसामपस्तमाश्वानचित्रा वपुषीव दर्शता" इत्यादिना हिमालय-पार्श्वस्थ-नदीनाम्ना तत्रत्य-देशानां " गान्धारीणामवाविका " (ऋ० १-१२६-७) इत्यादिभिश्च गान्धरादिदेशानामार्य्यावर्तेषु प्रवेशो दृश्यते—

" नि त्वा दधे वर आ पृथिव्या इडायास्पदे सुदिनत्वे अह्नाम्, दृषद्वत्यां मानुष आपगायां सरस्वत्यां रेवदग्ने दिदीहि । (ऋ. ३-२३-४) इत्यनेन मन्त्रेण दृषद्वती-सरस्वतीप्रभृतिनदीनां पार्श्वगा देशा आर्य्यावर्तेषु दृश्यन्ते यथा—

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥

इति मनुनापि ब्रह्मावर्तसीम्नो निर्देशोऽत्रैव कृतो दृश्यते । एतेन तु एवमपि सम्भाव्यते यदिमे सर्वेऽपि देशा आर्य्यावर्ते सन्ति क्रमशः कदाचिदेकस्य निर्देश आयाति कदाचिदन्यस्येति एतद्व्यतिरिक्तः कश्चन अन्यो देश आर्य्याणां निवासभूमिः पूर्वमासीदिति तु सर्वथापि खण्ड्यत एव । अपरञ्च पश्यन्तु, तत्रैव प्राथमिकी सृष्टिः सम्भवति यत्र, पूर्णा प्रकृतिः स्यात् (अर्थात् यत्र देशे प्रकृतिदेव्या विलासः सर्वथापि पूर्णतामधिगतश्चेत्) एतदपि भारतवर्ष एवावलोक्यते । अत्रैव षडपि ऋतवः स्वीयं पूर्णं विकाशमाविष्कुर्वन्ति । माघकवेः शब्दे यथा—

" तपेन वर्षाः शरदा हिमागमो,
वसन्तलक्ष्म्या शिशिरः समेत्य च ।

प्रसूनकान्तिं दधतः सदर्तव,
इहैव वास्तव्यकुटुम्बितामिताः ॥

इति। किम्बहुना, अत्र भारते एकस्मिन्नपि समये षडपि ...तवो यत्र तत्र विलसन्ति। एवं यदा खलु हिमालयस्य ...प्रदेशे हेमन्तशिशिरयोर्विलासस्तदानीमेव सिन्धुदेशस्य ...स्थले ग्रीष्मस्य दोर्दण्डप्रताप उद्घुष्यते, मयसूरा-(मैसूर) ...न्ते वसन्तस्य, आसामादिषु वर्षाणाम्, मध्यप्रदेशे च ...म्। एवमाधिभौतिकपूर्णतापि इहैव भारते। एवं कर्मकाण्ड ...काण्ड-भक्तिकाण्डानामपि प्राधान्येन आध्यात्मिकी अपि ...पूर्णता दरीदृश्यते। मिथिलायां कर्मकाण्डबाहुल्यं विहारे ...दिषु च ज्ञानाधिक्यम् गुर्जरे भक्तिप्राबल्यञ्च प्रसिद्धमेव। ...प्रान्ते काश्यान्तु सर्वेषामेव सामञ्जस्यम्। आधि-...पूर्णतायामपि तामसिकदेवेभ्यो भूतप्रेतादिभ्य आरभ्य ...वादं ब्रह्मात्मैक्यं यावदत्रैव बहवो वादा दृश्यन्ते ...आदिकाले च पूर्णपुरुषाणामेवोत्पत्तिर्भवतीति सर्वथापि-...योऽयं सिद्धान्तः। एवञ्च तत्रैव पूर्णपुरुषाणामादि ...र्भवितुमर्हति, यत्र प्रकृतिरपि सर्वात्मना पूर्णा स्यादि ...भिः कतिपयैः प्रमाणैर्मया 'यथासम्भवं भारतवर्षम् ...आर्यागामादिनिवासभूरिति' श्रीमतां सुप्रभातपाठकानां ...नाय प्रकटितम्। श्रीमन्तश्चात्र विषये पर्य्याप्तं पर्य्यालोच-...कियं मम प्रयासः साफल्यमेति नवा? अहन्तु सम्भाव-...यदिमे दाम्भिकाः पाश्चात्याः सुधियो भारतीयान् ...नुभैवं सिद्धान्तं प्रवर्तितवन्तः, "इमे भारतीयाः ...याः किन्तु वयमिव इमेऽपि बहिस्था एव, इति" एतस्या-...भिप्रायो भवेद् यदयं देशो न युष्माकमेव। अयन्देशस्तु ...श, एव विद्यते यद् ये बलिनो भवन्ति तेऽत्रागत्य ...त्वं विस्तारयन्ति यथा भवन्तः पूर्वमत्रागत्यात्रत्या-...नादिद्राविडान् विजित्य दासान् कृत्वाऽधितिष्ठन्ति ...न्। तथैव वयमपि समागता अत्रैव वत्स्यामो देशमिमं ...न इत्यादिच्छिन्नबुद्ध्या भारतीय-युवकान् विकृतमस्ति-...ष्का सर्वमपि भारतीयसमाजमन्तःकलहयन्ति। देशस्य ...पूज्यतमां संस्कृतिं सभ्यतां विदूषयितुमनेकविधं ...श्च विस्तारयन्ति। यथा—"अस्मद्देशोऽपरः ...

आसन्नार्य्याश्चात्रागत्य ता जातीर्विजित्य दासभावं नीतवन्तः। स्वयञ्च विभज्य केचन ब्राह्मणकर्म कुर्वाणा ब्राह्मणा अभवन्, केचन शासनादिकृत्यं कुर्वन्तः क्षत्रियाः, एवं व्यापारकृत्यादिषु संसक्तास्ते वैश्या बभूवुः, अपरे च येऽत्रत्या जना आसन् ते तेषां सेवकाः शूद्राः सञ्जाताः—इत्येवं वर्णव्यवस्थेयं पश्चात्कल्पिता विद्यते, कथमेतस्याः कृते भवतामेतावान् प्रयासः? त्यजन्तु सर्वमिदमाडम्बरं अस्मदादिवत् सर्वेऽपि भवन्त एकवर्णा भवन्तु" इत्यादि विजेतृजातीयानां यो भावो भवति तमेव प्रचारितवन्तः। अल्पज्ञाश्चेमे केवलांग्लभाषामात्रदुर्ज्ञान दुर्विदग्धाः तमेव तेषां वञ्चनात्मकं सिद्धान्तं साधु मत्वा सर्वत्र च बालपाठशालासु पाठयन्ति पठन्ति च, येन च सर्वेऽपि आधुनिका आंग्लकलाशाला-पाठशालाध्यायिनश्छात्रास्तद्विचार विचूर्णचेतसः स्वीयमेव देशं परदेशं मन्यन्ते, स्वीयां संस्कृतिं बर्बरसंस्कृतिमसभ्याञ्च मत्वाऽवहेलयन्ति, इति विमृशन्तु सुधियः। एतेषां प्रवञ्चनापराणां पाश्चात्यवणिजामागमनात् पूर्वन्तु केषामपि मनसि अयं विचारो नोदियाय, यद् वयं कास्पियन् हृदनिवासिनः, नेयं भारती भूरस्माकं पितृपितामहादीनां जन्मभूरिति। एतेषामागमनेन सह अन्यरोगवदयमपि विषमयप्रयोगो भारतीयानां पाश्चात्यशिक्षाविकृतमस्तिष्कानां हृदये सन्निविष्टः सञ्जातः। पश्यन्तु, ये मन्त्रद्रष्टार ऋषयः सन्ति तेषाम् एतस्य कथने कियान् प्रयास आसीद् यद् नायमस्माकं देशः, वयमत्र विजेतारो भूत्वा समागताः अस्माकं जन्मभूस्तु इतोऽन्यत्रोत्तरस्यां दिशि कास्पियन् हृदो विद्यते इति। येषामार्य्याणां स्वभाव एवेदृग् भाति यत्ते स्वपूर्वपुरुषाणां स्मृतिरक्षणे बद्धपरिकरा दृश्यन्ते, गोत्र-प्रवरादिरूपेणाधुनाऽपि स्वपूर्वपुरुषान् प्रख्यापयन्ति, त एव यद्यन्यत आगता अभविष्यंस्तर्हि तस्य देशस्य नामरक्षायै यत्नं नाकरिष्यन्? प्रत्युत इतो भारतवर्षत एवान्यत्र गमनस्य प्रमाणमुपलभ्यते यथा—

"शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः,
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च।
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवना शकाः,
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः।

मनु अ० १० श्लो० ४३-४४

श्रीमद्भागवते प्रियव्रतस्य राज्ञः पुत्राणामन्यत्र द्वीपद्वीपान्तरेषु गमनं तत्रचोपनिवेशादिसंस्थापनं प्रसिद्धमेवेति । अद्य श्रीमतां विचारार्थं पूर्वरङ्गस्वरूपेण किञ्चिदिव निगद्यैतावतैव विरम्यते । श्रीमन्तश्चावश्यमत्रावदधतु, परामृशन्तु, परस्परं विमृशन्तु स्वान्तःकरणे, यद् वेदानामनध्यायेन कीदृशी क्षतिरस्माकमधुना दरीदृश्यतेऽस्माकं मूल एव कुठाराघातः सञ्जातोऽस्ति । सत्यमेवाभ्यधायि मनुना—"अनध्यायेन वेदानामाचारस्य च वर्जनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति" इति सत्यं वयं जीवन्मृता एव जाता इदानीं वेदाध्ययनत्यागेन । "अनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" (मनु. २-१६८) इति शतशो वेदानध्यायिद्विजानां निन्दा तदध्यायिनाञ्च प्रशंसा मनुना कृतास्ति । परन्तु वयं ब्राह्मणा स्वाज्ञानपरवशास्ततो वहिर्मुखा एव दैनन्दिनं भवाम इत्यहो अस्माकंज्ञानान्धताविलासवैचित्र्यम् ।

वैदेशिकाश्च तदधीत्याज्ञाततन्मर्माणोऽप्यस्माकमेव वन्धून् तत्रत्यज्ञानवितरणव्याजेन वञ्चयन्तो विभ्रमयन्ति, विपथञ्च नयन्ति । पश्यतोहरा इव अस्माकं पश्यतामेव भारतीययुवकान् स्वानुगान् विदधति । वयञ्च हस्तोपरिहस्तं धृत्वा विषीदामः । भविष्यति किञ्चिदितोऽपि वैचित्र्यम् ।

वेदोऽखिलो धर्ममूलम् ।

ले०—श्रीनरदेवशास्त्री, वेदतीर्थः ।

पुरा खल्वैतदासीत्, यत्, स्वाध्यायमधीत्य स्वधर्मं पालयन्तिस्म भारतीया ब्राह्मणाः, न चाद्यत्वे तत्तथा । तदानीन्तनो वेदपरः स्वाध्यायशब्द इदानीं षडङ्गान्यतमे शास्त्रे प्रवर्तते । "स्वाध्यायोऽध्येतव्यः" इत्युपनिषद्वाक्यप्रवृत्तिरपि तादृश्येव संवृत्ता । स्वाध्यायः= स्ववेदोऽध्येतव्यः, अधीयन्ते किमु भूदेवैः स्व-स्व-वेदः ? यथा इदानीन्तनानां भूदेवानामार्यमिश्राणां षडङ्गान्यतमे शास्त्रे सर्वतोमुखी रुचिः प्रवृत्तिश्च, तथा नो न स्व-स्व-वेदे, इत्येव न विजानीमः । वेदः खलु भूदेवानां निधिः—निधिरक्षणं च तेषां प्रधानो धर्मः । षडङ्गरक्षणञ्च नाम गौणो विधिः । प्रधाने कृतो यत्नः सफलो भवति । वेदेषु रक्षितेषु किमु षडङ्गरक्षणं दुःशकम् ? वेदरक्षणं नाम ब्राह्मणानां निष्कारणो धर्मः, स च परित्यक्तस्तैः । उदरदरीपूरणचिन्तया, घृतलवणतैलतण्डुलचिन्तया ग्रस्ताः परिभ्रष्टा वैदिकपथात् ।

"यो जागार तमृचः कामयन्ते"

(ऋग्वेदे)

कामयति किमु ते भूदेवाः ? यान् ऋचः कामयन्ताम्

"यो जागार तमु सामानि यन्ति"

(ऋग्वेदे)

सामानि यन्ति किमु भूदेवान् ?

"यो जागार तमयं सोम आह"

(ऋग्वेदे)

आगच्छति किमु सोमो देवो ब्राह्मणान् प्रति किमपि शोभनं मन्त्रयितुम् ?

'तवाहमस्मि सख्ये न्योकाः'

(ऋग्वेदे)

सख्ये तिष्ठति किमु सोमो देव इदानीन्तनानां ब्राह्मणानां स्थाने ?

एतत्सर्वं पुराऽऽसीत् अद्यत्वे तु वैदिकप्रथा लुप्तप्राया तिष्ठति केषाञ्चिद्द्ब्राह्मणानां गृहे गुरुशिष्यपरम्परा-रक्षकाणां भूदेवानाम् । वेदरक्षा नाम परमोधर्मः=निष्कारणो धर्म इदानीं निर्वाहसाधनीभूतस्तादृशं महत्त्वं नोपधारयति ।

ब्राह्मणस्य हि देहोऽयं, क्षुद्रकामाय नेष्यते ।
इह कृच्छ्राय तपसे, प्रेत्यानन्तसुखाय च ॥

इति तत्त्वं तु विस्मृतिपथमेव गतमिति प्रतीयते ।

हन्त, हन्त, किमिदं संवृत्तम् । ये ब्राह्मणाः पुरा यवनकाले महता प्रयासेन वेदरक्षां विदधति त एवेदानीं वैदिकधर्मरक्षक-पोषक-स्वराज्याभावात् कालमाहात्म्याच्च वेदरक्षणे तदीक्षणे चासमर्थाः संवृत्ताः । वेदैर्विना ब्राह्मणा मूमूर्षन्ति, ब्राह्मणैर्विना

वेदा मुमूर्षन्ति, वेदब्राह्मणैर्विना धर्मो मुमूर्षति, धर्मेण विना जगन्मुमूर्षति। कथङ्कारं जगतीतले धर्मः प्रचलतु,—"सर्वं धर्मे प्रतिष्ठितम्" यदि मनु वाक्यमेतत्सत्यम्, यदि च नाम स धर्मो वेदे कात्स्न्येन प्रतिपादितः, इत्यपि च तथ्यम्, यदि च "तद्वचनादेवाम्नायस्य प्रामाण्यम्" तर्हि आम्नायं विहाय धर्मतत्त्वं विज्ञातुं कः समर्थः केवलं षडङ्गान्यतमे शास्त्रे भूरिपरिश्रमेण, वाचोविग्लापनेन च किं सेत्स्यति?

अयि भो विद्वांसो ब्राह्मणाः! यदि जगतः कल्याणमभिवाञ्छथ तर्हि स्ववेदः स्वनिधिः सर्वथा रक्षणीयः। तस्मिन् रक्षिते जगद्रक्षितं स्यात्तस्मिन्पालिते जगत्पालितं स्यात्—

अयि भोः

चातुर्वर्ण्यं त्रयो लोका।
श्चत्वारश्चाश्रमाः पृथक्॥
भूतं भव्यं भविष्यच्च।
सर्वं वेदात्प्रसिद्ध्यति॥

(मनुः)

अत एव वेद एव मतिं कुरुत, वेद एव परिश्रमं कुरुत। वेदेषु रक्षितेषु स्मृतिग्रन्थानां रक्षा, स्मृतिग्रन्थेषु रक्षितेषु सदाचाररक्षा, ब्राह्मणानुब्राह्मणरक्षा, यज्ञरक्षा, शास्त्ररक्षा, वेदेषु रक्षितेषु सर्वं संरक्षितं स्याद्वेदेषु हापितेषु सर्वं हापितं स्यात्।

वेदरक्षामन्तरेण को नाम जगतीतले आर्यसंस्कृतिरक्षां विधातुं समर्थः? अत एवाद्य—

स्वाध्यायान्मा प्रमदः।

इत्येव वक्तव्यम्।

वेदास्त्यागाश्च यज्ञाश्च,
नियमाश्च तपांसि च।
न विप्रदुष्टभावस्य,
सिद्धिं गच्छन्ति कर्हिचित्॥

(मनुः)

इत्यपि न विस्मरणीयम्।

"स्वाध्यायहीनं=स्ववेदविहीनं (द्विजं) न पुनन्ति वेदाः" वेदाः न पुनन्ति॥

अयि भोः काशिकपण्डिताः,!

यथाऽऽर्यमिश्रैरन्येषु शास्त्रेषु भूरिपरिश्रमः क्रियते, आयुषो भागाधिक्यं याप्यते तथैव वेदेऽपि परिश्रमो विधीयताम् इति भूयो भूयो निवेदनं सविनयं सानुबन्धम्।

अनभ्यासेन वेदानाम्
आचारस्य च वर्जनात्।
आलस्यादन्नदोषाच्च
मृत्युर्विप्राञ्जिघांसति॥

(मनुः)

वेदो नित्यमधीयतामाचारो रक्ष्यतामालस्यं प्रहायान्नदोषो (प्रतिग्रहादि) ऽपवार्यतामन्यथा मृत्युश्च ब्राह्मणानां द्वारि सन्निहितस्तदाकृष्य अकालमरणं म्रियताम्। किमभीष्टं भूदेवानाम्? तदेव श्रोतुकामा अत्रैव विरमामः।

ब्राह्मणादीनां परस्परं सहभोजनव्यवस्था ।

ले०—महामान्यो देशपूज्यः श्रीमान् मदनमोहन—मालवीय-महोदयः

अथ केषामन्नं ब्राह्मणैर्भोज्यमिति विचार्य्यते।

"तत्र गौतमः—

प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुञ्जीत। इति "प्रशस्तानां विहितकर्मानुष्ठातृत्वेन निषिद्धाननुष्ठातृत्वेन च स्तुतिविषयाणाम्। द्विजातीनां त्रैवर्णिकानाम्।" इति वीरमित्रोदयः। मिताक्षरायां तु "प्रशस्तानां स्वकर्मणा शुद्धजातीनां ब्राह्मणो भुञ्जीतेति" पठितम्। तत्रापि पाठे पूर्वोक्त एवार्थः। वीरमित्रोदये आपस्तम्बः—

त्रयाणां वर्णानां क्षत्रियप्रभृतीनां समावृत्तेन न भोक्तव्यम्। प्रकृत्या ब्राह्मणस्य भोक्तव्यम्।

कारणादभोज्यम्। यत्र प्रायश्चित्तीयं कर्मासेवने प्रायश्चित्तवति निर्वेशस्य भोक्तव्यम्।

सर्ववर्णानां स्वधर्मे वर्त्तमानानां भोक्तव्यं शूद्रवर्जमित्येक इति।

अत्र समावृत्तग्रहणाद् ब्रह्मचारिणः सर्ववर्णेषु भिक्षाचरणमनिषिद्धम्। तत्र गौतमः—सार्ववर्णिक भैक्षचरणमभिशस्तपतितवर्जितमिति, संस्कारमयूखे वर्णधर्मप्रकरणे वाराहवाक्यम्—

त्रिषु वर्णेषु कर्त्तव्यं पाकभोजनमेव च। इति वीरमित्रोदयप्रायश्चित्तविवेकयोर्ब्रह्मपुराणम्—

"राज्ञां पर्वणि वैश्यानामश्नीयान्मङ्गले गवाम्।" इति

राजशब्दः क्षत्रियजातिवाचकः पूर्वमीमांसाया-मवेष्ट्यधिकरणे (२ अ. ३ पा. ३ सू.) शावरभाष्यादौ तथैव निर्णीतत्वात्। पर्वणि उत्सवे इति प्रायश्चित्तविवेकटीकायां गोविन्दानन्दः।

'तिथिभेदे क्षणे पर्व' इति क्षणे उत्सवे इत्यर्थः। इति तेनैवोक्तेः।

गवां मङ्गलं नाम वैश्यानामुत्सवविशेषः। उपलक्षणमेतदुत्सव-मात्रस्य। एतदग्रे स्पष्टीभविष्यति।

वीरमित्रोदयमदनपारिजातापरार्केषु यमजमदग्निपैठीनसाः—

ब्राह्मणस्य सदाश्नीयात् क्षत्रियस्य च पर्वसु।
प्रकृतेषु च वैश्यस्य न शूद्रस्य कदाचन॥

"पर्वसु पूर्णिमादिषु प्रकृतेषु प्रक्रमविशेषेषु उत्सवेषु गोमङ्गलादिषु"—इति वीरमित्रोदयमदनपारिजातौ। "प्रकृतेषु उत्सवेषु" इत्यपरार्कः। एवं च पूर्वोक्तब्रह्मपुराणवचने गवां मङ्गलमित्यनेन उत्सवमात्रमुपलक्ष्यते इति सर्वसंमतम्।

पराशरोऽपि—

क्षत्रियश्चापि वैश्यश्च क्रियावन्तौ शुचिव्रतौ।
तद्गृहे तु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः॥
(प्रा. का. ११ अ. १२)

"क्रियावन्तौ=विहिताध्ययनयजनादियुक्तौ। शुचिव्रतौ व्रतं स्मार्त्तोधर्मः। तच्च यथाविध्यनुष्ठितं शुचि भवति। तद्युक्तौ शुचिव्रतौ। श्रौतस्मार्त्तधर्मनिष्ठयोः क्षत्रियवैश्ययोर्गृहेषु हव्ये कव्ये वा शिष्टैर्विप्रैर्भोक्तव्यम्। क्रियावन्तौ शुचिव्रताविति विशेषणात् अतद्विधक्षत्रियादिविषयाणि तदन्ननिषेधशास्त्राणि-

त्यवगन्तव्यम् । तथाच चतुर्विंशतितमे तदन्ननिषेध-मभिप्रेत्य प्रायश्चित्तमभिहितम्—

सहस्रं तु जपेद्देव्याः क्षत्रियस्यान्नभोजने ।
तथोपवासं वैश्यस्य सहस्रं सार्द्धमेव च ॥

इति माधवाचार्य्यः—

अग्रे "हव्यकव्येषु नित्यशः" इत्युक्त्या दैवे पित्र्ये च कर्म्मणि क्षत्रियवैश्ययोर्गृहेषु ब्राह्मणैः सदैव भोक्तव्यमिति सुस्पष्टं प्रतीयते ।

नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ।
आददीताममेवास्मादवृत्तावेकरात्रिकम् ॥

इति मनुवचनेन शूद्रपक्वान्नादनस्यैव निषेधात् । क्षत्रियादिपक्वान्नभोजनस्य निषिद्धत्वाभावात् ॥

त्रिषु वर्णेषु कर्त्तव्यं पाकभोजनमेव च इति संस्कारमयूखधृतपूर्वोक्तवाराहवचनेन त्रैवर्णिकपक्वान्नस्य भोजने विहितत्वाच्च ।

अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्
वैश्यस्यत्वन्नमेवान्नमित्यादावपि क्षत्रियान्नादि शब्देन क्षत्रियवैश्य-पक्वान्नमेव ग्राह्यम्; नत्वामान्नं प्रमाणाभावात् ।

वेदव्यासेन महाभारतीयारण्यकपर्वणि द्रौपदीपक्वानामन्नानां ब्राह्मणैर्भोजनस्य वर्णितत्वेन शास्त्रविरोधापत्तेश्च । नच कलियुगे क्षत्रियादीनां पक्वान्नं विप्राणां निषिद्धमतो न शास्त्राऽविरोध इति भ्रमितव्यं तादृशनिषेधबोधकशास्त्राभावात् । ननु आपद्येव क्षत्रियवैश्यपक्वान्नाभ्यनुज्ञानं विप्राणां न्याय्यं नत्वनापदीति चेत् तादृशमुनिवचनाभावात् प्रत्युत पूर्वोक्तपराशरवचने "नियमः" इत्युपादानात्

क्षत्रियवैश्यगृहेषु आपदनापत्साधारणं हव्यकव्य-भोजनं विप्राणामभ्यनुज्ञातं भवति ।

नच पूर्वोक्ते गौतमवचने "प्रशस्तानां स्वकर्म्मस्वि-" त्युपादानात् पराशरवचने च "क्रियावन्तो शुचिव्रता" विति क्षत्रियवैश्ययोर्विशेषणात् इदानीं तादृशक्षत्रियवैश्ययोरभावेन तदन्नभोजनं नाधुना युक्तम् । युगान्तरे च यथोक्तलक्षणक्षत्रियवैश्ययोः सत्त्वेन तत्रैव तदन्नस्य ग्राह्यत्वं, तथा च पूर्वोक्तानां सर्वेषामेव क्षत्रियवैश्यसम्बन्धिनां वचनानां फलतो युगान्तरविषयत्वमापततीति वाच्यं । तथा सतीदानीन्तनानां ब्राह्मणानामपि शास्त्रविहिताग्निहोत्रादिसमस्तब्राह्मणकर्म्मणां यथाविध्यनुष्ठानाभावेन तदन्नस्याप्यभोज्यतापत्तेः । गौतमवचने "प्रशस्तानां स्वकर्म्मसु द्विजातीना" मित्युक्त्या ब्राह्मणेष्वपि "विहितकर्म्मानुष्ठातृत्वेन निषिद्धाननुष्ठातृत्वेन च स्तुतिविषयाणा" मेवान्नभोजनस्य तेनानुज्ञातत्वात् । तस्माद् युगप्रभावेण क्षीणेऽपि धर्म्मे यथासम्भवं सदाचाररतानां ब्राह्मणानामन्नं यथा गृह्यते तथा क्षत्रियवैश्यानामपि युगानुसारेण यथासम्भवं शुद्धाचाराणामन्नं भोक्तव्यम् । यथोक्तं पराशरेण

युगे युगे तु ये धर्म्मास्तेषु तेषु च ये द्विजाः ।
तेषां निन्दा न कर्त्तव्या युगरूपा हि ते द्विजाः ॥

वीरमित्रोदयादिनिबन्धेषु शूद्रपक्वान्नविषये विशेष उक्तः । तथा च वीरमित्रोदये—


"योऽपिच शूद्रपक्वान्नभोजननिषेधः सोऽपि कतिपयपक्वान्नव्यतिरिक्तविषयः । तदाह अङ्गिराः—

गोरसं चैव सक्तूंश्च तैलं पिण्याकमेव च ।
अपूपान् भक्षयेच्छूद्राद् यच्चान्यत्पयसा कृतम् ॥

सुप्रभातस्यान्यतमः संरक्षकः—



श्री जयशंकर प्रसादः



श्री सत्यनारायण शास्त्री, भिषक्शिरोमणिः ।

गोरसो दुग्धम् । सक्तवो भृष्टयवचूर्णम् । पिण्याकं तिलखलिः । अपूपा अस्नेहपक्वगोधूमादिविकाराः । अत्र यच्चान्यदिति श्रवणादपूपाः पयसा कृता एव ग्राह्याः । अन्यथाऽन्यदित्यस्य वैयर्थ्यापत्तेः । पयसा दुग्धेन कृतं किलाटचूर्णिकादीति ।

हारीतोऽपि :—

कन्दुपक्वं स्नेहपक्वं पायसं दधि सक्तवः ।
एतानि शूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥

कन्दुः स्वेदनी । कन्दुर्वा स्वेदनी स्त्रियामित्यमर । सा च अपूपादिसाधनं लोहादिपात्रं तत्र पक्वम् अपूपादि कन्दुपक्वम् । अत एव कान्दविकस्यापूपिकपर्य्यायत्वमुक्तममरकोषे-अपूपिकः कान्दविक इति । अत एवाङ्गिरसाऽपि अपूपानां भक्ष्यत्वमुक्तम् । यथा "अपूपान् भक्षयेच्छूद्राद् यच्चान्यत् पयसा कृतम्" इति । यत्तु कन्दुपक्वं भर्जनपक्वं पृथुकादीति व्याख्यानं तन्मूलादर्शनादुपेक्ष्यम्, स्नेहो घृतादिः तत्पक्वं मोदकादिकम् । पायसं पयः सिद्ध ओदनः । अत्र च शूद्रान्नभुज इति वचनादेतानि शूद्रान्नादनिवृत्तेनैव भोज्यानि । क्वचित्तु एतान्यशूद्रान्न भुज इति पाठः । तत्र शूद्रस्य ...पक्वं यो नाश्नाति तेनापि भोज्यमित्यर्थः ।"

ब्राह्मणस्य सदाश्नीयात् क्षत्रियस्य च पर्वसु ।
यज्ञेष्वेव वैश्यस्य न शूद्रस्य कदाचन ॥

...उत्सवेषु चेत्युक्तम् ।

कानिचित् पक्वान्नानि अन्येषां भोज्यानि ...सुमन्तुराहः—

...चैव सक्तूंश्च तैलं पिण्याकमेव च ।
...भक्षयेच्छूद्राद् यच्चान्यत् पयसा कृतम् ॥

तथा—कन्दुपक्वं स्नेहपक्वं पायसं दधि सक्तवः ।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥
शूद्रान्नभुजो द्विजस्य" इत्यादिकमभिहितम् ।

अनेन अपरार्कग्रन्थेन "ब्राह्मणस्य सदाश्नीया" दितिवचनं तन्मते पक्वान्नविषयमिति शूद्राणामपि-गोरसादिकपक्वं भोज्यमिति च सुस्पष्टं प्रतिभाति । प्रायश्चित्तमयूखे कन्दुपक्वमित्यादिहारीतवचनमुद्धृत्य "कन्दुर्भ्राष्ट्रम्, क्लीबेऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियामिति" कोषादिति व्याख्यातम् ।

तत्रैव—आपस्तम्बः—

आममन्नं मधु घृतं धानाः क्षीरं तथैव च ।
गुडमांसरसा ग्राह्या निवृत्तेनापि शूद्रतः ॥

सुमन्तुः—गोरसञ्चैव सक्तूंश्चेत्यादि

पराशरः—घृतं तैलं तथा क्षीरं गुडं तैलेन पाचितम् ।
गत्वा नदीतटे विप्रो भुञ्जीयाच्छूद्रभोजितम् ॥
आरनालं तथा क्षीरं काञ्जिकं दधि सक्तवः ।
स्नेहपक्वं तथा चान्नं शूद्रस्यापि न दुष्यतीति ॥

शङ्खः—घृतदधिपयस्तक्राणामाकरभाण्डस्थितानामदोष इति ।

शातातपः—घृतं तैलं दधि क्षीरं तथैवेक्षुरसो गुडः ।
शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति ॥

रघुनन्दनभट्टाचार्य्येण शूद्राह्निकाचारतत्त्वे—

कन्दुपक्वानि तैलेन पायसं दधि सक्तवः ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥ इति

कूर्मपुराणीयवचनमुद्धृत्य व्याख्यातम् कन्दुपक्वं जलोपसेकं विना, केवलपात्रेण यद्वह्निना पक्वं पायसपाकेन काठिन्यविकारापन्नं दुग्धं परमान्नपरत्वे पुल्लिङ्गनिर्देशापत्तेः । तथाचामरः 'परमान्नं तु पायसम्, इति ।'

पराशर :—

घृतं तैलं तथा क्षीरं भक्ष्यं स्नेहेन पाचितम् ।
गत्वा नदीतटे विप्रो भुञ्जीयाच्छूद्रभोजनम् ॥
(प. स्मृ. प्रा. का. ११ अ. १९)

" स्नेहपाचितं पूरिकाशष्कुल्यादि । भुज्यत इति भोजनं भोज्यद्रव्यम्, शूद्रस्य सम्बन्धि भोजनं शूद्रभोजनम् ।

स्नेहपाचितमित्यनेनारनालादय उपलक्ष्यन्ते । तथा च चतुर्विंशतिमते—

आरनालं तथा क्षीरं कान्दुकं दधि सक्तवः ।
स्नेहपक्वं च तक्रं च शूद्रस्यापि न दुष्यति ॥ इति

अङ्गिराश्च शूद्रप्रतिग्रहं प्रक्रम्याह—

मांसं दधि घृतं धान्यं क्षीरमाज्यमथौषधम् ।
गुडो रसस्तथोदश्विद् भोज्यान्येतानि नित्यशः ॥
अशृतं चारनालं च कान्दुकाः सक्तवस्तिलाः ।
फलानि पिण्याकमथो ग्राह्यमौषधमेव च ॥
इति माधवाचार्यः ॥

घृतान्नभोजने हेयोपादेयौ शूद्रौ विविनक्ति पराशरः—

मद्यमांसरतं नित्यं नीचकर्मप्रवर्त्तकम् ।
तं शूद्रं वर्जयेद् विप्रः श्वपाकमिव दूरतः ॥
द्विजशुश्रूषणरतान् मद्यमांसविवर्जितान् ।
स्वकर्मणि रतान् नित्यं न तान् शूद्रान् त्यजेद्द्विजः॥

इति (प. स्मृ. प्रा का. ११. अ. १४–१५)

[क्रमशः]

वेदेऽप्सरोगन्धर्वाः ।

लेखकः—पं० कृष्णदत्तभारद्वाजः, शास्त्री, बी. ए.

'अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान् समनोदयत्' इत्यादिषु पुराणवचस्सु गन्धर्वाणामप्सरसाञ्च यद् वर्णनमुपलभ्यते तस्य मूलं प्रत्नतमे ग्रन्थ-चूडामणौ वेदेऽप्यवलोक्यते । शुक्लयजुर्वेदीय-द्वितीयाध्यायस्य तृतीये मन्त्रे गन्धर्वशब्दोल्लेखोऽत्रोदाहर्त्तव्यः । गन्धर्वशब्दो वेदे प्राय एकवचन एव प्राप्यते । पारसीकाना "अवस्था" नाम्नि पुस्तकेऽपि गन्धर्वशब्द एकवचनान्त एव 'गन्दरव' रूपे दृश्यत इति विदुषां मतम् । उपर्युक्तोभयग्रन्थ-मतानुसारम् सोमस्य परिरक्षिता गन्धर्वोऽन्तरिक्षेऽप्सु च वसतीति बोद्धव्यम् ।

को गन्धर्व इति पृच्छाया उत्तरं बृहदारण्यको-पनिषदस्तुरीयाध्यायस्य तृतीयब्राह्मणस्य त्रयस्त्रिंशत्तमे मन्त्रे वर्त्तते, तद्यथा "ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दोऽथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ......"। अनेन वचसा ज्ञायते यद्यथाऽस्माकं नृणामयं लोकस्तथैव गन्धर्वाणामपि कश्चिदस्मन्निवासव्यतिरिक्तो लोकविशेषोऽस्ति । भुवि यस्सुखिवत्तमस्तत्सुखापेक्षया गन्धर्वस्य सुखं वरीय इत्यपि विशदमेव । किम्बहुना, मनुष्यत उन्नततरो देवादितश्चावनततरो विशिष्टलोकवासी जीवो गन्धर्वपदेनोच्यते ।

सिद्धे गन्धर्वलोके तत्र कोऽधिपतिरितिजिज्ञा-
सायाः समाधानमैतरेयब्राह्मणे समुपलप्स्यते 'सोमो
वै राजा गन्धर्वेष्वासीत्' इति ।

महाभारतस्यादिपर्वणि पाण्डवाग्निपर्णसंवादे
गन्धर्वाणाञ्चाक्षुष्या विद्यायाः सम्बन्धे यदुक्तन्तत्त-
त्रावगन्तव्यम् । विस्तरभयान्न तदत्रोल्लिख्यते ।

इमे गन्धर्वाः स्वर्गलोकनिवासिनो देवान् सेव-
न्तस्ते उपदेवशब्देनाप्यभिधीयन्ते यथाः—"येष्व-
नुपरिवृढाः सहसुरललनाललामयूथपतय उप-
गणैरुपगीयमानमहिमानः किल विहरन्ति" ।
गन्धर्वाणां वाद्यवैशारद्य-विषये मया सुप्रभातस्य
प्रथमवर्षीये एकादशेऽङ्के किमपि प्रतिपादितमेव ।
नृत्य-गान-प्रिया अपीमे इति "जगुर्गन्धर्वपतयो"
"गन्धर्वा ललितञ्जगुः" "ननृतुश्चाप्सरोगणाः"
इत्यादिभिः शास्त्रीयवचोभिरनुमीयते ।

अप्सरसामपि वर्णनं गन्धर्वैः सहोपलभ्यते,
अप्सरः शब्देन तु तासां नीरचारित्वं ध्वन्यते । ते
...विहारानुरागिण्यः प्रतिभान्ति । "सतां वीक्ष्य
...त्रे सरस्वत्याश्च तत्सखीः—पञ्च प्रहृष्टवदनाः
...कं पुरूरवा" इति पद्येनापि उर्वश्या अप्सरसः
...स्रोतोसरिदवगाहनं व्यज्यते ।

गन्धर्वाणां स्त्री-कामिता वेदे प्रोक्ता । "स्त्री
...वै गन्धर्वा" इत्यैतरेयब्राह्मणवचनमत्र प्रमा-
णम् । पित्रोरनुशासनं विनैवेमे परस्परानुरागेण
...रं कुर्वते । तानेवाऽनुकुर्वाणा मनुष्या अपि
..."गान्धर्वः समयान्मिथः" इति स्मार्त्त-
प्रतिपादितङ्गान्धर्वविवाहमिच्छन्ति ।

यथा गन्धर्वाः स्त्रीकामिनस्तथाऽप्सरसोऽपि
...कामा इति श्रुतावाम्नातम् । न केवलं
गन्धर्वलोकीयानपि तु भूवासानपि पुंसस्ताः स्व-
प्रेमभाजनानि विदधत इत्यपि ऋग्वेदीयदशम
मण्डलान्तर्गत-पञ्चनवतितमसूक्ताध्ययनाज् ज्ञायते ।

उर्वशी नाम्नी काचिदप्सरा भूवलयाधिपं पुरू-
रवसमैलमुपाढौकत । "घृतमेवात्स्यामि, न त्वा
विवाससं वीक्षिष्ये, न्यासभूता वुरणकावेतौ भवता
रक्षणीया" विति प्रतिश्रुत्य सा स्वैरं राज्ञा साकं
विजह्रे । वैदिकमन्त्रश्चायमत्र प्रमाणम् ।

"ॐ यद् विरूपा चरं मर्त्येष्वसं
रात्रीः शरदश्चतस्रः
घृतस्य स्तोकं सकृदह्न आश्नां
तादेवेदं तातृपाणा चरामि"

अथ मघवप्रेरितैर्गन्धर्वैरुरणयोरपहृतयो रुर्वशी
स्वदयितं विहाय गता । ततो विरहाभिभू-
तात्मा भूपालः कथञ्चित्तां कुरुक्षेत्रेऽन्विष्योवाच
'अयि जीवितवल्लभे ! त्वदृते न मेऽयं कायः स्था-
स्यति' इति । एतन्निशम्योर्वशी तं सान्त्वयन्त्युवाच ।

"ॐ मा पुरूरवो मा मृथा मा प्रपप्तो
मा त्वा वृकासो अशिवास उक्षन् नवै स्त्रैणानि
सख्यानि सन्ति सालावृकाणां हृदयान्येता ।"

अयमेव मन्त्रः श्रीमद्भागवते महापुराणे इत्थङ्कारं
व्याख्यातः—

"मा मृथा पुरुषोऽसि त्वं मास्म त्वाद्युर्वृका इमे
क्वाऽपि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा" ।

यदिदं कथानकं वेदे स्तोकैर्मन्त्रैः कथितन्तदेव
शुक्लयजुर्वेदीये शतपथब्राह्मणे चारुतरायां शैल्याङ्गिरि
चोपपादितम् । ततश्च पुराणेषु मुहुर्भव्यभाषाया-
मभणितमेतच्चरितं कविवर कालिदासेन 'विक्रमो-
र्वशीये' मनोरमतामापादितम् । पुराणशास्त्रे
विस्तरश उक्तानाङ्गन्धर्वाऽप्सरश्चरित्राणाम्मूलं वेद
एवेत्यलम्पल्लवितेनेति शम् ।

वेदाः, वर्तमानं विज्ञानञ्च।

ले०—श्रीमान् महामहोपाध्याय पण्डित श्रीगिरिधरशर्म्मा चतुर्वेदः।

संसारे कस्या अपि जातेः समुन्नतिः विद्याधीना वर्तते। विद्याया यस्यां कस्यां वा भाषायां शिक्षणं भवेत्, परं यदि सा सत्या तदा जात्युत्कर्षाय, समाज-समुन्नतये वा ध्रुवं समर्था भविष्यति। का नाम सा विद्या? इत्यस्मिन् विचारे प्रत्येकस्य वस्तुनो याथार्थ्येन तत्त्वज्ञानं विद्या। 'वस्तु तत्त्व-विज्ञानम्' 'विद्या' चेति द्वावपि पर्याय वाचिनावेव। विज्ञानमेवाँग्लभाषायां (Science) साइन्स शब्देन प्रोच्यते। साम्प्रतं पाश्चात्येषु विज्ञानस्य महती समुन्नतिः सञ्जाता, पाश्चात्येभ्यश्च भारतीया अपि शिक्षणं गृहीत्वा विज्ञानालोचने प्रवृत्ताः सन्ति। भारतीयानामयमपि विश्वासो यद्द विज्ञानस्य विस्मयकारिणी समुन्नतिः पाश्चात्येष्वेव सञ्जाता, परन्तु ते मुग्धधियो न जानन्ति, यदस्माकं देशेऽपि वर्तते विज्ञानम्; तदपि तावन्महत्तरं यावत् पर्यन्तं गमने इदानीमपि पाश्चात्यानां महान् समयो लगिष्यति। पाश्चात्यजगतो विज्ञानमिदानीं यावदस्थिरं विद्यते, यद्यपि तेन जगति महान् विस्मयः समुपादितस्तथापि तस्य मूलं निर्बलमेव विद्यते, अतएव तस्य अपूर्णत्वं पदे पदे दृष्टिगोचरं भवति, तत एव च तस्य कथात्मकाः सिद्धान्ताः प्रत्यहं परिवर्तिता भवन्ति। एतद्विपरीततया भारतीयं वस्तुविज्ञानं सुनिश्चितं सुदृढं वर्तते। अस्मिन् सर्वेऽपि सिद्धान्ताः स्थायित्वमापन्ना विद्यन्ते। तस्याधारो निश्चलः सुदृढतरश्च विद्यते, तेषां परिवर्तनस्यावश्यकतैव नास्ति। किन्तु खेदस्य महानवसरोऽयं यत् केचन भारतीय-विज्ञानस्य परीक्षामेव न कुर्वन्ति। यदि साम्प्रतिका वैज्ञानिका भारतीयं वैदिकं विज्ञानं परीक्षा-निकषे सम्यक् परीक्ष्यासङ्गतमनुपयुक्तञ्च कुर्युश्चेन्नास्त्यस्माकं भवेत् किमपि दुःखम्, परमस्माकं मध्येत्वियं धारणा प्रविष्टा वर्तते यद्द अस्माकं पूर्वजा साधु समीचीनं तात्त्विकं मार्गं न जानन्तिस्म, ते भ्रम-पूर्णा आसन् इति। अस्माकं विज्ञाननिधयो वेदाः सन्ति। ते च साम्प्रतं 'पूजा-पुस्तक' रूपेण गण्यन्ते। तेषु किं विद्यते इति कश्चन ज्ञातुं न प्रयतते। आधुनिक-सभ्य-संसारस्य दृष्टौ ते उपेक्षणीय-कोटौ प्रविष्टाः सन्ति। दौर्भाग्यादद्य दरिद्रे पराधीने चाऽस्मिन् भारते अस्माकं पार्श्वे परीक्षा-सामग्री नास्ति। तानि यन्त्राणि न सन्ति येभ्यो वयं स्वीयं विज्ञानं प्रयोगरूपेण (Practical) प्रदर्शयितुं प्रभवामः, परं यावद्बुद्धिव्यापारो भवितुमर्हति तावदहं साभिमानं ब्रवीमि यदस्माकं विज्ञानापेक्षया वर्तमानविज्ञानमधःपतितं वरीवर्तीति। उदाहरणार्थं यत्किमपि वैदिकं सिद्धान्तं श्रीमतां पुरस्तादुपस्था-

प्रयिष्यामि । आधुनिकविज्ञानाचार्याणां भारतीय-विदुषामग्रेऽस्माकं निवेदनमस्ति यद्, एकवारमपि ते गूढविज्ञानस्य परीक्षां कुर्वन्तु, अप्रामाणिकमसङ्गतं वा भविष्यति चेत्त्यजन्तु, यदि किञ्चिदपि महत्त्वमस्मिन् प्रतीयेत तदाऽस्य पुरस्तात् स्वीयशिरांस्यवनमयन्तु भारतस्य च सभ्यविज्ञानजगति यथोचितस्थानलाभाय प्रयतन्त्विति ।

प्रथमं तत्त्वविचारे दृष्टिर्निधीयताम् । आधुनिकं विज्ञानं (Hydrogen) हाइड्रोजन (Oxygen) आक्सिजन पदार्थश्च मौलिकं तत्त्वं मन्यते, अनयोरेव मूलाधारेणाधुनिकविज्ञानस्य सुविशालं प्रासादं स्थितं विद्यते । किन्तु वैदिकविज्ञानानुसारं हाइड्रोजनप्रभृतयः कदापि मौलिकतत्त्वभूता न भवितुमर्हन्ति, प्रत्युत ; इमे यौगिकाः सन्ति । इमे बहूनां पदार्थानां संयोगेन निर्मिताः सन्ति । वैदिकविज्ञानानुसारमिमे " विराट् " शब्दवाच्याः सन्ति । इन्द्रियाणि, तन्त्रेभ्यो वा यद् वस्तु ज्ञानविषयं भवति तद् " विराट् " शब्देनोच्यते । "विराट्" इति तस्य रसो नाम यस्मिन् जगतः प्रत्येकः पदार्थः ...तः = परिच्छिन्नः विद्यते तद् विराट् नामकं ...। प्रत्येकस्य छन्दसः स्वरूपं यद् अभिव्यक्तं, ...ति, तद् 'अक्षरम्' इति कथ्यते । दश अक्षराणि यस्मिन् भवन्ति स 'विराट्' इत्युच्यते । ये पदार्थाः ...शब्देनोच्यन्ते तेषु दश अवयवा अवश्यं ...न्ति । जगतः प्रत्येकस्मिन् पदार्थे दशप्राणानां ...यो वर्तते । भृगुः, अङ्गिरा, अत्रिः—इत्यादीनां प्राणानां घनमेवैकैकः पदार्थः । तत एव जगतः ...कः पदार्थः " विरा ्" एव । विराजः समुत्पा-...र्थं विद्यते । " यज्ञम् " तद् कथ्यते येनै...

तत्त्वमपरस्मिन् तत्त्वे सम्मिलति । भिन्न-भिन्नानां तत्त्वानां परस्परसंमिश्रणतो नवरूपधारणेन समुत्पन्ना काचनालौकिकी शक्तिर्यज्ञ-शब्देन बोध्यते । यज्ञं विना दश प्राणानां घनीभाव एव न सम्भवति । अतो विराजः कारणं यज्ञम् । अत एव सर्वेषामेतेषां पदार्थानामन्तरात्मरूपं यज्ञमेव वर्तते । अतएव सर्वेऽपि पदार्था यौगिका एव सन्ति । यज्ञे हि नाम व्यापाररूपम् । अथवा व्यापारविशेषस्य हेतुभूतं बलमस्ति । बलाधिष्ठानस्यावश्यकत्वात् पुरुष एव मौलिकमधिकरणम् । आधुनिक-वैज्ञानिकानां नये अखण्डः, एक एव कश्चन पदार्थो मौलिकतत्त्वरूपो भवितुमर्हति । परमस्माकं नये मौलिकतत्त्वभूतः पुरुषो न निरवयवः, नाप्यखण्डश्च । एष पुरुषः, पञ्चदशकलामयं त्रिधातुमयश्च द्रव्यं विद्यते । पुरुषस्य त्रयो भेदाः—क्षरः, अक्षरः, अव्ययश्च । इमे त्रयोऽपि प्रत्येकं पञ्चपञ्चकलायुक्ताः सन्ति । एवं पञ्चपञ्चकलायुक्तानां त्रयाणां धातूनामैक्यमेव वर्तते, ते परस्परं वियुक्ता न भवन्ति; किन्तु पूर्वपूर्वापेक्षया परस्य सूक्ष्मत्वं विद्यते । क्षराद् अक्षरं सूक्ष्मम्, अक्षराच्च अव्ययः सूक्ष्मः । एतावत् पर्यन्तं विज्ञानस्य विषयः । अव्ययादपि अग्रे विद्यते तत्त्वमेकम् । यदसीमं परात् परमिति कथ्यते । अव्ययः, परशब्देनोक्तः ततोऽपि परः " परात्परः " । तस्मिन्नपि रसस्य-बलस्य चोभयोर्योगः । ततोऽप्यग्रे दुर्विज्ञेयमनिर्वाच्यं रसरूपं केवलं तत्त्वमेकं यन्निर्विशेषमित्युच्यते । तस्यैवोपलक्षणरूपेण परिचयं दत्त्वा अस्माकं वैदिकं विज्ञानं समाप्तं भवति । तत्रैव गत्वा :—

"यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ।"

...निर्विशेषमव्यक्तमगम्यं विद्यते, तत्र विज्ञानस्य

गतिर्नास्ति। विज्ञानं हि पुरुषपर्यन्तमेव गन्तुं शक्नोति। विज्ञानं हि पुरुषत्रयं तथा "परात्परं" परिचाययितुं शक्नोति, यदेकतत्त्वम्, सर्वेषां मूलभूतम्, यत्र भेदावकाशो नास्ति। भवन्त इमं परात्परतत्त्वं 'ईश्वर' शब्दवाच्यं मा जानन्तु। ईश्वरस्तु अस्माकं विज्ञाने नितरामधस्तनं वस्तु विद्यते। ईश्वरस्याविष्करणेन पाश्चात्या गर्वमुद्वहन्ति।

किन्तु, अस्माकं विज्ञानमीश्वरादत्युच्चैर्गतं विद्यते। ईश्वरस्त्वस्माकमिन्द्रः। ईश्वरशब्दोऽपि इन्द्रशब्दादेव निष्पन्नः प्रतीयते। यथा सुन्दरशब्दात् 'सुथरा' शब्दो निष्पन्नस्तथैव इन्द्रात् 'ईश्वर' शब्दस्य निष्पत्तिः सुस्पष्टं प्रतीयते। इन्द्रस्तु देवविशेषः। देवताः, असुराः, ऋषयः, पितरः, गन्धर्वाः, सर्वेऽपि प्राणतत्वस्यावान्तरभेदरूपाः सन्ति। एतेषां सर्वेषां समावेशः क्षरपुरुषे, अक्षरपुरुषे च सम्भवति। अव्ययः, परात्परश्च द्वावप्यस्याः श्रेण्याः सुदूरवर्तिनौ स्तः। इन्द्रः, अक्षरपुरुषस्यैका कला, वेदे चतुर्दशविधा इन्द्राः सन्ति, तेष्वेको वैज्ञानिकानां 'ईश्वर' शब्दवाच्यः। स च क्षर-रूपः। यस्या विद्युत उपरि साम्प्रतिकानां वैज्ञानिकानां सर्वस्वं निहितं विद्यते, साऽपि इन्द्रस्यैकं रूपम्। साम्प्रतं यावद् इमे न जानन्ति यद् यस्या विद्युत आधारेणास्माकं कार्यं प्रचलति, सा किं स्वरूपा ? किं तस्य तत्वमित्यपि ते न जानन्ति; परमस्माकं तु तात्विकमस्य रूपं निर्णीतं विद्यते। भवतु।

परात्परस्य तत्वस्य परिभाषाऽस्माकं शास्त्रे 'अणोरणीयान् महतो महीयान्' वर्तते। अर्थात्—अस्माभिः परमाणोरपि यदि विभागाः क्रियन्ते तदा तेष्वपि स एवानुस्यूतो विद्यते। यदि परममहत आकाशादिपदार्थस्य कल्पना क्रियेत चेत् तत्रापि तस्य स्थितिरिति परात्परत्वं तत्र विद्यते। अतएव स भूमा इत्युच्यते। भूम्नि अणिम्नि च महदन्तरं विद्यते। अनयोरत्यन्तविरुद्धयोर्धर्मयोरेकत्र तस्मिन् परात्परे विचित्ररूपेण समावेशो विद्यते। सः खलु उभयदशायामपि सम एव वरीवर्ति। तज्ज्ञानमेव विज्ञानस्य पराकाष्ठेति।

कः कालो वेदस्य

लेखकः—श्रीमान् श्रीगौरीनाथ पाठकः, साहित्याचार्यः, विद्यासागरः

न ह्यविदितं विदितवेदितव्यानां वैदिकतत्त्वान्वेषणविचक्षणानां विदुषां यदिह हि किल निखिलधर्म्माचाराचरणभास्वरे भारते खण्डे " एतस्य महतो भूतस्य निश्वसितमेवैतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः" इत्यादिभ्यः श्रुतिभ्यो नैकशो निगमागमादिषु भगवन्निश्वासात्मकत्वेनोद्घुष्टः, वेद्यन्ते ज्ञायन्ते धर्म्मार्थकाममोक्षा अनेनेति व्युत्पत्त्या केवलं वेद एव चतुर्व्वर्गज्ञानसाधनभूततया सर्वानतिशय्य वर्तत इति।

तथा च :—

धर्म्मार्थकाममोक्षार्थपुरुषार्थचतुष्टयम्।
वेदस्यैवाधीनमिह विमतिर्नास्ति कस्यचित्॥

मन्त्रब्राह्मणयोर्वेदसंज्ञेति वेदस्य द्वौ भागौ स्तः। तत्र मन्त्रभागः छन्दोबद्धपदसमुदायात्मकः, संहितेत्यपरपर्य्यायः। ब्राह्मणभागश्च तदन्यः। ऋग्यजुःसामाथर्वभेदेन चत्वार एव वेदाः। तत्र यजुर्वेदः पुनः शुक्लकृष्णरूपेण द्विविधः। प्रतिवेदश्च संहिता- ब्राह्मणञ्चेति भागद्वयं वर्तते। वेदाङ्गानि शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतींषीति षट्।

तत्र शिक्षानाम वर्णानां स्वरूपोच्चारणादिज्ञानविधायको ग्रन्थविशेषः। नारदकात्यायनादि बहुविधाः शिक्षाः श्रूयन्ते। कल्पाश्च वेदविहितकर्म्मणामनुष्ठाननियमादिविधायका ग्रन्थविशेषाः, व्याकरणं वैदिकपदसाधनग्रन्थः, प्रातिशाख्यापरपर्य्यायः, निरुक्तं वैदिकशब्दानामर्थनिर्वाचकग्रन्थविशेषः, छन्दः गायत्र्यादिच्छन्दःस्वरूपनिर्देशकग्रन्थविशेषः, ज्योतिषं यज्ञियकालादिनिर्णायको निबन्धविशेषः। वेदेषु संहिताभागस्य प्राधान्याच्छन्दोबद्धवचनमयत्वाच्च तस्य छन्द इत्यभिधानम्। ब्राह्मणग्रन्थाश्च तत्तत्संहितार्थादिसूचकाः, प्रतिसंहितं खलु ब्राह्मणान्यनेकसंख्यकानि विभिन्नविषयाणि च। तथाहि तेषु कुत्रचिन्मन्त्राणां व्याख्यानं, कुत्रचित्तत्तत्कर्म्मनियोगविधिः, कुत्रचिदावश्यकेतिहासवर्णनञ्च। एवं बहुविधेषु ब्राह्मणेषु ऋग्वेदस्य ऐतरेयकौशीतकीति प्रसिद्धे द्वे ब्राह्मणे स्तः, यजुर्वेदस्यापि तैत्तिरीयशतपथेतिनामधेये द्वे ब्राह्मणे, तत्र तैत्तिरीयब्राह्मणं कृष्णयजुःसम्बन्धि, शतपथब्राह्मणं शुक्लयजुःसंश्लिष्टम्

अत्रहि यजुर्वेदोक्तानां यज्ञकर्म्मणां सविस्तरमालोचनमस्ति। ग्रन्थोऽयं शताध्यायसम्पन्नत्वात् शतपथेति नाम्नाभिहितः। सामवेदस्य पुनरष्टौ ब्राह्मणानि सन्ति आर्षेयसामविधानछान्दोग्यषड्

विंशताण्डवमन्त्रदैवतादीनि । अथर्वणस्त्वेकमेव गोपथनामधेयं ब्राह्मणम् । सन्ति च तत्तत्संहिता संश्लिष्टाः केचिदारण्यग्रन्था अरण्येऽध्येतव्यतया तेषामारण्येति नाम । तेषु चैतरेयतैत्तिरीयबृहदारण्यकानां प्राधान्यम् । ऐतरेयारण्यकं ऋग्वेदानुगतं, तैत्तिरीयं कृष्णयजुःसम्बन्धि, बृहदारण्यकञ्च शतपथब्राह्मणस्यान्तिमकाण्डम् । ब्राह्मणारण्यकवत् प्रतिवेदं भिन्नस्वरूपा भिन्नसंख्यकाश्चोपनिषदितिप्रसिद्धा ग्रन्थविशेषाः सन्ति ।

उप + निपूर्वकस्य सद्धातोः संसारनिवर्तकाध्यात्मविद्यार्थकत्वादुपनिषच्छब्देनाध्यात्मविद्याप्रतिपादकग्रन्थविशेष उच्यते ।

वस्तुतो वेदानां सामान्यतः काण्डद्वयमस्ति, कर्म्मकाण्डं ज्ञानकाण्डञ्चेति । तत्र कर्म्मकाण्डं संहिताभागविषयं, ज्ञानकाण्डतूपनिषद्भागविषयम् । सर्वासामुपनिषदां नामतः संख्यातश्च निर्देशो दुर्घट एव । मुक्तिकोपनिषदि प्रथमं सामान्यतस्तासां सङ्ख्यां निर्दिश्यान्ततो नामान्यपि कासाञ्चित्प्रधानानां कथितानि ।

यथा: —

ऋग्वेदस्य तु शाखाः स्युरेक विंशतिसंख्यकाः ।
नवाधिकं शतं शाखा यजुषो मरुदात्मज ॥
सहस्रसंख्यया जाताः शाखाः साम्नः परन्तप ।
अथर्व्वणस्य शाखाः स्युः पञ्चाशद्भेदतो हरे ॥
एकैकस्यास्तु शाखाया एकैकोपनिषन्मता ।

एतद्वचनप्रमाणेन ऋग्वेदस्यैकविंशतिरुपनिषदः, यजुर्वेदस्य नवाधिकशतं, सामवेदस्य सहस्रम्, अथर्ववेदस्य पुनः पञ्चाशद् इति ज्ञायते ।

आचार्यभट्टयज्ञेश्वरास्त्वेवमिह स्वीयमाशयमाविर्भावयामासुः यद् " यो ह्यव्यभिचरितस्वरवर्णादिपठनपाठनक्रमागतः सन् सर्वकालं सर्वदेशेषु प्रतिशाखमविभागेन वर्तमानः स एको मन्त्रराशिः, अपरस्तु विधिनिन्दाप्रशंसास्तम्प्रश्नाख्यानादिभिस्तस्यैव प्रायो विनियोगप्रख्यापक उपव्याख्यानभूतो वाक्यनिचयो ब्राह्मणराशिः । अनयोरेकः सङ्ग्रहो वेद इत्यभिधीयते । वेदनिबन्धेषु मन्त्रब्राह्मणभागौ परस्परमसम्मिश्रावेव प्रायः पठ्येते, क्वचित्तु ब्राह्मण सम्मिश्रितोऽपि मन्त्रभागः पठितोऽस्ति । एवमुभयात्मकोऽपि विध्यर्थवादमन्त्ररूपेण त्रिधा व्यवस्थितोऽयं वेदराशिरेकमूल एककर्मलक्षणफलो महाकल्पवृक्षो वरीवर्ति ।


अस्य च फलभूतं कर्म्म विधिना विहितम्, अर्थवादेन प्ररोचितं, मन्त्रेण च स्मृतं सदभ्युदयकारि भवति । अवान्तराकृतिभेदेऽपि कर्म्मजातिव्यञ्जकप्रधानाकृतिभेदाभावात्प्रतिशाखं यज्ञकर्म्मणां भिन्नत्वादपि एककर्म्मफल एवायं वेदकल्पवृक्षः ।

नह्येकस्यां शाखायां विहितस्याग्निहोत्रादिकर्म्मणः स्थाने विजातीयस्य ग्रहयज्ञादेरपरस्यां शाखायां विधानमस्ति, तस्मान्न प्रतिशाखं कर्म्मभेद इति मन्तव्यम् । यदि प्रतिशाखं बदरामलकादिवज्जात्यैव कर्म्मभेदः स्यात् तदा एकमूलाभावादादित एवारभ्य भिद्यमानत्वाद्वृक्षान्तरवद्वेदान्तराण्येवोच्येरन् न शाखान्तराणि, तस्मादेकमूलः समानफलोऽयं वेदकल्पशाखीत्याहुः ।

" सर्वार्थवेदको वेदश्चतुर्द्धा भिद्यते क्रमात् ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽह्यथर्वणः ॥" इति



श्री तारादत्त पन्तः, साहित्य-व्याकरणाचार्यः ।



श्रीदामोदरशास्त्री भिषगाचार्यः, दर्शनतीर्थः



श्री नरदेवशास्त्री, वेदतीर्थः ।

यद्यपि बहुषु श्रुतिस्मृत्यादिवाक्येषु वेदत्रयी ...ह्यीत्यते न तु चतुर्थोऽथर्वणवेदस्तथापि ब्रह्मवेदश-...न चतुर्थस्याथर्वणवेदस्यापि मुण्डकोपनिषदि श्र-...णात् स्मृतिपुराणादिष्वपि बहुशः सङ्कीर्तनाच्च च-...र्थ्युक्तम् । तथा चरणव्यूहेऽपि "अथातश्चरणव्यूहं ...ख्यास्यामस्तत्र निरुक्तं चातुर्विद्यं चत्वारो वेदा ...ज्ञाता भवन्ति" इति स्थितम् । एवं व्याकरण-...भाष्ये पतञ्जलिनाऽप्युक्तम् :—

"महान् शब्दस्य प्रयोगविषयः, सप्तद्वीपा वसुमती त्रयो ...श्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशत-...ध्वर्युशाखाः, सहस्रवर्त्मा सामवेद एकविंशतिधा बह्वृचा ...धा अथर्वणो वेदः ।" इति ।

एवं वेदस्य चातुर्विध्यं तृतीयाष्टके अष्टमाध्याये ...वर्गे श्रूयमाणया ऋचाप्यभिधीयते—

"चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्या आविवेश ।" इति ।

...त्र निरुक्ते चत्वारि शृङ्गेति वेदा वा एते उक्ता ...यास्केनोक्तम् । वेदभाष्ये सायनाचार्येणापि ...भाषितम् ।

...स्वरूपः परमकारुणिकैर्निगमागमपारावार-...ः कर्म्मोपासनाज्ञानकाण्डत्रयधुरीणैरने-...भिः परिपोषमासादितो नक्तन्दिनमधीति-...चरणप्रचारणैः परिरक्षितश्च कर्म्मकाण्ड-ब्रह्म-...त्मको वेदः कदा प्रादुरासेति केषामनुदिनं ...शीलानानां श्रद्धाजुषां सुधियां स्वान्तं नितान्त-...कौतूहलं नावलम्बते ।

...श्चिकलमेतदितिवृत्तमभिमन्तुं श्रुतिपारि-...दृश्वरिकैरनल्पैः वैदिकतत्वकोविदैर्बहुशः प्रयतमानैरपि दैशिकैर्वैदेशिकैश्च नाद्यावधि कश्चन सिद्धान्त आसादयत ।

यद्यपि एतादृशि अतिगहने विषयेऽस्माकमल्पमतीनां लेखनीविन्यासोऽनुचित एव; तथापि गुरुचरणकृपाकटाक्षवशेन यत्किञ्चिल्लब्धानुसन्धानेन मया समधिगतं वस्तूपस्थाप्यते समालोचनचतुराणां विद्वन्मूर्धन्यानां सहृदयानाम्पुरतः ।

यद्यपि जरन्मीमांसकादीनां केषाञ्चन प्राचां मते वेदानामुत्पत्तिरेव नास्तीति तस्य कालनिर्णयः सुतरामसङ्गत एव । तथापि वेदान्तभाष्यकाराणां श्रीमच्छङ्कराचार्य्यचरणानां नैयायिकानाञ्च मते वेदानामुत्पत्तिवर्तत एव; सा हि सृष्टेः प्राक् प्रबभूव ।

भगवान् भूतभावनो हिरण्यगर्भः किङ्कार्यं किमकार्यमिति वेदद्वारैवोपदिश्य एव संसारं ससर्ज्जेति तेषां मते समीचीनं वाग्वैदुष्यम् । यद्यप्येतदस्माभिः शिरसा धार्यं परं नैतत् सर्वेषां हृदयङ्गममिति काञ्चन लौकिकीं कलामाकलयामः ।

बहुवारं वेदानां सम्प्रदायोऽलुप्यतेति वेदप्रकाशस्य नैकः काल इयत्तयाऽवधारयितुं शक्यते ।

एकदा हि पुरा नामैकशेषङ्गते वेदानामध्ययनाध्यापनादिकार्ये, अस्तङ्गमिते च वेदसम्प्रदाये अत्रिवंशोद्भवो "दत्त" नामा कश्चन मुनिः प्रादुर्भूय वेदानां ऋष्यादीन् स्मृत्वा लुप्तानपि तान् पुनराविश्चकार । तथा च :—

यथा "सम्प्रदायविगमादुपेयुषी-
　　रेष नाशमविनाशि विग्रहः ।
स्मर्तुमप्रतिहतस्मृतिः श्रुती-
　　र्दत्त इत्यभवदत्रिगोत्रजः ॥"
　　　　शिशुपालवधम्

एतेन दत्तात्रेयसमयेऽपि वेदानां लिपिबद्धा ग्रन्था आसन्निति सम्भाव्यते; अन्यथा श्रुतीः स्मर्त्तुमभवदित्युक्तिर्न सङ्गच्छते । श्रुतिशब्दोऽपि श्रूयते आचार्य्यादिति व्युत्पत्त्या श्रवणेन ज्ञातत्वबोधको भवति । भागवतेऽपि दत्तात्रेयोपाख्याने स्मृतिशेषङ्गतानां वेदानां पुनः सम्प्रदायप्रवर्तकत्वात् दत्तात्रेयो विष्णोरवतार इत्युक्तम् । तस्मात् दत्तात्रेयो यदा जन्म लेभे, यदा वा वेदान् सस्मार तदा एव वेदाः प्रादुरभूवन्नित्येकः प्रकारो वेदाविर्भावस्य ।

ततः पुनरपि लुप्ते वेदसम्प्रदाये भगवान् कृष्णद्वैपायनो नानास्थानेभ्यः श्रुतीः सङ्गृह्य शाखासहस्रैर्विभेजे । अतएव स "वेद-व्यास" इति ख्यातिमाजगामेति वेदव्यासस्य यः समयः स एव वेदाविर्भावस्येति द्वितीयः प्रकारः ।

अस्मिन्नेव समये वेदा लिपिबद्धा बभूवुः । वेदानां ग्रन्थाश्च लिपिबद्धा अजायन्तेत्यपि सम्भावयामः ।

एवं पुनरपि यवन-जलदजालतिरोहिते कीर्तिशेषङ्गते सवितरि वेदे प्रचलितेषु स्वार्थमूलकेषु वेदविरुद्धेषु परःशतेषु सम्प्रदायेषु "बाजीराव पेशवा" इति सुगृहीतनामधेयेन महाराष्ट्रीयेण राज्ञा वैदिकब्राह्मणान् सुचिरमासन्तोषमाश्रयं दत्त्वा शिष्योपशिष्येभ्यो मिथः शब्दोच्चारणपूर्वकमुपदेशादिभिर्वेदसम्प्रदायोऽरक्ष्यत । स एव सम्प्रदायस्तदा तथा सातिशयं विस्तीर्ण आसीद् यथाऽद्यापि देशे देशे ग्रामे ग्रामे यत्र तत्र वेदस्यास्तित्वं ज्ञातुं शक्यते । अतस्तस्य राज्ञः समयो वेदस्याविर्भावस्य समय इत्यपि कथयितुङ्कथमपि शक्यते ।

एतेन वेदसम्प्रदायप्रवृत्तिकाला एव निर्णीता भवन्ति; नहि वेदानामाविर्भावसमय इत्युच्यते :—

अत्र च केषाञ्चन एतादृश आशयो यद् यदि च ब्रह्मैव वेदान् प्रणिनाय उपदिदेश वा, तथापि वेदद्रष्टॄन् ऋषीन् एव स्वयं वेदप्रणेतॄन् मन्यामहे, ऋषयो हि विश्वामित्रादयः परोक्षेण दिव्येन (ज्ञानमयेन) चक्षुषा ब्रह्मणः सकाशाद् वेदान् ददृशुः, ततस्ते तान् वेदान् मनुष्येषु प्रकाशयामासुरिति तेभ्य ऋषिभ्यो वयं ऋणिनः । तदृणञ्च वेदोपदेशग्रहणमेव । स्वाध्यायेन तस्माद् ऋणाद् वयं मुक्तिं लभामहे । इति तानेव ऋषीन् वेदकर्तॄन् वयं ब्रूमः । एवञ्च वेदानां कर्तारो बहव एव ऋषयो न तु कश्चिदेकः, यस्य मन्त्रस्य यो ऋषिः, तस्य मन्त्रस्य तमेव कर्तारं प्रणेतारं वा जानीमः । यथा गायत्र्या विश्वामित्रर्षिरिति गायत्रीमन्त्रस्य विश्वामित्रमेव प्रणेतारं कर्त्तारं वा कथयाम इति ।

तथाचैषां सर्वेषां प्रमाणानामालोचनया सृष्टेः प्रारम्भ एव वेदानाम् आविर्भाव समय इत्यनुमीयते ।

यदा हि ईश्वरः प्राणिनां ज्ञानोपदेशाय वेदान् प्राकाशयत् तदा तस्य सृष्टेः प्राक्काल एवोपस्थितिः परमावश्यकी । चेत् सृष्टेरनन्तरं वेदस्योपस्थितिरङ्गीक्रियेत तदा सृष्टेरारम्भे समुत्पन्नानां मनुष्याणां ज्ञानोपदेशः कथङ्कारं जायेतेति वेदानामाविर्भावसमयः सृष्टेरारम्भ एवेति मतं निराकर्तुं समर्थं प्रमाणं नोपलभामहे ।

य एव सृष्टिकालः स एव वेदाविर्भावकाल इति वैदिकङ्कालमवगन्तुं सुगम एष उपायः स्यादतः साम्प्रतं सृष्टिकाल एव मीमांस्यते । स चेत्थमुपवर्ण्यते—सृष्टेरादितः षण्मनवो व्यतीताः । वर्तमानः सप्तमो वैवस्वतमनुः, तस्य प्रवृत्तेः सप्तविंशतिमितानि महायुगानि व्यतीतानि, अष्टाविंशतितमे त्रेतायुगचरणा गताः, चतुर्थे चरणे कलौ, कलेरादितः त्रिंशत्युत्तरपञ्चसहस्रमितानि वर्षाणि व्यतीतानि तथा कल्पादितः १९७२९४९०३० इति, एवं सृष्ट्यादितश्च १९५५८८५०३० एतावत्यः समाः समतीता इति यथामति विविच्य सर्वमनुमीयते यदेष एव कालो वेदानामिति । उक्तञ्च भगवता कृष्णद्वैपायनेन :—

"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी विद्या यतः सर्वाः प्रवृत्तयः ॥"

वैदिकाग्निविमर्शः ।

लेखकः—पण्डित मूलशङ्कर केशवजी शास्त्री, मोडासावास्तव्यः ।

वेदयति यथार्थं ज्ञा सनातनसत्यनिबन्धनमिति वेदः । आधिभूताधिदैवाध्यात्मविषयकं सर्वमपि विज्ञानं वेदेषु बीजरूपेण दृश्यते । वेदा हि विज्ञानरत्नाकराः । ते वै केषु भावेषु न नानारूपेण विलसन्तो परमात्मनः शक्तिं प्रदर्शयन्ति, विभिन्ना अपि भावा तयैकयैव शक्त्या संहिता इति निदर्शयन्ति, 'सर्वं खल्विदं ब्रह्म' इति क्रमशोऽद्वैततां प्रतिपादयन्ति ।

'वेदोऽस्य निःश्वसितव्यम्' इति परमात्मनो निःश्वासरूपत्वाद् 'वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुमः,' शब्दप्रमाणेषु वेदानामेव प्रामाण्यम् । तच्च सर्वैः स्वीकृतम् । तत्र बहवो मन्त्रा वह्निविशेषणपरा दृश्यन्ते । तेभ्य उद्धृत्य काँश्चित् प्रकृते वह्निविषयको विमर्शः क्रियते ।

यथा पिपासितोऽपि कश्चिन्न सर्वं जलधिजलं पातुं समर्थः, अपितु स जलाञ्जलिनाऽऽत्मनस्तृषां शमयति । एवमेवात्रापि बोध्यम् । का नाम शक्तिरेकस्य प्राकृतस्य जनस्य विज्ञानवारिधितलस्पर्शने, मध्येऽवगाहनस्य वार्ताऽपि यत्र दूरापास्ता !

प्रकृते तु यथा कश्चिदर्भकः समुद्रतटस्थो मुक्ताशुक्तिभिः सङ्क्रीड्य निजानन्दं प्राप्नुयादिति नः स्थितिः । तथाप्येवंविधा बालक्रीडा स्पृहणीया न तूपेक्ष्या । अथ प्रकृतमनुसरामः ।

वेदा अग्निं परब्रह्मरूपेणोपस्तुवन्ति । यथा—
'ऊर्ध्वो मा पाह्य ँ हसः'

हे वैश्वानर, त्वमूर्ध्वोऽसि । ततो मां पापात् पाहि पापं ह्यत्राधोगतिरूपम् । आत्मावसादनं हि महत् पापम् । तस्मात् को रक्षेत् ? य ऊर्ध्वः । परमात्मैवोर्ध्वः । यतः स गुणत्रयातीतः 'तमसः परस्तात्' । तादृग्गुणोपेत ऊर्ध्वगतिरस्मिँल्लोकेऽग्निरेव दृश्यते । यतः 'अधः कृतस्यापि तनूनपातो नाधः शिखा याति कदाचिदेव' इति सुष्ठूक्तम् ।

सो ह्यग्निर्दाह-पाक-प्रकाशादिभिर्गुणैः सर्वेषां जीवनहेतुः । तथा च सर्वानपि स पुनाति । 'यः पोता स पुनातुमाम्' इति श्रुतिरपि । यो हि स्वयंशुद्धोऽलिप्तश्च सोऽन्यान् पवित्रयति । अग्निः स्वयं शुद्धो न च कस्यचिद् गुणैर्दोषैर्वा संसृज्यते । यद्यपि जलमन्यान् पावयति तथापि तद् मालिन्यादिभिर्दोषैर्दुष्यति । अन्यस्य दोषैश्चापि गुणैश्चापि तस्य सङ्गः । एवं वायोरपि । आकाशोऽप्यभ्रैराच्छाद्यते तमसाऽऽव्रियते । सर्वदा सर्वत्र प्रकाशमानः शुद्धोऽलिप्तः प्रेरक उपयुक्तस्तु वह्निरेक एव । अत एव स परब्रह्मत्वेनोपास्यते ।

'अगि' धातोरग्निशब्दो व्युत्पाद्यते । सहि गतिज्ञानार्थकः । अग्निनैव सर्वं गतिमत् प्रकाशश्च । एवमग्निरत्र सच्चिदानन्दत्वेनोपस्तूयते ।

किंवर्णः स, इति श्रुतिर्विशिनष्टि :—

'कृष्णोऽसि' । कृष्णरूपो वह्निः । लौकिकेऽपि तथा । सत्सु सप्तस्वपि वर्णेषु नील एव तेजसः शुद्धो वर्णः । स हि तेजसः सत्त्वः । पीतो ज्ञानात्मको वर्णः । जीवनतत्त्वप्रदीपको हरिद्वर्णः । रक्तो रागात्मकः । नीलस्तु शुद्धः प्रेमरूपश्च । अत एव भगवाञ् श्रीकृष्णः प्रेमस्वरूपी । रसेश्वरश्च भगवाञ् शिवोऽपि तथा ।

'कृषि' विलेखने इत्यस्माद् धातोः कृष्णशब्दो व्युत्पन्नः । वह्नेश्च पावकत्वं तु सार्वजनीनम् । अपरमपि स कृष्णत्वात् स्वं प्रति सर्वमपि कर्षति । स विश्लिष्टमपि सन्दधाति । वह्निनैव सर्वं सन्धीयत इति श्लोकविश्रुतम् । हृदयानुसन्धानमपि प्रेम्णैव भवति । अन्यच्च सोऽग्निः परमात्मा ब्रह्माण्ड-केन्द्रीभूतो वर्तुलमध्यबिन्दुवत् सर्वं व्याप्य सर्वमाकृष्य च स्थितः इदं सर्वं तस्मादुत्पन्नं तमनुभ्रमति, तस्मादेव पोषणं प्राप्य तस्मिन्नेव पुनर्लीयते । 'तज्जलानीति शान्तमना उपासीत' इत्युपनिषत् । स एव चन्द्ररूपेण रसाया रसमाकृष्य पुष्णाति चौषधीः सर्वाः । चन्द्रो ह्यग्निः ।

अन्यच्च—'अन्तश्चरति रोचनाऽस्य प्राणादपानतो' । अस्याग्नेर्दीप्तिर् द्यावापृथिव्योर्मध्ये शरीरे च वायुरूपेण चरति । सैव प्राणापानयोः प्रेरिका । सति हि जठराग्नौ जीवनहेतोरौष्ण्यस्य शरीरे सत्त्वात् प्राणापानौ प्रवर्त्तेते । तस्मादग्निः प्राणापानरूपः । एवम्—'अग्ने अङ्गिरः' योऽङ्गानां रसः सोऽग्निरेव । तेनैव सर्वाण्यङ्गान्याप्यायितानि भवन्ति, तेजोवन्ति च । तदभावाच्छुष्काणि जायन्ते, यथेदानीन्तनानाम् । स रसोऽग्निव्रतेनैव विवर्धते । अग्निव्रतं हि ब्रह्मचर्यम् । उक्तश्च—'अग्ने व्रतपते व्रतं चरिष्यामि' ।

अग्निव्रतं हि 'अनृतात् सत्यमुपनेत्' । तेनैव व्रतेन ब्रह्मचारी तेजस्वी वर्चस्वी मेधावानन्नादश्च भवति । मस्तस्तेनैव व्रतेन कवि-कोविद-विशारदाः सञ्जाताः ।

ब्रह्मचर्येणैव ब्रह्मचारी प्रेमपूर्णो रसिकश्च भवति। रसिको हि वीर्यवान्। हन्त! इदानीन्तु स्वच्छन्दचारिणः, प्रेमवन्तो रसिकाश्च भण्यन्ते।

महाभारते प्रोक्तम्—'आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छति'। अग्निरेवाचार्यः। अग्निव्रतहीना आचार्याः कथं ब्रह्मचारिणः कामयेयुः? कामोऽत्र शुद्धः। विना ब्रह्मचर्यं कथं सोऽग्निरात्मनि समिद्धः स्यात्। अस्माभिर्यतो न स समिध्यते ततो वयं निस्तेजस्का भस्मीभूतजीवनतत्त्वाः सर्वेभ्यो निकारं प्राप्नुमः। विद्यावन्तोऽपि निश्चेतना इव जीवामः। विद्याऽपि नोर्जस्वती। वयं ह्रस्वदेहाः। कारणमत्र ब्रह्मचर्याभावः।

तनूपा अग्नेऽसि...वर्चोदा...अग्नेऽसि आयुर्दा अग्नेऽसि। क्व प्रचण्डशरीरा नः पूर्वजाः, क्व च वयं हीनदेहास्तेजोहीनाश्च? क्व ते दीर्घजीविनः, क्व च वयमकालमृत्युमुखपातिनः? क्व ते महाधियः, क्व च वयं कुण्ठमतयः?

उपनयनसंस्कार—कर्मणि वर्ण्यते—'ऋषय आयुष्मन्तस्ते व्रतेनायुष्मन्तः'। किन्तु तद् वाचिकम्, क्रियायां तु किमपि नास्ति। वर्चो ब्रह्मचर्येणैव प्राप्यते। वर्चो नाम तेजो—'व्रतानुष्ठानप्रयुक्तं; यद् दृष्ट्वा, महानयं विद्वांस्तपसाग्निरिव ज्वलतीति बुद्धिः भवति नृणाम्। इदानीन्तना वयं बहुधा नियम-व्रत-जपोहीना न कुत्रापि सत्कारं लभामहे। अस्मान् विलोक्य भवति किं पूज्यबुद्धिरितरेषां नः प्रति?

'पुरुषो वाव यज्ञः। तस्य ह चतुर्विंशतिः वर्षाणि तत् प्रातःसवनम्।' तस्मिन् काले सन्धुक्ष्यातमन्यग्निं गायत्र्युपासना कर्तव्या। यतः स पञ्चविंशे पूर्णतां व्रजेत्सर्वतत्त्वविकासेन। वेदोऽप्यत्र—

'अयं पुरो भुवस्तस्य प्राणो भौवायनो'
वसन्तः प्राणायनो 'गायत्री वासन्ती।'

अग्निः सर्वेषामादिभूतः। तस्मात् प्राणो जज्ञे। प्राणो हि भौवायनः। यतो वैश्वानरात्मजः। प्राणो हि शक्तिः। तस्माद् वसन्तः। वसन्ते हि विश्वं प्राणवद् नवतरं विभाति विकासेन। पुरुषस्य प्रातः सवनं हि वसन्तः, चतुर्विंशतिवर्षाणि यावत्। स विकासकालः सफलो भवति। वसन्तो हि प्राणात्मजः। तस्माद् गायत्री ज्ञाता। प्राणवद्भिरेव गायत्र्युपासते। ब्रह्मचर्येण हि प्राण आप्यायति। अव्रतिभिरुपासिता गायत्री भवति निष्फला। 'गायत्री वा इदं सर्वम्'। प्राणवद्भिः सर्वमवाप्यते। तेषां न किञ्चिद् दुष्प्रापम्।

परन्तु, साम्प्रतं वयं गायत्र्याराधनविमुखा मृतकल्पा जीवामः। कष्टेनाजीविकामपि सम्पादयामः। कदा नो वसन्तो विकसिष्यति? परन्तु हा···! केन प्रकारेण विलसेत्? यत्र पण्डितवर्या अपि बालविवाहं शास्त्रप्रमाणैः समर्थयितुं कटिबद्धा भवन्ति! गायत्र्युपासनकाले गृहधर्मानाचरितुमुपदिशन्ति! न च तत्र जिह्रियति!! किन्तु 'नायमात्मा बलहीनेन लभ्यः।' निष्प्राणाः स्वराज्यं प्राप्तुं नालम्। लब्धमपि तैर्न संरक्ष्यते। ततः प्रथममेव सर्वैः प्राणवद्भिर्भाव्यम्। स एव नः परो धर्म इदानीम्।

अपरश्च—'आकूत्यै प्रयुजेऽग्नये स्वाहा, मेधायै मनसेऽग्नये स्वाहा, दीक्षायै तपसेऽग्नये स्वाहा, सरस्वत्यै पूष्णेऽग्नये स्वाहा।'

अत्र स्पष्टमुक्तम्। अग्निरेव मनः सङ्कल्पसिद्धेः प्रेरकः। 'द्वादशवर्षं वेदब्रह्मचर्यम्'। ततः शरीरमध्ये नूतनैका मेधा-नाडी जागृता भवति। विद्याधारण-शक्तिर्हि मनसः स्वास्थ्ये सत्येव भवति। अग्निरेव मेधालक्षणो मनोलक्षणश्च। स एव व्रतनियमलक्षणं तपः। तपसैव नियमसंरक्षणं भवति। अग्निरेव वागिन्द्रियस्य पोषकः 'मुखादग्निरजायत'। अतः स बृहस्पतिर्ब्रह्मणस्पतिर्गणपतिश्च कथ्यते।

इदानीन्तु न नो मनः सङ्कल्पसिद्धिर्न सर्जकता न धारणाशक्तिर्न तादृशं वाचि वीर्यं न च वक्तृत्व-शक्तिरसाधारणी; यतो वयं यथार्थतोऽग्नेरुपासनं न कुर्मः।

अग्निरेवात्मा। उक्तञ्च—'मर्त्येष्वग्निरमृतो निधायि'। स हि स्वर्गीयोऽग्निः कठवल्ल्यां यमेन प्रोक्तः। येन देवा अजरा अमराः क्षुत्पिपासापीडारहिता निर्भयाः स्वानन्दाश्च।

'विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा। विद्मा ते नाम परमं गुहा यद् विद्मा तमुत्सं यत् जगन्थ।' यो हि भगवानग्निः सूर्यवाय्वग्निरूपेण त्रिलोक्यां व्याप्यावस्थितः। स हि नानारूपैर्विश्वं व्यश्नुत। तस्य नाम पवित्रं परमम्। आत्मरूपेण स सर्वेषां हृदयगुहास्थितः। 'यद् गत्वा न निवर्तन्ते तद् धाम परमं' तस्य। स हि जड-जीवा-नन्द-स्वरूपः।

'त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः।'

स सर्वव्यापकोऽपि दिव्येषु विशेषतो लभ्यते स्वर्गादिषु, अन्तःकरणादिषु च एवं दीपनशीलेषु पदार्थेष्वपि। ते च-राल-अस्थिसार (फॉस्फरस)-लाक्षा-कर्पूर-गन्धक-तेजोरस (तेजाब)-इत्यादयो बहवः।

स हि वह्निर् वडवारूपेण विद्युद्रूपेणाऽप्स्वपि, एवं पारदादि सर्वरसेषु, तैलेषु च संस्थितः। जलं हि विद्युद्दाहकम्।

अश्मभ्योऽपि सङ्घर्षेणाग्निः प्रजायते। पुरातनी वह्निप्रज्वालनपद्धतिः।

तथा च वनस्पतिभ्योऽपि स प्रजायते, अरणि-शमीपिप्पल-देवदार्वादिभ्यः। वंशाद्यौषधिभ्योऽपि। अतएव वनस्पतय औषधयश्च जनान् नीरोगयन्ति स्वास्थ्यं च प्रापयन्ति। वह्निनैव वृक्षा लताश्चौषधयो यन्ति, सौन्दर्यवन्ति सुगन्धीनि च कुसुमानि प्रसुवते, फलन्ति च षड्रसयुक्तानि नानाफलानि।

आसन् पुरा भारते वृक्षलतौषधिसमृद्धानि बहून्यरण्यानि सघनानि। तत्रैव भारतीया संस्कृतिः प्रादुरासीत्। तदा पर्जन्योऽपि निकामे निकामे ववर्ष। प्रजाश्चापि चिरञ्जीविन्योऽभवन्। बहुधा रोगोत्पत्तिरपि नाभवत्। न चाकालमृत्युरपि। हन्त, ते हि नो दिवसा गताः। साम्प्रतं तु वनस्थानेषु मरुधन्वस्थलानि दृष्टिपथमायान्ति। स हि पाश्चात्यसंस्कृतेः प्रभावः। वनस्पतिक्षयाद् रोगोत्पत्तिरनावृष्टिर्बलबुद्धिहानिरायुषःक्षयोऽकालमृत्युश्च वोभुवति। वनस्पतयो हि प्राणाः। शार्मण्यदेशीया (जर्मनलोक) अधुना प्रबुद्धाः। ते हि निजदेशे प्रतिस्थानं वृक्षान् रोपयन्ति सँवर्धयन्ति च।

सह्यग्निः सर्वेषामात्मरूपेण ज्ञानरूपेण च हृदि स्थितः सर्वशोधको ज्ञानाग्निः सर्वकर्माणि भस्मसात्

कुरुतेऽर्जुन'। स हि 'विश्वानि वयुनानि विद्वान्'—सर्वकर्मणां साक्षी, यतोऽन्तर्यामी।

कीदृशो हि सः? कथ्यते आशुशुक्षणिः—स्वतेजसाऽह्नाय तमसो निहन्ता। तमो हि,—अन्धकारः रोगाः, दुष्टं वातावरणमज्ञानञ्च।

धातवश्चाग्न्यात्मकाः। उक्तञ्च—'या तेऽग्ने ऽयःशयातनूः—रजःशया तनूः—हरिशया तनूः।' लोह-रजत-सुवर्णादिधातवोऽग्निरूपाः। 'ततोऽसुरा एषु लोकेषु पुरश्चक्रिरे अयस्मयीमेवास्मिंल्लोके, रजतामन्तरिक्षे हारिणीं दिवि।' हारिणी नाम हिरण्मयी। एते हि धातवः क्रमशः 'तमोरजः सत्त्वरूपाः प्रोक्ताः। सर्वेऽप्युपकारकाः। सत्ययुगो हि स्वर्णयुगः। त्रेता रजतयुगः। द्वापरस्ताम्रयुगः। कलिश्च लोहयुगः।

किं बहुना? तारा नक्षत्राणि ग्रहा भूगोलश्च सर्वेऽग्न्यात्मकाः। प्रत्यक्षं तत्। अयं भूगोलो यत्र वयं स्थितिं कुर्मः, तस्य पृष्ठभाग एव घनीभूतः शान्तश्च। मध्यभागो जलमयः। तस्याधोभागस्तु (द्वाविंशतिं क्रोशार्धानतिक्रम्य) वह्निरूपः। अत्र साक्षिणो ज्वालामुखा नगाः। ते ह्यन्ततो धगत्तेजोरसमुद्गिरन्ति। यो रसो भाषायां 'लावा' इति कथ्यते। अतो ह्यग्निर 'गह्वरेष्ठः'।

स ह्यग्निर्गवादिषु दुग्धरूपेण स्थितः। अत्र श्रुतिः—'अस्य प्रत्नामनुद्युत ँ शुक्रं दुदुह्रे अह्रयः। पयः सहस्रा मृषिम्।' अह्रयो-गावः। ता अस्याग्ने श्चिरत्नीमात्मानुषक्तां द्युतिमेव पयो दुदुहे -क्षरन्ति। अग्निना शुक्ररूपेण क्षिप्तां स्वकान्तिमेव गावो दुग्धरूपेण क्षरन्तीत्यभिप्रायः। विद्युदाधिक्याद् गोदुग्धमेव सर्वश्रेष्ठम्। तत् सहस्रं (अनन्तगुणं) बलं सनोति-ददाति। तथा च बुद्धिमप्यकुण्ठां वितनोति। गावो वह्निनिवासरूपाः। अतएव पञ्चगव्यं यज्ञेषूपज्यते प्राश्यते च पापनिवृत्तये। गावो हि देवानामाधारभूताः। भारतः कृषिप्रधानो देशः। गोधनमेव भारतस्य धनम्। अनेकेष्वगदेषु गोमूत्रस्यापि विभिन्नाः प्रयोगाः प्रयुज्यन्ते। गव्यं पयो जाड्यहरं स्फूर्तिदायकं मेधाविवर्धनं बलप्रदञ्च। गोपुच्छं—नेत्रस्पर्शेण नेत्ररुजां हन्ति तेजश्च विवर्धयति। 'सर्वेषामपि दुग्धानां गोदुग्धं शुक्लं लघु।' गौर्हि विश्वमाता। गावो गोपालप्रियाः। कष्टं बत,! अद्य ता निर्दयैर्निहन्यन्ते। त्राहि त्राहि विभो!!

अपरञ्च:—'अग्निर्मूर्धा दिवः, ककुत्पतिः पृथिव्या अयम्। अपा ँ रेता ँसि जिन्वति।' सोऽग्निः सूर्यरूपे स्वर्गलोकस्य मूर्धस्थानीयो विराजते। स पृथिव्या उत्तमः पतिः (पालकः)। स एव वृष्टेः कारणानि पोषयति। वह्निः सूर्यरूपेण स्वकिरणै रसमादत्ते। अथ बाष्परूपेणोर्ध्वं गतं जलं संहत्य रजःकणैर्घनीकृत्य वारिदरूपेण परिणयति। ते च वारिदा वर्षन्ति। सुष्ठूक्तम्—

'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर् वृष्टेरन्नं ततः प्रजा॥'

एवं गीतास्वपि:—'अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः। यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥'

अहह! विधेर्विचित्रं विलसितम्! यत् कर्मभूमिभूतेऽप्यस्मिन् भारते देशे साम्प्रतं यज्ञाभावः समजनि। पुरा कर्मठोऽपि सम्प्रति कर्मशून्योऽयं देश

आधि-व्याध्युपाधिभिः पेपीड्यते । पारतन्त्र्यशृङ्ख-लानिगडितोऽयं कदा नु विमोक्ष्यते । भारतदेशो भूगोलस्य हृदयस्थानीयः । स यदि दूनः कुतो हि जगति शर्मसम्भवः ? भग्ने हृदये सर्वेषामङ्गानां विनाश एव ।

अयि भारतीयाः, प्रमादं हित्वा साम्प्रतमुत्तिष्ठत, महामोहनिद्रां त्यक्त्वा जागृत, प्राप्य वरान् निबो-धत । जानीत यत्—"कलिः शयानो भवति सञ्जिहानस्तु द्वापरः । उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरन् ।" स्वकीयकर्माचरणद्वारा पुनः कृतयुगं प्रवर्तयत । प्रार्थयत च भगवन्तं वैश्वानरम्—

"ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम ॥"

ॐ शान्तिः शान्तिः शान्तिः ॥

वैदिकविज्ञाने द्रव्य-विज्ञानम् ।

लेखकः—श्रीमान् दामोदरशास्त्री कविराजः, भिषगाचार्यः, साङ्ख्यसर्वदर्शनतीर्थः ।


अजामेकां लोहितशुक्लकृष्णां
वह्वीः प्रजाः सृजमानां सरूपाः ।
अजा ये तां जुषमाणां भजन्ते
जहत्येनां भुक्तभोगां नुमस्तान् ॥

इह खलु कार्य्यार्थिनः कारण एव जिज्ञासोदयात्; सुखार्थिनां सुख-कारणे सत्त्वद्रव्ये जिज्ञासा स्वा-भाविकीति 'अजामेका' मित्यादिना सुखादिभावकारणत्वेन सत्त्वादि-द्रव्यत्रयं विहितम् । तथाहि सुख-प्रसाद-लाघवादि-गुणवत्तया, संयोगविभागादिमत्तया, अनाश्रि-तत्वोपादानत्वादिना च सत्त्वादेर्द्रव्यत्वम् । गुणवद्द्रव्यत्वेऽपि पुरुषबन्धकत्वेन पुरुषोपकरणत्वात् सत्त्वादयो गुणशब्देनोच्यन्ते । सुश्रुतेऽपि—


"तन्मयान्येव भूतानि तद्गुणान्येव चादिशेत् ।
तैश्च तल्लक्षणैः कृत्स्नो भूतग्रामो व्यजन्यत ॥" इति ।

तन्मयानीति सत्त्वादिमयानि निर्दिष्टानि । अतएव तत्कार्याणि पृथिव्यादिस्थूलभूतानि स्थूलमात्रस्य कारणानीति प्रतिपादितम्—

इन्द्रियेणेन्द्रियार्थन्तु स्वं स्वं गृह्णाति मानवः ।
नियतं तुल्ययोनित्त्वान्नान्येनान्यमिति स्थितिः ॥ इति ।



श्री गोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्यः ।



श्री गौरीनाथ पाठकः, साहित्याचार्यः ।

बाह्याभ्यन्तर-जगतो मूलं भूतपञ्चकम्, अतो देहसृष्टेः, रोगाणाम्, भैषज्यस्य, चिकित्सायाश्च मूलमपि तदेव । एतदेव हि भूतपञ्चकं सृष्टिस्थिति-लयमूलं सर्वस्य भावजगतः । सुतरां जीव-तन्तु-संयोगो पञ्चभूते, आहारः पञ्चात्मकः, पञ्चभूतात्मकं द्रव्यं, पुष्टिः पञ्चभूते, वृद्धिः पञ्चभूतात्मिका, वियोगः, संहारश्च पञ्चभूते, पञ्चत्वप्राप्तिश्च पञ्चभूतानां चिन्तयैव । अतएव प्रोक्तं सुश्रुताचार्यैः—

पञ्चाभिभूतास्त्वथ पञ्चकृत्वः,
पञ्चेन्द्रियं पञ्चसु भावयन्ति ।
पञ्चेन्द्रियं पञ्चसु भावयित्वा,
पञ्चत्वमायान्ति विनाशकाले ॥

पञ्चभूतानां मध्ये वाताग्निसलिलानामति-प्राधान्यात्, त एवायुर्वेदे वात-पित्त-कफ-संज्ञया प्रोच्यन्ते । यथा बाह्याग्निसलिलमरुतां ह्रासवृद्धी भवतस्तथैवात्र देहजगतो वात-पित्तकफानाम् । तथाहि, पुरुषोऽयं लोकसम्मितः, यावन्तो हि मूर्त्तिमन्तो लोके भावविशेषास्तावन्तः पुरुषे, यावन्तः पुरुषे, तावन्तो लोक इत्युपक्रम्य षड्धातवः समुदिता लोक इति शब्दं लभन्त इति प्रतिपाद्य पुरुषस्य पृथिवी मूर्त्तिः, आपः क्लेदः, तेजोऽभिसन्तापः, वायुः प्राणः, वियच्छिद्राणि, ब्रह्मान्तरात्मेति प्रतिपादितम् । तत्र संयोगापेक्षी लोकशब्दः । षड्धातुसमुदायो हि सामान्यतः सर्वलोकस्तस्य हेतुः, उत्पत्तिः, वृद्धिः, उपप्लवः, वियोगश्च । तत्र हेतुः=उत्पत्तिकारणम् । उत्पत्तिः=जन्म । वृद्धिः=आप्यायनम् । उपप्लवो दुःखागमः । षड्धातु विभागो वियोगः, स जीवापगमः, स प्राणनिरोधः, स भङ्गः, स एव च लोकस्वभावः । सोऽयं संयोगापरपर्यायस्य लोकस्य यथाकालस्थितिः, विकाशः, नियतानियतह्रासश्च । द्रव्य-विज्ञानापेक्षतया प्रधानोपादानवाताग्निजलापरपर्य्यायाणां वातपित्त-कफानां रजःसत्त्व-तमोबहुलानां द्रव्यत्रयाणां विज्ञानं लोकस्थित्यै परमावश्यकमितीह प्रतन्यते ।

[क्रमशः]

निम्बार्कमतम् ।

लेखकः—महामहोपाध्याय डा० श्रीगङ्गानाथझा
एम० ए०, डी० लिट्० महोदयः

प्रस्थानत्रयावलम्बिनां नानावेदान्तप्रवर्तयितॄणामाचार्यवर्याणामेकः श्रीनिम्बार्को नाम । किन्तन्मतमिति स्थूलरूपेणैवात्र प्रदर्श्यते । श्रीनिम्बार्काचार्यरचितत्वेन प्रसिद्धयोर्वेदान्तसिद्धाञ्जन-तत्त्वसिद्धान्तविन्दुनाम्नोर्ग्रन्थयोरवलोकनेनास्य दर्शने त्रीणि तत्त्वानि प्रतिभान्ति । यथा चोक्तं वेदान्तसिद्धाञ्जने—

सर्वं हि विज्ञानमयो यथाऽर्कं
श्रुतिस्मृतिभ्यो निखिलस्य वस्तु ।
ब्रह्मात्मकत्वादिति वेदविन्मतं
त्रिरूपताऽपि श्रुतिसूत्रसाधिता ॥ इति ।

त्रिरूपता चेयं चिदचिदीश्वराख्य-भोक्तृभोग्य-नियन्तृरूपेण । तथा च तत्त्वसिद्धान्तविन्दौ—

भोक्ता भोग्यं नियन्तेति तत्त्वं त्रिविधमेव हि ।
चिदचिदीश्वराख्यं वै चतुर्थन्नैव विद्यते ॥ इति ।

आचार्योऽयं न भेदवादी नाप्यभेदवाद्यपितु भेदाभेदवादी । उक्तं च—

तस्मात् स्वाभाविको भेदोऽभेद एव द्वयोस्तयोः ।
ब्रह्मणा सह मन्तव्यः सूत्रकारमतानुगैः । इति

'तयोः' चिदचिदोरिति यावत् ॥

तथा च

अभेदः केवलो भ्रान्तिस्तथा भेदोऽपि केवलः ।इति।

सत्यप्येवं भक्तिप्रधानमेवेदं दर्शनमिति प्रतिभाति। तथाचोक्तं वेदान्तसिद्धाञ्जने—

नान्या गतिः कृष्णपदारविन्दादिति ।

तथा चोपसंहार श्लोकः—

उपास्यरूपं यदुपासकस्य
कृपाफलं भक्तिरसस्ततः परम् ।
विरोधिनो रूपमथैतदाप्ते
ज्ञेया इमेऽर्था अपि पञ्चसाधुभिः ॥ इति ।

हृषीकेशे विद्वत्सम्मेलनम् ।

हृषीकेशे कैश्चन धूर्तैर्वञ्चकैश्च सभाव्यापरिभिर्निखिल भारतीय-विद्वत्सम्मेलनस्यैकादशाधिवेशनं कर्तुं प्रयत्नः कृत आसीत् । एतस्य सम्मेलनस्यास्तित्वमद्यापि कैश्चन भारतीयैर्विद्वद्भिर्न ज्ञायते । नामापि न श्रुतम् । ईदृशाः बहवो व्यापारिणः परीक्षासम्मेलनादिव्याजेन मुग्धान् विदुषः, जनताश्च चिराद्वञ्चयन्ति । एतेषां विषये सुप्रभातसम्पादकानां विस्तृता विचारा अग्रे प्रकाशिता भविष्यन्ति । तदेभिर्धूर्तप्रवरैः हृषीकेशस्थाः पण्डिताः, धनिकाः, मठमन्दिराधीशाश्च माया-जाले गृहीता आसन् । ते च वराका मुग्धाः स्वागतसमितेर्निर्माणं कृत्वा सम्मेलनव्यवस्थामकुर्वन् । कियद्दिवसेभ्यः पूर्वमेव स्वीयं धौर्त्यं प्रख्यातमवगत्य किञ्चिन्मुद्रादिकं गृहीत्वा सम्मेलन-संयोजकः शनकैः प्रपलायितः, समाचारपत्रेषु चैतेन सम्मेलनस्य तिथिविपर्ययः प्रकाशितः, येन हृषीकेशीया स्वागतसमितिमर्हति दुःखपारावारे निमग्ना अर्द्धमार्ग एव इतो भ्रष्टा ततो भ्रष्टा सती कथमपि तं सम्मेलनं हृषीकेश-विद्वत्सम्मेलन नाम्ना कृत्वा स्वीयं परिश्रमं सम्मलितवती । अत्र सम्मेलने हरद्वार—ऋषिकुलब्रह्मचर्याश्रम-प्रधानाचार्याः श्रीमन्तो घुटरझा शास्त्रिमहोदयाः सभापतिपदमलमकुर्वन् ।

दिनत्रयं यावत् विदुषां भाषणानि सञ्जातानि । तत्र सुप्रभात-सम्पादकेन, संस्कृतसाहित्य-समाजमन्त्रिणा श्रीमता श्रीकेदारनाथशर्म्मणा सारस्वतेन संस्कृत-समाजस्य क्रमिकमितिहासं प्रदर्शयता साम्प्रतिकानां सभा-परीक्षा-पाठशालादिव्यापारिणां जनवञ्चकानां वञ्चकत्वं सुस्पष्टतया निर्भयं प्रतिपादितं येन जनतायां महान् सन्तोषः समजनि।


श्रीमतां पण्डितवर वालकरामशर्म्माग्निहोत्रिणामपि वेद-मीमांसायामभूतपूर्वं सुदीर्घं भाषणमभवत् ।

सम्मेलनञ्च ज्येष्ठशुक्ल–चतुर्दशीत आषाढकृष्ण प्रतिपद् यावद् जातं । आषाढकृष्णद्वितीयायां तत्रैव सम्मेलन-मण्डपे छात्रसम्मेलनं समभूत् , यत्र समाजमन्त्रिणो महत्त्वपूर्णम्, सुस्पष्टम्, रुचिरम्, क्रान्तिकारि सुदीर्घं च भाषणमभूत्, येन तत्रत्येषु छात्रेष्वभूतपूर्वं उत्साहः समजनि । वीररसावतारस्य काशीस्थ-श्रीरघुनन्दनप्रसादशास्त्रिणोऽपि उत्तेजनापूर्णं जीवनाधायकं भाषणमभवत् । छात्राणां प्राणभूतस्य हृषीकेशरत्नस्य श्रीगुप्त महोदयस्य भाषणानन्तरं छात्राणां संग्रन्थनमभूत्।

सायं मायाकुण्डेऽपि सर्वेषां छात्राणां व्यायामः, सभादिकं सञ्जातम् । एवं सम्पन्नमभूदिदं कार्यम् ।

साम्प्रतं जनवञ्चकानां सभाव्यापारिणां धूर्त्तानां छेदे संस्कृत-साहित्य-समाजः प्रबलं प्रयतिष्यत इति मन्त्रिमहोदयादवगत्य वयं परं प्रमोदमाप्नुमः ।

श्रीशिवरामशर्म्मा



निवापाञ्जलयः ।

हते प्रहारा निपतन्त्यभीक्ष्णमिति प्राकृतिक-नियमानुसारमस्माकं विपत्परम्परा प्रतिदिवसं पराकाष्ठामासादयन्ती किंकर्तव्यविमूढतामचीकरदिति विदितप्रायमेव सर्वेषामेव सहृदयानां सुप्रभातपाठकानाम् । वयं नितरां चकित-चकिताः, हतचेतनाः, निर्जीवा इव अकर्मण्यतामाश्रयामः । न जाने कोऽयं दैवदुर्विपाकः ! चिरात्पृष्ठलग्ना मृत्यु-परम्परा नाद्यापि विश्राम्यति । संस्कृतज्ञेष्वेव परिभ्रमति कुटिलं कालचक्रम् । पञ्चषमासेष्वेवा-पूर्वाणि महार्हाणि समुज्ज्वलानि च विद्वद्रत्नानि शनैः शनैः विलुप्यन्ते । वयमिदानीं भ्रान्ता इव सर्वतोऽवनतिं विलोकमाना विमूढचेतसः सम्वृत्ताः स्मः । षष्ठवर्षस्य प्रथमेऽङ्के कीतशेषं गतेभ्यः स्वसम्बन्धिभ्यो निवापाञ्जलिं दत्वा सुप्रभातमिदं नवीने वत्सरे पदमादधाति । हन्त !!

प्रथमो निवापाञ्जलिः सहृदय-धुरीणेभ्यः सुहृत्प्रवरेभ्यः पण्डितसमाज-प्राणभूतेभ्यः श्रीगिरीशशुक्लमहोदयेभ्यः प्रदीयते । येन संस्कृत विदुषामेव न; सर्वेषामेव लोकानां पुरस्तादादर्शरूपेण समुत्तिष्ठता स्वल्प एव वयसि तानि कार्याणि सम्पादितानि, यानि संस्कृतसमाजं परं गौरवमासादयन्ति ।

यश्च तत्र भवान् गिरीशशुक्लः, सभ्यतायाः, शिष्टतायाः, उदारतायाः, कर्मण्यतायाश्च मूर्तिमानिवासीदवतारः ।

द्वितीयो निवापाञ्जलिरस्माकं पितृकल्पेभ्यः समाराध्य-चरणेभ्यः श्रीमद्भ्यो वैदिकशिरोमणिभ्यः श्रीप्रभुदत्तशर्माग्निहोत्रिमहोदयेभ्यः, ये खलु भारतेवष सर्वत्रैव लुप्तप्रायाणां यज्ञादिवैदिक-क्रियाणां प्रचारं कृत्वा वास्तविकं धर्मनेतृत्व-मकुर्वन् । येषाञ्च सहृदयतया गुणग्राहकतया च शतशो विद्वाँसो यथायोग्यं जीवननिर्वाहं कुर्वन्ति । निसर्गभिन्नास्पदमेकसंस्थं यस्मिन् द्वयं श्रीश्च सरस्वती च । ये च भारतवर्षस्य महापुरुषेषु प्रथमां प्रतिष्ठां लभन्तः परं पदमासाद्य संतिष्ठन्ते ।

तृतीयो निवापाञ्जलिः विद्वद्रत्नेभ्यः सौजन्यावतारेभ्यो वैदिक-प्रवरेभ्यः सुहृद्वरेभ्यः श्रीविजयचन्द्रवेदाचार्यमहोदयेभ्यः, ये खलु शान्तरसस्यावतारभूताः स्वल्प एव वयसि संस्कृत-समाजं स्वकुटुम्बञ्च महति शोकसागरेऽपातयन् ।

चतुर्थो निवापाञ्जलिः प्रातःस्मरणीयचरणेभ्यो विश्वविख्यातवैदुष्येभ्यो भारतवर्षस्य गौरवलङ्कारभूतेभ्यः श्रीमद्गुरुपादेभ्य आचार्य श्रीरामावतारशर्म्ममहोदयेभ्यः; ये खलु कपिल-कणाद-गौतम-कल्पाः साम्प्रतिका महर्षय आसन् । येषां महात्मनां स्मारं स्मारमद्यापि दासतापाशबद्धानां विद्यावैभवविहीनानामस्माकं हृदयमपूर्वं गौरवमासादयति । ये च सदाचारेण, शान्त्या, पवित्रतया, उदारतया, निस्पृहतया च विश्वस्मिन्नपि भूमण्डले संस्कृतविदुषो वास्तविकमादर्शं समस्थापयन् ।

पञ्चमो निवापाञ्जलिः प्रियवर्येभ्यः साहित्याचार्येभ्यः श्रीमद्भ्यः श्रीविक्रमादित्यशास्त्रिमहोदयेभ्यः प्रदीयते, येषां स्मरणं हृदयं निर्दयं विदारयति । यः खलु त्रिंशद्वर्षात्मके वयसि महान्ति कार्याणि सम्पाद्य अकाण्ड एवास्माकं हृदि शोकताण्डवमरचयत् ।

षष्ठो निवापाञ्जलिः श्रीमद्भ्यः समाराध्यचरणेभ्यः साक्षादिव सनातनधर्मेभ्यः प्राचीनपण्डितानामादर्शभूतेभ्यः श्रीमद्भ्यः श्रीचन्द्रधरशास्त्रिमहोदयेभ्यः समर्प्यते । ये खलु हिन्दूविश्वविद्यालयस्य गौरवस्वरूपा आसन् । येषां कैलासवासेन काश्यां व्याकरणशास्त्रस्य प्राचीना रीतिरेव विलुप्तप्राया सञ्जाता । ये च गानविद्यायां वीणावादने च परममार्मिकाः सहृदयशिरोमणय आसन् ।

अन्येच लवपुरीय-सनातनधर्म कालेजाध्यक्षाः, सनातनधर्म-महासभा-सभापतयः श्रीमन्तः श्रीरघुवरदयालुशास्त्रिमहोदयाः, अस्माकं सहयोगिनः हिन्दूविश्वविद्यालयीय-रणवीर-संस्कृत-पाठशालायां ज्योतिःशास्त्राध्यापकाः श्रीरसालदत्तज्यौतिषाचार्यमहोदयाः, हिन्दुविश्वविद्यालयस्य जीवनदातारः सनातनधर्मस्य प्रधानस्तम्भभूताः, संस्कृतभारत्या अनन्यसेवकाः हिन्दूजातेः प्रधाननेतारः दरभङ्गाधीश्वराः श्रीमद्रमेश्वरसिंहमहोदयाश्च भारतं वर्षमिमं शोकाकुलं कुर्वन्तः साम्प्रतमस्मासु न सन्ति, तेभ्यश्च सादरं सबहुमानं निवापाञ्जलीः दत्वा वयं जगदीश्वरात्तेषां चिरशान्तिं प्रार्थयन्तो भृशं दुःखिता विरमामः ।

एतस्मिन् वत्सरे भारतवर्षस्य हिन्दूसमाजस्य चाभूतपूर्वाणि महान्ति समुज्ज्वलानि च रत्नानि कालवशादन्तर्हितानि सन्ति । अस्माकं जीवने नैतादृशो दारुणो दुर्विपाकः समजनि । भयङ्करमिममुत्पातमालोक्य रोरुद्यमानाः दग्धहृदया वयं विश्वेश्वरात् भारतवर्षस्य, हिन्दूजातेः, सनातनधर्मस्य, सुरभारत्याश्च कल्याणं कामयामः ।

सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत् ।


सम्पादकः

वैदिकप्रवराः-स्वर्गीय-श्रीनरोत्तममिश्रमहोदयाः ।

काशीस्थेषु विद्वद्वर्येषु श्रीमन्तः स्वर्गीय-नरोत्तममिश्रमहोदयाः सुप्रसिद्धाःस्तम्भा इव आसन् । इमे सारस्वतवंशावतंसा वेद-कर्मकाण्ड-शास्त्रेषु प्रथित-कीर्त्तयो मर्मविदश्चाभवन् । एतेषां जन्म १९२९ वैक्रमाब्दे श्रावणशुक्लचतुर्थ्यां गुरुवासरे काश्यामेवाभवत् । बाल्यकाल एव मातापित्रोर्वियोगः समजनि । एतेषां पितुर्ज्यायांसो भ्रातरः श्रीमत्पण्डित ठाकुरदत्तमिश्रा एव अभिभावका अभवन् । बाल्य एव प्रखरा

प्रतिभा, गम्भीरता, सहिष्णुता चेति बहवो गुणाः एतेषां समुज्वलं भविष्यन्तं सूचयन्तिस्म ।

एतेषामभिभावकमहोदयाः श्रीमन्तः पण्डित ठाकुरदत्त शास्त्रिणो ज्योतिःशास्त्रस्य धर्मशास्त्रस्य च सुप्रसिद्धा विद्वांस आसन् । तैः साहित्य-व्याकरणादिव्युत्पत्तिं विधाय शुक्ल-यजुर्वेदाध्ययने प्रवर्त्तिता इमे श्रीमद्भ्यः श्रीकेशवभट्ट-



महोदयेभ्यः सस्वरं सविवर्तनञ्च शुक्लयजुर्वेदमधीतवन्तः । श्रीमद्भ्यः ठाकुरदत्तमिश्रमहोदयेभ्यश्च धर्मशास्त्राणि ज्योतिःशास्त्रञ्चाधीतवन्तः । इमे विद्याध्ययनं कृत्वा भृतकाध्यापनं विहाय स्वातन्त्र्येण शतशो ब्राह्मणान् वेदं कर्मकाण्डञ्चाध्यापितवन्तः । स्वसमये काश्यामिमे प्रसिद्धतरा माननीयाश्च वैदिका आसन् ।

एभिर्मिश्रमहोदयैरपि कष्टतरावस्थायामध्ययनं कृत्वा स्वहस्तेनैव सर्वमपि विद्या-वैभवं सम्पादितमिति महनीय-मुज्ज्वलतरञ्चै तेषां जीवनमभूत । देश-देशान्तरेषु शतशः सहस्रशश्चै तेषां शिष्याः सन्ति ।

साम्प्रतमेतेषां प्रधानशिष्येषु पण्डित गजानन्द महोदयाः काश्यां सुयोग्याः सदाचारपरायणाः श्रौतस्मार्तकर्मानुष्ठान-निष्ठाः व्रतिनश्च सन्ति, यादृशा विद्वांस्तादृशा एव त्यागमूर्तयो विरक्ताश्च सन्ति ।

अपरे च पं० अनन्तरामशास्त्रिणो डोगरामहोदयाः सुयोग्या विद्वांसः सन्ति । ते साम्प्रतं खेमक-वेदविद्यालये अध्यापकाः सन्ति । इदानीं राजकीय-संस्कृत-महाविद्यालये वेदाध्यापकपदे प्रयतमाना लब्धप्रायसाफल्याश्च सन्ति ।

श्रीमतां मिश्रमहोदयानां कैलाशलाभः १९८३ तमे वैक्रमाब्दे ९८वर्षात्मके वयसि समभवत् । तेषां चरित्रं चित्रञ्च वैदिकाङ्कस्य कृते सङ्क्षिप्ततयाऽस्माभिः सम्पादितम् । विशिष्टं पुनः सुप्रभाते प्रकाशयिष्यामः ।

डोगरा—भवनम्
काशी ।

तेषामनुचरः—
श्रीकार्तिकेयशर्मा डोगरा
साहित्यभूषण्

हा ! प्रिय विक्रमादित्यत्रिपाठिन् ।

"शोके क्षोभे च हृदयं प्रलापैरेव धार्यते ।"

परलोकतिरोहितस्यापि भवतो गुणानुवादेन विना न शान्तिमेति मेऽन्तरङ्गम् । जौनपुर (यवनपुर)-मण्डलीय-नाऊपुर-ग्रामाभिजनो भवान् पाटलिपुत्रे मीमांसापरीक्षां दत्त्वा काशीमागच्छन् मध्ये मार्गं धूमानसि वेद-चन्द्राङ्काब्जमिते वैक्रमाब्दे प्रथमं मिलित आसीत् । ततो बलियास्थभृगुक्षेत्रीय-श्रीपराशरब्रह्मचर्याश्रमाचार्यपदमधितिष्ठति भवति सर्वेषामप्यस्माकं श्रीरघुनाथत्रिपाठि श्रीचन्द्रिकादत्तत्रिवेदि प्रभृतितत्सञ्चालकानां श्रीमता सह यो गृहकुटुम्ब-व्यवहार आसीत्, स हि स्मृतिपथमधुनोपेतः सर्वानप्यस्मान् व्यथयति । ततः समुद्घोषिते राष्ट्रमहासभयाऽसहयोगनिनादे भवानस्मा-कमप्यग्रेसरोऽभूत । यतो हि वयं कारागारसुपर्वेदिवांसं भवन्तमभिनन्दितुमेव गतवन्तो नहि तत्सुखमनुभूतमस्माभिः ।

अस्तु, तत एवान्येभ्यः सुहृद्भ्यो दूरीभूतसम्बन्धोऽपि भवान् काशीवास्तव्यसम्बन्धेन मम सन्निहित एवासीत् ।

रङ्गूनदेशभ्रमणव्याजेन हिन्दूमहासभा-सनातनधर्मसभा-प्रभृतिसार्वजनीनं कार्य्यं कुर्वन्तःपुनरपि भवतो राष्ट्रि-कार्य्यव्यासङ्गो वाराणस्यां काशीविद्यापीठे यतः प्रभृति समाचकर्ष ततस्तु भवान् सर्वथापि समान्तरङ्ग एव सञ्जातः । संस्कृत-साहित्य-समाजीयायव्ययनिरीक्षकत्वमङ्गीकृत्य सर्वेषामपि तत्सञ्चालकानां दत्तहस्तावलम्बो भवान् पुनरपि श्रीपराशरब्रह्मचर्य्याश्रमाभिमुखो भवन् न मर्षितो हतदैवेन । हा हन्त ! क्व तत् भवतः सारल्यं कुत्र च स सर्वंसहः स्वभावः कुत्र सोऽलैाकिकोदम्योत्साहः सम्प्रत्युपलप्स्यते। विरल एव पुमान् इह संस्कृत-विद्वत्समाजे ईदृग् राष्ट्रकार्य्य-करणप्रेमा दृश्यते । योऽगणितनिजपरिवारो भवानिव राष्ट्रियकार्य्यव्यग्रः स्यात् सामाजिक-कुरीतिपरिष्कृतौ च सर्वप्रत्यक्षमेव गृहीतमार्जनीको निर्भीकः सन् सुधारकाणामपि कार्यतो नतु वाङ्मात्रत एव मार्ग दर्शकः स्यात् । अहो सत्यपि सर्वेषां सर्वस्वे मम तु भवान् "सचिवः सहराष्ट्रसेवकोऽप्युपदेष्टा व्यवहार-वर्त्मनि ।

अपि मानकरोऽवमत्य हाऽकरुण त्वं क गतोस्यतर्कितः ।

इदानीं त्रयस्त्रिंशद् वार्षिके वयसि भवतः परलोकान्तर्धानं सर्वानपि सुहृदः कुटुम्बाश्चात्युग्रमुद्वेजयति । भवतो विधवामर्धाङ्गिनीं जरठं पितरं कोमलं कुमारं दुःखिते दुहितरौ तृनपि भ्रातॄन् चतुरोऽपि भ्रातृव्यान् सर्वदैव सन्तापयिष्यति । अस्तु न भवान् पुनरप्यस्मात् तेनाकारेण दर्शनपथमागमिष्यति इति वज्रीकृतहृदयः परमेश्वरं प्रार्थयते चिरशान्तये भवत :— श्रीगोपाल शास्त्रित्रिपाठी ।

शोकसम्वादः ।

येन खलु पुरुषपुङ्गवेन मथुरायां विशालं "श्रीमाथुरचतुर्वेद विद्यालय" भवनं निर्माय तत्र (वेदादि) संस्कृतभाषाया आङ्ग्लभाषायाश्च (अष्टमकक्षापर्यन्तं) निःशुल्कशिक्षादानार्थं सुदृढा समीचीना च व्यवस्था व्यधायि । तथा कृतेऽप्यनुरोधे वेदाध्ययनस्याऽनिवार्यतां, शिक्षाया निःशुल्कतां, द्विजातिमात्र प्रवेशनियमं च परिरक्षितुमिच्छुना नाकारि राजानुमतं (Recognized) तद् । स एव धर्मधुरीणो वदान्याग्रेसरः पूज्यः श्रीवैजनाथचतुर्वेदोऽतीतेऽस्मिन् चैत्रशुक्लस्यचतुर्दश दिवसे कलिकातायां [illegible] मगादिस्तु दन्तमुपलभ्य तद्वियोगखिन्नैर्मथुरावासिभिर्वैशाख-कृष्ण-द्वितीयायां मथुरायां विश्रामघट्टोपर्येका महती शोकसभा कृता। तत्र च बहूनां विदुषां भाषणानि, निम्नलिखितानां विदुषां शोककवितापाठोऽप्यभवत् ।

(१) श्रीरमेशचन्द्रशुक्लः, शास्त्री (२) श्रीचक्रपाणिशर्म्मा चतुर्वेदः, (३) गिरिराजशर्म्मा शास्त्री चतुर्वेदश्च ।

उपस्थितैर्जनैरुत्थायैष प्रस्तावो निश्चितः । "समस्त मथुरानिवासिनामेषा साधारणसभा, देशभक्त-स्वजातिरत्न-दानवीर-श्रीवैजनाथचतुर्वेदानां पञ्चत्वे नितान्तं शोकाकुला सती परमात्मानं प्रार्थयते "स स्वर्गस्थतदात्मने शान्तिं, तदीयदुःखितपरिवाराय धैर्यं च प्रदद्यादिति" ॥

संवाददाता-

चक्रपाणि शर्म्मा चतुर्वेदी ।

हा हन्त !!


आरामण्डलान्तर्गत कवलपट्टीग्रामवास्तव्यानां श्रीमताम् ओझोपाह्व पण्डितप्रवराणां धर्मशास्त्राचार्य्याणां श्रीरामगोपालशर्ममहोदयानामाकस्मिकमोक्षाधिगमेन समुत्पन्ना, उपमण्डलवीहिया-प्रान्तीय सनातनधर्मसभायाः हानिर्न शक्यते प्रयत्नसहस्रेणापि पूरयितुम् । यदा तेषां सुमधुरभाषणमीषद्धास्यञ्च स्मृतिपथमारोहति तदा विदीर्यते नो हृदयं, न प्रचलति लेखनी । वयं घने दुःखार्णवे निमज्जन्तः पारं गन्तुमसमर्थाः । हा दुर्दैव ! ईदृग् जनस्योपरि कथं न दयसे त्वम् । सांप्रतं सर्वे वयं सुदुस्तरे शोकार्णवे निमग्ना किं कर्तव्यमिति विमूढाश्च संजाता । अतएव किमपि विलप्य प्रलप्य वा विरमाम इति ॥

कवलपट्टी, बीहिया, आरा । } शोकाकुलः— रामसुभग ओझा

स्वर्गीय श्रीरघुवरदयालुशास्त्रिमहोदयः ।

साम्प्रतवत्सर एव पञ्चनदप्रदेशस्य सुप्रसिद्धो महान् विद्वान् नेता श्रीमान् रघुवरदयालुशास्त्रिमहोदयः स्वर्गवासमकरोत् । एष [illegible] सनातनधर्मकालेजस्य प्रधाना-


ध्यापक आसीत् । अस्य महाविद्यालयस्य संस्थापनेऽप्यस्य प्रवलः प्रयत्न आसीत् । पञ्चनदीय-विश्वविद्यालयस्य सञ्चालनसभायां व्यवस्थापनसभायाञ्च संस्कृत-प्रतिनिधिरासीत् । पञ्जापप्रान्तीयसनातनधर्मप्रतिनिधिसभायाः संस्थापने सञ्चालने चास्य हस्त आसीत् । तस्य सभापतिपदमप्यलङ्कृतमासीदेतेन । अन्येषु च सनातनधर्मसम्मेलनेषु साभापत्यादिविविधकार्येषु सर्वदा सर्वथा च दत्तचित्त आसीत् । पञ्चनदप्रान्ते सनातनधर्मस्य सुरभारत्याश्च प्रधानयं कार्यकर्ता पुरुष-पुङ्गवः स्वीयं नश्वरं कलेवरं विहाय महतीं क्षतिं सम्पादयतीति परं शोकस्थानमस्माकम् । सम्पादकः



श्रीरघुवरदयालुशास्त्री, एम० ओ० एल०

श्रीकाशी विद्यापीठः ।

ग्रीष्मावकाशानन्तरं काशीविद्यापीठ एषमश्रावण मासस्य प्रथमे दिवसे (१७ जुलाई, २९) समुद्घाटितो भविष्यति । विद्यापीठस्य पाठ्यक्रमस्त्रिषु त्रिभागेषु विभक्तो वर्तते । (१) बाल विद्यालयः (स्कूल) । (२) कुमार विद्यालयः, (हाई स्कूल) । (३) महाविद्यालयः (कालेज) श्चेति । बालविद्यालये कुमारविद्यालये च षट् कक्षाः सन्ति, महाविद्यालये च कक्षाचतुष्टयम् । तत्र बालविद्यालयस्य प्रवन्धः साम्प्रतं नास्ति । कुमार विद्यालयस्यान्तिमे द्वे श्रेण्यौ विशारदपरीक्षात्वेनाभिधीयेते । महा विद्यालये (कालेज) तेषामेव छात्राणां प्रवेशो भवति, यैर्विद्यापीठस्य विशारद (मैट्रिक) परीक्षा समुत्तीर्णा भवेत् अथवा तादृश्येव काचनान्या परीक्षा समुत्तीर्णा स्यात् । विद्यापीठे हिन्दीभाषाद्वारा, देवनागरी लिपिद्वारा च शिक्षा भवति । योग्येभ्यश्छात्रेभ्यश्छात्रवृत्तयोऽपि दीयन्ते । प्रवेशपत्र-पाठ्यक्रम-नियमादिजिज्ञासायां पत्रव्यवहारो विधेयः ।



श्रीमान् रमेश्वरसिंहः दरभङ्गाधीश्वरः ।

आवश्यकताऽस्ति—

एकस्य कृताध्यापनकार्यस्यानुभविनः सदाचारिणः संस्कृत गद्य-पद्य रचनानिपुणस्याऽऽचार्य-परीक्षोत्तीर्णस्य व्या०-मध्यमपरीक्षोत्तीर्णस्य वा तद्योग्यतावतो वाऽऽध्यापकस्य व्याकरण-साहित्यविदुष इति ।

निवेदनस्थानम्ः—

श्रीसेठिया जैन-पारमार्थिक-संस्था,

बीकानेर (राजपूताना) ।

सामुद्रिक-दर्पणम् ।

लेखकः—श्रीकालिका प्रसाद शर्म्मा, राजज्यौतिपी

अस्य पुस्तकस्य पठनेन केवलं हिन्दीभाषाभिज्ञा अपि हस्तरेखानां लक्षणानि चित्राणि चावलोक्य सम्यक् तथा भूतम्, भविष्यन्तम्, वर्तमानञ्च फलमवगन्तुं प्रभवेयुः । मूल्यम्—अष्टाणकमात्रम् ।

संस्कृत-वर्णमाला ।

लेखकः—श्रीत्रिविक्रमपन्तः शास्त्री, साहित्याचार्यः

संस्कृतशिक्षायां प्रारम्भिकशिक्षाया अभावात् संस्कृत-साहित्य-समाज-प्रेरणया संस्कृत-प्रारम्भिक-छात्राणां कृते सर्वाङ्ग-सम्पूर्णेयं सर्वथा नवीना वर्णमाला विरचिताऽस्ति । अस्याः पठनेन संस्कृतस्य मौलिकं वास्तविकं सुदृढञ्च ज्ञानं भविष्यति । एकवारमवश्यं द्रष्टव्या । वस्तुतः शिक्षकाणां कृते पथप्रदर्शकमिदं पुस्तकं शिक्षकैः शिष्यैश्चावश्यमेव स्वसविधे स्थापनीयम्, मननीयञ्च । मूल्यम्—आनकद्वयमात्रम् ।

परमलघुमञ्जूषा ।

परमलघुमञ्जूषाया नाद्यावधि तादृशी सरलसरला छात्राणामुपकारिणी टीका मुद्रिता । अतिरमणीया व्युत्पादयित्री टीका वर्तते । हन्त ! त्वरितं गृह्यताम् । स्वल्पैव विद्यते । मूल्यम् १) एकामुद्रैव ।

शुभ-सम्वादः ।

चिरकालादहं हृद्वेदनया, राजयक्ष्मणः पूर्वरूपेण च सन्त्रासितो विविधवैद्यानां पाश्चात्य चिकित्सकानाञ्च चिकित्सां कुर्वन्नारोग्यमलभम् । प्रत्युत रोगस्य वृद्धिरेव भवतिस्म ।

एकदा कस्यापि सुहृदः कथनेन सुपरिचितस्य सुप्रसिद्धयशसः श्रेष्ठिवरस्य चिकित्सकचूडामणेः रायजगन्नाथप्रसाद महोदयस्य चिकित्सां कृतवान् । सप्ताहाभ्यन्तर एव महान्तं नैरुज्यमलभन्नहं मासाभ्यन्तरएव सर्वथा रोगनिर्मुक्तः स्वस्थश्चाभवम् । एतेषां चिकित्सासरणिर्नितरां मनोहरा, प्रसादकारिणी सद्यः फलकरी च वर्तते । एकदा समासन्नप्रसवाया मम भगिन्या गले महान् विस्फोटकः समुत्पन्न आसीत् । तदानीं सर्वेषामेव प्राच्य-पाश्चात्य चिकित्सकानामियमेव सम्मतिरभवत्, यत् प्रसवानन्तरमेतस्या उपायो भवितुमर्हति । नान्या गतिरस्ति । तदानीमप्येभिः सत्वरमक्लेशञ्च प्रसवात्प्रागेव नीरोगा स्वस्था च कृता सा ।

एतेषां चिकित्साया लाभः सर्वैरपि नैराश्यं गतै रोगिभिर्नूनं ग्रहीतव्य इतिसुदृढोऽस्माकं विश्वासः । जगदीश्वरादस्य महोदयस्य कल्याणं कामयामः ।

गवर्नमेन्ट-संस्कृत-कालेज, काशी । } श्रीशिवदत्तशर्म्मा गौड़ः न्यायाचार्यः

सूचनाः ।

अध्यापकावश्यकता ।

(पंजाब) लायलपुरस्थ—श्रीसनातनधर्म-वार ऋषिकुलस्य प्रधानाचार्य-(प्रिन्सिपल)-पदे न्याय व्याकरणज्ञः, सदाचारः, उत्साह-सम्पन्नो विशिष्टो विद्वानपेक्ष्यते । प्रार्थिभिः स्वयोग्यतापत्राणि प्रशंसा पत्राणि च श्रावणमासस्य पञ्चदशतमदिवसात् प्रागेव निम्नसङ्केतेन प्रेषणीयानि । वेतनं योग्यतानुरूपम् । पत्रप्रेषण सङ्केतः—

मन्त्री, श्रीसनातनधर्म—वार-ऋषिकुल ।
लायलपुर, [पंजाब] ।

Preshed by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

षष्ठ-वर्षे
तृतीयाङ्कः

आषाढ़स्य
१९८६

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य सचित्रं मासिकं मुखपत्रम् ।

तिमिर-ततिमुदस्यद् भेदताराविलुम्पन्, नयदधि-सुरभाषाभाषि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद्भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्व्वतः 'सुप्रभातम्' ॥

सम्पादकः—श्रीकेदारनाथशर्म्मा सारस्वतः ।

व्यवस्थापकः—

कविराजः श्रीसत्यनारायणशास्त्री भिषक्शिरोमणिः

(टेढ़ीनीम, बनारस-सिटी)

वार्षिक मूल्यम्—३)
माननीयेभ्यः—१२)

छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम् ।

| षष्ठ-वर्षे | सौर—आषाढे १९८८ विक्रमाब्दीये | तृतीयोऽङ्कः । |

प्रभातवर्णनम्

[ले०—साहित्यशास्त्री पं० कुलभूषणमणिः त्रिपाठी]

...ये कल्याणकेलिं कुवलयविपिने सूत्रयन् षट्पदानां-
...ल्यान्धां दिङ्नटीनां तिमिरजवनिकां संहरन् दूरदूरम् ।
...कीनाभं सुप्रभातं समरसमधुरां कां वितन्वत्स्वभिख्यां
...चीमूलाग्रजन्म प्रविशति नटयच्चक्रवालं जगत्याः ॥

(२)

...न्ध्यां क्रीडां पुरारेः प्रलयपटुनटीं प्रत्यहं रात्रिधात्री
...न्ये प्रातर्मुरारेर्जठरसरसिजं भास्करव्याजकोशम् ।
...कुसात्पद्मयोनेस्त्रिभुवनभवनारम्भणं नाम यस्मात्-
...स्यायं दिक्षु रेणुः प्रसरति रुचिरः पीतकिञ्जल्कचारुः ॥

प्रतीक्षा ।

चण्डैश्चण्डकरः करैर्वितपते,
सर्वं जगज्जीवनं-
धत्ते कामपि दुःस्थितिं,
विघटितो वर्गो रसालम्बिनाम्
भोक्तुं छादयितुं तनुं च न तरां
तप्तात्मभिः पार्यते
क्वासि श्यामघनाधुना
दृगयनातिथ्यं कदा यास्यसि

भट्ट गिरिधारी शर्म्मा "कविकिंकरः"

वैदिकधर्म-संस्थापना ।

लेखकः—श्रीहरि-गोविन्द-बोरवणकरः

आर्यसंस्कृतिनिधानानि वेदाः स्वाधिकृतज्ञानवैशिष्ट्येन समग्रजगतीतलेषु विद्वत्प्रवरसम्मताः सन्तीति प्रशस्ता विद्वांसो विदन्त्येव । तन्मतमैतिहासिकानामपि नास्त्यसम्मतमित्यविदितं न केषाञ्चिद्विपश्चिताम् । अस्माकं भारतीयानां सनातनधर्मानुयायिनां तु वेदा एव सारसर्वस्वम् । वेदाविरुद्धानामेव वचनानां कृत्यानां वा सम्पादनं प्रामाणिकमित्यङ्गीकर्तुं शक्यतेऽस्माभिः । तद्विपरीतं तु निश्चयेनाप्रामाणिकमत एव निषिद्धम् । कार्याकार्यव्यवस्थितौ शास्त्रस्य प्रामाण्यमिति श्रीमद्भगवद्गीतोपनिषत्सु भगवता श्रीकृष्णेनोक्तम् । शास्त्र-शब्देन श्रुतिस्मृत्योर्ग्रहणमुचितम् । धर्मनिर्णये 'श्रुतिः, स्मृतिः, सदाचारः, स्वस्य च प्रियमात्मनः' इत्येतानि प्रमाणानि निर्दिष्टानि । तत्राद्यं श्रुतेरेव स्थानं श्रुतिमहत्त्वं सूचयति । श्रुति-कर्त्ता न कोऽपि विद्यते; चतुर्मुखस्तां स्मृतवान्, ततो मनुः—

'न कश्चिद्वेदकर्त्ताऽस्ति वेदं स्मृत्वा चतुर्मुखः, इति पाराशरवचनात् । ऋषयोऽपि मन्त्रद्रष्टार एव न मन्त्रकृतः ।

'ऋषिणामृषिपुत्राणामृषिकाणां स्वयम्भुवाम् ।
तथा नामाभिजानीयाद्यैषां मन्त्रदृष्टयः ॥

इत्यनुस्मरणात् । अतएव वेदा अपौरुषेया अनादिनिधना नित्या इति चास्माकं परम्परानुगतो विश्वासः ।

विद्यन्ते ज्ञायन्ते लभ्यन्ते वा धर्मार्थकामादिपुरुषार्था एभिरिति वेदाः । तथा च सायणः 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः' इति कृष्णयजुर्वेदव्याख्याने तल्लक्षणमाह । वेदानां स्वरूपं तु बौधायनेन 'मन्त्रब्राह्मणमित्याहुः' आपस्तम्बेन 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' चेति कथितम् । वेदाश्चत्वारो यथा—'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' इति ।

पूर्वस्मिन्काले द्विविधा दार्शनिका आसन् । केचिद् आस्तिकाः केचिन्नास्तिकाश्च । वेदानां प्रामाण्यं स्वीकुर्वाणा आस्तिकाः, वेदनिन्दकाश्च नास्तिकाः । यथा लिखितमेव—

नास्ति वेदो नास्ति लोक इति येषां मतिः स्थिरा ।
नास्तिकास्ते तथाऽस्तीति मतिर्येषां त आस्तिकाः ।
अवैदिक-प्रमाणानां सिद्धान्तानां प्रदर्शकाः ।
चार्वाकाद्याः षड्विधास्ते ख्याता लोकेषु नास्तिकाः ॥
वेदप्रमाणकानीह प्रोचुर्ये दर्शनानि षट् ।
न्यायवैशेषिकादीनि स्मृतास्त आस्तिकाभिधाः ॥ इ

तत्र नास्तिकेषु बौद्धानामपि परिगणनं कृतमेव तेषां वेदप्रामाण्यास्वीकरणादनात्मवादित्वाच्च । ऐति हासिका जानन्त्येव यत्तेषां महती प्रतिष्ठाऽस्मि जम्बूद्वीपे बभूव, महाँश्च धर्मविस्तरोऽभूत् । फलतो यज्ञस्य महत्त्वं जनैर्विस्मृतप्रायमेव । सर्वेऽपि वर्णाः स्वे स्वे कर्मण्यदत्तचित्ता अन्येषां कर्मसु निरता आसन् । सङ्घस्य सर्वत्र साम्राज्यं सुप्रतिष्ठितम् ।

सर्वेऽपि वर्णा राज्यमविशेषेण कुर्वाणा अदृश्यन्त। भागवतेऽपि सम्यगुक्तं हि—

पुराणेषु चान्येषु 'नन्दान्तं क्षत्रियकुलम्' इत्युपलभ्यते। ह्यूएन्त्सङ्ग' (Huent-sang) नाम्ना चीनदेशीय-प्रवासिना स्वकीये प्रवासवृत्ते लिखितं दृश्यते यत् 'श्रीहर्षवर्धनो वैश्यः, काञ्ची-वलभी-महाराष्ट्रादिदेशेषु क्षत्रिया राजानः, उज्जयिनी-महेश्वरपुरादिषु ब्राह्मणा नृपाः, सिन्धप्रान्ते तु शूद्रा एव राजान' इति। अस्य प्रवासिनो वर्णनस्य पुष्टिः कुमारिलभट्टस्य 'तच्च राज्यमविशेषेण चत्वारोऽपि वर्णाः कुर्वाणा दृश्यन्ते' इति वाक्येन भवत्येव।

महानन्दिसुतो राजन् शूद्रागर्भोद्भवो बली।
महापद्म इति ख्यातो नन्दक्षत्रविनाशकृत्॥
ततो नृपा भविष्यन्ति शूद्रप्राया अधार्मिकाः।
येऽतीता वर्त्तमाना ये भविष्यन्ति च पार्थिवाः॥
तेऽत उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः।
आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम्'॥ इति

सर्वेऽपि संन्यासमहिंसां च प्रशशंसुः। तेन वैदिकधर्मस्य महती हानिः समपद्यत। जना यज्ञकर्माणि न चक्रुर्यतस्तस्मिन्पशुबध आवश्यकः। स तु बौद्धमत विरुद्ध एव। संन्यासग्रहणेन शीघ्रमेव मुक्तिर्लभ्यत इति बौद्धानुमतेन भावेन राजानो राज्यशासनभारं त्यक्त्वा देशाटनं स्वीचक्रुः। किन्तु तेन देशस्यास्याक्षुद्रो विनाशः सञ्जातः, परदेशस्याक्रमणान्यारेभिरे। स्वतन्त्रोऽयं देशो विदेशीयशासकाधीनो बभूव।

दयनीयां दशामिमां देशस्य वैदिकधर्मस्य च दर्शं दर्शमाकलय्य सुधीरो दृढप्रतिज्ञो द्विजश्रेष्ठोऽवतीर्णो भारतवर्षे। तेनाश्रान्तपरिश्रमेणेयं दशा शीघ्रमेव परिवर्त्तिता। बौद्धधर्ममतानां पराजयं कृत्वा वैदिकधर्मस्य पुनरुज्जीवनं संस्थापनं च कृतम्। तस्य नाम भट्ट कुमारिल आसीत्। अनेन स्वरचितेषु ग्रन्थेषु स्वविषयकं न किमपि वस्तु लिखितं दृश्यते। अन्येषां केषाञ्चित्साधनानां साहाय्येन तद्विषयकं यत्किञ्चिद्वृत्तं लब्धं तल्लेखोऽधुना क्रियते। महाकवेर्भवभूतेरयं गुरुरित्युल्लेखः 'श्री शं० पां० पण्डित नाम्ना विदुषा सम्पादित उत्तररामचरिते लभ्यते, भवभूतिस्तु कान्यकुब्जाधिपतेर्यशोवर्मणः काले समभूदिति नास्त्यविदितमैतिहासिकानां विदुषां च। यशोवर्मा खिष्टाब्दस्याष्टमे शतके बभूव। अतस्तत्कालात्पूर्वमेव कुमारिलभट्टस्य काल इति सप्तमे शतके तस्य कालेन भाव्यते।

तेन च स्वविरचिते तन्त्रवार्त्तिके ग्रन्थे 'हिमवद्विन्ध्यान्तराला तु कृष्णमृगचरणाद्युपलक्षित-आर्यावर्त्तनिवासिव्यतिरिक्त-बर्बरादिभाषागतम्लेच्छितत्त्वसमानाधिकरणापशब्द०' इत्यार्यावर्त्तस्य महती प्रशंसा कृता अन्येषां म्लेच्छदेशानां च निन्दा कृतेति दर्शयति यदयमार्यावर्त्तवास्तव्य आसीदिति। केचित्तं कामरूप (आसाम) देशनिवासीति, अन्ये तु द्रविडोऽयं ब्राह्मण इति कथयन्ति। किन्तु प्रमाणाभावात्तदुक्तेः सत्य-

त्वमग्राह्यम्। अनार्यभाषासु द्राविडभाषाया अपि तेन परिगणनं कृतम्। अन्येषां पारसीक-वर्वर-यवन रोमकादिभाषाणामुल्लेखस्तेन कृतः। विदेशिभाषा भाषिणां जनानामभिप्रायज्ञानार्थं द्वैभाषिका (दुभाषीति भाषायाम्) आसन्निति–

म्लेच्छैरवगतं पश्चादार्यैर्द्वैभाषिकैः क्वचित्

इत्यनेन श्लोकार्धेन स्पष्टीभवत्येव। पारसीकभाषायां पीलु-('फील') शब्दस्य 'हस्ती'ति, संस्कृते तु 'वृक्ष' इत्यर्थो भवतीति तेन

'यथा पील्वादिशब्दानां वृक्षहस्त्यादिबोधने।
तथा विप्रतिपत्तिः स्यादार्यम्लेच्छादिबोधने॥

इति लिखितम्। अनेनोद्धरणेन ज्ञायते यत्तस्य समये पारसीकभाषा बाहुल्येन प्रचलतेस्मेति।
'स्वमातुलसुतां प्राप्य दाक्षिणात्यस्तु तुष्यति'
इत्यत्र तुष्यतीति निन्दाव्यञ्जकेन शब्दप्रयोगेण तस्य दाक्षिणात्यत्वमप्यपाकृतमेव।

बाल्य एवायं स्वकीयप्रकाण्डपाण्डित्येनानेकेषां पण्डितप्रवराणां पराजयं चकार। बौद्धमतस्याध्ययनार्थमनेन कस्मिंश्चिद्बौद्धविहारे कस्यचिद्भिक्षुसमीपे निवासः स्वीकृतः, तत्त्वग्रहणानन्तरं विवादपद्धत्या सर्वेषां भिक्षूणां पराभवं कृत्वा वैदिकमतानां प्रतिष्ठापनमनेन भट्टकुमारिलेन सम्पादितम्। इदमेवास्य महत्कार्यं तस्य चिरकालिकयशसः प्रधानतमं कारणमिति वयं मन्यामहे। न्यायमीमांसादिदर्शनेषु पारङ्गतोऽयमिति तु सर्वे जानन्त्येव।

बौद्धधर्मानुयायिन आचार्यस्य सन्निधे छद्मवेषेणाध्ययनं कृतमिति दोषपरिमार्जनार्थं कुमारिलभट्टेन स्वकीयो देहोऽग्निचितायां स्थापयित्वाऽदह्यत। मरणात्पूर्वं श्रीमच्छङ्कराचार्येण सह कुमारिलभट्टस्य संभाषणं बभूव। श्रीमच्छङ्कराचार्येण –

'श्रुत्यर्थधर्मविमुखान् सुगतान्निहन्तुं,
जातं गुहं भुवि भवन्तमहं नु जाने।'

इत्येतैः शब्दैस्तस्य स्तुतिः कृतेति शाङ्करदिग्विजयस्य कथनम्। किन्तु प्रमाणाभावादस्य सत्यताविषये सन्देहः समुद्भवति। श्रीमद्भगवतः शङ्कराचार्यस्य जन्मकालः खिष्टीये ७८८ तमेऽब्दे पतति। कुमारिलस्य निधनं तत्पूर्वमेव प्रायः खिष्टीये ७०० तमेऽब्देऽवर्ततेत्येतयोर्मेलनं सम्भाषणं चाशक्यमेव प्रतिभाति।

यागादिके हिंसा भवतीत्यतः साधारणजनानां मनःप्रवृत्तिर्यज्ञकर्मणो विरुद्धा बभूव। यद्यपि तस्यां परिवर्तनसम्पादनार्थं कुमारिलभट्टेनाश्रान्तः प्रयत्नो विहितस्तथापि स निष्फल एव बभूव। इमामहिंसाप्रधानां जनमनो वृत्तिमाकलय्य भगवता शङ्करेणाहिंसामार्गस्योपदेशः कृतः। वेदानां प्रामाण्येनैव तेन संन्यासमार्गस्य प्रचारः कृतः।

एवं पुरुषद्वयेनानेन वैदिकधर्मस्य वर्णाश्रमधर्मस्य महत्त्वं पुनः प्रतिष्ठाप्य पुनरुज्जीवनं कृतम्। नास्तिकदर्शनानां पराजयं सम्पाद्य सर्वत्रास्तिक्यबुद्धिः प्रस्थापिता।*

*अस्य लेखस्य कृते पं० चिं० वि० वैद्य-कृत-'मध्ययुगीन-भारत' नामकस्य ग्रन्थस्योपयोगः त इति सविनयं निवेदयति—लेखकः।

भुवनेश्वर-यात्रा ।

रचयिता-श्रीमान् पं० कालीप्रसन्न चक्रवर्ती बी. ए., कविरत्नम्
[प्रधानाध्यापकः—सेन्ट्रल-हिन्दूस्कूल, काशी]

काश्यां भ्रातृवियोगतापविधुरो ग्रीष्मेण सन्तापितो
वाञ्छन् देशमनातपं सुविमलं, शान्तिप्रदं शीतलम् ।
श्रीक्षेत्रे जगदीश्वरस्य शरणे, चैतन्यपूताश्रमे
सञ्जातो मलयाद्रिसागरतटे, लब्धाश्रयोऽहं सुखी ॥१॥
हा कष्टं ! श्रीजगन्नाथोऽप्यशक्तः कर्ममोक्षणे ।
तत्रापि पीड्यमानस्य वायुना सैकतेषुभिः ॥ २ ॥
गत्यन्तरविहीनस्य मन्ये कर्मक्षये पुनः ।
आयातः सखिरूपेण श्रीमान्मदनमोहनः ॥ ३ ॥
तेन प्रीत्या परिष्वज्य प्रापितो हरमन्दिरम् ।
तटस्थं विन्दुतीर्थस्य भुवनेश्वरसन्निधौ ॥ ४ ॥
सर्वतीर्थमयं विन्दु-सरः शङ्कर-खानितम् ।
गौरीतृप्तिविधानाय रक्षसो हननात्परम् ॥ ५ ॥
तीरेषु तस्य तीर्थस्य स्वयं त्रिभुवनेश्वरः ।
मन्दिराणां सहस्राणि मठानाञ्च शतानि च ॥ ६ ॥
शिल्पविद्यासुनैपुण्य-युतानि विविधानि च ।
पुरीं संस्थापयामास विरचय्य बुधोत्तमैः ॥ ७ ॥
एकाम्रकाननं नाम गुप्तकाशीति कथ्यते ।
तपसे तप्तसिद्धानां शान्तये शान्तचेतसाम् ॥ ८ ॥
खण्डोदयगिरौ यत्र नानाकारगुहान्वितौ ।
दर्शनौ बौद्धकीर्तिश्च जैनकीर्त्तिस्तथैव च ॥ ६ ॥
प्राचीनासीमसम्पत्ति सूचयन्तौ सुरक्षितौ ।
बौद्धानां धर्मबुद्धीनां गिरिकन्दरवासिनाम् ॥ १० ॥
भुवनेश्वरसम्पत्तेस्त्यागराशिसमुद्भवा ।
देवतानामधिष्ठानं लक्षाधिक्येन साधितम् ॥ ११ ॥
नृपतीनां न कुत्रापि प्रासादः परिदृश्यते ।
प्राधान्यं देवसेवायाः गुप्तकाशीविशिष्टता ॥ १२ ॥
पानार्थं लभ्यते यत्र गिरिप्रस्रवणाच् च्युतम् ।
दुग्धफेननिभं नित्यममलं धवलं जलम् ॥१३॥
मधुरं शीतलं स्निग्धमपि स्वल्पायतिस्थितम् ।
केदारेश्वर-सन्नद्धं सर्वकालेषु चाक्षयम् ॥१४॥
पीतं बहुशतैर्नित्यमन्यान्यमिव दृश्यते ।
गौरीकुण्डं बुधैः प्रोक्तं दुग्धकुण्डश्च केनचित् ॥१५॥
भक्तानां भुक्तिमुक्तिभ्यां रुग्णानां रक्षणाय च ।
मन्ये गिरिजया नित्यं निजस्तन्येन पूरितम् ॥१६॥
स्नानाय पल्वलं दिव्यं गौरीमण्डपपूरतः ।
दृढ़घट्टादिसंयुक्तं सुदृश्यञ्च सुनिर्मितम् ॥१७॥
नित्यं प्रवहमानञ्च पूर्यते निर्झराम्बुना ।
पुण्यं रोगहरं बल्यं सुखशान्तिप्रदायकम् ॥१८॥
एभिः खातादिभिर्दिव्यैर्मन्दिरैश्च मनोहरैः ॥१९॥
विशालायुतवृक्षैश्च काकेन्दुवनराजिभिः ।
विविधैः पक्षिभिश्चैव गुप्तकाशीविराजते ॥२०॥
तत्र संस्थापितं दिव्यं श्रद्धया हरमन्दिरम् ।
साधुना मदनाख्येन पितृभक्तेन सुनूना ॥२१॥
तुङ्गस्तूप-स्थितं दुर्गं दशद्वारसमन्वितम् ।
नवचक्रविशिष्टञ्च विभातीव नवोत्पलम् ॥२२॥
समायतं सुविस्तीर्णं चत्वरेण च वेष्टितम् ।
वातायनादिसंयुक्तं सुदृश्यञ्च मनोहरम् ॥२३॥
अमलं कमलाकारं "पद्मकोठी" ति विश्रुतम् ।
स्निग्धं सुशीतलं नित्यं विन्दुवारिभृतानिलैः ॥२४॥

चन्द्रालोकोज्ज्वलं स्निग्धं पतितं विन्दुवारिषु ।
प्रतिविम्बं मठश्रेण्याः शोकसन्तापहारकम् ॥२५॥
शिवलोकस्थितं मन्ये दृष्ट्वेदं हरमन्दिरम् ।
तत्र काञ्चनवर्णाभा देवी गौरीव राजते ॥२६॥

सा देवी सरला यथैव कमला स्निग्धानना मातृवत्
भोज्यानां परिवेशने व्यवसिता मातान्नपूर्णा यथा ।
देव्या चाशुतया समाहितधिया यत्नेन पुत्रीकृतो
धन्योऽहं भुवनेश्वरस्य कृपया 'कालीप्रसन्नो' द्विजः॥२७॥

मङ्गलम् ।

श्रीमद्गुरुचरणारुण-पङ्कजयुग्माय मे नमोऽस्तु सदा
यत्कृपयैव मयाऽत्र-व्यरचि सुवृत्तैरिदं षट्कम् ॥

लिप्सुर्लक्ष्म्याश्रयत्वं स्वयमतिशयितं विश्रुतं सारसत्व-
देवत्वाद्यं वितत्याद्भुतममृतकरः किङ्करः कायसङ्घम् ।
सन्नास्ते यन्नखश्रीश्रिततनुरनिशं सेवमानो विमानः—
श्रीमत्ताया न सत्ता श्रयतु तव कुतः श्रेयसस्तं स्वतोऽङ्घ्रिम् ॥१॥

जेगीयसे जगति यद्बहुशोऽनिशन्त्वं-विद्वद्वरैर्गुरुरसीति तदद्भुतम्मे ।
स्वान्तोत्पलेऽत्रभवतो भवतो न जात्वत्यल्पीयसीह्यपि सुदुर्वहता विभाति ॥२॥

शब्दानुशासनविदां विदिता निरुक्तिः क्षित्यामनेन चरतीति न तावकीना ।
मन्मानसे तु निभृते चरणाश्रिरेण-चारु त्वदीयचरणे चरणात्वमस्ति ॥३॥

अज्ञानोद्भवमान्तरं नु तिमिरं नान्यै निपीतन्नमम्-
मत्वोन्मूलयितुं समूलमखिलं शश्वन्मदन्तर्गतौ ।
हृत्पद्मैकविकाशिनौ स्वकरजद्युत्या जितेन्दू च तौ-
राजेतामरुणौ सुचारुचरणौ यौ तेऽपरौ वारुणौ ॥४॥

सच्चारुचारुणमणिद्युतिमत्त्वदीयम्-मन्मानसे सरसि सारसमङ्घ्रियुग्मम् ।
तत्पङ्कतोऽधिगतजन्म मृषेति नो यत्-किं स्वां समुद्भवभुवं हरतीत्यहो तत् ॥ ५ ॥

त्वत्पादपांशुरमृतांशुसितांसुकीर्ति-स्पृष्टः सकृत्सदसकृच्छिरसा रसाच्छम् ।
नित्यन्तनोत्यपि तनोरतनुभयत्र-कृत्स्नस्ततस्तु तत एव नमोनमस्ते ॥ ६ ॥

श्रीदामोदरशास्त्रिणां मतिमतां श्रद्धास्पदानां सता-
मन्तेवासिजनेन भूरि भजता बुद्धिं सदा शैशवीम्।
"बस्ती" मण्डलवासिना कृतिरियं विद्वन्मुदे निर्मिता-
ब्रह्मेत्यन्वितशङ्करेण भवतु श्रीशादिति प्रार्थना॥

लेखकः—

—श्रीब्रह्मशङ्करमिश्रः।

वैदिक-विज्ञाने द्रव्य विज्ञानम्।

(लेखकः—श्रीदामोदर शास्त्री, भिषगाचार्यः, साङ्ख्य-सर्वदर्शनतीर्थः)।

[शेषांशः]

तत्र भगवान् वायुः प्रभवश्चाव्ययश्च भूतानां, भावाभावभूतानां भावाभावकरः, सुखासुखयोर्विधाता, मृत्युः, यमः, नियन्ता, प्रजापतिरदितिर्विश्वकर्म्मा, विश्वरूपः, सर्वगः, सर्वतन्त्राणां विधाता, भगवानणुर्विभुर्विष्णुः, क्रान्ता लोकानां, अनिलः, श्रतिपरुषः, अतिशीघ्रकारी, आत्ययिक इति वायोर्यथार्था स्तुतिरपि भवत्यारोग्याय, बलवर्णविवृद्धये, वर्चस्वित्वायोपचयाय, ज्ञानोपपत्तये, परमायुषः प्रकर्षाय च। एवम् अग्निरेव पित्तान्तर्गतः पक्तिमपक्तिं दर्शनमदर्शनं, मात्रामात्रत्वमूष्मणः, प्रकृतिवर्णौ, शौर्य्यम्, भयम्, क्रोधम्, हर्षम्, मोहम्, प्रसादमित्यादिकं विधत्ते।

शरीरे जलमेव सोमः श्लेष्मान्तर्गतं दार्ढ्यम्, शैथिल्यम्, उपचयम्, कार्श्यम्, उत्साहम्, आलस्यम्, वृषताम्, क्लीबताम्, ज्ञानमज्ञानम्, बुद्धिम्, मोहमेवमादीनि विधत्ते। अतएवैषां प्रकृतिभूतभावार्थं यतितव्यं बलवर्णोपचयप्रसादनायेति। एतेषां प्रकृतिविकृतिरूपविज्ञानं परमावश्यकं लोकानाम्। एतत्त्रयं वातपित्तकफसंज्ञकं प्रकृतिभूतं शरीरोपकारकं भवति। विकृतिमापन्नं खलु नानाविधैर्विकारैः शरीरमुपतापयति। त्रयस्त्रयो रसास्तेषामेकैकं जनयन्ति त्रयस्त्रयश्चोपशमयन्ति। तद्यथा कटुतिक्तकषायाः वातं जनयन्ति, मधुराम्ललवणास्त्वेनं शमयन्ति, कट्वम्ललवणाः पित्तं जनयन्ति, मधुरतिक्तकषायास्त्वेनं शमयन्ति, मधुराम्ललवणाः श्लेष्माणं जनयन्ति, कटुतिक्तकषायास्त्वेनं शमयन्तीति। रसदोषसन्निपाते हि यैर्दोषैः समानगुणाः समानगुणभू-

यिष्ठाः ते तानभिवर्द्धयन्ति, विपरीतगुणास्तु विपरीतगुणभूयिष्ठा वा शमयन्त्यभ्यस्यमाना इति व्यवस्थाहेतोः षट्त्वमुपदिश्यते रसानां परस्परेणासंसृष्टानां त्रित्वं च दोषाणाम् । तत्र तैलसर्पिर्मधूनि क्रमेण वातपित्तकफप्रशमनानि द्रव्याणि प्रभावतः प्रभवन्तीति तैलं स्नेहौष्ण्यगौरवोपपन्नत्वाद्वातं जयति सततमभ्यस्यमानम् । वातो हि रौक्ष्यशैत्यलाघवोपपन्नो विरुद्धगुणो भवति । विरुद्धगुणसन्निपाते हि भूयसाल्पमवजीयते । तस्मात्तैलं वातं जयति सततमभ्यस्यमानम् । सर्पिः खल्वेवमेव पित्तं जयति माधुर्यात् शैत्यान्मन्दत्वाच्च । पित्तं ह्यमधुरमुष्णं तीक्ष्णं च । मधु च श्लेष्माणं जयति, रौक्ष्यात्तैक्ष्ण्यात्कषायत्वाच्च । श्लेष्मा हि स्निग्धो मन्दो मधुरश्च । यच्चान्यदपि किञ्चित् द्रव्यम्, एवं वातपित्तकफेभ्यो गुणतो विपरीतं विरूद्धं तच्चैतान् जयत्यभ्यस्यमानम् । अतएव

विसर्गादानविक्षेपैः सोमसूर्य्यानिला यथा ।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा ॥ इति

सर्वथैवैतेषां प्रकृतिभावाय यतितव्यम् । तत्र वातस्य प्राधान्यात् योगिभिरेव स आयत्तीकृतः प्राणभूतस्य वातस्य आयमनेन । यतः प्राणपरित्यागे सर्वत्यागः । एवं ते वातकलाकलनेन तमायत्तीकृत्य महाप्राणाः सर्वसिद्धिमन्तः सर्वैश्वर्य्यशालिनश्च बभूवुः । तेनैव च बहुकालनिरन्तराभ्याससाध्यमोक्षमपि तेषां करामलकवदासीत् । कैव कथा सिद्ध्यैश्वर्य्यादीनाम् । एवं बहुधा वातादीनां स्वरूपादिवर्णनं वैश्वरूप्यत्वात्तेषां भवितुमर्हतीति नेह प्रपञ्च्यते प्रबन्धविस्तररभिया अमत्सरैरेवाधीतविद्यैरधिगन्तव्यम् ।

कस्तावदेवं मर्त्यः, यो न सिद्ध्यैश्वर्य्यनिवहमिच्छति कृतविद्यैरपि भूसुरैः स्वाराज्यकामैर्वाजपेयादिना यतितं महदैश्वर्य्यसिद्धिसम्पत्तये बहुधा । अत एव योगसूत्रे 'जन्मौषधितपःसमाधिजाः सिद्धयः' इति प्रतिपादनेन द्रव्यक्रियामन्त्रविज्ञानालोचनेन यतितव्यमिति वदति । अतएव रसेश्वरसिद्धान्ते षड्रससारभूतरससेवया सर्वसिद्धिरिति "रसो वै सः" रसं ह्येवायं लब्ध्वानन्दी भवतीति प्रतिपादितम् । तथाहि, अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्य्ये सर्वाभिमता जीवन्मुक्तिरिति पिण्डस्थैर्य्योपायं पारदादिपदवेदनीयं रसमेव सङ्गिरन्ते । रसस्य पारदत्वं संसारपरपारप्रापणहेतुत्वेन । सुतरां "षड्दर्शनेऽपि मुक्तिस्तु दृश्यते पिण्डपातने । करमालकवत् साऽपि प्रत्यक्षा नोपलभ्यते । तस्मात्तं रक्षयेत्पिण्डं रसैश्चैव रसायनैः ।"

गोविन्दभगवत्पादाचार्य्योऽपि "इति धनशरीरभोगान् मत्वा सदैव यतनीयं । मुक्तौ, सा च ज्ञानात्, तच्चाभ्यासात्, स च स्थिरे देहे" इति व्याचख्यौ । किञ्च "ये चात्यक्तशरीराः, हरगौरिसृष्टिजान्तरं प्राप्ताः वन्द्यास्ते रससिद्धाः, मंत्रगणः किंकरो येषां" मिति द्रव्यविज्ञानस्य देहदार्ढ्यादिना मन्त्रक्रियासिद्धिमूलत्वं दर्शितम् । अत्यल्पमिदमुच्यते । देवदैत्यमुनिमानवादिषु बहवो रससामर्थ्यात् दिव्यं देहमाश्रित्य जीवन्मुक्तिमाश्रिताः श्रूयन्ते रसेश्वरसिद्धा[illegible]न्ते ।

तथा चः—देवाः केचिन्महेशाद्याः दैत्याः काव्यपुरःसराः

मुनयो बालखिल्याद्याः नृपाः सोमेश्वरादयः ।
गोविन्दभगवत्पादाचार्य्यो गोविन्दनायकः
चर्पटी कपिलो व्याली कपाली कन्दलायनः ॥
एतेऽन्ये बहवः सिद्धाः जीवन्मुक्ताश्चरन्ति ते
तनुं रसमयीं प्राप्य तदात्मककथाचणाः ।

अयमेवार्थः परमेश्वरेण परमेश्वरीं प्रति प्रपञ्चितः ॥

कर्म्मयोगेन देवेशि ! प्राप्यते पिण्डधारणम्—
रसश्च पवनश्चेति कर्म्मयोगो द्विधा स्मृतः ।
मूर्च्छितो हरते व्याधिं मृतो जीवयति स्वयम्
बद्धः खेचरतां कुर्य्याद्रसो वायुश्च भैरवीति,

एवं ब्राह्मयामलकरसायनानामपि महत्सिद्धिप्रदत्वं दृश्यते । एवं सर्वसिद्ध्यैश्वर्य्यादिसम्पत्तये द्रव्यादिविज्ञानालोचनं कर्त्तव्यमिति किमपि वैदिकविज्ञानानुसन्धानभवनं स्थापनीयं सर्वैरेव वैदिकधर्मावलम्बिभिः । येन बलवत्वमासाद्य नाभिभूताः हेयाश्च भवेम । 'नायमात्मा बलहीनेन लभ्य' इति ज्ञानमात्रसेवकानामपि बलमपेक्षितमिति सर्वस्यावश्यकता ।

अधुना वैदिकविज्ञानद्रव्यक्रियामन्त्रालोचनाभावेन भारतस्य भा विनष्टैवेति भारतत्वमपि विनष्टं जातम् । क्वापि न दृश्यन्ते मन्त्रौषधिसमाधिजाः सिद्धयः । येनैकदा—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

इतिस्मृतिपथमधिगच्छति । अतएव मृतभाषेयमिति निगद्यते परन्तु नेयं भाषा मृता, मृता एव ब्राह्मणादयः भारतीयाः सुरभारतीसेवकाः ।

यदि समिच्छसि भारतवैभवं हृदयतो भज रे सुरभारतीम् ।
कुरु च योगरसेषु परिश्रमं निगमकल्पतरोस्तलमाश्रय ॥

किमधिकं सहृदयेषु सद्सद्विचारचतुरोदारचरितेषु सुरभारतीसेवकेषु इति ।

वेदाधःपतने विचारः

[ले० — श्रीचित्रकूटपाण्डेयः]

संस्कृतसाहित्यसमज्ञानां भवतां पुरस्तात् प्रस्तु विचारोऽसौ । भवन्तस्तु दत्तावधाना हृदये हस्तौ निक्षिप्य वेदरक्षानिर्भरेण मनसा पक्षपातराहित्येन च विचारयन्तु यत्, किं ते वैदेशिका स्तथैतद्देशीया धर्म्मप्रियाः समाजप्रिया अप्रियाश्च वा देशकालज्ञानज्ञा एव केवलं स्वार्थपरायणा इतस्ततो भ्राम्यन्तो राजकीयसंस्थासु प्रविश्य प्रविश्य स्वकार्यमनुकूलयन्तः स्वीयां समुन्नतिं साधयन्ति न वा ? नेति न वक्तुं शक्यते ।

विद्यां च ते न जानन्ति, तस्या एव प्रसारमयूखाच्छादितं जगद् भवति, किन्त्वेतत्क्रियमाणाः कनीयांस अल्पतरज्ञाश्च, संस्कृतसाहित्यानवरत परिश्रमशीलान् मनोरमा-शब्दरत्न-शब्देंदुशेखरपारङ्गतानुपहसन्तो विलोक्यन्ते । तथाप्यत्र विबुध धुरन्धरै र्न विधीयते ? वर्तमाने त्विदमुपहासास्पदमेवेति । भाष्यमवलम्ब्यैव ग्रन्थाश्चैते प्रणीताः सन्ति इति । एषु ग्रन्थेषु सर्वत्र स्थले प्रतिपादितं अत्र परीक्षाध्यक्षैः कौंसिलसदस्यैर्धर्मस्य राष्ट्रस्य

समाजस्य चाधःपतनं विविच्य वेदाधःपतनहेतुं विचार्य्य विविच्यताम् । वहवस्तु ते महाशयाः पाण्डित्यलोभेनाध्ययनाध्यापनपरायणाः धर्म्मबुद्ध्या देवविद्यापठनरता भवन्ति । तेषु ये मनोरमादिषु प्रतिष्ठां अधीत्य परिश्रमेणोपाधिमाचार्य्यपरीक्षां वां निस्तीर्य्योत्तीर्य्य च शक्तिशालिनोऽपि भूत्वा स्वाधीनतद्ग्रन्थाध्ययनमन्तरा विदुषः प्राप्य स्वीयं पराजयं विना वा द्वितीयं किं फलं प्राप्नुवन्ति ? यदि केचन " ईसाइ " यवनाश्च तेषां पुरस्तादागत्य सनातनधर्म्मस्योपरि कुठाराघातं विधाय तद्वेदान्वा निन्दयित्वा भारतजलवायूत्पन्नान् हिन्दून् स्वकीयधर्म्मे समावेशयन्ति तदा मूकत्वादृते किं कुर्वन्ति ते ? अन्यानपि भूयस अत्याचारान्पश्यन्तोऽपि व्याकुलितमनसो हाहेति कुर्वन्त ईश्वरेच्छां मन्यमानाः मनोरमादिव्याकरणग्रन्थाध्ययनतत्परा एव तिष्ठन्ति ते अहो आश्चर्य्यतरमिदम् ! कुतः समागतेयं दशा वैयाकरणानां शिरसि ! अहो ! व्याकरणाध्ययनन्तु वेदान् रक्षितुमेव, किं च वेदविमुखांस्तार्किकान्पराजित्य वेदाभिमुखनयनमेवेत्यादितत्प्रयोजनमस्ति । अत एव मध्येऽज्ञानामस्य तु प्राधान्यम् । इतस्तु गाढपरीक्षाश्रमशीलानामेतेषां व्याकरणाचार्य्यपरीक्षां विना तत्पाण्डित्यस्य सौजन्यं न । इमे ग्रन्था अपि विवादग्रस्ता एवेति । एतेषां को हि दोषः ? अहो ! तत्पथप्रदर्शकानान्तु कर्त्तव्यमिदं भवति । यादृशी शक्तिरार्षग्रन्थेषु निहिता तादृशी कथं स्यादनार्षग्रन्थे ! किं भोः यादृशी योग्यता कालिदासादिभिरासीत्सम्पादिता सा किं अनार्षानेतान्ग्रन्थानेवाधीत्य, आधुनिकेष्वनार्षग्रन्थेषु भाषाकाठिन्यम् । किन्तु प्राचीन-भाष्यादिष्वार्षग्रन्थेषु विषयस्वच्छता भाषायाश्च सरलता स्फुटमेव प्रतिभाति साम्प्रतन्तु संस्कृतज्ञानां कृते भौगोलिकज्ञानमैतिहासिकञ्च सर्वं वाहुल्येनापेक्षितं विद्यते । सर्वतस्तु पूर्वं वेदविज्ञानमत्यधिकम् । अत एव साम्प्रतिकान्प्रचलितान्ग्रन्थान्परित्यज्य, भाषादिषु प्राचीनार्षग्रन्थेषु च यदि पठनपाठनादि प्रणाली प्रचलेत्तदा वेदादीनां समुद्धारोऽवश्यमेव स्यादिति । अत्र नास्ति मे सन्देहः । किं वहुना भवतां सुप्रभातपाठकानामग्रे ।

तुलसी-स्मृतिः ।

आनन्द-कानने ह्यस्मिन् तुलसी जङ्गमस्तरुः ।
कविता-मञ्जरी यस्य रामभ्रमरभूषिता ॥

महात्मनां तुलसीदास-महोदयानां कैवल्यतिथिः श्रावण शुक्ला सप्तमी विद्यते । तेषां जन्मतिथेर्यथावदनुपलम्भात् मृत्यु तिथावेव तेषां स्मृति-महोत्सवो भारते वहुषु स्थलेषु सम्भवति । महात्मनस्तुलसीदासस्य विषये किं ब्रूमो वयम् । सहि खलु भगवान् महर्षिः भारतवर्षस्यार्यजातेश्च यादृशमुपकारं कृतवान्, न तादृश उपकारः केनापि कृतः, न च करिष्यते । यदि चेद्भगवान् तुलसीदासो नाभविष्यत्तदा कोटिशो हिन्दवोऽद्य विधर्मिणो दुराचरिणश्चाभविष्यन् । कः खलु देशः ? कः खलु मनुष्यो भारतीयः ? यो हि भगवतस्तुलसीदासस्य पावनं गौरवञ्च नाम न जानाति । हिन्दीभाषाभाषिषु च वेदानाम्, धर्मशास्त्राणाम्, पुराणानाम्, दर्शनानाञ्चातिगूढमपि सिद्धान्तं सरल-सरलया सरण्या आग्रामारं प्रविचारयिषुर्महर्षिस्तुलसीदासो रामचरितमानसं नाम पावनं ग्रन्थरत्नं निर्माय सनातनधर्मस्य,

सुरभारत्याः, ब्राह्मण-समाजस्य विशेषतश्च हिन्दूसमाजस्य यादृशीं सेवां कृतवान् न तादृशी सेवा पण्डितकोटिभिरपि कर्तुं पार्यते । यत्र तत्र प्रतिप्रान्तम्, प्रतिनगरम्, प्रतिग्रामम्, प्रतिगृहम्, प्रतिव्यक्ति च परमपुण्यां रामचरितभागीरथीं प्रवाहयन्नयं संस्कृत-समाजस्य नितरां श्रद्धा-सम्मान-गौरव-भाजनभूतः । हिन्दीभाषाविद्वाँसस्तु महात्मनस्तस्य कृते यावच्छक्यं श्रद्धामादरञ्च प्रदर्शयन्ति, परं संस्कृतज्ञा अत्र नितरामुदासीनाः सन्ति । तेषां कूपमण्डूकदृष्ट्या तुलसीदासस्य महत्त्वमेव नास्ति । ते तत्र भवन्तं "भाखा-कवी" विब्रुवते । परं वास्तविकया दृष्ट्या विचारे तु महात्मनस्तुलसीदासस्य यादृशं संस्कृताध्ययनमासीत् न तादृशमिदानीन्तने कस्मिन्नपि संस्कृत-पण्डिते दरीदृश्यते । स आसीन्महाकविः, तस्य महाकाव्ये किं नास्ति ? महाभारतवत् हिन्दी-वाङ्मये रामायणमेव तादृशं विद्यते, यत्कृते "यन्नेहास्ति न कुत्रचित्" इति वक्तुं पार्यते । प्रायो भारतीय-ग्रामेषु सर्वाण्यपि धर्मकार्याणि प्रश्नोत्तराणि शुभाशुभफलानि च रामायणद्वारैव सम्पाद्यन्ते । कियदध्ययनमासीदस्य महाकवेः, कियांश्चायमासीद्विद्वानिति तस्य प्रतिज्ञा-पद्येनैव प्रत्यक्षं प्रतीयते । यथा—

नानापुराण-निगमागम-सम्मतं यत्

रामायणे निगदितं क्वचिदन्यतोऽपि ।

स्वान्तः सुखाय तुलसी रघुनाथ-गाथा—

भाषा-निबन्धमतिमञ्जुलमातनोति ॥

नानापुराणानाम्, निगमानाम्, आगमनाम्, रामायणस्य, महाभारतादीनाञ्च कियज्ज्ञानमासीदिति प्रतिपदमेव स्फुटी भवति । न केवलं तेषामेव ज्ञानम्, प्रत्युत नैषधरघुवंशादि काव्यानाम्, उत्तररामचरित-हनुमन्नाटक-अनर्घराघव-प्रसन्नराघवादीनाञ्च नाटकानां श्लोकास्तदवस्था एव, क्वचिच्च ततोऽपि सुन्दरतरा रामायणे समालोक्यन्ते ।

रामायणद्वारा संस्कृतभाषाप्रचारेऽपि कविप्रवरो महान्तं श्रमं कृतवान् । रामायणीय-भाषायां प्रायः सर्वे संस्कृतशब्दा एव व्यवहृताः सन्ति । एतेन न जाने कियतां मुखानि संस्कृतशब्दोच्चारणद्वारा संस्कृतानि पवित्रीकृतानि च ।

साम्प्रतमत्र तेषां किञ्चित् संस्कृत-हिन्दीकाव्यं पाठकानां पुरो निवेद्यन्ते—

सीताराम-गुणग्राम-पुण्यारण्य-विहारिणौ ।
वन्दे विशुद्ध-विज्ञानौ कवीश्वर-कपीश्वरौ ॥

अत्र प्रसादः, कोमलता, माधुर्यम् रूपकम्, अनुप्रासः, सारल्यम्, भाव-गाम्भीर्यं च चित्तं चोरयन्ति ।

भवानी-शङ्करौ वन्दे श्रद्धा-विश्वास-रूपिणौ ।
याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तस्थमीश्वरम्

अत्रापि श्रद्धया विश्वासेन च विना न कदाप्यात्मसाक्षात्कारः कर्त्तुं शक्य इति व्यञ्जयन्ती कविसूक्तिः गुणालङ्कार-रमणीया रमणीयेव रमणी रमयतितरां रसिकजन-मनांसि ।

अन्यच्च—

यन्मायावशवर्ति विश्वमखिलं ब्रह्मादिदेवाः सुराः
यत्सत्वादमृषैव भाति सकलं रज्जौ यथाहेर्भ्रमः ।
यत्पादप्लवमेकमेव हि भवाम्भोधेस्तितीर्षावतां
वन्देऽहं तमशेषकारणपरं रामाख्यमीशं हरिम् ॥

अत्रापि चरमं सिद्धान्तं भक्तिमार्गस्य प्रतिपादयता भगवता प्रगाढ़ं पाण्डित्यं प्रदर्श्यते ।

यथा संस्कृत-साहित्ये कवयः काव्यारम्भे प्रथमं मङ्गलाचरणानि, ततः सज्जन-दुर्जनयोः स्तुतिनिन्दे, कविकाव्य-प्रशंसाञ्च विधाय काव्य-कथामारभन्ते, तथैवायमपि महाकविः सरस-मसृणैः, भाव-गभीरैः, हृदयस्पृग्भिः, प्रसन्न-मधुरैश्च पदैः काव्योपक्रममारभते । यथाः—

नील-सरोरुह-श्याम, तरुण-अरुण-वारिज-नयन ।
करो सो मम उर धाम, सदा क्षीरसागर-शयन ॥

* * *

बन्दौ गुरु पद-पदुम परागा, सुरुचि सुवास सरस अनुरागा ।

* * *

श्याम-तामरस-दामशरीरम्, पाणिचाप-सर-कटितूणीरम् ।
अरुण-नयन-राजीव-सुवेपम्, हर-हृदि[1] मानस-बाल-मरालम् ।

* * *

१ 'हर-हृन्मानस-बाल-मरालम्' इतिशुद्धः पाठः—
सम्पादकः

सरनि सरोज विटप बन फूले, गुंजत मञ्जु-मधुप रस-भूले ।

* * *

मलिन-वसन, विवरण, विकल, कृशशरीर दुखभार ।

* * *

सोचिय गृही जो मोहवस करै कर्म-पथत्याग ।
सोचिय यती प्रपञ्च-रत, विगत-विवेक-विराग ॥

किमेतावता रामचरितमानस-विन्दुमात्रेण । एतस्मिन् महासागरे किं किं नास्ति, तत्तु मानसादपि महत्तरे ग्रन्थेऽपि मानस-महिमा न वर्णयितुं शक्यते । सर्वथैवास्य ग्रन्थस्य महत्त्वं विस्मृत्य वयं भगवन्तं तुलसीदासं विस्मृत्य वितिष्ठामहे नैतदुचितम् ।

भक्त-दृष्ट्यापि तुलसीदासस्य स्मरणं कृत्वा पुनीमहे । कलौ, तत्रापि प्रखरतरे यवन-साम्राज्ये तुलसीदास-सदृशानां भक्तशिरोमणीनां जन्म भारतस्य आर्यजातेश्च सौभाग्यमेव ।

तुलसीदासस्य भक्तिविषये, काव्यालोचनविषये बहु समालोचनीयं वरीवर्ति, पुनः कदापि समालोचयिष्यामः ।

अद्यापि ग्राम्यजनतायामियती धार्मिकी श्रद्धा केवलं तुलसीरामायणद्वारैव विद्यते, यां दृष्ट्वा सनातनधर्मध्वजिनो गौरवं मन्यन्ते । न केवलं हिन्दीभाषायामेव कनारी-तेलगू-आन्ध्र-मलयालम-उडियाप्रभृतिष्वपि स्वल्पप्रचारासु भाषासु तत्तद्देशीयच्छन्देषु रामायणस्यानुवादा स्तमेवादर्शीकृत्य विरचिताश्च रामकथाः प्रत्युटजं जेगीयन्ते इति परं सौभाग्यम्, पुण्यविलसितञ्च भगवतो महात्मनस्तुलसीदासस्य भक्तशिरोमणेः ।

अद्य वयमपि तत्स्मृति दिवसे तत्स्मरणेनात्मानं कृतकृत्यं मन्यामहे ।

नित्यानन्द-निकेतनम् काशी
श्रावण-शुक्ल-सप्तमी १९८६
—श्रीकेदारनाथ शर्मा
सारस्वतः

"दिवा धूर्तैर्जगद्वञ्च्यते ।"

[*हृषीकेश-कथा*]

अखिल-भारतीय-विद्वत्सम्मेलनम् ।

ग्रीष्मावकाशे प्रतिवर्षं मया हृषीकेशे यथावकाशं नूनं क्रियते निवासः । एतद्धि प्रशान्त-पावनं रमणीयतरं महर्षीणां तपःस्थानं प्रकृतेर्लीलाक्षेत्रं नितरामाकर्षति हृदयम् । जनसम्मर्दबहुले हरद्वारे नास्ति तावानानन्दो यावान् हृषीकेश-क्षेत्रे । उत्तराखण्डस्य केन्द्रभूतं शम-सत्वप्रधानमिदं क्षेत्रं तामसिकैर्दुराचारिभिर्दुर्दोदूयमानमिदानीं घृणामुत्पादयति । सनातनधर्मस्य दुर्भेद्येऽस्मिन् दुर्गे, सनातनधर्मस्य नग्नचित्रमालोचयतामस्माकं हृदि दारुणा वेदना समुत्पद्यते । अत्र दुर्गमे दुर्गे महत्कार्य-सम्पादनाय सत्य-प्रतिज्ञानामुत्साहवतां धर्मश्रद्धावतां क्रान्तिकारिणां नवयुवक-कार्यकर्तॄणां महत्यावश्यकता वरीवर्ति । एतद्विषये तु पुनः कदापि प्रकाशं पातयिष्यामः । साम्प्रतं प्रकृतमनुसरामः ।

एतस्मिन् वत्सरे प्रिया-विप्रयोग-विह्वलोऽहं यदा हरद्वारक्षेत्रे आसम्, तदा तत्रत्येभ्यः पण्डितेभ्यः श्रुतम् यत्, ज्येष्ठ-कृष्ण-त्रयोदशीतो दिनचतुष्टयं यावत् हृषीकेशे अखिल-भारतीयं विद्वत्सम्मेलनं भविष्यति । तच्छ्रुत्वा मुदितमानसेन मया चिन्तितम्, यदिमे दिवसाः समीचीनतया सरसतया च व्यत्येष्यन्ति । यतो विविध-विदुषां विपुले-विमर्देऽस्मिन् मनोरञ्जनं ज्ञानवृद्धिश्च भविष्यति । परं दिनत्रयानन्तरमेव हरद्वारे यत्र तत्र भित्तिषु महान्ति विज्ञापनानि समवलोकितानि, येषु लिखितमासीत्, यत् "अखिल भारतवर्षीय-विद्वत्सम्मेलनस्य, संस्कृतमहामण्डलस्य, परीक्षापीठस्य एकादशतममधिवेशनं दिनचतुष्टयं यावत् भविष्यति" इति । तदवलोक्य तु तदैव मम मनसि समागतं यत् "प्राचीनेन सिद्धहस्तेन केनापि गुरुणा हृषीकेश-सदृशे पर्वतैककोणे सनातनधर्मस्य विशाले वक्षसि विस्तारितं जालम्, मुग्ध-कुरङ्गाः पतिष्यन्ति । साधु, सुचतुरोऽयं कश्चन गुरुः" इति । एतस्य सम्मेलनस्य अन्येषाञ्च सम्मेलनानामीदृशानां विषये मया सुप्रभातस्य विशिष्टाङ्के सुतीव्रा टिप्पणी विहितासीत् । एतस्य रहस्यम्, रहस्यानि च

गुप्तपत्राणि मया सुप्रभात-सम्पादनं कुर्वता समासादितान्यासन् । अस्माभिर्विचरितमासीत् यत् "संस्कृत-संस्थासु कार्यन्तु भवत्येव नहि; तासां नाममात्रस्थितिर्भवति । यदि ताभ्यः कोऽप्युपकारो न भवति चेदपकारस्तु न भवति । तदा तिष्ठन्तु ता अस्माकं बलवृद्धिरेव स्यात्, परं शनैः रहस्यं विदित्वा तु विदग्धान्तःकरणा वयं संस्कृत-समाजे, ब्राह्मण-समाजे च नैतादृश अत्याचाराननाचारांश्च कदापि सर्पितुं प्रभवेम । अन्धेन नीयमाना दिवान्धा हिन्दूजनता नितरां पतिता विद्यते । यदि कश्चित् कथयेत यत् 'विष्ठाभक्षणेन मुक्तिर्लभ्यते' तदा भारतीया धार्मिक-जनता सादरं सश्रद्धञ्च सबहुमानञ्च विष्ठां भक्षयितुं सोत्साहं प्रवृत्ता भवेदिति सुनिश्चितं कथयामः । सन्त्येव राधास्वामी-पुष्टिमार्ग-बीजमार्ग-चोलीपन्थ-प्रभृतयस्तादृशा एव शतशः सम्प्रदायाः । भवतु ! अयं सारांशो यत् अन्धजनतायां तत्रापि पर्वतकुक्षौ तत्रापि मुग्धानां दाम्भिकानाञ्च प्रधानक्षेत्रे अखिलभारतीय-विद्वत्सम्मेलन-संयोजकस्य जाल-विस्तारः समुचित एवासीत् । तत्रापि संस्कृत-पण्डितास्तु महात्मन एव भवन्ति । तेभ्यस्तु धूर्ततया सर्वमपि कार्यमकार्यं वा केनापि कारयितुं शक्यते । यतस्ते मुमूर्षवो विनाशोन्मुखाश्च सन्ति ।

ज्ञातरहस्योऽहं तूष्णीं सम्मेलनावसरं प्रतीक्षमाणोऽवस्थितवान् । अत्रान्तर एवास्माकं सुपरिचितौ, प्रियसुहृदौ श्रीशिवदयालुमिश्र-श्रीविवेकानन्दसन्यासिनौ हरद्वारमागत्य पण्डितेभ्यः सदस्यशुल्कं गृह्णन्तौ निमन्त्रणञ्च ददतौ सहसैव सम्मिलितौ । ताभ्यां साग्रहं निमन्त्रणमवाप्य मया सम्मेलन-संयोजकानां विषये स्वीया विचाराः प्रकटीकृताः, सुप्रभातस्य टिप्पणी च प्रदर्शिता । उक्तञ्च यत् अखिलभारतवर्षीय-संस्कृत-साहित्य-सम्मेलनं विहाय संस्कृतस्य नान्या काचन तादृशी महती संस्था विद्यते । भवन्तस्तु धूर्तजाले समापतिताः संस्कृत-समाजं कदर्थयिष्यन्ति, निन्दयिष्यन्ति च । तैरप्युक्तम्, "सत्यमसौ सम्मेलन-संयोजको महान् धूर्तः, अस्मान् प्रोत्साह्य किञ्चिन्मुद्रादिकं गृहीत्वा विविधव्याजं प्रदर्श्य भ्रामिताः, साम्प्रतं वयं मध्ये मार्गं पतिताः स्मः । कार्यासमासादितम् । इदानीं कथमपि लोकलज्जा-निवारणाय, परिश्रम-साफल्याय चास्माभिः किमपि कर्तव्यमेव । किंकुर्मः मग्नाः स्मः पङ्के ।" इत्यादि ।

यथा समयं हृषीकेशे गत्वा मया ज्ञातम् यत् नागरिकेषु, छात्रेषु, सन्यासिषु, यत्र, तत्र सर्वत्रैवेयं सम्मेलन-कथा प्रचलति यत् "केनापि धूर्तेन वञ्चिता अत्रत्याः पण्डिताः, मोहान्तश्चेति।" मया च सर्वमवगत्य स्वागतसमितेरुपाध्यक्षाः श्रीशिवदयालु मिश्राः प्रोक्ता यत् "इदानीं न केऽपि पण्डिताः समागताः, अन्येषां कथा तिष्ठतु; हरद्वार-सहारनपुर-देहरादून प्रभृति-पार्श्ववर्तिनगरनिवासिनोऽपि पण्डिता न समागताः-अत इदानीं साधित-सामग्र्या 'हृषीकेश विद्वत्सम्मेलनम्' इत्यनेन नाम्ना सभाकार्यं कथमपि समापनीयम् । 'अखिलभारतीय' पदस्य दुर्दशा न विधेया ।" परं मिश्रमहोदयेन साभिमानमुक्तं यत् "एवमेव भवति, कोऽप्यागच्छतु, मा वा आगच्छतु, वयन्तु अखिल-भारतीयमेव सम्मेलनं विधास्यामः ।" कृत निर्बन्धा अपि ते यदा नाग्रहं त्यक्तवन्तस्तदा मया प्रोक्तम्, यत् "नास्माभिः प्रत्यक्षमिदमालोकयितुं शक्यते जनतावञ्चनात्मकं कर्म । अहं निःशङ्कं विरोधमाचरिष्यामि ।" तेन च महोदयेन सर्वत्र सम्मेलन-कार्यकर्तृषु प्रचारः कृतो यदयं सुप्रभात-सम्पादकः सम्मेलन-विघटनं विधास्यतीति ।" अहमपि तूर्ष्णीं स्थितो हृषीकेश-रत्नभूतानां आस्तिकशिरोमणीनां पण्डितप्रवराणामाहिताग्नीनां माननीय-श्रीबालकराम शास्त्रिणामस्मद्बन्धुभूतानां सविधे गत्वा सविस्तरं रहस्यमश्रावयम् । इमे खलु सत्ययुगीया विद्वदग्रेसराः हृषीकेश एव नहि, समस्तेऽपि तस्मिन् प्रान्ते अद्वितीयाः प्रभावशालिनश्च वैदिका विद्वांसः सन्ति । एतेषां सत्वमयः स्वभावः, सत्यमयं परमपूतञ्च जीवनं अनुकरणीयं विद्यते । एतेऽपि तत्र प्रायो विंशतिमुद्रामितं साहाय्यं दत्त्वा, तस्य च दुरुपयोगं स्वार्थपरताञ्चालोक्य विपण्णा आसन् । सम्मेलन-संयोजकैः कथितमासीत् यत् महामहोपाध्यायाः डा० गङ्गानाथझा, एम० ए०, डी० लिट्०-महोदयाः समापतित्वमङ्गीकरिष्यन्ति । अन्ये च सुप्रसिद्धा भारतवर्षीयाः काशीस्थाश्च विद्वांसः समेष्यन्ति । परमिदं धौर्त्यमालोक्य ते भृशं दुःखिता अभवन् । तत्रैव च मया दृष्टं यत् सम्मेलन-संयोजकेन "आचार्य" नामकमेकं किमपि हिन्दीपत्रमपि प्रकाश्यते । तत्पत्रं यदाकदाचिद्धि-

शिष्ट-समये निःसरति यथावसरं यथेच्छं च प्रकाशमेति । नैतत् पाक्षिकं साप्ताहिकं मासिकं वा किमपि । केवलं जनानां मुण्ड-मोचनाय, मायाजाल-प्रसाराय च तेनैतदपि साधनं संस्थापितमस्ति । तत्र ज्ञातं यत्-अत्र दश, द्वादश वा सम्मेलनानि भविष्यन्ति । केचन नामतः स्मर्यन्ते । यथा—अखिल भारतीय विद्वत्सम्मेलनम्, संस्कृत-महामण्डलाधिवेशनम्, अ० भा० संस्कृत-परीक्षापीठस्य उपाधिवितरणोत्सवः (Canvocation), अ० भा० महिला महापरिषद्, अ० भा० हिन्दू महासम्मेलनम्, अ० भा० छात्र-सम्मेलनम्, अ० भा० आयुर्वेद-सम्मेलनम्, अ० भा० सम्पादक-सम्मेलनम्, सङ्गीत-सम्मेलनम्, एवमेव बहूनां सम्मेलनानां कार्य-विवरणं मुद्रितमासीत् । हन्त भोः ! हन्त !! कियती विडम्बना ! कियान् दम्भः ! कियच्च मौढ्यं जनतायाः !

एवं प्रचलत्येव विचारे पलायितेन तेन सम्मेलनाध्यक्षेण हिन्दी-आँग्ल-समाचारपत्रेषु तडित्सूचना मुद्रापिता यत् साम्प्रतम् अखिलभारतीयं विद्वत्सम्मेलनं हृषीकेशे न भविष्यति । जुलाई मासस्य ३०. तमे दिवसे प्रयागनगरे निर्णयो भविष्यतीति, एतदवलोक्यैव वराकाणां स्वागतसमितिसदस्यानामुत्साहभङ्ग अभवत् । केषाञ्चन स्वागतसमितिपदाधिकारिणां स्वार्थहानिरपि समभवत् । यतस्ते एकदैव दैव-योगात् अखिल-भारतीय-विद्वत्सम्मेलनस्य स्वागतसमितेः पदं प्राप्तवन्त आसन् । तेषामियमिच्छा मनस्येव स्थितेति ते नितरां भग्नोत्साहाः सञ्जाताः । साम्प्रतं सभापति-निर्णये हरद्वारस्थऋषिकुल-ब्रह्मचर्याश्रम-प्रधानाध्यापकानां श्रीघुटरझामहोदयानां निर्वाचनं कृत्वा तेऽपि समानीताः । घुटरझा महोदयाः साम्प्रतं परमोत्साहवन्तो नवयुवका अस्माकञ्चान्तरङ्गप्रणयिनः सन्ति । इमे विविधशास्त्रेषु लब्धोपाधिका आचार्या आङ्ग्लभाषाया परीक्षां ददति । वर्षद्वयाभ्यन्तर एव बी० ए० परीक्षामुत्तरिष्यन्तीत्याशास्महे । इमेप्यविदितरहस्याः सभ्या अत्रागत्य सर्वां स्थितिमवालोकयन् । मयापि तेभ्यः स्वकीयाः भावाः स्पष्टं प्रतिपादिताः ।

[शेषमग्रे]

—श्रीकेदारनाथशर्मा

सम्पादकीयम्

जरठस्य कामुकत्वम् ।

विगतमासेषु काशीस्थेन सुप्रसिद्धचिकित्सकेन श्रीमता त्र्यम्बकशास्त्रिणा सप्ततिवर्षात्मके वयसि स्वकीयः सप्तम अष्टमो वा विवाहो विहित इति तत्तद्भाषासमाचारपत्रेषु सुस्पष्टं प्रकाशितोऽयं समाचारः । यत्र तत्रास्माभिर्नितरां भीषणेन रूपेण विकटैश्च शब्दैरस्य विवाहस्य निन्दा समालोकिताविद्यते । बहुषु च सभासु प्रस्तावद्वाराऽस्य विवाहस्य विरोधः समजनि । काशीस्थेन नामधारिणा पण्डितपत्रेणापि प्रकारान्तरेण विवाहसमर्थनं कुर्वता कथमपि विवाहस्यास्य विरोध एव कृतः । एतस्मिन् विषये साम्प्रतं किमपि वक्तव्यं नावशिष्यते । अस्माभिस्त्विदमेव साभिमानमुद्घोष्यते यत्, साम्प्रतं ये सनातनधर्मनाम्ना रोदनं कृत्वा हाहाकारं कुर्वन्ति, दम्भजालेन च मुग्धान् मुण्डयन्ति, सनातनधर्मञ्च स्वीयां पैत्रिकीं सम्पत्तिमामनन्ति, ते प्रायो धूर्ताः, वञ्चकाः, सनातनधर्मस्य प्रच्छन्नशत्रवो दाम्भिका अनार्याचरणाश्च सन्ति । हन्त ! साम्प्रतमेव यैः पण्डितपदं कलङ्कयद्भिरिदमुद्घोषितमासीत् यत् "द्वादशवर्षानन्तरमप्यविवाहिता ब्राह्मणकन्या वृषलीत्त्वमापन्ना कृतप्रायश्चित्ताऽपि न कदापि समाजग्राह्या भविष्यति । सा च पित्रादिभिः परित्याज्या,

तो चेत्तेऽपि वृषलत्त्वमवाप्स्यन्ति ।' इत्यादि । वयं तान् पृच्छामो यत् किं भोः ! सा त्रयोदशवार्षिकी ब्राह्मणकन्या किं वृषलत्वं न गता ? यदिगता चेत्, तत्पित्रादयस्तत्कामुकश्च जरठः शास्त्रिमहोदयोऽपि वृषलत्त्वं न गतः ? यद्येवं तदा तेषां सम्बन्धिनः, सहवासिनः, सहभोक्तारश्च किं न पतिताः सन्ति ? यदि सन्ति चेत्तदा किं न दाक्षिणात्य-समाजस्तत्स्यान्दोलनं करोति ? किं न तं जातिबहिष्कृतं करोति ? एव मेवान्यदपि विद्यते महदाश्चर्यकरं यत् सा कन्या सगोत्रैवासीत् शास्त्रिवरणानाम् । विवाहात् पूर्वमेव दत्तक-विधानं कृत्वा तत्यास्य दोषस्य परिमार्जनं कृतम् । तदप्यशास्त्रीयमेव । त्रयोदशवर्षात्मिकायाः कन्यायाः सद्यो दत्तकविधानम्, तदपि च जघन्यकार्यायेति नितरां लज्जाजनकं धर्मविरुद्धञ्च । एतदन्तः केचन भोजन-भट्टा द्रव्यलोभेन कार्यकर्तार आसन् । हन्त ! ते के ? न जानीमहे !

साम्प्रतं सर्वाऽपि मण्डली पण्डितपदभाजां पण्डितराजपदभाजाञ्च निषण्णा सन्तिष्ठते । वदति च यदयं गोपनीयो विषयः । न वयमत्र किमपि वदिष्यामः । किमेतदेव धर्मध्वजित्वम् । मालवीय-महोदयानामुपरि पङ्क-प्रक्षेप्तारो गोवत्साभक्षकानाम्, गोमांस-विक्रेतॄणाम्, व्यभिचार प्रचारकाणां धनिकानां चाटुकाराः स्वयमेव पापपङ्के निमग्ना कृष्णमुखमादधाना अपि न त्रपन्त इति परा सीमा धार्ष्ट्यस्य ।

केचन प्राचीनमुदाहरणं प्रदर्श्य विवाहमिमं समर्थयन्ति यत् च्यवनेन, शन्तनुना, दशरथेन अन्यैश्चैवं कृतमिति । अयि भो ! अन्धेन नीयमाना अन्धाः ! किं च्यवनादीनामिव विद्यते भवत्सु सामर्थ्यम् । अहरहो पापमाचरन्तो भवन्तो च्यवनं निदर्शयन्ति । क्षत्रियं वा शन्तनुम्, यद्येवमेव निदर्शनं चेत्तदा चन्द्रेण गुरुपत्नीगमनं कृतम्, इन्द्रेण ब्राह्मणपत्नीगमनं कृतम्, बहुभिर्मुनिभिर्महर्षिभिश्च राजकन्यानां वैश्यकन्यानां परिणयः कृतः, पराशरेण धीवरकन्या समुद्वाहिता, व्यासेनापि तथैव कृतम्, एवं बहूनि साधकान्यपि प्रमाणानि मेलिष्यन्ति । किमेतावता ? भवन्तोऽपि तथा विधातुं क्षमाः स्युश्चेत् कृतं विवादेन । प्राचीनानि निदर्शनानि तु मेलिष्यन्त्येव । प्रथममप्यासन् पापाः नास्तिकाः, कामुकाः, जरठाः; परं ते नास्माकमादर्शभूताः । तेषां नाम ग्रहणेन कुशकाशावलम्बनेन च कार्यं न सेत्स्यति ।

शास्त्रिणां बालकोऽपि वर्त्तते षोडशवर्षवयाः । तस्योद्वाहमकृत्त्वैव प्रपौत्री समवयस्कायाः कन्यायाः निर्दयं पाणिपीडनं कुर्वता कम्पमानेन जरठेन कामुकत्वस्य पराकाष्ठा प्रदर्शिता । नैतन्नवीनं समाजे । बहवः सन्ति श्रेष्ठिनो ब्राह्मणाश्च ये धनबलेन एवं विदधति । तेषामेवासीत् ब्राह्मण सम्मेलने विशिष्टं साहाय्यम् । हन्त ! ब्राह्मणसमाज ! निश्चित एव निकटे भविष्यति ते सर्वनाशः । तव कृपयैव समाजे व्यभिचार-दुराचार-विधवाविवाह-भ्रूणहत्या-प्रभृतयः पापा आर्यजातिमिमां विलोप्तुं प्रभूता भवन्ति । भवानेवानर्थस्य कारणमस्य, निरीहकन्यकानां जीवनग्रहीतारो मानवापसदाः । भवतां कृते नास्ति स्थानं नरकेऽपि । विनाशकाले विपरीतेयं भवतां बुद्धिरिति विनाशाय सन्नद्धाः सन्तिष्ठन्ताम् ।

संस्कृत-साहित्य-समाजः सघृणमेतत्कृत्यं निन्दति, परञ्च विषीदति ।

* * *

ब्राह्मण-परिषत्-प्रयत्नः ।

चिरसंस्थापितायाः बङ्गीयब्राह्मणपरिषदो वृहदायोजनं ब्राह्मणमहासम्मेलननाम्ना काश्यां सञ्जातमासीत् । तत्र च यथा स्वार्थपरायणैर्महत्त्वाकाङ्क्षिभिः कैश्चन द्वित्रैः पण्डितैः स्वार्थसाधनाय नियम-हत्या, धर्म-हत्या च कृता साऽपि विदितप्रायैव पत्रपाठकानाम् । तेष्वेव दिवसेषु पण्डित सम्राजां भारतविख्यातविदुषां विद्यावयोवृद्धानां विद्वत्समाज नेतॄणां संस्कृत-साहित्य-समाज-सभापतीनां महामहोपाध्याय आचार्य श्रीप्रमथनाथ भट्टाचार्यमहोदयानां प्रयत्नेन देशकालपात्र-शास्त्राद्यनुसारं धर्मव्यवस्था-सम्पादनाय कलिकत्ता-नगरे अखिलभारतीय-ब्राह्मणपरिषत् संस्थापिता आसीत् । तया च साम्प्रतं पञ्चविंशतिसङ्ख्यकेभ्यो विद्वद्भ्यः षष्टिमुद्रावार्षिकीवृत्तिः प्रदीयते । येन ते धर्मशास्त्राणि पुराणानि इतिहासांश्चावलोक्य धर्मव्यवस्थापकान् ग्रन्थान् प्रणेष्यन्ति । श्लाघयामो वयं हृदयेन पुण्यमिमं प्रयत्नम् ।

* * *


शुभ-समाचारः ।

एतत्तु विदितचरमेव सुप्रभात-पाठकानां यच्छ्रीमतां गिरीशशुक्लमहोदयानां कैवल्यलाभानन्तरं हिन्दूविश्वविद्यालये जैनदर्शनाध्यापकपदं रिक्तमासीत्, तत्रास्माकं पूज्यपादाः गुरुचरणाः श्रीकविचक्रवर्त्तिमहोदया अध्यापकत्वे नियुक्ता आसन् ।

दौर्भाग्याद् ग्रीष्मावकाश एव तत्रत्य-साहित्य-प्रधानाध्यापकाः पण्डितप्रकाण्डाः पूज्यपादाः श्रीचन्द्रधरशास्त्रिमहोदया अपि काशीवासं कृतवन्तः । तेषामपि स्थानं रिक्तमासीत् ।

हिन्दूविश्वविद्यालयाधिकारिभिः साम्प्रतमेव प्रधान-साहित्याध्यापकपदे महामहोपाध्यायानां कविचक्रवर्त्ति-महोदयानां नियुक्तिः कृता । जैनदर्शनाध्यापकपदे च श्रीमतामस्मत्सुहृदां विद्वद्वराणां श्रीमहादेवशास्त्रिणां नियुक्तिः कृता । इमे खलु पाण्डेयमहोदयाः साहित्याचार्याः, व्याकरणाचार्यास्तु सन्त्येव; परं न्यायशास्त्रनिष्णाता दर्शनाचार्या अपि सन्ति । इमे अपि नवयुवकाः, परमोत्साहवन्तः, जीवनवन्तः, सुशीलाः, शान्तप्रकृतयो विद्याभ्यासनिरताः सन्ति । हिन्दू-विश्व-विद्यालये द्वादशवर्षाणि यावदेभिर्यथाविधि शास्त्राध्ययनं कृतमासीत् । वर्षद्वयात् गोयनका-संस्कृत-महाविद्यालये प्रधान-साहित्याध्यापका आसन् । एतेषां योग्यपदलाभेन समुन्नत्या च परं मुदितावयं सादरमभिनन्दयामस्तान् । धन्यवादांश्च वितरन्तो महतीं समुन्नतिमेतेषां कामयामहे ।

* * * *



श्रीमत् पण्डित ठाकुरदत्त शास्त्रिणः ।

Preshed by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.


चतुर्थ-पञ्चमाङ्कौ | १९८६ वैक्रमाब्दाः | सौर-श्रावण-भाद्रयोः
No. 4-5 | 1929 A. D. | August-September.

सुप्रभातम् ।

संस्कृत-साहित्य-समाजस्य सचित्रं मासिकं सुखपत्रम् ।

तिमिर-ततिमुदस्यद् भेदताराविलुम्पन्, नयदधि-सुरभाषाभाषि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद्भाग्यभानुम्, विलसतु भुवनेस्मिन् सर्वतः 'सुप्रभातम्' ॥

वैदिक-शिरोमणिः



श्रीविद्याधर शर्म्मा गौडः अग्निहोत्री ।

सम्पादकौ—
श्रीकेदारनाथशर्म्मा सारस्वतः—श्रीविन्ध्येश्वरीप्रसादशास्त्री च
व्यवस्थापकः—
श्रीसत्यनारायणशास्त्री, कविराजः भिषगाचार्य्यः

वार्षिकम्मूल्यम्—३) माननीयेभ्यः —१०)
वैदेशिकेभ्यः—५) छात्रेभ्यः —१॥)

विषय—सूची ।

चित्र-सूची ।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम् ।

षष्ठ-वर्षे | सौर—आषाढे १९८६ विक्रमाब्दीये | तृतीयोऽङ्कः ।

गीर्वाणभारतीस्तवनम्

अपार-साहित्य-विभूषितां त्वा-
मध्यात्म-सद्दर्शन-दिव्यदेहाम् ।
श्रेयःसमाराधकसत्कृताङ्गाम्
गङ्गोपमां सर्वजनः स्तवीति ॥ १ ॥
त्वमेव सत्काव्य-विशेषबोध-
विज्ञापिताशेषमनोरथाप्तिः ।
त्वमेव बोधार्णवसंभवाऽसि
सन्नीतिरत्नव्रजरत्नराशिः ॥ २ ॥
प्रचण्डविज्ञानगभस्तिमाला-
प्रणाशिताऽज्ञानघनान्धकारा ।
शुभा विभूषा वरभारतस्य
सदोन्नतिः स्यात्तव मे समीहा ॥ ३ ॥
शान्तिक्षमामार्दवसद्गुणौघान्
सदा स्वभक्तान् बहु शिक्षयन्ती ।
समस्तभाषा-जननी त्वमेव
महर्षिवृन्दैरतिवन्दनीया ॥ ४ ॥
विशुद्धपुण्यातिशयेन लभ्ये !
सदानुभाव्ये ! भुवि भव्यभावैः ।
कवीन्द्रमुख्यैः सततं स्तुते ! ते
भूयात् प्रचारो भुवनत्रयेऽस्मिन् ॥ ५ ॥
नानाकलालङ्कृतकान्तकाये !
विकामसाधुप्रणताङ्घ्रिपद्मे !
समादरोऽभूत् तव पूर्वकाले
कथं तदास्यं मलिनायतेऽद्य ॥ ६ ॥
न तादृशं सौष्ठवमस्ति मान्ये !
भाषात्मकं यत्त्वयि विद्यमानम् ।
अन्यत्र भाषासु भुवस्तलेऽस्मिन्
त्वमेव वन्द्याऽमितशर्मदा च ॥ ७ ॥
सुरासुरैः संततसंस्तुतायाः
सर्वाद्वितायास्तव दुर्निरीक्ष्याम् ।
दशां विचित्रां हि निरीक्ष्य केषाम्
मनो न दूयेत विचक्षणानाम् ॥ ८ ॥

—श्रीचैनसुखदासो न्यायतीर्थः ।

कयोश्चित् छात्रयोः संलापः ।

ले०-" मीमांसाकेसरी " पण्डितप्रवर श्रीचिन्नस्वामि शास्त्री (हिन्दू विश्वविद्यालय-मीमांसाध्यापकः)

चिरन्तनवचोऽम्बुधिं परिविलोड्य सारं ततो,
नयोच्चयमुदारधीरुदधरन्मुनीनां वरः ।
य आदिनयकोविदस्तमहमादरादन्वहं,
नमामि शिरसा मुनिं विगतकल्मषं जैमिनिम् ॥

वंशीधरः—सखिवर्य शशिकान्त ! चिराद्दृष्टोऽसि, अपि कुशलं सानुजस्य भवतः ? अपि समुचितमुदश्च-त्यध्ययनम् । अपि कुशलिनो गुरुवर्याः ? किं ब्रवीमि ते भागधेयपरम्पराम् । प्रथमतो वासस्तावदमरधुनीप-रिसरे तन्नीरकणपरिपूते, सेवनं चानुदिनमिन्दुकला-वतंसस्य भगवतो विश्वभर्तुर्भगवत्या अन्नपूर्णायाश्च, परिशीलनं च पङ्क्तिपावन्या भगवत्या मीमांसायाः । सर्वमिदं समुचितमेव भवतो विद्वत्कुलप्रसूतस्य । कस्मिन् ग्रन्थे मीमांसायामध्ययनमिदानीं प्रचलति ?

शशिकान्तः—वयस्य वंशीधर, सर्वं कुशलं भग-वतो विश्वेशस्यानुकम्पया । प्रचलत्यप्यधीतिराप-रितोषादात्मनः । परंतु.........

वंशीधरः—किमर्धावशिष्ट एव वचसि वृणोषि मुखम् । पूरय वक्तव्यशेषम् । किमस्ति क्वचिदंशे त्रुटिः ? किं नितान्तं गोपनीयम् ? येन बलान्निस्सृत-मपि निगूहितुमिच्छसि ।

शशिकान्तः—नास्ति नितान्तगोपनीयम् । अपितु जिह्रेमि कथयितुम् ।

वंशीधरः—अरे ! सुहृदि गोपनीयं लज्जनीय-मप्यस्ति भूतले ? यद्येवं मा मामितःपरं व्यपदिश सुहृदिति ।

शशिकान्तः—मा कुप्य मित्रमणे ! यदाहं पतितो भवच्चक्षुषि तदा क्व गन्तुं पारयेयं वक्तव्यं सर्वमनुक्त्वा । बलान्निस्सारणशीलो हि भवान् प्रयत्नसुच्छादि-तस्याप्यर्थस्योपायेन । किन्तु प्रतिज्ञान्यथाकरण-जनिता लज्जा भीतिश्चोदेति किञ्चिदिव प्रथमतः ।

वंशीधरः—मित्र ! सेदानीमपगता भवेत् । कथय विस्रब्धं का वा प्रतिज्ञान्यथा कृतेति ।

शशिकान्तः—जानात्येव भवान्, यदाहं गृहान्नि-र्गतः, तदा मत्पितृचरणैराज्ञप्तम्-वाराणसीं प्राप्य सर्वे-षामादौ कुलविद्या पूर्वमीमांसैवाध्येयेति । मयापि तथैव प्रतिज्ञातमिति ।

वंशीधरः—सखे ! न केवलं जानामि । अद्यापि तथैव विश्वसन्नप्यस्मि । किं तदन्यथा संवृत्तम् ?

शशिकान्तः— तदेव कथयितुं लज्जेऽहम् ।

वंशीधरः—वयस्य तिष्ठतु तावत् स्वप्रतिज्ञोल्लङ्घन-मेकत्र कोणे । कथं तत्तादृशानां पितृचरणानामप्या-ज्ञातिलङ्घने धार्ष्ट्यमासादितं भवता ?

शशिकान्तः—शृणु त्वमवहितो विस्तरात् ब्रवीमि ।

वंशीधरः—अनुमिनोम्यहं यद्वदिष्यति भवान् । तथापि शुश्रूषे भवन्मुखादेव । अतो वद सर्वं तथ्यतो यद्वृत्तम् ।

शशिकान्तः—वयस्य ! प्रस्थाय गृहात् तस्मिन् दिने, आगत्येमां पुण्यपुरीं, प्रातरेव प्राप्तनगरोऽपि अपरिचितपूर्वतया प्रथमतोऽनुपलब्धस्थान इतस्ततः पर्यटन्नासायम्, अन्ततोऽस्मद्देशीयेन केनचित् दैवात्

सङ्गतः, तेनैव प्रदर्शितं स्थानमेकं प्राप्य तत्र स्थित एव क्वचिदपवरके हस्तस्थितं वस्तुजातं निक्षिप्य यावद् बहिर्निस्सरामि तावदग्राक्षं तत्र सङ्गतान् आत्मसदृशाननेकान् स्वहस्तधृतपुस्तकान् अस्मद्देशीयान् विद्यार्थिनः। तेऽपि मां दृष्ट्वैव स्वदेशीयं ममतापहृतचेतसो मन्निकटमागत्यापरिचितपूर्वमपि मां कुशलमपृच्छन्। ततः तदन्यतमेन केनचिदुपदर्शितां सरणिं प्राप्य भगवतीं भागीरथीं अतिप्रीतमना अवगाहिष्यतिपावनं तत्सलिलम्। स्नात्वा च, प्रातरारभ्यानशनतया बुभुक्षया पीडितः सङ्कोचेनैव सन्ध्यामनुष्ठाय तेनैव साकं मार्गदर्शकेन तावत्पर्यन्तं तत्र स्थितेन स्थानमागत्य, तद्दत्तेनाशनीयेन क्षुधं शमयित्वा, श्रान्तस्तस्मिन्नेवापवरके सुखमस्वाप्सम्। उत्थाय च प्रातःशयनीयात् बहिरागत्य यावत् पश्यामि तावत् सर्वेऽप्यध्येतारो गच्छन् स्वस्वगुरुगृहं प्रत्यध्येतुम्। एककोऽहमनभ्यस्तमार्गोऽपि कथंचिद् गङ्गां गत्वा तत्र निर्वर्त्य प्रातःकृत्यं, पुनः प्रतिनिवृत्य तावतापि निवृत्ताध्ययनव्यापारं गुरुगृहान्निर्गतं कमपि छात्रमनवलोकयन् विवृतद्वार स्वयचनापवरकं प्राविशम्।

वंशीधरः—किमप्रकृतं किमपि प्रस्तुत्य कालं निनीषसि? मन्ये भवानाम्रान् पृष्टः कोविदारानाचष्टे तथ्यं गोपयितुमेवेति।

शशिकान्तः—सखे! मैवं मन्यथाः। वृत्तं यथावदुपवर्णयितुकाम एवैतावद्दूरंगतोऽहं यदि तत्र तुभ्यं रोचते तर्हि संक्षिपामि।

वंशीधरः—अस्तु! यथाभिलाषं कथय।

शशिकान्तः—प्रविश्य तमपवरकं तत्रेतस्ततो विकीर्णेषु पुस्तकेषु हस्तेनैकमादाय विवृत्यावलोकनाय प्रवृत्तः तत्रापश्यं शीर्षके "परिभाषेन्दुशेखरे भूतिभूषिते" इति। तत् तथैव निक्षिप्य पुस्तकान्तरं गृह्णानः तत्रादर्शं "वृद्धो यूना" इति सूत्रमेकम्। तदपि पाणिनीयं सूत्रमवगच्छन् पुस्तकान्तरमक्षिविषयीकुर्वाणस्सर्वाण्यपि पुस्तकानि तदपवरकस्थानि व्याकरणसम्बद्धानीत्यवागच्छम्।

वंशीधरः—नेदमपि वचः प्रायशः प्रकृतपरामर्शि।

शशिकान्तः—किमेवं त्वरसे। नाहं मण्डूकः, यदुत्प्लुत्योत्प्लुत्य गच्छेयम्। किन्तु दूरं गतः शक्नोमि यथेतमेव प्रत्येतुम्। अतश्शनैरेव वक्तुं प्रभवामि। यदि तवाद्य त्वरितं गन्तव्यं, तर्हि गच्छ श्वो द्रक्ष्यावः।

वंशीधरः—किं साकाङ्क्षमेव मां प्रेषयितुमाभिलषसि? नैतत् समुचितम्। अतोऽद्यैव समापय।

शशिकान्तः—एवं तत्रत्यानि पुस्तकान्यवलोक्य, ततोऽपवरकान्तराणि गत्वा तत्राप्येवमेव पश्यन् मनस्येवमचिन्तयम्—अत्र मयोपलब्धेषु पुस्तकेषु शताधिकेषु, उपदशान् साहित्यग्रन्थान्, त्रिचतुरान् न्यायग्रन्थांश्च वर्जयित्वा सर्वे व्याकरणग्रन्था एव। किमत्र व्याकरणसाहित्यातिरिक्तानां शास्त्राणां पठनपाठनरीतिरेव न प्रचलति? यद्येवं कथं तर्हि मन्मनोरथतरुणा फलितेन भाव्यम्? इति। एवं चिन्तयत्येव मयि स्वाध्यायादुपरतास्सर्वेऽपि छात्रास्समागताः स्वं स्वमपवरकं पूर्वमेवोद्घाटितकवाटं प्रविश्य, पुस्तकानि स्वहस्तस्थितानि निक्षिप्य, बहिरागत्य, सर्वे सम्मिलिता मया सह संल्लपितुमारभन्त। तेषु केनचन पृष्टं-ब्रह्मन्! दर्शनादेवावगम्यते भवानत्र विद्यामधिगन्तुमागत

इति। व्याकरण-साहित्ययोः कतरदध्येष्यते भवतेति परं विशेषजिज्ञासास्माकमिति। मयोक्तम्-द्वयमिदं मुक्त्वा तृतीयं न पृच्छत्येव भवान्। किमिदमितस्तृतीयं शास्त्रमेव नास्तीति वो मतम्? इति। अपरेण केनचिदुक्तम्—अस्ति शास्त्रान्तरमपि न्यायाख्यम्। तस्य तु प्रचारोऽतिविरलः काश्यामत्र। शते विद्यार्थिनां पञ्चषा भवन्ति न वाऽन्यशास्त्राध्येतारः। बहवोऽधीयते व्याकरणमेव शास्त्रम्। केचन साहित्यम्। अत एव पृष्टमेवमस्माभिरिति। तावतैवाश्चर्याविष्टचेतसा मया निगदितम्—इतश्शास्त्रान्तरमेव मन्ये भवतां कर्णपथं नारूढम् इति। ततोऽन्येनोक्तम्—व्याकरणमधीयतेऽस्माभिः। साहित्याध्यायिनो दृष्टाश्छात्राः। श्रुताश्च न्यायशास्त्रपरिशीलिनोऽपि केचन। ततोऽन्यत् शास्त्रं नाम्नापि नाकर्णितमिति। श्रुत्वैतदतिखिन्नमनाः तानब्रवम्—अयि सखायः! सन्त्यन्यान्यपि शास्त्राणि मीमांसादीनि, येषामध्ययनेन महानुपकारश्शास्त्रान्तराध्ययने सम्पाद्यत इति श्रुतं वृद्धेभ्यः इति। "सन्तु वा मा वा, नास्माकं तैः प्रयोजनम्। अधीयतेऽस्माभिर्व्याकरणं प्रायशः, क्वचित् कदाचित् न्यायशास्त्रम्। तत्रैव रात्रिंदिवं परिश्रम्यते। परीक्षापि तत्रैव दीयते। परीक्षोत्तीर्णैश्च जीविकापि प्राप्यते पाठशालासु। इतः किमधिकं प्रयोजनमस्ति" इति तैस्साभिमानमुक्तोऽहं मनस्येवमचिन्तयम्-मया कृतप्रतिज्ञेनापि अद्ययावदनुल्लङ्घितपितृशासनेनापि देशकालावनुसर्तव्यावेव भवतः। यद्यहमत्र स्थितः व्याकरणं परित्यज्य शास्त्रान्तराध्ययने दर्शितादरो भवेयं, तर्हि न केवलमेभिः परित्यज्येय, परिहास्येवाप्यनिशमिति।

वंशीधरः—मन्ये परिहासभीतेनैव त्वया गुरोराज्ञापि परित्यक्तेति। अस्तु कथय किमनुष्ठितमत्र इति।

शशिकान्तः—एवं बहुविचिन्त्यान्ते निरचिनवं व्याकरण एवेतोऽप्यधिकं परिश्राम्येयमिति।

वंशीधरः-भवान् कृतभूरिपरिश्रम एव तच्छास्त्रे। पुनः किमत्र चिकीर्ष्यते त्वया?

शशिकान्तः—मया पूर्वमेव श्रुतमासीत् काश्यां नवीना परिपाटी पाठ्यते काचित् याऽन्यतः प्रायशो नोपलभ्यत इति। अतश्शास्त्रान्तरजिज्ञासां दूरीकृत्य तत्रैव परिश्रमः कर्तुमारब्धः क्रियते चाद्य यावत्।

वंशीधरः—अरे समधीतव्याकरणो यथोचितसमधिगततर्कशास्त्रमर्मा भवान् यदि मीमांसामपि स्वाधीनां करोति, तर्हि कियत् बुद्धेर्वैशद्यं भवेत्? कियती वा न्यायातिदेशशक्तिर्वर्धेत? कियान् पङ्क्तिलापने विभवो विराजेत इत्यादि? न किञ्चिदपि विचारितम्, अपि पृष्टाः तच्छास्त्रपरिश्रमिणः केऽपि सुधियः काशीस्थाः? सन्त्वन्ये पण्डितप्रवराः, अस्मद्देशीया एवास्माकं शिरोवाह्यशासनाः आचान्तमीमांसारहस्या अवश्यं प्रष्टव्या आसन्नस्मिन् विषये।
अपि सूचितास्तातपादाः विषयमिमम्?

शशिकान्तः—भीतेन मया न लिखितं तान् प्रति।

वंशीधरः—ते मन्येऽद्यावधि मीमांसायामेवाधीतिनं त्वामवगच्छन्ति। अरे! बह्वपराद्धं त्वया। प्रथमतः केवलं परिहासभीतेन गुरूणामाज्ञोल्लङ्घिता। स्वप्रतिज्ञापि दूरीकृता। महान्तो न पर्यालोचिताः।

अद्य यावत् विषयमिमं गुरुभ्योऽनिवेद्यैव स्थितम् । स्वकुलक्रमागता कीर्तिरवज्ञाता । स्वोदर्को न चिन्तितः ।

शशिकान्तः—सखे ! श्रुत्वा भवदुक्तमिदानीं बहु शोचामि, मया बहुलमनुचितमनुष्ठितमिति । बिभेमि च, तातपादाः श्रुत्वैतत् किं वदिष्यन्तीति । आकुलं मनो मदीयमिदानीम् । उपदिश किमतः कर्तव्यमिति ।

वंशीधरः—वयस्य ! माऽऽकुलीभव । यत्कृतं तदुचितमेव कृतम् । दृढा व्युत्पत्तिस्संजाता पाणिनीये तन्त्रे । संभृतसंभारस्य भवतः नातिचिरादेव हृदयमवगाहेरन् पूर्वतन्त्रीयाः पदार्थाः इति विश्वसिमि । अतोऽद्यप्रभृति यतस्व तदर्थम् । लभस्व ज्ञानमनुत्तमम् । उत्थापय कीर्तिमात्मकुलस्य । संतोषय जनकं भवदेकसूनुम् ।

शशिकान्तः—मित्रमणे ! अध्ययननिरतेन मया किं शास्त्रान्तरं कुत्राध्याप्यते इत्यपि नावगतम् । अतः कुत्र गन्तव्यम् ? किं कर्तव्यमित्यत्रापि भवतैवाज्ञापितमात्मानमिच्छामि ।

वंशीधरः—अद्यैव सायमवाप्य गुरूणामाज्ञां, दृष्ट्वा चास्मद्देशललामभूतान् कांश्चन पण्डितप्रवरान् विज्ञापय वृत्तं सर्वमपि । ते दृष्ट्वैव भवन्तं दर्शितप्रेमभराः कथयिष्यन्ति- कीदृशी प्राचीने काल अस्मद्देशे मीमांसाशास्त्रस्य समुन्नतिरासीत् ? कियन्तः तच्छास्त्रवेत्तारोऽस्माकं देशमलमकार्षुः ? कथं वह्नमंसत शास्त्रमिदमस्मद्देशीयाः ? इदानीं तु कीदृशी दुरवस्था ? किं तदध्ययनफलम् ? किं वा महत्वं शास्त्रान्तरेभ्यस्तस्य शास्त्रस्य ? कियानुपकारस्तेन शास्त्रान्तरस्य सम्पाद्यते ! के वा ऽध्यापयितार इदानीं तस्य शास्त्रस्य ? कुत्र वाऽध्येयम् ? इत्यादिकं सर्वमपि । एवं समधिगत-तदुपदेशो निवृत्तसर्वसंशयः काशीं प्राप्य तन्निदेशमशून्यं कुरु ।

शशिकान्तः—अप्यस्ति कश्चित् समीचीनः प्रबन्धः काश्यां तदध्ययनस्य ?

वंशीधरः—चित्रीयते मे चेतः श्रुत्वैवं भवतो वचः । का वा विद्या दुर्लभा काश्यामत्र विश्वासां विद्यानामालये ? गच्छ त्वरितम् । प्राप्नुहि मनोरथम् शिवास्ते सन्तु पन्थानः ॥


(उभौ निष्क्रान्तौ)

कालीदह-प्रासादः (उज्जयिनी)

(लेखकः—गोपीकृष्णशर्मा वैद्यः व्याकरणाचार्यः काव्यतीर्थश्च ।)

अस्ति भूमण्डलमण्डनायमाने परमाद्भुतसौन्दर्यशालिनि श्रीमति भरतखण्डेऽधिमालवं साम्राज्यसौभाग्यभाजनभूता अवन्तिका-उज्जयिनी-विशाला-इत्यादिव्यपदेशविषया परमपूता काचन नगरी । इदं किल परमप्राचीनं तीर्थस्थानम् । याऽधुना लोके "उज्जैन" इत्यभिधया प्रसिद्धा वर्तते ।


समुपलभ्यते वैदिके पौराणिके च काले अस्या वर्णनम् । किं बहुना भगवद्भक्तिरसामृत-निष्यन्दस्वरूपभूतं श्रीमद्भागवतं तथा श्रीमन्महर्षिवर्यश्रीकृष्णद्वैपायनप्रणीतप्रबन्धमालामध्यमणिभूतं महाभारतमपि नास्ति रहितमेतस्या वर्णनेन । मान्येभ्यः पाठकेभ्यो वयमद्य यस्य स्थानस्य परिचयं दातुं समुद्यताः । एतत्किलाऽत्रत्यमेव "कालेदह महल" इतिख्यातमलौकिकशोभाशालि पुरातनमैति-



'कालियादेह'-प्रासादः, उज्जयिनी

हासिकं स्थानम् । पुराऽत्र भगवतश्चराचरगुरोः सूर्यनारायणस्य मनोहरं मन्दिरं तथा बहवः सुदृढ-कृष्णपाषाणनिर्मिता घट्टा विशाला धर्मशालाश्चासन्। अद्यापि केषाञ्चन घट्टानां चिन्हानि दरीदृश्यन्ते । धर्मशालानान्तु किमपि स्मारकं लक्ष्म कालमहिम्ना न भवति लोकलोचनगोचरम् । तत्सर्वं स्कन्द-महापुराणान्तर्गतावन्तिखण्डनिष्कर्षभूतेऽवन्तिमाहात्म्यनामनि ग्रन्थे सुविस्तरेण निरूपितम् । किं च चतुश्शताब्द्याः प्राक्तनमिदं वृत्तं श्रूयते। यत्किल खिलजीत्युपाह्वो मांडोनगराधिपतिः नसीरुद्दीन-

नामा मोहम्मदीयो मूलस्थानं भङ्क्त्वा "कालेदह-महल" नामकं स्वावासभवनं निरमापयत् । तद-नन्तरं परमप्रसिद्धयशसः सम्राजः श्रीमदकबरस्य शासनकाले यदा जहांगीरनामा मालवमण्डल-शासकः सम्राजा विहितः । तदानीन्तेन कुण्डानि तेषामभितो दृश्यमानाः शालाश्च कारिताः । यदा दक्षिणदेशं विदर्भदेशं च विजेतुं जिगमिषुः सम्राड-कबरमहोदय उज्जयिनीमाययौ । तदा स उज्जयिनी-मिदं स्थानं च विलोक्याऽसीमानन्दं लेभे । निनाय चातिप्रीत्या कानि चिदिहाऽहानि । तन्निवासकाले



प्रासादस्यैकं दृश्यम् ।

चैतस्य भवनस्य सौन्दर्यमतितरां वृद्धिं भेजे । एतदखिलं वृत्तं "तवारीख़ फ़रिश्ता" नाम्नि मोह-मदीयशासनकालिकैतिहासग्रन्थे सुविस्तरेण निरूपित-मिति तत एवावगन्तव्यं प्रेक्षावद्भिः । पिण्डारीणां शासनकाले पुनरिदं नष्टभ्रष्टमभूत् । ततः १००७ संख्यके मोहम्मदसंवत्सरे कुण्डानि शालाश्च जीर्णो-द्धारेण पुनर्नव्यतां प्रापिताः । तत्पश्चात् ग्वालियर-राज्यान्तर्गतमालवप्रान्ताधिकारी (सरसूबा) सर माइकेल फ़िलोज महोदयः अस्य पुनर्जीर्णोद्धारं विधाय परमप्रीत्याऽत्रैव निवासं विदधे । ततः१९२०

परिमितेशवीयवर्षे ग्वालियरनरेशः स्वर्गीयश्रीमाधवरावसेंधियामहोदयः यदा इदं स्थानं दृष्टिदानेनानुजग्राह । तदात्वस्य भवनस्य परमोन्नत एव कालः समाययौ । स्थलमिदं महाराजेन स्वनिवासार्थमेव बहु मन्यतेस्म । ततः किमु वक्तव्यम् ।

अल्पीयसैवानेहसा प्राचीनराजनिवासभवने न्यायालयः सञ्जातः । तत्रत्यं राजभोग्यपर्यङ्कादिकं सकलं वस्तुजातं कालेदहभवने आनीतं कर्मचारिभिः । इयदेव न, किन्तु लक्षावधिद्रव्यव्ययेन सर्वत्र सौन्दर्योत्कृष्टतापि परां काष्ठां नीयते स्म । शनैः शनैरत्र पण्यवीथिका अप्यभूवन् । महान्त आरामा अपि विरेजिरे । प्रमदभवनं प्रमदवनमित्यादीनि बहूनि नव्यानि स्थलानि निर्मितानि । अग्रेऽपि निर्माणकार्यं प्रचलत्येव । निवसन्त्यत्र सततं द्वित्रिशतं मनुष्याः । स्वर्गीयाः श्रीमहाराजा अपि बहुवारमत्रावासं विदधिरे । अस्य भवनस्येदमेव वैशिष्ट्यम् । यद्यापि नावश्यकतैतज्जीर्णोद्धारस्य । केवलं बहिर्दृश्यनिर्माणार्थमेव व्ययः सञ्जायते । स्नानागारं भोजनागारं शयनागारं विश्रामागारं प्राघुणिकागारं सर्वमेतद्यथापूर्वमेव वर्तते । अस्तु । एष प्रासाद औन्नत्येऽपि पर्याप्तः । अधस्तादस्य पातालगृहं वर्तते । अत्र किल पाको निष्पाद्यतेस्म । अस्मिंस्थले पर्याप्तः प्रकाशः । राजभवनादेतस्मादधस्तादुद्यानभूमौ सलिलपूर्णानि द्विपञ्चाशत्कुण्डानि सन्ति । एतेषां सलिलमेकस्मादपरस्मिन्नपरस्मादन्यस्मिन् तस्माद्परोतरस्मिन्निति प्रवहति नैरन्तर्येण । चातुर्यमेतदेव शिल्पिनामेतन्निर्माणजन्यकीर्तिशालिनाम् यत्किलैतेषु सलिलस्य कुतः प्रवेशः कुतश्च निर्गम इति ज्ञातुं न शक्यते । एवमेवैकं चक्रगृहं वर्तते । यत्र जलं कदाचिद्दक्षिणतः कदाचिद्वामतो बम्भ्रम्यमाणं प्रविशति निर्गच्छति च । अत्र सलिलस्य प्रवेशो निर्गमश्चैतावान् रमणीयः । यं निर्निमेषं पश्यतो जनस्य न तृप्यति पूर्णेन वासरेणापि चक्षुः । कुण्डान्यभितो दरीदृश्यमानाः शाला दृढतरकृष्णपाषाणाच्छादिताः सन्ति । तासामुपरि राजमार्गाः विद्यन्ते । अन्तश्शालं दशसहस्रमनुष्याः कार्याणि कुर्वाणा न कथमपि विदिता भवेयुः । महिलामन्दिरस्यैकं वैचित्र्यमतीव श्राव्यम् । यदस्य तलगृहे गुप्ततया गन्तुं निर्मितो यो राजमार्गस्तेन मृत्तर (मोटर) संज्ञकयन्त्रशकटेनापि गमागमौ कर्तुं शक्येते राजगृहिणीभिः । अधुनात्वत्र भवने विद्युद्दीपका अपि संलग्नाः । टेलीफोन-संज्ञकं वार्ताहरं यन्त्रमपि वर्तते । जलस्य प्रवन्धोऽपि समीचीनः । निकटवर्तिन्येवागाधसलिला महानदी सिप्रा । जलयन्त्रमपि वर्तते । सायमत्रस्नानपानभोजनविहारादिसुखमनुभवन्ति सुहृद्भिः समेता नागरिकाः ।

अस्य स्थानस्य सार्धक्रोशत्रयं नगराद्दूरतया यानमन्तरा गमनं नातिसुकरम् । इदं स्थलमेतावन्मनोहरमुज्ज्वलमलौकिकसौन्दर्यशालि स्वर्गीयं दृश्यं वर्णनातीतगुणम् । कुण्डानां निकटे गत्वा जलविहारं कर्तुं कस्य नाम नोत्सहते मानसम् । सायंकालिकशीतलो मन्दमन्दः सुरभिः समीरणस्तु "शिमिला"ऽख्यं शीतलं स्थानमपि न्यक्करोति । भारतभूमिसौन्दर्यविलोकनकौतुकोल्लसन्मानसैरुज्जयिनीमागतैर्यात्राकृद्भिरिदं परमरमणीयं स्थलमवश्यं प्रेक्षणीयम् । भवनाधिकारिणः (पैलेस आफ़िसर) संज्ञकादमनुमतिर्ग्राह्या । दर्शनादेव लेखस्य सत्यता सुदृढा स्यात् ।

अभ्यर्थना ।

माधवज्येष्ठमासयोर्वैदिकाङ्के प्रभूततमार्य्यपादानां वेदप्रौढिवादे सप्रमाणा हृदयाह्लादकाः पूर्वजयशोस्तम्भभूता लेखा नयनायनमागता आनन्दोत्तरमानन्दमलभतासकौ वेदादिविज्ञानह्रासोत्थशोकाग्निदग्धोऽप्याशाङ्कुरोऽतिपल्लवितोऽभूदयमेव हर्षावसरः ।

पूज्याः ! यथा यौष्माकोऽतुलप्रयासो लेखने, भाषणे, न्यायव्याकरणादिप्रवलग्रन्थाभ्यसने च; एवं वेदगतामूल्यज्ञानविज्ञानान्वेषणेऽपि वोभूयात्, अहो सुवर्णे सुगन्धिरिति लौकिकाभाणकोऽपि साफल्यभाग्भवेत् । विज्ञानवादे पण्डितंमन्यमानानां पाश्चात्यानामखर्वगर्वोऽपि गतमदेभ इव हतंप्रभो भवेद्द्रागिति चेतो नः कथयति, भारतजनन्यपि निजप्रियसुतकौशलं दर्शं दर्शं पूर्ववद् गुरुगौरवं निधास्यते, द्वात्रिंशत्कोटिपरिमिता भारतीया अपि सानन्दं क्लेशरहिताः सहिताश्च भविष्यन्ति न चात्राणुरपि, शङ्कालेशः ।

अपि च, मान्याः ! यथा न्यायव्याकरणसाहित्यकाव्यकोषादिग्रन्थेषु दत्तावधानाः सन्त्यन्तेवासिन उत पण्डिता वा, तथा न च वेदकर्मकाण्डश्रुतिस्मृत्यादिशास्त्रेषु मतिमतां मतिरत एव नो ह्रासः । यद्यपि नियमावल्यादावपि परीक्षासु सन्ति वेदादिविषयकग्रन्थाः; परन्तु हन्त ! ते भित्तिगतचित्रमाला इव केवलदर्शनफलाः, न च कार्यपरा भवन्ति ।. इतः परं किं दुःखम् ।

ब्राह्मणैः कारणमन्तरा वेदोऽध्येयः ज्ञेयश्चेति-श्रुत्या साम्प्रतं न च केऽपि विद्योपार्जने यतन्ते । हा हन्त ! किन्तु चत्वारिंशद्रूप्यकेभ्य आरभ्य शतपरिमितवेतनेऽध्यापको लेखको व्याख्यानदाता वा भविष्यामि इति बुद्ध्या सर्वे पठन्ति । हा धिक् ! प्रवलवित्तैषणयैव नः पतनम् ।

पुस्तकग्रहणात् प्रागेव भृत्यभूता नृत्यति मनःप्रवृत्तिरिति । सेवाश्ववृत्तिराख्यातेति जानन्तोऽपि तामेव सेवामहे । ये खलु ब्राह्मणा जगद्वन्दनीया आसन् त एव धनिकगृहेष्वद्य पात्रादिमार्जनक्रियां विदधति—

"विप्रोवृक्षस्तस्यमूलञ्च संध्येति वचः श्रुतिविवरं स्थापयन्तोऽपि नोपासते संध्याम् एककालिकीमपि; किमुत त्रैकालिकीम् !

अतो व्याकरणादिवद् वेदादिधर्मग्रन्थेषु परीक्षानियमो धर्मबुध्या वा तदाचारणनियमो नो भविष्यति सर्वत्र विद्यालयेषु तावत् केवलं जल्पवादो वर्धेत, नच कार्य्यवादः । अतो मिलित्वा नियमोऽवश्यमेव कार्य्यो महानुभावैः । वित्तैषणां पुत्रैषणां लोकैषणां परित्यज्य केचिद् वीरवर-परशुरामवत् अन्येच चराचरज्ञनारदमुनिवत्, केऽप्याहोस्वित् वशिष्ठप्रभृतिमहर्षिवत् इतरेच दत्तात्रेयादिवत्— त्यागवृत्तिमादाय दिशि दिशि प्रतिपत्तनम् प्रति ग्रामं वा वेदप्रचाराय विचरन्तु, पूज्यास्तदैव पुनरुद्धारो मातृभूमेः । तद्गतकलाकौशलादि निर्माणाविष्कारेऽपि प्रज्ञां दर्शयन्तु तदैव जनुःसाफल्यम् । पाश्चात्यैर्विज्ञानान्वेषणे सादरं प्राणाहुतयो दत्ताः भारतीयैः साम्प्रतिकैः कैरपि न तथा कृतम् ।

मनोडा-ग्राम निवासी,
श्रीमाधवानन्दपर्वतीयः—

वृजीनां गणराज्यम् ।

ले०—श्रीरामोदारः साङ्कृत्यायनः

[प्रोफेसर—विद्यासागर कालेज, सीलोन]

येन केनाऽपि कारणेन भवतु, आर्याणां पुरातनेतिवृत्तस्य सामग्र्येव कृच्छ्रेण स्तोकमेव लभ्या । तस्याः संचये च भारतीयविदुषां विशेषतः संस्कृतपण्डितानां सर्वथोपेक्षा दृश्यते—इदमतीव खेदकरम् । अन्येषु जनपदेषु (द्वीपेषु) पुराणभाषापण्डिता एव पुरातन्याः सभ्यताया इतिहासस्य च संरक्षका अभवन् । अत्र ततः सर्वथा विप्रतीपम् । संस्कृतपण्डितास्तेषु विषयेषूपेक्षमाणाः, अन्ये नव्यशिक्षिताः पाश्चात्यसरणिशरणाः तत्र प्रयतमानाः सन्ति । केषांचिदधुनाऽपि भ्रमः, यद्भारतीयाः सर्वदा तन्त्रैकवर्तिनो लोक (प्रजा)—तंत्रशासनापरिचिताः । तेषां प्रकृतिविरुद्धं लोकतंत्रशासनम् । तत्र कियत्तथ्यमिति पालिग्रन्थेभ्यः संगृह्य समूलं वृजीनां गण (लोक) राज्यविषये लिखामः । समये यथावकाशं मद्र-शाक्यादिगणराज्येऽपि वक्तास्मः । तत्रेदमवधेयम्, यस्मिन् काले यवन (Greece) गणराज्यस्य तारुण्यं तस्मिन्नेवात्रैषां जराजीर्णकलेवरपातः । उदाहरणतः-४२३ विक्रमपूर्वाब्दे (480 B.C.) वृजीनां पतनम् ।

पाणिनीयानां नास्ति अदृष्टचरं 'मद्रवृज्योः कन्'* मद्रेभ्यो वृजिभ्यश्च जनपदाभ्यामत्र शैषिकः कन् प्रत्ययो विधीयते, तेन मद्रका वृजिका इति प्रयोगाः सिध्यन्ति । ततः पूर्वं 'धूमादिभ्यश्चे'ति सूत्रे, तस्मिन्नेवार्थे वुन् प्रत्ययं विधाय धौमकाः वैदेहकाः साध्यन्ते, तत्रापि धूमादिगणे वर्ज्यशब्दः पठ्यते द्वावपि वृजिवर्ज्यशब्दावयैव जनपदस्य वाचकौ । पालिपुरातनमागधिभाषायां वज्जीति प्रयोगस्तस्य इत्थं पाणिनिकाले वृजिजनपदस्य प्रसिद्धिरुपलभ्यते गन्धाराभिजनेन महर्षिणा बहुदूरवर्तिनोऽस्य स्मरणं द्योतयति वृजीनां सुख्यातिम् । पाणिनिकालस्तु भगवतो बुद्धस्य परिनिर्वाणाद्बहुशतकपूर्वमेव स्यात्, यदाप्राच्यकाशि-कोसलाङ्ग-मगध-विदेहानारभ्य शरावतिप्रत्यग्वर्तिभ्य आमद्र-सिन्धु-कम्बोज-गन्धारवाहीकेभ्यः संस्कृतभाषा लोकभाषाऽभूत् । पाणिनिसूत्रमर्मज्ञानामेतत्प्रतिपादनं सिद्धसाधनमेव । वृजीनां गणो बहु पुरातन इति तत्रोद्धरिष्यमाणैर्वचनैः प्रकटीभविष्यति । कदा वृजीनां गणः समस्थाप्यतेत्यतीतघनतमसि विलीनतया दुःशकं वक्तुम् । तत्र बुद्धनिर्वाणात् ४२६ विक्रम (483 B.C.) पूर्वाब्दात् पूर्वं पञ्चशतवत्सराः सप्तशतवत्सरा अपि भवितुमर्हन्ति । विक्रमपञ्चशताब्द्यारम्भभवेनाऽऽचार्यबुद्धघोषेण स्वीयाबुद्धवचनसंग्रहरूपायाः पिटकत्रय्याः भाष्यभूतायां स्वीयायामर्थ (अट्ठ) कथायां वृजीनामुत्पत्तिविषये काचित् कथाऽलेखि, तत्र सर्वपुरातनेतिहासकथासुलभा लोकोत्तरा अपि घटना अवर्णिषत, ता

*पाणिनि ४-२-१३१ ।

तत्वार्थाधिजिगांसुभिर्नीर-क्षीर-न्यायेन विश्लेष-
यितुं न दुष्कराः ।

"वाराणसिराजस्य किल महिषी बन्धुजीवक-
पुष्पसदृशीं मांसपेशीं प्रासूयत । ततोऽन्या देव्यः
सुवर्णबिम्बसदृशान्पुत्रान्प्रसूयन्तेऽग्रमहिषी मांसपे-
शिमितिचिन्तयित्वा तां मांसपेशिमेकस्मिन् भाजने
प्रक्षिप्यान्येन पिधाय राजमुद्रिकया लाञ्छ-
यित्वा गङ्गायाः स्रोतसि प्राचिक्षिपत् । ततस्त-
द्भाजनं गङ्गायाः स्रोतसि प्रायात्, तस्मिंश्च समये-
ऽन्यतरस्तापसो गोपालकुलमाश्रित्य गङ्गातीरे
न्यवसत्तस्मि स प्रातरेव गङ्गामवतीर्णस्तद्भाजनमा-
गच्छन्तं दृष्ट्वा कर्पट इति विज्ञायाग्रहीत्, ततस्ताम-
क्षरपदिकां राजमुद्रिकां च दृष्ट्वा वस्त्रस्य तां मांसपेशी-
मद्राक्षीत् । तथा हि तस्य दुर्गन्धपूतिभावो
नास्तीत्याश्रमे नीत्वा शुद्धऽवकाशेऽस्थापयत् ।
अथ ततः सुवर्णबिम्बसदृशौ दारिका दारकश्च
संजातौ । तयोस्तापसस्य पुत्रस्नेह उदपादि ।
ततः प्रभृति सदा क्षीरभक्तं लभते, स भक्तं भुक्त्वा,
क्षीरं दारकयोर्मुखे सिञ्चति । तयोर्यद् यद् उदरं
प्रविशति, तन्मणिभाजनगतमिव सन्दृश्यते, एवं
'निच्छवी' तावभूताम् । अपरे पुनराहुः—स्यूत्वा
स्थापिताविव तयोरन्योऽन्यं लीना छविरभवत् ।
एवं निच्छविरत्वाद्वा लीनच्छवित्वाद्वा लिच्छवीति
प्रसिद्धाः । अथ तं तापसं गोपालका आहुः—भदन्त,
अस्मभ्यं दारकौ देहि, वयं पोष्यामः; प्रव्रजितानां
दारकपोषणं न अनुरूपम् । तापसः-महापुण्यौ
दारकौ अप्रमत्ततया वर्द्धयध्वम्, वर्द्धयित्वा चान्यो-
ऽन्यं विवाहसम्बन्धं कारयत । पञ्चगोरसैः राजानं
सन्तर्प्य भूमिभागं गृहीत्वा नगरं निर्मापयत, तत्र
कुमारमभिषिञ्चतेत्युक्त्वा दारकौ प्रादात् । ते दारकौ
नीत्वाऽपुष्यन्, वर्द्धमानौ दारकौ क्रीडन्तौ
अन्यान्दारकान् विजघ्नतुः, तेऽरोदिषुः, कथं रुदथेति
पृष्टा इमौ निर्मातृकौ निष्पितृकावस्मानतीव प्रहर-
तइत्यवदन् । ततस्तेषां पितरः—इमावन्यान् दार-
कान् विहिंस्तः पीडयतः, नेमौ संग्रहीतव्यौ, वर्जयि-
तव्यौ वर्जयितव्याविमावित्याहुः । ततः स प्रदेशः
'वज्जी' (वर्ज्यो वृजव्यो वा) इति योजन-
त्रिशतपरिमाणः उच्यते । अथ तं प्रदेशं गोपालका
राजानं सन्तोष्याग्रहीषुः, तत्र च नगरं कृत्वा षोड-
शवर्षदेशिकं कुमारमभिषिच्य राजानं चक्रुः ।
तयैव दारिकया तं परिणय्य नियमं विदधुः, न
बहिर्दारिकाऽऽनेया, न चेतो दातव्येति । तयोः
प्रथमसंवासेन द्वौ दारकौ जातौ, दुहिता च पुत्रश्च;
एवं षोडशकृत्वो यमला दारका जाताः । ततस्तेषां
दारकाणां वर्द्धमानानामारामोद्याननिवासस्थानार्थं
नगरे त्रिः कृत्वः गव्यूत्यन्तरेण प्राकारं प्राचिक्षिपन् ।
तस्य पुनः पुनः विशालीकरणात वैशालीत्येव
नाम जातम् ।"

इत्थं वृजिशब्दः कथं जातः कथं च तस्यैवापर-
लिच्छविरिति विज्ञानम् । साम्प्रतं वृजिजनपद-
सीमादिविषये किमप्युच्यते । अत्र आगामिष्यता
प्रबन्धेन दक्षिणस्यां गङ्गा वृजि-मगधजनपदयोः
सीमेति निश्चितम् । पश्चिमस्यां मही (गण्डक्याः-
पुराणप्रवाह इदानीमपि 'मही' एव प्रसिद्धः) सीमे-
ति प्रतिभाति । पूर्वस्यामेषां विदेहानां च सीमा,—
वल्गुमुदा (इदानीं 'वाग्मती') नद्युत्तरतः,

वर्त्तमान 'ढांग' ग्राम (मुजफ्फरपुरमंडले) समीपे वल्गुमुदां विहाय किञ्चित्पूर्वेण आधुनिक लखनदेयिशाखया सह (भाषादृष्ट्या ततोऽपि पूर्वं) लखनदेयिनद्या मार्गेण पुनर्वल्गुमुदानदी, यावद्बूढीगण्डकसम्भेदं, ततो दक्षिणाभिमुखमाधुनिक-नरहनदुलारपुराग्रामाभ्यां यावद्गङ्गाम् । उत्तरस्यां यावद्धिमवतः । चित्रदर्शनेनेदं स्पष्टम् । उद्धृतकथायां योजनत्रिशतं वृजीजनपदस्य परिमाणम् । वर्तमानसीमामापनेन १६२ क्रोश * (४०½ योजन) तोऽधिकं न भवति । अत्र वर्तमानासु नदीषु महीगङ्गा-वल्गुमुदाः पिटकत्रय्यामुपलभ्यन्ते, हिमवतः प्रभवन्तीनां मध्यदेशवर्तमानानां यमुना-गङ्गा-सरय्वचिरावति-महीनां महानदीनामन्यतमैषा मही । वल्गुमुदाविषये सूत्रपिटकान्तर्गतखुद्दकनिकायस्थोदानग्रन्थे ते भिक्षव श्रावस्थीत (बलरामपुरतो) नातिदूरं र्त्तमानं 'सहेटमहेट'नामक[1] स्थानो, यत्र पुरा कोसलानां राजधानी आसीत्, विचरन्तो यत्र वृजयस्तत्रोपागमन्, उपगम्य च वल्गुमुदानद्यास्तीरे पर्णकुटीराणि कारयित्वावर्षामूषुः ।

वृजीनां राजधानी वैशाली । (विहारप्रदेशे मुजफ्फरपुरमण्डल इदानीं 'वनिया वसाढ' ग्रामः) तद्विषयेऽग्रे सविस्तरं लिखिष्यते—इतीदानीं तेषां केचन ग्रामा लिख्यन्ते । राजगृहतो गङ्गा पञ्चयोजनदूरं, ततो योजनमतिक्रम्य पारेगङ्गं वृजीनां विषयः । राजगृहतो वैशालीं, ततः मल्लेषु कुशीनगरं प्रति गमनावसरे मार्गे वर्तमाना केचन ग्रामा वर्णिताः। तत्र गङ्गातो वैशालीगमने पूर्वं 'कोटिग्रामः' अयं वैशाली-नगर समीप एव आसीत, नादिका कोटिग्रामतोऽग्रे, सहोदरयोः पुत्रा एकस्य तडागस्य पार्श्वयोः वसतिं चक्रुः, तस्यैव ग्रामयुग्मस्य नाम *नादिकेति।४२६ विक्रमाब्दे ग्रीष्मकाले नादिकांगतेन बुद्धेन सहानन्दस्य समालापाज्ज्ञायते, नादिकानासीत्साधारणो ग्रामः । तत्र 'गिंजकावसथ' नाम्ना कश्चिदावसथः (अतिथिशाला) आसीत् । अनेकवारं नादिकायां तस्मिन्नावसथे सपरिषत्को बुद्धो वासमकल्पयत् । आनन्दः कथयति ।

'साल्हो (आषाढ़ः?) नाम भिक्षुः नादिकायां कालं कृतवान्, तस्य कागतिः कोऽभिसम्परायः? नन्दा नाम भिक्षुणी ...? सुदत्तो नामोपासक ...? सुजाता नामोपासिका ...? ककुत्सः (ककुधो) ...? कालिङ्गः .... ? निकटः ...? तुष्टः ...? सन्तुष्टः ....? भद्रः ...? सुभद्रः ....?' ।

इतः पूर्वस्मिन्नपि वर्षे बुद्धोऽत्रागतः, वर्षमध्ये उपासकेष्वेवैतावतां पुरुषाणां मरणपि नादिकाग्रामो महाग्राम आसीदिति सूचयति ।

नादिकाकोटिग्रामौ द्वावपि वैशालीतो नातिदूरमास्ताम् । वैशालिवासिनी आढ्यगणिका अम्बापाली कोटिग्रामं गत्वा द्वितीय भोजनार्थ*निमंत्रयाञ्च कार । कोटिग्रामाच्च बुद्धो नादिकां गतः । अम्बापाली स्वोद्याने भोज्यानि सज्जीकृत्य भगवन्तं व्यज्ञापयत् । ततः तस्या उद्याने सपारिषत्को गत्वाऽभ्यवाहरत् । इत्थं कोटिग्रामो नादिका चा वैशालीनगरासन्नावेव भवितुमर्हतः ।

महापरिनिर्वाणसूत्रे वैशालीतः कुशीनगरगमने भण्डग्राममहस्तिग्रामा-(ऽम्र)-ग्राम-जम्बूग्राम-भोगन

* महापरिनिर्वाणसुत्त-अट्ठकथा । दीघनिकाये महापरिनिब्बाणसुत्तम् ।

* विनयपिटके महावग्गे ६ स्कन्धे ।

गर-पावेति षड्ग्रामा आगताः। तत्र पावा, मल्लानां गणराष्ट्रे कुशीनगरात् गव्यूतित्रयं (12 Mils) ककुत्थाऽपथतरकुनद्योरन्तरे या विद्यमाना आद्यत्विक पडरौना-'पपउर'योरेकतरः, विशेषेणोत्तर एवापावं भूत्वा कुशीनगरगमनात्, वैशालिसमीपे मही नोद तरदित्यपि स्पष्टम्। परिनिर्वाणात् (विक्रमपूर्व ४२६ वैशाख पूर्णिमातः) मासत्रयं पूर्वं (वि०-पू०-४२५ माघपूर्णिमा-द्वितीयदिने) वैशालीतः प्रस्थानम्। इत्थमियं यात्रा मासत्रयेण समाप्ता। इदानीं वैशालीतः 'केसरिया' ग्रामः सार्द्धपञ्चदशक्रोशं (31 Mils), ततः उत्तरोत्तरं 'अरेराज' सार्द्धनवक्रोशं (19Mils), लौरियानन्दनगढः, सप्तदशक्रोशं (34 Mils), पावा (पपउरः) षोडशक्रोशं (32 Mils), इत्थं चतुःषष्टि क्रोशं (128 Mils) यात्रा मासत्रयेण जातेति बुद्ध स्यान्यचारिकानुरूपमेव। अरेराज-लौरियानन्दन-गढयोरशोकशिलास्तम्भौ, केसरियायां च स्तूपः, सूचयन्ति तेषां स्थानानां विशेषताम्। सा च विशेषताऽन्तिमयात्रारूपेण भवितुमर्हति। भण्डग्रामादीनां पञ्चानां कतमः इति स्पष्टतया वक्तुं दुष्कर-स्तथाऽपि नगराभिधेयत्वेन पावाद्वितीयत्वेन प्रचुरवसतिवंशावशेषपरिवृतो 'लैरियानन्दनगढ' एव भोगनगरम्।

वैशाली लिच्छव्यपरनाम्नी वृजीनां राजधानीयं वाल्मीकीय-रामायणे विश्वामित्राश्रमात् मिथिला-गमनसमये, मिथिलातः पूर्वं विशालेति नाम्ना वर्ण्यते, सैंहलभाषायामपि 'विशाला' प्रोच्यते। अस्याः स्थापनावृत्तमागतपूर्वम्। पुनः पुनर्विशालीकरणाद्वैशालीति प्रसिद्धिरपि तत्र सूचिता। तदा-तनतननगरानुरूपेणेयमपि प्राकारवेष्टिता, पूर्वादि-प्रधानचतुर्द्वारविशिष्टाऽसीत्। तत्र सप्तम्युत्तर सप्तशताधिक-सप्तसहस्राणां (७७७७) राजपदलाञ्छित-गणसभासदानां सोद्यानवापिकानि वेश्मानि, अनेकानि चैत्यानि (देवालयाः), मध्ये नगरं संस्थागारं (Cauncil Hause), भिक्षुविहाराः, विपणयः, (यत्र काशिकवस्त्राणां वहुसमादरः) रथ्याः, राज्ञामभिषेकपुष्करिणी। अत्रैव विद्यालये प्रधानाचार्य, काशिकोसलराजस्य श्रावस्तिपतेः प्रसेनजितः सतीर्थ्यः, तक्षशिलास्नातकः महालिरन्धीभूतः पञ्चशतलिच्छविकुमारानपाठयत ‡ "तस्मिन् खलु समये वैशाली सुभिक्षा भवति, सुसस्या, सुलभपिण्डा, *'रमणीया आनन्द वैशाली, रमणीयं उदयनचैत्यम्, रमणीयं गोतमकचैत्यम्, रमणीयं सप्ताम्रचैत्यम्, रमणीयं वहुपुत्रचैत्यम्, रमणीयं सारन्ददचैत्यम् रमणीयं चापालचैत्यम्।

एषां चैत्यानां स्थानसन्निवेशोऽन्यत्र :—

† पूर्वस्यां वैशाल्यां उदयनं नाम चैत्यम्, दक्षिणस्यां गोतमकं चैत्यम्, पश्चिमस्यां सप्ताम्रं उत्तरस्यां वहुपुत्रम्। चैत्यानि देवस्थानानि। परं तेषु देव प्रतिमा न श्रूयन्ते, देवप्रतिमावर्णनं वस्तुतः त्रिपिटके क्वापि नोपलभ्यते, तच्च तदास्वे प्रतिमा-विरहित-देव-पूजामेव द्रढयति। प्रायेण वैशाल्यां बुद्धो महावने कूटागारशालायां निवसति। इदं महावनं नगराद्बहिः स्वयं जातवनमासीत्। अन्तिमयात्रायामम्बपाल्या प्रधानगणिकया नगरे वर्तमानं स्वीयं अम्बपालिवनं *"इयमहं भदन्त, आरामं बुद्धप्रमुखाय भिक्षुसंघाय

‡ महावग्ग. ६। * उदाम ६-१. महापरिनिर्वाणसूत्रम्।
† दीघनिकाय १४-१-११। * महापरिनिर्वाणसूत्रम्।

ददामीत्यदायि।" ‡ नगरात् पश्चिमस्यां गव्यूतिमात्रदूरं कोऽपि वनखण्ड आसीत्। अत्रापि बुद्धस्य कादाचित्को वासः 'तिन्दुस्थाणु' नामकोऽन्योऽप्येकः परिव्राजकारामोऽभूत्।

'उपनगरं वेणुग्रामे †बुद्धस्यान्तिमो वर्षावासः (वि० पू० ४२५ वत्सरे आषाढ पूर्णिमात आश्विनपूर्णिमां यावत्)। प्रायेण परिव्राजकारामाश्चैत्यानि च तस्मिन् काले नगराद्बहिरेव भवन्तिस्म। नगराभ्यन्तरे गणराजकुलानामभिषेकमङ्गलपुष्करिण्यासीत् यत्र गणसभ्यत्वप्राप्तिपदाभिषेको भवति। अट्ठकथायामस्ति:—मल्लकुमारो बन्धुलः प्रसेनजितः सहाध्यायी तक्षशिलास्नातकः, स्वगणे प्रतिष्ठामलभमानः कोसलेश्वरेण सत्क्रियमाणः सेनापतिपदे प्रतिष्ठापितः। तस्य भार्या मल्लिका 'गर्भं लब्ध्वोत्पन्नदोहदा 'दोहदो म उत्पन्न' इत्यवोचत्। को दोहद इति वैशालिनगरे गणराजकुलानामभिषेकमङ्गलपुष्करिण्यामवतीर्य स्नात्वा पानीयं पातुकामोऽस्मि स्वामिन्निति। बन्धुलः साध्वित्युक्त्वा रथमारुह्य श्रावस्थीतो निष्क्रम्य, रथं वाहयन् महालिलिच्छविपरिग्रहीतद्वारेणैव वैशालीं प्रविशत्। महालिलिच्छवेर्निवेशनं द्वारसमीप एवासीत्। सोऽद्य लिच्छवीनां भयमुत्पत्स्यत इत्याह। पुष्करिण्या अन्तर्बहिश्चारक्षा बलवती, उपरि लौहजालं, शकुनानामप्यवकाशो नास्ति। बन्धुलसेनापतिः पुना रथादवतीर्यारक्षकान् वेत्रेण प्रहरन्...,लौहजालं छित्वाऽन्तः पुष्करिणीं भार्यां स्नपयित्वा, स्वयं च स्नात्वा, नगरान्निष्क्रम्यागतमार्गेणैव प्रायात्। आरक्षका लिच्छवीन् व्यज्ञापयन्। लिच्छवयो राजानः क्रुद्धा पञ्चशतरथानारुह्य 'बन्धुलमल्लं ग्रहीष्याम' इति निष्क्रान्ताः। तां प्रवृत्तिं महालिः श्रुत्वा "मा गच्छत, स हि वः सर्वान् हनिष्यती" त्याह तेऽपि 'वयं गमिष्याम एवे' त्यवदन्। तेन हि चक्रस्य यावत् नाभितः प्रविष्टप्रविष्टस्थानं दृष्ट्वा निवर्तध्वं, ततोऽनिवर्तन्तः पुरतोऽशनिशब्दमिव श्रोष्यथ, तस्मात्स्थानात् निवर्तध्वम्, ततोऽनिवर्तन्तो भवन्त रथधुरेषु छिद्रं द्रक्ष्यथ, तस्मात्स्थानान्निवर्तध्वं पुरतो मा गमत'। ते तस्य वचनेन न निवृत्तास्तं अन्वबध्नन्नेव। मल्लिका दृष्ट्वा, रथाः प्रज्ञायन्त इत्याह, तेन हि एकस्यैव रथस्य प्रज्ञानकाले वदेरिति। स यदा सर्वं एकीभूय प्राज्ञायन्त तदा 'एकमेव रथशीर्षं प्रज्ञायत' इत्याह। बन्धुलस्तेन हीमा रश्मीर्गृहाणेति तस्यै रश्मीर्दत्वा रथे स्थितो धनुरारोपयत, रथचक्रं यावन्नाभिपृथ्वीं प्राविशत्। लिच्छवयस्तत्स्थानं दृष्ट्वाऽपि न न्यवर्तिषत। इतरः स्तोकं गत्वा ज्यामस्फोटयत्; अशनिशब्द इवाभवत्, ते ततोऽपि न न्यवर्तन्त। बन्धुलो रथे स्थित एव एकं शरमक्षिपत्। स पञ्चशतेषु रथशीर्षेषु छिद्रं कृत्वा पञ्चशतान् राज्ञः परिकरबन्धस्थाने विनिविध्य पृथिव्यां प्राविशत्। ते आत्मनो विद्धभावमज्ञात्वा तिष्ठ रे तिष्ठ रे, इत्यवदन्नेव। बन्धुलो रथं स्थापयित्वा; यूयं मृतकाः मृतकैस्सार्द्धं मम युद्धं न भवितुमर्हतीत्याह। मृतका नामास्मादृशा भवन्तीति। तेन हि सर्वे पूर्वस्य परिकरं मुञ्चतेति। तेऽमुञ्चन्, स तत्क्षणमेव मृत्वा न्यपतत्। अथ सर्वेऽपि यूयं एतादृशा आत्मनो गृहाणि गत्वा स्वविधेयं विधाय पुत्रदारान् अनुशास्य कवचानि मुञ्चत।"

अनेकासम्भवातिशयोक्तिपूर्णेऽस्मिन् वृत्ते कोसलसेनापतिना वृजीनां युद्धम्, तन्निमित्तम्, तदुपकरणानि च न तिरोहितानि प्रेक्षावताम्।

(क्रमशः)

‡ मज्झिमनिकाय मूलपण्णासक-सीहनादसुत्त अट्ठकथा।

* महापरिनिर्वाण सूत्रम्। † धम्मपद-अट्ठकथा ४-३।

वेदार्थ-प्रक्रिया ।

लेखकः—श्रीराधाप्रसाद शास्त्री, हिन्दू विश्वविद्यालय-धर्मशास्त्राचार्यः ।

अथ को नाम वेदः ? कश्चार्थः ? का प्रक्रिया ? वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षा अनेनेति व्युत्पत्या चतुर्वर्गज्ञानसाधनभूतो ग्रन्थविशेषः । तल्लक्षणश्च मन्त्रब्राह्मणयोर्वेदनामधेयमिति आगमोक्तं वेदितव्यम् । यो ह्यव्यभिचरितस्वरवर्णादि–पठनपाठनक्रमागतः सन्सर्वकालं सर्वदेशेषु प्रतिशाखमविभागेन वर्त्तमानः स एको मन्त्रराशिः । अपरस्तु विधिनिन्दा-प्रशंसा-सम्प्रश्नाख्यानादिभिस्तस्यैव प्रायो विनियोगप्रख्यापक उपव्याख्यानभूतो वाक्यनिचयो ब्राह्मणराशिः । अनयोरेकः संग्रहो वेद इत्यभिधीयते वेदनिबन्धेषु मन्त्रब्राह्मणभागौ परस्परमसम्मिश्रावेव प्रायः पठ्येते । क्वचित्तु ब्राह्मणसंमिश्रितोऽपि मन्त्रभागः पठितोऽस्ति । एवमुभयात्मकोऽपि विध्यर्थवादमन्त्ररूपेण त्रिधा व्यवस्थितोऽयं वेदराशिरेकमूल एकर्मलक्षणफलो महाकल्पवृक्षो वरीवर्ति । अस्य च पत्रभूतं कर्म विधिना विहितम्, अर्थवादेन प्ररोचितं, मन्त्रेण च स्मृतं सदभ्युदयकारकं भवति । ननु प्रतिशाखं यज्ञकर्माणि भिद्यन्ते तत्कथमेककर्मफलोऽयं वेदकल्पवृक्ष]इत्युच्यते । नैषदोषः । अवान्तराकृतिभेदेऽपि कर्मजातिव्यञ्जकप्रधानाकृतिभेदाभावात् । न ह्येकस्यां शाखायां विहितस्याग्निहोत्रादिकर्मणः स्थाने विजातीयस्य ग्रहयज्ञादेरपरस्यां शाखायां विधानमस्ति । तस्माच्च प्रतिशाखं कर्मभेद इति मन्तव्यम् । यदि प्रतिशाखं वदरामलकादिवज्जात्यैव कर्मभेदःस्यात् तदा एकमूलाभावादादित एवारभ्य भिद्यमानत्वाद् वृत्तान्तरवद् वेदान्तराण्येवोच्येरन्; न शाखान्तराणि, तस्मादेकमूलः समानफलोऽयं वेदकल्पशाखीत्याहुः । "सर्वार्थवेदको वेदश्चतुर्द्धा भिद्यते क्रमात् । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।" यद्यपि बहुषु श्रुतिस्मृत्यादिवाक्येषु वेदत्रयी संकीर्त्यते, न तु चतुर्थोऽथर्ववेदः, तथापि ब्रह्मवित् शब्देन चतुर्थस्याथर्वणवेदस्याऽपि मुण्डकोपनिषदि श्रवणात् ।

तद् यथा । "द्वे विद्ये दिव्ये इतिहस्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषमिति । अथापरा ययातदक्षरमधिगम्यते ।" इति स्मृतिपुराणादिष्वपि बहुशः संकीर्त्तनाच्च चतुर्द्धा इत्युक्तम् । तथा चरणव्यूहेऽपि "अथा-

तच्चरणव्यूहं व्याख्यास्यामस्तत्र निरुक्तम्-चातुर्विध्यम्, चत्वारो वेदा विज्ञाता भवन्ति, इतिस्थितम् । तथा व्याकरणमहाभाष्ये पतञ्जलिनाप्युक्तम् ।"महान् शब्दस्य प्रयोगविषयः सप्तद्वीपा वसुमती, चत्वारोऽङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्य्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बह्वृच्या नवधाऽथर्वणो वेद इति । एवं वेदस्य चातुर्विध्यं तृतीयाष्टकेऽष्टमाध्याये दशमवर्गे श्रूयमाणया ऋचाप्यभिधीयते, "चत्वारि शृङ्गात्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश" इति । अत्र निरूक्ते 'चत्वारि शृङ्गेति वेदा वा एते उक्ता, इति यास्केनोक्तम् । वेदभाष्ये सायनाचार्य्येणाऽपि तथैव भाषितमिति सविभागो वेद उक्तः । अर्थशब्दोऽभिधेयापरपर्य्यायो वस्तुपर्यायो वा "अर्थोऽभिधेय वस्तुप्रयोजननिवृत्तिषु" इत्याप्तोक्तेः । अर्थशब्दस्य वस्तुपरत्वे वेदानां येऽर्थाः सूक्ताध्यायर्षिमण्डलाष्टकतन्मानादयः तेषां प्रक्रिया प्रकरणम् । अथवा अभिधेयपरत्वे कर्मोपासनाज्ञानानि साध्यसिद्धरूपेण व्यवस्थितानि । यद्बोधकानि पूर्वोत्तरमीमांसाशास्त्राणि । किञ्च क्वचित्स्तुतिरेव नाशीर्वादः । आशीरेव न स्तुतिः । क्वचित् शपथाभिशापौ अथापि कस्यचिद् भावस्याचिख्यास । अथापि परिदेवना । अथापि निन्दाप्रशंसे । सर्गोपसंहारौ चेत्यादि एतेषामभिधेयार्थानाम् प्रक्रिया प्रकरणम् । यथार्थशब्दस्य प्रयोजनपरत्वे तेषां वेदानाम् अर्थाः—कर्मणा प्राप्तस्वर्गादिलोकभोगः, उपासनया वा क्रममुक्तिर्हिरण्यगर्भलोकमवाप्याप्रलयं तत्र स्थित्वा परब्रह्मणि लयः, प्रकृतिलयो वा कर्मोपासनासमुच्चयजः, कैवल्यमुक्तिश्च स्वस्वरूपावस्थानलक्षणा इत्यादि । एतेषां वेदार्थानां वेदप्रयोजनानाम् प्रक्रिया प्रकरणम् । एते वेदार्थप्रक्रियाशब्दार्थाः स्वमत्या वितर्किताः । अग्रे ते क्रमशो वर्णनपद्धतिमेत्य प्रकाशमेष्यन्ति ।

तद् यथा अर्थशब्दस्य वस्तुपरतायाम् वेदार्थप्रकरणम् । ऋग्वेदस्य तावन्मानं चरणव्यूहोक्तमिहोच्यते "ऋचां दशसहस्राणि ऋचां पञ्चशतानि च । ऋचामशीतिः पादश्च तत्पारायणमुच्यते" इति । अस्य च वेदस्य पञ्चशाखाः सन्ति । शाकलाः, वाष्कलाः, आश्वलायनाः शाङ्खायनाः माराद्काश्चेति ।" ऋचां समूहो ऋग्वेदमभ्यस्य प्रयत्नतः पठितः शाकलेनादौ चतुर्भिस्तदनन्तरम् । "शाङ्खाश्वलायनो चैव माण्डूको वाष्कलस्तथा । बह्वृचा ऋषयस्सर्वे पञ्चैते एकवेदिनः" । एवमैतरेयी कौषितकी, शैशिरी, पैङ्गीत्यादयोऽन्येपि ऋग्वेदस्य शाखाभेदाः क्वचिदुपलभ्यन्ते । तथा विष्णुपुराणेप्युक्तम् । "मुद्गलो गोकुलो वात्स्यः शैशिरः शिशिरस्तथा । पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्त्तकाः" इति । तथा व्याकरणमहाभाष्ये, एकविंशतिधा बह्वृचा च इति स्थितम् । एवञ्चाध्ययनसम्प्रदायप्रवर्त्तकानामेषां शाकलादीनामाचार्य्याणां प्रवचनभेदः शाखाभेद व्यवहारे कारणम् । ऋग्वेदस्य सप्तदशाधिकमेकसहस्रं सूक्तानि । षडधिके द्वे सहस्रे वर्गाः । चतुःषष्टिरध्यायाः । दशमण्डलानि अष्टौ अष्टकानि इत्येवं विभागः परिकल्पितः । तत्र सूक्तलक्षणं यथा वृहद्देवतायाम् "सम्पूर्णमृषिवाक्यन्तु सूक्तमित्यभिधीयते" इति सम्पूर्ण-निराकाङ्क्षं यदृषेर्वेदस्य वाक्यम्, तत्सूक्तमिति तदर्थः, वैदिकस्महावाक्यं सूक्तमिति यावत् । तच्च त्रिविधम् ।

ऋषिसूक्तम्, देवतासूक्तम्, छन्दःसूक्तमिति भेदात् । त्रयाणामेषां लक्षणानि बृहद्देवतायां यथा :— " ऋषिसूक्तानि यावन्ति सूक्तान्येकस्य सा कृतिः । स्तूयेतैकन्तु यावत्सु तत्सूक्तं दैवतं विदुः । समासच्छन्दसो मन्त्राश्छन्दःसूक्तं तदुच्यते " इति । तत्-ऋषिसूक्तं यथा, अग्निमीळे इत्यारभ्य इन्द्रं विश्वा अवीवृधन्नित्यतः प्राग्विंशतिवर्गसमाप्त्यन्तमेकमृषिसूक्तम् । तावतीनामृचामेकेनर्षिणा मधुच्छन्दसा दृष्टत्वात् । यथावा—इन्द्रं विश्वा अवीवृधन्नित्यएकं द्वितीयमृषिसूक्तम् । तासामृचां मधुच्छन्दसः पुत्रेण जेत्रा दृष्टत्वात् । देवतासूक्तं यथा :—अग्निमीळे पुरोहितमित्यादिनवर्चमग्निदेवताकमाद्यं देवतासूक्तम् । यथावा " वाय वायाहि दर्शतेनेति नवर्चं वायव्यम् " द्वितीयं देवतासूक्तम् । छन्दः सूक्तं यथा—" अग्निमीळ " इत्यारभ्य अष्टादशवर्गपर्य्यन्तम् । " गायन्ति त्वा गायत्रिण " इत्यतः प्राग् गायत्रीछन्दोबद्धमाद्यं छन्दःसूक्तम् । एवमन्यान्यपि ज्ञेयान्युदाहरणानि । त्रिविधानामप्येषां सूक्तानां कर्मसु विनियोगः श्रुत्या प्रतिपाद्यते । तथाहि "उदु ब्रह्मा एवैतस्य सवनस्येति ब्राह्मणाच्छंसी ब्रह्म एवैतत्समृद्धं सूक्तमहरहः शंसतीति " प्रकृत्य " तदु वासिष्ठमेतेनैव वसिष्ठ इन्द्रस्य प्रियं धामो यागच्छत " इति ऐतरेय ब्राह्मणस्य पञ्चमपञ्चिकायामुक्तम् । तथा देवतासूक्तस्य विनियोगोऽप्यैतरेयब्राह्मणस्य षष्ठ पञ्चिकायामुपदिश्यते । " तस्मान्मैत्रावरुणं मैत्रावरुणः प्रातःसवने शंसति " इति । मैत्रावरुण नामक ऋत्विक् मैत्रावरुणं मित्रावरुणदेवताकं सूक्तं प्रातःसवनकर्मणि शंसति इतितदर्थः । एवमैतरेयब्राह्मणस्य पञ्चमपञ्चिकायाम् " तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन " इति वाक्येन त्रिष्टुप्छन्दोग्रथितम् छन्दःसूक्तमुपदिश्यते । वर्गविभागोऽध्यायविभागश्चाध्यापकसम्प्रदायक्रमागत एवेति भाति । यतोऽनुगतं तयोः किञ्चिल्लक्षणं न पश्यामः । मण्डललक्षणन्तु शक्यत उन्नेतुम् । तत्तदृषिदृष्टानां बहूनां सूक्तानामेकर्षिकर्तृकः संग्रहो मण्डलमिति । अत एव सर्वानुक्रमणिकायामुक्तम् शौनकेन " य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत् स गृत्समदो द्वितीयं मण्डलमपश्यत् " इति । नहि द्वितीयमण्डलगतानि सर्वाणि सूक्तानि गृत्समद एव दृष्टवान्; किन्तु संग्रहीतवान्, अन्यथा कतुकूर्मादीनां तत्तत्सूक्तर्षित्वेन तत्रचानुक्रमणिका ग्रन्थेऽभिधानस्यासङ्गतेः । मण्डलर्षय आश्वलायनगृह्यसूत्रे उक्ताः " शतर्चिनो माध्यमा गृत्समदो विश्वामित्रोऽत्रिः भरद्वाजो वसिष्ठः प्रगाथाः पावमान्याः क्षुद्रसूक्ता महासूक्तौ" इति " मधुच्छन्दः प्रभृतयोऽगस्त्यन्ता आद्यमण्डले । ये सन्ति ऋषयस्ते वै सर्वे प्रोक्ताः शतर्चिनः । शतर्चिपदस्य निर्वचनं कृतं पूर्वाचार्य्यैः । " ददर्शादौ मधुच्छन्दाद्यधिकं यदृचां शतम् । तत्साहचर्य्यादन्येऽपि विज्ञेयास्तु शतर्चिनः । अच्छत्राश्छत्रिणोकेन यथा ते छत्रिणोऽभवन् " इति द्व्यधिकेऽपि शतोक्तिर्बाहुल्यात् । अन्त्ये मण्डले क्षुद्रसूक्तानां महासूक्तानाञ्च द्रष्टार ऋषयोऽपि लक्षणया क्षुद्रे सूक्ता महासूक्ता इति व्यपदिश्यन्ते । महासूक्तलक्षणं बृहद्देवतायामुक्तम् । " दशर्चतायाः अधिकं महासूक्तं विदुर्बुधा इति " एतेनैकर्चप्रभृतिदशर्चपर्य्यन्तं क्षुद्रसूक्तमिति क्षुद्रसूक्तलक्षणमपि सूचितम्भवति । मध्येषु द्वितीयादि नवमान्तेषु मण्डलेषु ये ऋषयस्ते माध्यमा व्यपदिश्यन्ते । तथा च प्रथम-

स्य मण्डलस्य शतर्चिनः, द्वितीयस्य गृत्समदः, तृतीयस्य विश्वामित्रश्चतुर्थस्य वामदेवः, पञ्चमस्यात्रिः, षष्ठस्य भरद्वाजः, सप्तमस्य वसिष्ठोऽष्टमस्य प्रगाथाः, नवमस्य पावमान्याः, दशमस्य क्षुद्रसूक्ता महासूक्ताश्चेति गृह्यसूत्रार्थः ॥ (क्रमशः)

करुण-क्रन्दनम् ।

करुणावरुणालय ! त्वया
दयनीयाशु दशा विलोक्यताम् ।
तव सीदति साम्प्रतं प्रिया
विबुधानां सरसा सरस्वती ॥ १ ॥

कलिकालकरालकालतो
नयहीनैः पुरुषैस्तिरस्कृता
विकला सकलाऽश्रुतोषदा
कुलजा नो सहते निरादरम् ॥ २ ॥

नितरां प्रविकम्पते वपुः
हतसत्वा व्यथते पदे पदे
विधुनोति शिरः शुचान्विता
विदधात्युच्छ्वसितं क्षणे क्षणे ॥ ३ ॥

अनया सह धर्मपुङ्गवाः
क्षयमेष्यन्ति सनातनाः ध्रुवम्
अयि सत्यविधानतत्पर !
वितथा ते भविता प्रतिश्रुतिः ॥ ४ ॥

नहि यावदियं जहात्यसून्
कुरु तावद्धि निराश्रयाश्रय !
त्वरितं प्रतिकारमुत्तमम्
गतजीवस्य पुनः किमौषधैः ॥ ५ ॥

—रमापति शास्त्रिणः ।

भारतसम्बन्धे कृष्णविनयः ।

—:****:—

ले०—वीर भीमसेन शर्मा शास्त्री (सुजाबाद, मुलतान)

अयि भारतीयाः ! नेदं निन्हुतं केनापि, कुहापि लब्धजन्मनां मानवानां सुखकरः उन्नतिपथप्रदर्शकोऽयं भारतदेशो निखिलदेशरत्नभूतो विद्यते, इत्येवं सर्व एव पूर्णमनसोरीकुर्वन्ति, यदा कदाऽपि समयपरिवर्तनेनैधतेऽत्राधर्मः । एकदा अस्मिन्नेव भारतवर्षे विश्वविश्वाधीशस्य आनन्दकन्दसच्चिदानन्द-नन्दनन्दनदेवकीसुतगोविन्दस्याविर्भावोऽपि बोभूयते इत्यपि निश्चितमिति । अन्यच्च कृष्णावतरणे भगवतोदीरितं स्वेनैव गीतायां गीतायां यत्—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥१॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

अन्येऽपि शतशो दृष्टान्ता नयनप्राघुणिकतामायान्ति, येषु कृष्णावतार एव पुष्टो भवति । यथा च यदा—

कंसः कृतेनात्याचारेण सनातनधर्मं प्रत्नभारतगौरवञ्चालुलुपत्, तदा भगवता श्रीकृष्णेनागत्य यमसदनातिथीकृतोऽसौ धर्मध्वजश्च सुदृढीकृतः । एवञ्च यदा जगद्विद्रावणो रावणः वृद्धानतूतुदत् तदाऽपि कृष्णेनैव रामरूपमाधाय कीनाशपाश-

बद्धोऽस्तुकः। तथैव महाभारताहवेऽपि परिपक्वपाप-पुञ्जविनाशाय सारथिरूपेण स्वीयाननिर्गतसुधा-धारया सन्तोषितोऽर्जुनः। एवं सदसि कुररीमिव क्रन्दन्तीं द्रौपदीं वस्त्रसाहाय्यप्रदानेन रक्षितुं भगवान्-कृष्ण एव हेतुरभूत। अहो! किमुत स्वल्पवयस्कानां ध्रुवप्रह्लादादीनां कृते क्षीराब्धिमपि परित्यज्योपडुढौके श्रीकृष्णः।

एवं यः कोपि भारते भगवन्तं कृष्णमाजुहाव तदा परित्यक्ताखिलानन्देन-नन्दनन्दनेनागतमिहेति विदितमेव पुराणविदाम्। परञ्चाधुना-स एव भारतदेशः, सैव धरा, तावेवेभौ चन्द्रदिवाकरौ,तान्येव व्रज-गोकुल-मथुराप्रभृतीनि नगराणि, त एव-वयं भारतीयाः, कथं तदा भगवन्! सकृदपि नागम्यते? किम् वयमेतादृशा अधमाः सञ्जाताः यत् भवद्दर्शनाधिकारिणोऽपि न। हे यादव! उत्तिष्ठ क्षीराब्धितः पश्य भारतदुर्दशां, त्वदीये देशे निशाचरैरेव स्वीया विजयपताका समुद्धीक्रियते। कथमुक्तव्याघ्रातदोष एव चरितार्थो विधीयते। यदि कंसप्रभृतीनां दुष्कृतां कृते तवागमनं, तदा तु एकः कंस आसीत्, अद्यापरिमिताः कंसाः प्रतिवीथिकं समुत्पन्नाः। तदपि न जागर्ति भवान्। तदा तु एको रावणः जानकीं जहार, अद्य तु अनेकै रावणैरनेका अबला अपह्रियन्ते। तदा भारते कौरव-पाण्डवयोर्युद्धमासीत्। अद्य तु सम्पूर्णे भारते प्रतिगृहं प्रतिवीथि किमुत सर्वत्र संग्रामाः श्रूयन्ते। सर्वं एव भारतीयाः पारस्परिक-रक्ततृषिताः सन्ति, तदपि न द्रवीभवति त्वदीयं मनः? कथं वयं ध्रुव-प्रह्लादेभ्यो बालकेभ्योऽपि तुच्छाः? कथं गजप्रभृतयः पशवो मानवीयजन्मनः श्रेयांसः? कथं भारतीयविधवानां करुणाक्रन्दनं भवच्छ्रोत्रयोर्न विशति। त्वदीयाः पुत्राः अद्य ईदृशाः सन्ति केचन; यैरेकवारमेव भुज्यते, तेषां दरिद्रद्वारी कोप्यन्यः ईश्वरो भविष्यति,? इदानीं पापबहुलेऽस्मिन् जगति भारतीयाः तवागमनमेव प्रतिपालयन्ति।

आगच्छ, भक्तवत्सल! आगच्छ, त्वदीयेन देशेन स्वीयाभिनवविज्ञानेनापरे देशाः मनुष्यगणनासु विहिताः, परञ्च तैः कालचक्रक्रमेण दीपशलाका-सूत्रिकादयः पदार्था अपि विदेशेभ्यः आनीयन्ते, भारतीयैरपि भारतप्राdुर्भूतानां व्यास-कपिल-गोतम कणाद-विश्वामित्र-वशिष्ठादीनां विचित्राणि-चरित्राणि नाधीयन्त एव। किमुत भारतीय-वस्त्रेषु, भोजनेषु, वाक्षु, नास्त्यस्माकमवहितिः। अस्माभिरेव प्रत्यहं भारतदेशः कथा-शेषतां नीयते, त्वामन्तरा न कोऽपि भारततरणितारकोऽवतरति नेत्रयोरिति। किमधिकेन विरमत्येष विपश्चितामनुचरो भीमः।

कान्तापृष्ठवर्णनम् ।

काहुक बरणी नासिका, काहुक बरण्यो कान;
कदलीपत्रसमानसी, पीठ न बरणी आन ॥

(अस्य संस्कृतभाषायां विपरिणमनम्)

(१)

मृद्वीकामदहारि हारि रसवद्रम्भे ! त्वदीयं फलं,
ख्यातो व्यालविषापनोदनविधौ तद्वद्रसस्तावकः ।
कान्तापृष्ठसमानतां दधदिदं पत्रं न ते वर्णितं,
तस्मन्येऽत्र गुणेषु सत्सु परमैः पुण्यैर्यशो लभ्यते ॥

(२)

आस्यं हास्यं च लास्यं विधुकुसुमलतासन्निभं केचिदूचु-
स्तेषु प्राशंसि केनाऽप्यतिनिपुणधिया नैव पृष्ठं प्रियायाः ।
रम्भापत्रोपमाने सति जगति मतिः कुण्ठिताऽभूत्ततोऽहं
मन्ये वाग्देवतायाः परमकरुणया प्राप्यते कल्पकत्वम् ॥

(३)

चन्द्राननोत्पलदलायतलोचनेति,
प्राशंसि यैः कविवरैः प्रमदोत्तमा तैः ।
मोचादलोपमसमनोरमपृष्ठदेश-
स्तस्याः कथं न कथितोऽत्र कुतूहलं मे ॥

(४)

शङ्के विद्वत्पुङ्गवानां कवीनां
दंभारंभो रंभयोज्जृम्भितोऽसौ ।
तस्याः पत्रे जागरूके जगत्यां,
कान्तापृष्ठं तत्समं तैर्नचोक्तम् ॥

कवी रविशंकरसूनुर्दयाशंकरः
साहित्यवाचस्पतिः

भृङ्गान्योक्तयः ।

(१)

ललामकमलावली किमु मतङ्गजैर्भक्षिता ?
न्यदाहिषत मालती प्रभृतयः किमौर्वैरहो ?
निरर्थक-पदावलीं प्रणिनदन् रुदन्नाक्षिपन्
प्रमत्त इव पर्य्यटन्स्त्वमसि भृङ्ग ! येनाऽधुना ॥

(२)

दृढोल्लसितमञ्जरी-समुदये यदीयेऽनिशं
सुमञ्जु परिगुञ्जितं प्रणिनदन्नभूर्मोदभाक् ।
अमुत्र विटपेऽधुना विधिवशाद्विनष्टङ्गते
विहाय तव नोचितस्तमितरत्र भृङ्गायनम् ॥

(३)

द्विरेफ ! करिकेसरिप्रचुरदानधारामितो
दधत्प्रमदमावहन्नसि परं मदं संहसन् ।
अवव्रजसि नैव तन्मम मनः परं खिद्यते
यदि श्रवणमास्फुरेत्तव तदा दशा कीदृशी ॥

(४)

भृशं मधुप ! सौरभं सकलजीविहर्षास्पदं
कर्पूरशुचिवर्णिकां विदधतीं परां यूथिकाम् ।
विहाय हयमा[1]रकं समवलोक्य रक्तं यदि-
व्रजेरसि समन्ततः परम-धन्यधन्यो भुवि ॥

—श्रीजीवनाथझा शर्म्मा ।

१—'कनेर' इतिभाषायाम्—सम्पादकौ

प्राचीन-भारतवर्षे पारदेशिकव्यापारः ।

लेखकः—श्री शिवशङ्करप्रसादः बी० ए०, डी० इडी.

इदानीन्तने काले तु भारतवर्षस्य व्यापारोऽवनतिगर्ते भृशं पतितोऽस्ति । अन्यदेशैः सह किं स्वदेशेऽपि व्यापारगताऽवस्था शोच्यैव । इमां शोचनीयामवस्थामवलोक्य प्राचीनकालेऽयमेव देशः सर्व्वव्यापारसूत्रधार आसीदिति विचारः स्वप्नेऽपि नोत्तिष्ठते । परन्तु एतच्छ्रुत्वा महदाश्चर्य्यं भविष्यति, यदस्मिन्नेव देशे एकदा व्यापारः समुन्नतेश्वरमशिखरे समासीन आसीत् ।

वेदादिग्रन्थेभ्यो नाटकादिग्रन्थेभ्यश्चैतत् सम्यग्ज्ञायते । बहुषु स्थलेषु व्यापारपिशुनानि वर्णनानि सन्ति, यानि निश्चयपुरस्सरं गर्वस्थलभूतां व्यापारसमुन्नतिं दर्शयन्ति । ऋग्वेदे एकस्मिन् स्थले (१-२५-७) वरुणो ज्ञातसमुद्रमार्गत्वेन वर्णितः, अथ यदि चेत् समुद्रस्य मार्गोऽनवगतोऽभवत् तर्हि कुतस्त्यं वर्णनं स्यात् ? अतो निष्पक्षमतावलम्बिनां संशयाय स्थानमदत्त्वैव अदर्शितदोलायमानचित्तवृत्तिना स्वीकार्य्यमासीत् पुराऽपि जलधिपथावगतिरिति । भूयोऽप्यन्यत्र तस्मिन्नेव वेदे (१-५६-२)मन्त्रे जलधिव्यापारकृतां महाव्यवहारिणां वर्णनमस्ति देशदेशान्तरं व्रजताम् । ते च व्यवहारिणः समाजेऽपि बहुतिथे काले समादृतास्पदं धारयन्तिस्म, यथा सौन्दरनन्दगतेन "महापणेभ्यो व्यवहारिणश्च महामुनौ भक्तिवशात् प्रणेमुः" इति वाक्येन ज्ञायते ।

अतः परम् यदि वेदानतिरिच्य अन्यान् ग्रन्थान् समाश्रयिष्यामहे; तर्ह्यपि एतमेव अवगमं प्राप्स्यामः । उदाहरणतो धर्म्मसूत्रेऽपि यत्र-तत्र वर्णनानि समुपलभ्यन्ते, यैर्व्यापारस्य पुरातनी स्थितिः सम्यगवगम्यते । अत्र प्रातःस्मरणीयावस्थस्य प्रोफेसरबूलरस्य (Professor buhler) (संस्कृताध्ययने पुरातनवृत्तानुसन्धाने च व्ययितजीवितस्य) वचनं विशिष्टमस्माकं ध्यानमर्हति । तेन कथितम्—References to sea voyages are also found in the two most ancient Dharmsutras ; अर्थात् पुरातनतमयोर्द्वयोर्धर्म्मसूत्रयोरपि सामुद्रिकयात्रायाः सूचकानि वर्णनानि प्राप्यन्ते । डाक्तर-कार्डवेल-नामधेयोऽपि पाश्चात्यविद्वान् एतदेव शब्दान्तरैः कथयति । तस्योक्तिः—It Appears certain from the notices contained in the Vedas that the Aryans of the age of Solomon practiced foreign trade in ocean going vessels : अर्थात् वेदगतेभ्यः संकेतान्वितेभ्यो वचनेभ्य एतदेव गम्यते यत् इसराइल-अधिपस्य सौलोमेन-नाम्नो नृपस्य राज्यकाले आहरणापहरणात्मकं (Import and export) पारदेशिकं व्यापारं समुद्रगमनक्षमाभिर्नौभिरार्य्या अकार्षुरिति ।

एवं पाश्चात्याः पौरस्त्याश्च बहवो विद्वांसः संस्कृतपुस्तकानामन्वेषणात्मकाध्ययनात् वसुन्धरोदराद्उत्खातानामनल्पसंख्यकानां वस्तूनामवेक्षणात् अस्मिन् निर्णये समागताः सन्ति ।

अथायं इसराइलसंस्थः सौलोमोनो भारतवर्षेण सह खाइष्टजन्मनो दशशतकानि प्राक् व्यवहारसम्पर्कं व्यधात् । अतएव ऐतिहासिकदृष्टिकोणादपि सम्यक् ज्ञायते, यदासीदतीव पुरातनकालेऽन्यदेशसम्पर्की व्यापारोऽत्रेति एतत्पुरातनेतिहासे वर्णितमस्ति, यत् तत्समये ओफिरजनेभ्यो मयूरहस्तिदन्त-चन्दन-चामीकर-अनर्घमणिमाणिक्यप्रभृतयः पणा आक्रीतास्तेन राज्ञा । अत्र ओफिरशब्दनिर्णये मतभेदोऽस्ति । कतिपयइतिहासविदः कथयन्ति यत् ओफिरम आसीत् एकं नौनिग्रहस्थानम्, गुजरातप्रतिवेशे स्थितम् । अन्ये पुनर्मन्यन्ते, आसीत् अभीरनामधेया पश्चिमसमुद्रतटवर्त्तिनी काचिज्जातिः, ओफिरशब्दश्चाभीरशब्दस्य अन्यदेशगतत्वादुच्चारणभेद इति । अधुनापि एतन्नाम्नाप्रख्याता जातिरेका कठियावाड़जनपदे निवसति । एतच्चान्यत् द्रढिष्टं प्रमाणम् । अतो भवतु नाम ओफिरशब्दो जातेः स्थानस्य वा बोधकः; परन्तु आसीत्तस्य देशस्य भारतवर्षेण सह व्यवहारः इति न कश्चिदस्वीकर्तुं शक्नोति ।

मयूरहस्तिदन्तौ समुद्दिष्टसमयात् प्राक् ग्रीसरोम-इजिप्टादिषु अनुपलब्धावास्ताम्, यतः खाइष्ट जन्मनः प्राक् चतुर्थशतके युयुत्सुयात्रागतस्यालक्षेन्द्रस्या (Alexendor) नुगा एतदवलोक्य महदाश्चर्य्यमन्वभवन् अतिभूमिगतमानन्दञ्च अलभिषत । (Pleiny the older) रोमनिवासी प्लीनी (ज्यायान्) यः खाइष्टजन्मनः षष्ठि-सप्ततिवर्षाण पश्चादभूत्, रोमस्यैतद्देशीयव्यापारेणापहृतमर्थजातं ग्रन्थनिबन्धमकरोत्, महतीश्चिन्ताश्चाप्रकटयत् द्रव्यप्रवाहोन्मुखं स्वदेशमवलोकयन् । तत्समये एतद्देशप्रसूतप्रेषितानां वस्तूनां व्यवहारेऽभिमानं व्यधू रोमनिवासिनः ।

मद्रासप्रान्ते कमबैटोर-मदुरान्तर्गतस्थानेषु पुरातन्यो बह्यो रोमनमुद्राः समुपलब्धाः सन्ति; उत्खननज्ञानविशेषवताम्प्रयत्नात् । ताश्च निःसन्देहं द्वयोर्देशयोः सम्पर्कं सूचयन्ति ।

अथ पुस्तकैश्चिन्हैश्च प्रमाणीकृते भारतीयव्यापारस्य पुरातनत्वे, समयनिश्चितिसम्बन्धी प्रश्नः समुत्तिष्ठते । अत्र मतानि भेदवन्ति सन्ति । केचित् (Pro. max Dunckker) प्रो॰ मैक्स डङ्कारे प्रमुखा विद्वांसो ब्रुवन्ति यत् खाइष्टजन्मनो वर्षसहस्रद्वयं प्राक् अस्य भारतस्यान्यदेशैर्व्यापारसम्बन्ध आसीत्, केचित्पुनरन्ये व्यापाराय अष्टषष्ठशतकयोर्मध्ये स्थितिमर्पयन्ति । डाक्तरसईसस्य मतेन तु भारतवर्षोऽयं खाइष्टजन्मनः संवत्सराणां त्रिशत्शतानि पूर्वं बव्हेरुणा सह(max Babylon)व्यवहारमकार्षीत् ।

अथैतेषाम्मतानामम्मूल्यं यद्भवतु तद्भवतु । परन्तु एतत्त्वविवादास्पदमेव यदयं देशोऽतिप्राचीनकाले व्यापारद्वारा अपरिमेयं द्रविणमहार्षीदन्यदेशेभ्यः । आसीदत्रैकः समयो यदा वर्तमानसभ्यताभिमानिन्यो जातयो मूर्खतातमसि आसन् आशिरोरुहं निमग्ना, यदा च-

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिरक्षन् पृथिव्यां सर्वमानवाः ॥"
इति

उपदेशलहरी ।

ले०--शास्त्री अमृतलालशर्म्मा, वेदान्त-व्याकरणतीर्थः,
श्रीनारायण विद्याशाला, पेटलाद

बन्धो ! संसृतिबन्धनाशनमिदं तथ्यं सुपथ्यं शुभं
चेतश्चञ्चलतां विहाय वचनं स्वास्थ्येन संश्रूयताम् ।
प्राप्ता पुण्यचयेन संसृति महासिन्धौ त्वया मज्जता
श्रेयः श्रेणिसुसाधिका नृतनुनौर्ध्यायञ्शिवं सन्तर ॥१॥

नित्यानन्दसुधाम्बुधौ स्वहृदये तत्त्वे परे सत्यपि
स्वल्पानित्यसुखाप्तयेऽतिशयितं यत्नं किमालम्बसे ?
प्रत्यक्तत्त्वपरायणां कुरु धियं संरुध्य बाह्यार्थतः
को धावेन्मृगतृड्जलाय निकटे भागीरथी-स्रोतसः ॥२॥

लब्ध्वा जन्मगतानि दुःखबहुले के वा भवे न त्वया
सम्भुक्ता विषयाश्चिरं पुनरहो तानेव किं ध्यायसि ।
कल्पान्तेऽपि हि भोगतो न मनसः शान्तिर्भवित्री तव
तृष्णां दुर्मतिदुस्त्यजां परिहरन् स्वानन्दमग्नो भव ॥३॥

किं त्वच्चिन्तितमत्र सिध्यति विना दैवं मृषाशावशो
भूत्वा ताम्यसि किं महेश्वरपदाम्भोजं भजेष्टार्थदम् ।
क्षुद्रानाश्रयितुं कथं व्रजसि रे लक्ष्मीमदान्धाञ्जडान्
कल्पद्रुं प्रविहाय वाञ्छसि कथं शाखोटकं सेवितुम् ॥४

भूयिष्ठं खलु शायितोऽन्धतमसे मोहाभिधे मायया
स्वप्नान् दुःखसुखावहान्बहुविधान्सन्दर्शयन्त्या मुहुः
बन्धो ! सम्प्रति जागृहि स्वहृदये प्राज्यप्रकाशं शिवं
द्रष्टुं हृन्नयनान्ध्यदोषशमनं ज्ञानाञ्जनं संश्रय ॥ ५ ॥

प्रश्नाः

उत्पत्तिस्सरवारदेश-सरयूपाराग्रजानां कुतो ?
गोत्राणां प्रभवश्च रामविपुलानां च त्रयाणां तथा?
गर्गादित्रयगोत्रनायकजनुः कालश्च तेषां कथा ?
रामेन्दुप्रमिताश्च के, प्रवर-नेतॄणां च का कल्पना ?
गोत्रेषु प्रवरा रसेन्दुषु कुतो रामा महत्त्वं गता-
श्शाखांपादविनिर्णयेऽर्थ इह को मिथ्याद्युपाधौ च कः?

प्रष्टा—श्रीनिरीक्षणपतिमिश्रः,
ब्रह्मचर्याश्रमः, श्रीसरवार पाठशाला

श्रीकृष्णाह्वानम् ।

(१)

आगच्छ कृष्ण ! त्वं क्वासि ? माविलम्बं विधेहि हे !
दुरवस्था ममाद्यापि त्वां दुनोति न किं विभो !

(२)

गीतां ते नाथ ! हा ! गातुं प्रभवामः कथं वयम् ।
परतन्त्र-वशीभूता द्रुता उपरतास्तथा ॥

(३)

दुर्वलोऽपि मृतप्रायः प्राणाँस्त्यक्तुं न पारये ।
तवागमन-प्रत्याशा यतो मां जीवयत्यये !

(४)

यत्त्वं मद्भाग्यदोषात्स्मरसि नहि "पुनः
सम्भवामीति" वाक्यं,
तन्नाहं प्रार्थयँस्त्वां निजतरण-विधिं
नाथ ! दुःखाकरोमि ।
प्रच्छन्नं कर्तुमिच्छस्यहह ! यदि वपुं
चौरिकाभीतिभीतः,
तद्दुःखाश्रैः ततं हा ! श्रयसि नहि कथं
कृष्ण ! कृष्णं ममान्तः !!

श्रीचक्रदत्तशर्म्मा बहुगुणः ।

संस्कृते हिन्दी-समस्या-पूर्तिः।

(स्वर्गीय-गुमानी कवेः सङ्ग्रहात)

(१)

युधि वैराटिं प्राह किरीटी गोग्रहसन्नहना,
कौरव्येषा योद्धुमुपेता सेना भट-वहना।
न तु भेतव्यं शिशुना धार्या भवता धीर्गहना,
"नामर्दी तो दई खुदाने मार मार तो कहना।"

(२)

सूतो धनुरपि नाग्रहीत् कर्णोऽस्त्राणि बभाज।
"बाप न मारी पीदरी, बेटा तीरन्दाज॥"

(३)

पर्वणि दानभिया द्विजं दृष्ट्वान्तर्वव्राज।
अन्येद्युर्वणिगाह तं "पालागन महराज॥"

(४)

शप्त्वा त्वामनुतप्तश्चैद्यः सन्धिं चिकीर्षतीत्युक्तः।
कृष्णोऽथ दूतमूचे "अब वृन्द गई विलायत को"

(५)

कोऽर्होऽग्रे स्यादित्यापृष्टो राज्ञा सस्नेहम्
भीष्मेणोक्तं कृष्णः पूज्यस्त्यक्त्वा सन्देहम्।
तत्रापृष्टश्चैद्यः प्रोचे नैवं मन्येऽहम्
"तुम किसने फर्माये आपही फर्मे हम्॥"

[पुनः कदाचित्]

संकलयिता—श्रीतारादत्तपन्तः साहित्याचार्यः

शोकोद्गारः।

श्रीमत्पण्डित रामगोपालशर्मा महोदयानाम्

रसवसुनिधिचन्द्रे वैक्रमेब्देमधौ वै
दिवसकरसुतिथ्यां शुक्लपक्षे शुभेऽह्नि।
परिषदि शतमन्योर्विष्णुगाथां प्रगातुम्
सुदिवमुपगतोऽयं रामगोपालदेवः॥ १॥
विषमे समुपस्थिते परम्
सहसा मां प्रविहाय संस्थितः।
क गता तव धर्मसंकथा
त्वयि लीने विहता वचस्सुधा॥ २॥
विगता तव धीरता परा
सुमतिश्चैव दयालुता तथा।
परलोकमुपस्थिते त्वयि
सकलः सद्गुण एव किं गतः॥ ३॥
कठिनं विधिसंविधानकं
यदयं दीनजनस्यरक्षकः।
सहसैव गतः क्षितेर्ननु
सकुलं सीदति त्वद्विना परम्॥ ४॥
हे दैव, निष्करुण! दीनसुखाऽसहिष्णो
दीनान् त्वदेकशरणानपि हंसि कष्टम्।
पित्रा त्वयैव रहितान् प्रथमं कृतान्नः
भूयः पितृव्यरहितान् कृतवानसि त्वम्॥ ४॥

शोकाकुलः
विहटा, आरा — श्रीरामसुभग ओझा

नरेन्द्रान्प्रत्यावेदनम्।

यवनाहत-हिन्दुवृन्दमेद-
प्लवविस्रा विषमैव मेदिनीयम्
अधिवास्य यदि स्वकैर्यशोभि-
श्चिरमेनामुपभुञ्जते नरेन्द्राः।

परिवर्त्तयिता :—
जयपुरराजगुरुकथाभट्ट-वंश्य-
श्रीनन्दकिशोरशर्मा साहित्याचार्यः।

स्वर्गीय-स्मृतिः

सुरेन्द्रनाथ शास्त्रिणां शोकषट्कम् ।

(१)

यस्मिन्नुद्गमभूधरोच्चशिखरारूढे दुरूढव्यथा-
व्याघातादुपजातभाववलिता जाता दशाशाः पुरा
विद्वत्सारससंहतिश्च सविकासा, दशाशाः पुनः
साऽऽशाभङ्गमयंस्तमस्ततितताः कुर्वन्निहास्तंगतः ।

(२)

स्वर्गादायातगङ्गाबहलजलपरिप्लाव्यमानाऽङ्गयष्टिः
किं यातो न त्वमेवाऽसि विदितपटनावासतो वासरेषु
किं वा वाग्देवता ते नहि वशगमिता दैवतैरर्थ्यमाना
देवेन्द्रस्यापि नाथः सुरनिकरपुरीं यद् गतो गां विहाय ।

(३)

सञ्जातास्तमसाततां दशदिशः शोकाश्रुधारामियं
मुञ्चत्यक्षिघनाऽऽवली दृढतरोच्छ्वासानिलोत्तालिता
अन्तस्ते विरहः समर्पितहविर्वह्निश्चिरम्वर्द्धते
हन्तास्मिन्समये समस्तजनतामाश्वासयेत्को भुवि ?

(४)

शून्या सा पदवी परा वत पुराऽकाले त्वयाध्यासिता
विद्या सा विधवा निकाममधुना तारुण्य-सन्धर्पिता
हन्तेयं नहि शोचिताऽपि भवताऽकाले दिवं गच्छता
सर्वत्रैव निरूढिताऽपि सुमतिस्त्यक्ता दिवं गच्छता ।

(५)

एका कीर्तिश्चिरस्थातिविहितसुकृता या तता भूतलेऽस्मिन्
आश्वासैः सैव सर्वान्प्रकृतिमुपगतानञ्जसा भूरि कुर्यात्
इत्येवं चिन्तयन्तो गुरुतरसुगुणग्राममात्रं स्मरन्तः
सोच्छ्वासं क्षीणकायाः कथमपि दिवसान् साम्प्रतं यापयामः

(६)

हरिगीतिका ।

वादादिबाधाध्वंसकेपुतले निपङ्ग इवापरः
योवांग्लभाषापारगो नभसः पतङ्ग इवापरः
यो दुर्गमागमनिगमनिजतन्त्रो मृगेन्द्र इवापरः
शून्या दिशः कृतवानयं योऽसौ सुरेन्द्र इवापरः ।

साहित्यालङ्कार श्रीकुलानन्द मिश्रः
व्याकरणाचार्य्यः ।

संस्कृत-समाचाराः

नम्र निवेदनम्।

सहृदयाः!

जानन्त्येव श्रीमन्तो यत्संस्कृतभाषायाः प्रचारावरोधे पत्रादीनामभाव एव प्रधानकारणतामवलम्बते। प्रान्तान्तरेषु ज्वलत्स्वपि द्वित्रेषु पत्रप्रदीपेषु विहारप्रदेशोऽयं नितान्तमन्धंतमसमनुभवति। तदतिखिद्यमानमानसैरस्माभिरागामिकार्तिकमासतः प्रतिपूर्णिममेका जागर्तिनामधेया मासिकी पत्रिका प्रकाशयिष्यते। तत्र ग्राहकाणामनुग्राहकाणां लेखकानाञ्च मनोयोगमन्तरा नाशास्यते साफल्यं स्वीयसाहसस्य।

मुद्रापञ्चकं ततोऽधिकं ददद्भिर्माननीयतया, मुद्रात्रयमुत्सृजद्भिर्विशिष्टतया, सार्द्धैकमुद्रया साधारणतया वा सहाय्यमाचरद्भिः संस्कृतजननीजीवनदानपुण्यभाग्भिर्भवद्भिर्भूयताम्।

जागर्ति कार्यालयः मुज़फ्फरपुरम्। अनन्त चतुर्दशी (१९८६)	पिनद्धसम्पादकतावर्मणोः साहित्यालङ्कारकाव्यतीर्थपदालङ्कर्मणोः। श्रीरामचन्द्रमिश्र–श्रीसुरेन्द्र झा शर्मणोः

गढ़वाल–विद्वत्सम्मेलनम्।

गढ़वाल–मण्डलस्थ–विद्वत्समाजस्य द्वितीयवर्षाधिवेशनं श्रीनगरनाम्नि पत्तने फाल्गुनकृष्णनवम्यां सोमवासरे (४-३-२९) सानन्दं ससमारोहं समद्यत। तत्र च्छात्राणां वार्षिकपरीक्षार्थं समायातानां प्रतिष्ठितानां पौराणाञ्च महती समृद्धिः समजनि। प्रथमं छात्रैः शान्तिपाठादीशस्तवनञ्च विहितम्। सर्वसम्मत्यनुसारं तत्रत्यराजकीयपाठशालाध्यापकाः पं० भैरवदत्तशर्माणः शास्त्रिमहोदयाः सभापतित्वे निर्वाचिताः। वार्षिककार्यविवरणात्प्राक् सभोद्देश्यविषयः प्रकटितो मन्त्रिणा। तत्रडिम्मर-संस्कृतपाठशालाध्यापकानामाचार्यवर्याणां श्रीमतां श्रीवासवानन्दशास्त्रिमहोदयानाम्, ऊखीमठविद्यालयाध्यापकानां धर्मभूषण–श्रीमहिमानन्दशर्मणाम्, मैकोटिस्थपाठशालाध्यापकानां श्रीवीरवरानन्दशर्मणाम्, तथा ऊखीमठविद्यालयस्थटिहरीराज्यान्तर्गत-शाखापाठशालाध्यापकानां श्रीबालकृष्णशास्त्रिमहोदयानाम्, देवप्रयागकीर्तिपाठशाला–प्रधानाध्यापकमहोदयानाम्, शिष्टाचाराद्यनेकोपयुक्तसामयिकविषयेषु समभूवन्सदोजनहृदयाह्लादकानि महत्त्वपूर्णानि भाषणानि। ततश्च ससाधुवादं सभापतिमहोदयैरुक्तभाषणानां निष्कर्षं समुपदिशद्भिः संस्कृतसाहित्यस्य सकलभाषाविभाषाभ्यः प्रकटीकृतम् गौरवं सुरीत्या। ततोह्यधस्तनानां प्रस्तावनां स्वीकृतिसमादरोऽभवत्।

(१) प्रस्तावः—गतवर्षे कतिपयानां छात्राणां परीक्षोत्तीर्णच्छात्रनामावलीपत्रेषु नामोल्लेखाऽभावात् परीक्षोत्तीर्णताप्रमाणपत्रप्राप्त्यन्तरं तेषां सफलतां ज्ञात्वाऽपि संवत्सरोऽयं व्यर्थतामगात्। तत्र विषादं समुद्वहन्तीयं सभा निश्चिनोति—यदन्यदाप्येवंविधघटनायां छात्राणां महती हानिर्भाविनी। अत एतद्विषये प्रार्थनीया डि० बो० चेयरमैन महोदयाः

यत्ते तत्र लिखन्तु येन वाराणसीय-संस्कृत-महाविद्यालयाध्यक्षवरा अग्रे सावधानतया परीक्षोत्तीर्णच्छात्रनामानि प्रकाशयन्तु । येन भविष्यत्येवंविधा हानि र्माभवेत् ।

(२) प्रस्ताव :—संस्कृतपाठशालासु सर्वासु पाठशालाध्यक्षाश्छात्राणां स्वास्थ्यरक्षायै यथावसरं यथोपलब्धप्राणायामादिकन्दुकक्रीड़नादिमप्यन्यतमं प्रयेयुः ।

(३) प्रस्तावः—पाठशालाध्यक्षाणामुचितं भवेत् यत्ते स्वकीयासु पाठशालासु सदाचारपद्धतेरपि सत्कर्मकाण्डमुपक्रमं विदध्युः ।

(४) प्रस्ताव :—समितिरियं निर्धारयति प्रार्थ्यते च गढ़वालीपत्रमुद्राधिकारिणा, यत्ते स्वपत्रे संस्कृतपरीक्षोत्तीर्णानां नामानि कृपया शीघ्रं प्रकाशयेयुः । यतो गजटपत्रं गढ़देशे सार्वत्रिकं न । अन्ते धन्यवादेशस्तुतिपुरस्सरं सभाविसर्जनम् ।

निवेदक :—
गढ़वाल विद्वत्समाजमन्त्री—
श्रीबालमुकुन्द शर्मा

सनातन-धर्म-सभा ।

वार्षिकोत्सवः

चूरूस्थ श्रीसनातनधर्म-परिषद् एकोनविंशतिवार्षिक-महोत्सवो महता समारोहेण भाद्रपद मासस्य १०-११-१२ तिथिषु सुसम्पन्नम् । प्रथमदिवसे श्रीवेदभगवतः शिविका (नगर कीर्त्तनानुसारं) चतुर्वादनकाले सुमहता प्रबन्धेन सह निःसारिता । तथा त्रिषु दिवसेषु रात्रौ श्री अखिलानन्द कविरत्न, श्री-भीमसेन शास्त्रि, महोपदेशक, श्री-श्रीराम शर्मप्रभृति विदुषां सनातन-धर्म-प्रतिपादन-विषये सुमधुराणि प्रभावोत्पादकानि भाषणानि समभूवन् । श्रीसनातनधर्मस्य दिनत्रयं प्रचारमधिकं सञ्जातमिति चूरूनगरनिवासिनां सौभाग्यं खलु ।

वासुदेव शास्त्री जोशी काव्य-विशारदः
सहकारी मन्त्री ।

रावणेश्वर संस्कृतविद्यालयोद्घाटनम् ।

महदेतत्सौभाग्यमन्तेवासिनामनेकविषयाध्ययनमिच्छतां यच्छ्रावणशुक्लैकादशीगुरुतो रावणेश्वर संस्कृतविद्यालयो विद्योतते । अयञ्च श्रीमद्वैद्यनाथ चरणारविन्दमरन्दस्वच्छन्दपानानन्दमानसानां स्वर्गीयमहाराजबहादुराणां सनातनधर्मैकधुरन्धराणां श्रुतिस्मृत्याद्यनेक विषयस्वतन्त्राणां वृटिशशासकप्राप्त के. सी. आई. ई. इत्युपाधिविभूषितानां तथा काशीस्थभारतधर्म्ममहामण्डलाल्लब्ध—"धर्मसुधाकरो" पाधिविलसितानां ऑनरेबूल श्रीमद्रावणेश्वरप्रसाद सिंहवर्म्मणां महीन्द्राणां स्मारकत्वेन तत्राङ्गैव तत्तनुजनुषा श्रुतिस्मृतिपुराणेतिहाससङ्गीतसाहित्य विविधविषयविदुषा शब्दन्यायाद्यनेकतन्त्रस्वतन्त्र पण्डितमण्डलीजुषा चिरञ्जीविना शुभंयुना स्वकुलकमलदिवाकरेण श्रीमच्चन्द्रमौलीश्वरप्रसादसिंहवर्मदेवमहोदयेन प्रास्थापि ।

अस्मिंश्च शब्दन्यायादिनिखिलशास्त्राध्यापकत्वेन सर्वतन्त्रस्वतन्त्र पण्डित श्रीगोकुलानन्दशर्म मिश्रोपनामकश्रीमदुमानाथशर्म काव्यतीर्थ ज्यौतिषाचार्यश्रीषडाननशर्म--झोपनामक-श्रीमदुमानाथशर्म्माणो-मैथिलास्तथा शाकद्वीपि श्रीहरगौरीशर्म्मा च इत्येते पञ्चाध्यापका नियुक्ताः, स्वां स्वामध्यापनकलां तन्वानाः सम्प्रकाशन्ते।

सोऽयं सार्वजनीनो रात्रणेश्वर संस्कृतविद्यालयः प्रतिदिनमुपचीयमानश्चिरस्थायितामनुभूयादिति।

श्रीउमानाथमिश्रः काव्यतीर्थः।

समालोचनम्।

कल्याणस्य गीताङ्कः।

मोहमयीस्थ-सत्सङ्ग-भवनतो वर्षचतुष्टयात् प्रकाश्यते कल्याणं नाम कल्याणं हिन्दीभाषामयं मासिकं पत्रम्। हिन्दीभाषायां ज्ञान-धर्म-भक्ति-विषयकमिदमेकमेवाद्वितीयं प्रकृष्टतरं मासिकं पत्रम्। एतस्य सम्पादकः श्रीमान् हनुमानप्रसाद पोद्दारमहाशयो विद्यते। गोरक्षपुरस्थ-गीता-यन्त्रालयतोऽस्य मुद्रणं भवति। एतस्य सञ्चालिका, भारतीयश्रेष्ठिनां धनवती संस्था सत्सङ्गभवननाम्नी विद्यते। धनबाहुल्यादेव विज्ञापन-समालोचनादि-विविध-प्रपञ्चरहितस्य कल्याणस्य सम्पादनम्, प्रकाशनम्, मुद्रणम्, पत्रादिकं सर्वमप्युन्नततरं रमणीयञ्च भवति। पत्रस्यास्य नीतिर्हिन्दीसंसारस्य महत्त्वं गौरवञ्च सम्पादयति। नैतादृशं समुन्नतविषयकं पत्रमेकमप्यासीदिति।

भाद्रमासे पत्रस्यास्य गीताङ्कः प्रकाशितो विद्यते। तं दृष्ट्वा हर्षोत्फुल्लमानसा वयं पत्र-सञ्चालकानामधिकारिणाञ्च प्रशंसां कर्तुं नैव पारयामः। हन्त! हिन्दीभाषायां प्रतिवर्षं न जाने कियन्ति पत्राणि विशिष्टाङ्कं प्रकाशयन्ति, परमेतस्य विशिष्टाङ्को वस्तुतो विशिष्ट एवाङ्कः। एतस्मिन्नाङ्के पञ्चशतपृष्ठानि, ऊनद्विशतचित्राणि च सन्ति। प्रायः सर्वेषां भारतीयानां पाश्चात्यानाञ्च प्रधान-विदुषां गीता-सम्बन्धिनो लेखाः सन्ति। गीताविषये समस्त-भूमण्डलवासिनां विद्वद्धुरीणानामेकत्र विचार-संग्रहः सुदुर्लभोऽतिप्रयत्नसाध्यश्च। गीताङ्कसम्पादकौ बाबाराघवदास-हनुमानप्रसाद-पोद्दार-महोदयौ हिन्दीजगतः संस्कृत-संसारस्य च परमधन्यवादार्हौ स्तः। हिन्दीभाषा-पत्रसम्पादकाः केवलं हिन्दी-पण्डितानामनूदितैश्चौरितैश्च व्यर्थ-लेखैः, कविताभासैः, रमणीनां रमणीयैश्चित्रैरथवा तेषामेव हिन्दी-पण्डितानां शतशः प्रकाशितैश्चित्रैर्विशिष्टाङ्कं विशेषयन्ति, समालोचनञ्च कारयन्ति प्रयत्नेन। गीताङ्कस्तु स्वयमेव मदयति मानसम्। लेखाश्चात्र तथा गम्भीराः, मननीयाः, गवेषणापूर्णाः सन्ति; येन विदुषां भवति महादानन्दसन्दोहतुन्दिलं चेतः। किम्बहुना, अयं द्रष्टव्य एवाङ्कः। सर्वैरपि हिन्दुभिरेव स्वसविधे संस्थापनीयोऽयमिति साग्रहं निवेदयामः। अस्य मूल्यमपि विचार्यमाणं नितरां स्वल्पं सार्द्धमुद्राद्वयमेव विद्यते। 'गीताप्रेस, गोरखपुर' इति सङ्केतेन लभ्यते।

वयमस्य कल्याणस्य कल्याणं कामयमानाः सञ्चालकेभ्यः सम्पादकेभ्यः साधुवादान्, धन्यवादान्, आशीर्वादाँश्च दद्मः ।

किसान—

सम्पादकः—श्रीसुखसम्पत्तिराय भण्डारी। किसान-कार्यालय-इन्दौरतः प्रकाश्यते। वार्षिक-मूल्यम्-३॥), कर्षकेभ्यो ३)।

पत्रमिदं कृषिशास्त्रप्रधानम्। कर्षकाणां भूमिपतीनाञ्च कृते नितरामुपकारजनकम्। कृषि सम्बन्धिनो वपन-रोपण-दोहद-वर्धन प्रभृतयः सर्वेऽपि विषयाः सङ्ग्राह्याः नितरामुपकारकाश्च सन्ति। कर्षकाणां हिताय नैतादृशमन्यत्पत्रं कुत्रापि हिन्दी भाषायां प्रकाश्यत इति दीर्घजीवनमस्य कामयामहे। अत्र महतां कृषिशास्त्रमर्मज्ञानां प्राच्य-पाश्चात्यविदुषां लेखाः प्रकाश्यन्ते। अस्यसम्पादका अपि हिन्दी भाषा-साहित्ये लब्धप्रतिष्ठा विद्वांसो लेखकाः सन्ति। आशास्महे दैनन्दिनमस्य समुन्नतिम्।

भूगोल—

सम्पादकः—श्रीरामनारायणमिश्रः, बी० ए० इविङ्गक्रिश्चियन-कालेज-प्रयागतोऽस्य प्रकाशनं भवति। वार्षिक मूल्यम्—३) मुद्रात्रयम्

हिन्दी भाषायांभूगोलविषयकमिदं पत्रम्। इदमपि पत्रं स्वविषये प्रधानतममेकमेव। अस्य विषयाः, पत्राणि, सम्पादनम्, प्रकाशनम्, मुद्रणम्, सर्वमपि सन्तोषप्रदम्। एतादृशस्य पत्रस्य विद्यते महत्यावश्यकता। मध्ये पत्रस्यास्य मुद्रणमवरुद्धमासात्, यतो न सन्त्येतस्य गम्भीर-विषयस्य पत्रस्य प्रियाः] पाठकाः। तथापि सम्पादकस्य प्रबलेनाध्यवसायेन प्रचलितमिदमिति पठित्वा भृशं दूयते चेतः। अस्तु कार्याण्यारभमाणं हि पुरुषं श्रीर्निषेवते। पत्रस्यास्य समुन्नतिं जगदीश्वरात् प्रार्थयामहे।

बालसुधा—

अमृतसरतः प्रकाश्यते।

बालोपयोगिपत्रमिदं पञ्जाबप्रान्तात् हिन्दीभाषायां प्रकाश्यते। मध्ये मध्ये पञ्जाबीभाषाऽपि भवति पञ्जाम्बु प्रदेशातो हिन्दीपत्रं प्रकाश्यत इति तु महत्सन्तोषास्पदमस्माकं प्रचार दृष्ट्या परमस्य पत्रस्य स्वरूपं सम्पादनञ्चालोक्य विषीदति; चेतः। बालकानां कृते शिशु-बालसखा-खिलौना-बालक-प्रभृतीनि पत्राणि हिन्दीभाषायां प्रकाशमायान्ति; परं तेषामग्रे बालसुधामालोक्य वयं चिन्तिता भवामः। बालसाहित्य-सम्पादने प्रकाशने च यावान् सामग्री-सम्भवः, अनुभवः विभवश्चापेक्ष्यते न तावानस्याः बालसुधायाः, सविध इति। न वयमस्याः सञ्चालकानामुत्साहह्रासं कुर्मः; प्रत्युत स्वीयां सम्मतिं प्रकटयामः। मन्ये सञ्चालकाः सम्पादकाश्चास्योत्थाने बद्धपरिकराः भविष्यन्ति, वयमस्याः पञ्चाम्बुप्रान्ते बालकेषु हिन्दी प्रचारिण्याः पत्रिकायाः सर्वदैव-समुन्नतिं कामयामहे।

सम्पादकौ,

आत्म-विनिवेदना।

अयि प्रेयांसः सुप्रभात-पाठकाः।

एतज्ज्ञात्वा परं विषादमुपगमिष्यन्ति भवन्तो यत् सुप्रभातमिदं विगतेषु दिवसेषु विगतजीवित-

मिवासीत्, आसीदित्यस्य नायमर्थो यदिदानीं नास्ति; अस्त्येव कष्टमयमेवास्य जीवनम्; परन्तु परिश्रमधनानामस्माकं सामाजिकानामयाचकत्व-मेवास्य प्रधानं कारणम् । अपरं कारणं पत्रस्य यथासमय-प्रकाशनाभावः । पत्रस्य यथासमय प्रकाशनाभावेन बहवो ग्राहका अस्य ग्राहकत्वं त्यक्तवन्तः । एतस्यापि कारणं धनाभाव एव । यथा समयं यन्त्रालये धनं दातुं न वयं प्रभवामः, यन्त्रा-लयश्चोपेक्षां करोति । धनाभावेनैवास्माकं सविधे सहायकस्य, भृत्यस्य चाभावः,येन यथा समयं कार्याणि स्युरिति । तथापि यथा कथमपि प्रचलतोऽ-स्य मध्येमार्गं महानन्तरायः सम्वृत्तः । अस्य प्राण भूतानां प्रधान-सञ्चालकानां प्रियसुहृदां श्रीगिरीश शुक्ल महोदयानां कैलाशवासेन कार्यकर्तृभावस्तु सञ्जात एव; परं सुप्रभातस्य धनाभावोऽपि सञ्जातः शतात्रयाधिकं धनं सुप्रभातस्य तेषामाकस्मिकनिध-नेन गतमिति सुप्रभातस्यैतावती हानिः कथं वोढुं शक्येति स्वयमेव विचारयिष्यन्ति भवन्तः तेषां द्विसहस्रमितं ऋणन्तु काशीस्थैस्तेषां मित्रैः संगृह्य प्रदत्तम् परं सुप्रभाते तदानीं न केनापि दृष्टिपातः कृत इति साम्प्रतं तदेवान्तरायरूपेण सुप्रभातस्या-वतिष्ठते । एतस्यामप्यवस्थायां यथाकथमपि यतस्त-तो धनानि संगृह्यास्य प्रकाशनाय प्रयतमानैरस्मा-भिः सुप्रभातस्य ग्राहक-समृद्धिरेव सर्वोत्तम उपाय-इत्यस्य सम्पादने नवीना व्यवस्था व्यधायि । एवं व्यवस्थासम्पादने महान् विलम्बः सञ्जातः, येन भवन्तो मनसि विचारयिष्यन्त्यन्यदेव । अत एवा-स्माभिः सुस्पष्टं प्राख्यापितेयमवस्था श्रीमतां पुरस्तात् ।

एतस्मिन् विपत्प्रतीकारकाले संस्कृत-साहित्य-समाज-प्रधानसदस्या अपि किंकर्तव्य-विमूढास्तूष्णीं स्थिताः । यैः सहायक-सदस्यत्वं स्वीक्रियते विद्व-द्भिस्तैरपि स्वीयं शुल्कं यथासमयं न प्रदीयते हन्त ! " कृशे कस्यास्ति सौहृदम् "

चिरकालात्पुनरस्माकं ज्येष्ठभ्रातृकल्पैः सुप्रभात स्य जीवनदातृभिः, भूतपूर्व-सुप्रभात-सूर्योदय-सम्पा दकैर्विद्वद्वरैः श्रीविन्ध्येश्वरीप्रसादशास्त्रिभिरस्य सम्पादने भूयान् भारो गृहीतः । तेऽस्य सम्पादने यावच्छक्यं सन्ति बद्धपरिकराः । एवमस्माकमभि-न्नतमहृदयेन, ज्येष्ठेन, शारदा-संस्कृत-ग्रन्थमाला-सम्पादकेन, भूतपूर्व-" सहस्रांशु " सम्पादकेन सुप्रभात-प्रकाशकेन विद्वद्वरेण्येन श्रीगौरीनाथ पाठकसाहित्याचार्यमहोदयेनास्य सुव्यवस्था स-म्पादने प्रदर्शितो महानुत्साहः, इत्येवं पुनरिदं नवीनया रचनया प्रकाशितं सुप्रभातं पाठकानां पुरस्तादुपतिष्ठते । विविधेऽस्मिन् कार्य व्यतिकरे यथाकथमप्यङ्कद्वयमिदं प्रकाश्य वयं पाठक-प्रवरान् प्रार्थयामहे, यत्तेऽप्यस्य जीवने यथायोग्यं साहाय्य-मवश्यं वितरन्तु । एतदप्यवधेयं यन्न वयं कमपि धनिकं राजानं वा याचाम ऋते संस्कृत भाषाप्रणयिभ्यः ।

अग्रिम आश्विनाङ्कोऽपि द्विसप्ताहाभ्यन्तर एव पाठकानां सेवायां समुपस्थास्यते, यथासमयं प्रकाशनायापेक्ष्यते कियानपि कालः । तत्कार्त्ति-काङ्कं यावदे-तत्विलम्बक्षतिपूरणे समर्थःस्यामित्या-शास्महे । तावच्च सुप्रभात-पाठका अस्य प्रचाराय प्रयतन्ताम् । यद्यस्य ग्राहक-सङ्ख्या द्विसहस्रमिता भवेत्तदातु न कदाप्यस्य हानिः सम्भाव्येत । तदर्थं

सर्वथा सर्वदा च ग्राहकैरनुग्राहकैर्यंतेलिममिति सानुरोधं निवेदयामः ।

*   *   *   *

लेखका अवदधतु ।

सुप्रभातस्य महत्त्वं गौरवं प्रचारः-सर्वमिदं सुसम्पादनाधीनमेव । न केवलं सुप्रभातस्यैव;सर्वेषामेव पत्राणाम् । तदिदानीं यावदर्थकष्टदुःखिता वयं सम्पादनमस्य कर्तुं न शक्नुमः । परं साम्प्रतमत्रैव विशेषतोऽस्माकं दृष्टिर्विद्यते सुप्रभाताधिकारिणाम्। तत्केचनावश्यका नियमा लेखकानां पुरस्तादुपस्थाप्यन्ते । लेखकाश्च सुदृढमवलोकयन्तु ।

१—लेखकैर्लेखाः सुस्पष्टाक्षरैर्लेख्याः, सुस्पष्टाक्षराणामभावेन लेखानां संशोधने महतीहानिर्भवति। कदाचित् सम्पादकानामभावेऽपि छात्राः संशोधनं कुर्वन्ति, तदा तु महाननर्थः संजायते, लेखकाश्च कुप्यन्ति । अस्पष्टाक्षराणां लेखानां परावर्तनेऽपि लेखकानामस्माकञ्च सङ्कोचमश्नुति चित्तम्,विलम्बश्च सञ्जायते । लेखकैः पत्रस्य मध्ये पार्श्वयोर्वा स्थानं रिक्तमेव त्यक्तव्यम् । अन्यथा परावर्तने, संशोधने परिवर्द्धने वा कष्टं भवति। यद्येवं नियमिता लेखा नागमिष्यन्तिचेद्वयं तेषां प्रकाशने सर्वथाऽसमर्था भविष्यामः ।

२—लेखकैर्लेखाः सरल-सरलाः प्रेषणीयाः । क्लिष्टसन्धयो दूरान्वयिनः क्लिष्टभाषानिबद्धा लेखा नैव प्रेषणीयाः । सरलतैवास्माकमादर्शभूता स्त्रियो बालकाश्छात्राश्चामुं पठन्ति, यदि तेनावगन्तुं प्रभविष्यन्ति चेत् व्यर्थ एव लेखकप्रयासः स्यात् । बहवो लेखकाः सरल-सरसां मधुरां स्वाभाविकीं भाषां विहाय कृत्रिमभाषालेखनेन पाण्डित्यं प्रदर्शयन्ति। अस्माकं मतेतु भाव-गाम्भीर्यं एव पाण्डित्यप्रकर्षः। भाषा तु सैवोन्नततमा, यया साधारणा अपि भावमवगच्छेयुः ।


३—लेखकैर्लेखा, संक्षिप्ततया लेख्याः । केचन विशेषणैर्लेखस्यभावं कदर्थयन्ति । व्यर्थ-विशेषणैः कवित्त्व-प्रख्यापनं भवति केवलम् । विशेषणप्रियैर्लेखकैर्गद्यकाव्यं लेखनीयम् । इतरविषयाणां लेखकैः संक्षिप्ता एव प्रबन्धा लेख्याः । कृशताभिमता लोके पीनता न तु शोभना । विशेषण-गवेषणे भाव-दौर्बल्यं भवतीति सर्वदा संक्षिप्ताः, सरलाः, भावप्रचुरा एव लेखाः प्रेषणीयाः । क्रमशः प्रकाशनीयाः दीर्घकाया लेखाः, सम्पूर्णा एव प्रेष्याः नान्यथा कथमपि प्रकाशनं स्यात् । पुस्तकान्यपि प्राचीनानि समस्तान्येव लिखित्वा प्रेषणीयानि ।

४—संस्कृत-पाठशाला-विद्यालय-च्छात्रावास-सनातनधर्मसभा-पण्डित-च्छात्रादिसम्बन्धिनः समाचाराः विना मूल्यं प्रकाशयिष्यन्ते । तत्तेषां प्रेषणमपि लेखकैर्विधेयम् । ते चापि संक्षिप्ताः स्युः । संक्षिप्तसमाचाराः सत्वरं प्रकाशिता भविष्यन्ति । तेषां कृते स्वतन्त्रतया स्थानं रिक्तं स्थास्यति ।

५—सामयिक-प्रवाहसम्बन्धिनः, खण्डनमण्डनात्मकाः, व्यक्तिगताक्षेप-परिपूर्णाः, साम्प्रदायिकता दूषिता वा लेखा न प्रकाशमेष्यन्ति । यतः सुप्रभाते साहित्य-विज्ञान-दर्शन-इतिहास-पुरातत्त्व - शिक्षा समाज--जीवनचरित्र--परिचय--समालोचनप्रभृति विषयाणामेव लेखाः प्रकाशिता भविष्यन्ति । सुप्रभातं संस्कृत-समाजे केवलं ज्ञान-विज्ञान-समृद्धिमपेक्षते ।

६—संस्कृतस्य विविध-विदुषां जीवितानां नाम शेषाणां वा जीवनचरित्राणि, तेषां रचनाः, संस्कृत विद्यालय-महाविद्यालयादीनां विशिष्टः परिचयः प्राचीन-नवीन-वाङ्मय-ग्रन्थरत्नानामालोचनादिकम्, तेषां परिचयश्च प्रत्यङ्कमेकेकशः प्रकाश्येत । तदर्थं लेखकैः सर्वथा यतनीयम् । सचित्रलेखानां प्रकाशने चित्रादिप्रवन्धो लेखकैरेव विधेयः ।

७—सम्पादकीय-पत्राणामुत्तराणि सप्ताहाभ्यन्तरे मेलिष्यन्ति । सम्पादकाः सप्ताहाभ्यन्तर एकस्मिन्नेव दिवसे पत्रोत्तराणि दास्यन्ति । आवश्यक पत्राणामुत्तराणि तु सदैव मेलिष्यन्ति । पत्रोत्तरालाभेन केचन क्षुब्धाः सन्ति लेखकास्तैरिदानीं तन्तव्यम् । अप्रकाश्यानां सत्वरं प्रकाश्यमाणानां च लेखानामुत्तराणि न प्रेषितानि भविष्यन्ति । मार्गव्यये प्राप्ते सति सप्ताह द्वयाभ्यन्तर एव अस्वीकृता लेखाः परावृत्ताः स्युः ।



वृद्ध-बाला-विवाहः, कतिपयशास्त्रिणां समर्थनश्च ।

चित्रकारः—श्रीकेदारनाथ शर्म्मा त्रिपाठी

आवश्यक-सूचना।

साम्प्रतं सुप्रभात-कार्यालयः गोदौलियास्थ-काशीनरेश-मन्दिरे, (यत्र प्रथमं "सनातनधर्मोदय"-कार्यालय आसीत्) सायं सार्द्धपञ्चादनं यावत् समुद्घाटितस्तिष्ठति। प्राचीनस्थानेऽपि (सुँघनी साहूका शिवालय, टेढीनीम) तस्मिन्नेव समये कार्यालयः सन्तिष्ठते। उभयत्र कार्यार्थिभिः समागन्तुं शक्यते।

संस्कृत-साहित्य-समाजः
काशी। | **श्रीमदनगोपाल शर्म्मा।**
कार्यालय-सहायकः,

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

षष्ठ-वर्षे
षष्ठोऽङ्कः

आश्विनः
१९८६

सुप्रभातम्

संस्कृत-साहित्य-समाजस्य सचित्रं मासिकं मुखपत्रम् ।

तिमिर-ततिमुदस्यद्भेदताराविलुम्पन्, नयदधि-सुरभाषाभापि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयञ्जाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्वतः 'सुप्रभातम्'॥

सम्पादकौ—श्रीकेदारनाथशर्म्मा सारस्वतः
श्रीविन्ध्येश्वरीप्रसादशास्त्री च,

व्यवस्थापकः—
कविराजः श्रीसत्यनारायणशास्त्री भिषक्शिरोमणिः

(टेढ़ीनीम, बनारस-सिटी)

वार्षिकं मूल्यम्—३)
माननीयेभ्यः—१२)
छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

लेख-सूची ।

चित्र-सूची ।

अतीत—१९८१-८२-८३-८४ संवत्सराणाम्

सुप्रभातम् ।

प्रथमवर्षस्य—१९८१

शोभनबन्धैः पुस्तकाकृत्या निबद्धम् । मूल्यम्—६) षण्मुद्राः । मार्गव्ययः पृथङ् नास्ति ।

तृतीयवर्षस्य—१९८३

पूर्ववद्बद्धम् । मूल्यम् २॥) सार्द्धमुद्राद्वयम् । मार्गव्ययः पृथक् ।≈) ।

चतुर्थवर्षस्य—१९८४

अतिमनोहरमिदम् निबद्धम् ।
मूल्यम् ३॥) सार्द्धमुद्रात्रयम् । मार्गव्ययः पृथक् ॥)

पञ्चमवर्षस्य—१९८५

अतिमनोहरं निबद्धम् । मूल्यम् ३॥) मार्गव्ययः पृथक् ॥)

प्रकीर्णाङ्काः

प्रकीर्णाङ्काः स्वल्पा एव विद्यन्ते । येषाम्पार्श्वे-

प्रथमवर्षस्य प्रत्येकाङ्कस्य-मूल्यम्—।) आणक-चतुष्टयम् । अङ्काः—आदर्शः, १, ४, ६, ८, ११, १२

द्वितीयवर्षस्य—प्रत्येकाङ्कस्य मूल्यम्—≈) आणकत्रयम् । अङ्काः—२,३,५,६,७,८,९,११,१२ ।

तृतीयवर्षस्य प्रत्येकाङ्कस्य मूल्यम्—=) आणकद्वयम्, अस्य सर्वेऽप्यङ्काः सन्ति ।

चतुर्थवर्षस्य पञ्चमस्य च प्रत्याङ्कस्य मूल्यम्—।) आणकचतुष्टयम् । द्वितीयं विना अस्य… सर्वेऽप्यङ्काः सन्ति ।

प्रकीर्णाङ्कानां मार्गव्ययो निर्धारितमूल्यतः पृथगेव । जिघृक्षुभिस्त्वरा कार्या । सुप्रभात-कार्यालयः, काशी…

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम्।

षष्ठ-वर्षे	सौर-आश्विन १९८६ विक्रमाब्दीये	षष्ठोऽङ्कः।

मारुति-शतकम्।

प्रणेता-स्वर्गीय-महर्षि-श्रीरामावतारशर्म्मा
महोदयः

शश्वद्विश्वस्य मुष्णन्त्वतशिथिविसरं शेमुषीकल्मषं द्रा-
गर्जा हर्यादिदेवैरतिरभसनुता गन्धवाहात्मजस्य।
पातु प्राक्षास्वपास्तप्रलयघनरवास्त्वन्तरं भूतलस्य
स्तौति प्रोद्यन्निमीलो भुजगपरिवृढः श्रोत्रनेत्राद्वयत्वम् ॥ १ ॥
यासामाशान्तगानां न भवति जलधिर्मानसीम्नेऽस्तपारो
यासां वासाय पूर्णं ध्रुवमतुलमिदं ब्राह्ममण्डं न भाण्डम्।
युष्माकं निर्विकल्पं प्रददतु सततं भावुकं स्थायुकं ता
गर्जाः पर्यासमर्यायुदितभयधुताद्युद्धुराः पावमानेः ॥ २ ॥
भानोः सप्तापि सप्तीन्सपदि तरलयत् कन्दरामन्दिराणि
व्याप्तं सप्ताचलानां जलमवदलयत्सप्तपाथोनिधीनाम्।
सप्तद्वीपस्थजन्तुश्रवणतटमटत्सप्तवर्गात्ममूर्तेः
सूनोर्निःश्यादजस्रं बहुलतरविपद्वर्जनं गर्जनं वः ॥ ३ ॥
लोकस्य क्षेममेकं द्वितयमपि जगत्खण्डयोर्व्यर्थनुवाः
नेत्राणि त्रीणि शम्भोर्व्यथयदथ नुतं किञ्च वेदैश्चतुर्भिः।
पञ्चास्यांस्त्रासयद्द्राक् षडपि शरजनेराननान्युत्कयत्स्ता-
द्भूत्यै संख्यादरिद्रान्विकलयदहितान्मारुतेर्गर्जितं वः ॥ ४ ॥
यस्मिन्ब्रह्माण्डमाक्रामति भयरभसत्रस्तगात्रः स्खलन्द्रा-
क्छक्रः सिंहासनाग्रात्प्रियमतनुचरैः श्रावितः स्तब्धगात्रः।
आनन्दान्न न्यपप्तद्दलयतु भवतां दग्धलङ्कस्य पङ्का-
च्छङ्काशून्यान्तरस्यानिलतनुजनुषोऽभ्यूर्जितं गर्जितं तत् ॥५॥
खर्जूदुर्जातबाहूत्भगदुदितबहुस्फूर्जथून्निर्जरारी-
न्संतर्ज्य प्राज्य राजद्द्विजरुतविलसत्सर्जखर्जूरभूर्जम्।
पर्जन्यस्याश्रितानां दशवदनवनं मृद्नतः पार्श्वदृश्ये-
र्गर्जोऽभ्यूर्जस्वलं वो ग्लपयतु सुमनोवर्जितं दुर्जनत्वम् ॥ ६ ॥
यस्मिन्नुद्याति तारापथमतनुभयो ध्यानमध्यास्त वेधाः
स्थाणुः स्थाणुत्वमागाच्चलितफणितनोरच्युतो न च्युतोऽभूत्।
सर्वान्धर्मान्तरायांस्त्वरितमधरयद् गन्धवाहेः समिद्धां
श्रद्धां धर्माध्वनीनां प्रदिशतु भवतामूर्जितं गर्जितं तत् ॥७॥
धाराधारानुदारान्सपदि तरलयत्स्फारबाणारवाणा-
मच्छामच्छातभूम्नां रुचिमवदलयद्दानवानां नवानाम्।
सत्रासत्राणसत्त्वं रसितमनलजस्यास्त्वमानावमाना-
नागानागासुकार्तान्निदधदशिवदं वक्रमायक्रमाय ॥ ८ ॥
हारं हारं गणानां विबुधपरिषदां किञ्च गाङ्गं तरङ्गं
तुङ्गं शीताद्रिशृङ्गं तुरगमुखवधूसंसदां दर्शयतस्तात्।

माहेन्द्रादुत्पतिष्णोः सितमणिशिखरान्मारुतेश्चारुतेजो
लाङ्गूलं क्लेशकूलङ्कषमतनु सदा साधुलोकस्य सिद्ध्यै ॥ ९ ॥

माहेन्द्रे सानुभागे हरितमणिरुचीपत्रजालावृतान्तं
पार्श्वेव्यावर्त्तमाने द्युमणिशशिफले विभ्रदभ्रान्तवृत्तेः ।
आरात्तारासहस्रप्रचुरसुमकिरं मारुतेर्वृक्षतुल्यं
पुच्छं गुच्छं ग्रहाणां क्षिपदखिलसुखं धुक्षयत्वक्षयं वः ॥१०॥

मूले मेरोर्मयूखैर्दिवसकरकृतात्पातैश्च मध्ये
कोटौ वैरिश्च पङ्केरुहरुचिनिचयैः पाटलापिङ्गलाभम् ।
कुर्वत्संवर्त्तकालज्वलदनलशिखाविभ्रमं वायुसूनो-
र्व्योम्नि द्रोणाचलार्थं द्रुतगमनभृतः पुच्छमास्तां विभूत्यै ॥११॥

विद्योतैः स्फाटिकाद्रेः क्वचिदतिधवले क्वापि सूक्ष्मस्य भाभिः
पिङ्गे श्यामे क्वचिच्छ्रीरमणरुचिचयैश्चञ्चरीकप्रकाशैः ।
यस्मिन्नाकाशमाक्रामति सुरझरिणीब्रह्मजासूर्यजानां
सङ्क्रान्तिः सुराणां भवति तदवतादाञ्जनेयस्या पुच्छम् ॥१२॥

भ्राजिष्णु भ्राम्यदभ्रभ्रमरभरभृतादभ्रमभ्रप्रभं द्राक्
स्वः सुभ्रूप्रभातं भणदिव बहुलैर्विभ्रमैर्भस्मशुभ्रम् ।
भूयो भूयो भ्रमीभिर्भ्रमयदुडुगणं बभ्रुरोमोद्धताभं
भ्राट् भ्रातृव्यलोकान्क्षितु हनुमतः पुष्पपुच्छं त्वदीयान् ॥१३॥

धूम्याभूमच्छलोद्यद्बहलतरशितिच्छायशैवालजास-
च्छन्नाम्निच्छद्मपद्मप्रकरपरिबलन्नाललीलां दधानः ।
लङ्कातङ्काय तारापथमभिपततो मारुतेर्वालिहस्त-
स्ताद्धस्तापाऽऽयताऽपायविनिहतिकृते वत्सराणां सहस्रम् ॥१४

"वेधा धैर्यन्दधातु प्रथयतु पटुतां निर्जरारिप्रमाथी
पृथ्वीं दध्याद्धृतिं च प्रमथपतिरसौ मारुतिर्लङ्घतेऽब्धिम् ।"
इत्युच्चैरन्तरीक्षे भणितुमिव जवादुत्थितः स्तात् श्रिये वः ॥१५॥

भूयाद्भूयानभूयांस्त्रिदिवमवतरन्पारदश्चाम्बुधीनां
लोकालोकावलोकाकलितगुरुमदः संमदायाश्रितानाम् ।
लाङ्गूलास्फोटशब्दो ज्वरमुपजनयन्यातुधानाप्रियाणां
देवानां कर्णकूपेष्वमृतमवकिरन्नञ्जनानन्दनस्य ॥ १६ ॥

सानन्दं देववृन्दैः समुदथ मुनिभिः किन्नरैरुत्ककर्णं
साक्रन्दं क्रव्यभुग्भिः सरभसमसुरेशाङ्गनाभिः श्रुतास्ते ।
भूयासुर्भूयसीनां द्रुतमुपनतये श्रेयसां सन्ततीनां
वायोर्बालस्य बालस्यदविधुतघना बालधिस्फोटशब्दाः ॥१७॥

लङ्कातङ्काय शङ्काकुलदनुजवधूभ्रूणविभ्रंशनार्थं
दम्भारम्भाय जम्भार्यनुसरणकृतां पुच्छविस्फोटशब्दः ।
हन्तानन्ताधिसन्तापितसकलजनानन्दनायोज्जिहानो
दद्यादद्यानवद्यान्युदयविलसितान्याञ्जनेयस्य तूर्णम् ॥ १८ ॥

दर्पप्राग्भारधूर्यो सुरपतिवनिताभ्रूणविभ्रंशदक्षो
रक्षोधीशान्दिधक्षोः कपिनिकरपतेर्बृंहितादित्यपक्षः ।
दत्तब्रह्मर्षितोषः सकलकलिमलध्वंसनिर्व्यूढरोषो
लाङ्गूलास्फोटघोषः श्रथयतु विततां कल्मषोत्थां व्यथां वः ॥१९॥

अकच्प्रत्ययार्थनिर्णयः ।

निर्णायकः—जयपुरराजगुरु-कथाभट्टवंश्यः
श्रीनन्दकिशोरशर्मा साहित्याचार्यः ।

प्रायोऽनेकेषां गैर्वाणवाणीवीणावादन-चित्तानां व्याकरणधुर्धराणां महतामपि वैयाकरणानां अकजर्थविवेके संशयो वरीवृत्यत इति मदीयोऽनुभवः। एकदा प्रसक्तानुप्रसक्त्या "उन्मूलयामासक, अधिजगातके, पचतकि" इत्येषां कोऽर्थ इति प्रकान्ते विवेके "अव्ययसर्वनाम्नामकच् प्राक् टेः" इत्यनेन विहितोऽकच्प्रत्ययः कस्मिन्नर्थे भवतीति शास्त्रार्थः प्रादुरभवत् ।

तत्र पूर्वपक्षः—

"अव्ययसर्वनाम्नामकच् प्राक्टेः" इत्यत्र सूत्रे नहि कोऽप्यर्थो निर्दिष्टः, न च भट्टोजिदीक्षितेन सिद्धान्तकौमुदीतत्त्वबोधिन्यां प्रौढमनोरमायां च, भट्टोजिदीक्षितपौत्र-हरिदीक्षितेन लघुशब्दरत्ने च, अस्यार्थविवेको विहितः, इति च कृत्वा, "अनिर्दिष्टार्थाः स्वार्थे भवन्तीति" न्यायात् केवलस्वार्थे पचतिरेव पचतकिरकजर्थः । "अज्ञाते" इत्यत्र तु अज्ञातविशेषत्वार्थनिर्देशात्, अज्ञातत्वोपाधिकेऽर्थे वर्त्तमानात् प्रातिपदिकात् तिङन्ताच्च स्वार्थे यथाविहितं प्रत्ययो जायते । अतोऽज्ञातं यथा तथा

पचतकिरकजर्थकः । इत्थं चाकच्प्रत्ययस्य प्रत्ययस्य द्वावर्थौ निरुपाधिकस्वार्थत्वं, अज्ञातत्वादिसोपाधिकस्वार्थत्वं चेति फलितम् ।

उत्तरपक्षविवरणम्—

"अव्ययसर्वनाम्नामकच् प्राक् टेः" इत्यत्र यद्यप्यर्थनिर्देशो न विहितः, तथापि "प्रागिवात्कः" इत्यधिकारस्यानुवृत्तिरत्रापि वर्तत एव । अन्यथा कप्रत्ययस्यापवादस्यानर्थक्यं प्रसज्येत । यतो विरोधे सत्येव बाध्यबाधकभावः संगच्छते । काकचो भिन्नदेशत्वान्नास्ति विरोधः । तत्कथं तस्यापवादकता । अकच् प्रत्ययष्टेः प्राक् भवति, कप्रत्ययस्तु टेः परत जायत इति भिन्नदेशत्वम् । नैष दोषः नावश्यं देशकृत एव विरोधः, किं तर्ह्यर्थकृतोऽपि । काकचोश्च प्रयोजनमेकमज्ञाताद्यर्थद्योतनं नाम । तेन तस्मिन्नकचाकृते प्रयोजनाभावात्को न भविष्यति । इत्थं च "अव्ययसर्वनाम्नामकच् प्राक् टेः" इतीदमपि अधिकारिसूत्रम् । ततः 'प्रागिवीयेष्वर्थेष्वकच् प्रत्ययो भवतीति निश्चयम् । प्रागिवीयार्थाश्च 'प्रागिवात्कः" इत्यधिकृत्य "इवे प्रतिकृतौ" इत्यवसानं यावत्पाणिनिना निर्दिष्टाः । ते यथा—"प्रागिवात्कः ५।३।७०। अव्ययसर्वनाम्नामकच् प्राक् टेः, कस्य च दः, अज्ञाते, कुत्सिते, संज्ञायां कन्, अनुकम्पायाम् नीतौ च तद्युक्तात्, बह्वचो मनुष्यनाम्नष्ठज्वा, घनिलचौ च, प्राचामुपादेरडज्वुचौ च, जातिनाम्नः कन्, अजितान्तस्योत्तरपदलोपश्च, ठाजादावूर्ध्वं द्वितीयादचः, शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्, अल्पे, ह्रस्वे, संज्ञायां कन्, कुटीशमीशुण्डाभ्यो रः, कुत्वा डुपच्, कासूगोणीभ्यां ष्टरच्, वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे, किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्, वहूनां जातिपरिप्रश्ने डतमच्, एकाच्च प्राचाम्, अवक्षेपणे कन्, इवे प्रतिकृतौ ५। ३। ९६ ।

नन्वत्रायमुपतिष्ठते पर्यनुयोगः, यदत्र विषये किं प्रमाणकमिति ? उत्तरे च—प्रमाणभूतग्रन्थप्रतीकाः सश्रीविभवमवधेयाः । तथाहि—

१—वामनकृत काशिकायां—"अव्ययसर्वनाम्नामकच् प्राक् टेः । ५। ३। ७१। तिङश्चेत्येव । अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेष्वकच् प्रत्ययो भवति । स च प्राक् टेर्न परतः । कस्यापवादः ।"

म० म० हरदत्तमिश्रकृत-पदमञ्जर्यां (काशिकाटीकायां) "अव्यय०" कस्यापवाद इति । ननु च विरोधे सति बाध्यबाधकभावो भवति, काकचोश्च भिन्नदेशत्वात् नास्ति विरोधस्तत्कथं तस्यापवाद इति । नावश्यं देशकृत एव विरोधः, किं तर्ह्यर्थकृतोऽपि । काकचोश्च प्रयोजनमेकं अज्ञाताद्यर्थद्योतनं नाम । तस्मिन्नकचा कृते प्रयोजनाभावात् को न भविष्यति ।"

३—आचार्य जिनेन्द्रबुद्धिपादविरचितन्यासे (काशिकाविवरणपञ्जिकायाम्) "ननु च भिन्नदेशत्वात् काकचोर्विरोधो नास्ति । न चासति विरोधे बाध्यबाधकभावः । तत्कथं तस्यापवादः । नैष दोषः । नैवावश्यं देशकृत एव विरोधो भवति । अपि त्वर्थकृतोऽपीत्युक्तम् । अकच् प्रत्ययेन समानोऽर्थ इति अकचा द्योतितत्वात् तस्यार्थस्य कप्रत्ययो न भविष्यति ।"

४-श्रीशचन्द्रवसु बी. ए. महोदयेनापि काशिकायां इङ्गलिशानुवादे इदमेवोक्तं निर्णीतं च ।

५—नागोजीभट्टैरपि—"अधिकारिसूत्रमिदमित्येवोक्तम् । यथा-लघुशब्देन्दुशेखरे "अव्यय०"५।३।७१।

अयमप्यधिकारः । “ अज्ञाते ” इत्यादौ तु वाक्यभेदेनाकचोऽपि विधानं बोध्यम् ।”

६—भैरवमिश्रकृतभैरव्यां(लघुशब्देन्दुशेखरटीकायां) “अव्ययसर्वना०” अत्र प्रागिवादित्यनुवर्त्तते । एवं चाव्ययादिभ्यः प्रागिवाद्यर्थास्तेषु-टेः प्रागकच् “कस्यायमपवादः ।” इति ।

७—अन्नम्भट्टकृतव्याकरणमिताक्षरायाम्—“ अव्यय० ” अव्ययानां सर्वनाम्नां च टेः प्रागकच् स्यात् प्रागिवार्थे कापवादः ।”

८—वासुदेवदीक्षितकृत-बालमनोरमायाम् (सिद्धान्तकौमुदीटीकायाम्) “‘अव्यय०’ अनुवर्त्तत इति मण्डूकप्लुत्येति शेषः । अव्ययसर्वनाम्नां तिङन्तानां च टेः प्रागकच्-प्रत्ययः स्यादित्यर्थः । अकचि ककारादकार उच्चारणार्थः । चकार इत् । ककारान्तः प्रत्ययः । अयमपि प्रागिवादधिकारः ।”

९—रामचन्द्राचार्य-कृत-प्रक्रियाकौमुद्याम् (अष्टाध्यायीवृत्तौ) “‘अव्ययसर्वनाम्ना’ अव्ययानां सर्वनाम्नां च टेः प्रागकच् स्यात् अज्ञाताद्यर्थे ।”

१०—विठलाचार्यकृतप्रसादाख्यायाम् (प्रक्रियाकौमुदीटीकायाम्) “‘अव्यय’ ’ इति काकचोर्विभिन्नदेशत्वाद् विरोधो नास्ति यद्यपि अस्ति त्वर्थकृतः, तेन बाध्यबाधकतानयोः इतीममर्थमभिप्रेत्याह-कापवाद इति ।

११—धरणीधर-काशीनाथकृत-वैयाकरणसर्वस्वाख्यायां (पाणिनीयसूत्रवृत्तौ) “‘अव्यय’ अव्ययानां सर्वनाम्नां तिङन्तानां च प्रागिवीयेष्वर्थेषु टेः प्रागकच् स्यात् ।”

१२—म० म० पुरुषोत्तमदेवकृत-भाषावृत्याख्यायाम्—(पाणिनीयसूत्रवृत्तौ) “‘अव्यय’ अव्ययसर्वनाम्नां टेः प्रागकच् स्यात् प्रागिवार्थे ।”

एतेषु सर्वेषु प्रमाणग्रन्थेषु सुस्पष्टमुद्घोष्यते यदकच् प्रत्ययः प्रागिवाद्यर्थे भवतीति । तेनाकच्-प्रत्ययस्य निरुपाधिकस्वार्थत्वं चेति द्वावर्थाविति वदन्तो निराकृताः । यत्र च निरुपाधिकः स्वार्थः स्वीक्रियते, तत्र किंचिद्ज्ञापकं, वार्तिकं वा प्रमापकं भवति । यथा—

१—पतञ्जलिकृते महाभाष्ये-“सामिवचने प्रतिषेधोऽनर्थकः । किं कारणम् प्रकृत्यभिहितत्वात् । प्रकृत्यभिहितः सोऽर्थ इति कृत्वा न भविष्यति ।”

२—कैय्यटप्रदीपे च-“एवं तर्हि न सामिवचन इति प्रतिषेधेन स्वार्थिकः कन्नस्तीति ज्ञाप्यते । नहि सामिकृतादिभ्योऽनत्यन्तगतौ क्तादित्यस्य कनः प्रसङ्गोऽसमासे सामिवचने नैवनत्यन्तगतेर्द्योतनात् । समासेभ्यस्तु क्तान्तस्वभावाच्च कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात् सामिशब्दस्य गतिकारकत्वाभावात् । तस्मात्स्वार्थिकस्यैवासौ कनो निषेधः स्वार्थिकं कनं ज्ञापयति ।”

३—व्याकरणमिताक्षरायां च-“सामिवचने ५।४।५। सामिवचने उपपदे क्तान्तात् कन् न स्यात् । सामिकृतम् । अर्धकृतम् । नेमकृतम् । अनत्यन्तगतेः साम्यादिशब्दैरेव (ब्दैर) प्रतिपादनेन कनोऽप्रसङ्गान्निषेधानुपपत्तेः स्वार्थेऽपि प्रतिषेधेन ज्ञाप्यते । तेनामिन्नतरकं बहुतरकमित्याद्युपपन्नम् ।”

यथा वा (तीयादीकक् स्वार्थे वाच्यः) (तमबाद्यन्तात् स्वार्थे कन् वक्तव्यः) इत्यादिवार्तिके वा निरुपाधिकस्वार्थज्ञापिके ।

इत्थं च प्रकृतसंगतैः-अज्ञातत्वकुत्सितत्वोपाधिक एव स्वार्थोऽकच्प्रत्ययस्वार्थो ननु निरुपाधिकः स्वार्थः । यथा—

१—महाभाष्ये—कुत्सिते सिद्धं तु येन कुत्सितादिवचनं तद्युक्तात्स्वार्थे प्रत्ययविधानात् । सिद्धमेतत् । कथम् येन कुत्सादयोऽर्था गम्यन्ते तद्युक्तात्स्वार्थे प्रत्ययो भवतीति वक्तव्यम् ।

कैय्यटप्रदीपेऽपि—"सिद्धंत्विति" येन धर्मेण कुत्सादयस्तद्धर्मयुक्तार्थाभिधायिनः स्वार्थे प्रत्ययविधानमित्यर्थः ।

३—हरदत्तपदमञ्जर्यां च—'अज्ञाते' अज्ञातविशेषोऽज्ञातः । अज्ञातत्वोपाधिकेऽर्थे वर्त्तमानात्प्रातिपदिकात् तिङन्ताच्च स्वार्थे यथाविहितं प्रत्ययो भवति । निष्कृष्टार्थस्त्वयमत्र—अत्र निरुपाध्यवच्छिन्न-प्रकृत्यर्थ-परिचयकत्वस्वार्थत्वमकजो नार्थः, किन्तु अज्ञाताद्यन्यतमार्थविषयकोपाध्यवच्छिन्न-प्रकृत्यर्थपरिचायकत्वस्वार्थत्वमेवाकजोऽर्थ इति निर्णयः ।

सुभाषितानि ।

लेखकः—श्रीदामोदरशास्त्री भिषगाचार्यः, साङ्ख्य-सर्वदर्शन-तीर्थश्च

सर्वभूतेषु चात्मानं सवभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥
सुखं कामयमानस्य धर्मो हि सुखसाधनम् ।
तस्माद्धर्मादिविषये विधेयः परमादरः ॥
प्रवृत्तौ संयमः कार्यो निवृत्त्यभ्यासपूर्वकम् ।
सुख-दुःखाऽभावहेतुर्धर्मत्वेन निरूप्यते ॥
आकाङ्क्षाया ह्यसीमत्वादुच्छृङ्खलधियां कुतः ।
सुगमं देशनेतृत्वं स्वार्थत्यागफलं हि तत् ॥
विवेकरहितानां हि लोकानां यदि भूतले ।
आचार्यत्वं शास्त्रकृत्वं तदाऽनर्थस्य का कथा ॥
इतिहासापरिज्ञानात् सदाचार-विवर्जनात् ।
आलस्यादन्नदोषाच्च तमः संविशति नृषु ॥
सत्वं सुखमयं तेन विलुप्यति नृणां यदा ।
अन्धे तमसि मग्नानां विवेकस्योदयः कुतः ॥
कामिनी-काञ्चनत्यागी समदर्शी जितेन्द्रियः ।
मानी त्यागी जितक्रोधो नेतृत्वमधिगच्छति ॥
धर्मं व्याजीकृतं येन वैडालव्रतिकः शठः ।
वाङ्मात्रेणार्चनं तस्य न कर्त्तव्यमिति श्रुतिः ॥
वैद्यः पण्डितमानी च ब्राह्मणोऽशीतिवर्षकः ।
गौरी-विवाहवृत्तश्चेत् पश्वाचारो हि कीदृशः ॥
विनायकं प्रकुर्वाणो रचयामास वानरम् ।
यथा तथात्र विहिते धर्मे पापसमागमः ॥
आहारो भीश्च निद्रा च मैथुनं पशुवृत्तितः ।
नातिरिच्येत मनुजां धर्माचारं विना क्वचित् ॥
धार्मिको हि सुखी लोके दीर्घजीवी च धार्मिकः ।
ओजस्वी वलवांश्चैव तस्माद्धर्मपरो भवेत् ॥

नवयुवकेभ्यो वेद-सन्देशः ।

ले०—विद्यावाचस्पतिः श्रीवेदव्रतशास्त्री ।

अयि, साहित्यसरोविहारिणो राजहंसाः ! पाठक-प्रवराः !! ऋग्वेदे 'उपमातरंभूमिमिति' मन्त्रः समायाति । यस्यायं भावो यत् ते नवयुवका निजमातृभूमौ स्निह्यन्ति, निज प्रेयस्यै मातृभूम्यै स्वकीयान्प्राणाश्चार्पयन्ति, त एव मातृभूमेः सुपुत्राः सन्तीति ।

अयि भारतरत्नानि, यस्याः किल भारतजनन्या विप्रवराणां चरणारविन्देषूपविश्य, अधीयते स्म यूनानवासिनो विद्वद्वराः, यस्याः सभ्यतागौरवं

सर्वानतिशय्य वर्तते, यस्याः कलाकौशलमवलोक्य लज्जन्ते स्म, अन्ये यस्या अङ्के पितुराज्ञापालको भगवान् मर्यादापुरुषोत्तमः श्रीरामचन्द्र अवातीतरत्, तथा गोपालकः श्रीकृष्णचन्द्रः स्वकीयं शैशवं व्यतियापयामास । यस्याः सुपुत्रेण क्षात्रकुलकमलदिवाकरेण महाराजप्रतापसिंहेन दासतापाशबद्धाया भारतमातुः कृते नानाविधाः क्लेशाः सोढाः। स एव भारतगौरवः प्रतापसिंहो वर्तते, यो राजभवने राज्यसुखानि अनुभवतिस्म । यस्य च शुश्रूषायै विविधाः किङ्करा आसन् । स एव भारतमातुः संकटाकीर्णामवस्थामवलोकमवलोकं तस्या उद्धाराय बद्धपरिकरः स्वकीयां राज्यसम्पदं तृणीकृत्य सकुटुम्बः सिंहादिहिंस्रजीव-प्रचुरेषु अरण्येषु परिभ्रमतिस्म ।

एकतो निजवंशप्रदीपानां क्षुधार्त्तानां शिशूनां करुणक्रन्दनं श्रावं श्रावमपरतश्च स्वकीयां धर्मपत्नीमश्रुबिन्दुभिः खिन्नवदनां दृष्ट्वाऽपि निजलक्ष्यत एकमपि पदं न विचचाल परञ्च पुरुषसिंहवत्सर्वविपज्जालमविगणय्य, नैजं लक्ष्यं प्राप्तम् । अन्येऽपि गुरुतेगबहादुर–गुरुगोविन्दवीरवैरागीबन्दाछत्रपति–शिवाजीप्रभृतयो नरपुङ्गवा भारतभूमिरक्षायै स्वप्राणानाहूय पूर्वोक्तां वेदाज्ञां पर्यपालयन् वस्तुतः पुराकालेऽस्माकं जन्मभूः भारतमाता "स्वर्गादपि गरीयसी" आसीत् । यस्मिन्काले भारतमाता समस्तदेशशेखरीभूता मुक्तपाशबन्धनाआसीत्तदाहर्निशं यज्ञसुरभैर्दिशिदिशि प्रसरो व्यराजत । क्वचिद् वेद-कीर्तनं विदार्य नभोमण्डलं परितो गुञ्जति स्म । सर्वे वर्णाः स्व-स्वधर्मं सम्यक्तया परिपालयन्ति स्म । ब्राह्मणाः सर्वविद्या ... आसन् । तथा

स्वर्गस्था देवा अपि भारतवर्षस्य गुणकीर्तनं कुर्वन्तिस्म, कामयन्तेस्म, यदास्माकमपि भारतवर्षेजन्म स्यादिति । अहो ! 'दैवी विचित्रा गतिः ।'

अधुनाऽपि सर्वस्वत्यागी एककौपीनधारी महात्मा गान्धी, लोकमान्यो मदनमोहनमालवीयः, विज्ञानविद्याविशारदा जगदीशचन्द्रबोस–इत्यादयो भारतमातुः सुपुत्राः सन्ति,ये निजमातुर्मस्तिष्कमुन्नतं धारयन्ति । यद्यपि-उपरिलिखिता भारतमातुः सुपुत्रा इदानीमपि सन्ति परञ्चापर्याप्ताः । ते च निजमातरं सेवमाना वृद्धत्वमापन्नाः । अमृतवीरा इदानीमस्माकं जन्मभूः भारतमाता–या पूर्वं 'स्वर्गादपि गरीयसी' आसीत् साऽधुना दासतापाशैर्निगडिता सती अश्रूणि विमुञ्चति, दासताबन्धनैश्च विमोक्तुं स्वसुपुत्रान्नवयुवकानुत्कण्ठतयावलोकयति । भो भोः संस्कृतपाठकाः ! न कथयितुमुत्सहे भारतमातुःकष्टमयीं दशाम् । क्वचिच्छतशोऽन्नवस्त्रविहीना दीना म्रियन्ते, क्वचिद् बाला अबलाः परिबोभूयन्ते, क्वचिदस्माकं पूज्या नेतारो विनापराधं ताड्यन्ते, क्वचिदनुचित-करग्रहेण कृषकाश्च क्लिश्यन्ते । अहो दुःखस्य पराकाष्ठा ?

अयि भारतशिरोमणयो युवकाः ! कदापर्यन्तमेतानि दुःखानि सहमानाः स्थास्यन्ति । पूर्वोक्तां वेदाज्ञां मनसि कृत्य निजभारतमातरं विमोक्तुं दासतारज्जुभिर्विमोक्तुं यतध्वम् । सर्वे भारतमातरं प्रति स्व-स्वकर्त्तव्यं परिपालयन्तु । 'स्वराज्यप्राप्तिर्नो जन्मसिद्धोऽधिकारः' इति मन्त्रञ्च दिवानिशं स्मरन्तो वेद-निर्दिष्टमार्गानुसारं निज-निजकार्ये संलग्नमनस्का भवन्तु नाम । सर्वे स्वदेशीयवस्त्राणि परिधारयन्तु अन्यांश्च तद्धारणे प्रेरयन्तु, बृटिशवस्तूनि बहिष्कुर्वन्तु, मद्यपानादिकं दूरीकुर्वन्तु, अन्यांश्च

सम्भ्रान्तूनतद्दूरीकरणे प्रार्थयन्तु आर्यवीराः! अमरीकानिवासिभिः, आर्यलैण्डवास्तव्यैश्च नवयुवकैर्निज-निजमातृभूमिकृते किं किं न वृतमिति नास्ति तिरोहितमितिहासपाठिनाम्।

नवयुवकवृन्दाः! साम्प्रतं समयं चेदनवधानतो विस्मरिष्यथ तदा भाविनि इतिवृत्ते युष्माकं नाम समीचीनाक्षरेषु लिखितं न भविष्यति, यदधीत्य भारतवर्षस्य भविनो नवयुवका युष्मन्नामतो लज्जिस्यन्ते। स्मरन्तु नाम, श्रीकृष्णवाक्यम्—
"अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते॥"

महाराजाधिराज-श्रीकामेश्वरशर्म्मसिंह महोदयानाम्
द्वारवङ्ग (दरभङ्गा)- नरेश्वराणाम्
शुभाभिनन्दनम्।

येयन्नाम पुरा पुरातनदेवगवी, वैदिकवर्णाश्रमधर्म-मर्य्यादा-परिपालन-समेधन-निरतानां समेषामेव भारतीयानां पुरुषार्थचतुष्टयप्रसविनी प्रबभूव, हन्ताद्य सैवास्मदलसतया पाश्चात्यशिक्षादीक्षाविदूषितान्तःकरणैः साम्प्रतिकैर्भारतीयार्य्यसभ्यतानभिज्ञैः स्वच्छन्दाचारैरवहेल्यमाना, नितरां कृशतामुपगता सर्वतोऽपीदानीं दैनंदिनं कार्श्यायैव कल्पत इति न तिरोहितं देशकालात्मविदां श्रीमताम्। एतादृशे घोरतरेऽप्यस्मिन्नवसरे, श्रीमन्तो महामहिमशालिनः स्वादम्योत्साह-प्रशस्यतरप्रयासादिभिरन्तरायततीस्तिरस्कुर्वन्तः सुरभारतीसमुन्नत्यै सततं प्रयतन्त एव। केवलं यतमाना एव न सन्ति, किन्तु तैस्तैरुपायैर्विविधविद्याया अलौकिकाद्भुतमहिमपरिदर्शनेनाधुनिक-नवयुवकान्तःकरणमेव परिवर्तितवन्त इति सर्वेषामेव सुधियां सुविदितमास्ते।

जागर्तियुगेऽप्यस्मिन् वर्तमान-प्रगति-प्रतिस्पर्धा-परिचय-विमुखे संस्कृतसंसारे तामेतां प्रसरन्तीं दुर्बलतामुत्सारयितुम्, कर्मण्यतां प्रबलताञ्च सम्पादयितुमत्र संस्कृतविद्याकेन्द्रे संस्कृत-विदुषां प्रधान-साम्राज्ये वाराणसी-नगरे कतिपयैर्महद्भिर्देशकालात्मविद्भिर्विविध-संकटापन्नैरपि स्वोत्साहमात्रैकधनैः संस्कृत विद्वद्भिः सम्भूयैका प्रबला सङ्घशक्तिः संस्थापिता। या च संस्कृत-साहित्य-समाजनाम्ना श्रीमतां पुरतः सविनयं सोत्साहं सोल्लासञ्च समुपस्थिता विद्यते। यतश्च प्रसृतं, संस्कृत-संसारे नवयुग-प्रवर्त्तकम्, पण्डित-समाजे जागर्तिजनकम्, संस्कृत-नवयुवक-मण्डले जीवनाधायकं वास्तविक-ज्ञान-विज्ञान-प्रचारकं 'सुप्रभातं' नाम समस्तसुधीसमाजसमादृतं मासिकं सचित्रं संस्कृतपत्रं विजयतेतराम्।

"नाब्रह्म क्षात्रमृध्नोति नाक्षात्रं ब्रह्म वर्धते । ब्रह्म क्षात्रं तु सम्पृक्तमिह चामुत्र-वर्द्धते" इति मानवीयम्, "अग्रतश्चतुरो वेदान् पृष्ठतः सशरं धनुः, इदं ब्राह्ममिदं क्षात्रं शापादपि शरादपि" इति भारतीयश्चानुशासनं स्मार स्मारं महामहिमशालिनि श्रोत्रिय-भूदेवकुले प्रसूता महाराजाधिराजाः सन्तः श्रीमन्त एव ब्राह्मक्षात्रशक्तिसम्पृक्ता हिन्दु-समाजस्य वास्तविकनेतृपदे विराजन्त इति नास्ति संशयलेशोऽपि । एष चान्तर्बहिरेकरूपो मिथ्याडम्बरशून्यः संस्कृत-साहित्य-समाजः स्वसमुन्नत्यै साकं सनातनधर्मेण, भवा-दृशानेव नवनवोन्मेषशालिनः सर्वविधशक्तिसम्पन्नान् नवयुवक-मण्डल-मण्डनायमानान् निर्निमेषमवलोकमानस्तत्रभवतां करावलम्बनमीहते ।

श्रीमतां च पुरातनाभिनवप्रगतिपरिचितानां देशकालात्मविदाम्, भाविनि युगपरिवर्तन-सङ्घर्षे सोत्साह-संलग्नमानसानाम्, अभिनवोल्लसित-हृदयानां द्विजकुल-कुमुद-कलाधराणाम्, तत्रभवतां पुरतः स्वीयस्निग्धान्तःकरणभावपुष्पाञ्जलिं समर्पयन्तः श्रीमद्भ्यः सम्भाव्यमानां विश्वजनीनां सुरभारती-समुन्नतिं समभिलषन्तश्च श्रीकाशी-विश्वेश्वरादभ्यर्थयामहे, यत् स सर्वात्मा श्रीमतः प्रजावत्सलान्, वैदिकसनातनधर्म-संरक्षण-परायणान् सुरभारती-संवर्धन-बद्धपरिकरान्, चिरजीविनो विदध्यादितिशम् ।

वाराणसी मार्गशीर्षः, कृष्ण-तृतीया, १९८६.	अभिनन्दितारः— संस्कृत-साहित्य-समाज-सदस्याः ।

'बरवै' विलासः।

[ले०—भट्ट श्रीमथुरानाथ शास्त्री साहित्याचार्यः, जयपुरस्थः।]

'बरवै' नामकं व्रजभाषायां सुप्रसिद्धं छन्दः। को वा हिन्दुसन्तानो महात्मनस्तुलसीदास गोस्वामिनो 'बरवै' रामायणं न श्रुतवान्? नवावखानखानामहोदयस्य बरवैपद्यानि हिन्दीभाषायाः प्रसिद्धं वस्तु। खानखानासमय एवाऽस्य छन्दसो नामकरणसंस्कारोऽभवदिति केचन वदन्ति। बहोः कालात्पूर्वं 'संमेलनपत्रिकायाम्' प्रकटितमप्यासीत्—केनचन यदेकस्य पद्यस्य मनोहारितया मुग्धः खानखानामहाभागः पद्यस्य विषयानुसारं तदेव नाम कृतवान्। यथाः—

"खानखानासविधे कश्चन युवक-सैनिकोऽपरदेशादागत्य भृतिं स्वीकृतवान्। आसीत्खानखानामहाभागस्तस्य सत्यसेवया सन्तुष्टः। एकदा स ह्यवकाशं प्राप्य स्वगृहं गतवान्। तत्र स्वामिसकाशादधिकमवकाशं प्रार्थ्य विवाहमपि कृतवान्। नवपरिणीतायाः प्रणयिन्या विलासैरवकाशकालो गच्छन्नपि नावाबुध्यत युवकेन। अवकाशावधिं व्यतीतमभिसूच्य युवको गन्तुमप्यासीत्सन्नद्धः; परं विरहवेदनां सोढुमपारयन्ती नवप्रणयिनी तं पुनः प्रणयपरवशमकार्षीत्। एवमवधेर्भूयान् समयस्तस्यातिक्रान्तोऽभूत्।

अथ यथाकथञ्चिदात्मानमवरुध्य, प्रणयिनीमाश्वास्य, स हि स्वामिनः सविधे गन्तुं सज्जति स्म। परमवधिव्यतिक्रमात्स्वामिनः कोपमाशङ्कमानः स हि मनसि भृशमासीद्भीरुकः। सुशिक्षिता तस्य प्रणयिनी, तदेतदनुमाय, सप्रणयमवादीत्—"प्राणनाथ! अपराधिन्या अस्या दास्याः कृते बहुलं मनःकष्टमनुभूयते भवता। किमहं कुर्याम्, अभूदज्ञानेऽपराधः। इदानीमहं किञ्चिद्विलिख्य श्रीमते समर्पयामि। एतद्धि गुणिगण-जीवातवे स्वामिने समर्पणीयम्। मन्ये न तावान् कोपो भवेदिति।"

पत्र-सम्पुटितं तं लेखमुपादाय स हि स्वामिनः सेवायामुपातिष्ठत। अन्यान्यैर्भृत्यैः स्वामिनः कोपः सूचितोऽभूदस्मै। सभयकम्पः स हि खानखानामहोदयस्य सम्मुखे समुपातिष्ठत। क्रोधेन विरज्यमानः स हि दृष्ट्वाप्येनं न किञ्चिदुवाच। अतिभयाकुलः स आत्मनेऽप्रभवन्, तदेतत्पत्रं संकुचन्निव स्वामिनः पदतले स्थापयामास। कुतूहलाविष्टेन दृष्टं तेन तदेतत्पद्यं लिखितम्।

"'प्रेम' प्रीतिको 'बिरवा', चलेहु लगाय।
सींचन की सुधि लीजो, मुरझि न जाय॥"

कवितातलस्पर्शी खानखानामहाभागः पद्यस्यास्य भावप्रवणतया, लेखकस्य सत्यतमेन कारुण्यप्रकाशनेन च द्रवीकृत इव सकरुणगौरवया दृष्ट्या तमापादचूडमीक्षितवान्। पृष्टवांश्च सस्नेहं पद्यस्यास्य निर्मातारम्। युवकः सत्यं सत्यमस्य

१ अयमेव पाठो दृष्ट इति स्मरामि।

पद्यस्यागमं निवेदयामास । तत्पत्न्याः कवित्वेन सुप्रीतमनाः खानखानामहाभागः सुबहु पारितोषिकं प्रदाय युवकमेनं स्वगेहं विसर्जितवान् । गेहस्थितायैवास्मै प्रतिमासं नियतं वेतनमाजीवनं प्रेषयितुमादिष्टवान् कोषाध्यक्षायेति । पद्यस्यास्य वर्ण्यानुसारं 'बरवा' इति नाम नियम्य, अनेनैव च्छन्दसा भूयः कवयामास-इति ।"

खानखानामहाभागात्पूर्वं 'बरवै' च्छन्दसि कविता आसीन्न वा ? छन्दःशास्त्रेष्वस्य क्व उल्लेख ? इत्यादिविषयस्तु अन्वेषकमहाभागानां विचार विषयः । परमस्य च्छन्दसो व्रजभाषायामभूद्भूयानादर इति वयं जानीमः । अत एव गोस्वामिमहाभागेन, अस्मिन्नपि च्छन्दसि संक्षिप्तं रामायणमाबद्धम् । अस्तु, संस्कृतभाषायामपि छन्दसोऽस्य निर्वाहः कथमिवाऽभवदिति श्रीमत्सेवायां कानिचित्पद्यानि परीक्षार्थमुपस्थापयामि । 'कविता-निकुञ्ज' नाम्ना मुद्र्यमाणाद्बृहन्निबन्धादुद्धृत्य तानि यथावकाशमधस्तात्प्रकाश्यन्ते ।

"द्वादशमासी[1] ।"

मम सखि ! चैत्रे चन्दननिचयचरेण ।
चित्रं विचलति चेतः पवनभरेण ॥ १ ॥

चन्दनतरुखण्डचारिणापि पवनभरेण मम चेतो खिद्यत इति चित्रमित्यर्थः ॥ १ ॥

वैशाखे स्मरविशिखा विक्लवयन्ति ।
विषमविरहविषवह्निं वपुषि वमन्ति ॥ २ ॥

विषमं विरहविषाग्निं कामबाणा मद्वपुषि वमन्ति

ज्येष्ठे ज्वरमिव जनयति जलजसखोऽपि ।
जिह्मं जीवति जीवनधनरहितोऽपि ॥ ३ ॥

कमलिनीबन्धुरपि (सूर्यः) तापज्वरमिव जनयति । जीवनधनेन (प्रियतमेन) रहितो मादृशो जनः कुटिलं जीवति । वल्लभरहितस्य जीवनं निष्फलमेवेत्यर्थः ॥ ३ ॥

आषाढ़े मुहुराशा घनैरपूरि ।
प्रियसखि ! मम पुनराशा भ्रमयति भूरि ॥४॥

आशा (दिक्) मेघैः पूरिता । मम आशा (मनोरथः) मां भ्रामयत्येव ॥ ४ ॥

नभसि नभसि नवजलदैर्वृष्टिरकारि ।
चित्रं सखि ! मम दृग्भ्यां प्रवहति वारि ॥५॥

श्रावणे, नभसि (आकाशे) वृष्टिः कृता । मम नेत्रयोस्तु जलप्रवाह इत्यसङ्गतिः ॥ ५ ॥

भाद्रे घनजलभरिताः सरिता भान्ति ।
आशाः पश्य ! कदा मे हरिता भान्ति ॥६॥

मम आशाः कदा पुनर्नवीकृता भवन्ति । पश्य ॥ ६ ॥

आश्विनमासि मृगाङ्को मुदितमुपैति ।
सखि ! मम मानससदने तिमिरमिवैति ॥७॥

चन्द्रो मोदं प्राप्नोति, भृशं दीप्यते इत्यर्थः । परं मम मानसे तथापि अन्धकार इवागच्छति ॥ ७ ॥

कार्तिकिके किल कमलामर्चति को न ?
क्लिश्यति मादृक्कृपणः क्रीडति यो न ॥ ८ ॥

यो विरहात्, न क्रीडति स मादृग् दीनः क्लिश्यति ॥ ८ ॥

मार्गे हैमनपवनो जवनो वाति ।
न मनो मदनोद्रेकाद् धृतिमिह याति ॥ ९ ॥

१ द्वादशमासानां समाहारः । व्रजभाषायां 'बारहमासी' नाम्ना नायिकाया विरहावस्थावर्णनपुरस्सरं द्वादशमासकार्याणि वर्ण्यन्ते । तदिदं संस्कृतेऽपि सम्भवतीति दर्शितमत्र ।

मार्गशीर्षे मदनवेगवृद्धेर्मम मनः धृतिं न गच्छति ॥ ९ ॥

पौषेऽपरिमितशीतं वपुरुपहन्ति ।
प्रियतमविरहः प्रियसखि ! तदपि निहन्ति ॥१०॥

शीतं मम शरीरं पूर्वमेव क्लेशयति, तदुपरि विरहो निहन्तीत्याशयः ॥ १० ॥

माघे मञ्जुदृशोऽमूर्मुदमुपयान्ति ।
मयि सखि ! मनसिजबाणा मुहुरभियान्ति ॥

फाल्गुन ! फलयसि कामांस्तदिह नमामि ।
प्रियतमसंगमसुखिनी मनसि न मामि ॥ १२ ॥

हे फाल्गुन ! त्वं मनोरथान्फलयसि, अतस्त्वां नमामि । प्रियसंगमात्सुखिनी मानसे न मामि । ममानन्दो हृदये न मातीत्यर्थः ॥ १२ ॥

विरहः ।

करधृतपाण्डुकपोला नयनजलेन ।
सिञ्चति हृदयं तप्तं स्मरदहनेन ॥ १३ ॥

स्मरदहनेन तप्तं हृदयं नयनजलेन सिञ्चति॥१३॥

ताम्यति शेते श्राम्यति शुचमुपयाति ।
सा विरहे तव, मुह्यति लुठति जहाति ॥ १४ ॥

भूमौ लोठति, पुनस्तल्लोठनं जहाति ॥ १४ ॥

विरहवह्निरयमद्भुतमिह समुदेति ।
नयनजलैः परिषेकादुपचयमेति ॥ १५ ॥

अग्निर्जलस्य सेकात् शाम्यति । परं विरहवह्निर्नयनजलसेकादुपचीयते ॥ १५ ॥

शयने लोठति शोचति विपिनगतेव ।
सा परिताम्यति शफरी स्थलनिहितेव ॥ १६ ॥

स्थले निहिता मत्सीव दृश्यते ॥ १६ ॥

विधुरोऽनिन्ददगस्त्यं विधुमभिवीक्ष्य ।
अस्तावीत्पितृलोकान् सपदि समीक्ष्य ॥ १७ ॥

विधुरो विरही । चन्द्रोत्पत्तेः पूर्वमेव किमिति न पीतोऽब्धिरिति अनिन्दत् । एते चन्द्रकलानाममृतं निपीय कृष्णपक्षं सम्पादयन्तीति पितॄनस्तावीत्॥१७॥

विकचकदम्बविडम्बकपुलकयुतेन ।
गगनमुदीक्ष्य विहसितं विरहिगणेन ॥ १८ ॥

विकचकदम्बपुष्पवत् रोमाञ्चकंटकयुक्तेन विरहिगणेन गगनं दृष्ट्वा हसितम् । प्रावृट् प्रारब्धा । इदानीमेव रोमाञ्चादेरियं दशा, तर्हि अग्रे न जीविष्यामस्तथा च विरहदुःखान्मुक्ता इत्याशयः ॥ १८ ॥

रूपवर्णनम् ।

विलुलितकुन्तलमेतन् मुखमवेहि ।
सरसि सशैवलमम्बुजमिदमवधेहि ॥ १९ ॥

विलुलिताः केशा यस्योपरि, ईदृशं मुखं नास्ति, किन्तु शैवलसहितं कमलं जानीहि ॥ १९ ॥

कनकमालिका कुचयोर्द्युतिमुपयाति ।
कमलकोषयोरुपरि स्रगिव विभाति ॥ २० ॥

कुचयोरुपरि सुवर्णरचिता माला, कमलकुड्मलयोरुपरि परिधापिता पीतयूथीमालिकेव भाति ॥ २० ॥

सुन्दरि ! कथं सरखिस्तव नयनस्य ।
सकृदवलोके हृदयं विशति जनस्य ॥ २१ ॥

महति नितम्बे विलसति रशनादाम ।
स्रगिव मतङ्गजकुम्भे विलुठति नाम ॥ २२ ॥

वातायनगा पश्यसि किं कुतुकेन ।
सुन्दरि ! दीना-पथिकान् विध्यसि केन ॥२३॥

नयनशरेण गच्छन्तः पथिका विद्धा भवन्ति । नयनयोः शरोपमत्वं व्यङ्ग्यम् ॥ २३ ॥

हृदयमितः प्रपलायितमतिरभसेन।
उचितं रचयसि दमयसि दृढनिगडेन॥ २४॥

मत्सकाशात्पलायितं मम मनस्त्वं दृढनिगडेन दमयसि, तत् उचितं करोषीति नायको नायिकामाह। पलायितो बन्दी यथा दृढेन निगडेन नियम्यते, तथा बलात्पलायिततया त्वं हृदयं वशीकृत्य दमयसीति सव्यङ्ग्यमुपालम्भते॥ २४॥

शोकप्रकाशः।

हा हन्त! सन्ततिगणं विलपन्तमन्तः
शान्त्यै विचिन्तनकृशान्तरमन्तरेण।
सन्त्यज्य सम्प्रति दिवंप्रति यत्प्रयातम्
व्यर्थं व्यधायि शशिनाथ! जवादनर्थः॥ १॥

त्वां पुत्ररत्नमतिमानसुखेन वृद्धो
नीत्वैव याऽनिशमुदारमुदं प्रपन्ना।
अङ्केऽकमद्य तनयं सुधियं विधाय
धातर्दधातु मिथिला हृदयेषु शान्तिम्॥ २॥

देशान्तरेऽपि ललितामलकीर्तिपूर्ति-
र्नान्ये महामहिमतो महित-प्रभावः।
सम्राट् समर्पित-पदेन विभूषितात्मा
किं कारणं सुरपुरीं सहसागतोऽसि॥ ३॥

विष्वग्विचक्षण-चयोपचिताऽपि नित्य-
माचारचञ्चुभिरलं परिसेविताऽपि।
भूदेव-वृन्द-परिवन्दन-नन्दिताऽपि
त्वामन्तरेण मिथिला शिथिला प्रजाता॥ ४॥

नष्टः कवेर्विपणिरत्नचयः समन्ता-
दस्तं गतः सुकविता-कनकाचलोऽपि।
शुष्कः सुशब्द-सरितामधिपो जवेन
देवान्तिकं गतवति त्वयि वाग्मधीशे॥ ५॥

श्रीशिवनन्दनमिश्रः मैथिलः।
टीकमाणि संस्कृत-कालेजः, काशी।

प्रणयी।

प्रीतिसंहतिरतीव दूतिका
याति कामपि दिशं भवादृशे।
नीयते रहसि किन्तयाऽनिशा-
माशया मिलसि वासना-वशः।

अङ्घ्रिरध्वनि दधाति न ध्वनिं
नाधुनाऽधिनयनं विधीयसे
साध्वसं मनसि बाधसे धियं
संधुनाति बत साधु सा वधूः।

नायनेषु नयनेन नीयते
चिह्नितं चरणयोश्चिरन्तनम्।
नो मनोरथरथो न सारथिः
साहसं यदसि यातु मातुरः।

वेद नैव वदनेषु केवलं
शान्तिरत्र हिममन्तमागता
तद्धृतैव पथिकायसे कथं
किं व्यथामपि कथापथे कृथाः।

—श्री श्यामानन्द झा।

हिन्दू-विश्वविद्यालयीय-रणवीर-संस्कृत-पाठशालायां बालचरसंस्था (Scouting) संस्थापिता विद्यते। संस्कृतच्छात्रेषु प्रथमोऽयं प्रयासः। संस्कृत-च्छात्राः सर्वेऽपि सम्मिलिता भवितुमर्हन्ति।

श्रीनरसिंहशुक्लः
शिक्षकः

सम्पादकीयम् ।

सुप्रभातस्य पुनर्जीवनम् ।

विगते संयुक्ताङ्के मया सुप्रभातस्थितिः प्रदर्शिताऽऽसीत् । प्रबन्धादिकं विधायाऽपि प्रतिज्ञालवतां



दानवीरः राजा बल्देवदास, विरला ।

सज्जनानां यथासमयं कारजकलापादसमर्थतया धनसाहाय्याभावात्, यन्त्रालयाधिकारिणश्च ऋणबाहुल्यात् सुप्रभातं समय-प्रतीक्षायामेतावन्तं कालमनैषीत् । दैववशाद्वा, ग्राहकानुग्राहकानामाशीर्वचोभिर्वा निःशब्दवर्षणमिवाम्बुधरस्य साहाय्यं प्राप्य सुप्रभातमिदं पुनरुज्जीवितमिति परं प्रमुदिता वयं ग्राहकमहोदयेभ्यः सहर्षं साधुवादान् वितरन्तः पुनः सेवायां समुपस्थिताः स्मः ।

सार्द्धद्विशतं मुद्राणां साहाय्यं विरला-महाविद्यालय-प्रधानाध्यापकानां पण्डित-प्रवराणां श्रीमतां सभापति शर्म्मोपाध्यायमहोदयानां प्रेरणया सुप्रसिद्धेन भारतीय-दानवीरेण श्रीमता राजा श्रीबलदेवदास विरला महोदयेन स्वकीय पौत्र विवाह-शुभोपलक्ष्ये कृतम् ।

एकदा प्रथममप्येवमेव सञ्जातमासीत् सुप्रभातस्यार्थसङ्कटम् । तदाऽपि तत्कालीन-समाजसभापतीनां स्वर्गीयमहामहोपाध्याय-श्रीप्रभुदत्तशास्त्रि महोदयानां प्रेरणया श्रीमता घनश्यामदास-विरला-महोदयेन पञ्चशतमुद्राणां साहाय्यं प्रदत्तमासीत् । द्वितीयवारमिदं साहाय्यं दत्त्वा पुनरप्युज्जीवितमिदमिति तेषां सहायकमहोदयानामुपकृतिविषये न किमपि वक्तुं पारयामहे । किम्बहुना—

विरलाः जानन्ति गुणान्, विरलाः कुर्वन्ति निर्धने स्नेहान् ।
विरलाः परकार्यरताः, परदुःखेनाऽपि दुःखिताः विरलाः ॥

संस्कृत-साहित्य-सम्मेलनम् ।

एतत्तु विदितमेव सर्वेषामेव शिक्षितानामशिक्षितानामपि यत् साम्प्रतयुगे भारतवर्षे सर्वमेव विपरीतमालोक्यते । अन्यस्य कार्याण्यन्ये कुर्वन्ति । ब्राह्मणाः खल्वितरजातीनां कार्याणि कुर्वते, इतरे च ब्राह्मणत्वाय प्रयतमाना ब्राह्मणानां कार्याणि कुर्वन्ति । संस्कृतज्ञाः पण्डिताः सेवाभावमापन्नाः स्वीयं सर्वमपि कार्यजातमपहाय दासानामिव स्वीयमात्मानं किमपि न गणयन्ति । अन्ये च तेषां कार्यं कुर्वन्तस्तेषां जीविकां जीवनञ्चापहरन्ति । हन्त ! भारतवर्षे सहस्रशः सन्ति संस्कृत-पण्डिताः, सहस्रशश्च सन्ति तत्प्रणयिनः; परं तेषां संग्रन्थनाय न कोऽपि दृश्यते प्रयत्नः । 'संघे शक्तिः कलौ युगे' इति पाठं मन्त्रवदेव सर्वे पठन्ति पण्डिताः, परं संघशक्तिं समवाप्तुं न मनागपि संकल्पन्त इति सर्वं विदितमेवास्ति सुप्रभात-पाठकानाम् ।

साम्प्रतं हिन्दी-भाषादिप्रान्तीयभाषाभिज्ञा अपण्डिता अपि संघशक्तिद्वारा न स्वीयमेव गौरवं वर्द्धयन्ति, परं तत्त-द्भाषायाः, तत्तत्साहित्यस्य चापि गौरवं वर्द्धयन्ति । धनम्, यशः, सौख्यञ्च विपुलमासादयन्तीति प्रत्यहं प्रत्यक्षमालोक-यन्तो भृशं दुःखिता भवामो यत्ते संस्कृतानभिज्ञा अपि संस्कृ-तग्रन्थानां तत्तद्विषयाणाञ्च भाषास्वनुवादं विधाय, समालोच-नादिकञ्च कुर्वन्ति । तेन च महान्तं लाभमप्यासादयन्ति । पण्डितास्तु व्यर्थमेव जीवनं यापयन्तो दरीदृश्यन्त इत्यादि विविधमालोच्य संस्कृतभाषाप्रणयिभिः द्वादशवर्षात् पूर्वं संस्कृतसाहित्य-सम्मेलननाम्नी काचन महती संस्था संस्था-पिताऽसीत् । यस्याश्च प्रधानकर्णधाराः श्रीमन्तोगिरिधरशर्म्म चतुर्वेदमहोदयाः सन्ति । एकादशवर्षाणि यावत् यथाकथमपि तेषामेव प्रबलया प्रयत्न-परम्परया सम्मेलनस्याधिवेशनानि भिन्नभिन्न-प्रान्तीय-नगरेषु सञ्जातानि । कर्णपुरेऽस्य सम्मेलन-स्य नवमाधिवेशनं महता समारम्भेण समभूत् । ततः प्रभृति वङ्गीय-संस्कृत-साहित्य-परिषदा सम्मेलन-प्रधानकार्यालयः क-लिकान्तायां नीतः । परिषदः प्रधानकर्मचारिणौ श्रीपशुपति-नाथ-श्रीपतिशास्त्रिणौ सम्मेलनस्य मन्त्रिणावास्ताम् । परं दुर्दैववशात्तयोराकस्मिकस्वर्गवासेन सम्मेलन-कार्यालयः परिषत्कार्यालये साम्प्रतं मञ्जूषापिनद्धः सन्तिष्ठते वर्षद्वयादिति हन्त ! सम्मेलनस्य दुरवस्थामिमामालोच्य भृशं दुःखिता भवामो वयम् । अस्माकं श्रद्धास्पदाः जयपुरीय-संस्कृतमहा-विद्यालयाध्यक्षा महामहोपाध्यायश्रीगिरिधरशर्म्मचतुर्वेदमहो-दयाः साम्प्रतं नितरामुदासीनाः सन्ति । सम्मेलनस्य भूतपूर्वसभापतयः महामहोपाध्यायश्रीहाथीभाईशास्त्रिणः, महामहोपाध्यायहरिनारायणशास्त्रिणः, म० म० प्रमथनाथ भट्टाचार्याः, म० म० दुर्गाचरणभट्टाचार्या अन्ये च सर्वे सम्मेलनकार्यकर्त्तार इदमपि न जानन्ति यत् क्व विद्यते सम्मे-लनमिति । एवमेव संस्कृत-संस्थासु प्रथमं कार्यकर्तारः समुत्साहं कुर्वन्ति, पश्चाच्च विघ्न-विहताः पलायन्ते । वयम-पीमां दशामनुभवामः समाजे ।

एवं कस्या अपि व्यापकसंस्कृत-संस्थाया अभावादेव बहवो धूर्त्ताः संस्कृतनाम्ना विविधाः सभाः संस्थाप्य जनता-वञ्चनमाचरन्ति । मया 'दिवाधूर्तैर्जगद्वञ्च्यते' इति शीर्षकेलेखे धूर्तस्यैकस्य वृत्तं प्रदर्शितमस्ति । एवमेव शतशः सन्ति संस्थाः, संस्थापकाश्च । यथा मुरादाबादमण्डले कुत्रापि अखिलभारतीयं विद्वत्सम्मेलनम्, संस्कृत-महामण्ड-लञ्च, मथुरायां व्रजमण्डलयूनिवर्सिटी, अलीगढनगरेऽपि किमपि निखिलभारतीयं विद्वत्सम्मेलनमस्ति, छपरानगरे अ० भा० देवभाषापरिषत्, सिकन्दराबादनगरे, आगरापुरे अजमेरनगरेप्येवं सन्ति संस्थाः । काश्यामपि ब्राह्मणकालेज नाम्नी संस्था विद्यते । किं कथयामः ? सर्वत्रैवाराजकता संस्कृतविदुषां च गभीरमौदासीन्यमालोच्य वयं सम्मेलनाधि-कारिभ्यः, विशेषतश्च तत्सञ्चालकेभ्यः श्रीमद्भ्यः श्रीगिरिधर शास्त्रिमहोदयेभ्यः साग्रहं प्रार्थयामो यत्ते नूनमिममेकमात्रं संस्कृत-विदुषां जीवनभूतं सम्मेलनं पुनरप्युज्जीवयन्तु । अन्यथा दशवर्षाणां परिश्रमोऽपि वृथा भवेत्, अग्रेऽपि कार्यं न प्रचलेत, धूर्तानां वञ्चकानाञ्च दुराचाराः समुन्नताः स्युरिति सर्वथाऽत्रविषये ध्यानमाकर्षयामः समेषामपि संस्कृतज्ञानाम् ।

* * *

शुद्धिशास्त्रम् ।

जातित्यक्तो हि कुरुते पापं जातिविवर्जितः ।
तत्पापं जातिबन्धूनां जायते मनुरब्रवीत् ॥
आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ।
जानन्तोऽपि न यच्छन्ति ते वै यान्ति समन्तु तैः ॥

—स्कन्दपुराण, १३८

साम्प्रतमेवास्माकं मान्यमित्रैः सनातनधर्म-महोपदेशकैर्धर्मगुरुभिर्विद्यावारिधि श्रीमत्पण्डित गोविन्दप्रसाद शास्त्रिभिः प्रकाशितं शुद्धिशास्त्रमालोक्य चिरोषिताऽस्माकमाशा-वल्लरी साफल्यं भजतेतरामिति वयं सबहुमानं सादरञ्च तेभ्यः साधुवादान् धन्यवादाँश्च वितरन्तः परं प्रमोदं प्राप्नुमः। इमे खलु शास्त्रिमहोदयाः सुचिरात् पञ्चापप्रान्ते देहलीप्रान्ते च सनातनधर्मस्य प्रवलं प्रचारं कुर्वन्त आसन्। स्वल्पकालादेव समुपस्थिते शुद्धि-प्रश्ने श्रीमन्तः शास्त्रिवर्याः सनातनधर्मानुकूलां शुद्धि-व्यवस्थां गवेषयन्तः कतिपयवर्षाणि यावत् वेद-धर्मशास्त्र-पुराणादिग्रन्थान् सुधीरं गभीरञ्चालोच्य शुद्धिशास्त्रं प्रणीतवन्तः।

विगते माघमासे श्रीमन्तः शास्त्रिमहोदयाः काश्यां समागत्य काशीस्थ-पण्डितानां स्वीयां गवेषणां प्रदर्शितवन्तः। तत्रास्माभिस्तेषामत्यावश्यकं समयोपयुक्तं विद्वत्तापूर्णञ्च गवेषणमालोक्य काशीस्थ टाउनहाल् नाम्नि सभामण्डपे दिनत्रयं यावत् शुद्धिशास्त्र-विषये भाषणान्यपि कारितान्यासन्। तत्र पूज्यपादा हिन्दूविश्वविद्यालयीय-संस्कृत विभाग-प्रधानाचार्याः पण्डित-सम्राजः महामहोपाध्यायाः, श्रीप्रमथनाथ भट्टाचार्याः, तथा महामहोपाध्यायाः कविचक्रवर्तिनः श्रीदेवीप्रसादशुक्ल महोदयाश्च सभापतिपदमलमकुर्वन्। तत्रैव च श्रीकाशीसनातनधर्म-पण्डितसभायाः शुद्धिविषयिणी घोषणा च समभवत्। तदानीमेव पुस्तकस्योपयोगिता विषये सर्वेषां विदुषां महती समालोचनाचलत्।

साम्प्रतमेव पुस्तकमिममालोक्यास्माकं हृदयं हर्षोत्फुल्लं जायते। चिरादस्माकमासीदियमिच्छा यत् शुद्धिविषये सनातनधर्मानुकूला काचनविशदा व्यवस्था प्रकाशिता भवेत्, येन सनातनधर्मिष्वपि सुचिरप्रसृतं तमो व्यपगच्छेदिति। तदाशातीतं शास्त्रिमहोदयानां साफल्यं नितरां सभाजयामः, प्रार्थयामश्च पण्डितान् यत्ते स्वीयमान्ध्यं दूरीकृत्य सन्देहदिग्धं मनो विशदीकुर्वन्तु।

* * * *

पुराणालोचनम्।

साम्प्रतं पुराणानां विषये भारतेवर्षे प्रचलितं महदान्दोलनम्। प्रथमं श्रीमद्दयानन्दस्वामिभिः पुराणेष्वतिशयोक्त्यलङ्कारस्य प्राधान्यमालोच्य पुराणानां निन्दाकृतासीत्। परं यतः प्रभृति शुद्धि-विषयकमान्दोलनं प्रसृतं तत आरभ्य पुराणानां विषये महती गवेषणा प्रचलति। पुराणेषु विविध-विषयानामद्भुतं संग्रहमालोक्य पुराणनिन्दका अपि तत्तत्वं विज्ञाय पुराणेषु श्रद्दधाना दृश्यन्ते। वयमपि यत्रतत्र पुराणेषु महत्त्वपूर्णानां विषयाणामालोचनमवलोक्य तत्र गवेषणस्यावश्यकत्वमनुभवामः। एतस्मिन् विषयेऽस्माकं मित्रवरेण श्रीमता छेदीझा शास्त्रिणा साहाय्यं प्रदातुं न केवलं प्रतिज्ञातमेव; किन्तु गवेषणाऽपि प्रारब्धा। अयं शास्त्रिमहोदयो व्याकरणाचार्य-पुराण-तीर्थसाहित्य-शिरोमणिशास्त्रिप्रभृति परीक्षाः समुत्तीर्य साम्प्रतं पुराणान्वेषणाय प्रबलं प्रयतमान आस्ते। तस्य विषय-प्रवेशात्मको लेखः प्राप्तोऽस्माभिः। अग्रेच तैः संग्रहः क्रियते। स्वचाग्रिमांकेषु यथा समयं प्रकाशितो भविष्यति यैरेतस्मिन् विषये गवेषणं कृतं स्यात्ते कृपया लेखान् प्रहिण्वन्तु।

शोकः!

मुजफ्फरपुरस्थ धर्मसमाज-संस्कृतकालेजे प्रधान-विद्वत्पदमलङ्कुर्वाणाः व्याकरणाचार्य-शिरोमणयो महामहोपाध्यायाः श्रीशशिनाथझा महोदयाः, कियतः कालात् काश्यामागत्य सुरभारत्या दैवदुर्विपाकेन कथाशेषं गता इति महच्छोकास्पदम्। इमे भारतवर्षीय-प्रधानपण्डितेषु प्रथमश्रेण्या-भासन्। हन्त!!!

सं० सा० समाजस्य पञ्चमवार्षिकम्

आय-व्यय-विवरणम् ।

आयः

७०।≡)३/४ पूर्ववर्षावशिष्टम्
१००८।-) छात्रशुल्कात्
३०३॥) सहायक-सदस्येभ्यः
३७) माननीय-सदस्येभ्यः
१३) प्रकीर्ण साहाय्यकम्
२५।।।=) विज्ञापनेभ्यः
३।-)।।। पुस्तक विक्रयात्
७।-) वेष्टन-बन्धन-सीवनादीनामायः
३४)॥१/४ कुसीदात्
३६॥) सुप्रभातस्य प्रकीर्ण-विक्रयात्
५१) संस्कृत सेवासङ्घाय दानम्
श्रीकेदारनाथशर्मणा स्वपितामहस्मृतौ प्रदत्तम्
१८॥=) प्रकीर्णकात्
२८=) श्रीकेदारनाथशर्मभ्यः प्राप्तात्
पूर्वावशिष्टात्
२॥≡) विशेषाङ्क विक्रयात्

१६६६-)।१/४ सर्वयोगः

ऋणं गृहीतम्

१४॥-) ग्राहकाणाम्
१५०) श्रीकोषाध्यक्ष महोदयेभ्यो गृहीतम्
६।-)।।। सेविङ्गवेङ्कतः
२७।।।=)॥ संस्कृत ग्रन्थ मालायाः

१८६८॥।=)॥१/४ सर्वयोगः

व्ययः

१००६) सुप्रभात-मुद्रापणे
१८६॥)।।। चिटिकासु
१६२।।।)॥ कर्मचारिषु
६२।-)।।।१/२ कार्यालये
१७)। राजकीय-परीक्षाफल-प्रकाशने
६८)। सं० स० समाजोत्सवेषु
३।=) प्रचारे
५।।।≡)।।।३/४ प्रकीर्णे
४।=) कमीशन-प्रदाने

१५२२।।-)॥१/४ सर्वयोगः
६६॥=) तारा यन्त्रालय-ऋण प्रदाने
३६॥≡)॥३/४ बनारसवैङ्क कोषे

१६५६≡)१/४ सर्वयोगः (व्ययस्य)
२०६॥≡)॥ अवशिष्टम्

श्रीमदनगोपाल शर्म्मा
कार्यालयाधिकृतः
१६ सौर फाल्गुन, ८५
परीक्षितं शुद्धञ्च
श्रीविक्रमादित्य त्रिपाठी
२।३।२६

सनातनधर्म-संरक्षकः ।

(उपदेशदर्पणस्य प्रथमसंख्या)

सङ्कलयिता—एकः काशीस्थः सनातनधर्मा विद्वानाचार्यः

पुस्तकमिदं हिन्दीभाषायां श्रुतिस्मृति-पुराणेतिहासशिलालेखादिप्रमाणाधारेण शुद्धिभोजनादिव्यवस्थाविषये लिखितमस्ति । विषयेऽस्मिन् बहुश्रुताभिलाषुकैर्वर्त्तमान-सामाजिक-धार्मिक-प्रगतिप्रतिस्पर्धिभिः खण्डनमण्डनकामैश्चावश्यं गृहेलिमसिदम् जिघृक्षुभिःसार्द्धाणकद्वयस्य =)॥ चिटिका प्रेष्या ।

रतिरहस्यम् (कोकशास्त्रम्)

एष प्राचीनो ग्रन्थः श्रीमहाकवि-कोकोक-विरचितः । अस्मिन् कामशास्त्रसम्बन्धिन्यः सर्वा वार्ताः, पद्मिनी-शङ्खिनी-चित्रिणी-हस्तिनी-प्रभृतीनां स्त्रीणां भेदाः, एवं चत्वारः पुरुषभेदाः, स्त्रीणां वशीकरणस्यौषध्यः, मन्त्राः, तत्तद्देशीयानां स्त्रीणां पुरुषाणाञ्च लक्षणानि, तेषां संयोगाः, आलिङ्गन-चुम्बनादीनां भेदाः, तेषां विशेषाश्च ग्रन्थे च बहवो ज्ञातव्याः कामशास्त्रीयाः विषयाः सन्ति । एष ग्रन्थो नितरां सुप्रसिद्धः प्राचीनश्च विद्यते । एतस्यैका प्रतिः सर्वैरपि स्वस्वविधे नूनं संस्थापनीया । मूल्यम्—मुद्राद्वयम् ।

सचित्रम् सामुद्रिकरहस्यम् ।

ले०—श्रीकालिकाप्रसादशर्म्मा, राजज्यौतिषी,

अद्भुतमिदं ग्रन्थरत्नम्, हिन्दीटीकासहितम्, अनेकचित्रविभूषितम्, नरनारीणां शुभाशुभज्ञाने नितरामुपयुक्तम्, संस्कृते सर्वथा नवीनमेव । एतेन हस्तरेखाणां गुरुं विनैव सम्यक् परिचयो भवति । मूल्यम् १।) मुद्रा ।

गोलविद्या गोलसूत्रञ्च ।

ले०—श्रीतारादत्तपन्तः, साहित्याचार्यः, काव्य-व्याकरण-तीर्थः

संस्कृते भूगोलज्ञानस्य प्रधानं प्रथमञ्च पुस्तकम् । अत्र हिन्दी-भूगोल-पुस्तकवत् भारतवर्षस्य समस्तो भूगोलः सरलतया बालानां ज्ञानाय समुपवर्णितोऽस्ति । संस्कृतकाव्येषु नाटकेषु पुराण-पुस्तकेषु च समागतानां देशानां नदीनां स्थानानां पर्वतानाञ्चाधुनिकी स्थितिस्तेषां नामानि च सन्ति । सर्वथा द्रष्टव्यमिदं पुस्तकम् । मूल्यम् ॥) आणकाः ।

राष्ट्रभाषाभूषणम् ।

ले०—श्रीगोपाल शास्त्री, दर्शनकेशरी, साहित्याचार्य्यः

एतत् पुस्तकं हिन्दीभाषायां विद्यते । संस्कृतज्ञानां हिन्दीज्ञाने नितरामुपकारजनकम् । सर्वैरपि संस्कृतज्ञैरेतद् व्याकरणम् पठनीयम् । एतेन हिन्दी भाषायां निबन्धलेखनेऽनुवादादिज्ञाने च महत्सौकर्यं स्यात् । मूल्यम्—सार्द्धाणकषट्कम् ।=)॥

महाकवि बाणभट्टः ।

लेः—सुप्रभात-सम्पादकः, श्रीकेदारनाथशर्म्मा

हिन्दीभाषायामयमपूर्वो निबन्धः । अत्र बाणभट्टस्य जीवनविषये महत्वपूर्णा, मननीया च गवेषणा वरीवर्ति । छात्राणां कृते नितरामुपकारकोऽयं निबन्ध-बन्धः । मूल्यम् =)॥

सर्वेषां प्राप्तिस्थानम्—

मैनेजर, सुप्रभात-कार्यालयः, बनारस-सिटी ।

Rg. N. 1348 A.

आवश्यक-सूचना ।

साम्प्रतं सुप्रभात-कार्यालयः गोदौलियास्थ-काशीनरेश-मन्दिरे, (यत्र प्रथमं "सनातनधर्मोदय"-कार्यालय आसीत्) सायं सार्द्धपञ्चादनं यावत् समुद्घाटितस्तिष्ठति। अगस्त्यकुण्डवीथीस्थ शारदाभवनकार्यालयेऽपि तस्मिन्नेव समये कार्यालयः सन्तिष्ठते। उभयत्र कार्यार्थिभिः समागन्तुं शक्यते।

संस्कृत-साहित्य-समाजः काशी।	**श्रीमदनगोपाल शर्म्मा।** कार्यालय-सहायकः,

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.

षष्ठ-वर्षे
सप्तमोऽङ्कः

कार्तिकः
१९८६

सुप्रभातम्

संस्कृत-साहित्य-समाजस्य सचित्र मासिकं मुखपत्रम् ।

तिमिर-ततिमुदस्यद् भेदताराविलुम्पन्, नयदधि-सुरभाषाभापि जागर्तिमुच्चैः ।
विबुध-विहग-वादैराह्वयद्भाग्यभानुम्, विलसतु भुवनेऽस्मिन् सर्व्वतः 'सुप्रभातम्' ॥

सम्पादकः—श्रीकेदारनाथशर्म्मा सारस्वतः

व्यवस्थापकः—

कविराजः श्रीसत्यनारायणशास्त्री भिषक्शिरोमणिः

(अगस्त्यकुण्डम्, बनारस-सिटी)

वार्षिकं मूल्यम्—३)
माननीयेभ्यः—१२)

छात्रेभ्यः—१॥)
वैदेशिकेभ्यः—५)

लेख-सूची ।

चित्र-सूची ।

सुप्रभातम्

विविध-विषय-विभूषितम्, अद्वितीयम्, सचित्रम्, संस्कृत-मासिक-पत्रम् ।

षष्ठ-वर्षे | सौर-कार्तिकः १९८६ विक्रमाब्दीये | सप्तमोऽङ्कः ।

मारुतिशतकम् ।

[क्रमागतम्]

प्रणेता—स्वर्गीय महर्षि रामावतारशर्म्मा ।

अव्यादव्याजभव्याकृतिरतनुरयव्यासनव्यानुभावः
सव्यासव्यादिदिव्यावनिरुहकुसुमार्चाभृदव्याकुलाङ्गः ।
क्रव्यादौघाञ्च्छरव्याण्युपदधदनिशं साधुरव्यात्मजार्थं
हव्याहारव्रजव्याहृतिविनुतिरसौ सज्जनानाञ्जनेयः ॥ २० ॥

सुग्रीवे क्लीबजीवे विवलति च नलेऽप्यङ्गदे भङ्गमाप्ते
ऋक्षेशे क्लेशशेषे स्खलति भयभरान्नीलवक्त्रे च नीले ।
रोषावेशादशेषं विकलयति वलं मेघनादे सनादं
ग्रासः प्राभञ्जनिर्द्राग्विरचयतु विपद्भञ्जनं सज्जनानाम् ॥२१॥

रक्षोवक्षोऽस्थिकक्षक्षपणचणभुजक्षेपिताक्षुद्रवृक्षः
क्षिण्वन्क्षिप्रं समीकक्षितिषु परवलक्षेममक्षय्यपक्षः ।
क्षुक्षामान्विमथ्नन् क्षणमतनुघृणो यक्षराजानुजाक्षान्
पीडाविक्षोभितक्ष्मः क्षुपमिव हनुमान् क्षीवतां वः क्षुणत्तात् २२

अत्रस्नुर्जत्रुयन्त्रं त्रसरमिव बलत्रातसुत्रामशत्रो-
र्मथ्नंस्त्रेतात्रिनेत्रस्त्रुटति निजभराद्धत्तगात्रस्त्रिकूटे
कुर्वन्पात्रं त्रपायास्त्रिदशरिपुपतिं पवित्रमाद्दष्टतन्त्रं
पुत्रो दुष्कर्मसूत्रं ह्रसयतु मरुतो वस्त्रयीत्राणसत्रः ॥ २३ ॥

सार्द्धं सार्द्धं परार्द्धं निऋतिकुलभुवां जानकीशोकजालैः
सार्कं साकम्परक्षः परिवृढकुतुकैरक्षमक्षय्यवीर्यः ।
निष्पिष्योद्यानसालां सह बहलतरैः संज्वरैर्निर्जराणां
लङ्कायां गर्जितं वो विदधदनिलभूरस्तु भव्याय शश्वत् ॥२४॥

स्पर्द्धागर्द्धावदर्द्धावधिविधृतधराधाविधाराधराणा-
मूर्ध्वं वर्धिष्णुगार्ध्रोद्धतगरुदनिलोद्धूतमूर्ध्ना रिपूणाम् ।
अद्धा श्रद्धां समृद्धामधिकमधिमृधं धूनयन् गान्धवाहि-
र्बुद्धेर्धर्म्यां विदग्धां धुतविधुरधुरां धोरणीं वो विधेयात ॥२५॥

अन्वाकृष्टैस्तटान्तात्सपदि रयवशाद्रोमकूपप्रविष्टैः
क्षुन्दन्वक्षांसि रूक्षक्षितिरुहनिकरै रक्षसां निर्गलद्भिः ।
पिंषन्पाषाणवर्षैर्गिरिभिरदितिजद्वेषिपाशस्य पस्त्यं
लङ्कोत्सङ्गे पतन्द्राक्प्रभवतु भवतां भूयते पार्षदश्विः ॥२६॥

द्रागम्भास्तम्भदम्भैः सह गलितजवोज्जृम्भितैर्यातुडिम्भैः
स्तम्भन्दम्भोलिकुम्भीनसगरुडभुजं हन्त ! जम्भारिशत्रुम् ।
संरम्भारम्भविष्कम्भितबलजिदवष्टम्भगम्भीरसेना
कुम्भीरं कुम्भकर्णं हरतु तव क्वणन् सम्भ्रमं कीशशम्भुः ॥२७॥

तूर्णं यद्घुणताणौनि,धानिभपृतनाकर्णधारं विचूर्णयौ-
दीर्णाङ्गं कुम्भकर्णं रणरणरणकोद्घूर्णसम्पूर्णकर्णम् ।
निर्णीयाभ्यर्णमाप्तं बलरिपुजयिनं तर्णकं स्वर्णवर्णः
सङ्कीर्णोऽन्तर्घृणासिस्तृणयतु हनुमांस्तेऽवकीर्णित्वदोषम् ॥२८॥
सर्वापूर्वो वनौका गिरिकलनपटुः प्रेष्ठधात्रीफलोऽसौ
केसर्यात्मावलीलावितत्तरुचिरतो राजकोपक्रियास्थः ।
वातायुस्थानशाली प्रियङ्कर उदिताघापहस्तिष्यहारी
भक्त्या रूपाणि विष्णोरनुविदधदिवास्त्वाञ्जनेयो विभूत्यै ॥२९॥
भिल्लीभस्भिल्लमल्लीपरिमिलिनि दरोत्फुल्लकाम्पिल्लवल्ली-
हल्लीसोल्लासमल्ले मरुति सति सरिल्लोलकल्लोलवेल्ले ।
झिल्लीक्षुल्लान्प्रचुल्लांल्लघुरजनिचरांल्लीलयोल्लोठ्य नर्द-
ल्लखानुल्लाघयन्सँल्लवयतु विपदं तल्लजो मर्कटानाम् ॥ ३० ॥
स्थेष्ठस्थूणास्थविष्ठोद्धतपारघभुजान्स्थावरस्थास्नुसंस्था-
न्ह्रास्थान्स्थाने विमथ्नन्स्थलमवदलयन्रक्षसां स्थायुकास्थः ।
स्थाणुस्थासासुरद्विट्स्थपतिपतिमसौ स्तम्भयन्स्थूलरक्षस्-
स्थाप्याच्छोकाधवस्थास्थिरमनिलभवः सुस्थतास्थासकं वः ३१
पृथ्वी पृथ्वी फणे सर्षपति फणभृतः पुण्डरीकत्यथासौ
पाथोधौ सोपि गण्डूपति करजठरे कुम्भयोनेः स्म खेऽसौ ।
खद्योतत्यप्यदः स्म क्षुपति बलिरिपोः षट्पदत्येष देवो
यद्बिम्बाब्जे करस्थामलकति स पुरा यस्य सो व्यात्कपिर्वः ।३२।
प्रलैर्वाचां प्रपञ्चैरपचितविभवश्चन्द्रचूडावतार-
श्चञ्चच्चञ्चोपचारां रजनिचरचमूं चञ्चलां चूर्णयन्स्तात् ।
चारुचेलाञ्चलाग्रं चपलमचतुरं चालयंश्चालयस्थं
चिन्तासम्भ्रान्तचित्तं निर्ऋतिकुलपतिं भूतये कीशचन्द्रः ॥३३॥
सद्यः खद्योतजालं द्युमणिरिव विनिर्मृद्य शत्रून्समद्या-
न्हृद्यामुद्यानमालां रजनिचरपतेर्द्योतवन्द्यो विभिद्य ।
माद्यन्विद्याधराद्यैः सरसपरिलसद्गद्यपद्यैरनिन्द्यै-
रुद्यद्वाद्यैर्नुतस्ते दिशतु पवनभूर्वृद्धिमद्यानवद्याम् ॥ ३४ ॥
यस्मिन्माहेन्द्रशृङ्गादतनुतनुरयेऽभ्युत्प्लुते मेघमार्गं
वेगाकृष्टः पयोधिः क्षुभिततिमिकुलो राजताद्रिप्रकाशे ।
चन्द्रभ्रान्त्याभ्युदञ्चन्निव विबुधवधूसंसदातर्क्युदर्का-
न्भद्रान्दिश्यादजस्रं स पवनतनुभूर्धार्मिकाणां जनानाम् ॥३५॥
चक्रीवच्चक्रवालं रथमभिदलयन्नाहवाम्भोधिनक्रः
क्रूरक्रव्यादचक्रक्रथनकृतमतिर्विक्रमाक्रान्तशक्रम् ।
क्रन्दत्क्रोष्टुकसन्द्राक[illegible] कोमलं
रक्षःक्रोडं विमथ्नन् क्रशयतु विपदं कीशपङ्क्रन्दनस्ते ॥ ३६ ॥

धर्मस्समाजश्च ।

ले० — श्रीपट्टाभिरामशर्मा ।

अयि पूज्यचरणाः ! नेदं तिरोहितं प्रेक्षावतां यत् सत्स्वपि देशान्तरेषु अधरीकृतधर्मेषु अर्थकामप्रधानेषु बहुषु अस्माकं पवित्रतमो भारतदेशः आसृष्टेरद्ययावत् धर्मोत्तर एवावतिष्ठते । अनेनैव च कारणेन देवा अप्यवाप्तकामा अनुपमेऽस्मद्भारतदेशे हार्देन भावेन जन्म वाञ्छन्ति इति । अमुनैव च हेतुना भगवान् अपरिमेयोऽपि, निर्गुणोऽपि, निरवच्छिन्नोऽपि, गुणातीतोऽपि सगुण इव मायाशबलितः भजते बहूनवतारान् धर्मानुष्ठानलोलुप इव । अमुमेव च धर्मं मनीषिणः सनातनं देशकालपरिच्छेदशून्यं अपुरुषलेशासंस्पृष्टेन अनादिनिधनेन सर्वज्ञकल्पेन शब्दराशिना वेदाख्येन विविधविधिकलापविलसितेन अर्थवादाद्युपबृंहितेन प्रतिपादितमामनन्ति । अयमेव च धर्मः पुरुषैः तत्तदधिकारविशिष्टैः यथावदन्यूनानतिरेकमपरित्यक्ताङ्गकलापं अनुष्ठानविषयीकृतः तस्मै तस्मै फलायावश्यं कल्पत इति ।

अतएव च भगवता महर्षिणा कणभुजापि 'यतोऽभ्युदयनिःश्रेयससिद्धिस्स धर्मः' इति धर्मलक्षणमुक्तम् । 'यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मपदवाच्य' इति भगवता शबरस्वामिना 'चोदनासूत्रे' धर्ममीमांसाभाष्ये सुस्पष्टमभिहितम् । एतावता प्रमाणजातेनेदमवगम्यते, यद् आत्मनो यथावदनुष्ठानेन अपारे दुःखोदधौ निमग्नान् प्राणिनस्ततस्समुत्तार्य तत्तदभिलषितमैहिकमामुष्मिकमु[illegible]कं वा फलं सपदि कालान्तरे वा प्रदाय यः प्राणिन उन्नयति लौकिके वा व्यवहारे पुरुषाणां

साध्वीं परिस्थितिं संपादयति, तत्तत्सामाजिकव्यवहारप्रवर्तनेन तत्समुदायात्मकं वा जगद्धिधारयति स धर्म इत्यावेदितं भवति । तत्र च पर्यालोच्यमानेषु श्रुतिस्मृतीतिहासपुराणादिषु द्वेधा धर्मस्वरूपनिरूपणमुपलभ्यते आमुष्मिकैकप्रयोजनं, ऐहिकसंवलितामुष्मिकैकप्रयोजनञ्चेति । तत्रामुष्मिकैकप्रयोजनेषु यद्यपि न दरीदृश्यते देशकालविपरिणामेन तस्यापि विपरिणामः, तथापि ऐहिकसंवलितेषु धर्मेषु आसृष्टेरद्ययावदसंख्येया विपरिवृत्तयस्समजनिषत तत्तत्समयानुसारेणेति करबदरसमानम् ।

स्मर्यते हि तत्र तत्र स्मृतिषु पुराणेषु च तत्तत्कालानुरोधेन विपरिणामो धर्मस्य । यथा वदति भगवान्सर्वज्ञकल्पो मनुः 'अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे । अन्ये कलियुगे नृणां युगह्रासानुरूपतः' इति ॥ अमुमेव चार्थं मनसि निधाय भगवान्पराशरोऽपि तत्तद्युगभेदेन धर्मभेदावश्यं भावात् तादृशभिन्नधर्मप्रतिपादिकानां स्मृतीनामपि तत्तत्कालानुरोधेन प्रामाण्यव्यवस्थामप्याह—'कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः । द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः' इति । यदि सर्वास्ववस्थासु कूटस्थाद्वैतब्रह्मवत् अविकार्यनित्यस्वरूपताधर्मस्य तत्प्रतिपादकस्य मानवस्य पराशरस्य वा ग्रन्थस्य एकरूपत्वावश्यंभावेन प्रतिपाद्यविषये लेशतोऽपि भेदाभावात् किमर्थं युगभेदेन प्रामाण्यविशेषमध्यवस्यति भगवान् पराशरो मानवे गौतमे वा ग्रन्थे । भगवता मनुनापि 'तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे' इति तत्तद्युगभेदेन तपः प्रभृतीनां धर्माणां व्यवस्था समपादि । यदि च सर्वदा धर्मस्यैकरूपता कथमियं व्यवस्था संगच्छेतेति विभावयन्तु सुधिय एव । अतो वयं मन्यामहे वेदे स्मृत्यादिषु च विहितेषु क्लेशसुलभसाध्येषु धर्मेषु सर्वेषामेषां समष्टिरूपस्य जगतोऽभ्युदयाय व्यष्टिरूपस्यैकैकरूपस्य जनिमतः श्रेयसे वा प्रवृत्तत्वाद्धर्माणां यदा यस्य यथानुष्ठानं जगतः श्रेयसे कल्पते तदा तस्य तथानुष्ठानं समुचितमिति प्राचामस्मत्पूर्वतनानां विदितवेदितव्यानां लोकानुग्रहैकाविष्टदृष्टीनां मनस्यासीदिति । अतएव यदा यदा धर्मस्य श्रुतिस्मृत्युदितस्यापि क्वचित्कदाचिद्देशकालाद्यनुरोधेन संकोचो विकासो वाऽपेक्ष्यते तदा धर्मज्ञास्सर्वेऽप्येकत्र संमिलिताः विचार्य लौकिकीं परिस्थितिं लोकानुग्रहैकधिषणाः तत्तद्देशकालानुसारेण निरणैषुः धर्मस्वरूपमिति तत्र तत्र पुराणादिषूपलभ्यते ।

अयमेव चाशयः धर्मं व्याख्यातुं प्रवृत्तेन भगवता आपस्तंबमहर्षिणा 'अथातस्सामयाचारिकान्धर्मान्व्याख्यास्यामः' इति धर्मस्य सामयाचारिकत्वविशेषणं ददता, अग्रे 'धर्मज्ञसमयः प्रमाणं वेदाश्च' इति वेदापेक्षया धर्मज्ञसमयस्य प्रथमतः प्रामाण्यमभ्युपगच्छता प्रकटीक्रियते ।

यदा वा अस्मत्पूर्वतनाः अस्मत्समाजस्य शक्तिह्रासमपश्यन्, बुद्धेरल्पताञ्चावालोकयन्, श्रद्धाया आत्यन्तिकमभावं ईक्षन्ते स्म तदा एकीभूय कलेरादौ कृपाविष्टचित्ताः कांश्चन धर्मान्प्रवर्तितवन्तः, कांश्चन पूर्वप्रवृत्तानपि न्यरुन्धन् । अमुमर्थं स्पष्टमेव वदन्ति श्रीमन्तो माधवाचार्याः पराशरमाधवीये–"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निर्वर्तितानि धर्माणि व्यवस्थापूर्वकं बुधैः" इति ।

अतः अद्यत्वेऽपि देशकालादिकमनुसृत्य समाजाभ्युदयाय यदि कश्चिद्धर्मनिर्णयः कर्तव्य आपद्येत; तर्हि अलोलुपैर्निर्मत्सरैः धर्मशास्त्रमर्मवेदिभिः वि-

द्भिर्मिलित्वा सुविचार्य निर्णीयेत धर्मपथः। मन्ये, नात्र दोषलेशोऽपीति। नैतावतायमाशयो मम यत् सर्वथा प्राचीनाचरितो धर्मः स्वमनीषानुसारेणोन्मूलनीय इति। अयि आर्यमहोदयाः! अवधत्त किञ्चिदिव; कीदृशी दुरवस्था सञ्जाता अस्मद्भारतदेशस्य! कीदृशं वा दुःखमनुभवन्ति अस्मद्भ्रातरो भगिन्यश्च! कीदृशो वा वज्राघातस्सञ्जनि अस्माकं पूज्यतमस्य सनातनधर्मस्य! सर्वत्रैषु कीदृशो वा ह्रासः प्रतिकूलं प्रजायते! क्वचिच्च वज्राघातं हन्यते यवनैः! क्वचिच्च समूलकाषं सम्पिष्यते क्रैस्तमतावलम्बिभिः! क्वचिच्चास्मद्भ्रातृभिरेव कैश्चिदपार्थकरणेन इतस्ततः शिखायां गृहीत्वा आकृष्यते धर्मः! मतान्तरीयैस्सर्वैरपि रात्रिन्दिवं स्वधर्मरक्षणे यतमानैरेव स्थीयते। अस्माभिस्तु सर्वदा सुप्यत एव। यदि इदानीमपि वयं पिनद्धाक्षाः 'तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं का पुरुषाः पिबन्ति' इति न्यायमेवानुसरन्तः एकामेव सरणिमनुगच्छेम; मन्ये नास्माकं अस्मद्देशस्य वा युगान्तेऽपि सन्तरणं भविष्यतीति। अतो महोदयाः 'उत्तिष्ठत! मा स्वपत! यद्यदस्मत्समाजविषये कर्तव्यं तस्य सर्वस्याविलम्बेन करणे सन्नद्धा भवत। धर्मज्ञानस्मद्गुरुवरान्शरणमन्विच्छत।

सत्यम्; समुद्रयात्रा देशान्तरगमनं वा शास्त्रनिषिद्धमिति परन्तु, आधुनिकीं परिस्थितिमनुसृत्य यदि देशान्तरगमनेन देशस्यास्मत्समाजस्य, सर्वोत्तमस्यास्मत्सनातनधर्मस्य, सर्वजनलालनीयायास्सुरभारत्याश्च अल्पीयानप्युपकारस्सञ्जायेत तर्हि अवश्यमेव तत्कर्तव्यम्। स एवास्माकं प्राथमिकः कर्तव्यो धर्मः। न तेन केनचिदपि अक्षितुमर्हति। अत एव च इदानीं राज्यपरिषदि-(असम्ब्ल्याख्यायां) कृतो वैवाहिकविषयनिर्णयः शारदाबिलाख्यः अस्माकं धार्मिके विषये हस्तक्षेपं करोतीति कृत्वा तं निरोद्धुं देशान्तरगमनं यद्यावश्यकं स्यात् तर्हि निषिद्धस्यापि धर्मोज्जीवनार्थं तस्य करणे न कोऽपि दोषः। अतस्सर्वैरपि विशालदृष्टिभिर्भूत्वा अस्मत्समाजोन्नतये यत्कर्तव्यं तदचिरादेव कृत्वा अस्मद्देशस्य अस्मत्समाजस्य, अस्मत्सुरभारत्याश्च समुन्नतिस्संपादनीया इति।

श्रीभगवते धन्वन्तरये विनिवेदनम्।

ले०—पण्डित श्रीगिरिजादत्त पाठकः, वैद्यभूषणम्।

घनाक्षरीच्छन्दः

विमला विभूतिस्तव सुहृदां सुखाय चास्तु,
सिञ्चतु सदैव सुधा-धारा वैद्य-वल्लरीम्।
गद-गज-वाहिनीयं विपिनम्प्रयातु दृष्ट्वा;
सत्वरं प्रयोग-पञ्चाननममितौजसम्॥
सुखिनो भवन्तु लोकाः नीरुजः शतायुषश्च
स्पृशतु न जातु चिन्ता-सर्पिणी शरीरकम्।
तिष्ठतु मनो मे पादपङ्कजे निरन्तरन्ते;
सुजनमनःसु मूर्तैरास्तामवः प्रतिक्षणम्॥१॥
शुष्यति सरोवरोऽयं सिञ्च सुधा-धारयाऽद्य
मुञ्चाऽधुना निद्रां कुरु कृपेक्षणं सत्वरम्।
देहि स्वां समज्ञां हर रोग-भव-बाधाः सर्वाः;
स्वल्पा इह प्राणाः प्रभो! जीवनं हि गत्वरम्॥
तिष्ठ मनोमन्दिरे मे निष्ठतामिविधेहि सदा;
धृष्टतां क्षमस्व क्रीड़ प्राप्य चित्त-चत्वरम्।
शल्यञ्च शलाकाप्राणधानं मृतकल्पं तयोः
सञ्जीवनाय देहि धन्वन्तरे! सुसत्वरम्॥२॥

परमं पवित्रञ्चारुचरणं निधेहि चात्र;
विघ्नरम्मनो मे तत्र सादरं प्रतिष्ठताम् ।
यानि चार्चनानि विहितानि तानि प्रतिगृह्य;
गदिनां सुवार्तं देहि सुखितां वलिष्ठताम् ॥
भगवन् ! मदीयं विनिवेदनम्विधेहि चित्ते;
कोऽपि न करोतु भिन्नभावयोर्ग्रनिष्ठताम् ।
वर्द्धतां सदैव शुभा प्रतिभा गदघ्नी तथा;
चायुषागमेषु मतिरेतु नो गरिष्ठताम् ॥ ३ ॥
मनसि स्मरन्तु सर्वे भिषजस्त्वदीयाकृतिं;
वचनं वदन्तु सत्यं रोगिणां हितङ्करम् ।
निपुणाः प्रयोगैः किल सर्वेषां सुखाय सन्तु;
दिव्यतु सदैव दिव्यौषधमगदङ्करम् ॥
वर्द्धताम्प्रभावः शुभः शोभतां स्वभावः सौम्यः,
दीप्यतां स्वतन्त्रं सरहस्यञ्च सुखङ्करम् ।
शल्यनिगमेषु शलाका साध्यामयेषु स्यातां
विशदा विशुद्धा बुद्धिर्ज्ञानञ्च शुभङ्करम् ॥ ४ ॥
भारतीया भूमिस्तवक्रीड़ास्थली विश्रुतैव;
काशीपते ! काशिकां सनाथीकुरु पुनरेव ।
स्वागताय चैते स्वल्पमतयः स्तुवन्ति वैद्याः
तेषां मनःकामनां सुपूरयाशु, देव-देव ! ॥
जगति प्रतिष्ठां प्राप्य परमं प्रमोदमेत्य;
सफला चिकित्सा भातु भेदं माऽस्तु किञ्चिदेव;
मुह्यतु भुवनत्रयं वीक्ष्य कर्मदादयश्चास्याः
सर्पतु समज्ञा सितीकर्तुं प्रतिलोकमेव ॥ ५ ॥

आयुर्वेदस्य वेदत्वम् ।

ले०—कविराजः श्रीसत्यनारायणशास्त्री भिषक्शिरोमणिः

परीवर्यैव सुविदितमिदं सर्वविदुषां चत्वारो वेदा इति, तत्राथर्ववेदस्त्रिस्कन्धो मन्त्रतन्त्रौषधविभागात्मकः । तेष्वौषधखण्ड एवायुर्वेदोऽत्र नास्ति केषाञ्चिदपि बुधवर्याणामनुपपत्तिः । सन्ति च यद्यपि ऋगथर्ववेदयोरुपवेदं मन्वाना बहवो विद्वांसः, यथाऽऽहुरेके-चरकादयो महर्षयः, आयुर्वेदो नाम यदुपाङ्गमायुर्वेदस्य, अपरे तु—अयमायुर्वेद उपवेदोऽथर्ववेदस्येति, तथा हि—ऋग्वेदस्योपवेद एष आयुर्वेद इति जावालिः । कात्यायनस्तु-ऋग्वेदस्यायुर्वेद उपवेद इति चरणव्यूहे । नात्रोभयोर्मतभेदः, अपि तु वेदत्रयीतिपदे ऋग्वेदस्योपवेदत्वमिति सर्वतन्त्रसिद्धान्तः, तत्र समासेनाभिहितस्यैव विषयस्य विस्तरेणोपबृंहणमथर्ववेद इति ।

तत एवोल्लिखामि प्रतितन्त्रसिद्धान्तापेक्षया सर्वतन्त्रसिद्धान्तस्य परमार्थतो बलवत्त्वादेकदेशीयवाक्यान्यननुस्मरद्भिः सर्वैरेव भिषग्भिर्वेदस्वरूपत्वमेव स्वीक्रियत इत्यायुर्वैदिकानामभिष्टिः ।

उक्तं हि भावमिश्रेण—

" अथर्वान्तर्गतं सम्यगायुर्वेदञ्च लब्धवानिति ।
यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
स भाति चरकाचार्यो वेदाचार्यस्त्रिलोकिषु ॥"

ब्रह्मवैवर्त्तपुराणे आयुर्वेदावतरणक्रमे—

" ऋगथर्वाभयोर्दत्तो वेदयोरौषधादिकम् ।
त्रिस्कन्धमायुषो वेदं भास्कराय ददौ विभुः ॥
भास्करश्च स्वशिष्येभ्य आयुर्वेदं स्वसंहिताम् ।
प्रददौ पाठयामास ते चक्रुः संहितास्ततः ॥"

इत्यादि ।

ब्रह्मवैवर्ते चैवमेवाह भगवान् व्यासः—

ब्रह्मवैवर्ते पुराणे १६ अध्याये ब्रह्मखण्डे ।

तथाच—

अथर्वा नामर्षिर्भूतविद्याऽऽचार्यो बलिमन्त्रादि प्रवर्त्तकः । यजुर्वेदस्य षडशीतिर्भेदाः । चरका द्वादश भेदाः । चरका आह्वरकाः । कठाः प्राच्य-कठाः । इति ।

योगवार्त्तिके विज्ञानभिक्षुः—योगेनेत्यादि ।

भोजश्च-पातञ्जल-सूत्रवृत्तौ—

शब्दानामनुशासनं विदधता पातञ्जले कुर्वता
वृत्तिं राजमृगाङ्कसंज्ञकमपि व्यातन्वता वैद्यके ।
वाक्चेतो वपुषां मलः फणिभृतां भर्त्रेव येनोद्धृतः ।

पाणिनीयव्याकरणे प्रौढमनोरमाखण्डनकारैः, चरकटीकाविधातृभिश्चरक चतुराननोपाधिविशिष्टै-श्चक्रपाणिमहोदयैः—

" पातञ्जल-महाभाष्य-चरकप्रतिसंस्कृतैः ।
मनोवाक्कायदोषाणां हर्त्रे हि पतये नमः ॥ इति ॥"

रामचन्द्रदीक्षितप्रणीते पतञ्जलिचरिते—

" सूत्राणि योगशास्त्रे, वैद्यके चरकसंहितामतुलाम् ।
भाष्यं पाणिनिसूत्रे, प्रचारयामास जगदिदं त्रातुम् ॥

इति ।

अथेन्द्रस्तदायुर्वेदामृतमृषिभ्यः सङ्क्रमय्योवा-चैतत् सर्वमनुष्ठेयमिति ।

किमधिकप्रलपनेन चत्वारोऽपि वेदाश्चिकित्सा-मात्रैकोद्देश्याश्चतुर्ष्वपि वेदेषु चिकित्साऽभिहितेति न सन्देहावसरः । बहवो मन्त्रा बह्व्यः श्रुतयः समुप-लभ्यन्ते, तत्र च कतिपया एव प्रदर्श्यन्ते विस्तर-भयात् ।

तद्यथा—

शीर्षक्तिं शीर्षाऽमयं कर्णशूलं विलोहितम् ।
सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ॥ १ ॥
कर्णाभ्यां ते कङ्कूषेभ्यः कर्णशूलं विशल्यकं ॥ सर्वं २ ॥
यस्य हेतोः प्रच्यवते यक्ष्मः कर्णत आस्यतः ॥ सर्वं ३ ॥
यः कृणोति प्रमोतमन्धं कृणोति पूरुषम् ॥ सर्वं ४ ॥
अङ्गभेदमङ्गज्वरं विश्वाङ्ग्यं विशल्यकम् ।
सर्वं शीर्षण्यंऽते रोगं बहिर्निर्मन्त्रयामहे ॥ ५ ॥
यस्य भीमः प्रतीकाश उद्वेपयति पूरुषम् ।
तक्मानं विश्वशारदं बहिर्निर्मन्त्रयामहे ॥ ६ ॥
उरु अनुसर्पत्यथो एति गवीनिके ।
यक्ष्मं ते अन्तरङ्गेभ्यो बहिर्निर्मन्त्रयामहे ॥ ७ ॥
यदि कामादपकामाद्धृदया जायते परि ।
हृदो बलासमङ्गेभ्यो बहिर्निर्मन्त्रयामहे ॥ ८ ॥
हरिमाणं ते अङ्गेभ्यो प्वामन्तरोदयात् ।
यक्ष्मोऽधामन्तरात्मानो बहिर्निर्मन्त्रयामहे ॥ ९ ॥
आसो बलासो भवतु मूत्रं भवत्वाभयत् ।
यक्ष्माणां सर्वेषां विषं निरवोचमहं कृत्वत् ॥ १० ॥

औषधप्रतिपादकमन्त्रा :—

ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे ।
सतंपमश्वं गां वास आत्मानं तव पूरुष ॥
अश्वावती सोमावतीमूर्जयन्तीमुदोजसम् ।
आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥
यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुस्परुः ।
ततो यक्ष्मं [illegible] मध्यमशीरिव ॥

अग्नेर्घासो अपां गर्भो यारो हन्ति पुनर्णवाः ।
ध्रुवा सहस्रनाम्नी भैषजी सन्त्वाभृताः ॥
मधुमन्मूलं मधुमदग्रमासां मधुमन्मध्यं वीरुधां बभूव ।
मधुमत्पर्णं मधुमत्पुष्पमासां मधोः संभक्ता अमृतस्य ॥
भक्षो घृतमन्नं दुह्रतां गोपुरोगगवम् ।
यावतीः कियतीश्चेमाः पृथिव्यामध्योषधीः ।
तामा सहस्रपर्ण्यो मृत्योर्मुश्चत्वं हसः ॥ इत्यादि ॥

अतएवोपरितनमन्त्रैर्निष्पक्षपातानां कोविदानामनुमोदितमेवेदं साग्रहं स्याद्-यदायुर्वेद ऋग्वेदाथर्ववेदयोरेकतमएवान्तर्भूतो न तूपवेदो धनुर्वेदादिवदिति ।

ये तूपवेदवादिनस्तेषामपि मते नास्य वेदत्वप्रतिघातो महर्षिभिः संगृहीतानामेव संहितानामुपवेदार्हता सम्भवाद् ।

अतोऽविसंवादिवेदत्वं सिद्धमायुर्वेदस्येति बोबुद्धयन्तां स्वस्वबुद्धौ बुद्धिमन्तो बुद्धिवैशद्येन सदसद्विवेचनपारवश्येन च ।

तथाच—वेद इवैनमधीयताम् मन्वतां निदध्यासन्तां सन्ततमविच्छेदेन शृण्वन्तु श्रावयन्त्वपि सदयहृदया जगदवनविहस्ताः प्रशस्तचरिताः सन्त इति शम् ।

प्रहसनम् ।

परिहासी :—अहो ! किमति महान् जन-सम्मर्दः अद्य लवपुरे दृश्यते ।

नलिन :—को भवान् ! तत्र भवान् किं न जानाति स्वराज्ये प्रतिज्ञा-पूरणाय महासभायां (कांग्रेस) भारतस्थ सभ्यलोकाः एकत्रोपस्थिता उपायनिश्चयं कुर्वन्ति ।

परिहासी :—मनुष्योऽस्मि इंग्लैण्डवासी अत्र नव एव समागतः, तत् पृच्छामि भारतेऽपि सभ्याः सन्तीति ?

नलिन :—(स्मितं कुर्वन्) कथम् ?

परिहासी :—अस्मद्देशे पतिव्रता अस्ति मिसमेयोनामा, सा कथयति, भारते स्त्रियः पुरुषाश्च असभ्या एव सन्ति ।

नलिन :—भवद्देशेऽपि पतिव्रता ! मिसमेयोनामा पतिव्रता ! कियतः पुरुषान् अनुभवन्ती पतिव्रता भवति (परिहसति) ?

परिहासी :—(हसन्) नैकमाश्रयन्ती पतिव्रता भवति, पतीन् व्रतयतीति पतिव्रता बहुवचनं हि आदरार्थे प्रयुञ्जते धार्मिकाः ।

नलिन :—(स्मयमानः) श्लाघ्या भवतां सभ्यता यत् प्रत्येकं स्त्री, पुरुषान् व्रतयन्ती एव पतिव्रता भवति, नैवमस्मद्देशे ।

परिहासी :—(हसन्) अथ एतावान् जनसमुदायः वाङ्मात्रमेव स्वराज्यस्य उपायं पश्यति, किमेतेन साध्यम् ? ।

नलिन :—सम्राट्प्रतिनिधिः स्वराज्य-प्रदानाय भारतनेतॄणां सम्मिलितसभां कर्त्तुम् उद्घोषयत्, तत्रैव विवादः प्रचलति ।

परिहासी :—अहो किं राज्यलाभोऽपि भिक्षया भवति (परिहसति) ।

नलिन :—शृणोतु भवान् सम्राट्प्रतिनिधौ विश्वासेन वर्तितव्यमित्येव विचारः । सन्नद्धा भारतीयाः नवयुवानः शक्त्यापि स्वराज्यलाभाय । नमस्ते, गच्छामि, मां समाह्वयन्ति स्वयंसेवक-पुरुषाः । इमौ सम्मिलय गच्छतः ?

—चैतन्यपतिः उपाध्यायः
छात्रः (सेन्ट्रल-हिन्दू-स्कूल काशी)

शरद्द्युतिः ।

सकलशस्ययुता शरदि क्षिति-
विमलवारिसरः ससरोरुहम् ।
विनतशालिफला निखिलस्थली
कलमशोभि पयो बहु शोभते ॥ १ ॥
कृशजवेन जलेन दिने दिने
शिथिलतां लभता निखिलापगाम् ।
कृततरंग सुरेखमिदं सखे !
सितपतत्रिरवैः पुलिनं भृतम् ॥ २ ॥
व्रजति सस्यचयः परिपाकताम्
लभत उद्धततां न तरंगिणी ।
हरति चेत इला गतपङ्कता
हरितशालिरुपैति पिशङ्गताम् ॥ ३ ॥
दिवि पतन्ति न शुक्लपतत्रिणः
धृतसुरेन्द्रधनुर्न घनावलिः ।
जलदकान्तियुता न हि ता दिशः
अति तथापि विभान्ति शरद्गुणाः ॥४॥
शिखिरवेऽपि विहाय रुचिं सुहृत्
श्रयति हारिमरालरुतं श्रुतिः
अवितथा न गिरा सुधियामियम्
परिचयो न गुणा अनुरागभूः ॥ ५ ॥

रमेशचन्द्र शुक्लः "अज्ञातः"
C/o. गङ्गामन्दिर
किसरौल मुरादाबाद ।

कृषकदैन्यम्

दिने हलाकर्षण-कर्षितानां निशागमेऽङ्गार-भयातुराणाम्
न सोऽस्ति कालः धनवर्जितानां स्वापाय यः स्यात्कृषिसंश्रितानाम् ॥ १ ॥
गृहे गृहे याहि निधेहि लोचने कृषीवले क्रूर-कुसीदवाहिनि ।
ततो निवृत्तस्य सुखं तवान्तिके वसेत्तदा भृत्यपदं मुदाश्रये ॥ २ ॥
क्षुधातुरस्यापि दिने जनस्य हा ! दिनान्तवेलाशन-बद्ध-बुद्धेः ।
नक्तं शिशूनां प्रतिबोधहेतोः पयोव्रतस्यैव सदापयाति ॥ ३ ॥
धनागमाच्छालिसमागमः क्वचित् तथापि चुल्लीषु न काष्ठसङ्गमः ।
धनागमाशा तु कृषीवलानां नपुंसकानामिव सूनुदर्शनम् ॥ ४ ॥

कवितार्किककेशरी
रामसुख मिश्रः ।

स्वभावोक्तिः ।

ले० — बुलुसु वेङ्कटरमणार्यः, साहित्यविद्याप्रवीणः ।

अयि विचक्षणास्सहृदयाः !

हिताहित-प्रवृत्तिनिवृत्तिफलकाभ्यां प्रभुसुहृत्संमिताभ्यां वेदपुराणाभ्यां तत्फलकस्यैव काव्यस्य कान्तासंमिततया खलु चारुता । तच्च काव्यं व्यङ्ग्यप्राधान्ये सति ध्वनिः । व्यङ्ग्याप्राधान्ये गुणीभूतव्यङ्ग्यमिति व्यङ्ग्यराहित्ये च चित्रमिति च गीयते । त्रिविधस्यापि काव्यस्योत्कर्षाधायकाः गुणालङ्कारादयस्सन्ति ।

यद्यपि काव्यशोभाधाने रीतिवृत्तिगुणाः परमुपकुर्वन्ति । किंतु अलङ्कारा एव गुणादीनतिरिच्य परं कव्यस्योत्कर्षतामापादयन्तीति न किञ्चिद्वैमत्यम् । अलङ्कारास्तावद्धारादिविभूषणस्थानीयाः । तथाहि—

"हारादिवदलङ्कारास्तत्र स्युरुपमादयः ।" इति ।

तस्माच्चाव्यक्ता गुणादयः, व्यक्ताश्चालङ्काराः । किंच

"न कान्तमपि निर्भूषं विभाति वनितामुखम् ।"

इत्यादिभिस्सूक्तिविदां वचोभिरुत्तमे काव्ये ध्वनावपि यदि अलङ्कारावश्यकता, का वार्ता तदितरकाव्ययोरपि तेषामावश्यकतायाम् ! अत एव साहित्यमीमांसारूपमलङ्कारशास्त्रं रसालङ्काराद्यनेकमपि अलङ्कारव्यपदेशतया व्यवह्रियते, अस्मिन् शास्त्रे अलङ्काराणामेव बहुलतया प्रतापरुद्रयशोभूषणव्याख्यायां रत्नापणस्य कर्ता कुमारसोमपीथी छत्रिन्यायमप्युररीचकार ।

अलङ्कारान् विसृज्य काव्यं न शोभाकोटीमारोहति ।

अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमिति तेषामलङ्काराणानां लक्षणान्तः प्रवेशो द्रष्टव्यः । तत्र तावत्प्रमाणानि दीयन्ते ।

"निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् प्रीतिं कीर्तिं च विन्दति ॥

(सरस्वतीकण्ठाभरणम्)

"काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत् ॥"
आदिपदेनालङ्कारपरिग्रहः ।" इति ॥

(अलङ्कारशेखरः)

"... प्रजानां व्युत्पत्तिमभिसंधाय सूरयः ।
वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् ॥
तैः शरीरञ्च काव्यानामलङ्काराश्च दर्शिताः ।
शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ॥

* * *

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ॥

(आचार्यदण्डी)

"काव्यं ग्राह्यमलङ्कारात् । सौन्दर्यमलङ्कारः ।
स दोषगुणालङ्कारहानादानाभ्याम् ।

(आचार्यवामनः)

"वाक्यं रसात्मकं काव्य" मिति काव्यलक्षणनिरूपयिता दर्पणकारः, "रमणीयार्थप्रतिपादकः शब्दः काव्य" मिति काव्यस्वरूपनिवेदयिता रसगङ्गाधरकारश्चालङ्काराः काव्यात्मनो रमणीयताप्रयोजका इत्युररीचक्रतुः ।

"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।" इत्यलङ्काराकरे काव्यप्रकाशे काव्यलक्षणं निरूपयितुराचार्यमम्मटस्यापि नास्त्यलङ्कारविषये वैमत्यावकाशः । अत एव स तावदेवमाह—"क्वापीत्यनेनैतदुच्यते यत्सर्वत्र सालङ्कारना । क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि" रिति । ततः स्फुटालङ्कारविरहेऽपि स्थले अस्फुटालङ्कारैरवश्यंभाव्यमिति फलितम् । नास्ति खलु तद्वाक्यं यद्यथा कथंवालङ्कारविहीनम् । न पारयन्ति कवयो विनालङ्कारं ग्रन्थान् रचयितुम् ।

अलङ्क्रियते काव्यमनेनेति चारुताहेतुरलङ्कारः । काव्यालङ्कारणे तस्यैव सामर्थ्यं नेतरस्येति तदलङ्कारपदमेवान्वर्थं व्यक्तीकरोति, तस्मात्सर्वालङ्कारिकमतेऽलङ्कारा नोपेक्षिता नोपेक्षणीयाश्च । रसादिभिन्नं यद् व्यङ्ग्यं तद्भिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयिता—सम्बन्धावच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वमेव तल्लक्षणमिति, अनुप्रासादिविशिष्ट शब्दज्ञानादुपमादिविशिष्टार्थज्ञानाच्च चमत्कारोदयात्तेषु लक्षणसमन्वय इति नवीनालङ्कारिका उररीचक्रुः ।

तत्र शब्दार्थालङ्कारमध्येऽर्थालङ्काराणामेव प्राधान्यम् । तथाहि । व्यङ्ग्यप्रधानं हि काव्यम् । वस्त्वलङ्काररसात्मना त्रिविधं तद् व्यङ्ग्यम् । तत्रालङ्कारविषयेऽर्थालङ्काराणामेव ग्रहणम्, न तु शब्दालङ्काराणाम् । तेषां शब्दप्रधानतया कदापि व्यङ्ग्यत्वासम्भवात्, किञ्च रसपरतन्त्रे काव्ये अनुप्रासयमकादयश्शब्दालङ्कारास्सुतरां निषेद्धव्याः । अन्यथा रसविच्छेदः स्यात् । शब्दालङ्काररहितं काव्यं सुललितपदबन्धबन्धुरं भासते । शब्दालङ्कारबन्धुरं तथा न सुज्ञेयम् । रसास्वादनैकहृदयस्य च श्रोतुरर्थगवेषणकारणानि शब्दालङ्करणानि अन्तरायरूपाण्येव भासन्ते ।

किंचार्थचित्राणां गुणीभूतव्यङ्ग्यतया मध्यमकाव्य—विषयताप्यस्ति खलु । शब्दचित्राणां तु निर्व्यङ्ग्यतया न तादृग्विषयता तेषामपित्वधमतैव ।

अर्थालङ्काराणां च संख्या इयतीति न कोऽपि वक्तुं शक्नोति, वस्तुस्वभावमनुरुध्य कल्पितास्तेऽलङ्कारास्संख्यातीतविषयतां भजन्ते, नास्ति तेषां कुत्रापि विश्रान्तिः । न तावच्चमत्कारिता कस्यचिदेव निधिः । व्यक्तिबुद्धिविशेषतश्चमत्कारा अप्यनन्ता एव, ततस्तन्मूलकानामप्यलङ्काराणां तदानन्त्यं केन वार्यते । भरतमुनिना चत्वार एवाऽर्थालङ्कारा इति निरूपितमासीत् । आचार्यदण्डी तावत्—

"काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ॥

इति वदन् सूक्ष्मतया पञ्चत्रिंशदलङ्कारानङ्गीचकार । नवीनालङ्कारिकाश्चाप्पयदीक्षिताः पुनः परश्शतानलङ्कारान्निरूपयामासुः । ततश्च सहस्रशो हि महात्मभिरन्यैश्चालङ्काराः प्रकाशिताः प्रकाश्यन्ते च । तस्मात्तेषामलङ्काराणामनन्तता सुप्रतिपादिता भवति ।

अस्तु नाम तेषामानन्त्यम्, तथापि ते सर्वेऽपि नालं प्रधानपदवीमारोढुम् । न च सर्वेषामप्रधानता । परंतु केषाञ्चित् प्राधान्यं केषाञ्चिदप्राधान्यञ्च । तत्रैकस्यैवालङ्कारस्य मुख्यता युक्ता ।

तदुपमामेव सर्वालङ्कारमूलभूतेति मन्यमाना आलङ्कारिकास्तामेव प्रधानतया गणयन्ति, अप्पयदीक्षितस्तु स्वरचितचित्रमीमांसायामुपमामेवादौ निरूपयंस्तामेव सर्वालङ्कारमूलभूतेतिवदंस्तस्यामेव सर्वेषामलङ्काराणामन्तर्भावमाचचक्ष । वक्रोक्तिं विना न काव्यस्योत्कर्ष इति सर्वेषामलङ्काराणां वक्रोक्तिरेव मूलमिति तदेवकाव्यजीवितमिति कुन्तकस्स्वरचितवक्रोक्तिजीविते निरूपयामास । किंच स्वभावकथनं विना न कस्याप्यलङ्कारस्योत्कर्षतेति मन्यमाना आचार्यदण्डिप्रभृतयः स्वभावोक्तिमेवादौ निरूपयन्तः तस्या एवाद्यालंकृतित्वमुररीचक्रुः ।

निपुणतरं विचार्यमाणे वस्तुस्वाभावख्यापनं विना नालङ्काराणामुत्कर्षता सुप्रतिपादिता भवति । तत्खल्वलङ्कारजीवातुभूतम् । वस्तुस्वभावं पिधाय उपायान्तरेण न पारयन्ति कवयस्तद्वस्त्वलङ्कर्तुम् । तथाहि ग्रीष्मर्तुवर्णने शीतोष्णस्थितिं पर्यालोचयन्

"मन्दमन्द मलयानिलवदतिशीतला निदाघवाता हृदयानन्दसन्धायिनो भवन्ती" ति यदि केनापि वर्ण्यते तत्वमतिरमणीयमुतारमणीयं पर्यालोचयन्तु सन्तः । तथा "भगवान् सहस्ररश्मिश्शीतकिरण इति" "शुभ्रांशुश्चण्डकिरण" इति न केनापि शक्यते वक्तुम् । तस्माद्वस्तुस्वभावमेव सुनिपुणैर्युक्तिभिर्वचोभिश्च विस्तारयन्ति कवयः । मुखचन्द्रयोरुभयोरपि वर्तुलत्वादि समानाकारतया, आह्लादकत्वादिसमानधर्मतया च मुखंचन्द्र" इति "अयं परिदृश्यमानस्सुधांशु र्नैवसुधांशुः, किंतु प्रेयसीमुखमेव सुधांशुरिति रूपकापह्नुत्यादिकमलङ्कारजातं जायते ।

वस्तुस्वभावं तिरस्कर्तुं न शक्नोति कविः । स्वभावत उन्नतानेव सौधान् दृष्ट्वा कविः स्वशक्तिं विनियुज्य "अस्य पुरस्य सौधाग्राणि विधुमंडलं स्पृशन्तीति वर्णयति । एतद्वर्णनं तावत् क्षुद्रकुटीरविषये कथमपि नोपयुज्यते खलु । यः कोऽपि वा कविः कंचिद्दुर्भदरिद्रं दृष्ट्वा "त्वं तावत्कुबेर" इति न

सुवाः । अप्रत्यक्षमपि वस्तु प्रत्यक्षीकुर्वन्त स्तत्रचारुतामापादयन्तः कतिचनैव कालिदासप्रभृतयो महाकवय इति गण्यन्ते, अन्ये तावत्स्वकीर्तिं स्वपुष्पेव जीर्णयन्ति, तेष्वपि महाकविषु कालिदास एवाग्रिमः । पश्यत—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टश्शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

(अभिज्ञानशाकुन्तलम्)

भो भोः पाठकमहाशयाः! रक्षन्तु तं तपस्विनं धावन्तं मृगपोतम् । पर्यालोचयत तद्गतिम् । जाग्रत! जाग्रत! अन्यथायमप्रेक्षणीयस्संवृत्तो भविष्यति, किमिति निश्चेष्टाः पश्यन्ति ? नायं मृगो भवद्दृष्टिगोचरः अपसर्तव्यं भवद्भिरिदानीं क्षणं मार्गात् । यतः—

मुक्तेषु रश्मिषु निरायतपूर्वकाया,
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोत्थितैरपि रजोभिरलङ्घनीया,
धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥

भो पाठकमहाशय! यदि त्वया तद्दृशा वाजिनः कदापि दृष्टा नो चेदप्रमत्तः क्षणमात्रं पश्य! अनुक्षणमेव ते भवद्दृष्टिपथमतिक्रामन्ति । किं वदसि ? अश्वैरेवोत्थितै रजोभिः किमपि न दृष्टिगोचरमिति, तत्तिष्ठ, साम्प्रतं तद्रथमेवारोहयामः । अपि त्वमुपविष्टोऽसि ? अद्य तावत्पश्य —

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किंचित् क्षणमपि न पार्श्वे रथजवात् ॥

किं ब्रवीषि ! रथवेगाच्छीर्षवेदना समुद्भूतेति, न भेतव्यं, न भेतव्यम्, अयमत्र युष्मत्पार्श्ववर्ती दुष्यन्तः, तथापि मास्म भूः प्रमत्तः क्षणमपि, अन्यथा त्वं रथादधः पतिष्यसि, यथैतःपूर्वं रथपथान्निवृत्तः स्वरक्षणमकरोस्तथैदानीमपि स्वात्मरक्षायै प्रवृत्तस्व । किं पर्यालोचयसि ? "नाय दृष्टपूर्वो रथवेग" इति । यदि त्वं कदापि धूमशकटमारुह्य ग्रामान्तरं गच्छेर्नैवं कदापि वदिष्यसि ।

अहो ! वयमतीव परिश्रान्ताः, तत्तस्मिंस्तपोवनाश्रमे क्षणमात्रं विश्रान्तिं लभामहे । पश्य, पश्य—

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥
सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥
आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्तितरोमन्थमुटजाङ्गणभूमिषु ॥

तपोवनमिदम् । सखे ! का पुनस्तत्र भवती सखी परिवृतास्ता । खलु स्वप्रमाणानुरूपैस्सेचनघटैर्बालपादपेभ्यः पयः पूदाय परिश्रान्तेति मन्ये । यस्याः खलु —

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।
स्रस्तं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः ॥

\+ \+ \+ \+ \+

किंतदन्यद्वनमिव लक्ष्यते, सत्यमियमन्या पर्णशाला । कौ पुनस्तौ जम्पती लक्ष्यामि किमिति वितर्कः । सत्यं तौ पुनः सीतारामौ । निवर्तस्व तावत् ।

"किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण ॥
अशिथिलपरिरम्भ व्यापृतैकैकदोष्णोः"

तयोर्नावां दृष्टिविषयौ भवावः। यदेतौ नौ दृष्ट्वा स्वानन्दं छेत्स्यतः। अन्यच्चादर्शनीयं खलु संयुक्तं युग्मम्।

अयि भोः एहि तावत्। पूर्वदृष्टे तपोवनाश्रम परिसरे आलाप इव श्रूयते तद्गत्वा शृणु। स्वपुत्रिकां भर्तृसकाशं प्रेषयन्महामुनिः काश्यपः किं व्याकुली भवति।

अपिनाम मुनेरपि व्यामोहविषयता, तद्वाक्यश्रवणे सावधानौ स्वः।

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥

साधु, काश्यप! साधु, साधु पुत्रिकावत्सल! साधु। युक्तमुक्तं भवता।

अयमन्यो रङ्गः। पाठक! पश्य तावदास्थानगतं राजानं शकुन्तलासहितान् मुनिकुमारांश्चाश्रुतं त्वया दुष्यन्तवचनं "नाहं शकुन्तलाया नामाप्यश्रणव" मिति, सा खलु तपस्विनी किं करिष्यति, अपितु मुनिकुमारसकाशमेव गच्छति। तौ तु तां वारयतः खलु। सा खलु—

"इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती——
(दुष्यन्ते)................................"

किमपि कर्तुं न शशाक। भो दुष्यन्त! त्वं तावदतीव कठिनः। यदिमाम् अशिक्षितकपटामेव तिरस्कुरुषे।

अयमन्यः प्रदेशः यदत्र दुष्यन्तोऽवगतशकुन्तलावृत्तान्तस्तां दूरत एव पश्यन्नात्मानमत्यन्तं निन्दयति, या खलु—

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला
...दीर्घं विरहव्रतं बिभर्ति॥

सा पुरतः परिदृश्यमाना शकुन्तलैव।

हन्त! प्रबुद्धौ स्वः, अतीतं खलु तत्सर्वं मति वृत्तम्। किंशताब्दीयो दुष्यन्तः, किंशताब्दीयौ आवाम्। परं तु स्वभावोक्तिवर्णननिपुणेन महाकविना गतमपि तद्वृत्तं प्रत्यक्षीकृतम्। प्रकृतमनुसरामः। नैतादृशी शोभास्वभावोक्तिव्यतिरिक्तस्थलेऽन्यालङ्कारेऽस्ति। पूर्वोक्तस्थलेष्वपि कीदृशी शोभेति यदि प्रश्नावकाशः, न पारयामस्तावद्वयं तद्विशदीकर्तुम्। अपितु रसास्वादपरैस्सहृदयैरेव निर्णीयताम्।

अप्पयदीक्षिताः पुनरुपमालङ्कारमेव बहुमन्यमानास्स्वरचितायामलङ्कारमीमांसायामर्थचित्रमीमांसायामुपमामेवादौ निरूप्य सा सर्वालङ्कारजीवातुरिति च निरूपयामासुः। सुचिरं सुनिपुणं विचार्यमाणे स्वभावोक्तिरेव प्रायस्सर्वालङ्कारजीवातुरिव परिदृश्यते इति प्रथममेव निरूपितं मया अत्र दिङ्मात्रं निरूप्यते।

"चन्द्र इव मुख" मित्युपमायां "चन्द्र इव मुखमिव चन्द्र" इत्युपमेयोपमायां "मुखं चन्द्र"

इति रूपके 'मुखं चन्द्र इति मन्ये" इत्युत्प्रेक्षायां, "नायं सुधांशुः, किंतु प्रेयसीमुखमेव सुधांशु" रित्यपह्नुतौ, " पश्य नेत्रोत्पलद्वन्द्वान्निःसरन्ति सिताः शरा" इत्यतिशयोक्तौ, "सङ्कुचन्ति सरोजानि स्वैरिणी वदनानि" चेति तुल्ययोगितायां चाह्लादकत्वादिकस्स्वाभाविकस्साधारणधर्मः सुव्यक्त एव भवति। तं धर्मं विना नालङ्कारस्य विषयता स्यात्।

"दिगन्तमगमत्तस्य कीर्तिः प्रत्यर्थिभिस्सह" इति सहोक्तिः, "विना खलैर्विभात्येषा राजेन्द्र भवतस्सभा इत्यादिर्विनोक्तिः, "हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपी" ति विशेषोक्तिश्च स्वरूपतः स्वभावोक्तय एव परेतु क्रमतः सहविनाविचित्रभावसंकलिताः। समासोक्तावपि "अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः" इत्यादौ प्रस्तुतवृत्तान्तस्वाभाविकवर्णनं विना प्रस्तुतवृत्तान्तप्रतीतिरेव नोपपद्यत इति तस्या अपि स्वभावोक्तिरेव मूलमिति निर्विवादम्।

किंचाप्रस्तुतप्रशंसायामपि "एकः कृतिः शकुन्तेषु योऽन्यं शक्रान्न याचते" इत्यादौ निवध्यमानमप्रस्तुतया चकवृत्तान्तावगतिपर्यवसायीति प्रस्तुतवर्णनस्यैव प्राधान्यात्तस्य च स्वभावोक्तिमूलैवेति भासते। "नमस्तस्मै कृतौ येन मुधा राहुवधूकुचा" विति पर्यायोक्तौ तावद्भङ्ग्यन्तरस्य प्रकृतविष्णुरूपप्रतिपाद्यस्य चोभयोरपि स्वभावाख्यानेव सुविद्धमास्ते। "अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथ" इत्यादौ विभावनायां मनसिजस्वभाववृत्तिरेव कथिताऽभवत्। अपिच "नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नति" मिति विचित्रालंकारे "निर्गते नीरे सेतुमेषा चिकीर्षती" ति ललिते च क्रमाद्वस्तुस्वभाव-प्रस्तुतवृत्तान्तवर्णनपरत्वमस्तीति तयोरपि निर्विवादं स्वभावोक्तिमूलत्वम्। किं बहुना, सामान्यतस्सर्वेऽलङ्कारास्स्वभावनिरूपणपरा एव। तस्मात्तेषां स्वभावोक्तावेव ते सर्वेऽन्तर्भवन्तीति वच्मि तदितररमणीयतया सह स्वभावोक्तिरपि तत्रास्तीत्येव मामकीनः पक्षः।

किं बहुना। अलङ्कारशास्त्राधारभूते अग्निपुराणेऽपि काव्यशोभायामर्थालङ्कारा एव परमुपकुर्वन्तीति तेषु स्वभावोक्तिरेवाग्रिमालङ्कार इति च सुप्रतिपादितम्। तथाहिः—

> अलङ्करणमर्थानामर्थालङ्कार इष्यते,
> तं विना शब्दसौंदर्यमपि नास्ति मनोहरम्।
> अर्थालङ्काररहिता विधवेव सरस्वती,
> स्वरूपमथ सादृश्यमुत्प्रेक्षातिशयावपि॥
> स्वभावएव भावानां स्वरूप मभिधीयते। इति


[अग्निपुराणेचतुश्चत्वारिंशदधिके त्रिशततमोऽध्ययः]

प्राचीनास्तावन्महाकवयो रसपरतन्त्राः शब्दालङ्कारमतिशयोक्तिमूलमलङ्कारञ्च नादृतवन्तः। क्लिष्टतापि तेषां ग्रन्थेषु न कुत्रापि परिदृश्यते अपितु सौशब्द्यमेव। तेषां शय्यातीव कोमला।

परिणामस्तावत्सर्वपदार्थ—साधारणः। तस्य वाङ्मयेऽपि प्रवृत्तत्वात्कालक्रमेण वाङ्मये अपि नूतना विकारास्सम्बभूवुः। अलङ्कारभूषणीभूता स्वभावोक्तिर्निरस्ता, सौशब्द्यमपास्तम्। शब्दालङ्कारपद्धतिस्स्वीकृता ओजोगुणोऽराजत। अतिशयकथनमेव प्रधानमासीत् तस्मात्तन्मूलका अतिशयोक्तिरूपमादयश्चाग्रस्थानीया बभूवुः। दृश्येष्वपि च काव्येषु शब्दालङ्करणमतिशयोक्तिं च बहुशो वर्णयद्भिस्तैःकविभिः किमिति स्वभावकथनं स्वीक्रियेतालङ्कारेषु प्रधानतः। अतएव कुन्तकमहाशयः वक्रोक्तिः (अतिशयोक्तिः) काव्यजीवितमिति स्वग्रन्थे निरूपयामास।

अपि च प्राचीनमार्गानुसरणे स्वोत्कर्षो न प्रतिभातीति च हेतोर्नवीनाः कवयः, नवीनाश्चालङ्कारिकाः उपमातिशयोक्ती एव परममन्यन्त। परन्तु वस्तुतत्त्वं परिशीलितुं कामयमानास्सर्वे सहृदया स्वभावोक्तिमेवोत्कृष्टतमां सम्भावयन्तु।

श्रीमान् सभापतिशर्म्मा व्याकरणाचार्यः ।



इमे खलु काशीस्थ-विरला-संस्कृत महाविद्यालयस्य प्रधानाध्यापकाः काशीस्थविद्वत्सु प्रथमांश्रेणीमलङ्कुर्वन्ति। इमे प्राचीन परिपाटी प्रसिद्धपण्डिता अपि धर्म-समाज-साहित्य-कार्येषु सर्वदा बद्धपरिकराः सन्तिष्ठन्ते । संस्कृत--साहित्य-समाजस्य प्रारम्भत एव मन्त्रणा समितेर्विशिष्टसदस्याः, सुप्रभातस्य च परम-पोषकाः सन्ति। एतेषामेव प्रयत्नेन साम्प्रतं दानवीरेण राज्ञा बलदेवदास-विरला महोदयेन सुप्रभातस्य साहाय्यं कृत्वा तस्य पुनर्जीवनं कृतम् । प्रस्तुत संस्कृत-साहित्य-सम्मेलनस्य स्वागत-समितेः कार्यकारिण्याः समितेरुपसभापतयः सन्ति ।

एभिर्वैयाकरण-लघुमञ्जूषाया एका नितरां सरला विस्तृता पाण्डित्यपूर्णा च टीका विरचिता, मुद्रिता च । (अस्याः विज्ञापनमन्यत्र द्रष्टव्यम्) पुस्तकमिदं व्याकरणशास्त्राध्यायिनां कृतेऽवश्यपठनीयं सङ्ग्राह्यश्च विद्यते । अन्तरङ्गेन सह बहिरङ्गमप्यस्या नितरां मनोहरम् । मुद्रणम्, मसृणत्वम्, पत्रम्, प्रकाशनम्—सर्वमिदं हृदयमाकर्षति। श्रूयते, अन्येषामपि विविधानां दुरूहग्रन्थानां सटीकं सटिप्पणञ्च प्रकटनं भविष्यति । लघुमञ्जूषाया विस्तृतं समालोचनं लेखरूपेणाग्रे भविष्यति ।

सं० सा० सं० विज्ञप्तिसंख्या—१

अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनम्,
प्रधान-कार्यालयः,
काशी-नरेश-मन्दिरम्, गोदौलिया,
वाराणसी......................१९ .

कार्य-समितेः सदस्य-सूचना।

श्रीमन्तः..

महानुभावाः

मान्याः !

विदितमेव तत्रभवतां यदिदानीं वत्सरे निखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्य द्वादश-मधिवेशनं फाल्गुनशुक्लाष्टमीमारभ्य दिनचतुष्टयं यावत् (मार्चमासस्य ८-९-१०-११ दिवसेषु) वाराणस्यां समजनीति। सम्मेलनस्य प्रधान कार्यालयश्च साम्प्रतं सम्मेलन प्रस्तावानुसारं वाराणस्यामेव प्रतिष्ठितः। अत्र सम्मेलनकार्यसंचालनाय कार्यसमितेर्नवीनं निर्वाचनमभूत्। यत्र श्रीमन्तः............... ....पदे निर्वाचिताः सन्ति। तद्वयं सादरं निवेदयामो यच्छ्रीमन्तः सत्वरमेव सदस्यतास्वीकृतिसूचनां संप्रेष्य नूनं सम्मेलनमिमं समनुगृह्णन्त्विति।

एतदपि निवेदनं यत् सम्मेलन-सदस्या एव कार्यसमितेर्निर्वाचिताः सदस्या भवन्तीति नियमानुसारं श्रीमद्भिः सहैव सदस्य—शुल्कप्रेषणेन सम्मेलन—सदस्यत्वमपि स्वीकर्तव्यमेव। तदर्थं सम्मेलनस्य सदस्य—पत्रं साकमेव प्रहीयते।

आशास्महे सम्मेलन-सदस्यतां स्वीकृत्य श्रीमन्तश्चिरविशृङ्खलितस्य सम्मेलनस्य पुनरुत्थाने बद्धपरिकराः सविशेषमस्य कार्य-सञ्चालने च दत्तावधाना भविष्यन्ति।

स्वीकृतिसूचना सत्वरमेव प्रदेया।

वशंवदः—

देवीप्रसाद शुक्लः
(महामहोपाध्यायः, कविचक्रवर्ती)
प्रधान मन्त्री।

अ० सा० सं० विज्ञप्तिसंख्या—२

अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनम्,

प्रधान-कार्यालयः,

वाराणसी..............................१९ .

सदस्य-सूचना ।

श्रीमन्तः...,

महानुभावाः

अयि मान्याः !

विदितचरमेव श्रीमतां यत्कियतःकालादखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्य कार्यं जातं कार्यकर्तॄणामभावेन शिथिलप्रायमासीत् । वर्षत्रयाच्च सम्मेलनस्य शैथिल्यमालोच्य वर्षेस्मिन् काशीस्थ-संस्कृत-साहित्य-समाजस्य प्रयत्नेन वाराणस्यां सम्मेलनस्य द्वादशमधिवेशनं समजनि एतस्य प्राधानकार्यालयश्च वाराणस्यामेव प्रतिष्ठित इत्यपि निश्चितं सम्मेलनेन । तदिदानीं श्रीमतामन्तिकं सादरं निवेद्यते यत् यतः प्रभृति सम्मेलनवार्षिकं शुल्कं न दत्तं श्रीमद्भिस्तत आरभ्यावशिष्टं साहाय्यं सम्प्रेष्य स्वीयां सदस्यतां सम्मेलनञ्च संरक्षन्तु । सदस्य-पत्रं सदस्यनियमाश्च सहैव सेवायां प्रहीयन्ते ।

यदिच श्रीमद्भिः पूर्वावशिष्टं साहाय्यं न प्रदीयेत चेत् पुनरस्मिन्नेव वत्सरे सदस्यत्वं स्वीकृत्य सम्मेलनस्य पुनरुद्धारे नूनं प्रयतन्तामिति सानुरोधं प्रार्थनम् । यतः संस्कृतप्रणयिनामियमेवैका संस्कृत-संस्था । यदि भवादृशा एवास्याः संरक्षण-सम्वर्धन-तत्परा न भविष्यन्ति चेत् कमन्यमालम्बनमवलम्बेत भगवती सुरभारतीति सत्वरमेव सदस्यपत्रं संपूर्य कार्यालये सूचनां प्रहिण्वन्त्विति ।

आशास्महे, सहृदय-धुरीणाः श्रीमन्तोऽत्रास्माकं निवेदनमवश्यमुररीकरिष्यन्तीति ।

निवेदयति,

देवीप्रसाद शुक्लः

(महामहोपाध्यायः, कविचक्रवर्ती)

(प्रधान मन्त्री)

सं० सा० सं० विज्ञप्तिसंख्या—३

अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनम्

प्रधान—कार्यालयः,

काशी-नरेश-मन्दिरम्, गोदौलिया,

वाराणसी ....१९ .

अयि आर्याः !

विदितमस्तु तत्र भवतां श्रीमतां यत् अखिल भारतीय-संस्कृत-साहित्य-सम्मेलनस्य द्वादशाधिवेशने द्वादश प्रस्तावानुसारं संस्कृतसाहित्यसमाजस्य तन्मुखपत्रस्य सुप्रभातस्य च सम्मेलनेन सह सम्बन्धः समभूदिति । तदिदानीं सुप्रभातं सम्मेलनस्य मुखपत्रत्वेन परिगृहीतम् । सम्मेलनस्य प्रबन्ध-समित्या तस्य प्रबन्ध-विषये स्वानुकूल्येन विहितः प्रयत्नः । तत्र मूल्यसम्बन्धिनो नियमाः सदस्यानां ग्राहकानामनुग्राहकानाञ्च विज्ञानाय प्रकाश्यन्ते ।

१—सुप्रभातस्य सर्वसाधारणं वार्षिकम्मूल्यं मुद्रात्रयं भविष्यति ।

२—सम्मेलनस्य साधारण—सदस्येभ्यः, छात्रेभ्यश्च मुद्राद्वयेन प्रदीयेत ।

३—सम्मेलनस्य साधारणसदस्यानां शुल्कं १) एका मुद्रा विद्यते । ये साधारण-सदस्य-शुल्कं दत्वा सम्मेलन-सदस्यत्वं स्वीकरिष्यन्ति, त एव मुद्राद्वयेन सुप्रभातं प्राप्स्यन्ति ।

४—साधारण-सदस्यातिरिक्तं सम्मेलनस्य विशिष्ट-मानार्ह आजीवन-संरक्षक-सदस्येभ्यो विनामूल्यं प्रदीयेत । विशिष्ट-सदस्यशुल्कं मुद्रापञ्चकं विद्यते ।

५—सुप्रभातं प्रतिसौरमासस्य २५ तमे दिवसे नियमतः प्रकाशितं भविष्यति, मासस्यान्तिम-दिवसं यावत्, ग्राहकानां सदस्यानाञ्च सविधे प्रेषितं स्यात् ।

६—सुप्रभातस्य प्राचीन-ग्राहकेभ्यो यथापूर्वं तावन्मूल्येनैव दास्यते यावत्तैर्दत्तम् ।

७—सुप्रभातस्य अष्टमादिद्वादशान्ता अङ्काः सम्मेलनाङ्करूपेण सहैव प्रकाशिता भविष्यन्ति ।

निवेदकः—

अम्बिकादत्त उपाध्यायः
(शास्त्री एम० ए०, काव्यतीर्थः,)
सहायक मन्त्री

सं० सा० सम्मेलन-कार्यालयः,
काशीनरेशमन्दिरम्,
गोदौलिया, काशी ।

Published by Gaurinath Pathak and printed by Rameshwar Pathak at the Tara Printing Works, Benares.